आचार्यमम्मटविरचितः

काव्य प्रकाशः

टीकात्रयसंवलितः

डॉ० गोपराजु रामा • डॉ० जगन्नाथपाठकः

गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठम्, प्रयागः

आचार्यमम्मटविरचितः

काव्य प्रकाशः

डॉ० गोपराजु रामा • डॉ० जगन्नाथपाठकः

गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठम्, प्रयागः

आचार्यमम्मटविरचितः

काव्यप्रकाशः

बालचित्तानुरञ्जनी–सारबोधिनी–दर्पणाख्यटीकात्रयसंवलितः

डॉ० गोपराजु रामा ● डॉ० जगन्नाथपाठकः

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम् , प्रयागः

प्रकाशक :

प्राचार्यः,

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम् , प्रयागः

द्वितीय संस्करणम् (५०० प्रतयः)

वर्षम् - २००६

मूल्यम् ....

मुद्रक :

एकेडमी प्रेस, दारागंज, प्रयागः।

आचार्यमम्मटविरचितः

काव्यप्रकाशः

टीकात्रयसंवलितः

- नरहरिसरस्वतीतीर्थविरचिता
  बालचित्तानुरञ्जनी
- श्रीवत्सलाञ्छनभट्टाचार्यविरचिता
  सारबोधिनी
- विश्वनाथकविराजविरचितः
  काव्यप्रकाशदर्पणः (संपूर्णम्)

डॉ० गोपराजु रामा • डॉ० जगन्नाथपाठकः

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम् , प्रयागः

१९७६

KĀVYA PRAKĀŚA

Of

Acharya Mammata

With

Three Commentaries

- Bālacittānurañjanī of Narahari Saraswatītīrtha
- Sārabodhinī of Śrīvatsalāñchana Bhaṭṭācārya
- Kāvyaprakāśadarpaṇa of Viśvanātha Kavirāja (Full Text)

Edited by

Dr. Goparaju Rama • Dr. Jagannatha Pāthak

Ganganatha Jha Kendriya Sanskrit Vidyapeetha

Allahabad

1976

Forward (Second Edition)

The present text Kavaprakasa with three unpublished commentaries (वालचित्तानुरञ्जनी, सारबोधिनी and काव्यप्रकाशदर्पण) was assigned to Dr. Goparaju Rama, then Research stipendiary, for editing in 1969. He did its editing with collation of other manuscripts procured from BORI, Poona, Varanasi and other places. Out of the three the Kavaprakasadarpana ms. pertains to the Vidyapeetha which was incomplete (upto Vth Ullasa only).

The text was printed and was released in September, 1976. After its release the editor was in pursuit of procuring the full text of the Kavyaprakasadarpana. At last he succeded in his efforṭs by locating the ms. in the BORI Poona. He made up his mind to bring it out with his own investment and succeded in the year 1979. It is a solitary manuscript.

Since the Kavyaprakasa is a sought after text all its copies got exhausted within a few years and the demand for its reprint has been pending since quite a long time.

Now its reprint is ready.

In the course of the reprint the editor of the Kavyaprakasadarpana decided to add the full text of the Kavyaprakasadarpana to the present reprint thus making all the three commentaries run in their full length. He surrendered his copyright on it.

The editor expresses his gratitude to the Rashytriya Sanskrit Sansthan for facilitating the text got reprinted.

27-2-06

Goparaju Rama
Principal

INTRODUCTION

If one is asked what is the most precious possession of Sanskrit poetics one would unhesitatingly say it is the Kāvyaprakāśa. Composed by Mammaṭa, a sanskrit scholar of Kashmiri origin during the 11th century, it attracted many a scholar of different branches of Sanskrit literature and consequently held the credit of having been commented upon by more than one hundred scholars during the span of subsequent nine hundred years. As a matter of fact it was regarded as an authority on Sanskrit poetics and was utilised as a source to assess one's own scholarship by way of writing a commentary on it, and thereby gaining the privilege of having been a commentator too.

The present work takes it a proud privilege to publish three unpublished yet very precious and important commentaries namely, the Bālacittānurañjanī, the Sārabodhinī, and the Darpaṇa.

Amongst the numerous commentaries that were written on KP, the first and foremost is Bālacittānurajnanī, Narahari Sarasvatītrītha being its author. He, according to the bio-data, mentioned in the opening verses of his commentary, hailed from the Andhra region and wrote the commentary in Kaśī, i. e. the present Banaras. Being the earliest commentator, he had no predecessors whose views and opinions, adverse or favourable were to be found in it. Therefore it happens to be important inasmuch as it happens to be the earliest commentary.

This text is based partly on one manuscript available in the Manuscript Department of the G. N. Jha, K. S. Vidyapeetha, and partly on the one borrowed from the Ujjain Ms. Library.

Sārabodhinī : Being held by many scholars as an authoritative commentary the Sārabodhinī of Śrīvatsalanchana occupies an important place in the field of Alamkarasastra. Śrīvatsalāñchana, the author of this text, hailed from Bengal. He was the son of a learned, though little known poet, Mahāmahopādhyāya Śrī Vishnu Bhaṭṭacharya Chakravarty. The biruda that adorns his name and its mention in the colophon of some manuscripts both go a long way in suggesting that he was indeed a great scholar of his days.

Srīvatsalāñchana, also known by other names e. g., Śrīvatsa, Srīvatsalāñchana Bhaṭtāchrāya and Śrivatsaśarman, is re-nowned not only as a poet or an original author on Sanskrit Rhetorics but more as a commentator on KP ; though he has been the author of Kāvyaparīkṣā, an excellent manual on poetics.

A great critic Dr. P. L. Vaidya who has evaluated the Kavyaparīkṣā of Śrīvatsalāñchana is of the opinion that he is a follower of the school of Caṇḍidasā, another commentator on KP. Prof. Vaidya puts forth his views in very clear terms as follows :

"To me it appears that the resemblance between *Caṇḍidāsa* and Śrīvatsa is not accidental

but clearly points out to the fact that Śrīvatsa is a follower of Caṇḍidāsa and belongs to the school of thought.

Apparently the view put forth by him does not seem to have been based on facts becaus• Caṇdiāsa's view on the definition of Kāvya is criticised twice by Śrīvatsalānchana. While commenting on the definition of poetry he says in the following words :

"तस्मात् आस्वादजीवातुः पदसन्दर्भः काव्यमिति काव्यसामान्यलक्षणमिति वदन्ति तन्न, तथाहि। आस्वादोद्वोधकत्वमेव काव्यत्वप्रयोजकम् । तच्छब्दे चार्थे चाविशिष्टम् ।

"यत्तु कैश्चिदुक्तम्-आस्वादजीवातुतावच्छेदकापरिचये तस्य ज्ञातुमशक्यत्वात् । तत्परिचये तस्यैव लक्षणत्वसंभवात् ।

Caṇḍīdāsa refutes the view that both *Sabda* and *Artha* do not constitute poetry, as held by Mammaṭa ; nay according to *Candīdāsa* it is the *Sabda* alone that constitutes poetry. Śrīvatsa, following the view of Mammāṭa negates the opinion advanced by Caṇḍīdāsa with the statement *tanna*.

Similarly Dr. Vaidya's opinion about the opening verse of Kāvyaparīkṣā of Śrīvatsa is difficult to be agreed to. In fact there is no definite clue in the verse to suggest that he has been a follower of Caṇḍīdāsian school of thought. Let us now analyse the opening stanza of Kavyaparikṣa which runs as follows :

काव्यमास्वादजीवातु : पदसन्दर्भ उच्यते ।
सालङ्कारगुणदोषौ शब्दार्थाविति कैश्चित् ॥

The verse merely mentions the views of the two different scholars on the definition of Kāvya. In fact there appears to be no word denoting the subject of the first clause, nor even any word that may suggest to be recording the opinion of Śrīvatsa. Thus it can hardly be concluded on the basis of this verse that Śrivatsa has been a blind follower of Caṇḍīdāsa. In fact his opinion is not at all recorded specifically rather it would be wrong to construe that the first clause records his opinion. The possibility of giving his definition of Kāvya so expressly in the very first verse is much more remote.

Though Śrīvatsa holds his independent views at places yet he does not differ radically from Mammaṭa. Thus while commenting on the *Vira-Rasa* he boldly adds its four more varieties. Yet he does not differ from Mammaṭa in principle. This is indicated by his modest statement *ityapi bodhyam* meaning merely that the additional varieties are rather his humble suggestions. The same is true when we read his discussion on the *Vyatirekālaṁkāra* and the *Vyāghātālaṁkāra*.

In fact, the text of the commentary written by Caṇḍīdāsa is not available in full it is difficult to re-count the views that have indeed been refuted by Śrivatsa. And hence no conclusive remarks are possible on the issue.

Śrīvatsa's commentary is a simple one and lucid in treatment. It does not enter into frequent scholastic discussions. It appears to be so because the author had the students in mind for whom he wrote and also imprudently named it as such.

He quotes from the following commentators ; all of them are therefore his predecessors.

1. *Mishra* :—Presumably *Vachaspati Mishra* of the 13th century A. D.

2. *Vidyānātha* :—Author of the *Pratāparudrīyam* of the beginning of the 14th century.

3. *Bhāskara* :—The Author of the commentary called *Sahityadīpikā* of the 15th century A. D.

4. *Jayarāma* :—His commentary is called *Tilaka* or *Jayarāmī*. He is assigned to the beginning of the 16th century A D.

His posterior date can also similarly be fixed on account of his having been quoted by the following authors.

1. *Kamalakarabhaṭṭa* :—Author of the commentary called *Kamālakarī* of Samvat 1668-1692 A. D. and *Panditaraj Jagannātha* ; whose precise date of literary activity is between 1620 to 1650 A. D.

From the above mentioned references, it may safely be concluded that Śrīvatsa flourished at a time not later than 1600 A. D. yet also not earlier than the second half of the 16th century. It can more positively be held so, for one manuscript of Sārabodhinī dated Saṁvat 1665-16 80 A. D. preserved in the BORI clearly indicates that the author might have lived round about 1550-1600 A. D.

Śrīvatsa is indeed very modest in his criticism, He does not name any of the commentators with whom he differs. He referred to them only as *kaiscit*, *kechit*, and *anyetu*, *apretu* etc. This is verily a very polished way of criticism. Thus Caṇḍidāsa also who belongs to 1300 A. D. is referred to by the words-*kaiścit* in the first ullāsa.

So also Śrīdhara is found to be referred at one place by the words *kechit*.

The main conclusion one can draw through after keeping these references in view is that Śrivatsa has established or even defended the views of Mammaṭa and has been successful in opposing or dispelling the unauthorised views of those little known commentators who has existed during two and half centuries before him.

Sources and references

The following manuscripts were utilised for collating the text. They have also helped in ascertaining the authenticity of the text. The varients if any which were found in them were recorded at the end of each ullasa as A. B. C. D. and so on in the following order.

So far as authenticity of the text is concerned, the manuscript available in the Saraswati Bhavan Library, Banaras catalogue supplies an almost accurate text.

The text in the manuscript is complete. It is written in bold Devanagari script. Its

orthographical peculiarities may be summed up insofar as the scribe has. It has been written very carefully and almost correctly, presumably the scribe has had followed the text and the subject matter fully inasmuch as he has written the whole text incorporating some *Visandhis*.

The Ms contains 176 folios, with 8 to 12 lines per page and each line containing 23 to 28 letters. The Ms. is free from any marginal notes,

It is dated Saṁvat 1890 (— 1833 A. D.). In the colophon occurs the following stanza :


नरसिंहतनूजेन सखारामेण धीमता ।
काव्यप्रकाशगा व्याख्या लिखिता गुरुतुष्टये ॥

सं० १८९० कार्तिकदुशमी ४ तद्दिने समाप्तोऽयं ग्रन्थः ।

Other manuscripts utilised if put in chronological order may be listed as follows :

1. The earliest ms. utilised of the Sārabodhinī of Śrīvatsa is found dated in the Saṁvat 1665=(1608 A. D.). This happens to be much nearer in point of time to Śrīvatsa rather it prompts to place our author somewhere between 1550 A. D. to 1600 A. D. This ms. is from our Vidyapitha.

"संवत् १६६५ विजयदशम्यमालेखि विश्वरूपकृष्णभट्टेनेदम् ।



2. The second ms. which is dated Saṁvat 1755—1698 A. D. is borrowed from the BORI, Poona.

The ms. written in clear Devanāgarī script. It contains 76 folios and each folio contains 14 to 17 lines and each line has 44 to 52 letters, Its size is 10" × 5". Repetition of letters words and even sentences are found to have been commited by the scribe while transcribing the ms. and are found corrected with the help of yellow termeric. The ms. is dated 1608 A. D.

It begins as follows :

"ढ अर्थो गिरामपिहितः पिहितश्च कश्चित् which happens to be the beginning of the 5th ullāsa. It ends with the following verse recording the date of the ms. :

शरशरमुनिचन्द्रैः संमिते मङ्गलेऽब्दे
हृदयरुचिरमासे कार्तिके प्राक्तभाजि ।
अलिखदसितपक्षे कृष्णदत्तो दशम्याम्
विबुधरमणटीकां मत्तकाव्यकाशाम ॥

This appears to have been written by two learned scribes. Apparently one wrote from the 59th folio to 123rd folio in a hand using very small letters while the other wrote it from the 123rd folio to the end in a hand forming comparatively bolder letters. The distinction between two is rather quite apparent and accisive too.

3. The third ms. which comes next in the chronological order is the one borrowed from the Scindia Oriental Library, Ujjain. It contains the complete text in 78 folios having 14 to 16 lines per page and each line containing 36 to 39 letters. It is again written in Devanagari script. It does not contain any corrections. It is reported to have been written in Gujarat during the year Samvat 1816—1759 A. D.

"ग्रन्थाग्रं ५१६० संवत् १८१६ मास फाल्गुन शुक्लपक्ष अष्टमी शनीवासरे भोलानाथसोमनाथाभ्यां लिखितोऽयं ग्रन्थः समाप्तः ।

4. The fourth dated ms. utilised is from the BORI, Poona. (Catalogue No, 40/1872—73). Bearing the litle "काव्यप्रकाशटीका (सारबोधिनी) श्रीवत्सलाञ्छन it comprises of complete text in 95 folios, each having 12 to 16 lines and each line containing 32 to 45 letters. The ms. is perhaps written by two different scribes because up to 32nd folios the letters are comparitively smaller in formation and the text is full of numerous corrections which shows that the ms. was evidently corrected by a subsequent scribe or some other persons. from the 33rd folio to the very end of the text the letters are bigger in size and the corrections are seldom. Though the numbering of pages is in serial order, yet the text seems to suffer from many a lacuna at many places. Thus on the 21st folio recording the text at the beginning of the 4th ullasa figure 21 does not appear and the text abruptly breaks with the words "अक्विलितत्वं, भ्रतात्पर्यं which clearly indicates that there was mistake even in the original ms. from which our copiest copied. It is better proved by the fact that its obverse side was left completely blank so as to contain the modified reading on a later date. From the 22nd folio the text starts from the sentence "ण सहकारि संयोगाद्रसनिष्पत्तिरित्यभिक्रियते which occurs in the middle of the discussion about the रससूत्र of the same ullasa. Apparently a small portion is found missing at this stage.

Besides such laeunca etc, some comes across some marginal notes recorded by a very young student or some one who did not know much of the rules of Sanskrit Grammar. This may well be illustrated by way of an instance on folio no. 31. "नायकश्च नायिका च नायक: as an example for the एकशेष. The note is obviously wrong and should read नायकश्च नायिका च नायकौ ।

However towards the end the scribe confesses that he has simply faithfully copied the previous ms. in the form it was available to him adverbum. He has in no case made any mistakes which could be ascribed to him.

The colophon of the ms. comes to a close with the words 'संवत् १८१६ वर्षे भाद्रपदमासे शुक्लपक्षे १२ भौमवासरे इद्रं पुस्तकं लिखितम् । i.e. the ms. was written (rather completed) on Tuesday the 12th day of the bright half in the month of Bhādrapada of Saṁvat 1816.

5. Another, undated, ms. is possessed in the Bori, Poona. It begins with the words "तिम्योयुक्ति वीरबीभत्सरौद्रयो: and ends with". "कुन्तस्यापि पुरुषावच्छेदकतया" The text here extends from the middle of the 4th ullasa to the middle of the 5th ullasa. It is written in clear Devanāgarī script by a simple person and contains 79 folios whereas each folio containing 10 to 24 lines and each line 48 to 53 letters.

6. Another undated ms. is also again borrowed from the BORI, Poona. It begins with the words "यो जन: इति वाक्यात्" and ends with the words "इति भट्टा:" Thus it comprises of the text from the beginning of the first ullasa to tbe very end of the 5th ullāsa. It contains 103 folios and each folio contains 17 to 20 līnes and each live 20 to 25 letters. The ms. is in the Devanagnrā characters.

I heartily acknowledge my thanks to the Institutions namely, Saraswati Bhawan Library. Banaras, Hinḍi Sahitya Sammelaṇ, Prayag, Bhandarkar Oriental Research Iṇstitute, Poona, and Scindia Oriental Library, Ujjain for lending us the mss. utilised in the preperation of the text of the present work.

Darpaṇa : The Kāvyaprakāśa Darpaṇa generally abbreviated as *darpaṇa*, was written by Viswanatha, who is the well known author of Sahityadarpaṇa. The text of the Darpaṇa is based on a solitary ms. preserved in the Mss. w'ng of the G. N. Jha. K. S. Vidyapeetha.

The ms. contains the text from the middle of second ullāsa and ends with the sixth ullasa Having earned a great reputation immediately after its composition as is evidenced by its having been quoted by later scholars. It is surprising that it could not see the light of the day so far perhaps only because its copies in mss. also are almost extinct for publishing completcly and our strenuous efforts to secure a complete copy of the same remained futile and its remaining portions could not be traced anywhere so far though we still with its discovery someday.

Beyond the few scraps of information gathered from the author's other works, wc add very little to the already known personal history of Viswanatha. The Darpaṇa informs us that the

present work was written only after he had completed Sāhityadarpaṇa and that Viswanatha hailed from Orissa and belonged to a brahmaṇa family, The author at one place mentions his ancestral pedigree which records that his great-great grānḍ father was Narayaṇa and his father was Chandrasekhara, all of them belonged to the galaxy of well renowned scholars.

Since the text is based on a solitary ms., the reading of the text at a few places *e.g.* in the V ullāsa posed a great ambiguity. At such places the reading of the ms. is accepted as it is, though corrected version as I understood has been inserted in square brackets.

Finally, I am grateful to Dr. Jayakant Misra whose inspiration enabled me to take up this work, to Dr. Aryendra Sarma who suggested the ways for proper presentation of the edition, to Dr. M. D. Balasubrahmanyam, to Dr. Mandan Misra and other Principals of the Vidyapeetha.

I am grateful indeed to Dr. Hari Hara Jha for his time and again encouraging me to have the printing completed. I always had the blessings of the revered Dr. B. R. Saksena, Chairman of the Editorial Board and am beholden to his affectionate queries about its progress.

Dr. Jagannath Pathak, my collegue lent his helping hand in critically analysing some of the difficult portions of the text and restoring the accurate and authentic reading of it. My thanks are also due to him.

I cannot close this prefatory words without expressing my special thanks to Dr. Brahma-datta, the Curator of our Vidyapeetha who very kindly went through the introduction and made valuable suggestions and corrections.

As this happens to be the first of my attempts, the critical edition is bound to have several shortcomings. I do humbly pray for the indulgence of the learned readers and request them to be kind enough to point them out so as to enable me to correct myself in my future undertakings,

I express my thanks for the Allahabad Bloek Works (Pvt.) Limited, Allahabad for takin8 meticulous care in printing this text.

GOPARAJU RAMA,
Research Officer.

विषयसूची

काव्यप्रकाशः

प्रथम उल्लासः

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति ।

बालचित्तानुरञ्जनी

श्री गणेशाय नमः ।

ढुण्ढिराजमभिनौमि सिद्धिदं विघ्नराजमभिसुन्दराधरम् ।
यस्य संस्मरणलेखतोऽखिलो [विघ्न एव ननु याति दूरतः] ॥ १ ॥

हंसगा सितदुकूलभूषणा त्रीक्षणा कुचनता चतुर्भुजा ।
देववन्द्यचरणा शुचिस्मिता भारती वसतु वाचि मे सदा ॥ २ ॥

जयन्ति गिरिजापतेश्चरणरेणवो येऽन्वहं
वहन्त्यखिलनिर्वृतिव्रततिसंततेर्बीजताम् ।
धृता हरिसुरेश्वरप्रभृतिभिः स्वमौलिस्थले
सतां कनकवत्तथा विमलयन्ति ये मानसम् ॥३॥

अपिपञ्चबाणभिन्नं गौरीमुखसाम्यलेशलोभेन ।
मौलौ सदा मृगाङ्कं कलयन् कल्याणकेलयेऽस्तु शिवः ॥४॥
विधातुकामः सुकृतं गरीयः क्षमातलं स्वर्ग इवावतीर्णः ।
आलम्बनं सर्वविशेषणानां जयत्यखण्डस्थितिरान्ध्रदेशः ॥५॥

स्थलमिव सुकृतानां लोकधात्र्याः समग्रं
विगलितमिव भूमौ नाकलोकस्य खण्डम् ।
नगरमतिगरीयः सर्वसंसारसार-
स्त्रिभुवनगिरिनाम्ना तत्र विख्यातमास्ते ॥६॥

तत्राभवत् सकलशास्त्रविचारपात्रं
श्रीवत्सगोत्रसुरकाननपारिजातः ।
अन्यत् विधातुवरलम्बनमाप्तवाचां
रामेश्वरः कलिकलङ्ककथान्तरीयः ॥७॥

आसीत् प्रमाणपदवाक्यविचारशील:
साहित्यसूक्तिबिसिनोकलजाग्रहंस: ।
ब्रह्मामृतग्रहणनाटितलोभवृत्ति-
स्तस्यात्मजो निपुणधीर्नरसिंहभट्ट: ॥८॥

तस्मादचिन्त्यमहिमा महनीयकीर्ति:
श्रीमल्लिनाथ इति मान्यगुणो बभूव ।
य: सोमयागविधिना कलिखण्डनाभि-
रद्वैतसिद्धमिव सत्ययुगं चकार ॥९॥

लक्ष्मीरिव मुरारातेः पुरारातेरिवाम्बिका ।
तस्य धर्मवराङ्ग्यासीन्नागम्मेति गुणाब्धिजा ॥१०॥

ज्येष्ठस्तदीयतनयो विनयोदितश्री-
र्नारायणोऽभवदशेषनरेन्द्रमान्य: ।
वाग्देवताकमलयोरपि यस्य गोत्रे
सीमाविवादकलहो न कदापि शान्त: ॥११॥

विरिञ्चेराचार्यो भुवि सदवतार: फणिपते:
त्रिदोषो दोषाणां सकलगुणमाणिक्यजलधि: ।
अवाचां प्राचां वा सकलविदुषां मौलिकुसुमं
कनीयान् तत्सूनुर्जयति नयशाली नरहरि: ॥१२॥

सवसुग्रहहस्तेन ब्रह्मणा समलङ्कृते ।
काले नरहरेर्जन्म कस्य नासीन्मनोरमा ॥१३॥

तत्काले सह मङ्गलेन गुरुणा मित्रेण लेभे वणिग्
राशिस्तु प्रमदाश्रयेण समभूदुच्चै: स काव्यो बुध: ।
सत् केतु: शुभहेतवे द्विजपतिर्जात: कुलीरागतो
मैत्रं शान्तिमयं दधान कलशं जन्मोत्सवाडम्बरे ॥१४॥

विचार्य सर्वं सुखमेव दु:खं सुधामये ब्रह्मणि लोलुपस्य ।
सन्न्यस्यतस्तस्य बभूव सार्था सरस्वतीतीर्थ इति प्रसिद्धि: ॥१५॥

तर्के कर्कशकेलिना बलवता हीनेन विद्यारसै-
र्मीमांसागुणमांसलेन परित: सांख्येऽप्यसांख्योक्तिना ।
साहित्यामृतसागरेण फणिनो व्याख्यासु विख्यावता
काश्यां तेन महाशयेन किमपि ब्रह्मामृतं पीयते ॥१६॥

काश्यां सरस्वतीतीर्थमतिना तेन रच्यते ।
टीका काव्यप्रकाशस्य बालचित्तानुरञ्जनी ॥१७॥

ननु **नियतीत्यादिरादिमश्लोकोऽनुपपन्नः** प्रारिप्सितकाव्यमीमांसाशास्त्रेऽनुपयुक्तत्वात् इत्याशङ्क्य प्रारिप्सितग्रन्थपरिसमाप्तिपरिपन्थिविघ्ननिरासहेतुनमस्कारलक्षणं मङ्गलाचरणप्रतिपादकत्वादुपपन्न एवेत्याह **ग्रंथारम्भ इति** । समुचिता एतच्छास्त्रप्रतिपाद्या इष्टा या देवता भारती तां काव्यमीमांसाकृत् सर्वोत्कर्षेण स्तौति ।

सारबोधिनी

श्री गणपतये नमः ।[1] श्री जगज्जनन्यै नमः ।[2]

रामं नत्वा चिदानन्दं संक्षिप्तां सारबोधिनीम् ।
श्रीवत्सशर्मा निर्माति व्याख्यां काव्यप्रकाशगाम् ॥

मङ्गलपरां प्रथमां[3] कारिकामवतारयति **ग्रन्थेति** । पञ्चाङ्गकं[4] वाक्यं ग्रन्थः ।

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ॥ इति ।[5]

विशयः संशयः । महाभारतादौ पञ्चाङ्गानां कृष्णार्जुनसंवादादौ सत्वान्नाव्याप्तिः । यत्रापि कानिचिदङ्गानि तिष्ठन्ति तत्रान्यानि कल्पनीयानि । तथाच वैज्ञानिकसंबन्धेन तत्र तद्वत्त्वम् ।

यद्वा संबन्धप्रयोजनज्ञानाधीनशुश्रूषाज्ञानजन्यश्रुतिविषयः शब्दसन्दर्भो ग्रन्थः संबन्धो वाच्यवाचकत्वरूपः ।

सिद्धार्थं सिद्धसंबन्धं श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः संबन्धः सप्रयोजनः ॥ इति

वाक्याद्ग्रन्थश्रवणे तथाविधशुश्रूषायाः कारणत्वात् । यत्र क्वापि घटमानयेत्यादि वाक्ये तादृशशुश्रूषायाः सत्त्वेऽपि तस्या न कारणत्वम् । अनेन एवंविधस्थलीये एवंविधवाक्यश्रुतिसामान्यसामग्र्या सन्निकर्षादिना तस्या अन्यथासिद्धत्वात्[6] । आरभ्यतेऽस्मिन् इत्यारम्भोऽव्यवहितप्राक्कालः। विशिष्टो घातो विघातः । समाप्त्ययोग-व्यवच्छेदो वैशिष्ट्यम् । ग्रन्थस्य वाङ्मयस्याधिकारितया वाग्देवताया औचित्यम् । देवतापदेन भारतीपदस्य वाक्परत्वव्युदासः । **ग्रन्थकृदिति** स्वस्मिन्[7] अधिकारकथनम् । परामृशति सर्वोत्कृष्टत्वेन प्रतिसंधत्ते । परामृशति स्मरतीति केचित् तन्न, अस्य व्याख्यानस्य व्याख्येयानुसारित्वाभावात् । वस्तुतस्तु, परामृशति परामर्शविषयीकरोति परामर्शश्च जयव्याप्यैतादृश-[8] विलक्षणनिर्मित्याधानवतीत्याकारो नियतीत्यादि हेतुगर्भविशेषणपदोपादानाल्लक्ष्यते[9] । अत एव वक्ष्यति "एतद्विलक्षणा तु कविवाङ्निर्मितिरत एव जयतीति" ।

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥१॥

नियतिशक्त्या नियतरूपा सुखदुःखमोहस्वभावा परमाण्वाद्युपादानकर्मादिसहकारि-कारणपरतन्त्रा षड्रसा न च हृद्यैव तैः, तादृशी ब्रह्मणो निर्मितिर्निर्माणम् । एतद्विलक्षणा तु कविवाङ्निर्मितिः । अत एव जयति । जयत्यर्थेन च नमस्कार आक्षिप्यते इति तां प्रत्यस्मि प्रणत इति लभ्यते ॥१॥

बालचित्तानुरञ्जनी—नियम्यते कमलसौगन्ध्यादिकं अनयेति असाधारणो धर्मः कमलत्वादिर्नियतिः तया कृतो यो नियमः तद्रहिताम्, ताम् । मुखादिकमलत्वादिना तादूप्यनियमात् अथवा अयं दरिद्रोऽयमीश्वर इति नियम्यतेऽनेनेति नियतिर्विधिः । एकं प्राचुर्येण प्रस्तुतम् । अस्यां सा एकमयी ह्लादैकमयी ह्लादैकमयी । अन्यथा एकश्चासौ ह्लादश्चेति समासे पूर्वकालेत्यादिना एकशब्दस्य पूर्वनिपातः स्यात् । कवेः सकाशादन्यस्य कारणस्य परतन्त्रा अधीना न भवति । कविपरतन्त्रैव । नचान्यपरशब्दयोः पौनरुक्त्यम् । परतन्त्रस्याधीनमात्रवचनत्वेन त्वत्परतन्त्रोऽपरतन्त्र इति प्रयोगदर्शनात् । नवरसाः शृंगारादयो यस्यां सा । सा रुचिरा मनोहरा च ताम् । नव च ते रसाः तै रुचिरेति न भवति । षड्रसेति न च हृद्यैवेति पृथग्विशेषणविधानविरोधात् । 'दिक्संख्ये संज्ञाया' मिति संज्ञायामेव समासविधानत्वात् । समाहारे तु नवरसी रुचिरेति स्यात् । एवंविधां निर्मितिं निर्माणं कुर्वती । न चात्र निर्मितिकरणयोः पौनरुक्त्यम्, नियतीत्यादिविशिष्टनिर्मितेः करणस्य च सामान्यविशेषभावेन विवक्षितत्वात् । कवेः काव्यकृतो भारती जयति । सा चोत्कर्षेण वर्धते । धातूनामनेकार्थत्वात् ।

अनेन च श्लोकेनैतद्ग्रन्थप्रतिपाद्यवस्त्वलङ्काररसरूपं ध्वनित्रयं प्रदर्शितं भवति । तथा हि । भवत्यर्थे नमस्काररूपं वस्तु ध्वन्यते । तथा

केनचिद्यत्र धर्मेण द्वयोः संसिद्धसाम्ययोः ।
भवत्येकतराधिक्यं व्यतिरेकः स उच्यते ॥

इति ब्रह्मनिर्मितेः सकाशाद्वाङ्निर्मितेराधिक्याद्व्यतिरेकालङ्कारो ध्वन्यते । तथा "रतिर्देवादि-विषया भाव इत्यभिधीयते" इति भारतीं प्रति कवेः रतिलक्षणो भावो ध्वन्यत इति ध्वनित्रयम् ।

अस्याः सर्वोत्कृष्टत्वं प्रतिपादयितुं, एतत्प्रतियोगिभूताया ब्रह्मसृष्टेः स्वरूपं निर्दिशति **नियतीत्यादि** । कमलत्वादिसामर्थ्येन नियतानि अव्यभिचारीणि रूपाणि यस्यां सा । अनेन प्रथमविशेषणाद्वैलक्षण्यम् । सत्त्वरजस्तमोमयत्वेन सुखादिस्वभावा । अनेन द्वितीयविशेषणात् । परमाण्वादिसमवायिकारणं च अदृष्टदिक्कालादि निमित्तकारणं च तदधीना । अनेन तृतीयविशेषणात् । मधुरादिषड्रसाः तैः रसैः । न च मनोहरैव । अनेन चतुर्थविशेषणात् । उक्ताया ब्रह्मसृष्टेर्वैलक्षण्यं वाङ्निर्मितेराह **एतदिति** । वक्तीति वाक् शब्दः । उच्यते इति वाक् अर्थः । उच्यतेऽनयेति वाक् अभिधादिव्यापारश्च । तन्निर्मितिः । उक्तादुत्कर्षादेव जयतिशब्दः प्रयुक्त इत्याह **अत एवेति** । ननु नमस्कार एव विघ्ननिरासकत्वेन प्रसिद्धः, न तु सर्वोत्कर्षेण स्तुतिरित्याशङ्क्याह **जयत्यर्थेनेति** । यत्र सर्वोत्कृष्टत्वं नमस्कार इत्यविनाभावात् इत्यर्थः । भारतीनमस्कार इत्यनन्वयमाशङ्क्य सामर्थ्यसिद्धिमत्त्वमाह **तां प्रत्यस्मीति** । अस्य च विवरणं **प्रणत इति** ।

सारबोधिनी—नियतीति। कवेर्भारती जयतीति संबन्धः। अन्यतो वैलक्षण्येनाराध्याराधकभाव-संबन्धे षष्ठी । अथवा कवेर्निर्मितिरिति योजना। सप्तम्यर्थे षष्ठी वा। कविं प्राप्येति ल्यब्लोपे पञ्चमी वा। निर्मीयत इति निर्मितिः काव्यम् । कर्मणि क्तिन् । निर्मितिरूपक्रियायां नियतीत्यादिविशेषण-संभवात्। आदधती प्रकाशयन्ती[१०] । न च लक्षणापत्तिः, इष्टत्वात् । शब्दार्थोभयरूपायाः काव्यनिर्मितेः कवावाधानस्य मुख्यार्थस्य बाधात् जयति उत्कर्षाश्रयो[११] भवति। एतादृशस्य स्तुतिरूपत्वान्मङ्गलत्वम्। तद्धेतुं निर्मित्युत्कर्षं दर्शयति **नियतीति** । नियतिरदृष्टम् । अत्राप्यदृष्टोपगमे नियमप्रत्ययवादाधिक्यम्। तदुक्तम्—

अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथैव परिवर्तते ॥ इति।[१२]

यद्वा, नियम्यन्ते भावा अनेनेति नियतिरसाधारणो धर्मस्तत्कृतो नियमः। यत्र पद्मत्वं तत्र सौरभविशेष इत्यादिरूपस्तद्रहितां[१३] काव्ये मुखादावपि तदुपगमात्। वस्तुतस्तु काव्यरूपनिर्मितावदृष्टा-धीनत्वं नास्त्येव[१४] । तथाहि। शब्दार्थौ काव्यम् । तत्रार्थो नित्यानित्यसाधारणः। तत्र कथमदृष्टाधीनत्वम्। न च तथा सति काव्ये कथं कविनिर्मितत्वादिव्यवहारः। तत्प्रकाश्यत्वादित्यवेहि।

ह्लादेति। ह्लादः सुखम्। एकशब्दो मात्रार्थः। मयट् स्वार्थे । तज्जनकत्वेन तत्त्वोपचारः। सुखमात्रस्य जनिकाम्। न तु दुःखमोहयोः । अन्येषां भावानां सुखदुःखमोहात्मकता । सर्वे त्रिगुणा भावा इति सांख्यवचनात्[१५]। यद्वा प्राचुर्ये मयट् ह्लादैकप्रचुरामित्यर्थः ।

अनन्येति । भारत्या अन्यस्य परस्यासाधारणस्य[१६] तन्त्राम् । अन्यपरतन्त्राम् पश्चान्नञा समासः। न च नित्यानित्यरूपायां काव्यस्वरूपनिर्मितावपरतन्त्रामित्येव वक्तुं युज्यते । न त्वनन्यपर-तन्त्रामिति वाच्यम् परपदोपादानात् । अनन्यपरतन्त्राम् असाधारण्येनानन्यप्रकाश्यामित्यर्थस्य विवक्षणात्।

नवरसेति। नवरसा यत्र सा नवरसा। [१७]पश्चान्नवरसा चासौ रुचिरा चेति कर्मधारयः। अत्र बहुव्रीहेरेव संख्यापूर्वकत्वान्न द्विगुत्वम्। तेनन नवरसीति प्रयोगापत्तिः।

उत्कर्षावधिदर्शनाय व्यतिरेकमुखेन विवृणोति **नियतीति**। **शक्तचेति कृतेत्यस्य विवरणम्। कारणतायाः शक्तिरूपत्वात्। कविनिर्मित्युत्कर्षस्य विशेषानुपादानेनाखिलनिर्मितेरेवावधित्वम् । सा च ब्रह्मण एव भवतीत्याह ब्रह्मण इति ।** कारिकास्थनिर्मितिपदं व्याचष्टे **निर्माणमिति** । निर्मीयत इति निर्माणम् । कर्मणि ल्युट् निर्माणमेव न सम्यगित्यर्थः । निर्मितिरूपक्रियायां नियतीत्यादिविशेषणा-संभवात्। अथवा ब्रह्मणो निर्मितिर्निर्माणम् । **अत एवेति**। यत एवं निर्माणमाधत्त इति पूरणीयम्। **अन्यथा असङ्गत्यापत्तेः । अत एवेत्यत्र एवकारो व्यर्थ इति ध्येयम् । अत्र हि ब्रह्मनिर्मित्यपेक्षया भारतीनिर्मितौ ब्रह्मापेक्षया भारत्यामाधिक्यं भासत इति व्यतिरेकालङ्कारध्वनिः । तथाहि । एतादृशीं निर्मितिमादधती जयतीत्युक्तौ एतादृशी निर्मितिरेतद्विलक्षणाया अन्यस्या निर्मितेः सकाशादधिकेति प्रतीयते । तत्कर्षोश्चोत्कर्षापकर्षौ । सा च प्रतीतिर्व्यञ्जनैकसाध्येति व्यतिरेको ध्वन्यते ।**

वस्तुध्वनिमाह **जयत्यर्थेनेति**[१८]। जयत्यर्थः उत्कर्षः। स च विशेषानुपादानात् सर्वप्रतियोगिको भवति इति भारत्यां सर्वोत्कृष्टत्वभाने तदपेक्षया सर्वत्रापकर्षज्ञानं समानसंवित् संवेद्यत्वनियमादिति सर्वान्तःपातिनि स्वस्मिन्नप्याराध्यापेक्षया सर्वत्रापकर्षज्ञानं वृत्तमेवेत्याह **नमस्कार आक्षिप्यत इति**। आक्षिप्यते व्यज्यते, ननु सर्वः प्रणत इत्येव प्राप्तम्। नत्वहं प्रणत इति तथाविधप्रणतिरेव सर्वैः क्रियत इत्यत आह **इति तां प्रतीति**। इति व्यञ्जनयैवेत्यर्थः। सर्वान्तर्गतोऽहमप्यपकृष्ट इत्यर्थो व्यञ्जनयैव लभ्यत इत्यर्थः[१९]। भारतीविषयक भावध्वनिश्च स्पष्ट एव। स च रसादिलक्षणोऽलक्ष्यक्रमध्वन्यन्तर्गतः[२०]। तथा चास्मिन् ग्रन्थे एतद्ध्वनित्रयं प्रतिपादनीयमिति सूचितम्[२१]।

इहाभिधेयं सप्रयोजनमित्याह।

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥२॥

कालिदासादीनामिव यशः। श्रीहर्षादेर्धावकादीनामिव धनम्। राजादिगतोचिताचारपरिज्ञानम्। आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्। सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्, प्रभुसंमितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्संमितार्थतात्पर्यवत् पुराणादीतिहासेभ्यश्च[२२] शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुणकविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यम्, न रावणादिवदित्युपदेशञ्च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम्।

बालचित्तानुरञ्जनी—ननु प्रारिप्सितग्रन्थस्य प्रयोजनमभिधानीयम्। तत् परित्यज्य काव्यस्य प्रयोजनाभिधानमसङ्गतमित्याशङ्क्य लक्ष्यस्य काव्यस्य प्रयोजनान्येव तल्लक्षणभूतस्य ग्रन्थस्य प्रयोजनानीति मत्वाह **इहाभिधेयमिति**। इह शास्त्रे काव्यमभिधेयम्। यशः प्रभृतीनि प्रयोजनानि लभ्यन्त इत्येतत् दृष्टान्तेनोपपादयति **कालिदासादीनामिव यशः इति**।

श्रीहर्षादे राज्ञः सकाशाद्धावकादीनाम् (मयूरादीनां) कवीनाम् अनर्थः कुष्ठरोगादिस्तस्य। शृङ्गारादेरास्वादनमनुभवः तज्जनितलौकिकानन्द इव दुःखसंसर्गोऽपि स्यादित्याशङ्क्याह **विगलितेति**। अस्तमितानि रसव्यतिरिक्तवेद्यानि यत्र। तमेवंविधमानन्दं करोति काव्यमित्युत्तरत्रान्वयः। तथा चोक्तं भरतेन।

पाठ्यादथ ध्रुवागानात्ततः संपूरिते रसे।
तदास्वादभरैकाग्रो हृष्यत्यन्तर्मुखः क्षणम् ॥
ततो निर्विषयस्यास्य स्वरूपावस्थितौ निजः ॥ इति ॥

पाठ्यादिति काव्यात् ध्रुवादिगीतगानाच्च । कान्तेत्यादि व्याचष्टे **प्रभुसंमितेत्यादि** । प्रभुसदृशेभ्यः शब्दप्रधानेभ्यः श्रुतिस्मृत्यादिभ्यः मित्रसदृशेभ्योऽर्थतात्पर्यवद्भ्यः पुराणन्यायादिभ्यः इतिहासेभ्यश्च विलक्षणम् । वैलक्षणे हेतुमाह **शब्दार्थयोरिति** । अर्थो वाच्योऽर्थः । गुणभावः अप्राधान्यम् । तत्र हेतुमाह **लोकोत्तरेति** । अलौकिकस्य रसादेर्वर्णनायां निपुणं यत् कवेः कर्म तत् काव्यं कामिनीव सरसत्वापादनेन सांमुख्यं विधाय विधिनिषेधात्मकमुपदेशं करोति । चकारः उक्तप्रयोजनसमुच्चयार्थः । ततश्च एतानि प्रयोजनानि कर्मभूतानि । काव्यकर्तुः कवेः काव्यार्थविचार-दक्षस्य च करोति । कथं करोतीत्याकाङ्क्षायामाह **यथेति** । योगमौचित्यमनतिक्रम्येत्यर्थः । औचित्यं चैवं यशोऽर्थानर्थकृतेश्च द्वयोरपि । व्यवहारोपदेशौ सहृदयस्यैव । निर्वृतिर्द्वयोरपि । निर्वृतिसमये कवेरपि सहृदयत्वात् इति । काव्यमित्यादेर्विधिसमन्वयाभावादपरिपूर्तिमाशङ्क्य पूरयति **इति सर्वथेति** । इति शब्दो हेतौ प्रयोजनवत्तयेत्यर्थः ।

सारबोधिनी—अथाङ्गिनः काव्यस्य फलेनाङ्गपरीक्षणरूपं ग्रन्थप्रतिपाद्यं फलवदिति हृदि कृत्वाह **इहेति** । आहेत्यत्र ग्रन्थकृदित्यनुषञ्जनीयम् एवं सर्वत्र बोध्यम् । इह वक्ष्यमाणकारिकायाम् अभिधेयं काव्यम् । परीक्षणीयतयेति शेषः । तेन काव्यफलप्रदर्शनं नानुपयुक्तमिति । कृते इत्यव्ययं तादर्थ्ये । यद्वा कृत् करणम् । तदनन्तरं चतुर्थी । योजनं युक् । "कृदभिहितो भावो द्रव्यवत् प्रकाशत[२३]" इति न्यायात् यक्तोपदेशायेत्यर्थः । यशःप्रभृति कर्मपदं वक्ष्यमाणकरोतीति पदेन योजनीयम् । कान्तासंमितेत्यादिनैव सिद्धे पुनर्व्यवहारविदित्यस्य ग्रहणमस्यात्यन्तावश्यकत्वार्थम् । परेत्यस्य विवरणं **सकलेत्यादि** । परेत्यस्यादौ व्याख्यानं सद्य इत्यनेनान्वितत्वभ्रमनिरासाय । सद्य इत्यस्य विवृतिः **समनन्तरमेवेति** । काव्यश्रवणादनुपदमेव, न तु यागादिवद्देहान्तरोत्पादनया[२४] । तत्र हेतुमाह **रसास्वादनेति** । रस आस्वाद्यते प्रकाश्यतेऽनेनेति रसास्वादनं विभावादिसंयोजनम् । तेन समुद्भूतं प्रादुर्भूतं, तेन तत्पात्रापेक्षित्वेन काव्यश्रवणानुपदमेव तत्संभवात्[२५] ।

ननु विषयोपरक्तचेतसां कथं तत्संभव इत्यत आह **विगलितेति** काव्यश्रवणस्यैव महिमा तदा किमपि वेद्यान्तरं न भासत इति । **प्रभ्विति** । यथा प्रभोराज्ञया कथं तां विनैव प्रवृत्तिरेवं वेदेऽपीति प्रभुसंमितत्वम् । तथाहि । ता हि तत्त्वप्रदर्शनया विहितनिषिद्धकर्मणोः प्रवृत्तिनिवृत्तिजननद्वारा सुहृत्संमितत्त्वम्, सुहृदाप्येवं विधानात् । तत्र नीवेरुद्धेश्यतया शब्दः शक्तो भाक्तो वेति न तत्राग्रहः । अर्थस्य प्राधान्यात् । तदाह **अर्थेत्यादि** । इदं काव्यं तेभ्यो विलक्षणम् । तत्र हेतुमाह **रसाङ्गभूतेति** । रसाङ्गभूतो व्यापारो विभावादिसंयोजनम् । शब्दार्थयोस्तत्प्रवणत्वं तदर्थमुपात्तत्वम् । अत एव तयोर्गुणी-भूतत्वम् । काव्यपदं विवृणोति **कविकर्मेति** । घटादिव्यावर्तनाय **लोकोत्तरेति** । लोकोत्तरा शब्दान्तरासाध्या । वर्णनां विभावादिप्रत्यायनात् । कर्मान्तरं तु नैवमिति इदं काव्यपदयोगकथनं लक्ष्यतावच्छेदककीर्तनं वा । अत्र सरसतापादनं काव्यमेव करोति न वेदादीत्यत्र प्रभुसंमितेत्यादि कविकर्मेत्यन्तं हेतुरिति बोध्यम्, तेन सुकुमारमतयो राजपुत्रादयोऽपि विनीता भवन्तीति सत्स्वपि वेदादिशास्त्रेषु काव्येष्वधिकाग्रहः । **समुचित इति** । अत एव वक्ष्यति "सर्वथा तत्र यतनीयम्" इति **रामादिदिति** । इदं तावच्छुभं कर्माचरणीयं नाशुभमित्येतत्परम् । तेन रामादिभिरपि कदाचिदन्यथाकरणे न क्षतिरिति । **यथायोगमिति** । व्यवहारोपदेशौ सामाजिकस्यैव न कवेस्तस्य तयोः सिद्धत्वात् । **अन्यथा** कवेस्तद्वर्णनानुपपत्तेः । अन्यानि सर्वाणि द्वयोरेव कवेरपि स्वकाव्यास्वादानुभवात् ।

एवमस्य प्रयोजनमुक्त्वा कारणमाह—

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥ ३ ॥

शक्तिः कवित्वबीजरूपः संस्कारविशेषः यां विना काव्यं न प्रसरेत् प्रसृतं वोपहसनीयं स्यात् । लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य । शास्त्राणां छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानाम् । काव्यानां च महाकविसंबन्धिनाम् । आदिग्रहणादितिहासानां च विमर्शनाद् व्युत्पत्तिः । काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति । त्रयः समुदिताः न तु व्यस्ताः तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतवः ॥३॥

बालचित्तानुरञ्जनी—नन्वेवंविधस्य काव्यस्योत्पत्तिरेव न संभवति उपायाभावादित्याशङ्कायां तदुपायप्रतिपादकमुत्तरं पद्यमित्याह **अस्येति**। अस्य काव्यस्य। शक्तिपदार्थमाह **शक्तिरिति**। कवित्वस्य बीजं[26] प्रतिभा।[27] तद्रूपः पूर्ववासनाविशेषः। तथा च **वामनः** कवित्वबीजं प्रतिभानमिति ।

ननु शक्तिरेव नास्ति तत्सद्भावे प्रमाणाभावादित्याशङ्क्य कार्यलिङ्गकमनुमानमस्तीत्याह **यां विनेति**। ननु शक्तिं विनापि काव्यमुत्पद्यत इत्याशङ्क्य उत्पन्नमपि लोकोत्तरेत्याद्युक्तलक्षणायोगादाभासरूपमित्यभिप्रेत्याह **प्रसृतं चेति**। निपुणताख्यद्वितीयहेतुं व्याचष्टे **लोकस्येति**। लोकदर्शनस्य कर्तुमशक्यत्वादुपचाराल्लोकशब्देन लोकवृत्तं गृह्यत इत्याह **स्थावरेति** । वृत्तमाचरणम् । कव्यकरणोपयुक्तानि शास्त्राणि दर्शयति **शास्त्राणामिति** । छन्दसः पिङ्गलादिविरचितात् अनुष्टुबादिवृत्तसन्देहनिरासः । व्याकरणात्पाणिनीयादेः शब्दशुद्धिः। आदिशब्दात् दण्डनीत्यादि । ततः नयापनयनादिज्ञानम् । अभिधानशब्दात् पदार्थनिर्द्धारः। कलाशास्त्रात् शै(नृ)त्यादेः कलातत्त्वज्ञानम् । **चतुर्वर्गेति** धर्मादिप्रतिपादकाच्च तत्स्वरूपपरिज्ञानम्। **काव्यानामिति**। रामायणादेर्महाकाव्याल्लक्षणपरिचयः। आदिग्रहणार्थमाह **आदीति**। इतिहासाद्भारतादेः पूर्ववृत्तादि ज्ञानम्। एतेषां विमर्शनाद्या व्युत्पत्तिः सा निपुणतेत्यर्थः । **काव्यज्ञेति** तृतीयं हेतुं व्याकरोति **काव्यं कर्तुमिति**। समुदिताकारद्योतकत्वेनेति शब्दं व्याकरोति **इतीति**। तदुद्भव इति व्याकरोति **तस्येति** । समुल्लासः सौन्दर्यम्। हेतुशब्दः सामग्रीवचन इत्याह **हेतुरिति**। एकैकहेतुवैकल्ये उत्तमकाव्योत्पत्त्यदर्शनात् प्रत्येकहेतुत्वमसङ्गतमित्याह **न तु हेतव इति**।

सारबोधिनी—ननु यतनीयमित्युक्तम्। यत्नस्तु कारण एव। तर्हि तद्वक्तव्यमिति तदाह **अस्येति**। अस्य[28] काव्यस्य निर्माणे समुल्लासे चेति शेषः[29] । इतिना त्रितयपरामर्शः। हेतुः फलायोगव्यवच्छिन्नं कारणम् । स्वरूपयोग्यं तु प्रत्येकमेव। **कवित्वबीजेति**। कवित्वं काव्यम्, सहृदयत्वञ्च । संख्यावान् पण्डितः कविरित्यनुशासनात्। कारणतायामर्थापत्तिं प्रमाणयति **यां विनेति**। आस्वादयोगितामप्याह **प्रसृतं वेति**। कविशक्त्या जनितमपि काव्यं यां सामाजिकशक्तिं विनाऽस्वाद-

सम्पादनविरहेण । उपहासः पुरुषोपहासः। [अनुपहसनीयं] काव्यमेव करणमिति करणे अनीयर् । अनास्थायां 'वा'-शब्दः, "किं तेन वा सुतेनास्य यो न चक्रे पितृक्रियाम्" इत्यत्रेव ।[१०]

केचित्तु वाकारस्य षष्ठ्या असंभवमर्थं व्याचक्षते, तदसत् । शक्तिं विना काव्यसंभवे तस्याः कारणता न स्यात् व्यभिचारात् । काव्याभासमात्रं तन्न काव्यमिति चेन्न, काव्यं प्रति कारणताग्रहे तदाभासोपहासप्रसञ्जनानौचित्यात् ।

अन्ये[११] तु प्रसृतं स्यादुपहसनीयं स्यादिति तर्काकार इति वदन्ति, तन्न । इष्टापत्तेर्वक्तुं शक्यत्वात्तर्कस्यासंभवात् । लोकपदस्य शक्यार्थमाह स्थावरेति । लक्ष्यार्थमाह लोकवृत्तस्येति। वृत्तानन्त्ये वर्णनानन्त्यं लक्षणाफलम् । अन्यथा धर्ममात्रवर्णने काव्यं संक्षिप्येत । अभिधानानि नामानि, तेषां कोशः सङ्ग्रहः । धर्मार्थकाममोक्षा वर्गचतुष्टयम् । अवेक्षणपदार्थमाह विमर्शनादिति । निपुणतां विवृणोति व्युत्पत्तिरिति । उपदेशेनेति शिक्षापदं व्याख्यातम् । इतीति । गृह्णद्[इति]व्याख्या । त्रयः शक्तिनिपुणताभ्यासाः । समुदिताः दण्डचक्रादिन्यायेन परस्परसापेक्षाः । व्यस्ताः तृणारणिमणिन्यायेन प्रत्येकं कार्यजनकाः । कुत एतदित्याह हेतुरिति । हेतुरित्येकवचनोपादानेनैतल्लभ्यत इति भावः । "जात्याकृतिव्यक्तयः पदार्थः" इत्येकवचनेन त्रिष्वेव यथा पदशक्यत्वं न तु प्रत्येकमिति ।

अत्र नव्याः, शक्तिरेव कारणम् । नापरौ, ताभ्यां विनापि डित्थेन काव्योत्पादनादित्याहुः । यत्र त्रयः समुदिताः, न तु व्यस्तास्तत्राप्येक एव शक्तिरूपो हेतुर्न तु हेतवः इति वृत्तिमपि गमयन्ति । अत एवोक्तम् 'कवित्वबीजरूप' इति[१२]। प्रकर्षे रूपमित्यनुशासनात् प्रकृष्टं बीजमित्यर्थो लभ्यते । तथा च प्रकृष्ट-मनन्यथासिद्धनियतपूर्ववर्ति । अन्ययोस्तु न तथाभाव इति भावः । अत एवास्य कारणमाहेत्युक्तम्। न तु कारणानीति ग्रन्थस्वरसमपि वर्णयन्ति । न च डिम्भेऽपि प्राग्भवीययोस्तयोः सत्त्वान्न व्यभिचारः, अत एव 'जन्म जन्म यदभ्यस्तमि'त्युक्तमिति वाच्यम्, अन्योन्याश्रयात् । तथाहि, सिद्धे कारणत्वे तयोः कल्पनं तस्मिंश्च सति कारणत्वमिति ।

एवमस्य कारणमुक्त्वा स्वरूपमाह

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।

दोषगुणालङ्काराः वक्ष्यन्ते । क्वापीत्यनेनैतदाह यत् सर्वत्र सालङ्कारौ, क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः ।

बालचित्तानुरञ्जनी––तददोषावित्यादिना सामग्री नोच्यते तस्याः प्रतिपादितत्वात् शब्दार्थव्यतिरेकेण काव्यस्यासंभवाच्च । नापि लक्षणं तस्य सालङ्कृतिके काव्ये वृत्तेरव्यापकत्वात् इत्याशङ्क्याह एवमस्येति । अस्य काव्यस्य एवमसाधारणं रूपं स्वरूपलक्षणमित्यर्थः ।

तदित्यनेन लक्ष्यं काव्यमुच्यते । तत्र शब्दः काव्यमित्युक्ते समुद्रघोषादावतिव्याप्तिः । अर्थ इत्युक्ते द्रव्यादौ । उभयोर्ग्रहणेऽपि श्रुतिकटुत्वादिदोषयुक्तं 'कार्तार्थ्य–(७ उल्लासे) मि'त्यादावतिव्याप्तिः ।

अत उक्तं अदोषाविति । तथापि माधुर्यादिगुणरहितेऽतिव्याप्तिः, तदर्थमुक्तं सगुणाविति । तथा गामानयेत्यादावतिव्याप्तिस्तदर्थमुक्तम् अनलङ्कृतीति । नञ् ईषदर्थे, अनुदरा कन्येत्यत्र यथा ।

तौ अस्फुटालङ्कारयुक्तौ इत्यर्थः । दोषादिनिरूपणमन्तरेण काव्यस्य निरूपणं न संभवतीत्यत आह दोषेति । श्रुतिकटुत्वादयो दोषाः । गुणाः रससमवायिनो धर्माः । अलङ्काराः रससंयोगवृत्तयः । अत एवाव्याप्तिः परिहृतेति वदन् क्वापीत्येतद् व्याकरोति क्वापीति । अलङ्कारसत्त्वमात्रस्य विवक्षितत्वादुभयत्रापि नाव्याप्तिरित्यर्थः । दोषस्य निन्द्यत्वेऽपि काव्यत्वमस्तीति दर्शयति यथेति ।

सारबोधिनी—तददोषाविति । तत् काव्यम् शब्दार्थयोरुपादानपौर्वापर्यं ज्ञानपौर्वापर्याद् । अत्र केचित्—

कविकर्म काव्यमिति समाख्यानुरोधात् शब्दे एव काव्यत्वं नार्थे । तस्य तत्कृत्यसाध्यत्वात् । तस्मादास्वादजीवातुः पदसन्दर्भः काव्यमिति काव्यलक्षणमिति वदन्ति । तन्न । तथाहि, आस्वादोद्बोधकत्वमेव काव्यत्वप्रयोजकरूपम् । तच्छब्दे चार्थे चाविशिष्टम् । तत्रापि रसोद्बोधकत्वाङ्गीकृतेरित्यर्थेऽपि दृश्यकाव्य इव काव्यत्वम् । कविकर्मत्वव्यवहारस्तु तत्प्रकाश्यत्वात् भाक्त एव । शब्दनित्यत्ववादिमते शब्दरूपेऽपि काव्ये कविकर्मत्वव्यवहारस्य भाक्तत्वात् । एवमर्थेऽपि काव्यत्वे सिद्धे काव्यं पठति काव्यं रचयति काव्यं शृणोतीत्यादिव्यवहारस्तु काव्यपदस्य शब्दमात्रपरत्वात् ।

अदोषाविति । अत्रादोषत्वं यत्किञ्चिद्दोषाभावो यावद्दोषाभावो वा ? नाद्यः, अव्यावर्तकत्वात् । यत्किञ्चिद्दोषाभावस्य सर्वत्र सुलभत्वात् । नापरः, तथा सति काव्यलक्षणं निर्विषयं विरलविषयं वा स्यात् । दुष्टेष्वपि काव्यत्वदर्शनात् । उक्तञ्च

कीटानुविद्धरत्नादिसाधारण्येन काव्यता ।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः ।। इति

अत्र केचित्"—विरलविषयत्वं काव्यलक्षणस्य स्पष्टमेव । दुष्टं काव्यमिति प्रयोगस्य दुष्टो हेतुरितिवत् समर्थनीयत्वात् । तेन दोषसामान्याभाव एव विवक्षणीय इति वदन्ति ।

मिश्रास्तु—अदोषपदस्य स्फुटदोषराहित्यमित्यर्थः । स्फुटत्वञ्च कविप्रतिभया तिरोधानाभावः । अस्ति हि प्रतिभावतां काव्ये कश्चन विशेषो यः सामाजिकान् "कांश्चिच्चित्रार्पितानिव कृत्वा दोषान् न ग्राहयतीत्याहुः ।

नव्यास्तु—अदोषपदेन दोषसामान्याभाव एव विवक्षणीयः । न चैवं, 'न्यक्कारो ह्ययमेव' इत्यादौ विधेयाविमर्शदोषसत्त्वादव्याप्तिरिति वाच्यम्, तत्रापि दोषसामान्याभावस्योपपादयिष्यमाणत्वात् । तथा हि,

अत्र वीररससञ्चार्यसूयाख्यभावस्वरूपास्वादे स्वन्यक्कारवैरिकृतपराभवस्वानुतापकीर्तनैरभिव्यज्यमाने फलबलात् रसापकर्षाभावाच्च । न्यक्कारो ह्ययमिति प्रतिकूलरचनेऽपि अयमेव न्यक्कार इति ज्ञानं स्यादेव । दर्पणे मुखमिति सत्यपि विशेषदर्शनं"[५] भ्रमवत् [?] । एवंविधज्ञानं तु परिनिष्ठितभावना-

वतामेव न तु प्राथमिकानां, तान् प्रति सदोषतवेति दोषं लक्ष्यत्वेन काव्यमिदं दर्शितम् [?]। नन्वेवं सामाजिकभेदेन एकस्यैव काव्यत्वमकाव्यत्वञ्च स्यादिति चेत् स्यादेवम्। काव्यत्वस्योपाधेः सप्रतियोगिकत्वस्येष्टत्वात् जातावेव सप्रतियोगिकत्वस्य दोषत्वात् तथा च वक्ष्यति "वक्त्राद्यौचित्यवशाद् दोषोऽपि गुणः" इतीत्याहुः।

अन्ये तु एकस्मिन्नेव पद्ये यदंशे दोषाभावस्तदंशे काव्यत्वम् यदंशे दोषस्तदंशेऽकाव्यत्वम्। तथा चैकमेव पद्यं काव्यमकाव्यञ्च। यथैकमेव ज्ञानं प्रमा चाप्रमा चेति दोषसामान्याभाव एव लक्षणे प्रवेश्य इत्याहुः।

सगुणाविति। काव्यस्य गुणवत्त्वं स्वव्यङ्ग्यास्वादसंबन्धेन, न तु साक्षात्, तेषां रसैकधर्मत्वात्। यथा रक्तः पट इत्यत्र परम्परासंबन्धेन रागः पटे। अनलङ्कृती इत्यस्य सालङ्कारत्वमर्थः। अन्यथा "अनलङ्कृती पुनः क्वापी"त्यनेनाननुगमः स्यात्। नन्वेवमपि गुणादीनां रसघटितत्वं रसस्य च विभावादिघटितत्वं, तेषाञ्च काव्यघटितत्वमित्यात्माश्रयान्योन्याश्रयचक्रकापत्तिरिति चेन्न। व्यक्तः सर्तैर्विभावाद्यैरिति रसलक्षणे विभावनादिव्यापारवत्त्वेन विभावादीनां प्रवेश्यत्वात्, न तु काव्यानुप्रवेशनेनेति क्वात्माश्रयादिदोषप्रसङ्गः।

यत्तु कैश्चिदुक्तं "आस्वादजीवातुः पदसंदर्भः काव्यमिति तन्न अस्वादजीवातुतावच्छेदकरूपापरिचये तस्य ज्ञातुमशक्यत्वात्। तत्परिचये तस्यैव लक्षणत्वसंभवात् अदोषत्वादिधर्मत्रयमन्तरेणान्यस्य तस्यासंभवाच्च।

अन्ये तु रसात्मकं वाक्यं काव्यमित्याहुः।

यथा

य: कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥ १ ॥

अत्र स्फुटो न कश्चिदलङ्कारः। रसस्य च प्राधान्यान्नालङ्कारता।

बालचित्तानुरञ्जनी—काचिन्नायिका रेवारोधसि कृतसङ्केता परपुरुषरतिमपह्नुवाना वयस्यां प्रत्याह। यः प्रथमसंभोगेन कौमारं हृतवान् स एव प्रेयान्। ता एव चैत्रमासरात्रयः विकसितमालतीपुष्पसुगन्धयः प्रौढाः रत्युद्दीपिकाः। त एव धूलीकदम्बवायवः, अन्यकदम्बानां वसन्तेऽसंभवात्। अहमपि सैवास्मि। अहमित्यर्थे अस्मीति निपातः। एवमत्र रत्युद्दीपकतादीनां सद्भावेऽपि तत्र अनुभूते नर्मदातीरे वेतसीतरूणाम् अधोभागे रतिव्यापारलीलाकरणे विषये मन उत्सुकं भवति। अत्र वरादिसामग्र्यां

सत्यां उत्कण्ठा[अनुत्कण्ठा ?]लक्षणकार्यानुत्पत्तिरिति विशेषोक्तिरलङ्कारः। सामग्र्यां सत्यां कार्यानुत्पत्तिरिति तस्य लक्षणम्। स चास्फुटः कार्यानुत्पत्तिकोटेरकथनात्। रेवातीरे चोक्तकारणाभावेऽपि उक्तकार्योत्पत्तिरिति विभावनालङ्कारः। कारणाभावे कार्योत्पत्तिरिति तल्लक्षणम्। स चास्फुटः कार्यानुत्पत्ति[कार्योत्पत्ति ?]कोटेरकथनात् इत्यभिप्रेत्याह अत्रेति। ननु रसस्य प्रतीयमानत्वात् रसवदलङ्कारः किमिति नोच्यते इत्याशङ्क्याह रसस्य हीति। प्रधानभूतो रसः [न त्वलङ्कारः] इति हृदि कृत्वाऽऽह नालङ्कारतेति।

सारबोधिनी—यः कौमारेति। कौमारमभिनवयौवनम् तत् प्रथमसम्भोगेनापनीतवान्। यद्वा, कौमारं बाल्यं, परमरसिकतया तत्रापि सम्भोगेच्छामुत्पाद्य तदेव हृतवान् चोरितवान्। एवकारहिकाराभ्यामन्ययोगव्यवच्छेदावगमः। मालती वासन्ती, न जातिः। कदम्बो धूलीकदम्बः, न धाराकदम्बः। तेन चैत्रक्षपा इत्यनेन न विरोधः। चैत्रक्षपा[१७] भाद्रक्षपा इति वा पाठः। वसन्ते सर्वाणि पुष्पाणि वर्ण्यन्त इति कविसम्प्रदाय इति केचित्। प्रौढाः स्वकार्यक्षमाः। चकारोऽस्मीत्यनन्तरं योज्यः। अहं च सैव। उत्कण्ठाहेत्ववस्थान्तरं न प्राप्ता। तत्रेति लीलाविधिरेवावरोधोवेतसीतरुतलेषु त्रिष्वप्यन्वेति। तेन लीलाविध्यादिरपि नान्यादृश इति।

स्फुट इति। अत्र प्राञ्चः, पतिसांनिध्याभावादेरुत्कण्ठासामग्र्या अभावेऽप्युत्कण्ठेति कारणाभावे कार्योत्पत्तिरूपाया विभावनायाः सत्त्वेऽपि न तस्याः स्फुटत्वम्। पतिसांनिध्याभावादेरुत्कण्ठाकारणस्याभावस्य तदभावाभावत्वेनानुपादनात्। किन्तु विरोधिपतिसांनिध्यमुखनैव। एवं पतिसांनिध्यादीनां धृतिकारणादीनां[१८] सत्त्वेऽपि न धृतिरिति कारणसत्त्वेऽपि कार्यानुत्पत्तिरूपाया विशेषोक्तेरपि न स्फुटत्वम्। विरोध्युत्कण्ठामुखेनैव धृत्यभावस्योपनिबन्धनात् न तु धृत्यभावत्वेन। तन्मूलश्च सन्देहसङ्करोऽपि न स्फुटः अस्फुटकोटिद्वयावलम्बनादित्याहुः। यत्र स्फुटतरश्चमत्कारस्तत्रालङ्कारान्तरमन्तरेण स्फुटरसत्वमेवालङ्कार इति दण्डिमतमाक्षिपति **रसस्य हीति।** हिरवधारणे प्राधान्यादेवेत्यर्थः। वाच्यादिपरिष्कारकताविरहात् तस्यैव परिष्कार्यत्वात् रसस्य नालङ्कारत्वमित्यर्थः। रसपदमत्र रस्यत इति व्युत्पत्त्या। संभोगसञ्चार्यौत्सुक्यमाह।[१९] विप्रलम्भपरमिति केचित्। पतिसांनिध्येऽपि स्वाधीनपतिकाया अपि क्रीडास्थानलाभेन सुरतप्रतिबन्धे तस्य साम्राज्यात् [?]। एतस्मिन् मते तत्रेत्यस्य स्नानकालानुमते इत्यर्थत्वात्। अधिकं तत्त्वबोधिन्यां द्रष्टव्यम्।

तद्भेदान् क्रमेणाह

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः ॥४॥

इदमिति काव्यम्। बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य।

बालचित्तानुरञ्जनी—**तद्भेदानिति**। तस्य काव्यस्य विशेषान्। **क्रमेणेति**। इदमुत्तममतिशयिनीत्यादिना शब्दचित्रमित्यन्तेन कथयतीत्यर्थः। वाच्यार्थात् अतिशयश्चमत्कारः यस्मिन्नस्ति तस्मिन् अतिशयिनि व्यङ्ग्ये सति इदं काव्यम् उत्तमं भवति। एतदेव बुधैः पण्डितैर्ध्वनिरित्युक्तम्। श्लोकगतेदंशब्दार्थमाह **इदमितीति**। ननु शब्दार्थरूपं काव्यं ध्वनिर्बुधैरुक्तः इत्येतन्नोपपद्यते यतो बुधैरेव वैयाकरणैः केवलस्यैव शब्दस्य ध्वनिरिति व्यवहारः कृत इत्याशङ्क्य परिहरति **बुधैरिति**। प्रधानभूतो यः स्फोटः तद्रूपं यद्व्यङ्ग्यं तद्व्यञ्जकस्य शब्दस्य ध्वनयतीति व्युत्पत्त्या ध्वनित्ववत् अर्थस्यापि ध्वनयतीति व्युत्पत्त्या ध्वनित्वमङ्गीकृतमेव, तुल्यन्यायत्वादित्यर्थः। वैयाकरणैरर्थस्य ध्वनित्वेन कुत्रचिदव्यवहारात् तदङ्गीकृतिः कथं ज्ञायत इत्यत आह **तत इति**।

यतस्तैरङ्गीकृतम् अतः कारणात् वैयाकरणानुसारिभिरन्यैरपि बुधैर्न्यग्भावितमुपसर्जनीकृतं वाच्यं येन तस्य व्यङ्ग्यस्य व्यञ्जनसमर्थं यत् शब्दार्थयुगलं तस्य ध्वनिरिति व्यवहारः कृत इत्यनुषज्यते। तुल्यन्यायत्वात् वैयाकरणैरर्थस्यापि ध्वनित्वमङ्गीकर्तव्यम्। अतो बुधैर्ध्वनिः कथित इत्येतत् सङ्गतमित्यर्थः।

सारबोधिनी—इदानीं विभागविशेषलक्षणयोरवसर इति ते आह **तद्भेदानिति**। भेदनं भेदो विभागः। भिद्यतेऽनेनेति भेदो विशेषलक्षणम्। तथा चोत्तमत्वादिना विभागो ध्वनित्वादिना च विशेषलक्षणमिति मन्तव्यम्।

वाच्यादिति। वाच्यः पदार्थो वाक्यार्थश्च। गुरुनयेऽन्वयस्यापि वाच्यत्वात्। **अतिशयिनीति**। अतिशयश्च वाच्यादधिकचमत्कारकारित्वम्[४०]। ध्वनिव्यवहारस्य समूलतामाह **बुधैरिति**। बुधैरित्यस्यान्यैरित्यनेनान्वयः।

केचित्तु, वैयाकरणैरिति अन्यैरिति द्वाभ्यामप्यन्वयः, अन्यैरपीत्यत्र अपिशब्दबलादित्याहुः। **प्रधानेति**। अर्थप्रत्ययरूपफलोत्पादकत्वात् प्राधान्यम्। स्फुटयति प्रकाशयत्यर्थमिति स्फोटः। अयमर्थः, शब्दात् कथं पदार्थवाक्यार्थधीः आशुविनाशिनां क्रमिकाणां वर्णानां मेलकाभावात् आनुपूर्व्या ज्ञातुमशक्यत्वाच्च। तेन च पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितान्तिमवर्णानुभवेन स्फोटो व्यज्यते। स च ध्वन्यात्मकः शब्दो नित्यो ब्रह्मस्वरूपः सकलप्रत्येयप्रत्यायनक्षमोऽङ्गीक्रियते तद्व्यञ्जकश्च वर्णात्मकः शब्दः। वृत्तिस्तु व्यञ्जनैव। तद्व्यञ्जकश्च शब्दो ध्वनित्वेन व्यवह्रियत इति वैयाकरणानां मतम्[४१]। यद्यपि एवमन्तिमवर्णानुभवस्यैव पदार्थवाक्यार्थधीक्षमत्वे आनुपूर्वीज्ञानस्योपायसंभवे किमन्तर्गडुना स्फोटेनेति वक्तुं शक्यते, तथापि श्रुतिपुराणादय एव स्फोटे प्रमाणमिति ध्येयम्। न्यग्भावितमुपसर्जनीकृतम्।

यथा

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो

नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।

मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे

वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥ २ ॥

अत्र नदन्तिकमेव रन्तुं गतासीति प्राधान्येनाधमपदेन व्यज्यते ।

बालचित्तानुरञ्जनी—उत्तमकाव्यस्य लक्षणमुक्त्वा उदाहरणमाह यथेति । काचिन्नायिका नायकं प्रति प्रेषितां तेनोपभुक्तां स्वदूतीं सेर्ष्यमाह । हे दूति । नायकसमीपं गतास्मीति मिथ्यावादिनि इतः मत्सकाशात् त्वं वापीं स्नातुं गतासि । तस्याधमस्यान्तिकं पुनर्न गतासि । मादृशस्य बान्धवजनस्य पीडागमः दुःखप्राप्तिः त्वया न ज्ञायते । वापीं स्नातुं गतासीति कुतोऽवगमः इत्याकाङ्क्षायामाह । स्तनयोः तटं स्थलं निःशेषं यथा च्युतं चन्दनं यस्मात् । अधरश्च नितरां मृष्टोऽपगतो रागो यस्य । नेत्रे च दूरं अत्यर्थं अविद्यमानाञ्जने तथा तन्वी कृशा इयं तनुः सञ्जातरोमाञ्चा च । अत्राधमपदसहायानां व्यञ्जकत्वमभिप्रेत्याह अत्रेति । तत्रैव तात्पर्यात् प्राधान्यम् । गाढालिङ्गनेन च्युतं न तु क्षालितं, चुम्बनेन नितरां मृष्टो न त्वीषच्चुम्बनेन । अत्यर्थमनञ्जने न त्वीषत् । तनुत्वे ग्लानत्वे सति पुलकितत्वम् न तु पुलकितत्वमात्रम् दूतीमप्युपभुक्तवानित्यधमत्वम् । अत्र स्नातुं गतासीति विधिप्रतीतेर्वाच्याद् व्यङ्ग्यस्य चमत्कारः ।

सारबोधिनी—नायकाभिसरणाय प्रेषिता तं सम्भुज्य समागतां दूतीं प्रति स्नानकार्यप्रकाशमुखेन संभोगं काचित् प्रकाशयति निःशेषेति । **इतीति** । दूतस्य मिथ्याभाषणं स्वभावः । दूति न तु सखि, सखीत्वे मत्प्रतारणं मत्प्रियसंभोगश्च न स्यात् । उद्देश्यकार्याकरणेन मत्प्रियरमणेन च बान्धवजनस्य यथा पीडा भवति न तज्जानासि । तस्य नीचाभिलाषित्वेन प्रसिद्धस्य अतोऽधमस्य नीचकार्यकर्तुः ।

प्राधान्येनेति । अधमपदस्य पदान्तरापेक्षया झटिति प्रकृतार्थव्यञ्जकत्वेन प्राधान्यम् । अत्र केचित्, अत्र स्तनतटं निःशेषच्युतचन्दनं न तु स्तनमध्यादि, तत्र तथाविधनायककरपरामर्शायोग्यत्वात् । एवमधरोऽधरोष्ठः तत्र रागो निःशेषं, मृष्टो न तु पूर्वोष्ठे, तत्र चुम्बननिषेधात् । एवं नेत्रमध्ये चुम्बननिषेधात् दूरत एव निरञ्जने । तथा चैतत्सर्वं रत एव संभवति, न तु स्नाने । स्नाने चेत् सर्वावच्छेदेनैव चन्दनच्यवनादि स्यादिति तथाविधचन्दनच्यवनादीनां रतैकसाध्यानां स्नानकार्यत्वबोधेन स्नातुं गतासीत्यत्र निषेधो न गतासीत्यत्र विधिश्च लक्ष्यते । रन्तुमिति व्यज्यते । न च [४२] विधौ कथं लक्षणेति वाच्यम् । अन्यथा [४३] उभयत्र गमनबोधे प्रसङ्गत्यापत्तेः । [४४] न च तथा सति "भम धम्मिअ" इत्यत्रापि भ्रमणनिवृत्तौ लक्षणा स्यादिति वाच्यम् । तत्र श्वमारणादौ मुख्यार्थे बाधानवतारात् । इह तु तटादिपदप्रतिसन्धानेन स्नाने बाधावतारात्लक्षणा आवश्यकीत्याहुः ।

वस्तुतस्तु, तथाविधचन्दनच्यवनादीनामपि स्नानकार्यत्वं संभवत्येव । तथाहि । वापीं स्नातुं गतासि न तु गृहम् । एतच्च विशिष्य वापीपदोपादानाल्लभ्यते । अतः स्तनतट एव निःशेषचन्दनच्युतिर्न तु स्तनमध्यादिषु । वापीनीरस्य जनाकीर्णतया तथाविधमार्जनस्यासंभवाद् गृह एव तत्संभवाच्च । तथा पूर्वोष्ठस्य न्युब्जतया [४५] बहुलजलसंबन्धाभावात् न तत्र निःशेषरागव्यक्तिः, किन्त्वधर एवोत्तानत्वेन-

बहलजलसंबन्धात् । तथा स्नानकाले नेत्रमुद्रणात् नेत्रमध्ये नाञ्जनराहित्यम् । किन्तु दूरत एवेत्यादि-रूपेण स्नानकार्यत्वसंभवेन बाधानवतारात् कथं रतौ लक्षणा, किन्तु वक्तृबोद्धव्यवैशिष्ट्याद् व्यञ्जनैव । तदाह तदन्तिकमेवेति । अन्यत्र एवंविधकार्यस्यासंभावितत्वात् । न च तदन्तिकगमनतात्पर्यानुपपत्त्या विधौ लक्षणैवेति वाच्यम् । विदग्धनायिकायाः स्नानकार्यप्रकाशमुखेनैव तत्र तात्पर्यात् । न गतासीत्यत्र नञि काकुः । तथा च न गतासि अपि तु गतास्येवेत्यर्थः । तदन्तिकमेवेत्यत्र एवकारो गतासीत्यनन्तरं योज्यः । अत्र काक्वाक्षिप्तत्वेऽपि झटित्येनाक्षिप्तत्वान्न गुणीभूतव्यङ्ग्यत्वम्, अपि तु ध्वनित्वम् । यथा, तथाभूतेत्यादौ । अत्र त्वय्यकृतज्ञायां यद् बान्धवबुद्ध्या विश्वसिमि यच्च तत्र दुर्विदग्धे दृढमनुरक्ता-स्मि तद् व्यक्तमेव । मय्येवंविधवञ्चनपात्रत्वमितीर्ष्याहेतुकविप्रलम्भविशेषसञ्चारिनिर्वेदध्वनिः । तदनु-गुणश्च दूतीसंभोगः । चन्दनच्यवनादीनाञ्च वाच्यानां परिरम्भचुम्बनाद्यनुभावानां संभोगोत्कर्षद्वारा ईर्ष्याया उत्तेजकानां निर्वेदोत्कर्षकत्वमवधेयम् ।

अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।

अतादृशि वाच्यादनतिशायिनि । यथा

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥ ३ ॥

अत्र वञ्जुललतागृहे दत्तसङ्केता न गतेति व्यङ्ग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात् ।

बालचित्तानुरञ्जनी—उत्तमं काव्यं सोदाहरणं लक्षयित्वा मध्यमकाव्यस्य लक्षणमाह **अतादृशीति** । अतादृशीत्यस्यार्थमाह **वाच्यादिति** । व्यङ्ग्ये वाच्याच्च अतादृशि अनतिशायिनि सति काव्यं मध्यमम् । तदेव गुणीभूतव्यङ्ग्यं इति कथितमित्यनुषज्यते ।

तस्योदाहरणमाह **ग्रामतरुणमिति** । कश्चित् कञ्चित् प्रत्याह । ग्रामशब्देन तत्रैव एकोऽतिशयेन कामुक इति द्योत्यते । नववञ्जुलमञ्जर्या संयुक्तकरं मुहुर्मुहुः पश्यन्त्यास्तरुण्या नितरां मुखकान्तिर्मलिना भवति । अत्र भवतीति वर्तमानव्यपदेशेन वैवर्ण्यस्याविरामः सूच्यते । स्वयं सङ्केतकरणात् स्वस्य तत्रागमनात् पुरुषस्य तत्र गमनाच्च मुखवैवर्ण्यमित्यर्थः । **अत्र** गुणीभूतं व्यङ्ग्यं किमित्याकाङ्क्षायामाह **अत्रेति** । व्यङ्ग्यं नववञ्जुलमञ्जरीत्यादिपदेनेत्यर्थः । तदपेक्षया व्यङ्ग्यापेक्षया । कामुकदर्शनेन कामिन्याः मुखविकासस्य संभाव्यस्य विरोधस्यैव चमत्कारित्वात् ।

सारबोधिनी—**अतादृशीति** । अत्र चित्रान्यत्वे सतीति विशेषणं देयम् । तेन चित्रे नातिव्याप्तिः । **वाच्यादनतिशयिनीति** । वाच्यादनतिशयश्च तस्य समत्वेऽप्राधान्ये वा बोध्यः ।

ग्रामेति । वञ्जुलोऽशोकः । सनाथो युक्तः । पश्यन्त्या इति वर्तमानतोपदेशात् दर्शनसमय एव मालिन्योदयात् कार्यकारणपौर्वापर्यविपर्ययात्मा अतिशयोक्तिर्बोद्धव्या । सङ्केतभङ्गोऽत्र व्यङ्ग्यः । तेन वाच्यवदनकान्तिमालिन्यमुखेनैव विप्रलम्भाभासस्य पोषणमिति तन्मुखप्रेक्षित्वादस्य गुणीभूतव्यङ्ग्यत्वम् ।

अस्यान्तरालिकव्यङ्ग्यापेक्षयैव गुणीभूतव्यङ्ग्यत्वम्, रसापेक्षया तु रसध्वनिरित्यवधेयम्। अत एव सर्वेषां काव्यानां ध्वनित्वमिति महिमभट्टाः।

नन्वेवं वस्त्वलङ्कृत्योर्ध्वनित्वं न स्यात् आस्वादापेक्षया तयोरपि गुणीभावादिति चेदेवमेव वाच्यतः प्राधान्यमात्रेण तयोर्ध्वनित्वम्, आस्वादापेक्षया तु गुणीभूतत्वमिति।

शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ॥६॥

चित्रमिति गुणालङ्कारयुक्तम्। अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम्। अवरं अधमम्।

बालचित्तानुरञ्जनी—अधमकाव्यं लक्षयति **शब्दचित्रमिति**। चित्रशब्दार्थमाह **चित्रमितीति**। गुणमाधुर्यादयस्ते रसधर्मा उपचारात् शब्दगुणा अर्थगुणा इत्युच्यन्ते। तथा च वक्ष्यति "गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता" इति। शब्दालङ्कारा: अनुप्रासादयः, अर्थालङ्कारा: उपमादयः, तैर्युक्तम्। अव्यङ्ग्यमित्यस्यार्थमाह **अव्यङ्ग्यमिति**। अर्थो व्यङ्ग्यरूपः। अवरं अधमम्। अव्यङ्ग्यमधममित्येतावल्लक्षणमितरद्विभागपरम्।

सारबोधिनी—**शब्देति**। अव्यङ्ग्यं चित्रमिति सामान्यलक्षणम्। शब्दचित्रमर्थचित्रमिति विभागे चित्रपदोपादानात्। चित्रपदार्थमाह **गुणालङ्कारेति**। यत्र तयोरेव प्राधान्येन चमत्कारित्वमित्यर्थः।

यथा

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा—
मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः।
भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुम—
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥४॥

बालचित्तानुरञ्जनी **स्वच्छन्देति**। मन्दाकिनी वः मन्दतां जडतां अह्नाय क्षिप्रं भिद्यात् अपनयतु। कीदृशी गङ्गा। स्वच्छन्देन स्वेच्छया उच्छलन्त्यः। अच्छा निर्मलाः कच्छदेशेषु जलप्रायदेशनिम्नस्थलेषु। छातेतराः स्थूलाः। अम्बुच्छटाः जलकल्लोलास्ताभिर्मूर्च्छन् नश्यन् मोहो येषां तैः महर्षिभिर्हर्षेण विहितं स्नानमाह्निकं च यस्यां सा। पुनः कीदृशी? उद्यन्तः उदाराः बहवः दर्दुराः मण्डूका यासु ताश्च ता दर्यश्च ताभिः दीर्घेषु अदरिद्रेषु समृद्धेषु द्रुमेषु द्रोहोद्रेको येषां ते, ते च महोर्मयश्च तैर्मेदुरः अधिको मदो यस्याः। अत्र वृत्त्यनुप्रासेन वैचित्र्यम्। यद्यपि मन्दाकिनीविषयो रत्याख्यो भावो व्यङ्ग्योऽस्ति तथापि अनुप्रासे कवेस्तात्पर्यात् तिरोधीयते। अत्र ओजोलक्षणे व्यङ्ग्ये प्रतीयमाने सत्यपि काव्यस्य गुणाव्यभिचारात् तद्व्यतिरिक्तस्यैव व्यङ्ग्यस्य प्रतीयमानत्वं विवक्षितम्। अन्यथा काव्यस्यैव हानिः।

सारबोधिनी—स्वच्छन्देति । मन्दाकिनी वो युष्माकं भद्राय झटिति मन्दतां भिद्यात् । स्वच्छन्दं स्वाधीनं न तु वातादिपरतन्त्रम् । उच्छलदित्यम्बुविशेषणम् । कच्छे जलसमीपे तरङ्गैः खननात् यत् कुहरं बिलं छातं अल्पम् । "अमांसो दुर्बलश्छात" इत्यमरः । तदितरत् छटा परम्परा छाया वा तया मूर्च्छे-प्रादुर्भवन्मोहो वैचित्र्यं विस्मयो येषाम् । दर्दुरः पर्वतभेदः । तस्य दीर्घा दैर्घ्यं यस्यास्तां भित्त्वापि झटिति जलनिर्गमनेन दैर्घ्यं न तु तया जलस्थगनं तेन वेगातिशयः । मन्दाकिनी नदीविशेषः । केचित्त मन्दाकिनी गङ्गा । दर्दुरो भेको न तु पर्वतविशेषः । तस्य दक्षिणदिग्गिरित्वेन गङ्गासंबन्धाभावात् इत्याहुः । अदरिद्राः परिणाहोच्छ्रायादिमन्तः । द्रोहः पातनम् । उद्रेक आधिक्यम् । तन्मयास्तद्युक्ता ये तरङ्गास्त एव निबिडः स्निग्धोऽहङ्कारो यस्याः ।

विनिर्गतं मानदमात्ममन्दिराद्
भवत्युपश्रुत्य यदृच्छयापि यम् ।
ससंभ्रमेन्द्रद्रुतपातितार्गला
निमीलिताक्षीव भियामरावती ॥५॥

इति काव्यप्रकाशे काव्यस्य प्रयोजनकारणस्वरूपविशेपनिर्णयो नाम प्रथम उल्लासः

बालचित्तानुरञ्जनी—वाच्यचित्रमुदाहरति **विनिर्गतमिति** । यदृच्छयाप्यात्ममन्दिरात् विनिर्गतं यं उपसृत्य अमरावती ससंभ्रमेण इन्द्रेण द्रुतं पातिता अर्गला यस्याम् । एवंविधा सती भयेन निमीलिताक्षीव भाति । कीदृशं आश्रितानां बहुमानं ददाति रिपूणां चाभिमानं ददातीति वा मानदम् । अत्रोत्प्रेक्षारूपे अर्थालङ्कारे कवेस्तात्पर्यात् मन्नो धीरादयो व्यङ्ग्याश्निरोधीयन्ते ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमरस्वतीतीर्थविरचितायां काव्यप्रकाशटीकायां प्रथम उल्लासः ।

सारबोधिनी—अर्थचित्रमुदाहरति **विनिर्गतमति । मानदमिति** । शत्रूणां मानस्य खण्डकम् । मित्राणां मानस्य दातारम् । यद्यपि स्वच्छन्देत्यत्र द्रुमपातनादिना नद्यन्तराद्व्यतिरेकः । महर्षीणां सेवनेन च तीर्थान्तराद्व्यतिरेकः । तथा मन्दाकिनीविपयो भावश्च प्रतीयते । तत्र मन्दाकिनी तद्गुणाश्चा-लम्बनोद्दीपनविभावौ । स्तवोऽनुभावः । सञ्चारिणश्च स्मृत्यौत्सुक्यादयः । तथाप्यनुप्रासाहितचमत्कारेण तेषां व्यवधानमिति स्फुटप्रतीयमानव्यङ्ग्यरहितत्वमिति चित्रत्वेन व्यवहारो न ध्वनित्वादिना, प्राधान्येन व्यपदेशात् । एवं यद्यपि विनिर्गतमित्यत्रापि हयग्रीवस्य वीरो रसः प्रतीयते । तत्र स एवालम्बनं प्रतिपक्षेन्द्रगतं भयमुद्दीपनम् । मानदानमनुभावः । यदृच्छासञ्चारणगम्या धृतिः सञ्चारी । तथाप्यु-त्प्रेक्षाहितचमत्कारेण तस्य व्यवधानमिति चित्रत्वम् । अत्र केचित्—चित्रं न काव्यभेदः । व्यङ्ग्यस्य प्राधान्ये ध्वनित्वम् । तदन्यथा गुणीभूतत्वम् प्रकारान्तराभावात् । तदुक्तम्—

"प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते: ।
उभे काव्ये तदन्यद्यत्तच्चित्रमभिधीयते ॥" ध्वन्यालोक: ३.४४

इति तन्न । वाचकवाच्यवैचित्र्यप्रतीतिव्यवहितप्रतीतिकरसत्त्वस्यास्फुटव्यङ्ग्यत्वस्य तृतीयप्रकारस्य संभवादिति ।

इति सारबोधिन्यां प्रथम उल्लासः ।

FOOT NOTES

१. श्री गणेशाय नम: A. B. २. A. B R D omit श्री जगज्जनन्यै नम: . ३. प्रथमां कारिकाम् V. ४. पञ्चाङ्गकं वाक्यं ग्रन्थ: V. ५. इति V. ६. F. reads इति after सिद्धत्वात् ७ B. omits स्वस्मिन् . ८. जयहेतुत्वे B. ९. लभ्यते B. १०. D omits आदधती . ११. उत्कर्षाश्रया भवति F. १२. K adds इति वाच्यम् . १३. F omits तद्रहितां . १४. B omits नास्त्येव . १५. B omits सांख्यवचनात् . १६. F omits असाधारणस्येति . १७. F omits पश्चात् . १८. जयत्यर्थेति K . १९. इति F . २०. सचाक्रमध्वन्यन्तर्गत: F . २१. A reads इत्यर्थ: after सूचितम् . २२. Some printed textes read इतिहासादिभ्यश्च . २३. प्रकाशत इति B . २४. B omits देहान्तरोत्पादनया . २५. तत्संभवात् D. २६. कवित्वस्य बीजं प्रतिभा (resembles the वामनसूत्र "कवित्वबीजं प्रतिभानम्" १-३-१६) २७. प्रतिभा–Pratibha alone is the main source of poetry. This idea was originated by the present commentator which was later staunchly supported by Jagannatha, by saying "तस्य च कारणं कविगता केवला प्रतिभा . २८. B omits अस्य २९. D omits शेष: ३०. See Jhalki-kara's commentary. ३१. F omits अन्ये ३२. इत्यादि B . ३३. Panditaraj also refuted this view. ३४. V omits कांश्चित् . ३५. विशेषदर्शनं भ्रमवत् दर्शनें भ्रमवत् A ३६. The Commentator refutes the view of विद्याचक्रवति another commentator. ३७. भाद्रक्षपा: V. ३८. B omits धृतिकारणादीनां . ३९. संभोग A . ४०. चमत्कारित्वम् A. ४१. B specifically points out it as नैयायिकमतमिति . ४२. नच निषेधे B. ४३. With reference to अन्यथा उभयत्र A has the following marginal notes. तदन्तिकं न गतासीत्यत्र विधौ लक्षणां विना । स्नातुं गतासीत्यत्र निषेधे लक्षणायाम् . ४४. निषेधबोधे असंगति: स्यात् A ४५: बहलसंबन्धात् A .

क्रमेण शब्दार्थयोः स्वरूपमाह—

स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा ।

अत्रेति काव्ये । एषां स्वरूपं वक्ष्यते ।

बालचित्तानुरञ्जनी—प्रथमोल्लासे शब्दार्थौ काव्यमित्युक्तम् । तत्र कतिविधः शब्दः कतिविधो वार्थ इत्याकाङ्क्षायां तद्विभागप्रतिपादनपरत्वेन उत्तरश्लोकमवतारयति **क्रमेणेति** । उद्देशक्रमेण स्वरूपं विशेषरूपं विभागमित्यर्थः । नन्वर्थशास्त्रादौ व्यञ्जकशब्दव्यवहाराभावात् कथं त्रैविध्यमित्याशङ्क्य श्लोकगतात्रशब्दार्थमाह **अत्रेतीति** । व्यङ्ग्यस्यैव रसस्य प्रतिपादके काव्ये व्यञ्जकशब्दोऽवश्यम्भावीति त्रैविध्यमुचितमिति भावः । वैयाकरणैः स्फोटं प्रति शब्दस्य व्यञ्जकत्वश्रवणात्काव्यग्रहणमुपलक्षणम् ।

ननु विभागानन्तरं वाचकादीनां लक्षणं वाच्यम्, तत्परित्यज्य वाच्यादय इत्यादिना अर्थविभागः कथं क्रियत इत्याशङ्क्य शब्दविभागानन्तरं तत्सहचरितार्थविभागं जिज्ञासमानस्यावश्यवक्तव्यत्वेन तदनन्तरं साक्षात्सङ्केतितमित्यादिना कथयिष्यतीत्याह-**एषामिति** । तदर्थाः तेषां वाचकादीनामर्थाः । क्रमेण वाच्यलक्ष्यव्यङ्ग्या इत्यर्थः ।

सारबोधिनी—शब्दार्थौ काव्यमित्युक्तम् । तत्र किंस्वरूपौ शब्दार्थौ इत्यपेक्षायामाह क्रमेणेत्यादि । क्रमश्च काव्यलक्षणवाच्योपादानलभ्यः[1] । अर्थान्तरव्यञ्जना न संभवतीति प्रायशः उक्तम् ।

वाच्यादयस्तदर्थाः स्युः

वाच्यलक्ष्यव्यङ्ग्या ।

तात्पर्यार्थोऽपि केषुचित् ॥६॥

आकाङ्क्षा-योग्यता-सन्निधिवशाद् वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीत्यभिहितान्वयवादिनां मतम् । वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः ॥६॥

बालचित्तानुरञ्जनी—तात्पर्यार्थोऽपीति । केषुचिन्मतेषु । एतदेव स्पष्टयति **आकाङ्क्षेत्यादिना** । आकाङ्क्षा प्रतिपत्तुर्जिज्ञासा । साकाङ्क्षाणां योग्यानामेकबुद्ध्युपारूढत्वं सन्निधिः । योग्यता बाधकप्रमाणविरहः । एतादृशां जात्यादिर्जातिरेववेत्यादिवक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये सङ्केतग्रहणमात्रप्रतीयमानात्पदार्थादाकाङ्क्षादिकारणत्रयेण प्रतीयमानो विशेषवपुर्भिन्नस्वरूपः पदार्थव्यतिरिक्तो वाक्यार्थोऽपि स्फुरति । शब्दार्थव्यतिरिक्तो वाक्यार्थोऽपि न पदार्थः । पदार्थवाक्यार्थयोर्भिन्नत्वेन प्रतीयमानत्वादिति प्रमाणमुक्तम् । "गामानय शुक्लं दण्डेन" इत्यादौ पदानि स्वार्थमभिधाय अन्वितानि भवन्तीति ये वदन्ति तेऽभिहितान्वयवादिनः । बहुवचनेनायमेव पक्षः प्रामाणिक इति सूचितम् । अभिहितान्वयवादिन इत्यनेन

सूचितं पक्षान्तरमाह वाच्य इति। पदानि अन्वितानि भूत्वा पश्चाद्विशिष्टमर्थं कथयन्तीति यो वदति सः अन्विताभिधानवादी तस्य मतमित्यनुषज्यते। अतएव वाक्यार्थो वाच्यः। एकवचनेनास्याप्रामाणिकत्वम्।

सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते।

तत्र वाच्यस्य यथा—

माए घरोवअरणं अज्ज हु ण त्थि त्ति साहिअं तुमए।
ता भण किं करणिज्जं एमेअ ण वासरो ठाइ॥६॥

अत्र स्वैरविहारार्थिनीति व्यज्यते।

बालचित्तानुरञ्जनी—व्यञ्जकस्यैव काव्योपयोगित्वादितरयोरुपादानं किमर्थमित्याशङ्क्याह **सर्वेषामिति**। वाच्यलक्ष्यव्यङ्ग्यानाम् व्यञ्जकत्वमिष्यते। **प्रायश इति**। सर्वदा, अपिशब्दात् वाच्यत्वादिकम्। वाच्यलक्ष्ययोरर्थयोर्व्यञ्जकत्वेन तत्प्रतिपादकयोः शब्दयोरपि परम्परया काव्योपयोगादुपादानं युक्तमिति भावः। वाच्यादीनां व्यञ्जकत्वं क्रमेणोदाहरति।

तत्रेति। काचिद्दत्तसङ्केता तत्र **जिगमिषुः** व्याजोक्त्या श्वश्रूं प्रति कथयति **मातरिति**। अनेन सुखानुज्ञानार्था प्रियोक्तिः। घरोवअरणं गृहोपकरणं तण्डुलादि। अनेनावश्यकर्त्तव्यत्वं सूच्यते। हु खलु। णत्थित्ति नास्तीति। साहिअं कथितम्। तुमए त्वया। अनेन व्याजो नोत्पादित इति सूच्यते। ता तस्मात् भण। अनेन प्रेरणार्थः सूच्यते। किं करणिज्जं किं करणीयम्। एमेअ एवमेव। वासरो वासरः। ठाइ तिष्ठति। अनेन सायंकाले मम पतिव्रतायाः गमनेऽचित्तं इत्यात्मनः शुद्धत्वं द्योत्यते। त्वरया प्रेरयति वा। अत्र किं व्यङ्ग्यमित्याकाङ्क्षायामाह **अत्रेति**। प्रमाणान्तरावगतव्यभिचारिणीरूपवक्तृवैशिष्ट्यात् वाच्यार्थो व्यञ्जक इत्यभिप्रायः।

सारबोधिनी—**माए इति**। मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया।
तद्भण किं करणीयमेवमेव न वासरस्तिष्ठति॥

मातरित्याज्ञाग्रहणोपयोगिरूपमुपकरणं कार्यम्। नास्ति गृहोपकरणमित्यनेनावश्यकत्वम्। अद्येत्यादिनातिप्रसङ्गवारणम्। त्वया कथितं न तु[२] मयेत्यनेनान्यथा निवृत्तिः। तच्छब्देन हेत्वर्थेनावश्यवक्तव्यत्वम्। एवमेव त्वयासङ्गं विना वासरो न तिष्ठति। अतीते वासरे तवाज्ञयापि न किञ्चित्करिष्यामीति व्यज्यते इति पदार्थानां व्यञ्जकता।

वाक्यार्थव्यञ्जकतामाह-**अत्रेति**। वक्तृवैशिष्ट्यादिति शेषः। यत्तु पदार्थव्यञ्जकत्वविभागे वाक्यार्थव्यञ्जकत्वमनुपयुक्तमिति, तन्न। गुरुमते अन्वयस्यापि वाच्यत्वात्। तस्य तात्पर्याख्यवृत्तिविषयत्वादार्थत्वाच्च। व्यङ्ग्यमाह-**स्वैरेति**। स्वैरः स्वेच्छाधीनः स्वैरविहारेच्छायां वाक्यार्थोत्तरकालं प्रतीयमानायां शब्दस्य न व्यापारः, विरतत्वात्। अर्थस्य व्यापारान्तरं न संभवतीत्यर्थानां व्यञ्जकत्वसिद्धिः।

लक्ष्यस्य यथा--

साहेन्तो सहि सुहअं खणे खणे दुम्मिआसि मज्झकए।
सब्भावणेहकरणिज्जसरिसअं दाव विरइअं तुमए ॥७॥

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यम्। तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम्।

बालचित्तानुरञ्जनी--काचिन्नायिका स्वप्रियोपभुक्तां दूतीं प्रत्याह। सहि सखि। मज्झकए मम कृते। सुहअं सुभगम्। साहेन्ती साधयन्ती प्रार्थमानेत्यर्थः। "णिच एदादे" इति सूत्रेण णिच् स्थाने अदादेश-पक्षे साहन्तीत्यपि पाठान्तरम्। खणे खणे क्षणे क्षणे। दुम्मिआ दूना। असि। सब्भावणेहकरणिज्ज-सरिसअं सद्भावस्नेहकरणीयसदृशम्। दाव तावत्। विरइअं विरचितम्। तुमए त्वया। अत्र लक्ष्यं किं व्यङ्ग्यं च किमित्याकाङ्क्षायामाह-**अत्रेति**। वाक्यस्य विपरीतलक्षणया शत्रुत्वं लक्ष्योऽर्थः।

सारबोधिनी—साहेन्तीति। [३] साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मत्कृते।
सद्भावस्नेहकरणीयसदृशं [४] तावद्विरचितं त्वया॥

त्वयेति प्रतिपाद्य दूतीवैशिष्ट्यमुक्तम्। ज्ञानापकारिणीं प्रत्येवंविधोक्तिरसंभवितेति बाधानन्तरं सद्भावेत्यादिना तदभावव्याप्यत्वेन विरोधि लक्ष्यते तदाह-**शत्रुत्वमिति**।

केचित्तु सद्भावस्नेहाभ्यां तदभावो लक्ष्यते। तेन तदतिशयशत्रुत्वं व्यज्यते। लक्ष्यं लक्षणामूलं व्यङ्ग्यम्। पार्यन्तिकन्तु कामुकविषयसापराधत्वप्रकाशनमित्याहुः।

अत्र वाक्यार्थस्य व्यञ्जकत्वेऽपि लक्ष्यस्य व्यञ्जकत्वं भट्टमते, तस्यापि लक्ष्यत्वात्। अथवा, अन्वयस्य व्यञ्जकत्वेऽन्वयिनोऽपि व्यञ्जकत्वमिति लक्ष्यस्य व्यञ्जकत्वमिति।

व्यङ्ग्यस्य यथा--

उअ णिच्चलणिप्पंदा भिसिणीपत्तम्मि रेहइ बलाआ।
णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्ति व्व ॥८॥

अत्र निष्पन्दत्वेन आश्वस्तत्वम्। तेन च जनरहितत्वम्। अतः सङ्केतस्थानमेतदिति कयाचित् कञ्चित् प्रत्युच्यते। अथवा मिथ्या वदसि न त्वमत्रागतोऽभूरिति व्यज्यते॥

बालचित्तानुरञ्जनी--काचित् कामुकं प्रति सङ्केतस्थलमेतदित्यभिप्रायेणाह-उअ पश्य। णिच्चलणिप्पंदा निश्चलनिष्पन्दा। बलाआ बलाका। भिसिणीपत्तम्मि बिसिनीपत्रे। रेहइ राजते। केव? णिम्मलमरगअभाअणपरित्थिआ निर्मलमरकतभाजनप्रतिष्ठिता, संखसुत्ति व्व शङ्खशुक्तिरिव। चलनं शारीरो व्यापारः, स्पन्दोऽवयवव्यापार इति न पौनरुक्त्यम्। मरकतेत्यादिना न केवलं वर्णसाम्यं किन्तु अचेतनत्वेन निष्क्रियत्वञ्च। अत्र व्यङ्ग्यस्य व्यञ्जकत्वं दर्शयति- **अत्रेति**। निष्पन्दत्वेन वाच्येन विश्वास-

युक्तत्वं व्यङ्ग्यम् । तेन जनरहितत्वं व्यज्यते । फलितमाह -**अत इति** । प्रकारान्तरेण आश्वस्तत्वस्य व्यञ्जकत्वमाह-**अथवेति** । यदि त्वमन्नागतोभूस्तर्हि बलाकाया विश्वस्तत्वं नोपपद्यत इति भावः ।

सारबोधिनी—उप इति । पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका ।
निर्मलमरकतभाजनपरिस्थिता[५] शङ्खशुक्तिरिव ॥

निश्चलोऽचलस्तद्वृत्तिस्पन्द इत्यर्थः । निश्चल (लं ?) निरुध्य (द्धं ?) मिति सम्बोधनमिति ? केचित् । द्विप्रलम्भस्याधिकमधुरत्वे परपक्षे तमाह **अथवेति** ।

वाचकादोनां क्रमेण स्वरूपमाह——

साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः ।।७।।

इहागृहीतसङ्केतस्य शब्दस्यार्थप्रतीतेरभावात् सङ्केतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतो गृह्यते स तस्य वाचकः ।।७।।

बालचित्तानुरञ्जनी——अर्थस्वरूपानन्तरं प्रागुद्दिष्टवाचकादीनां उपलक्षणावसर इति उत्तरं श्लोकमवतारयति **वाचकादीनामिति** । यः अर्थमभिधत्त इत्युक्ते लाक्षणिकादावतिव्याप्तिः । तदर्थं **सङ्केतितं इति** ॥ एवमप्यन्विताभिधानवादे गङ्गायां घोष इत्यादौ मुख्यार्थव्यवहिते तटादावपि सङ्केतसद्भावात् तत्रैवातिव्याप्तिरित्यत आह-**साक्षादिति** । तावत्युच्यमाने एद्दहमित्यादौ चेष्टायामतिव्याप्तिः । तत्परिहाराय शब्दप्रस्तावात् यः शब्द इति द्रष्टव्यम् । यस्मिन् पक्षे लक्ष्ये सङ्केताभावः तत्र सङ्केतितमर्थं योऽभिधत्ते इत्येकं लक्षणम् । यः साक्षादभिधत्ते इति द्वितीयम् । अभिधत्त इति प्रतिपादयतीत्यर्थः । न त्वभिधया बोधयतीति अभिधया प्रतिपादको वा वाचकव्यापारोऽभिधेत्यन्योन्याश्रयप्रसङ्गात् । सङ्केतविप्रतिपत्तिं निराकुर्वन् श्लोकं व्याकरोति **इहेत्यादिना** । इह लोकव्यवहारे । अगृहीतसङ्केतस्याप्यर्थमात्रप्रतीतिरस्तीति तन्निवृत्तये विशेषग्रहणम् । सङ्केतो नाम शब्दार्थयोः सम्बन्धावधारणम् । शब्दस्य सङ्केतितार्थाभिधायकत्वं सकलसङ्केतितार्थज्ञानमन्तरेण न संभवतीति सङ्केतितमर्थं विभजते **सङ्केतित इत्यादिना** । सङ्केतविषयः कृतः सङ्केतितः । आदिशब्देन गुणक्रियायदृच्छाशब्दा गृह्यन्ते ।

सारबोधिनी——अभिधत्ते अभिधाग्रहाहितसंस्कारसहकृतः सन् स्मारयति, तेन नानार्थव्यञ्जके नातिव्याप्तिः । तत्र तथाविधसंस्कारस्याहेतुत्वात् । साक्षात् सङ्केतितं अव्यवधानेन गृहीतसङ्केतम् अस्माच्छब्दादयमर्थो बोद्धव्य इत्युद्देशनं सङ्केतः ।

ननु यन्नाम्ना यत्र चैत्यादिस्तन्नामा विषयोऽपि स इतिवत् सान्तरतया यस्मिन् विषये देशे तन्नामकः प्रधानवृक्षः स देशोऽपि तन्नामक इत्युद्देशनम् । यथा वटो ग्राम इत्यत्र तरुसङ्केतेन, ग्रामसङ्केतस्य व्यवधानात् **न साक्षात्सङ्केत इति** । तत्र तत्पदस्य लक्षणैव । न चापभ्रंशेऽतिव्याप्तिरिति वाच्यम् । तस्यापि वाचकत्वमिति **मिश्रादिभिरङ्गीकरणात्तस्य** लक्ष्यत्वात् । अन्यथा तन्मयप्रबन्धस्य काव्यत्वं न स्यात् ।

वस्तुतस्तु लक्षणाद्वयम् । यत्र यस्य साक्षात्सङ्केतः स तस्य वाचक इति । एवं यत्र यस्याभिधेत्यपरम् । अभिधा तु शक्तिः । सा चेश्वरेच्छाविषयः, पदार्थान्तरं वा । न च नानार्थव्यञ्जकेऽतिव्याप्तिरिति वाच्यम्, तस्य लक्ष्यत्वात् । किन्तु व्यञ्जकत्वदशायां नियन्त्रितयाऽभिधयाऽर्थान्तरस्याप्रतिपादकत्वमित्यस्यैवाङ्गीकृतत्वादिति ।

मिश्रास्तु अभिधत्ते स्मारयति सङ्केतितं सङ्केतज्ञानद्वारा विवक्षणीयम् । तेन लाक्षणिके नानार्थव्यञ्जके च नातिव्याप्तिरित्याहुः ।

नव्यास्तु सङ्केतितमर्थं यः साक्षादभिधत्ते अर्थान्तरप्रतीत्यव्यवधानेनोपस्थापयति । तेन लाक्षणिके नानार्थव्यञ्जके चाभिधेयार्थप्रतीत्या व्यवधानमिति न तयोरतिव्याप्तिः । कार्यकारणभावसम्बन्धेन शब्देनाकाशोपस्थितौ तत्रातिव्याप्तिवारणाय सङ्केतितमित्याहुः, तन्न । वृत्तिविरोधात् । यत्र यस्याव्यवधानेन सङ्केतो गृह्यते इत्यादिना साक्षात्त्वस्य सङ्केतग्रहेणैव सम्बन्धस्य दर्शितत्वात् ।

सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।

यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथाप्यानन्त्याद् व्यभिचाराच्च तत्र सङ्केतः कर्तुं न युज्यत इति गौः शुक्लश्चलो डित्थ इत्यादीनां विषयविभागो न प्राप्नोतीति च तदुपाधावेव सङ्केतः ।

बालचित्तानुरञ्जनी—ननु व्यक्तिरेव सङ्केतितार्थो युक्तः अर्थक्रियाकारित्वेन पुरुषप्रवृत्तिनिवृत्तियोग्यत्वादित्याशङ्क्याह-**यद्यपीति** ।

ननु सर्वासु व्यक्तिषु सङ्केतः कतिपयासु वा । तत्राद्यं निराकरोति **आनन्त्यादिति** । द्वितीयं निराकरोति **व्यभिचारादिति** । व्यभिचारः सङ्केतितार्थव्यतिरिक्तेऽपि गवि गोव्यवहारः । इति शब्दः तद्युक्ते व्यक्तिरित्येव न व्यवह्रियेतेत्यर्थः । चकारः उक्तदोषसमुच्चयार्थः । उक्तमर्थमुपसंहरति **तदुपाधाविति** । तस्या व्यक्तेरुपाधिर्विशेषणं जात्यादौ शब्दः प्रवृत्तिनिमित्तमित्यर्थः । जात्यादीनां भेदं वक्तुमुपाधिं विभजते **उपाधिश्चेति** । वस्तुधर्मो वस्तुनो नैसर्गिको धर्मो वक्त्रा स्वेच्छया आरोपितो धर्मः । वस्तुधर्ममपि विभजते **वस्तुधर्म इति** ।

सारबोधिनी—नन्वानयनादिव्यवहारः शक्तिग्राहकः । **स च व्यक्तावेवेति** । तत्रैव शक्तिर्युक्ता, न तु जात्यादावित्यत आह **यद्यपीति** । अर्थः प्रयोजनं जलाहरणादिक्रियानिर्वाहः । **आनन्त्यादिति** सर्वासां व्यक्तीनामनुपस्थितेः सामान्यलक्षणानङ्गीकृतेरिति भावः । **व्यभिचारादिति** । असङ्केतितव्यक्तावपि प्रतीतिदर्शनाद्व्यभिचार इत्यर्थः । कर्तुं ज्ञापयितुम् ।

ननु नैयायिकानां सामान्यलक्षणया सर्वासां व्यक्तीनामुपस्थितिर्भविष्यतीति मीमांसकानान्तु शक्तिग्रहान्वयबोधयोः समानप्रकारकत्वस्य तन्त्रत्वादगृहीतसङ्केतानामन्वयबोधो भविष्यतीत्यतो दोषान्तरमाह **गौः शुक्ल इति** । विषयः प्रवृत्तिनिमित्तम् । तदभेदे पर्यायवद्युगपत्प्रयोगापत्तिः । **तदुपाधाविति** । उपाधौ विशेषणं एवकारेण विशेष्यांशव्यवच्छेदः । विशेष्यस्य नानात्वेन गौरवादिति भावः ।

उपाधिश्च द्विविधः—वस्तुधर्मो वक्तृयदृच्छासंनिवेशितश्च । वस्तुधर्मोऽपि द्विविधः सिद्धः साध्यश्च । सिद्धोऽपि द्विविधः—पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च । तत्राद्यो

जातिः । उक्तं हि वाक्यपदीये---"न हि गौः स्वरूपेण गौर्नाप्यगौः गोत्वाभिसंबन्धात्तु गौः" इति ।

बालचित्तानुरञ्जनी--सिद्धमपि विभजते **सिद्धोऽपीति** । आद्यः पदार्थस्य प्राणप्रद इति । प्राणप्रदां जातिं विना वस्तुनः स्वरूपमेव न सिद्ध्येदित्यर्थः । जातेः प्राणप्रदत्वे संमतिमाह **उक्तं-हीति** । स्वरूपेण पिण्डमात्रेण गौर्गौरिति व्यवहर्तुं न शक्यते अतिप्रसङ्गात् । नाप्यगौरिति व्यवहर्तुं अगोव्यावृत्तत्वात् । अतो गोत्वजातियोगादेव । पदार्थस्य प्राणप्रद इव । प्राणप्रदां जातिं विना वस्तुनः स्वरूपमेव न सिद्ध्येदित्यर्थः ।

सारबोधिनी--वस्तुधर्मो वस्तुनि समवेत इत्यर्थः । यदृच्छासंनिवेशितः, या इच्छा यदृच्छा । यदृच्छेति निपातः । तया संनिवेशितः । स्वेच्छानियुक्तः । पदार्थस्य पदोद्देश्यस्य प्राणनं प्राणो व्यवहारयोग्यता, तत्पदस्तन्निर्वाहकः । विशेषः सजातीयेभ्यो व्यावर्तनात् "शिषः असर्वोपयोग" धा० (१६१६) इति धात्वनुसारात् । आधानं प्रत्ययः । गौर्गोपदोद्देश्यो धर्मी स्वरूपेण उपाधिरहितव्यक्तिमात्रेण न गौर्गोव्यवहारप्रयोजकः । तदा घटोऽपि गौः स्यात् स्वरूपाविशेषात् । नाप्यगौः न गोभेदव्यवहारप्रयोजकः । तदा गौरप्यगौः स्यात् । व्यवहारप्रयोजकमाह-**गोत्वेति** । लब्धसत्ताकं प्राप्तव्यवहारयोग्यताकं विशिष्यते सजातीयेभ्यो व्यावर्त्यते ।

द्वितीयो गुणः । शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते । साध्यः पूर्वापरीभूतावयवः क्रियारूपः ।

डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन संनिवेश्यत इति सोऽयं संज्ञारूपो यदृच्छात्मक इति ।

बालचित्तानुरञ्जनी--शुक्लादेर्गुणस्य विशेषाधानहेतुत्वं कथयति **शुक्लादिना हीति** । अनेन उत्पन्नस्य द्रव्यस्य पश्चाद्गुणेन विशेषणमिति दर्शितम् । अत एव जातिगुणयोर्महान् भेदः । साध्यस्य लक्षणमाह-**साध्य इत्यादिना** । पूर्वापरीभूताः अधिश्रयणादयोऽवयवाः अस्याः पचनादिक्रियायाः तद्रूपः । वक्तृयदृच्छेत्यादिना उक्तं चतुर्थमुपाधिं विशदयति **डित्थादीति** । स्वरूपं स्फोटस्वरूपम् । अन्त्यवर्णबुध्या नितरां ग्राह्यम् । पूर्वपूर्वबुध्या तु ईषद्ग्राह्यम् । अन्त्यबुध्या स्फुटतरावभासनात् संहृतक्रमम् । स्फोटस्यैकत्वाद्वा संहृतक्रमम् । इतिशब्दो हेतौ । द्वितीयस्तु जात्यादिविभागपरिसमाप्तिद्योतकः ।

सारबोधिनी--नन्वेतज्जातिप्रसक्तं गोत्वादीनामपि स्वाश्रयेष्वनुगतबुद्धेरिव तदितरेभ्यो व्यावृत्तिबुद्धेर्जनकत्वादिति चेन्न । विशेषाधानहेतुत्वं गुणलक्षणयोगित्वमित्यस्यैव विवक्षणात् । एवं प्राणप्रदत्वमपि जातिलक्षणयोगित्वमित्युक्तरूपस्यानतिप्रसक्तत्वात् । साध्यः साध्यत्वेन विवक्षितः. तदाख्यातप्रवृत्त्यर्थं इति यावत् । तेषां मते पाकादिक्रियाया अपि नित्यत्वात् । तदुक्तम् (वाक्यपदीये ३. का १)

यावत्सिद्धमसिद्धं वा साध्यत्वेन प्रतीयते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते ।। इति

पूर्वापरीभूतेति । अधिश्रयणादिव्यापारप्रचयः क्रिया तस्या अवयवा अधिश्रयणादयः । अत्र समूहस्यानतिरिक्ततया व्यापाराणां प्रत्येकं पाकत्वेन क्रमेण पाक इति भ्रम एवेति । अक्रमस्य क्रमप्राप्तिरित्यर्थः

अत एवोक्तम्--"आश्रितक्रमरूपत्वादि" ति । असंव्यवच्छेद्यस्वलक्षणं बुद्धिद्वारा निर्ग्राह्यं यस्य, उपाधिप्रत्यायनानन्तरमुपाधिविशिष्टप्रत्यायनमित्यस्ति क्रमः । सोऽत्राकूतः । झटित्येव धर्मिप्रत्यायनात् । न च पदान्निर्विकल्पकापत्तिरिति वाच्यम् । आकाशपदवदिष्टत्वात् । न तु डित्थादिशब्दानामुपाधित्वम् । अयमेव द्रव्यशब्दः तदुक्तम्-

शब्दैरेभिः प्रतीयन्ते जातिद्रव्यगुणक्रियाः ।
चातुर्विध्यादमीपान्तु शब्द उक्तश्चतुर्विध ।। इति[१]

न चोपाधित्वेन संनिवेश्यत इति ग्रन्थासङ्गतिः । उपाधित्वेनेत्यस्य व्यवहारहेतुत्वेनेत्यर्थकरणादित्येकं मतम् ।

"गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः" इति महाभाष्यकारः । परमाण्वादीनां तु गुणमध्यपाठात् पारिभाषिकं गुणत्वम् । गुणक्रियायदृच्छानां वस्तुत एकरूपाणामप्याश्रयभेदाद् भेद इव लक्ष्यते । यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालम्बनभेदात् ।

सारबोधिनी—उक्तेऽर्थे सम्मतिमाह **गौः शुक्ल इति** । प्राणप्रदत्वं नाम जातिलक्षणम् । काणादैर्गुणत्वेन पठितेष्वणुत्वादिषु अतिव्यापकमित्याशङ्क्यते । तेषां सङ्केतमात्रं तत् ।

वस्तुतस्तु, परमाणुव्यवहारः परमाणुत्वजातियोगादेव अतो नातिव्यापकमित्याह **परमाणुत्वादीनाम्मिति** । अथवा विशेषाधानहेतुगुर्णं इत्यव्यापकं लक्षणम् । अणुमहद्दीर्घं ह्रस्व चेति कणादेन गुणत्वेनाभिमताना मणत्वादीनां नित्यत्वेन विशेषाधायकत्वाभावादित्याशङ्क्य तेषां वस्तुतो गुणत्वाभावान्नाव्यापकत्वमित्याह **परमाणुत्वादीनामिति** । परमाण्वादीनामिति पाठे भावप्रधानो निर्देशः । नन्वेकत्वाज्जातेरुपाधित्वमस्तु गुणादीनामुपाधित्वे प्रतिवस्तु भिन्नत्वादानन्त्यादिदोषास्तदवस्था इत्याशङ्क्याह **गुणेति** । आश्रयभेदाद्भिन्न इव प्रतीयते । परमार्थतस्तु एक एव शुक्लादिर्गुणः सर्वत्रेत्यर्थः । तदुक्तम्--'कर्मैकं जातिरप्येका जगत्येकः सितो गुणः' इति । एकस्योपाधिवशादनेकविधत्वप्रतीतौ दृष्टान्तमाह **यथेति** । मुकुरो दर्पणः । भेद इव लक्ष्यत इत्यनुषज्यते । अपरन्तु, डित्थादिशब्दः उपाधिः । डित्थादिशब्दवत्त्वेन प्रतीतेः । द्रव्यशब्दता तु शब्दस्य द्रव्यत्ववादिनो भट्टस्य दिशा । न च डित्थाद्यर्थवृत्ते डित्थादिशब्दस्य डित्थाद्यावृत्तेः । न च स्वज्ञाने स्वज्ञानस्य कारणत्वे आत्माश्रय इति वाच्यम्, विशिष्टज्ञाने विशेषकारणवत् कारणतावच्छेदकभेदमादाय समाधीयमानत्वात् विशिष्टज्ञानस्यापि विशेषणज्ञानत्वेन स्वज्ञातत्वात् ।

मिश्रास्तु—युगपदनुपस्थितेषु स्ववर्णेषु कथं सम्बन्धपरिच्छेद इत्याहुः । **संज्ञेति** । अत्र हेतुरन्त्येति । अन्त्यवर्णबुद्धौ प्रातिस्विकसंस्कारोपनीतेषु वर्णेषु शक्यः सम्बन्धपरिच्छेद इत्याहुः । अत्र मते उपाधिगतं यदृच्छाशब्दमादायैवाभासः समाधानञ्च । न तु वाचकस्वशब्दविषयमिति ध्येयम् ।

अपरे तु, स्वरूपं वर्णात्मकसंज्ञाशब्दादिप्रत्यक्षानन्तरस्वविशिष्टान् धर्मिणः प्रत्याययन्ति । तेन स्वप्रत्यक्षजन्यायाः स्वविशिष्टधियः परत्वादन्त्यत्वं तद्ग्राह्यं तया विषयीकृतं, नैवं गवादिपदानि, तेषां जात्यादिवैशिष्ट्यबोधनात् । वैधर्म्यान्तिरमाह **संहृतेति** । पूर्वपूर्वप्रयोगदर्शनात्परप्रयोग इति जात्यादिशब्देषु क्रमः सोऽत्र नास्ति । तत्र हेतुमाह यदृच्छेत्यादीत्याहुः **परमाण्वादीनामिति** । परमाणुत्वादीनामित्यर्थः गुणमध्ये पाठः । अणुमहद्दीर्घं ह्रस्वं चेतिरूपः । **पारिभाषिकमिति** परिभाषा च वैशेषिकमतसिद्धा । विशेषाधानहेतुरिति स्वमतसिद्धा वा । **गुणत्वमिति** ।

तथा च तन्निमित्तीकृत्य प्रवृत्तानां परमाण्वादिशब्दानां गुणशब्दत्वमिति शेषः। ननु गुणादीनां प्रति धर्मिवैधर्म्यदर्शनेन नानात्वेन तत्र शक्तौ व्यक्तिवदानन्त्यव्यभिचारापात इत्यत आह **गुणक्रियेति**।

वस्तुत इति। प्रत्यभिज्ञाया धर्मिभेदस्य बाधितत्वादाश्रयभेदनिबन्धन एव तद्भेद इत्यर्थः।

हिमपयःशङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्याद्यभिन्नाधानप्रत्ययोत्पत्तिस्तत् शुक्लत्वादि सामान्यम्। गुडतण्डुलपाकादिष्वेवमेव पाकत्वादि। बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये तद्वान् अपोहो वा शब्दार्थः कैश्चिदुक्त इति ग्रन्थगौरवभयात् प्रकृतानुपयोगाच्च न दर्शितम्॥७॥

बालचित्तानुरञ्जनी—जात्यादिरित्येतदुपपाद्येदानीं जातिरेववेति पक्षमुपपादयति **हिमपयः इत्यादिना**। बाल्यशुकाद्युच्चारणभेदेन भिन्नेष डित्थशब्देषु डित्थशब्दत्वं सामान्यमस्ति तदेव पिण्डे आरोप्यते तत् डित्थशब्दाभिधेयमित्यर्थः। अर्थेऽपि जातिमाह **प्रतिक्षणमिति**। प्रतिक्षणभिन्नेषु पिण्डेषु स्वाभाविकं डित्थत्वं सामान्यमभिधेयमित्यर्थः। एतत्तु वैनाशिकमतानुसारेण प्रत्यहं कारणसंभेदात् शरीरान्तरमिति वैशेषिकमतानुसारेण वा। जातिरेव वेति पक्षमुपसंहरति **इतीति**। ननु मतान्तराणामपि सत्वात् तानि कुतो नोपन्यस्तानीत्यत आह **तद्वानिति**। जातिमान् जातिमत्तया धृतं वस्तु पदार्थ इति नैयायिकाः। अपोह इतरव्यावृत्तिः। सङ्केत इति बौद्धैरुक्त इत्यर्थः। प्रयोजनसद्भावे गौरवमप्यङ्गीकार्यमित्यत आह **प्रकृतेति**। मतद्वयोपन्यासेनैव सङ्केतितसाकल्यप्रतीतेर्मतान्तरोपन्यासो व्यर्थ इत्यर्थः।

सारबोधिनी—जातिरेवेति[१६] व्याचष्टे **हिमेत्यादि**। परमार्थतो भिन्नेषु अबाधिततारतम्यप्रतीतेरिति शेषः। **गुडतण्डुलादीति**। वैधर्म्यप्रदर्शनाय गुडपाके रूपपरावृत्तिः। स्वरवैजात्यात् भेदप्रदर्शनाय **प्रतिक्षणमिति**। कालोपलक्षणमेतत्। **डित्थादिशब्देषु चेत्यादि**। चकारः पूर्वोक्तसमुच्चयार्थः। वाकारस्तु शब्दार्थगतजात्यादिभेदेन विकल्पार्थः।

केचित्तु इवार्थो वाशब्दः। शब्देष्विति शब्दानन्तरं योज्यः। शब्देष्विवार्थेष्वपि जातिसिद्धिरित्याहुः। तद्वान् जातिमान्। अयं पक्षो जातिविशिष्टशक्तिवादरूपः। अपोहः अतद्व्यावृत्तिः। तर्हि जात्यादयोऽपि न वक्तव्या इत्यत आह **प्रकृतेति**। उपाधिशक्तिवादे उपाधेयस्य व्यङ्ग्यत्वं स्यादिति तन्मतानुवादः प्रकृतोपयोगी। उपहितशक्तिस्तु प्रतिकूलप्रायेति न तदनुवादः।

स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते॥८॥

स इति साक्षात् सङ्केतितः। अस्येति शब्दस्य।

बालचित्तानुरञ्जनी। नाभिधा समयाभावात् इत्यादौ अभिधाव्यवहारदर्शनात् मुख्यार्थनिरूपणप्रस्तावे तां लक्षयति **तत्र मुख्य इति**। श्लोकस्थस्य सः इत्यस्य चार्थमाह **स इति अस्येतीति च**। अत्र साक्षात्

सङ्केतितेऽर्थे शब्दस्य व्यापारोऽभिधेत्येतावल्लक्षणम् । मुख्य इति वक्ष्यमाणारोपितलक्षणापेक्षयोक्तम् । अन्यथा साक्षात् सङ्केतितेऽर्थे शब्दस्य व्यापारान्तराभावान्मुख्यग्रहणमनर्थकं स्यात् ।

सारबोधिनी । स'' इति । नानार्थव्यञ्जनवारणाय **मुख्य इति** । मुखे आदौ साधुः मुख्यः । प्रथम प्रत्यायकः । स च न तथा, अभिधेयार्थप्रतीत्याऽव्यवधानात् । अत्र पदज्ञानात् संवन्धस्मरणं ततः संवन्धिनोऽर्थस्योपस्थितिरिति व्यापारीभूतज्ञानविषयतया संवन्धस्य व्यापारता । कारणज्ञानविषयत्वेन पदादिकरणतावत् ।

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया ॥६॥

"कर्मणि कुशलः" इत्यादौ दर्भग्रहणाद्ययोगात् "गङ्गायां घोषः" इत्यादौ च गङ्गादीनां च घोषाद्याधारत्वासंभवात् मुख्यार्थस्य वाधे विवेचकत्वादौ सामीप्ये च संबन्धे रूढितः प्रसिद्धेः तथा गङ्गातटे घोष इत्यादेः प्रयोगात् येषां न तथा प्रतिपत्तिः तेषां पावनत्वादीनां धर्माणां तथा प्रतिपादनात्मनः प्रयोजनाच्च मुख्येन अमुख्योऽर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा ॥६॥

बालचित्तानुरञ्जनी—लक्षणाया लक्षणमाह **मुख्यार्थेति** । मुख्यार्थबाधयोगाभ्यां अन्योर्थो लक्ष्यते प्रतिपाद्यत इति यत्सा लक्षणेत्येतावल्लक्षणम् ।

नन्वेवं सति यच्छब्देन लक्ष्यत्वपरामर्शः स्यात् । नह्येषा लक्षणा । लक्ष्यत्वं लक्ष्यधर्मः लक्षणा तु लक्षक धर्म इति चेन्न । यच्छब्देन लक्ष्यत इत्याख्यातार्थगुणीभूतं प्रतिपादनमात्रमेव परामृश्यते । प्रतिपादनन्तु प्रतिपादकधर्म एव । अतो नोक्तदोषः । अथवा यत् यतो व्यापारात् अन्योर्थो लक्ष्यते सा लक्षणा । सेति प्रतिनिर्दिश्यमानलिङ्गोपादानम् । **रूढितोऽथ प्रयोजनादिति** लक्षणाविभागपरम् । रूढिलक्षणा प्रयोजनलक्षणा चेति विभागः, न तु लक्षणान्तर्भूतत्वं तथात्वे एकैकस्यान्तर्भावेऽव्याप्तिः, उभयान्तर्भावेत्वसंभवः । लक्षणवाक्यमुदाहरणनिष्ठत्वेन व्याकरोति **कर्मणीत्यादि** । कुशान् लाति आदत्ते इति कुशल इति मुख्योऽर्थो निपुणे न संभवतीत्याह **दर्भग्रहणेति** । प्रयोजनलक्षणायामपि मुख्यार्थबाधं दर्शयति **गङ्गायां घोष इति** । व्याकरोति **विवेचकत्वादाविति** । रूढिलक्षणायां सामीप्यादि । रूढित इत्यस्यार्थः प्रसिद्धेः । प्रसिद्धेः प्रयोजनमाह **तथेति** । येषां पावनत्वदीनां तथा अतिशयेन न प्रतीतिः । तथातिशयेन प्रतिपादनरूपात् । आरोपिता क्रियेत्येतद्व्याचष्टे **स इति** । यद्यपि गङ्गायां घोष इत्यत्र गङ्गाशब्देन प्रत्यायितं स्रोतस्तीरं लक्षयतीत्यर्थव्यापारो लक्षणा, न शब्दव्यापारस्तथापि वाच्यधर्मः वाचके शब्दे आरोप्यते । अतः शब्दो लाक्षणिक इत्यर्थः । आरोपिते हेतुमाह **सान्तरार्थनिष्ठ इति** । अन्तरं व्यवधानम् । तेन सह वर्तते व्यवहितस्तीरादिः, स हि मुख्येन व्यवधीयते । अतस्तीरादिविषयो व्यापारो मुख्यार्थगत एव । न तु निवृत्तव्यापारगङ्गादिशब्दगतः; अतः शब्दे न संभवतीति तत्रारोप्यत इत्यर्थः ।

लाक्षणिके निरूपयितव्ये तदुपाधिं लक्षणां निरूपयति **मुख्यार्थबाध इति** । क्रिया शब्दव्यापारः। शाब्दीव्यञ्जनावारणाय **मुख्यार्थबाध इति**। तात्पर्यविषयान्वये मुख्यार्थतावच्छेदकप्रकारेण मुख्यार्थप्रतियोगिताविरहः। न तु मुख्यार्थान्वियानुपपत्तिमात्रम्। अजहत्स्वार्थायामव्याप्तेः। विवक्षिते तु छत्रिणो यान्तीत्यादावेकसार्थवाहित्वेनैवमुख्यार्थस्यान्वयो न तु छत्रित्वेनेति नाव्याप्तिः। असम्बन्धे लक्षणायामतिप्रसङ्ग इति **तद्योग इति**।

वस्तुतस्तु योगपदं प्रमाणान्तरानुत्थापकयोगपरम्। तेन धूमपदाद् व्याप्यव्यापकभावसम्बन्धेन वह्निज्ञानेन प्रसङ्गस्तस्यानुमानोत्थापकत्वात्। हेतुं विना लक्षणायामतिप्रसङ्ग इत्यत आह **रूढित इत्यादि**। अथेति विकल्पे। रूढिः प्रसिद्धिः प्रयोगप्रवाहः। **प्रयोजनादिति** प्रयोजनमुद्दिश्य ल्यब्लोपे पञ्चमी। नचैवं हेतुद्वैविध्येऽननुगम इति चेत्—अत्र **मिश्राः**—अन्यतरत्वेनानुगममाहुः।

वस्तुतस्तु रूढ्यभावसहकृतप्रयोजनाभावाभावस्य लक्षणेऽनुप्रवेशेनाननुगम इति केचित्। रूढिप्रयोजनभेदकेन स्वरूपनिर्वाहके प्रत्येकं प्रवेशेऽननुगमात्। समुदायेनासंभवादित्याहुः।

लक्षणापदयोगं दर्शयति **अन्योऽर्थ इति**। लक्ष्यते इति णिजन्तादाख्यातम्। यदि क्रियाविशेषणम्। यद्वा, यदित्यव्ययं यथेत्यर्थः। णिजर्थो हेतुर्व्यापारः। हेतुश्च **शब्द इति**। अन्यार्थप्रतीतिहेतुः शब्दव्यापारो लक्षणेत्यर्थः। अत्र शक्यसम्बन्धस्मरणमेव व्यापारो न तु शक्यसम्बन्धः। तस्य शब्दव्यापारत्वासंभवात्। तत्र च शब्दव्यापारत्वादिव्यवहारो व्यापारीभूतज्ञानविषयत्वादित्युक्तमेव। ननु गङ्गाशब्दः प्रवाहबाधादिमन्तरेणैव तीराद्यर्थं बोधयतु। तत्कथमभिधातो भेद इत्यत आह **आरोपितेति**। सान्तरार्थनिष्ठो मुख्यार्थप्रतीतिव्यवहितप्रतीतिकार्यनिष्ठ इत्यर्थः अभिधेयार्थबोधप्रतीकत्वाल्लक्षणाया इति। यतः इदं तु लक्षणास्वरूपकथनम्।

यद्वा इयं वृत्तिरर्थनिष्ठा बाधितेन तेन स्वसम्बन्धिबोधनात् शब्देत्वारोप्यते। तद्बोधितमुख्यार्थस्य लक्षकत्वात्। अत एव शब्दे औपचारिको लाक्षणिकव्यवहार इति। कुशं लातीति यौगिकोऽर्थो मुख्यः। दक्षान्वये तात्पर्यमिति मुख्यार्थबाधः[१२]। **गङ्गादीनामिति**। निर्विशेषं न सामान्यमिति यावद्विशेषाणां सामान्यनिर्वाहकतया अधिकरणत्वासंभवे मुख्यार्थबाधयोग इति हेतुहेतुमद्भावः। कुशग्राहिणः सतो ग्रहणमसतः परित्याग इति विवेचनम्।

केचित्तु, कुशलपदे न लक्षणा, दक्षत्वस्य प्रवृत्तिनिमित्तकत्वात्। व्याकरणव्युत्पत्तेः साधुत्वार्थकत्वात्-पङ्कजमण्डपतैलपदेष्वतिव्याप्त्यसंभावदव्याप्तिसंभवेन योगस्याप्रयोजकत्वात्। अन्यथा गौः शेत इत्यत्र गोपदे लक्षणा स्यात्। गमेर्डो प्रत्ययेन गमनकर्तरि व्युत्पादनात्। शयनकाले तद्बाधात्। तेन कलिङ्गः साहसिक इत्युदाहार्यमित्याहुः। तन्न। प्रतिलक्ष्यं लक्षणविधानेन कृत्सु व्युत्पत्तेः शक्तिग्राहकत्वात्। न पुनरुणादौ उणादयो बहुलमित्येकेनैव सूत्रेण मुनिना तत्सूत्रणात्। मण्डपं योजय, कुशलं याजयेति प्रयोगान्नासंभवः मण्डपतैलपदयोस्तु गृहविशेषे सार्षपादिद्रव्यविशेषे च कुशलपदवल्लक्षणैव। पङ्कजपदस्य पद्मत्वशक्त्या कुमुदादौ धीप्रयोगवारणमिति कुशलपदे यौगिकोऽर्थो मुख्य इति साधूक्तम् यच्च यद्वा कलिङ्गः साहसिक इत्याद्युदाहार्यमित्युक्तं तदपि तुच्छम्, तत्र कलिङ्गदेशस्थानां सर्वेषामेव साहसिकत्वरूपप्रयोजनलाभाय लक्षणाङ्गीकरणात्। **तथेति**। गङ्गायामिवेत्यर्थः। **तथा प्रतिपादनात्मन इति**। अन्यत्रान्यशब्द प्रयोगस्तद्धर्मप्राप्त्यर्थ इति न्यायादिति शेषः।

स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥१०॥

'कुन्ताः प्रविशन्ति यष्टयः प्रविशन्ति' इत्यादौ कुन्तादिभिरात्मनः प्रवेशसिध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते । तत उपादानेनेयं लक्षणा ।

बालचित्तानुरञ्जनी—विभागाभावाद्रूढिलक्षणामुपेक्ष्य प्रयोजनलक्षणां विभजते **स्वसिद्धय इति**। प्रयोजनलक्षणा द्विविधा शुद्धा गौणी च। शुद्धा उपादानलक्षणा लक्षणलक्षणा चेति द्विविधोक्ता। स्वसिद्धये पराक्षेप इत्युपादानम् । परार्थे स्वसमर्पणमिति लक्षणम् । उपादानलक्षणामुदाहरणमुखेन व्याकरोति **कुन्ता इति**। ततः कारणात्कुन्तानामात्मोपादानेनैव प्रवृत्तत्वादुपादानलक्षणा अजहत्स्वार्थेत्यर्थः। अत्र प्रयोजनं बाहुल्यप्रतीतिः। कुन्तिनः प्रविशन्तीत्युक्ते कुन्तानां बाहुल्यप्रतीतिर्न स्यात् ।

सारबोधिनी—प्रयोजनवतीं विभजते **स्वसिद्धय इति** । स्वार्थान्वयसिध्यर्थमित्यर्थः पराक्षेपः परार्थाभिधानं परार्थमिति परस्याशक्यस्यान्वयबोधाय स्वसमर्पणं स्वार्थदानं स्वार्थत्याग इति यावत्। यद्वा, स्वसमर्पणं स्वाधीनकरणं प्रवाहं स्वार्थं परित्यज्य गङ्गात्वादिना तीरादिबोधनादिति परमार्थः। एवञ्च स्वार्थपरित्यागेन परोपस्थितिरुपादानं, स्वार्थपरित्यागेन परोपस्थितिर्लक्षणम् । एत एव जहत्स्वार्था-जहत्स्वार्थे। अत्र जहत्स्वार्थां या वृत्ति सा जहत्स्वार्था द्वितीयान्तान्यपदार्थबहुव्रीहिः। तदन्या अजहत्स्वार्था इति समास इति[13] बोध्यम् ।

"गौरनुबन्ध्यः" इत्यादौ श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिरा-क्षिप्यते न तु शब्देन उच्यते "विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे" इति न्याया-दित्युपादानलक्षणा तु नोदाहर्तव्या । नह्यत्र प्रयोजनमस्ति, न वा रूढिरियम् । व्यक्त्यविना-भावित्वात्तु जात्या व्यक्तिराक्षिप्यते। यथा क्रियतामित्यत्र कर्ता। कुर्वित्यत्र कर्म, प्रविश पिण्डीमित्यादौ गृहं भक्षयेत्यादि च।

बालचित्तानुरञ्जनी—केचित्तु गौरनुबन्ध्य इत्यादिकं उपादानलक्षणाया उदाहरणमाहुः। तन्मतं दूषयितुमनुवदति **गौरिति**। श्रुतेः प्रभुसंमिततया बन्धनस्यावश्यकर्तव्यतां दर्शयति **श्रुतीति** । स्वबन्धन सिध्यर्थं जात्या व्यक्तिराक्षिप्येत। अभिधाव्यक्तिरूपं विशेष्यं धर्मिणं न गच्छेत्। कुतः विशेषणे जातिरूपे धर्मे क्षीणशक्तिः विरतव्यापारा इति परमतमनूद्य तदसङ्गतमिति प्रतिजानीते **इतीति**। तत्र हेतुमाह **नह्य-त्रेति**। कुन्ताः प्रविशन्तीत्यत्र बाहुल्यप्रतीतिवत् अत्र न किञ्चत्प्रयोजनमस्तीत्यर्थः। तर्हि रूढिः स्यात्तत्राह **नवेति**। निर्वचनाभावरूपबाधाभावादित्यर्थः। यद्येवं बाढं तर्हि व्यक्तिप्रतीतिरत आह **व्यक्तीति** लक्षणां बिना (अविना) भावेनैवाक्षेप इत्यत्र उदाहरणान्याह **यथेति**। प्रविश गृहं, पिण्डीं भक्षयेत्यर्थः। पीनो देव-दत्त इत्यत्रापि लक्षणां विना अविनाभावेनैवाक्षेप इत्याह **पीन इति**। यद्यपि भोजनाभावसहितं पीनत्वमनु-पपन्नं रात्रिभोजनस्य पीनत्वस्य च कार्यकारणसम्बन्धः, दिवाभोजनरहितोऽप्ययं पीन इति पुरुषकैश्चिद्

यादि प्रयोजनञ्च विद्यते तथापि श्रुतार्थापत्तेर्विषयत्वेन मुख्यार्थबाधासंभवान्नेयं लक्षणेत्यभिप्रायः। दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यत इति तदुपपादकार्थकल्पनमर्थापत्तिः।

सारबोधिनी—**श्रुतीति**। श्रूयत इति श्रुतिः शब्दः। कथं मे स्यादित्युत्प्रेक्षणम्। व्यक्तिराक्षिप्यते लक्ष्यत इत्यर्थः। **क्षीणशक्तिरिति**। "नागृहीतविशेषणाबुद्धिर्विशेष्ये चोपजायत" इति न्यायात् विशेषणं प्रत्याय्य विरमात्। शब्दबुद्धिकर्मणां विरम्य व्यापाराभावादित्यर्थः। **न वा रूढिरिति**। देवदत्तादिष्वाधुनिकसंज्ञापदेषु रूढ्यभावेन लक्षणाया अप्रवृत्तेर्व्यक्तिमात्रे न लक्षणेति भावः। ननु तथापि गोपदादिषु रूढिरस्त्येव तथा च यथाकथञ्चित्प्रयोजनमपि संभवतीत्यतो दूषणान्तरमाह **व्यक्त्यविनाभावादिति**। आक्षिप्यते अनुमीयते। जातिर्व्यक्त्याश्रिता जातित्वात् इत्यनुमानसंभवे न लक्षणेत्यर्थः। नचानुमितिव्यवधानेन शब्दप्रमाण-व्याकोपस्तस्यापि शब्दपरिकरत्वात्। तत्सहकारशब्देन जातिविशिष्टधीरिति नाशाब्दत्वम्। आक्षेपे दृष्टान्तमाह **यथेति**। कृतिः साश्रया गुणत्वात् तथाकृतिः सविषया कृतित्वादित्याक्षेपेण कर्तृकर्मलाभ इति गुरुमतेनार्थाक्षेपः। कर्मकर्त्तोस्तु एतद्विहितप्रत्ययाभ्यामेव लब्धत्वान्न तयोराक्षेपः।

भट्टमते शब्दाक्षेपमाह **प्रविशेत्यादि**। **गृहं भक्षयेत्यत्रेति** शब्देन कर्मवाचक क्रियावाचक शब्द-स्वरूपाभिधानमिति वादिभेदेन दृष्टान्तभेदः। अन्यलभ्ये न लक्षणेत्यत्र दृष्टान्तमाह **पीन इति**।

पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र च रात्रिभोजनं न लक्ष्यते, श्रुतार्थापत्तेरर्था-पत्तेर्वा तस्य विषयत्वात्।

गङ्गायां घोषः इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गाशब्दः स्वार्थमर्पयति इत्येवमादौ लक्षणेनैषा लक्षणा। उभयरूपा चेयं शुद्धा। उपचारेणामिश्रितत्वात्।

बालचित्तानुरञ्जनी—उपादानलक्षणां निरूप्य लक्षणलक्षणामुदाहरति **गङ्गायामिति**। सूत्रस्थं परार्थमित्येतद्व्याकरोति **तटस्येति**। स्वसमर्पणमित्येतद्व्याकरोति **गङ्गाशब्द इति**। स्वसमर्पणं नाम जहत्स्वार्थत्वम्। लक्षणेन स्वार्थसमर्पणेन उपलक्षणाल्लक्षणेत्यर्थः। शुद्धैवेत्येतद्व्याकरोति **उभयरूपेति**। शुद्धत्वे हेतुमाह **उपचारेणेति**। भिन्नत्वेन प्रतीयमानयोरैक्यारोपणमुपचारः। यथा गौर्वाहीक इत्यत्र[१४]।

सारबोधिनी—दिवा भोजनाभाववतः पीनत्वं रात्रिभोजनं विना अनुपपन्नमित्यनुपपत्या रात्रि-भोजनं कल्प्यत इत्यत्र भट्टमते रात्रौ भुङ्क्त इति शब्दः कल्प्यते। गुरुमते तदर्थमात्रमित्याह **श्रुतेति**। श्रुतार्थापत्तिः शब्दकल्पनम्। अर्थापत्तिरर्थकल्पनम्। तस्य रात्रिभोजनस्य।

लक्षणलक्षणामुदाहरति, **गङ्गायामिति**। स्वार्थमर्पयति ददाति त्यजतीत्यर्थः। यद्वा स्वार्थमिति भावपरम्, तेन स्वार्थत्वम्। तत्र [तटे] करोति गङ्गात्वेन तीरबोधनादित्यर्थः। शुद्धैवेति व्याचष्टे **उभयरूपा चेति**। वक्ष्यमाणा आरोपसाध्यवसाना शुद्धा गौणी च। इयमुभयरूपा शुद्धैव न गौणीत्यर्थः। अत्र हेतुमाह **उपचारेणेति**। सादृश्येन सम्बन्धेन प्रवृत्तिरुपचारः भिन्नत्वेन प्रतीयमानयोरेकारोपणमिति वा। अथ लक्ष्यलक्षकयोरभेदग्रहाभाव एव आरोपासाध्यवसानाभ्यामनयोर्भेदकस्तदेव ताटस्थ्यम्। अथवा भेदा-भेदौदासीन्यं ताटस्थ्यमिति मतं निराकरोति।....

अनयोर्भेदयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यम् । तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः । गङ्गासंबन्धमात्रप्रतीती तु गङ्गातटे घोष इति मुख्यशब्दाभिधानात् लक्षणायाः को भेदः ॥१०॥

बालचित्तानुरञ्जनी—प्रतिपादयति **अनयोरिति** । उपादानलक्षणस्वरूपयोर्भेदयोः लक्ष्यस्य तीरादेः लक्षकस्य गङ्गादेर्भेदरूपं पूर्वोक्तोपचारलक्षणं ताटस्थ्यमिह नास्तीत्यर्थः । ताटस्थ्याभावेनैव प्रयोजनसिद्धि सिसाधयिषुः अन्वयं तां च दर्शयति **तटादीनामिति** । प्रतिपादने कृते तत्त्वप्रतिपत्तिरभेदज्ञानं भवतीति शेषः । तेन भिन्नत्वेन प्रतीयमानत्वं निरस्तम् । तस्यां च सत्यां अत्यन्तपावनत्वादि प्रयोजनसिद्धिः व्यतिरेकं दर्शयति । गङ्गासम्बन्धमात्रप्रतीतौ **मुख्यशब्दात्** लक्षणाया विशेषाभावान्न प्रयोजनसिद्धिरित्येवमुपचारेणामिश्रित-त्वमित्यनयोरित्यादिग्रन्थं व्याकुर्वन्ति तदसङ्गतम् । भिन्नत्वेन प्रतीयमानयोरैक्यारोपणरूपोपचारामिश्रित-त्वस्य गौरयमिति साध्यवसानभेदे विद्यमानत्वेन तस्यापि शुद्धत्वप्रसङ्गात् । ननु तत्र गुणयोग एवोपचारः, अत्र पूर्वोक्त एवोपचारस्तदमिश्रत्वं शुद्धत्वमिति चेत् शुद्धत्वे अनुगतनिमित्तभावप्रसङ्गात् । नन्वैक्या-रोपणमुपचारस्तदमिश्रत्वं शुद्धत्वमिति चेत् **आयुर्घृतं** आयुरेवेदमिति वक्ष्यमाणयोः शुद्धयोः सारोप-साध्यवसानभेदयोरारोपिततादात्म्ययोः शुद्धत्वाभावप्रसङ्गः । तस्मादेवं व्याख्यानं कर्तव्यम् । उपचारो नाम गुणयोगस्तदमिश्रत्वं शुद्धत्वम् । अत एव वक्ष्यमाणौ गौर्वाहीको गौरयमिति सारोपसाध्यवसानभेदौ । जाड्यमान्द्यादिना गुणेन मिश्रितत्वात् । अनयोर्लक्षणलक्षणोपादानव्यतिरेकेण भेदकान्तरमस्तीति कश्चित्, तन्मतं दूषयति **अनयोरित्यादिना** । गङ्गायां घोष इत्यत्र लक्षकं तटस्थं ताटस्थ्यं नाम लक्षकस्य स्रोतसः गङ्गाशब्दबोध्यकोटि निवेशाभावः । परन्तु ताटस्थ्यं अनयोर्भेदयोर्भेदरूपं भेदकं न भवतीत्यर्थः ।

तत्र हेतुमाह **तटादीनामिति** । प्रतिपादने कर्तव्ये प्रयोजनसिध्यर्थं तादात्म्यप्रतीतिरङ्गीकर्तव्या । तथा च ताटस्थ्यं नास्तीत्यर्थः । तादात्म्यप्रतिपत्तौ प्रयोजनसिद्धिरित्यन्वयमाह **तत्त्वप्रतिपत्तौ हीति** । व्यतिरेक-माह **गङ्गेति** । सम्बध्यत इति सम्बन्धं तीरं कर्म्मणि यत्र तन्मात्रप्रतीतावित्यर्थः । नन्वस्मिन्पक्षे जह-त्स्वार्थरूपस्य लक्षणस्य तुल्यत्वात् लक्षणलक्षणासाध्यवसानलक्षणयोः को भेदः । अयं भेदः । गौणे साध्य-वसानेऽसादृश्यनिबन्धनत्वं लक्षणभेदे तु तदभावः । शुद्धेऽपि साध्यवसाने आयुरेवेदमित्यादौ आरोप्य-माणगतस्य पावनत्वादेः फलरूपत्वमित्यर्थः ।

सारबोधिनी—अनयोरिति । ताटस्थ्यं न भेदरूपम् । न भेदकं वक्ष्यमाणसारोपसाध्यवसानाभ्या-मिति शेषः । अभेदबुद्धि विना प्रयोजनप्रतिपत्तेरभावात् । एतदेव विशदयति **तटादीनामिति** । **तत्त्वप्रति-पत्तौ** अभेदप्रतिपत्तौ । तथाचात्र **गङ्गात्वमेव** । भेदस्तत्प्रतिपत्तौ नाभेदग्रहाभावरूपं ताटस्थ्यमिति प्रति-पिपादयिषितं शैत्यपावनत्वादिकम् । इदमत्र तत्त्वम् । अन्यत्रान्यशब्दप्रयोगस्तद्धर्मप्राप्त्यर्थमिति गङ्गागत-शैत्यपावनत्वादिप्रतिपत्तये तटे गङ्गादिशब्दप्रयोगः ।[१५] तत्प्रतीतिस्तु गङ्गाभेदरूपेण गङ्गात्वेन तटस्य प्रतीतावेव ।

ननु गङ्गासम्बन्धमात्रप्रतीतौ तथा सति गङ्गातटे घोष इत्यत्रापि तथा प्रतीतिः स्यादेव । तदेव वक्ष्यति **गङ्गासम्बन्धेति** । **को भेदः** कः फलातिशय इत्यर्थः । न चात्र गङ्गात्वेन भवतीत्यस्मद्विवक्षणात् तस्यैव तात्पर्यविषयत्वात् गुरुमते शब्दोपस्थितस्य शाब्दबोधविषयत्वानैयत्यात् । ननु गङ्गात्वेनावगते तीरे

कथं बाधाद्दोषान्वय इति चेन्न । धर्मिणस्तीरस्यायोग्यत्वात् । ननु तथापि बाधात् कथं तीरप्रतीतिरितिचेन्न । तत्कालबाधास्फूर्तेः । यद्वा अत्यन्तासत्यपि ज्ञानमर्थे गङ्गात्वेन शब्दः करोति हीत्याश्रयणात् अयोग्यताज्ञानस्य प्रतिबन्धकतानङ्गीकारात् । अतएव सारोपादावपि गौर्वाहीकः मुखं चन्द्र इत्यादौ गोत्वचन्द्रत्वादिना वाहीकमुखादि प्रतीतिः । ननु तर्हि शुद्धसारोपासाध्यवसानाभ्यामनयोः को भेद इति चेन्मैवम्, तयोराहार्यारोपरूपत्वात् ।

केचित्तु, तटत्वेनैव तटबोधस्ततो व्यञ्जनया शक्यलक्ष्ययोरभेदप्रतिपत्तौ शैत्यपावनत्वादि प्रत्ययः, व्यञ्जने बाधस्याप्रतिबन्धात् । बाधितबोधकत्वेनैव तस्य धर्मिग्राहकमानसिद्धत्वादित्यभेदग्रहाभावरूपं ताटस्थ्यं न भेदकं अभेदग्रहसत्त्वादित्याहुः ।

सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा ।

आरोप्यमाणः आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा ।।

बालचित्तानुरञ्जनी--प्राभाकरास्तु लक्षणावृत्तेर्गौण्याश्च भेदं कुर्वन्ति तन्मतं निराकुर्वन् उपचारमिश्रां चतुर्भेदत्वेन निरूपयितुमाह **सारोपेति** । तथाशब्दः समुच्चये । सारोपेति लक्ष्यनिर्देशः अन्येति शुद्धलक्षणातो भेदः । तमेव भेदं तु शब्दद्योत्यं दर्शयति **अनपह्नुतभेदाविति** अनपह्नुत भेदावित्यनेन साध्यवसानाया भेदं दर्शयति । सारोपत्वनिर्वाहाय तथाशब्दद्योत्यमर्थमाह **सामान्याधिकरण्येनेति** ।

सारबोधिनी--**सारोपेति** । तुशब्देन पूर्वद्वयव्यवच्छेदः । पूर्वद्वयी शुद्धैवेत्युक्तम् । **अन्या** शुद्धा गौणीचेत्यर्थः । तथा इत्यस्य विवरणमनपह्नुतभेदाविति तथा तेनैव रूपेण यत्र समभिव्याहारे उक्तौ भवत इत्यस्य विवरणम् **सामान्याधिकरणत्वेन निर्दिश्येते इति** । यद्वा, उच्यत इत्युक्तिर्वाक्यं यत्र वाक्य इत्यर्थः । अनपहनुतभेदौगृहीतवैधर्म्यौ । नञ्भावपाठे अगृहीतविद्यमानान्योन्याभावौ ।

विषय्यन्तः कृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ।।११।।

विषयिणारोप्यमाणेनान्तःकृते निगीर्णे अन्यस्मिन्नारोपविषये सति साध्यवसाना स्यात् ।।११।।

बालचित्तानुरञ्जनी--मिश्रलक्षणाया एव भेदान्तरमाह **विषय्यन्तरिति** । व्याकरोति **विषयिणेति** । **निगीर्ण इति** आत्मपरिशेषीकृततादात्म्य इति यावत् । निगरणेन विषयविषयिणोरभेदप्रतिपत्तिरध्यवसानं तेन सह वर्तत इति साध्यवसानिका । अनयोरेव प्रत्येकं द्वैविध्यं दर्शयति ।

सारबोधिनी--**विषयीति** । **विषयिणा आरोप्यमाणेन अन्तः कृते निगीर्णे** विषयनिष्ठासाधारण धर्मग्रहं विना विषयिणा स्वतादात्म्येन प्रत्यायितो इदमत्र बोध्यम् । यत्र विषयनिष्ठासाधारणधर्मप्रतिपत्तिसहकृतान्यस्यान्यतादात्म्यप्रतीतिः सा सारोपा । यत्र विषयनिष्ठासाधारणधर्मप्रतिपत्त्यसहकृतान्यस्यान्यतादात्म्यप्रतीतिः सा साध्यवसानिका । इमे[१६] यथाक्रमं रूपकप्रथमातिशयोक्ती ।

भेदाविमौ च सादृश्यात् सम्बन्धान्तरतस्तथा ।

गौणौ शुद्धौ च विज्ञेयौ

इमावारोपाध्यवसानरूपौ सादृश्यहेतू भेदौ "गौर्वाहीकः" इत्यत्र "गौरयम्" इत्यत्र च ।,

बालचित्तानुरञ्जनी—ननु गौणी नामान्या वृत्तिरस्ति । तथा च कथं शब्दार्थयोस्त्रैविध्यमिति हृदि कृत्वा गौणीं लक्षणायामन्तर्भावयन् भेदान्तरमाह । भेदाविमाविति । सादृश्याद्गौणी सम्बन्धान्तरतः शुद्धौ । व्याकरोति **इमाविति** । गौर्वाहीकः इति सारोपा गौणी । वाहीको नाम देशविशेषः । तत्रत्यः पुरुषोऽपि वाहीकः । गौरयमिति साध्यवसाना गौणी ।

सारबोधिनी--**भेदाविमौ चेति** । तथा च मुख्यार्थबाधादिहेतुत्रयसत्त्वात् गौण्याः लक्षणायामन्तर्भाव इति भावः । मुख्यार्थसम्बन्धस्तु सजातीयगुणवत्वम् । तत्तु स्वसमवेतसमवेतसमवायिसमवायित्वरूपं परम्परया न तु साक्षादित्यप्रयोजकमेतत् ।

अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिवृत्तत्वमुपयान्ति इति केचित् ।

स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते न परार्थोऽभिधीयत इत्यन्ये

साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यत इत्यपरे ।

बालचित्तानुरञ्जनी—अत्र वाहीकादौ गवादिशब्दप्रवृत्तिनिमित्तवादिनां [वि] प्रतिपत्तिं दर्शयति **अत्रहीति** । स्वस्य गोशब्दस्यार्थो गोत्वं पिण्डाकृतिर्वा तत्सहचारिणा गोशब्देन लक्ष्यमाणः परार्थो वाहीकादिः । गोशब्दः वाहीकशब्देन सह अनुपपद्यमानः सामानाधिकरण्येन बाधितमुख्यार्थः सन् स्वाभिधान्पुरःसरं स्वार्थसहचारिजाड्यादिगुणान् लक्षयित्वा तानेव निमित्तीकृत्य तत्सदृशवाहीकगुणद्वारेण वाहीके उपचरितस्तमभिधत्त इत्यर्थः ।

सारबोधिनी—परार्थाभिधाने अभिधयां वाहीकार्थप्रत्यायने । **केचिदित्यस्वरसोद्भावनम्** । तद्वीजन्तु गोपदस्य वाहीके सङ्केतविरहेण शक्यतारूपम् । **स्वार्थेति** । **अभेदेन** साजात्येन **गुणा** एव न तु गुणिनस्तेषां वाहीकादिशब्दादेव प्राप्तेः । तेनान्यलभ्यत्वेन नाभिधा । तदाह **नत्विति** । **अन्य इति** अयमपि पक्षो न साधु । लक्ष्यमाणगुणानां वाहीकेन सहान्वयानुपपत्तेः ।

उक्तञ्चान्यत्र—(भट्टवार्तिके)

अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते ।
लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता ।।इति।

अविनाभावोऽत्र संबन्धमात्रं न तु नान्तरीयकत्त्वतम् । तत्त्वे हि 'मञ्चाः क्रोशन्ति' इत्यादौ न लक्षणा स्यात् । अविनाभावे चाक्षेपेणैव सिद्धेर्लक्षणायाः नोपयोग इत्युक्तम् ।

बालचित्तानुरञ्जनी—अस्मिन् पक्षे प्रवृत्तिनिमित्तस्य लक्ष्यमाणत्वम् । व्यधिकरणत्वम् । गोशब्दस्यासङ्केतितवाहीकार्थाभिधायकत्वं चेति त्रितयमयुक्तं इत्यरुच्या पक्षान्तरमाह **स्वार्थसहचारीति** ।

गोशब्दाभिहितार्थो गवादिः स्वसमवेतजाड्यादिगुणाभेदेन वाहीकगतान् गुणान् लक्षयति । न तु गोशब्दो वाहीकमभिधत्त इत्यर्थः । अस्मिन्पक्षे लक्षकस्य गोशब्दार्थस्य लक्ष्यस्य वाहीकगतजाड्यादेश्च सम्बन्धो न संभवति । गुणैक्यं सम्बन्ध इति चेत् न । विकल्पासहत्वात् । तत्किं तुल्यगुणत्वं तुल्यगुणवत्वं वा । नाद्यः, लक्षकस्य गवादेर्द्रव्यत्वेन गुणत्वाभावात् । नापि द्वितीयः, लक्ष्यस्य जाड्यादेर्गुणत्वेन गुणवत्वाभावात् । किञ्च जाड्यादिगुणमात्रप्रतीतौ गौर्जाड्यमिति प्रयोगप्रसङ्ग इत्यरुच्या स्वाभिमतमदुष्टं पक्षमाह साधारणेति । गोवाहीकयोः साधारणा गुणा जाड्यादयस्तदाश्रयणरूपेण संबन्धेन गोशब्दो वाहीकं लक्षयतीत्यर्थः । गवादिशब्दप्रवृत्तौ साधारणाश्रयत्वं निमित्तम् । अतो नोक्तदोषावकाशः । उक्तेऽर्थे संमतिमाह **उक्तञ्चेति** । **अभिधेयेन स्रोतसा** सम्बद्धस्तटादिस्तत्प्रतीतिस्तत्प्रत्यायकत्वं स्रोतसो धर्मः । उपचारामिश्रत्वेन शुद्धा लक्षणेत्यर्थः । उपचारमिश्रां गौणीमाह **लक्ष्येति** । पद्यार्धं प्रथमे पक्षेऽपि गवादावेव लक्ष्यमाणैर्द्वितीये तु वाहीकादौ वृत्तिगौणी **लक्षणेति** स्वमतसंमतित्वेन व्याकर्तव्यम् । तु शब्दो विशेष-द्योतकः । अविनाभावपदं व्याकरोति **अविनाभाव इति** । येन विना यन्न भवति तन्नान्तरीयकम् । अन्तरं विना तन्न भवन्नान्तरीयकम् । गेहादित्वार्थः स्वार्थे कः । एवं सम्बन्धमात्राङ्गीकारे दोषान्तरमाह **तत्त्वेहीति** । **अविनाभावेऽङ्गीकृते सतीत्यर्थः** । मञ्चानामचेतनत्वेन मुख्यार्थक्रोशनस्यासंभवेन सिध्यर्थं पुरुषलक्षणे कृते सा न स्यात् । मञ्चपुरुषयोरविनाभावादित्यर्थः । अविनाभावाङ्गीकारे दोषान्तरमाह **अविनाभावे चेति** । गौरनुबन्ध्य इत्यादिप्रस्तावे उक्तमित्यर्थः ।

सारबोधिनी—तथाहि अभेदस्यायोग्यत्वात् भेदोपस्थापकविभक्ति विना नामार्थयोर्भेदान्वये स्वरूपायोग्यत्वात् । स्वमतमाह **साधारणेति** । साधारणः सजातीयः **परार्थ एव** वाहीक एव न तु वाहीकत्व तस्य, वाहीकपदादेव प्राप्तेः । **अपर इति** । न परेऽपरे अस्मत्सगोत्रा इत्यर्थः । अत्र गोसादृश्यं लक्ष्यतावच्छेदकमिति ये वदन्ति तेह्य तस्मादुपमाया को भेद इति त एव जानन्ति ।

वस्तुतस्तु, यद्यस्मिन्मत एवाग्रहस्तदा भेदांशाकरम्बितमेव सादृश्यं लक्ष्यतावच्छेदकमिति द्रष्टव्यम् । अत एव "उपमैव तिरोभूत भेदा रूपकमिष्यते" इत्युक्तम् ।

अन्ये तु, गोत्वेनैव गोशब्देन वाहीको बोध्यते तथा मुखादावपि । चन्द्रत्वेनैव मुखादिप्रतीति-रित्याहुः । न चायोग्यताज्ञानात्कथमेतादृशीधीरिति वाच्यम् । "अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हीति" न्यायात् । आहार्यारोपाद्वा अविनाभूतप्रतीतिरिति करणोक्तिः । सम्प्रदायमते लक्ष्यार्थोपस्थितिव लक्षणा । ननु क्रोशेन कालेऽव्याप्तिरस्त्येवेत्यत आह **अविनाभावेत्यादि** । भेदेऽपीति । भेदवैधर्म्ये भासमानेऽपीति शेषः । ताद्रूप्यं गोगतजाड्यादि । **सर्वथैवाभेदावगम इति** । वाहीकत्वाद्यसाधारणधर्मानुपस्थितेरिति भावः । सम्बन्धान्तरं प्रपञ्चयति **क्वचिदित्यादि** । अत्रोपादानलक्षणाभ्यामर्थान्तरसङ्क्रमितवाच्यात्यन्त-तिरस्कृतवाच्यौ गौणीभ्यां रूपकप्रथमातिशयोक्ती । शुद्धाभ्यां सारोपासाध्यवसानाभ्यां हेत्वलङ्कारश्च निरूपयिष्यते । इति षड्विधनिरूपणफलमिति दिक्[17] ।

अत्र केचित् । षड्विधत्वमनुपपन्नम् । गौण्यामप्युपादानादिसंभवात् । गोवाहीकसाधारण्येन गाव एते समानीयन्त गावः इत्युदाहरणद्वयसंभवात् षड्भिरुपाधिभिः कल्पिता अस्यामिति षड्विधेति तदर्थं इत्यामनन्ति तन्न शुद्धैवेत्यत्र एव शब्दस्य सारोपान्या तु इत्यत्र तु शब्दस्यानालोचनात्तथोक्तेः । यतः स्वसादृश्यस्य स्वावृत्तित्वेन तत्रोपादानाद्यसंभवात् । सम्बन्धान्तरेण गौणत्वायोगात् । लक्षणानिरूपणस्य व्यङ्ग्योपस्थापनफलकतया तन्मुखेन तद्भेदमाह ।

आयुर्घृतम् 'आयुरेवेदम्' इत्यादौ च सादृश्यादन्यत् कार्यकारणभावादि सम्बन्धान्तरम्। एवमादौ च कार्यकारणभावादिलक्षणपूर्वे आरोपाध्यवसाने।

अत्र गौणभेदयोर्भेदेऽपि ताद्रूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयोजनम्। शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण च कार्यकारित्वादि।

बालचित्तानुरञ्जनी—आयुर्घृतमिति शुद्धसारोपाया उदाहरणम्। **आयुरेवेदमिति** शुद्धसाध्यवसानाया उदाहरणमिति दर्शयन् पद्यस्थं सम्बन्धान्तर इत्येतद्व्याकरोति **आयुर्घृतमिति**। प्रथमादिशब्दात् इन्द्रार्था स्थूणा इत्यादि। द्वितीयात् तादर्थ्यादि। गुणाभावेन शुद्धत्वात्कथं मिश्रितत्वं तत्राह **एवमादाविति**। गुणाभावेन शुद्धत्वेऽपि आयुषः करणे घृते कार्यकारणभावसम्बन्धपूर्वकत्वेन कार्यभूतायुष्युपचारेण प्रवृत्ते आरोपाध्यवसाने इत्युपचारमिश्रत्वमित्यर्थः। शुद्धभेदाभ्यां सकाशाद् गौणभेदयोर्विशेषं दर्शयति **अत्रेति**। गौर्वाहीको, गौरयमित्यनयोरुदाहरणयोर्गोवाहीकयोर्भेदेऽपि प्रथमे गोभूयस्त्वप्रतीतिर्द्वितीये सर्वथाऽभेदावगमः प्रयोजनम्। गौणभेदाभ्यां शुद्धभेदयोर्वैलक्षण्यं दर्शयति **शुद्धेति**। तत्र आयुर्घृतमित्यत्र वैलक्षण्येन क्षीरादिः वैसादृश्येन, **आयुरेवेदमित्यत्र** घृतं क्षीरादिवत्-आयुष्यं न व्यभिचरतीति अव्यभिचारेण कार्यकारित्वमिति विवेकः **कार्यकारण भावादिलक्षणेत्यत्र** आदिशब्दसङ्ग्राह्यान्सम्बन्धानाह।

क्वचित् तादर्थ्यादुपचारः। यथा-इन्द्रार्था स्थूणा इन्द्रः। क्वचित् स्वस्वामिभावात्। यथा राजकीयः पुरुषो राजा। क्वचित् अवयवावयविभावात्। यथा-अग्रहस्त इत्यत्राग्रमात्रे अवयवे हस्तः। क्वचित् तात्कर्म्यात् यथा अतक्षा तक्षा।

बालचित्तानुरञ्जनी--क्वचिदित्यादि। उपचारो व्यवहारः तदुदाहरति **यथेति**। अत्रेष्टार्थप्रदायकत्वं व्यङ्ग्यम्। **राजकीयः पुरुषो** राजेत्यत्रानुल्लङ्घ्यशासनत्वादिकं व्यङ्ग्यम्। हस्तावयवेन हस्तव्यापारं विदधति। सामर्थ्यादिव्यङ्ग्यम्। तक्षेत्यत्र तत्कर्मनिपुणत्वादि व्यङ्ग्यम्

लक्षणा तेन षड्विधा ॥१२॥

आद्यभेदाभ्यां सह ॥१२॥

सा च

व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने।

प्रयोजनं हि व्यञ्जनव्यापारगम्यमेव।

बालचित्तानुरञ्जनी—सुखावबोधार्थमुक्तभेदान् परिगणयति **लक्षणेति**। लक्षणाप्रयोजनलक्षणेत्यर्थः। तेन उक्तप्रकारेण। अनन्तरोक्तं भेदचतुष्टयमेव प्रतीयते कथं षड्विधेत्याशङ्क्य व्यवहितं भेदद्वयं स्मारयति **आद्येति**। तेन षड्भेदा उपादानलक्षणा (लक्षणलक्षणा), गौणी सारोपा, गौणी साध्यवसाना, शुद्धा सारोपा, शुद्धा साध्यवसाना चेति। व्यङ्ग्यरहिता रूढिलक्षणा एका। उक्तषड्विधा प्रयोजनलक्षणा गूढागूढव्यङ्ग्यत्वेन द्वादशविधा। एवं लक्षणायास्त्रयोदशविधत्वं दर्शयति **सा चेत्यादिना**। प्रयोजनलक्षणायाः नियमेन व्यङ्ग्यसंहितत्वं प्रतिपादयति **प्रयोजनं हीति**। लक्षणायाः प्रकृतत्वात्। तच्चेत्यसङ्गतमित्या-

शङ्क्याह **तच्चेति**। अन्विष्यमाणं यद्विद्वद्भिरेव प्रतीयते तद्गूढम्।

सारबोधिनी—व्यङ्ग्येन रहितेति। ननु प्रयोजनवत्यां कुतः सव्यङ्ग्यत्वमित्यपेक्षायामाह **प्रयोजनं हीति**। अत्रापि व्यङ्ग्यभेदेन द्वैविध्यमाह **तथेति**। गूढत्वं सहृदयैकवेद्यत्वम् सहृदयत्वं काव्यवासनापरिपक्वबुद्धित्वम्। सहृदयासहृदयवेद्यत्वमगूढत्वम्।

तच्च गूढमगूढं वा

तच्चेति व्यङ्ग्यम्। गूढं यथा

मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितम्
समुच्छलितविभ्रम गतिरपास्तसंस्था मतिः।
उरो मुकुलितस्तनं जघनमंसवन्धोद्धुरं
वतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥६॥

बालचित्तानुरञ्जनी—प्रयोजनलक्षणायाः गूढव्यङ्ग्यमुदाहरति **गूढं यथेत्यादिना**। **मुखमिति** विकासेन पुष्पधर्मेण तत्रासंभवता असंकुचितत्वसम्बन्धातिशयत्वं लक्ष्यते, सौरभादि व्यङ्ग्यम्। स्वाधीनवक्रत्वं येन तत्प्रेक्षणं, वशीकरणेन चेतनधर्मेण स्वाभिमतविषये प्रवृत्तिरूपेण सम्बन्धेन स्वाधीनत्वं लक्ष्यते, उचितपुरुषाभिलाषित्वं व्यङ्ग्यम्। बहुविलासागतिर्गमनं, अत्र समुच्छलितत्वेन उद्गमरूपेण मूर्तिधर्मेण कार्यकारणभावसम्बन्धाद्बाहुल्यं कारणं लक्ष्यते, समस्ततरुणहरिणवागुरत्वं व्यङ्ग्यम्। संस्था मर्यादाबुद्धिः। मर्यादात्यागेन चेतनधर्मेण कार्यकारणभावसंबन्धादस्थैर्यं लक्ष्यते। आलिङ्गनयोग्यत्वं व्यङ्ग्यम्। असम्बन्धेन मांसलत्वेन उद्धुरं उत्कटम् अत्र उद्धुरत्वेन उत्क्रान्तधुरत्वेन वृषभादिधर्मेण पीनत्वसादृश्यसम्बन्धादुत्कटत्वं लक्ष्यते। मनोहरत्वकामायमानत्वादि व्यङ्ग्यम्। इन्दुर्वदनं यस्या इत्युपचारो यदा तदा इन्दुशब्दः वाधितमुख्यार्थः स च सुवृत्तत्वादिगुणयोगाद्वदनं लक्षयति। विरहितापोपशान्तिर्व्यङ्ग्यम्। उद्गमः उदयः अङ्कुरादिधर्मः तरुणिमनि अनुपपन्नः अत उद्गमशब्दो वाधितस्वार्थः सन् नवोद्भेदसाम्यात् तारुण्यं लक्षयति, सर्वजनाह्लादकत्वं व्यङ्ग्यम्। मोदनेन कार्यकारणसम्बन्धादनियन्त्रितत्वं कारणं लक्ष्यते, स्पृहणीयत्वं व्यङ्ग्यम्। निमित्तान्तरादपि भवता समुच्छलितादिबाहुल्यादिना धूमादेरिव व्याप्त्याभावाल्लक्षणैवाङ्गीकार्या।

सारबोधिनी—मुखमिति विकासः पुष्पधर्मः। **स्मितेऽसंभवन् प्रकाशं लक्षयति**। अतिमनोहारित्वं व्यङ्ग्यम्। असङ्कुचितत्वं सम्बन्धः। एवं वशितसमुच्छलितापास्तसंस्थमुकुलितोद्धुरमोदनशब्दैः स्वाधीनत्वबाहुल्यविषयशतसंसारित्वयोग्यत्वाजृम्भणानि लक्ष्यन्ते। तदतिशयो व्यङ्ग्यः। अभिमतविषयप्रवृत्तिकारित्वं कार्यकारणभावः। अपरत्रापि स एव। निबिडावयवत्वं पुनरत्रापि कार्यकारणभावः। यथोत्तरसम्बन्धो बोध्यः। संस्था मर्यादा। प्रकृत्यैवेयमिन्दुवदना तत्र यौवनोद्गम इति अहो विदग्धानां यूनां पतितोऽनर्थ इति। अत एव बतेति खेदे।

अगूढं यथा—

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ॥१०॥

अत्रोपदिशतीति ।

बालचित्तानुरञ्जनी—अगूढं व्यङ्ग्यमुदाहरति **अगूढं यथेति** । लक्ष्म्या अतिशयसम्बन्धात् मूर्खा अपि चतुरचरित्राणां ज्ञातारः चतुर व्यापारान् विदन्ति । कर्मणि षष्ठी । उक्तमर्थमर्थान्तरन्यासेन साधयति **उपदिशतीति** । कामिनीनां तारुण्यमद एव विलासान् शिक्षयति । एवं श्रीपरिचयोऽपि चातुर्यं शिक्षयतीत्यर्थः अत्रोपदिशतीत्यगूढव्यङ्ग्यमिति शेषः । उपदेशेन च अज्ञातज्ञानस्य विशेषेण सामान्यविशेषभावसम्बन्धाद-ज्ञातज्ञापनं सामान्यं लक्ष्यते । अनायासेन शिक्षणं व्यङ्ग्यम् । उपदेशशब्देनैव शिक्षादानप्रकटनात् शिक्षा-रूपव्यङ्ग्यस्य वाच्यायमानत्वेनाचमत्कारकारित्वात् अगूढव्यङ्ग्यत्वमित्यर्थः स्थूलमार्गेणोक्तम् । वैचित्र्य-मुपसंहरति ।

सारबोधिनी—**श्रीपरिचयादिति** । ललितहावः "स्त्रीणां विलासा बिब्बोकविभ्रमा ललितादयः । हेलालीलेत्यमी हावाः क्रियाः शृङ्गारभावजा" इत्यमरः । **अत्रेति** वाचा कर्मणा प्रवर्तनादुपदेशः । स च मदेऽसंभवन् प्रकाशं लक्षयति । अन्यनिरपेक्षत्वमनायासकारित्वं वा फलम् ।

तदेषा कथिता त्रिधा ॥१३॥

अव्यङ्ग्या गूढव्यङ्ग्या अगूढव्यङ्ग्या च ॥१३॥

तद्भूर्लाक्षणिकस्तत्र व्यापारो व्यञ्जनात्मकः ।

शब्द इति संबध्यते तद्भूस्तदाश्रयः ॥

बालचित्तानुरञ्जनी—तदेषेति । ततस्मात् कथिता उक्ता । एषा लक्षणा । रूढौ व्यङ्ग्यरहितत्वेन प्रयोजने गूढागूढव्यङ्ग्यत्वेन च त्रिविधेत्यर्थः । तद्व्याकरोति **अव्यङ्ग्येति** । प्रसङ्गतः सावान्तरभेदां लक्षणां निरूप्य तद्द्वारा पूर्वोद्दिष्टं लाक्षणिकशब्दं लक्षयति **तद्भूरिति** । स्याद्वाचकेति सूत्रस्थं दूरव्यवहितं शब्दं शब्दविशेष्यत्वेनानुस्मारयति । **शब्द इति** । तद्भूरिति व्याचष्टे **तदिति** । तस्या लक्षणायाः आश्रयः । प्रवाहस्य लक्षणाश्रयत्वेन उपचारात्तद्वादकोऽयमपि लक्षणाव्यापाराश्रय इत्यर्थः । वाचकलाक्षणिकौ शब्दौ लक्षयित्वा व्यञ्जनमुखेन व्यञ्जकं लक्षयितुं व्यञ्जनास्वरूपमाह **तत्रेति** । तत्र पावनत्वादौ प्रयोजने विषय इत्यर्थः ।

सारबोधनी—तद्भूरिति । ततो भवतीति भ्रमनिरासाय **तदाश्रय इति** । व्यञ्जकं लक्षयितुं तदुपायो व्यञ्जनायां वादिविप्रतिपत्तिनिरासायाह **तत्रेत्यादि** । यद्यप्यभिधामूला व्यञ्जना प्रथमं निरूपयितुमुचिता प्रथमोपस्थितत्वात् तथापि संनिहितत्वात्प्रथमं लक्षणामूलव्यञ्जनानिरूपणमिति भावः । तत्र प्रयोजनज्ञाने परिशेषानुमानमाह ।

कुत इत्यत आह ।

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ॥१४॥

फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।

प्रयोजनप्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतीतिरपि तु तस्मादेव शब्दात् । न चात्र व्यञ्जनादृतेऽन्यो व्यापारः ।

बालचित्तानुरञ्जनी—उत्तरसूत्रं हेतुत्वेनावतारयति **कुत इति** । यस्य प्रयोजनस्य ज्ञानार्थं लक्षणाश्रीयते अत्रेति । तस्मिन् प्रयोजने शब्दादेवैकस्मात् ज्ञेये । अन्यथा लक्षणाया मूलहानिरेव स्यात् । एतेन शब्दैकगम्यत्वे लक्षणोपस्थितिरेव हेतुत्वेनोक्ता भवति । पद्यं व्याकरोति **प्रयोजनेति** । अपरो व्यापारोऽभिधा लक्षणा वा न संभवतीत्यमुमेवार्थं प्रतिपादयति । तथाहि ।

सारबोधिनी—**यस्येति** । **शब्दैकेति** । एकपदेनानुमानादिव्युदासः । क्रियापदार्थमाह **व्यापार इति** ।

तथाहि ।

नाभिधा समयाभावात्

गङ्गायां घोष इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयन्ते न तत्र गङ्गादिशब्दाः सङ्केतिताः ॥

हेत्वभावान्न लक्षणा ॥१५॥

मुख्यार्थबाधादित्रयं हेतुः ॥१५॥

लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो ।

न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः ॥१६॥

बालचित्तानुरञ्जनी—**नाभिधेत्यादि** । समयः सङ्केतः । सूत्रं व्याचष्टे **गङ्गायामिति** । **तत्पावनत्वादौ** । हेत्वभावादिति सूत्रपदं व्याचष्टे ।

मुख्यार्थेति । मुख्यार्थबाधः सम्बन्धः प्रयोजनसद्भावश्चेति हेतुत्रयम् । तदभावं प्रतिपादयति । **तथाचेति** । लक्ष्यं तटादि । गङ्गाशब्दस्य मुख्यार्थो न । अत्र मुख्यार्थे । तटादौ घोषाधिकरणत्वासंभवरूपो बाधोऽपि नास्ति । अनेन द्वितीयहेतुर्निरस्तः । प्रयोजनेन पावनत्वादिना तटादेर्मुख्यार्थस्य बाधोऽपि नास्ति । अनेन द्वितीयहेतुर्निरस्तः । प्रयोजनस्य लक्ष्यत्वाभावे हेत्वन्तरमाह **न चेति** । स्खलन्ती बाधादित्रयसव्यपेक्षा गतिरवबोधनशक्तिर्यस्य शब्दस्य । मुख्यार्थबाधादित्रयसव्यपेक्षत्वेन बोधकत्वं स्खलद्गतित्वमित्यभिप्रायः ।

सारबोधिनी—**समयाभावादिति** । समयः सङ्केतः । **मुख्येति** । [मुख्यार्थबाधः मुख्यार्थयोगः]

रूढिप्रयोजनान्यतरच्चानेकत्वम्, अन्यथा त्रित्वासंभवात्। लक्षणया प्रयोजनधीर्लक्ष्यप्रतीत्यनन्तरं स्यात्तथा च तद्बाधपुरःसरा भवन्ती मुख्यार्थबाधमपेक्ष्य जायमाना सा तदा स्याद्यदि तटं मुख्योऽर्थः स्यात्तच्च नेत्याह।

यथा गङ्गाशब्दः स्रोतसि सबाध इति तटं लक्षयति तद्वत् यदि तटेऽपि सबाधः स्यात् तत् प्रयोजनं लक्षयेत्। न च तटं मुख्योऽर्थः। नाप्यत्र बाधः। न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः संबन्धः। नापि प्रयोजने लक्ष्ये किञ्चित् प्रयोजनम्। नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः ॥१६॥

बालचित्तानुरञ्जनी--यथेत्यादि। पावनत्वाद्यै रिति प्रतिपिपादयिषितै रन्तत्यपावनत्वाद्यै रित्यर्थः। पावनत्वादीनां सम्बन्धस्तटस्यास्त्येव। न च शब्दः स्खलद्गतिरिति व्याचष्टे नापि गङ्गाशब्द इति। यथायं शब्दस्तटं प्रतिपादयितुमसमर्थः बाधादित्रयसापेक्षः तथा प्रयोजनं प्रतिपादयितुमसमर्थो न भवतीति व्यतिरेके दृष्टान्तः। असामर्थ्यं सामान्यापेक्षत्वम्। अन्यापेक्षे असमर्थ इति प्रयोगदर्शनात्। पूर्वं प्रयोजनस्य लक्ष्यत्वमेव नास्तीत्युक्तम्। इदानीं लक्ष्यत्वेऽपि दूषणमाह।

सारबोधिनी—**नापि गङ्गाशब्द इति**। शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात्। गङ्गानिष्ठशैत्यपावनत्वादीनां तीरे बाधितत्वाल्लक्षणया तीरे गङ्गाशब्दस्य शैत्यपावनत्वादि बोधयितुमसामर्थ्यात्। तदेतदुक्तं स्खलद्गतिरिति। ननु कथं तथापि व्यञ्जनयापि बोध्यतामिति चेन्न। तस्याबाधितबोधकत्वेन धर्मिग्राहकमानसिद्धत्वात्।

"असमर्थ" इति पाठे ननूक्तं दूषणैः शक्तिलक्षणयोरभावेन शब्दो न प्रयोजनं बोधयत्येवेत्याह **न च शब्द इति**। **स्खलद्गतिरिति** अप्रतिपादकः असमर्थः गङ्गाशब्दात्पावनत्वादि न प्रतीयते। एवं न, तथाचोक्तम् वृत्तिभ्यामनिर्वाहे वृत्त्यन्तरमादायैव पर्यवस्यतीति भावः। एतदेव व्याचष्टे **नापि गङ्गाशब्द इति**।

अन्ये तु-ननु पावनत्वाद्यन्वये तात्पर्यमिति तदनुपपत्त्या लक्षणाया दुर्वारत्वमित्यत आह **न च शब्द इति**। स्खलन्ती मुख्यार्थबाधाद्यनुसन्धानेन विलम्बिता भवन्तीत्यर्थः। गतिः प्रसरणं बोधकता यस्य न चैवं प्रयोजने लाक्षणिकतटप्रत्ययानुपदमेव झटित्येव व्यञ्जना तत्प्रतीतेः। तेन विवक्षितान्वयानुपपत्त्यभावान्न लक्षणाप्रसङ्ग इत्याह। **तटमिवेति**। असामर्थ्यं बोधकत्वमान्यर्थम्। **समर्थ इति** पाठे पूर्वोक्तैव व्याख्या। **प्रयोजनञ्चेति** प्रयोजनपरम्परायां लक्षणापरम्परायां विषयान्तरसञ्चारेण, यतोऽनिवृत्तिस्तस्या अग्रिमलक्षणायाः निःप्रयोजनत्वेनमूलभूतसप्रयोजनलक्षणायामपि।

एवमप्यनवस्था स्याद् या मूलक्षयकारिणी।

एवमपि प्रयोजनं चेल्लक्ष्यते तत् प्रयोजनान्तरेणेति तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृत् अनवस्था भवेत्॥

ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते। गङ्गायास्तटे घोष इत्यतोऽधिकस्यार्थस्य प्रतीतिश्च प्रयोजनमिति विशिष्टे लक्षणा तत् किं व्यञ्जनयेत्याह—

प्रयोजनेन सहितं लक्षणीयं न युज्यते ॥१७॥

बालचित्तानुरञ्जनी—सूत्रं व्याचष्टे **एवमपीति** । सप्रयोजनं प्रयोजनान्तरेण सहितं लक्ष्यम् । तदपि प्रयोजनान्तरसहितं तटादीत्यतो नोक्तदोषप्रसङ्ग इत्येनच्छङ्कानिराकरणपरत्वेनानन्तरसूत्रमवतारयति **नन्विति** । प्रयोजनविशिष्टस्य लक्ष्यत्वे प्रयोजनान्तरं वाच्यमित्याशङ्क्याह **गङ्गायास्तट इति** । अधिकस्यार्थस्य पावनत्वादेः । चकारो भिन्नक्रमः । पावनत्वादि लक्ष्यं प्रयोजनञ्चेत्यर्थः ।

कुत इत्याह—

ज्ञानस्यविषयो ह्यन्यः फलमन्यदुदाहृतम् ।

प्रत्यक्षादेर्नीलादिर्विषयः फलं तु प्रकटता संवित्तिर्वा ॥

विशिष्टे लक्षणा नैवम्

व्याख्यातम् ।

बिशेषाः स्युस्तु लक्षिते ॥१८॥

तटादौ ये विशेषाः पावनत्वादयस्ते चाभिधातात्पर्यलक्षणाभ्यो व्यापारान्तरेण गम्याः । तच्च व्यञ्जन-ध्वनन-द्योतनादि शब्दवाच्यमवश्यमेपितव्यम् ॥१८॥

बालचित्तानुरञ्जनी—प्रतिज्ञातेऽर्थे उत्तरं सूत्रं हेतुत्वेनावतारयनि कुत इति । सूत्रं व्याकरोति **प्रत्यक्षादेरिति** । ज्ञायतेऽनेनेति ज्ञानं प्रमाणं इत्यभिप्रेत्योक्तम् । **प्रत्यक्षादेरिति** । भाट्टमतानुसारेण ज्ञेयधर्मः फलमित्युक्तम् । वैशेपिकमतानुसारेण संवित्तिर्ज्ञातृधर्मः फलमित्युक्तम् ।

उक्तं विशिष्टस्य लक्ष्यत्वाभावमुपसंहरति **विशिष्ट इति** । विशिष्टे लक्षणा नैवमित्येतद्व्याकर्तव्यमित्याशङ्क्याह **व्याख्यातमिति** । व्याख्यातंप्रायमित्यर्थः । लक्ष्यत्वप्रयोजनत्वयोर्भिन्नविपयत्वेन तदुभयमेकस्य न संभवतीति भावः ।

ननु पावनत्वादयो यदि न लक्ष्यास्तर्हि कथं ज्ञायन्त इत्यत आह **विशेषा इति** । पावनत्वादयो **विशेषाः लक्षिते** तटादौ व्यञ्जनव्यापारेण गम्याः स्युरित्यर्थः । सूत्रं व्याकरोति **तटादिति** । विलक्षणशाव्दव्यवहारादपि लक्षणाया व्यञ्जनस्य भेदं दर्शयति **तच्चेति** । अर्थगता व्यञ्जना प्रतिपादितेति उक्तानुवादपूर्वकं शब्दगतव्यञ्जनाप्रतिपादनपरत्वेनोत्तरं सूत्रमवतारयति **एवमिति** । अनेकार्थस्य अनेके अर्था वाच्यत्वेन यस्य तस्य शब्दस्य संयोगाद्यै र्वाचकत्वे वाचिकायां शक्तौ नियमिते सति अवाच्यस्य व्यङ्ग्यस्यार्थस्य ज्ञानकृद्यो व्यापारः सा शब्दगता व्यञ्जना ।

सारबोधिनी--प्रयोजनवैमुख्यं स्यात्तदाह **प्रकृतेत्यादि** । मूलक्षयकारिणीत्यस्य व्याख्या **प्रकृताप्रतीतिकृदिति** । **ज्ञानस्येति** । यथा कारणत्वेन ज्ञानाद्विषयोयभिद्यते तथा कार्यत्वेन फलमपीत्यर्थः । अन्यथा तीरत्वज्ञानपावनत्वज्ञानयोरभेदे जन्यजनकतानुपपत्तिरिति भावः **फलमिति** । ननु केनोच्यते तत्फलमिति । किन्तु विशिष्टलक्षणातो विशिष्टप्रतीतिरित्युक्तमिति चेन्न । अनवबोधात् । तथाहि-शक्यसम्बन्धो लक्षणा ।

न चात्र शक्येन गङ्गाप्रवाहरूपेण तीरस्य पावनत्वादिविशिष्टस्य एकः सम्बन्धोऽस्तीति कथं विशिष्टे लक्षणा न च तीरत्व इव पावनत्वेपि तीरलक्षणातो लक्षणान्तरं स्वीकार्यं तथा च ताभ्यां तीरत्वविशिष्टस्यैव पावनत्वादिविशिष्टस्य प्रतीतिरिति वाच्यम् । तथा च पावनत्वादिबोधिका वृत्तिरेव व्यञ्जना लक्षणातो बोधितबोधकत्वादिरूपवैधर्म्यसत्त्वात् । न च लक्षणाया एव तथात्वं कल्प्यतां धर्मिकल्पनातो धर्मकल्पनाया लघुत्वादिति वाच्यम् । लक्षणायाः क्वाप्येवमकल्पनात् । अपि च न हि मया षट्पदार्थभिन्ना नाम काचिद्वृत्तिरङ्गीक्रियते येन धर्म्यन्तरकल्पनागौरवं स्यात्, किन्तु तथाविधवैधर्म्यशालिन्याः कस्याश्चिद्वृत्तेः व्यञ्जनेति नाम ख्याप्यते । तथा च नाम्नि परं विवादो न धर्मिणीति धर्म्यन्तरकल्पना । न च तीरत्वेन लक्षणा किन्तु तीरत्वेन शक्यसम्बन्धग्रहात्तीरत्वोपस्थितिरिति वाच्यं तर्हि घटत्वेऽपि तथा संभवात् । घटपदस्यापि न घटत्वे शक्तिः स्यादिति प्रतिवन्दि संभवात् । इति लक्षणातो वैधर्म्यवती काचिद् व्यञ्जनावृत्तिरङ्गीकार्यैव ।

वस्तुतस्तु-अनेनेदं नोक्तमपि तु व्यञ्जितमिति प्रतीत्योर्वैलक्षण्यादभिधातो व्यञ्जना पृथक् । यथा अनुमिनोमि न साक्षात्करोमीत्यनुभवबलात् प्रत्यक्षादनुमानं पृथगिति ।

नवीनास्तु । तद्बीजनकत्वमेव व्यञ्जना । सैव सर्वत्र वृत्तिर्नाभिधा । न लक्षणा । शक्तिशरीरघटकत्वेन नैयायिकैरपि तदभ्युपगमात् । तथा चास्माच्छब्दादयमर्थो बोद्धव्य इत्यंशस्यैव वृत्तित्वं व्यञ्जनात्वमिति तत्त्वम् । अन्यत्तु **काव्यपरीक्षायां** द्रष्टव्यम् ।

प्रकटता ज्ञानता संवित्तिर्हानोपादानापेक्षा बुद्धिः । उपसंहरति **विशिष्टेति** । एवमुक्तयुक्त्या कथं प्रतीतिरित्यत आह **विशेषा इति** । लक्षिते इत्यस्य विवरणं **तटादाविति** । **विशेषा** इत्यस्य पावनत्वादय इति स्युरित्यस्य व्यापारान्तरेण गम्या इत्यनेनान्वयः ।

लाक्षणिकमात्रस्य व्यञ्जकत्वमिति शङ्कां निरस्यति **एवमिति** । लक्षणामूलं तदन्वयव्यतिरेकानुविधायि । एवमभिधामूलमित्यपि । **वाचकत्वे नियन्त्रित इति** ।

एवं लक्षणामूलं व्यञ्जकत्वमुक्तम्, अभिधामूलंत्वाह—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥१९॥

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥

इत्युक्तदिशा ।

बालचित्तानुरञ्जनी—संयोगादीनां वाचकत्वे सङ्गतिमाह **संयोग इत्यादि** । **अर्थविशेषस्यानवधारणेऽवधारण हेतव इत्यर्थः** । सूत्रत्वभ्रमं निराकरोति **इत्युक्तदिशेति** ।

सारबोधिनी—नियन्त्रणमपरार्थस्मृतिप्रतिबन्धः । **अवाच्य इति** । तदानीमभिधया बोधयितुमशक्य इत्यर्थः । एकस्य वर्णसमूहात्मनः पदस्यानेकत्रानेकैव शक्तिः शक्यतावच्छेदकभेदेन तद्भेदात् । ततश्च

यस्मिन्नर्थे तात्पर्यग्राहकं प्रकरणादिकमवतरति उद्बुध्या तद्गोचरशक्त्या तदर्थोपस्थापनमन्यस्याश्च तिरोधानं तथा निरुध्याभिधया बोधयितुमशक्यस्यार्थस्य बोधने प्रभवन्ती वृत्तिर्व्यञ्जना नाम ।

नन्वभिधाविरोधे कथं तद्विषयार्थप्रतीतिरिति चेदनुभवं पृच्छ नास्मान् । व्यञ्जनावृत्तिसाधनग्रहिलानां भवतामनुभवे नास्माकमास्थेति चेत् सुगन्धिमांसभोजनप्रकरणे सुरभिमांसं भवान् भुङ्क्ते इत्थमभिधाने विदग्धस्य भोक्तुर्गोमांसज्ञाने जुगुप्सा न स्यात् ।

ननु निरुद्धाया एवाभिधायाः फलबलेन पुनः प्रसरणं कल्प्यताम् । न पुनर्व्यञ्जना, धर्मिकल्पनातो धर्मकल्पनाया लघुत्वादितिचेन्न । प्रकरणादेः प्रतिबन्धकस्य तथैवानुवृत्तौ तस्याः प्रसरणानुपपत्तेः स्वविषयज्ञानोत्पादनया प्रकरणादेरुपक्षीणत्वमित्यपि न, कारणीभूताभावप्रतियोगित्वस्य प्रतिबन्धकस्य तस्मिन् सत्त्वात् । यत्र तु न प्रकरणादिकं तत्राभिधानियन्त्रणाभावादेकसम्बन्धज्ञानस्यापरसम्बन्धिस्मारकत्वादुद्बुद्धस्वसंस्कारेण द्वयोरप्युपस्थितिर्यथा-येनध्वस्तमनोभवेनेत्यादौ । अत्रोपश्लोक्यमानस्य प्रकृतत्वेनाप्रकृतयोरुमाधव माधवयोर्द्वयोरुपस्थितिः विशेषस्मृतावेव । तात्पर्यग्राहकापेक्षणादेवंविधस्थले च तदनपेक्षणात् । तद्वक्ष्यति-**विशेषस्मृतिहेतव इति** । अथ तर्हि जलदभुजगजं विषमित्यत्र कथं गरलस्य व्यङ्ग्यता भुजगपदसांनिध्येन गरलशक्त्या विकारसंभवादिति नाशङ्कनीयम् । तद्व्यङ्ग्यत्वोपायस्य गुणीभूतव्यङ्ग्योल्लासे वक्ष्यमाणत्वात् ।

ननु तथापि "भद्रात्मन" इत्यादौ कथं व्यञ्जनापदाद् नानार्थत्वप्रतिसन्धानस्य तात्पर्यार्थग्राहकस्य संभवेनाभिधायाः अनियन्त्रणात् ? मैवम् । पदस्य नानार्थत्वज्ञानस्यार्थज्ञानाधीनत्वेनान्योन्याश्रयापत्तेः ।

अथ प्रथमार्थं प्रत्याय्य पदानां विरमात् कथं द्वितीयार्थधीः, नचावृत्त्या अगृहीततात्पर्यार्थे तदसंभवात् । तदुक्तं तात्पर्यग्रहसत्त्वेत्वावृत्तिरिति । मैवम् । प्रथमार्थप्रतीतेरेव व्यापारत्वात् । अत एव वक्ष्यति "यत्सोऽर्थान्तरयुक् तथा । अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मत" इति । केवलं शब्दान्वयव्यतिरेक दर्शनाद्व्यञ्जनायाः शाब्दीत्वम् ।

केचित्तु-अन्वयबोधे संस्कारोपनीतं पदमपि भासते । तदुक्तम् । "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते । अनुविद्धमिव ज्ञानं शब्दः शब्देन भासयेत्" इति । न च शक्त्या तदेव बोधकमस्तु प्रकरणादिना तन्नियन्त्रणात् । तेन प्रथमान्वयबोधनात्तेभ्यः पदेभ्यः एव द्वितीयार्थधीरित्याहुः ।

संयोग इत्यादि । सम्यक् योगः संयोगः प्रसिद्धसम्बन्धः । **विप्रयोगः** प्रसिद्धसम्बन्धविरहो विभागरूपो गुणो वा । **साहचर्यमेकस्मिन्** कार्ये परस्परसापेक्षत्वम् । **विरोधिता** वध्यघातकत्वं सहानवस्थानञ्च । **अर्थः** फलम् । **अनल्पसाध्यम्** । **प्रकरणं** वक्तुः प्रतिपाद्यस्य बुद्धिस्थत्वम् । लिङ्गमसाधारणो धर्मः । शब्दस्याव्यभिचरितस्य संनिधिः । सामानाधिकरण्यं सामर्थ्यम् तत्कारणनियमः । **औचिती** योग्यता । **देशकालौ** तद्विशेषौ । **व्यक्तिः** स्त्रीपुंस्त्वादिः । **स्वरा** उदात्तादयः । **अनवच्छेदे** कतमोऽर्थोऽत्र विवक्षित इति सन्देहे, न तु पदार्थोपस्थितिं विना कथं संयोगादिज्ञानं संस्कारादिना ज्ञाने वा प्रकृतपदार्थोपस्थित्वे कथं सन्देह इति चेदुच्यते । यावत्स्वर्थेषु शब्दानां प्राक् सम्बन्धोऽवधारितः तावच्चान्यनिरोधः संस्मृतः सन् कुरुते ।

सशङ्खचक्रो हरिः । अशङ्खचक्रो हरिरित्युच्यते । रामलक्ष्मणाविति दाशरथी ।

रामार्जुनगतिस्तयोरिति भार्गवकार्तवीर्ययोः । स्थाणुं भज भवच्छिदे इति हरे । सर्वं जानाति देव इति युष्मदर्थे । कुपितो मकरध्वज इति कामे । देवस्य पुरारातेरिति शम्भौ । मधुना मत्तः कोकिल इति वसन्ते । पातु वो दयितामुखमिति सांमुख्ये । भात्यत्र परमेश्वर इति राजधानीरूपात् देशाद्राजनि । चित्रभानुर्विभातीति दिने रवौ रात्रौ वह्नौ । मित्रं भातीति सुहृदि मित्रो भातीति रवौ । इन्द्रशत्रुरित्यादौ वेदे एव न काव्ये स्वरो विशेषप्रतीतिकृत् ।

बालचित्तानुरञ्जनी—उक्तमार्गेण संयोगस्य निश्चायकत्वमुदाहरति सशङ्खेति । अत्र शङ्खादिसंयोगेन विष्णुर्निर्धार्यते । विप्रयोगस्योदाहरणं **अशङ्खचक्रो हरिरिति** । प्रसक्तिपूर्वकत्वात्प्रतिषेधस्य विष्णोरन्यत्र प्रसक्त्यभावाद्विष्णुरेवोच्यत इत्यर्थः । साहचर्यस्योदाहरणं **रामेति** । तयोः रामार्जुनयोरिव गतिर्लक्षणया विरोधः । अत्र विरोधात्परशुरामकार्त्तवीर्ययोरुभयोरपि निश्चयः । प्रयोजनस्य **स्थाणुमिति** । संसारविनाशनमीश्वरादन्यत्र न संभवतीतीश्वर एवेत्यर्थः । प्रस्तावस्य **सर्वमिति** । लिङ्गस्य चिह्नस्य **कुपित** इति । कुपितत्वं लिङ्गं समुद्रस्य कोपाभावात् । अन्यशब्दसान्निध्यस्य **देवस्येति** । पुरारातेरिति सान्निध्याद्देवः शिव एवेत्यर्थः । सामर्थ्यस्य **मधुनेति** । कोकिलमदने सामर्थ्यं वसन्तस्यैव न मद्यादेरित्यर्थः । औचित्याः **पात्विति** । इष्टप्राप्तानिष्टनिवृत्त्याद्यनेकार्थत्वेपि इष्टप्राप्तेरेवौचित्यात्सांमुख्यम् । देशस्य **भातीति** । अत्र राजधान्याम् । कालस्य **चित्रेति** । चित्रभानुशब्दस्यानेकार्थत्वेपि दिने रवौ प्रयोगात्सूर्यवह्न्योर्निश्चयः । व्यक्तेः पुंनपुंसकादेः । **मित्रमिति** । मित्रशब्दस्यानेकार्थत्वेपि सुहृद्वाचकत्वे नपुंसकलिङ्गः सूर्यवाचकत्वे पुंलिङ्गः । स्वरस्य उदात्तादेः **इन्द्रेति** । इन्द्रशत्रुः शातयिता यस्येति बहुव्रीहौ प्रकृत्या पूर्वपदमिति प्रकृतिस्वरे शेषनिपाते आद्युदात्तत्वं ततो बहुव्रीहिनिश्चयः । इन्द्रस्य शत्रुर्यः स इति तत्पुरुषे समासस्यान्त्योदात्तत्वं शेषनिपातस्तत्र तत्पुरुषनिश्चयः । उदात्ताद्यपेक्षया वेद एव न काव्य इत्युक्तम् ।

सारबोधिनी—मथ्नामि कौरवशतमित्यादौ काकुस्वरेणाप्यर्थावगतेरिष्टत्वात् ।

अन्यनिरोधं अन्यमर्थमगृहीतसम्बन्धं निरुध्यावेदयेदिति दिशा युगपदुपस्थितेष्वर्थेषु तात्पर्यसन्देहानन्तरं प्रकरणादिसहकृतात्पुनरनुसहितात्तस्मादेव पदात्प्रकृतार्थोपस्थितावनुपपत्त्यभावात् विशेषः प्रकृतः । **सशङ्खचक्र इति** । हरिपदमुच्यते नियम्यत इति शेषः । एवमन्यत्र लक्षणासाहचर्येण रामपदस्य दशरथपरत्वं वध्यघातकविरोधितायां रामो भार्गवः, अर्जुनः कार्तवीर्यः इति तयोः कयोश्चित्प्रकृतयोः । सहानवस्थानलक्षणाविरोधे तु च्छायातपावित्युदाहार्यम् । स्थाणुमिति भवच्छेदरूपार्थस्य वृक्षखण्डासाध्यत्वात्स्थाणुपदं हरपरं, छिद इति क्विबन्ताच्चतुर्थी । राजानं संबोध्य दूतकथाप्रवृत्तौ देवपदं संबोध्यराजपरम् । तदाह **युष्मदर्थ इति** । राजत्वस्वर्गित्वयोः शक्यतावच्छेदकत्वेन नानार्थत्वम् । तदुक्तम्—"राजा भट्टारको देव" इति । मकराकारो ध्वजो, मकर एव वा ध्वजः । अत्र मकरध्वजपदं कामपरं समुद्रस्य कोपाभावात् पुरस्यासुरभेदस्य नगरस्य चेति सम्बन्धितावच्छेदकभेदेन समुदायस्य नानार्थत्वादेव पदसांनिध्येनेतरव्युदासः, देवपदं नियम्यत इति केचित् । कोकिलमादने मध्वोरेव सामर्थ्यम् । न मधुनः मादकत्वं मधुन्यपीति न लिङ्गम् । मुखं सांमुख्यं न तु वदनम् । कामत्राणायोग्यत्वात् । यद्यपि चुम्बनादिना वदनमपि कामत्रायकं तथापि सांमुख्यमेव योग्यम् । असति तस्मिन् वैरस्यायैवेति तथैवौचित्यम् । अत्र राज-

धान्यां विष्णुत्वेन नृपतित्वेन च समुदायशक्त्या नानार्थता। विष्णोर्भिन्नं सर्वत्र राज्ञस्तु राजधान्यामेवेति राजधानीरूपदेशेन नियमनम्। चित्रभानुत्वं रवित्वं वह्नित्वञ्च दिनरात्र्योः भिन्नसूर्ययोःदीप्त्योगात् तत्तद्विशेषपरत्वम्। **इन्द्रेति।** इन्द्रः शत्रुः शातयिता यस्य इन्द्रस्य शातयिता वा। षष्ठीसमासे अन्तोदात्तत्वे इन्द्रस्य शातयिता इति प्रतीयते। वहुव्रीहौ च पूर्वपदोदात्तत्वे इन्द्रः शातयिता यस्येति प्रतीयते काव्येष्वमीषां नार्थविशेषनियामकता तथाहि। अनुरूपस्वरेणार्थविशेषावगतौ श्लेषभङ्गप्रसङ्गादित्याह **वेद एवेति।** अत एव श्लेषप्रस्तावे वक्ष्यति। "काव्यमार्गे स्वरो न गण्यत" इति। ध्वनिस्तु पाठगुणोपदेशेन रसविशेष नियामकः स्यादेव। तदुक्तम्-"वीरवीभत्सरौद्रेषु स्वरितोदात्तनुच्चरेत्" इति।

आदि ग्रहणात्

एद्दहमेत्तत्थणिआ एद्दहमेत्तोहि अच्छिवत्तोहिं।

एद्दहमेत्तावत्था एद्दहमेत्तोहि दिअएहि ॥११॥ इत्यादावभिनयादयः।

बालचित्तानुरञ्जनी—आदिशब्देन संगृहीतमर्थमाह। **एद्दहमेत्थणिआ** एतावन्मात्रस्तनी "एद्दहमेत्तेहिं अच्छिवत्तेहिं एतावन्मात्राभ्यामक्षिपात्राभ्यामुपलक्षितेत्यर्थः। **एद्दहमेत्तावत्था** एतावन्मात्रावस्था। एद्दहमेत्तेहिं दिअएहिं एतावन्मात्रैर्दवसैः। अणुमहदाद्यनेकार्थाभिधायकत्वेपि एतावन्मात्रशब्दस्य अत्र प्रसारिततर्जनीकशिरश्चालनेनाभिनयेन दुर्बलावस्थत्वं गम्यते। बद्धमुष्टिभुजद्वयवलयीकरणेन स्थौल्यं गम्यते। अतोऽभिनयोऽप्यनेकार्थस्य निग्राहक इत्यर्थः। उक्तानुवादपूर्वकं अनेकेत्यादि सूत्रं व्याकरोति **इत्थमिति।** तस्या अभिधार्थनियमना संयोगादिभिरित्यर्थः।

सारबोधिनी--काकोरपि व्यञ्जकत्वमस्तीत्यादिषु वक्ष्यति। **एद्दहीति।**

एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपात्राभ्याम्।

एतावन्मात्रावस्थाः एतावन्मात्रैर्दिवसैः॥

अत्र चेष्टाविशेषेण इयन्मात्रशब्दाः परिमाणविशेषादौ नियम्यन्ते। तेन स्तनादीनां पद्मकोशाकारत्वं प्रतीयते। सर्वनाम्नो वुद्धिस्थप्रकारेण शक्तौ नानार्थता। आदिशब्दात् "इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्"। इत्यत्रात्मनिर्देशो हृदयनिहितहस्तेन प्रतीयते। नायमभिनयोऽनुकरणाभावात्। एवमञ्जलिना सूर्यमुपतिष्ठते, पयः पिबति, लाजान् जुहोतीत्यादौ अञ्जलेः पुटीभावेनोर्ध्वशिखत्वं, अङ्गुलिनिबिडसंयोगेनोर्ध्वाग्राधोमूलत्वं ऊर्ध्वमूलाधोऽग्रत्वमिति सन्निवेशविशेषः प्रतीयते। तथाच त्रयोऽग्नयः त्रयो वेदाः इत्यत्र संख्याविशेषात्तेषां त्रयीपरत्वम् कारिकां सङ्गमयति **इत्थमिति।** नियन्त्रणमाह **निवारित इति।** तात्पर्यविषयोपस्थितार्थान्वयबोधे वृत्ते अप्रकृतार्थोपस्थितिप्रतिबन्धे चेत्यभिप्रायः। **न लक्षणेति।** द्वितीयार्थे तात्पर्यग्राहकाभावात्तात्पर्यानुपपत्तेरभावादित्यर्थः।

इत्थं संयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽप्यनेकार्थस्य शब्दस्य यत् क्वचिदर्थान्तरप्रतिपादनं तत्र नाभिधा नियमनात्तस्याः। न च लक्षणा मुख्यार्थबाधाद्यभावात्। अपित्वञ्जनं व्यञ्जनमेव व्यापारः। यथा—

भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखविग्रहस्य ।

यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् ॥१२॥१६॥

बालचित्तानुरञ्जनी--शब्दगतव्यञ्जनामुदाहरति भद्रेति । राजा कश्चिद्वर्ण्यते यस्य हस्तः सततं दानोदकसेकसुन्दरोऽभूत् । कीदृशस्य । भद्रात्मनः कुशलात्मनः । अनाक्रमणीयमूर्तेः । विस्तीर्णे वंशे कुले उन्नतिरभ्युदयो यस्य । कृतशरसङ्ग्रहस्य अनुपल्पुता गतिर्यस्य । वैरिवारकस्य इति मुख्यो वाच्योऽर्थः । इदानीं व्यङ्ग्योर्थः । यस्य हस्तः मदोदकसुभगोऽभूत् परस्य उत्कृष्टस्य वारणस्य हस्तिनः । भद्रजातेः । अनाक्रमणीयस्य । विशाला वंशस्य पृष्ठवंशस्य उन्नतिर्यस्मिन् । कृतभ्रमरसङ्ग्रहस्य । अनुपद्रुतगतेः । एवं विधस्यात्र व्यञ्जनया गजप्रतीतिर्भवति । राज्ञो वाच्यत्वस्य प्रकरणेन नियमितत्वात् ।

सारबोधनी–भद्रात्मन इति । भद्रः शोभनो गजजातिविशेषश्च । अधिरोहोऽवकलनं आरोहणञ्च । वंशोऽन्वयो वेणुश्च । विशालवंशवदुच्छ्रितस्य शिलीमुखो बाणो भ्रमरश्च । अनुपप्लुतापरानभिभाव्या स्तब्धत्वादिदोषरहिता च । गतिर्ज्ञानं गमनञ्च । परवारणस्य शत्रुवारणस्य श्रेष्ठहस्तिनश्च । दानं वितरणं मदश्च । करः पाणिः शुण्डादण्डश्च । अत्राभिधया प्रकृतराजबोधः । गजान्वयस्तु तात्पर्यविषयोपि तद्ग्राहकप्रकरणाद्यनवताराद्व्यङ्ग्य एव । अत्र नृपतिगजयोर्मिथः सम्बन्धः उपमानोपमेयभावोऽपि व्यङ्ग्य एव । अन्यथा मिथोऽसम्बद्धार्थद्वयबोधकत्वेन वाक्यभेदापत्तेः उपमाध्वनित्वेनास्वादप्रकर्षाधायकत्वाच्च । अत्रेदमवधारणीयम् । नानार्थेषु यत्रानेकत्र तात्पर्यग्राहकं युगपत्प्रकरणादिकमवतरति वा स श्लेषः । यत्र क्रमेण तत्रावृत्तिः यत्रैकत्रैव तत्र व्यञ्जनेति सिद्धान्तरहस्यम् ।

तद्युक्तो व्यञ्जकः शब्दः

तद्युक्तो व्यञ्जनयुक्तः ।

यत्सोऽर्थान्तरयुक् तथा ।

अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः ॥२०॥

तथेति व्यञ्जकः ।

इति काव्यप्रकाशे शब्दार्थस्वरूपनिर्णयो नाम द्वितीय उल्लासः ।

बालचित्तानुरञ्जनी—उक्तव्यञ्जनद्वारा व्यञ्जकशब्दं लक्षयति तद्युक्त इति । शब्दस्य व्यञ्जकत्वेऽर्थस्यापि कथं व्यञ्जकतेत्यत आह यत्स इति । यद्यस्मात्कारणात् स शब्दः अर्थान्तरयुक्तः अर्थविशेषयुक्तः तथा व्यञ्जको भवति । अतः शब्दार्थोऽपि सहकारित्वेन व्यञ्जको मतः । अन्यथा अर्थस्यासहकारित्वे यस्य कस्यचिदर्थस्य यं कञ्चिदर्थं प्रति व्यञ्जकत्वं स्यादित्यर्थः । सूत्रस्थं तथापदं व्याचष्टे तथेतीति ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यसरस्वतीतीर्थविरचितायां

काव्यप्रकाशटीकायां द्वितीय उल्लासः ॥

सारबोधिनी--सिद्धान्तरहस्यम् प्रकृतमनुसरति । तद्युक्त इति । ननु प्रथमार्थप्रतीतेर्द्वितीयार्थं प्रत्ययाहेतुत्वेन तदनवधानात् शब्दस्य कथं करणत्वमित्यत आह यत्स इति । स शब्द अर्थान्तरयुक् । तत्प्रत्यायनमन्तरेण प्रत्यायकः तेनास्य नौदासीन्यम् । तदाह अर्थोऽपीति । सहकारितया नोद्भूटशक्तिक तया । तत्तु शब्दस्यैवान्वयव्यतिरेकानुविधानात् । अत एव शब्दमूलको व्यवहार इति ।

इति सारबोधिन्यां द्वितीय उल्लासः ।

---

१. काव्योपादानलभ्यः B. २. B omits मया. ३. B and D omit it ४. सदृशकम् E. ५. प्रतिष्ठिता B. ६. अव्याप्तिरिति A. ७. K adds इति बोध्यं after दर्शितत्वात् ८. सूचितम् C ६. F. omits इति. १०. जातिरेववेति B. ११. A omits स इति १२. लक्ष्यार्थः D १३. इति ज्ञेयम् B . १४. D omits इत्यत्र १५. B omits from तत्प्रतीतिस्तु to प्रतीतावेव १६. A omits यथाक्रमम् १७. भावः B.

तृतीय उल्लासः

अर्थाः प्रोक्ताः पुरा तेषाम्

अर्था : वाच्यलक्ष्यव्यङ्ग्याः । तेषां वाचकलाक्षणिकव्यञ्जकानाम् ।

अर्थव्यञ्जकतोच्यते ।

तृतीय उल्लासः

बालचित्तानुरञ्जनी—शब्दगतां व्यञ्जनां प्रतिपाद्य उल्लाससङ्गतिप्रतिपादनपूर्वकं अर्थगतां व्यञ्जनां प्रतिपादयितुमारभते **अर्था इति**। व्याचष्टे वाचकेति। अर्थानां वाच्यादीनां व्यञ्जकत्वं प्रतिपाद्यत इत्यर्थः।

सारबोधिनी—अथार्थव्यञ्जकतामभिधातुमुक्तमेव स्मारयति **अर्था इति**। पुरा वाच्यादयस्तदर्थाः स्युरित्यनेन। इदानीं किं निरूपणीयमित्याह **अर्थव्यञ्जकतेति**। सापि प्रागुक्तैव। "सर्वेषां प्रायशोऽर्थानाम्" इत्यनेनेत्यर्थः।

काव्यप्रकाशदर्पणः—एवं शब्दस्य व्यञ्जकत्वं निर्णीय प्राप्तावसरमर्थस्य व्यञ्जकत्वं दर्शयितुं तदुपदेशं स्मारयति **अर्था इति**। **प्रोक्ताः पुरेति**। "वाच्यादयस्तदर्थाः स्युः" इत्यनेनार्थस्य व्यञ्जकता। अर्थात् परेषां प्राचीनादिवृत्तिबोध्यत्वेनानुमेयत्वेन वा अभिमतो व्यङ्ग्योऽर्थः उच्यते। प्रतिपत्तिनिरासद्वारेत्यर्थः। "अथ व्यञ्जकता" इति पाठे तु तेषामिति शेषः।

कीदृशीत्याह———

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ॥२१॥

प्रस्तावदेशकालदेर्वैशिष्ट्यात् प्रतिभाजुषाम्।

योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ॥२२॥

बोद्धव्यः प्रतिपाद्यः। काकुर्ध्वनेर्विकारः। प्रस्तावः प्रकरणम्। अर्थस्य वाच्यलक्ष्यव्यङ्ग्याः।

बालचित्तानुरञ्जनी—व्यञ्जकत्वमेतेषां केन प्रकारेण भवतीत्याशङ्क्य तदुत्तरत्वेन सूत्रमवतारयति **कीदृशीति**। प्रतिभाजुषां विचारकाणाम् अन्यार्थधीहेतुः यो वाच्यादेरर्थस्य व्यापारः व्यक्तिरेव सा। सा व्यञ्जनैव नाभिधादिः। व्यापारस्यान्यार्थहेतुत्वे हेतून् दर्शयति **वक्त्रित्यादिना**। क्वचित् वक्तृवैशिष्ट्यात्, क्वापि बोद्धव्यवैशिष्ट्यात्, प्रस्ताववैशिष्ट्यात्, देशवैशिष्ट्यात्, कालवैशिष्ट्यात्। **आदिग्रहणात्** चेष्टादिवैशिष्ट्यात्।

१ **सारबोधिनी-कीदृशीति**—कीदृशी किंस्वरूपा ? नियन्त्रितार्थधीजनकत्वं शब्दस्य व्यञ्जकतायाः स्वरूपमिव तस्याः किमित्यर्थः । **वाक्यवाच्येति** । वाक्यवाच्यमहितोऽन्यसन्निधिरित्यर्थः । तेनेतरेतरद्वन्द्वे बहुवचनम् समाहारे नपुंसकत्वमिति निरस्तम् । अन्यो वक्तृबोद्धव्यभिन्नो जनः । प्रस्तावः प्रकरणम् । देशो विजनादिः । कालो वसन्तादिः । वैशिष्ट्यात् वैलक्षण्यात् । पञ्चम्या हेतुत्वमुक्तम् । तदभावे व्यञ्जनानुदयात् । प्रतिभा वासनाविशेषः । तेन श्रोत्रियादिषु न व्यञ्जकत्वप्रसङ्गः । **व्यक्तिरेवेति** । एवकारेण व्यापारोत्तरप्रमाणान्तरव्युदासः । सङ्केताद्यभावेन नाभिधादिरित्युक्तं प्राक् । अनुमानादिकन्त्वग्रे निरसिष्यते । एषाञ्च सङ्करे यस्योद्भूतता तन्मूलको व्यवहारः बोद्धव्य इत्यस्यार्थः । **प्रतिपाद्यत इति** प्रतिपादयितव्यः पुरुषः इति यावत् । अन्तर्भावितणिजर्थः । **ध्वनेर्विकार इति** । तदुक्तम्— ''भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते'' इति ।

काव्यप्रकाशदर्पणः—ननु सर्वेषां प्रायशोऽर्थानामित्यादिना पूर्वमर्थस्य व्यञ्जकत्वमुक्तमेव । सम्प्रति कतमं विशेषमभिधाय पुनरुच्यत इति पृच्छति **कीदृशीति । वाक्येति** । वाक्यवाच्यसमाहितोऽन्यसन्निधिरिति मध्यमपदलोपी समासः । वैशिष्ट्यात् वैलक्षण्यादिति वक्त्रादिषु प्रत्येकमन्वयः । प्रतिभाजुषां नवनवोल्लेखबुद्धिशालिनां, न तु स्थूलबुद्धीनाम् । **अन्येति** । प्राचीनादिवृत्तिवाक्ये बोध्यत्वनिरासः । **अनयेति** [अर्थस्येति] । व्यज्यते व्यक्तिर्व्यञ्जना एव । कारणमनुमानादि । वाक्यार्थात् भेदं दर्शयति । प्रतिपाद्यते यः स प्रतिपाद्यः । शब्दप्रयोगस्य परार्थत्वात् यत्समवेता प्रतीतिरुत्पद्यते स इत्यर्थः । काकुर्ध्वनेर्विकारः । ''भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते'' इत्युक्तः प्रकारः । तद्भेदाश्च तत्सहकारिभेदात् स्वरूपभेदाच्चानन्ताकारेभ्यो बोद्धव्याः ।

क्रमेणोदाहरणानि ।

अइपिहुलं जलकुंभं घेत्तूण समागदह्मि सहि तुरिअं ।
समसेअसलिलणीसासणीसहा वीसमामि खणं ॥१३॥
अत्र चौर्यरतगोपनं गम्यते ।

बालचित्तानुरञ्जनी—काचित् कृतोपभोगा तच्चिह्नामपह्नवाय सखीं प्रत्याह । सहि हे सखि । **अइपिहुलम्** अतिपृथुलम् । **जलकुम्भम्** । **घेत्तूण** गृहीत्वा । **तुरिअं** त्वरितम् । **समागदह्मि** समागतास्मि । **समसेअसलिलणीसासणीसहा** अतः श्रमस्वेदसलिलनिःश्वासनिःसहा । **खणं** क्षणम् । **वीसमामि** विश्राम्यामि ।

अत्र व्यङ्ग्यं किमित्याकाङ्क्षायामाह **अत्र चौर्येति** । अत्र व्यभिचारिणी वदतीति वक्तृवैशिष्ट्यम् । अत्र चान्यत्र प्रमाणान्तरेणासतीत्वावगमे सति प्रतिभानवतस्तटस्थस्य व्यङ्ग्यप्रतीतिर्भवतीति द्रष्टव्यम् ।

सारबोधिनी—अइति ।

अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि त्वरितम् ।
श्रमस्वेदसलिलनिःश्वासनिःसहा विश्राम्यामि क्षणम् ॥

अकस्मादस्याः कुत एवंविधः श्रम इति तर्कयन्तीं सखीं प्रतीयमुक्तिः । जलपूर्णः कुम्भो जलकुम्भः । त्वरितं न शनैः । निःसहा निरुद्यमा ।

अत्र पृथुल[3]जलकुम्भवहनपूर्वकत्वरितगमनजन्योऽयं श्रमो नान्यथा शङ्किष्ठा इति चौर्यरतगोपनं व्यङ्ग्यमेव प्रकारान्तराभावात् ।

काव्यप्रकाशदर्पणः—अइपिहुलं इति ।

अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि त्वरितम् ।
श्रमस्वेदसलिलनिश्वासनिःसहा विश्राम्यामि क्षणम् ।।

श्रमाज्जाताभ्यां स्वेदसलिलनिःश्वासाभ्यां निःसहा निरुद्धा इत्यर्थः । इयं हि काश्चित् नद्या आगतां एकाकिनीं वीक्ष्य कुतोऽयं श्रम इति तर्कयन्तीं प्रतिवेशिनीं प्रत्युक्तिः । अत्र ममायं श्रमो जलकुम्भवहनादेव । न तु चौर्यरतिकृतां मां शङ्किष्ठा इति वक्तुरभिप्रायरूपोऽर्थः प्रकाश्यते । इदमुदाहरणं त्विह वक्तृवैशिष्ट्ये, न खल्वेवमर्थान्तराप्रतिपत्तितः वक्त्र्यां वार्द्धकादिगुणविशिष्टायाम् ।

ओण्णिद्दं दोब्बल्लं चिंता अलसत्तणं सणोससिअं ।
मह मंदभाइणीए केरं सहि तुह वि अहह परिहवइ ।।१४।।

अत्र दूत्यास्तत्कामुपोपभोगो व्यज्यते ।

बालचित्तानुरञ्जनी—बोद्धव्यवैशिष्ट्याद्व्यञ्जकत्वमुदाहरति **ओण्णिद्दमित्यादि** । काचिन्नायिका स्वां दूतीं निजप्रियोपभुक्तां लक्षयित्वा कथयति । सहि सखि । मह मम । मंदभाइणीए मन्दभाग्यायाः । केरं कृते । ओण्णिद्दं औन्निद्रचम् । दोब्बलं दौर्बल्यम् । चिन्ता अलसत्तणं अलसत्त्वम् । सणीससिअं सनिश्वसितम् । तुहवि त्वामपि । अहह परिहवइ परिभवति ।

व्यङ्ग्यमाह **अत्रे**ति । इहापराधित्वलक्षणं बोद्धव्याया दूत्या वैशिष्ट्यम् ।

सारबोधिनी—उस्मीति । [ओण्णिद्दमिति]

औन्निद्र्यं दौर्बल्यं चिन्तालसत्वं सनिःश्वसितम् ।
मम मन्दभागिन्याः कृते सखि त्वामपि अहह परिभवति ।।

तुहेति कर्मणि षष्ठी परिभवस्य हिंसार्थत्वात् । न चान्यदीयमौन्निद्र्यादिकं नान्यस्य परिभावकमिति वाच्यम् । समदुःखसुखत्वेन सख्यास्तत्संभवात् । अत एव सहीति संबोधनम् । सजातीयत्वलक्षणायां तु तेन नायिकाया अपरिभवात् अप्यर्थस्य साहित्यस्यानुपपत्तेः ।

अत्र संबोध्याया दुःशीलता वैशिष्ट्यम् ।

काव्यप्रकाशदर्पणः—

औन्निद्र्यं दौर्बल्यं चिन्तालसत्वं सनिःश्वसितम् ।
मम मन्दभागिन्याः कृते सखि त्वामपि अहह परिभवति ।।

अहह परिखेदे। त्वामित्यर्थे तवेति षष्ठी । परिभवतीत्यस्य हिंसार्थत्वात्। अत्र परकीयदुःखादि कथं परिभवतीति अन्वयार्थापत्त्या लक्षणा यावत् औन्निद्र्यादि लक्ष्यते। तदतिशयश्च लक्षणाफलरूपो व्यज्यते। तेनाभिव्यक्तेन तस्या एव वाक्यवादिन्याः कामुको दूत्योपभुक्तः ।

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥१५॥

अत्र मयि न योग्यः खेदः कुरुषु तु योग्य इति काक्वा प्रकाश्यते। न च वाच्यसिद्ध्यङ्गमत्र काकुरिति गुणीभूतव्यङ्ग्यत्वं शङ्क्यम्। प्रश्नमात्रेणापि काकोर्विश्रान्तेः।

बालचित्तानुरञ्जनी—काकुवैशिष्ट्यात् व्यञ्जकत्वमुदाहरति **तथाभूतामित्यादिना** । अत्र भीमः सन्धिं कुर्वता युधिष्ठिरेण प्रेषितं सहदेवं प्रति कथयति । नृपसदसि द्रुपदस्य तनयां द्रौपदीं तथाभूतां दुःशासनेन विवसिनीक्रियमाणां विलोक्य वल्कलधारिभिरस्माभिर्वनचरैः सह बहुकालं वने स्थितम्। तदनन्तरं विराटस्य गृहे अयोग्यसूपकारादिव्यापारकरणेन प्रच्छन्नं यथा भवति तथा स्थितं एवं खिन्ने मयि गुरुर्युधिष्ठिरः खेदं कोपं भजति, कौरवेषु कोपं नाद्यापि भजति।

अत्र व्यङ्ग्यमाह **अत्र मयीति** ।

ननु कुपितोद्धतनायकप्रयुक्तस्य वाक्यस्य केवलानुवादकत्वायोगात् विधौ पर्यवसानं वक्तव्यम्। तच्च काकुद्योत्यार्थेन विना न सिध्यतीति वाच्यसिद्ध्यङ्गं काकुः। अतो गुणीभूतव्यङ्ग्यत्वमित्याशङ्क्य परिहरति **नचेति** । अनुल्लङ्घ्यत्वेन गुरुं प्रति कोपस्यासंभवात् प्रश्नमात्रेणापि वाक्यार्थघटनात् काकोरपि प्रश्नमात्रेणैव विश्रान्तिः। तथा च मयि न युक्तः कुरुषु युक्तः कोप इत्यस्य प्रकाशनात् न काकुर्वाच्याङ्गमित्यभिप्रेत्य हेतुमाह **प्रश्नमात्रेणेत्यादिना** "मथ्नामि कौरवशतम्" इत्यत्र भीमेन मथ्नामीत्यसंभवात् काकुर्मथ्नाम्येवेति व्यङ्ग्यविश्रान्तिद्वारा काव्यार्थमुपपादयतीति न गुणीभूतव्यङ्ग्यत्वम् । तस्मात् शब्दशक्तिरेव स्वार्थाभिधेयसामर्थ्याक्षिप्तकाकुसहाया सती व्यङ्ग्यार्थप्रतीतिहेतुरित्यर्थः।

सारबोधिनी—तथाभूतेति (तथाभूतामिति) दृष्ट्वेति। प्रतिकर्मणि संबध्यते । तथाभूतां स्त्रीधर्मिणीं दुःशासनाकृष्टकेशपाशाम्। वल्कलधरैरस्माभिरिति विशेष्यपदमध्याहार्यम्। उषितमति स्थितमिति च पाठे। आरम्भो वशः कर्म वा। खिद्यतेऽनेनेति खेदो मात्सर्यम्। खिन्ने ग्लाने[४] इत्यध्याहार्यम्। अन्यथा प्रकारान्तरेण खिन्ने खेदभजनानौचित्यानुपपत्तेः। खिन्ने खेदं भजतीत्यनौचित्यम् । तदाह **मयि न योग्यः खेदः कुरुषु तु योग्य इति**।

ननु नृपतेः परिदृश्यमानपाञ्चालतनयादीनां तथाभूतत्वादिस्वापकर्षः तत्कारिषु मात्सर्यस्य हेतुः। तत एव दुर्मनायमाने भीमे तत्प्रतिबन्धकम्। इह तु वैपरीत्यमित्यपर्यवसितो वाक्यार्थो यदेवं तदनौचित्यमित्यनौचित्यं व्यङ्ग्यमादायैव पर्यवस्यतीति वाच्यसिद्ध्यङ्गमेतदुदाहरणं स्यादित्याशङ्क्य निराकरोति न

च वाच्यसिद्धयङ्गमिति। वाच्यस्य गुरुनये वाक्यार्थस्य सिद्धिः। पर्यवसानं तदङ्गं तत्कारकम्। **काकुरिति।** तथा च काकोरेव व्यञ्जकता पर्यवसिता। न तु काकुवैशिष्ट्यादर्थस्य व्यङ्ग्यं विना पूर्वं तस्यासिद्धत्वादिति शङ्कार्थः। तेन गुणीभूतव्यङ्ग्यत्वेऽपि व्यञ्जकता सिद्धैवेति किमनया न चेत्यादिशङ्कयेति दूषणं निरस्तम्। तथासत्यर्थस्य काकुवैशिष्ट्येन व्यञ्जकता न सिद्धा, तस्य प्रागसिद्धत्वात् किन्तु काकोरेवेति। केचित्तु **न चेति।** तथा च प्रधानीभूतध्वन्युदाहरणं काक्वाक्षिप्तस्य न संभवतीति काक्वाक्षिप्तमित्यनेन गुणीभूतव्यङ्ग्ये तदुदाहरणस्य वक्ष्यमाणत्वादलमत्र तत्कथनेनेति च शङ्कार्थ इत्याहुः [५] **अत्रेति। काकोरिति** व्यङ्ग्यव्यञ्जकभावे पष्ठी। काकुव्यङ्ग्येनेत्यर्थः। मात्रपदेनानौचित्यवारणम्। अपिरेवार्थः। मात्रापिमपदाभ्यामन्ययोगव्यवच्छेदः। विश्रान्तेः, अर्थात् वाक्यार्थस्य।

अयमभिसन्धिः। नञि काकुः। तद्व्यङ्ग्यश्च प्रश्नः। सहदेव! त्वां पृच्छामि यदेव गुरुः करोति। तत् कथम् इत्येवं रूपः। ततश्च काकुव्यङ्ग्यप्रश्नसाचिव्यात् पर्यवसितेन वाक्यार्थेनानौचित्यं ध्वन्यते। स च ध्वनिरेव। वाक्योद्देश्यता च तत्रैव भीमसेनगतक्रोधप्रकर्षहेतुत्वात्। अनौचित्यकारिणि क्रोधोद्रेकस्यानुभाविकत्वात्। न च कुपितोद्धतनायकवचनस्यावश्यं विपर्ययपर्यवसायित्वेन काकुप्रकाश्यस्य वाच्यसिद्धयङ्गत्वं वाच्यम्। गुरोरलङ्घनीयेष्टत्वेन विपर्ययपर्यवसायित्वाभावात्।

तइआ मह गंडत्थलणिमिअं दिट्ठिं ण णेसि अण्णत्तो।
एण्हि सच्चेअ अहं ते अ कबोला ण सा दिट्ठी ॥१६॥

अत्र मत्सखीं कपोलप्रतिबिम्बितां पश्यतस्ते दृष्टिरन्यैवाभूत्। चलितायां तु तस्यामन्यैव ज़ातेत्यहो प्रच्छन्नकामुकत्वं ते इति व्यज्यते।

बालचित्तानुरञ्जनी—वाक्यवैशिष्ट्याद् व्यञ्जकत्वमाह **तइआ महेत्यादि।** अत्र काचिन्नायिका निजसख्यामनुरक्तं स्वप्रियम् ईर्ष्यया कथयति। तइआ तदा। मह मम। गंडत्थलणिमिअं गण्डस्थल निमग्नाम्। दिट्ठिं दृष्टिम्। अण्णत्तो अन्यतः। ण णेसि न नयसि। एण्हिं इदानीम्। सच्चेअ सैव। अहं तेअ तावेव। कबोला कपोलौ। ण न सा दिट्ठी दृष्टिः। णिमिअं निहिताम्।

व्यङ्ग्यमाह **अत्र मत्सखीमिति। अत्र** तदानीमन्या दृष्टिः इदानीमन्येत्येवंप्रकारस्य वाक्यवैशिष्ट्यम्।

सारबोधिनी। तइआ इति। तदा मम गण्डस्थलनिमग्नां दृष्टिं न नयस्यन्यत्र।
इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः॥

निमग्नां न तु स्थिताम्। **अत्रेति।** मद्भयाद्बिम्बमपहाय प्रतिबिम्बदर्शनम्। अन्या स्निग्धा अनिमेषता रूपा। [६] अन्या विषयस्योद्विग्नरूपा [?] जातेति दृष्टेर्जन्मान्तरम्।

अहो इति। इयत्कालं गोपनेन गतमित्याश्चर्यम्। अत्र वाक्यवैशिष्ट्यं व्यञ्जकम्। अत्र वाक्यपदेन 'तइ आ मह' इति विच्छिन्नवाक्यमुच्यते। अन्यथा अतिप्रसक्तेः सर्वत्रैव वाक्यवैशिष्ट्यस्य सत्त्वात्।

उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायो
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः ।
किं चैतस्मिन् सुरतसुहृदस्तन्वि ते वान्ति वाता
येषामग्रे सरति कलिताकाण्डकोपो मनोभूः ।।१७।।

अत्र रतार्थं प्रविशेति व्यङ्ग्यम् ।

बालचित्तानुरञ्जनी–वाच्यवैशिष्ट्यात् व्यञ्जकत्वमुदाहरति **उद्देश इत्यादि** । कश्चित् कामी कामिनीं प्रति वदति । हे तन्वि ! सरसकदलीपङ्क्तीनां शोभया अतिशयेन रमणीयः कुञ्जानामाधिक्येनाङ्कुरितो वर्द्धितो रमणीनां विभ्रमो येन । एवंविधोऽयं नर्मदायाः प्रदेशः किञ्च एतस्मिन् प्रदेशे सुरताभिलाषोद्दीपकास्ते वायवो वान्ति येषाम् अग्रे पुरस्तात् कलितः अकाण्डे अनवसरे कोपो येन सः कलिताकाण्डकोपः मनोभूः सरति । मानिनां मानभङ्गाय कुपित इत्यर्थः ।

व्यङ्ग्यमाह **अत्र रतार्थमित्यादि** । अत्रोद्दीपनवातादिरूपवाच्यार्थस्य वैशिष्ट्यम् ।

सारबोधिनी–**उद्देशोऽयमिति** । ऊर्ध्वो देशो उद्देशः । स्खलनभयेन सञ्चरतामनवलोकनीय इति व्यज्यते । तथा कदल्याः श्रेणीत्वेन वेष्टनम् सरसत्वेन शुष्कदलशब्दविरहः कुञ्जस्योत्कर्षः कुसुमसमृद्ध्यादिः । अङ्कुरितत्वम् अभूतप्रादुर्भावः । यासां विभ्रमोदयः पूर्वं नाभूत् तासामपि नवनवोन्मेषी विलासो भवति । नर्म ददातीति नर्मदा । न तु नदीमात्रम् । श्रमापनयनेन पुनः पुनः प्रवर्तनया सुहृदः । तन्वीति कृशत्वेन यः श्रमः संभविष्यति । सोऽपि तैरपास्य इति । **वान्तीति** । वृत्ता अविरतवर्तमानता । मनोभूरिति मर्मज्ञता सर्वजनदुःपरिहरश्च । सोऽपि घृताहेतुककोपस्तेन तद्वारणमशक्यमित्यादि व्यज्यते ।

अत्रेति । तत्तद्विशेषणप्रकाशितस्योद्देशविशेषस्य वाच्यस्य वैशिष्ट्यादयं कामुकाभिप्रायः प्रकाश्यत इति ।

काव्यप्रकाशदर्पणः–**उद्देशोऽयमिति** । नर्मदाया उद्देश इत्यन्वयः । पवनानां सुरते घर्मश्रमाकुलत्वापनयनेन रागदीर्घदान्तेन च सुहृदुपचारात् । अकाण्डकोपः आकस्मिककोपः अत्र नर्मदोद्देशानां तत्सरतानगुणानां वाच्यानां वैशिष्ट्यप्रयोजकम् ।

णोल्लेइ अणोद्दमणा अत्ता मं घरभरम्मि सअलम्मि ।
खणमेत्तं जइ संझाइं होइ ण व होइ वीसामो ।।१८।।

अत्र संध्या सङ्केतकाल इति तटस्थं प्रति कयाचित् द्योत्यते ।

बालचित्तानुरञ्जनी–अन्यसन्निधिवैशिष्ट्यात् व्यञ्जकतामुदाहरति **णोल्लेइ इत्यादि** । सङ्केतकालप्रश्नाभिलाषिणं कामुकमुद्दिश्य सखीं प्रति काचित् व्यभिचारिणी कथयति । मं मां सअलम्मि सकले । घरभरम्मि गृहभरे । अणद्दमना अनार्द्रमनाः । अत्ता श्वश्रूः । णोल्लेइ प्रेरयति । जइ यदि ।

संझाइ सन्ध्यायाम्। खणमेत्तं क्षणमात्रम्। वीसामो विश्रामः। णव केवलम्। होइ भवति। ण व होइ न वा भवति।

व्यङ्ग्यमाह अत्र सन्ध्येति। अत्रान्यस्य सुरतसङ्केताभिलाषिणः सन्निधानवैशिष्ट्यादेवं व्यज्यते। सन्ध्यायामवसर एवेत्युच्यमाने तटस्थस्य स्पष्टप्रतीतिर्माभूदिति न वेत्युक्तम्।

सारबोधिनी—नोदयत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकले।

क्षणमात्रं यदि सन्ध्यायां भवति न वा भवति विश्रामः॥

अणस्समणा[७] "इति पाठे अनल्पमना"[८] इत्यर्थः। सन्ध्येति। सन्ध्यायामेव प्राप्तावसरत्वात्। तटस्थं निकटस्थम् यद्वा वाच्यार्थं प्रत्युदासीनम्। व्यङ्ग्ये तु जीवितसर्वस्वं सङ्केतार्थिनम्। जनान्तरसन्निधौ तु नैवमिति तत्सन्निधिवैशिष्ट्यम्।

काव्यप्रकाशदर्पणः—नुदत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकले।

क्षणमात्रं यदि सन्ध्यायां भवति न वा भवति विश्रामः।

क्वचित्तु "सं एणवर हो दूवी समो इति वा भवति विश्रामः पाठश्च केवलं तटस्थः। तस्य संनिधे प्रकरणावसेयस्यात्र वैशिष्ट्यम्।

सुव्वइ समागमिस्सदि तुज्झ पिओ अज्ज पहरमेत्तेण।

एमेअ कित्ति चिट्ठसि ता सहि सज्जेसु करणिज्जं॥१६॥

अत्रोपपतिं प्रत्यभिसर्तुं प्रस्तुता न युक्तमिति कयाचिन्निवार्यते।

बालचित्तानुरञ्जनी—प्रस्ताववैशिष्ट्याद्व्यञ्जनामुदाहरति सुव्वईति। अत्र काचिदुपपतिं प्रति भिसर्तुमुद्यतां सखीं कथयति। अज्ज अद्य। पहरमेत्तेण प्रहरमात्रेण। तुज्झ तव। पिओ प्रियः। समागमिस्सदि समागमिष्यति। सुव्वइ एवं श्रूयते। एमेअ एवमेव। कित्ति किमिति। चिट्ठसि तिष्ठसि। ता तस्मात्। सहि सखि। करणिज्जं करणीयम्। सज्जेसु सज्जय। सम्यक् सम्पादयेति भावः।

सारबोधिनी—

श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण।

एवमेव किमिति तिष्ठसि तत्सखि सज्जय करणीयम्॥

अत्रेति। इयमस्याः संविदितरहस्यादेशविन्यासंसमये अकस्मात् गृहेश्वरागमनं प्रस्तावयति।[९] तस्मादभिसरणं वारयतीति प्रस्ताववैशिष्ट्यम्।

काव्यप्रकाशदर्पणः— श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण।

एवमेव किमिति तिष्ठसि तत्सखि सज्जय करणीयम्॥

अत्र तवेति प्रियेति सखीं प्रति सोत्कम्पनवचनम्। अन्यत्र च रहस्यगोपनम्। एवमेवाङ्गमण्डलं कृत्वा सज्जय सज्जीकुरु। अत्रोक्तरूपे व्यङ्ग्ये निजपत्यागमनप्रस्तावैशिष्ट्यम्।

अन्यत्र यूयं कुसुमावचायं
कुरुध्वमत्रास्मि करोमि सख्यः ।
नाहं हि दूरं भ्रमितुं समर्था
प्रसीदतायं रचितोऽञ्जलिर्वः ॥२०॥

अत्र विविक्तोऽयं देश इति प्रच्छन्नकामुकस्त्वया अभिसार्यतामिति आश्वस्तां प्रति कयाचिन्निवेद्यते ।

बालचित्तानुरञ्जनी—देशवैशिष्ट्याद्व्यञ्जनामुदाहरति अन्यत्रेति । अत्र पुष्पावचयं नाटयन्ती मालती* सखीः प्रति कथयति । यूयं पुष्पावचायं अन्यत्र कुरुध्वम् । भो सख्यः । अत्र अस्मिन् प्रदेशे । अस्मीत्यहमर्थेऽव्ययम् । अहं करोमि । अत्रैवाहं करोमीत्यर्थे हेतुमाह हीति । यस्मादहं दूर गन्तुमसमर्था न शक्ता । अयमञ्जलिर्वः युष्मभ्यं रचितः । प्रसीदत प्रसन्ना भवत ।

सारबोधिनी—अन्यत्रेति प्रलोभयति । अवचायमिति । हस्तादाने चेरस्तेये[10] इति (३-३-४०) घञा कुसुमस्य हस्तप्राप्तत्वावगमात् । अस्मीत्यहमर्थे । विविक्तो विजन इति देशवैशिष्ट्यम् ।

प्रच्छन्नः सदा संनिधानयोग्यचेट्यादिवेषेण गुप्त इत्यर्थः ।

गुरुअणपरवस पिअ किं भणामि तुइ मंदभाइणी अहअं ।
अज्ज पवासं वच्चसि वच्च सअं जेव्व सुणसि करणिज्जं ॥२१॥

अत्राद्य मधुसमये यदि व्रजसि तदाहं तावत् न भवामि, तव तु न जानामि गतमिति व्यज्यते ।

बालचित्तानुरञ्जनी—कालवैशिष्ट्याद्व्यञ्जनामुदाहरति गुरुअणेति । अत्र प्रतिष्ठासु प्रियं प्रति काचित् कथयति । गुरुअणपरवस गुरुजनपरवश । पिअ हे प्रिय । मंदभाइणी मन्दभाग्या । अहकं अहम् । तुह त्वाम् । किं भणामि ? अज्ज अद्य । पवासं प्रवासम् । वच्चसि व्रजसि । वच्च व्रज । सअं जेव्व स्वयमेव करणिज्जं करणीयम् । सुणसि जानासि । व्यङ्ग्यमाह अत्र मध्वित्यादि । अत्र वसन्तसमयलक्षणं कालस्य वैशिष्ट्यम् ।

सारबोधिनी-गुर्विति । गुरुजनपरवश प्रिय किं भणामि तव मन्दभागिनी खल्वहम् ।
अद्य प्रवासं व्रजसि व्रज स्वयमेव जानासि करणीयम् ॥
जनोऽविदग्धः । वसन्तसमये प्रवासप्रेरणात् । स एव परः शत्रुः ।

काव्यप्रकाशदर्पणः—गुरुजनपरवश प्रिय किं भणामि तव मन्दभागिन्यहम् ।
अद्य प्रवासं व्रजसि व्रज स्वयमेव जानासि करणीयम् ॥
अर्थादामरणं न जीवामि । अत्र वसन्तकालस्य वैशिष्ट्यम् ।

---

*काचिदिति पाठः श्रेयान् । मालतीमाधवे श्लोकस्यास्याऽनुपलम्भात् ।

आदिग्रहणात् चेष्टादेः । तत्र चेष्टाया यथा—

द्वारोपान्तनिरन्तरे मयि तथा सौन्दर्यसारश्रिया
प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम् ।
आनीतं पुरतः शिरोंशुकमधः क्षिप्ते चले लोचने,
वाचस्तत्र निवारितं प्रसरणं सङ्कोचिते दोर्लते ।।२२।।

अत्र चेष्टया प्रच्छन्नकान्तविषय आकूतविशेपो ध्वन्यते । निराकाङ्क्षप्रतिपत्तये प्राप्तावसरतया च पुनः पुनरुदाह्रियते । वक्त्रादीनां मिथः संयोगे द्विकादिभेदेन । अनेन क्रमेण लक्ष्यव्यङ्ग्ययोश्च व्यञ्जकत्वमुदाहार्यम् ।।२१-२२।।

बालचित्तानुरञ्जनी—आदीति । चेष्टावैशिष्ट्याद् व्यञ्जकत्वमुदाहरति द्वारोपान्तेति । कश्चित् कामी नर्मसचिवं प्रति कथयति । द्वारसमीपे सन्निहिते मयि तथा सौन्दर्यसारलक्ष्म्या ऊरुयुग्मं प्रोल्लास्य प्रसार्य मिथः समाश्लिष्टं कृतम् । दूरस्थस्यैव प्रियस्य दूरात् स्वाङ्गैः स्वाङ्गान्येव मेलयित्वा स्पष्टकं नाम आलिङ्गनं क्रियते तदनेन सूचितम् ।

शिरोऽशुकं पुरतः आनीतम् । अनेन गूढमानेच्छेति व्यज्यते । तदनन्तरं वाचः प्रसरणं निवारितं मुखमुद्रणेनेत्यर्थः अनेन तूष्णीं भूते जने आगन्तव्यमिति । अनेन पारवश्यं ध्वन्यत इति केचिदाहुः । ततो भुजलते सङ्कोचिते । अनेनागमनपारितोषिकमालिङ्गनं व्यज्यते ।

व्यङ्ग्यमाह **अत्र चेष्टयेत्यादि** । अत्र चेष्टाया ऊरुयुगप्रसारणादिरूपाया वैशिष्ट्यम् ।

ननु द्वितीयोल्लासे वाच्यादीनामर्थानां व्यञ्जकत्वमुदाहृतम् । एकस्मिन्नेवोदाहरणे वक्त्रादिवैशिष्ट्यमप्युदाहर्तुं शक्यते, तत् किं पृथगुदाहरणेनेत्याशङ्क्याह निराकाङ्क्षेति । सामान्येन पूर्वमुदाहृतेऽपि अस्योदाहरणं किं न प्रदर्शितमित्याकाङ्क्षायां सत्यां प्रतिपत्तिर्निराकाङ्क्षा न भवतीति तदर्थं वक्त्रादिवैशिष्ट्यादर्थानां पुनर्व्यञ्जकत्वमुदाहृतमित्यर्थः । अनवसरे सङ्कोचोऽपि युज्यते । सोऽपि नास्तीत्याह **प्राप्तेति** । एवञ्च वाच्यस्य वक्त्राद्येकैकवैशिष्ट्येन व्यञ्जकत्वमुदाहार्यम् । वाच्यस्य वक्तृबोद्धव्याद्युभयादिवैशिष्ट्येनापि व्यञ्जकत्वमुदाहार्यमित्याह **वक्त्रादीनामिति** । वक्त्रादीनां मिथः संयोगे सति द्विकत्रिकादिभेदो भवति । तत्रोदाहार्यमिति संबन्धः । वक्तृबोद्धव्यादीनां मिथः द्वयोः संयोगे सति द्विकवैशिष्ट्यमिति ज्ञेयम् । तत्र द्वयोर्वैशिष्ट्याद्व्यञ्जकस्योदाहरणम् ।

अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पुलोएसु ।
मा पहिअ रत्तिअंधअ सज्जाइ माणु मज्जिहिसि ।।

काचित् प्रोषितभर्तृका व्यभिचारिणीवसतिं प्रार्थयमानं सञ्जातकामं पथिकं प्रति कथयति । पहिअ हे पथिक ! अत्ता श्वश्रूः । एत्थ अत्र । णिमज्जइ निषीदति सा दूरे शेते सुप्ता च न ज्ञास्यतीत्यर्थः । एत्थ अत्र । समीप एवाहम् । दिअसअं दिवसकम् । सम्प्रति रतान्तरकारी कुत्सितो दिवसः । पुलोएसु विलोकय । दिवसमध्य एव सर्वं द्रष्टव्यमित्यर्थः रत्तिअन्धअ रात्र्यन्धक । रात्रौ शय्याविभागानभिज्ञतया । सह आवयोरित्यर्थे निपातः । सज्जाइ शय्यायाम् । माणु मज्जिहिसि मा शयिष्ठाः ।

अत्र व्यभिचारिणीलक्षणं वक्तृबोद्धव्ययोर्वैशिष्ट्यम् । तस्मान्मम शय्यायामेव पतेति व्यज्यते।

अनेन क्रमेण पूर्वोदाहृत "साहेन्ती" इत्यत्र लक्ष्येऽर्थे वक्तृवैशिष्ट्यम्। "उअ णिच्चल" इत्यत्र व्यङ्ग्ये वक्तृवैशिष्ट्यमित्युदाहार्यम्।

सारबोधिनी—द्वारेत्यादि। निरन्तरे निबिडसंलग्ने। प्रोल्लास्येत्यनेन सहर्षमालिङ्गनं स्पष्टमुक्तम्। "आनीतं पुरतः शिरोंऽशुकमित्यादिना गूढागमनम् । "अधःक्षिप्ते चले" इत्यादिना सूर्यास्तसमः। "वाचस्तत्र" इत्यादिना कलकलरहिते समये समागन्तव्यमिति । "सङ्कोचिते दोर्लते" इत्यनेनागमन-पारितोषकमालिङ्गनं देयमिति व्यज्यते । चेष्टया चेष्टावैशिष्ट्येन । आकूतविशेषो भावविशेषः। संभोगसञ्चारिलज्जालक्षण इत्यन्ये।

ननु "अइपिहुलम्" इत्यत्र पृथुलरूपवाच्यवक्तृबोद्धव्यानां, "गुरुअण" इत्यत्र काकुवक्तृबोद्धव्य-कालगुर्वित्यलङ्घनीयाज्ञात्वादिरूपवाच्यानां सङ्करेण वैचित्र्येण द्वित्रोदाहरणेनैव निर्वाहो भवति। किमेतावद्भिरित्यत आह **निराकाङ्क्षेति।** मिलितेषु कस्य व्यञ्जकत्वमिति सन्देहे यत्र यस्य प्राधान्यं तत्र तस्य व्यञ्जकत्वमन्येषाम् आनुगुण्यमात्रमिति व्युत्पत्तये । द्वौ परिमाणमस्येति द्विकम् । तत्र द्वयोः प्राधान्यम्। यथा—'गुरुअण' इत्यत्र वक्तृबोद्धव्यकाकूनाम् । एवमन्यत्र । अनेन क्रमेण द्वित्रादिना रूपेण। मत्ता इति। इदमत्रोदाहरणं न सर्वसम्मतम्।

काव्यप्रकाशदर्पणः—द्वारेति। निरन्तरे निकटे। आकूतमितिभावः। स च शृङ्गाररसः। तेना-न्यार्थधीहेतुरित्यन्यार्थशब्देन वस्त्वलङ्काररसादिलक्षणस्य द्विरूपस्यापि ध्वनेः सङ्ग्रहः। एवमलङ्कृति रूपस्यापि ध्वनेरुदाहरणमूह्यम्।

चेष्टादेरित्यादिग्रहणात् वर्णनीयनायकादिगतसात्त्विकादिपरिग्रहः। **निराकाङ्क्षेति ।** अयमर्थः। 'अइपिहुलम्' इत्यादौ । वक्तृवाक्यादिद्वित्रादिवैशिष्ट्यसंभवेऽपि शिष्याणां निःसन्देहव्युत्पत्तये प्रत्येकं भिन्नमुदाहरणम्।

अयमाशयः। योऽयमुक्तोदाहरणेषु वक्त्रादिवैशिष्ट्यादितरोऽर्थः प्रतीयते नासावभिधादेर्विषयः। तस्य स्वार्थबोधननियमात्। न चार्थमात्रस्य। तथाहि। प्रतिवेशिन्या उक्तिः। तत्कालसन्निहितैरल्पैर्वानु-माने न काचित् क्षतिरस्माकम्। यदि च काव्यार्थभावनया सहृदयैरनुमीयते तथा वक्त्रादीनां तथाविधादि-प्रियविरहस्तर्व्यभिचारः । किन्त्वेनैवंविधानां काव्यानां कविप्रतिभासोक्तजन्मनां प्रामाण्यानावश्यकत्वेना-सन्दिग्धत्वम्। हेतोरित्यादि। प्रपञ्चितमस्मत्साहित्यदर्पणे । एवंप्रायानुक्तोदाहरणेषु यथायोगं सुमति-भिरवगन्तव्म्। क्रमेण परिपाट्या वाक्यार्थव्यञ्जकत्वेष्वपि। 'पिहुलम्' इत्यादि। लक्ष्यार्थस्य 'उन्निदम् इत्यादि। व्यङ्ग्यार्थस्य उव सच्चिलेति।

शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः ।
अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता ॥ २३ ॥

शब्देति । न हि प्रमाणान्तरवेद्योऽर्थो व्यञ्जकः ॥ २३ ॥

इति श्रीकाव्यप्रकाशेऽर्थव्यञ्जकतानिर्णयो नाम तृतीय उल्लासः ॥ ३॥

बालचित्तानुरञ्जनी—'अर्थव्यञ्जकतोच्यते' इत्यनेनार्थस्य व्यञ्जकत्वे तद्वाचकस्य शब्दस्य कथं व्यञ्जकत्वव्यपदेश इत्याशङ्क्य शब्दार्थयोरुभयोरपि व्यञ्जकत्वं प्रतिपादयितुमाह **शब्देति** । शब्दप्रमाणेन प्रतिपादितोऽर्थो वाच्यः । लक्ष्यश्चार्थान्तरं व्यङ्ग्यलक्षणं व्यनक्ति । यस्मात् तस्मात् अर्थस्य व्यञ्जकत्वे अर्थशक्तिमूले ध्वनौ शब्दस्य सहकारित्वम् । विशिष्टशब्दाभिधेयतया विना अर्थस्य व्यञ्जकत्वाभावात् सहकारितया शब्दोऽपि व्यञ्जक इति व्यपदिश्यत इत्यर्थः । शब्दप्रमाणेत्यादि व्याचष्टे **न हि प्रमाणेत्यादि**। ततः शब्दार्थयोरपि व्यञ्जकत्वं केवलमर्थः स्यात् मुख्यतामात्रमित्यर्थः ।

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीसरस्वतीतीर्थविरचितायां काव्यप्रकाशटीकायाम् अर्थनिर्णयो नाम तृतीय उल्लासः ॥

सारबोधिनी—नन्वेवमर्थस्य प्रमाणान्तरत्वं स्यात् । तदसाधारणसहकारेण मनसो [वचसो] व्यङ्ग्यप्रमाणकत्वादित्यत आह **शब्देति** । शब्दबोध्यत्वेनैवार्थस्य व्यञ्जकत्वे तदन्वयव्यतिरेकाभ्यां तस्यैव प्रमाणतेत्याह **शब्देति** । तस्यैवार्थस्य प्रमाणान्तरलभ्यत्वेनाव्यञ्जकत्वात् तदाह **नहीति** । प्रत्यक्षोपस्थिते कामिमिथुने तच्चेष्टया चानुमिते रत्यादावास्वादानुदयात् । अर्थस्य तत्र प्रबला शक्तिरिति व्यञ्जनायास्तन्मूलत्वमिति सर्वं सुस्थमिति ।

इति सारबोधिन्यां तृतीय उल्लासः ।

काव्यप्रकाशदर्पणः—शब्देति । अत्र प्रमाणपदेन सर्वस्यैव काव्यरूपशब्दस्य सुप्रकाशरसास्वादमित्ययोगव्यवच्छेदेन प्रामाण्यनियमः सूचितः । प्रमाणं प्रत्यक्षादितद्बोध्यो व्यङ्ग्यः । न प्रकृत्या अतिशयद्योतक इति भावः । एतेनार्थस्य व्यञ्जकत्वे शब्दस्यापि सामर्थ्यं कल्पनीयम् । न त्ववर्जनीयम् । **संनिधिमात्रमिति** । सर्वशक्तिमूलता किन्तु यत्र यच्छक्तिरुत्कटा तत्र तन्मूलताव्यपदेशः द्वयोरुत्कटत्वे उभयशक्तिमूलमिति सर्वमवदातम् ।

इति काव्यप्रकाशदर्पणे तृतीय उल्लासः[१३]

---

१. स्वरूपमितरस्याः K २. काकुरित्युपगीयते B. ३. B omits from पृथुल to गोपनम् ४. इत्थमित्यध्याहार्यम् A. ५. प्रश्नेति A. ६. A omits from अन्या to गतमित्याश्चर्यम् ७. अणणमना A. ८. अनन्यमना A. ९. प्रस्तौति A. १०. cf. हस्तादाने चेरस्तेये (3.3.46) ११. चेष्टादिवेषेण A. १२. व्यङ्ग्याप्रमापकत्वम् A. १३ इदं पुस्तकं बालकभट्ट अयाचितेन लिखितम् इत्यधिकः पाठः ।

यद्यपि शब्दार्थयोर्निर्णये कृते दोषगुणालङ्काराणां स्वरूपमभिधानीयं तथापि धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायत इति प्रथमं काव्यभेदान् आह—

बालचित्तानुरञ्जनी—पूर्वं "तददोषौ" इत्यादिना काव्यस्वरूपमुक्तम्। तत्र शब्दार्थौ प्रपञ्चितौ। अधुना दोषगुणादिनिरूपणमुचितम्। तत्परित्यज्य कथं काव्यभेदकथनमित्याशङ्क्याह **यद्यपीति**। धर्मिणि प्रकर्षेण साकल्येन प्रदर्शिते तद्धर्माणां दोषाणां हेयत्वं गुणालङ्काराणामुपादेयत्वं सुज्ञातमिति प्रथमतः काव्यभेदकथनमित्यर्थः।

सारबोधिनी—यद्यपि शब्दार्थयोर्निर्णये[1] कृतेऽदोषत्वादिधर्मातिरिक्ते आकाङ्क्षैव न भवतीति शङ्कोत्तराभ्यामाह **यद्यपीति**। **धर्मिणि निरूपिते इति**। सामस्त्येनेति शेषः।

ननु काव्यस्य लक्षणं ध्वन्यादिना विभागश्च कृतः। तथा "तददोषौ" इत्यनेन प्राधान्येन धर्मितया शब्दार्थावुक्तौ, तयोरपि लक्षणादिकं कृतम्। किमपरमवशिष्यते येन सामस्त्येन धर्मी न प्रदर्शित इति यदर्थोऽयमारम्भ ? इति।

अयं भावः। अवान्तरभेदे निरूपयितव्ये तत्र [2]नान्तरीयकतया रसनिरूपणमपि भविष्यति। तन्निरूपणे च तदधीनदोषादीनां धर्माणां निरूपणमुपपद्यत इति। [3]तद्वक्ष्यति हि "मुख्यार्थहतिर्दोषो रसस्य [श्च ?] मुख्य" इति "ये रसस्याङ्गिनो धर्माः" इति च। तथा "उपकुर्वन्ति तं सन्त" मित्यादि॥ अत एव "काव्यभेदान्" इत्यस्य ध्वन्यादिभेदान् इत्यर्थो बोध्यः। अन्यथा पूर्वमेव ध्वन्यादिरूपेण काव्यभेदाः प्रदर्शिताः। पुनः कथं तदारम्भः ? अतस्तन्निरूपणाय रसादिनिरूपणमपि प्रकृतमिति ध्येयम्।

काव्यप्रकाशदर्पणः—श्रीः। इह हि "तददोषौ" इति काव्यसामान्यलक्षणकारिकायाम् उद्दिष्टस्य काव्यरूपस्य धर्मिणो विशेषा उत्तमादयः शब्दार्थयोः स्वरूपं च निरूपितम्। तदिदानीं दोषादिनिरूपणे प्राप्तावसरे कथम् उत्तमादिकाव्यभेदप्रभेदप्रदर्शनमित्याक्षेपमनूद्य वृत्तिकृदाह **यद्यपीति**। प्रदर्शिते इति प्रकर्षेण अर्थात् भेदप्रभेदाभ्यां प्रदर्शिते ख्यापिते। हेयता दोषाणाम् उपादेयता गुणालङ्काराणाम्।

अयमर्थः। दोषाणां रसस्य कुतोऽपकर्षोत्कर्षज्ञानं सुकरं स्यादिति। **काव्यभेदानिति**। काव्यशब्देनात्र काव्यविशेषः उक्तरूपो ध्वन्यादि।

अविवक्षितवाच्यो यस्तत्र वाच्यं भवेत् ध्वनौ।
अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्॥२४॥

लक्षणामूलगूढव्यङ्ग्यप्राधान्ये सत्येव अविवक्षितं वाच्यं यत्र स "ध्वनौ" इत्यनुवादात् ध्वनिरिति ज्ञेयः। तत्र च वाच्यं क्वचिदनुपयुज्यमानत्वादर्थान्तरे परिणमितम्।

बालचित्तानुरञ्जनी—तत्र प्रथमस्य द्वैविध्यमाह **अविवक्षितेति**। अविवक्षितम् अनुपयुज्यमानत्वाद नुपपद्यमानत्वाद्वा वक्तुरनभिप्रेतं वाच्यं यत्र एवंविधो यो ध्वनिरस्ति तत्र ध्वनौ वाच्यम् अर्थान्तरे सङ्क्रमितं

परिणमितम्, अत्यन्तं तिरस्कृतं वा भवेत्। भ्रान्तादिवाक्यव्युदासाय विशेषणप्रक्षेपपूर्वम्। अविवक्षितपदं व्याचष्टे **लक्षणेति**। लक्षणामूलं यस्य तत्र तद्गूढं च तत्र तद्गूढव्यङ्ग्यरूप **प्राधान्ये इति**। विवक्षितान्यपरव्युदासाय **लक्षणामूलेति**। अगूढव्यङ्ग्यमध्यमकाव्यपरिहाराय **गूढेति**। **यत्र इति**। सामान्याभिधानाद्विशेष्यापरिज्ञानमाशङ्क्याह **ध्वनाविति**।

सारबोधिनी—तत्र लक्षणामूलव्यङ्ग्यस्य प्रागुक्तत्वादल्पविषयत्वाच्च प्रथमं तद्भेदमाह **अविवक्षितेति**। अविवक्षितत्वमतात्पर्यविषयत्वम्। तच्च वाच्यतावच्छेदकप्रकारेणेति बोध्यम्। अन्यथा "छत्रिणो यान्ती" त्यत्र वाच्यस्यापि विवक्षणात् तदसङ्ग्रहः स्यात्। तदपि मुख्यत इत्यवधेयम्। अन्यथा "कुन्ताः प्रविशन्ति" इत्यादौ कुन्तस्यापि पुरुषावच्छेदकतया तात्पर्यविषयत्वमस्त्येव, परं तु न मुख्यतः। भोजनार्थं प्रवेशान्वये मुख्यतः पुरुषस्यैव तात्पर्यविषयत्वात्।

अर्थान्तरे सङ्क्रमितमिति। तत्त्वं च स्वार्थापरित्यागेनार्थान्तरपरशब्दकम्। **अत्यन्तमिति**। शक्यस्य सर्वथानन्वयित्वादन्वयाप्रतियोगिकत्वतिरस्कारः। इमे उपादानलक्षणलक्षणारूपे। इदमुपलक्षणम्, सारोपादेरत्यन्ततिरस्कृतवाच्य एवान्तर्भाव इति ध्येयम्।

यत्तु "कदली कदली" इत्यादौ द्वितीयकदल्यादिपदे जडकदलीत्वलक्षणायाम्, अर्थान्तरे स्वविशेषरूपे सङ्क्रमितम् इत्याहुः। तन्न, कुन्तेत्यादवव्याप्त्यापत्तेः। कुन्तपुरुषयोः सामान्यविशेषभावविरहात्। जडत्वादिलक्षणयोपपत्तौ शक्याननुप्रवेशाच्च। अविवक्षितवाच्यपदेन रूढ्यभावेऽपि योगेनैव लक्षणामूलध्वन्यभिधानमित्याह **अविवक्षितं वाच्यं यत्रेति**। अतिप्रसङ्गमाशङ्क्य सत्यन्तेन विशेषयति **लक्षणामूलेति**। निरूढलक्षणावति लक्षणामूलध्वनेर्निरासाय **लक्षणामूलेति**। तस्या निष्प्रयोजनाया व्यङ्ग्यानुपजीव्यत्वात्।

केचित्तु, अभिधामूलेऽतिप्रसङ्गवारणाय लक्षणामूलेति, तन्न। यतस्तत्राविवक्षितवाच्यत्वमेव नास्तीति कथमतिव्याप्तिः।

गुणीभूतव्यङ्ग्यवारणाय **गूढेत्यादि**। गूढत्वेनागूढव्यवच्छेदः। प्राधान्यमनङ्गत्वम्। तेनापराङ्गवाच्यसिद्ध्यङ्गयोर्व्युदासः। अस्फुट-संदिग्ध-तुल्यप्राधान्य-असुन्दरेषु न लक्षणामूलता। तत्तद्व्यङ्ग्योद्देशेन तस्याः अप्रवृत्तेः। काकाक्षिप्तेऽपि न लक्षणा अन्वयानुपपत्तेरभावात्।

नन्वेवं "विशेष्यवैयर्थ्यम्, अव्यावर्त्तकत्वात्, मैवम्। अन्यथा लाक्षणिकसिंहपदवाच्यत्वलक्षणान्वयव्यतिरेकानुविधायित्वमस्ति। अन्यथा पौनरुक्त्यापत्तेः, वाक्यार्थप्रतीतौ तदप्रतीतेः। न च विशेष्येणावरणं, सिंहान्वयस्य विवक्षितत्वात्।

ननु कथम् "अविवक्षितवाच्येत्यत्र" ध्वनौ तात्पर्यमित्यत आह **ध्वनावित्यनुवादाविति**। अनुवादस्य पुरोवर्तितात्पर्यग्राहकत्वात्।

काव्यप्रकाशदर्पणः—तस्य भेदाः अविवक्षितवाच्यादयो विशेषः। अत एवाभिधामूलस्य प्रथमं विवेक्तुमुचितत्वेऽपि पूर्वोक्तानुसारेण सूचीकटाहन्यायेन वा प्रथमं लक्षणामूलं लक्षयति **अविवक्षितेति**।

लक्षणामूलत्वादेव वाच्यमभिधेयम्। अविवक्षितं बाधितस्वरूपं यत्र स एकोऽविवक्षितवाच्यो नाम ध्वनिः काव्यभेदः। स चार्थान्तरसंक्रमितवाच्यात्यन्ततिरस्कृतवाच्यश्चेति द्विविध इत्यर्थः। **गूढेति**। अगूढव्यङ्ग्यप्रयोजित गुणीभूतव्यङ्ग्यव्यवच्छेदः। अनुपयुज्यमानत्वम् अर्थात् स्वरूपमात्रेणार्थान्तरेषु विशेषरूपे सङ्क्रमितम् इत्यस्यार्थः परिणमितः। अत्र च णिचा काकादिसहायसूचकम्। परिणामश्च तत्त्वादपरिच्युतस्य धर्मिणोऽवस्थान्तरगमनम्।

यथा

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति।

आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत्॥२३॥

अत्र वचनादि उपदेशादिरूपतया परिणमति।

बालचित्तानुरञ्जनी—अर्थान्तरसङ्क्रमितवाच्यस्योदाहरणमाह **यथेति**। अस्मीत्यहमर्थेऽव्ययम्। अस्मच्छब्दानुवादकश्चायं न तत्पर्याय इति युष्मत्पर्यायभवच्छब्दप्रयोगे मध्यमपुरुषानुपपत्तिवन्नोत्तमपुरुषानुपपत्तिः। अहं त्वां वच्मि। अत्र विद्वत्समूहो वर्तते। तस्मात् आत्मीयां मतिं दृढीकृत्यात्र तिष्ठेत्यन्वयः। अत्र वचनसामान्यस्य प्रत्यक्षेणैव गृह्यमाणत्वादनुपयुक्तो मुख्योऽर्थो वाच्यो वचनविशेषं लक्षयति। इति लक्षणामूलत्वं सामान्यविशेषभावश्च संबन्धः, वक्तुर्विनयप्रकाशनम् आप्तत्वं वा व्यङ्ग्यम्। सर्वो हि स्वां मतिमादायैव तिष्ठतीत्यनुपयुक्तो वाच्योऽर्थः प्रमाणपरिगृहीतां मतिं लक्षयति। सामान्यविशेषभावः संबन्धः। गृह्यतामिति न त्याज्येति व्यङ्ग्यमर्थान्तरमस्येति। तत्त्वमाह **अत्रेति**।

सारबोधिनी—त्वामित्यादि। अस्मीत्यहमर्थे। आदाय गृहीत्वा। आङ्पूर्वस्य ददातेर्ग्रहणे भाषणेऽपि* वृत्तेः। आत्मीयामित्यादि द्वितीयार्धेन लब्धेः त्वामस्मि वच्मीत्यादेः प्रत्यक्षावगतौ विदुषामित्यादेश्चानुपयुज्यमानता। स्वमत्यालम्बनस्यावश्यंभावित्वेनात्मीयामित्यादेश्च स्थित्यवलम्बनस्य सिद्धत्वात् तदुपदेशस्याप्यनुपयुक्तत्वम्। ततो लक्षणा, तदाह **वचनादिरिति**। लक्षणाबीजंत्वनुपयुक्तौ निराकाङ्क्षत्वम् त्वमुपदेश्या अहमुपदेष्टा। वच्मि उपदिशामीति वचनादीनामुपदेशादिरूपेण परिणतिः। अवश्यवाच्यहिताहितत्वालङ्घनीयाज्ञत्वादरग्राह्यत्वानि व्यज्यन्ते। एवं विदुषाम् अनन्यसाधारणज्ञानवतामिति लक्ष्यम्। आशु विपक्षदूषकत्वं सर्वग्राह्यैकपक्षत्वं च फलम्। आत्मीयां पराप्रतार्यामिति लक्ष्यम्। अदुष्टपक्षोद्भावनं फलम्। स्थितिसावधानमिति लक्ष्यम् विपक्षछिद्रप्रेक्षित्वं च फलम् इत्याद्यूहनीयम्।

काव्यप्रकाशदर्पणः—अस्मि अहम्। समुदायः समवायः। **अत्रेति**। विदुषां समुदाय इत्यादि प्रतिपादनेनापि वक्तृप्रतिपादने सिद्धे वच्मीति पुनर्वचनं पौनरुक्त्यापातात् मुख्यार्थे बाधिते वचनरूपोपदेशार्थम् उपदेशश्च न वचनादन्यः। आदिपदात् प्रतिपाद्यस्य संमुखीनत्वादेव नवे प्रतिपाद्यत्वे त्वामिति पुनर्वचनमन्यथा व्यावृत्ते सिद्धे त्वामिति पुनर्वचने अन्यव्यावृत्तिविशिष्टं त्वदर्थं लक्षयति। एवं वच्मीत्यनेनापि अहमर्थे लब्धे अस्मीति पुनर्वचनमन्यव्यावृत्तिविशिष्टं मदर्थम्। एतानि च लक्षितानि स्वातिशयं व्यञ्जयन्ति। तेन वक्तृवचनस्यावश्यंग्राह्यत्वादिरूपोऽर्थः प्रतिपाद्यते।

क्वचिदनुपपद्यमानतया, अत्यन्तं तिरस्कृतम् ।

यथा--

उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम् ॥२४॥

एतद् अपकारिणं प्रति विपरीतलक्षणया कश्चिद्वक्ति ॥२४॥

बालचित्तनुरञ्जनी—द्वितीयमुदाहरति उपकृतमिति । [स्पष्टम्]

सारबोधिनी—एतदिति । अत्रापकारातिशयो व्यङ्ग्य इति पार्यन्तिकव्यङ्ग्यस्तु पूर्वत्र वात्सल्यम्, परत्रासूया ।

काव्यप्रकाशदर्पणः—अत्यन्ततिरस्कृतवाच्यं विवृणोति **क्वचिदिति** । उदाहरति **उपकृतमित्यादि** । अत्र ह्युपकार्युपकारैः सौजन्यसुखितत्वादिभिः प्रतिपादितैस्तद्विपरीतान्यप्रकृतत्वादीनि लक्ष्यन्ते । अपकारादयश्चोपकारादीनां न विशेषरूपाः किन्तु, ततोऽत्यन्ततिरस्कृता अर्था इत्यत्रात्यन्ततिरस्कृतवाच्यत्वम् ।

विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः ।

अन्यपरं व्यङ्ग्यनिष्ठम् ॥ एष च

कोऽप्यलक्ष्यक्रमव्यङ्ग्यो लक्ष्यव्यङ्ग्यक्रमः परः ॥२५॥

अलक्ष्येति । न खलु विभावानुभावव्यभिचारिण एव रसः । अपि तु रसस्तैः इत्यस्ति क्रमः । स तु लाघवान्न लक्ष्यते ॥२५॥

सारबोधिनी—अभिधामूलध्वनिमाह **विवक्षितमिति** । अत्र वाच्यतावच्छेदकप्रकारेण **विवक्षितं** वाच्यमित्यर्थो विवक्षणीयस्तेनार्थान्तरसङ्क्रमितवाच्याद्व्यवच्छेदः । तत्र रूपान्तरेणैव वाच्यविवक्षणात् वाच्यविवक्षायां न ध्वनित्वमित्याह **अन्यपरमिति** । एतत् विवृणोति **व्यङ्ग्यनिष्ठमिति** । तदाक्षेपकत्वेन तत्र विश्रान्तमित्यर्थः । तद्भेदानाह **एष चेति** । अलक्ष्यक्रमस्य प्राधान्यात् प्राङ्निर्देश इति बोध्यम् । **कोऽपीति** एक इत्यर्थः । अलक्ष्योऽज्ञेयः क्रमो यस्य एवंभूतो व्यङ्ग्यो यत्र । नन्वक्रम इत्येवोच्यताम्, नत्वलक्ष्यक्रम इत्यत आह **न खल्विति रसस्तैरिति** । अभिव्यज्यत इत्यध्याहार्यम् । तथा च तैरित्यनेन हेतुत्वकथनात् व्यङ्ग्यव्यञ्जकयोः पौर्वापर्यक्रमोऽस्ति । स तु न लक्ष्यते, कालसौक्ष्म्यात् । आस्वादेन झटिति चित्ताकर्षबाधायोग्यस्य सूक्ष्मकालस्यानुपलब्धेर्नाभावसाधकत्वम् इत्यलक्ष्यक्रम इत्युक्तम् **नाक्रम इति** ।

काव्यप्रकाशदर्पणः—अभिधामूलमाह **विवक्षितमित्यादि** । अभिधामूलत्वादेवात्र वाच्यं विवक्षितमबाधितम्, अपरो विवक्षितवाच्यादन्यो व्यङ्ग्यनिष्ठः । व्यङ्ग्ये निष्ठा तात्पर्यं यस्य । एतेन गुणीभूतव्यङ्ग्य

व्यवच्छेदः। एष विवक्षितान्यपरवाच्यो ध्वनिः। **कोऽपीति**। असंलक्ष्यक्रमव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्यश्चेति द्विविध इत्यर्थः। तैरित्यनन्तरं [योज्यः] व्यङ्क्त इति शेषः। इति हेतोः स क्रमः न लक्ष्यते। उत्पलशतपत्र व्यतिभेदवल्लाघवादिति शेषः। अत्र रसवति काव्ये झटित्यास्वादपर्यन्तगमनात् वस्त्वलङ्काररूपव्यङ्ग्य-योरपि प्रतीतिरत्र विलम्बिता।

अत्र

रसभावतदाभासभावशान्त्यादिरक्रमः।

भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः॥२६॥

आदिग्रहणात् भावोदय-भावसन्धि-भावशबलत्वानि। प्रधानतया यत्र स्थितो रसा-दिस्तत्रलंकार्यः। यथोदाहरिष्यते। अन्यत्र तु प्रधाने वाक्यार्थे यत्राङ्गभूतो रसादिस्तत्र गुणी-भूतव्यङ्ग्ये रसवत्-प्रेय-ऊर्जस्वि-समाहितादयोऽलङ्काराः। ते च गुणीभूतव्यङ्ग्याभिधाने उदाहरिष्यन्ते॥२६॥

बालचित्तानुरञ्जनी—रस इति। यत्र रसादिः प्राधान्येन विवक्षितः तत्रालङ्कार्यः। अतोऽयं रस-वदाद्यलङ्कारात् भिन्न इत्यत्र कथनमुचितमित्यर्थः। "भावशान्त्यादिः" इत्यत्रादिशब्दार्थमाचष्टे **आदीति**। **अलङ्कार्यतया** इत्येतद्व्याकरोति **प्रधानतयेति**। कीदृशीयमित्याकाङ्क्षायां "शून्यं वासगृहम्" इत्यादौ प्रदर्शित इत्याह **यथेति**। रसाद्यलङ्कारः यत्र स्यात् तत्राह **अन्यत्रेति**। अन्यत्र मध्यमं काव्यमित्यर्थः। **उदा-हरिष्यन्त इति**। "अयं स रशनोत्कर्षीत्यादिना।"

सारबोधिनी—भावशान्त्यादीति। अत्र भावशब्देन व्यभिचारिभाव एवोक्त मिति बोध्यम्। रत्या-द्यभावस्य शान्त्यादेश्चर्वणीयत्वात्। **अक्रम इति**। अलक्ष्यक्रम इत्यर्थः। अयं स रशनोत्कर्षी इत्यादौ गुणी-भूतव्यङ्ग्येऽतिप्रसङ्गवारणाय **भिन्न इति**। अत्र हेतुमाह **अलङ्कार्यतयेति**। स्थितः स्थिरतामापन्नः। तेनाङ्गतां बाध्यतां वा प्राप्तस्य न रसध्वनित्वम्। **अन्यत्रत्विति**। प्रधाने रसान्तरेऽङ्गिनि वाक्यार्थे वाक्योद्देश्येऽङ्गमुत्कर्षकम्। तदुक्तम्—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥ ध्वन्यालोकः २. २७

रसवदिति। अलङ्कार्यरससंबन्धान्मतुप्। यद्वा, अङ्गरसस्य परिपोषाभावात् रसतुल्यता। तुल्यार्थे वतिः। **रसादीति**। आदिपदग्राह्यमाह **प्रेय इत्यादि**। भावस्याङ्गत्वे तत्प्रियतरं काव्यम्। आभास-स्याङ्गत्वे ऊर्जस्वि। भावप्रशमस्याङ्गत्वे समाहितम्।

काव्यप्रकाशदर्पणः—रसेति। प्रतीतिविलम्बात् तत्साजात्येन लक्ष्यस्य क्रमव्यवहारः। तादृशसंलक्ष्य-क्रमासंलक्ष्यक्रमयोर्मध्ये प्रथमं व्यवस्थाहेतु रसादिरिति पिण्डार्थः। तदाभासेति रसाभासभावाभासौ। तच्छान्तिर्भावशान्तिः। **अक्रम इति**। दुरूहक्रमः। रसादिस्वरूपालङ्कारादलङ्कार्यतया **अलङ्कारकृत-**

परिपोषकत्वेन । **यथोदाहरिष्यते** । उदाहरणदर्शनेन विविक्तः करिष्यते । वाक्यार्थे रसादिरूपे । **वर्णनामात्र**-रूपे वा अङ्गभूतः शोभाविशेषाधायकः । रसस्याङ्गत्वे रसवदलङ्कारः । भावस्य प्रेयोऽलङ्कारः । एतयोराभासस्य ऊर्जस्वी । भावशान्तेः समाहितम् । "समाहितादयः" इत्यादिशब्दात् भावोदयादयः । गुणी-भूतव्यङ्ग्याभिधाने पञ्चमोल्लासे ।

तत्र रसस्वरुपमाह—

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥२७॥

विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ॥२८॥

उक्तं हि भरतेन "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति ।

बालचित्तानुरञ्जनी—उत्तरसूत्रमवतारयति **तत्रेति** । रसभाव तदाभासादिमध्ये रत्यादेश्चित्त-वृत्तिविशेषस्य चिरस्थायिनः भावस्य लोकव्यवहारे यानि कारणानीत्युच्यन्ते तानि अनुस्वानानुकृतिलक्षणे-नाद्ये "तददोषौ" इत्याद्युक्तलक्षणे काव्ये यदि स्युस्तर्हि कारणानि विभावाः, कार्याणि अनुभावाः, सहकारीणि व्यभिचारिण इत्युच्यन्ते । तैरभिव्यक्तः, स च तिष्ठत्यस्मिन् इति स्थायी रत्यादिको भावो रस इत्युक्तः । संमतिसाह **उक्तं हीति** ।

सारबोधिनी—लक्ष्यदर्शनाकाङ्क्षायामाह **तत्रेति** । तत्र तेषु मध्ये प्रथमोद्दिष्टत्वादिति शेषः । **कारणान्यथेति** । अथश्चार्थे । **व्यक्तः स इति** । स्थायी रस इत्यर्थः ।

काव्यप्रकाशदर्पण :—स्वं वास्तवं स्वरूपम् । **कारणानीति** । लोके रामानुगतरत्यादेः स्थायिनोऽन्तरान्तरोत्पत्तैर्भावान्तरैरनुच्छिन्नवासनस्य यान्यालम्बनोद्दीपनतया कारणानि सीतादिचन्द्रादीनि, अथ कार्याणि कटाक्षभुजाक्षेपादीनि, सहचारीणि हर्षादीनि तानि नाट्ये अभिनये नाटकादौ, काव्ये श्रव्यरूपे महाकाव्यादावुपनिबद्धानि यथासंभवं विभावनादिव्यापारवत्तया, न तु संज्ञाभेदमात्रेण विभावादि-शब्दव्यपदेश्यानि । तैश्च विभावाद्यैर्व्यक्तः व्यञ्जितः स्थायीभावो भाव्यते वास्यत इति व्युत्पत्त्या वासनात्म-तया सहृदयहृदयानन्दनो रसः । स्मृतो ध्वनिकारादिभिराम्नातः । अत्र विभावस्य व्यापारो विभावनम् । भावगतवासनान्तर्लीनस्य रत्यादेर्विशेषणश्चास्वादाङ्कुरणयोग्यतानयनम् अनुभावनम् । तथाभूतस्य तस्य परिपोषणं व्यभिचरणं विशेषेणाभिमुखे चरणम् । व्यक्तो व्यक्तीकृत एव रसः न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते । तदुक्तं लोचनकारैः—"रसाः प्रतीयन्ते इति त्वोदनं पचतीतिवत् व्यवहार इति । एतेन प्रतीति-शरीरमेव रस इति सूचितम् । अत्र यद्यपि मिलितो विभावादिः पानकरसन्यायेन चर्व्यमाणोऽखण्डरूप एव रसस्तथापि लोकप्रसिद्धप्राधान्यप्रत्यभिज्ञामात्स्थायिभावो रस इत्युक्तम् । इह च सात्त्विकानामनुभाव-

रूपतया न पृथगुक्तिः। अत्रार्थे महर्षिसम्मतिमाह उक्तं हीति। भरते भरतप्रणीते शास्त्रे निष्पत्तिः अत एवाविर्भावः।

एतद्विवृण्वते—"विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः, अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः, व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपसंधानान्नर्तकेऽपि प्रतीयमानो रसः" इति भट्टलोल्लटप्रभृतयः।

बालचित्तानुरञ्जनी—एतदेव सूत्रं रसस्य केचित् उत्पत्तिपरत्वेन व्याकुर्वन्तीत्याह **एतदिति**। अत्रोत्पत्तिपक्षं तावदवतारयति **विभावैरिति**। वागाद्यभिनययुक्ता स्थायिव्यभिचारिरूपाश्चित्तवृत्तयो विभाव्यन्ते विशेषेण भाव्यन्ते यैस्ते विभावाः। तत्र कामीत्यादि। आलम्बनकारणत्वेनालम्बनविभावः। उद्यानादि उद्दीपनत्वेनोद्दीपनविभावः। द्विविधैस्तैः स्थायी कार्यकारणभावसंबन्धादुत्पादितः। अनुभावयन्ति ज्ञापयन्ति गम्यगमकभावसंबन्धादिकमित्यनुभावास्तैः ज्ञाप्यमानः विविधम् आभिमुख्येन रसेषु चरन्तीति व्यभिचारिणः। तैः पोष्यपोषकभावसम्बन्धादुपचितः मुख्यवृत्त्या रामादावनुकरणीये रामादिरूपानुसन्धानादनुकर्तरि नटेऽपि सामाजिकैरास्वाद्यमानो रस उच्यत इत्यर्थः।

अस्मिन् उत्पत्तिपक्षे आलम्बनस्य रसं प्रति जनकत्वेऽपि तदीयस्य जनकत्वमुद्दीपकत्वहानिः। नापि पोषकत्वं व्यभिचारिणामिव अन्यत्रापि व्यञ्जकत्वमभिव्यक्तेर्भट्टलोल्लटादिभिरनङ्गीकारात्। नापि ईषदतिशयाधानहेतुत्वमुद्दीपकत्वम्। 'जनित' इति नापि पदाविरोधात्। इत्थमनूद्यानुमितिपक्षमवतारयति।

सारबोधिनी—अयमभिसन्धिः। काव्ये हि विभावादिभिर्व्यज्यते स्थायी। तस्यां चाभिव्यक्तावन्तःकरणवृत्तिरूपायां चैतन्यानन्दस्वरूप आत्मापि भासते। वेदान्तिनये सर्वस्मिन्नेव ज्ञाने आत्मभाननैयत्यात्। आत्ममनोयोगघटिताया आत्मभनसामग्र्याः सत्त्वात्। सर्वस्यैव कल्पितत्वेन रङ्गे इदं रजतमित्यत्रेव आत्मचैतन्यरूपाधिष्ठानानुवेद्यसंभवाच्च। अज्ञातस्यात्मनो भानं विना प्रत्यक्षादीनां प्रामाण्यानुपपत्तेश्च। तथाहि। अज्ञातज्ञापकत्वं हि प्रामाण्यम्। तथाचात्मा चेन्न भासेत कथं तेषां प्रामाण्यमिति। तथाच काव्यदर्शनश्रवणमहिम्ना उक्तयाभिव्यक्त्या चैतन्यस्यानन्दांशे आवरणभङ्गोऽपि क्रियते। तथाच रसाद्यवच्छिन्नं चैतन्यमानन्दांशे भग्नावरणतया आनन्दरूपतया प्रकाशमानं रस इति निर्गलितोऽर्थ इति। ज्ञानान्तरेत्वानन्दांशे आवरणभङ्गाभावान्न रसोद्बोधः। अत एव वक्ष्यति "चर्व्यमाणतैकप्राण" इति। चर्वणात्वानन्दांशाभिव्यक्तिः। न च कथं सैव ज्ञानान्तरे न भवतीति वाच्यम्। विभावादिज्ञानाभावात् अत एव वक्ष्यति "विभावादिजीवितावधिः" इति।

काव्यप्रकाशदर्पणः—संप्रत्यत्र भारतीयसूत्रे आचार्यदेशीयव्याख्यानं तुच्छताप्रकटनपूर्वं सांप्रदायिकव्याख्यानं प्रदर्शयितुमारभते **एतदिति**। विवृण्वते। समनन्तरं भट्टलोल्लट-श्रीशङ्कुकादयः। आलम्बनकारणानि। उद्दीपनकारणानि उद्यानादीनि। उक्तं हि—

आलम्वनं स तु रसो यमालम्ब्य प्रवर्तते ।
उद्दीप्यते रसो येन स चोद्दीपनसंज्ञकः ॥ इति ॥

नटेत्युपलक्षणम् । काव्ये नाट्येऽपि ज्ञेयम् । इदं भट्टलोल्लटादीनां मतं न समीचीनम् । तदुक्तं मम साहित्यदर्पणे—

पारमित्याल्लौकिकत्वात् सान्तरायतया तथा ।
अनुकार्य्यस्य रत्यादेरुद्बोधो न रसो भवेत् ॥ इति ॥ ३-१८

राम एवायम् अयमेव राम इति 'न रामोऽयम्' इत्यौत्तरकालिके बाधे रामोऽयमिति रामः स्याद्वा न वायमिति रामसदृशोऽयमिति च सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोऽयमिति प्रतिपत्त्या ग्राह्ये नटे—

सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः ।
मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता ॥ २५ ॥

दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च ।
अविरलविलोलजलदः कालः समुपागतश्चायम् ॥२६॥

इत्यादिकाव्यानुसंधानबलाच्छिक्षाभ्यासनिर्वर्तितस्वकार्यप्रकटनेन च नटेनेव प्रकाशितैः कारणकार्यसहकारिभिः कृत्रिमैरपि तथानभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः 'संयोगात्' गम्यगमकभावरूपात् अनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वेन संभाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशङ्कुकः ।

बालचित्तानुरञ्जनी—अनुमितिपक्षमवतारयति राम एवायमिति । राम एवायमित्ययोगव्यवच्छेदेन, अयमेव राम इत्यन्ययोगव्यवच्छेदेन च सम्यक् प्रतीतिः । न च वाच्यं नटे रामोऽयमित्यादिप्रतीतिर्भवतीति लोके बाधशिरस्काया एव प्रतीतिः भ्रान्तव्यवहारात् तद्वैलक्षण्येन सम्यगभिधानात् अयं न राम इति उत्तरकालीनबाधकज्ञाने सति रामोऽयमिति प्रतीतिस्तु मिथ्या । यथा नेदं रजतमिति बाधके सति शुक्तौ रजतप्रतीतिः । रामः स्यान्नवा रामः इत्युभयकोट्यालम्बनत्वेन संशयः । रामसदृशोऽयमिति सादृश्यप्रतीतिः । एताभ्यः प्रतीतिभ्यो विलक्षणया रामोऽयमिति प्रतिपत्त्या ग्राह्ये नटे, वर्ण्यमानो रस इत्युत्तरत्र संबन्धः ।

ननु सम्यङ्मिथ्यादिप्रतीतिविलक्षणा प्रतीतिर्न दृश्यत इत्याशङ्क्याह **चित्रे**ति । भित्त्यादौ लिखितस्तुरगः पूर्वोक्तज्ञानचतुष्टयविलक्षणज्ञानेन गृह्यते तद्वत् । तथाचोक्तम्--

प्रतिभाति न सन्देहो न तत्त्वं न विपर्ययः ।
धीरसावयमित्यस्ति नासावेवायमित्यपि ॥
विरुद्धबुद्धिसंभेदादविवेचितविप्लवः ।
युक्त्या पर्यनुयुज्येत स्फुरन्ननुभवः कथम् ॥ अभिनवभारती पृ० सं० ४५०

सेयमित्यादि[८] । नायकस्य वचनम् । ममाङ्गेषु सुधारसच्छटा अमृतरससमूहरूपा दृशोर्निबिडकर्पूरशलाका, मनसः शरीरिणी मूर्तिमती मनोरथश्रीः । सेयं परिदृश्यमाना प्राणेश्वरी प्रियतमा, लोचनमार्गं गता[९] । अहं दैवात् चपलायतनेत्रया तया विवक्षितचरित्रया वियुक्तश्चाभवम् । निबिडाः लोलाः मेघाः यस्मिन् अयं कालश्च समुपागत इत्यादिकाव्यद्वयानुसन्धानबलात् नटः प्रथमश्लोकप्रतिपाद्य आलम्बनरूपो विभावः । द्वितीयश्लोकप्रतिपाद्यं तूद्दीपनरूपम् । विभावं प्रकाशयति तथा शिक्षया उपदेशेन योऽभ्यासः पौनःपुन्येन प्रवृत्तिस्तेन निर्वर्तितानि । व्यभिचारिणामेवानुभावलक्षणानि कार्याणि । तेषां प्रकटनेन कारणभूतान् व्यभिचारिणः प्रकाशयति, कार्यभूतानुभावाभिनयेनानुभावं प्रकाशयति । अत एव "प्रकटनेन च" इत्यत्र चकारः प्रयुक्तः । अथवा अभ्यासेन निर्वर्तितं यत् स्वकार्यं कृत्रिमनिजानुभवार्जनं तत्प्रकटनेनैव नटेनैव कर्त्रा प्रकाशितः ।

ननु नाट्यसमये विकारादीनामभावेन रसाभावात् विभावादीनि कृत्रिमाण्येव तैः कथं सामाजिकानां रसानुमितिः इत्यत आह **कृत्रिमैरपीति** । अस्वाभाविकैरपि कृत्रिमत्वेनानवभासमानत्वात् अनुमितिर्युक्तेति भावः । विभावानुभावव्यभिचारिशब्दस्य व्यपदेशत्वमलौकिकचमत्कारकारित्वात् । एवंविधैःकारणकार्यसहकारिभिः कृत्वा, गम्यगमकरूपात् संयोगात् संबन्धात् [रसः] प्रतीयते ।

नन्वनुमीयमानत्वेन रसस्य वह्न्यादिसादृश्यं स्यात् । तेनाह **वस्त्विति** । वस्तुतो रामादेः सौन्दर्यबलात् रसनीयत्वेन आस्वाद्यत्वेन कृत्वा अन्यान्यनुमीयमानानि वह्न्यादीनि तेभ्यो विसदृशः । अथवा वस्तुतः अनुमीयमानरत्यादिपदार्थस्य निरतिशयमनोहरत्वं वस्तुसौन्दर्यं तस्मात् । ननु नटे स्थायिनो रत्यादेरभावात् कथमनुमीयमानत्वमत आह **स्थायित्वेनेति** । तत्र नटे अविद्यमानेऽपि तत्प्रकाशितविभावाद्युपायबलात् स्थायित्वेन विद्यमानत्वेन संभाव्यमानोऽनुमितिमर्हतीत्येवेत्यर्थः । चर्व्यमाणः सचमत्कारं साक्षात् क्रियमाणः ।

सारबोधिनी—पूरो द्रवः । शलाका अञ्जनतूलिका । मनसः सकाशादित्यर्थो बोध्यः । अयं संभोगः । विप्रलम्भमाह **दैवादिति** । कालः समयः । स एव कालो यमः । चकारद्वयप्रतिपाद्यसमुच्चयेन तुल्यकालतावगतिः । सूत्रस्थसंयोगपदार्थमाह **गम्येति** । गम्यः साध्यः । गमकः साधकः । तद्भावाद्यभ्यासेरित्यर्थः । लोके पुलकादिभी रत्यनुमानेऽत्रापि तथेत्यर्थः । साध्यमाह **रत्यादिरिति** । ननु नटे रत्यादिबाधात्

कथमनुमितिरित्याह **स्थायित्वेनेति**। अत्रापि रामत्वेन नटप्रतीतिरेव बीजम् । तथा च रामत्वबुद्धया नटे विद्यमानत्वेनाभिमन्यमान इत्यर्थः। वह्न्याद्यनुमितिवैलक्षण्यमाह **अन्येति** । तत्र **हेतुर्वस्त्विति**। **वस्तुनो** रत्यादेः। सौन्दर्यं सुखरूपता । ''लौकिकसुखानुमितिवारणाय **रसनीयत्वेनेति** । रसनमास्वादो निरतिशय-सुखरूपता। अनुमीयमानो नानुमानम्। तस्यासुखरूपत्वात् । रसस्य क्षणिकत्वं निरस्यति **चर्व्यमाण इति**। पुनः पुनरनुसन्धीयमान इत्यर्थः । नन्वनुमितस्य नानुमानम् । सिद्धिप्रतिबन्धादित्यत आह **वासनयेति**। धारावाहिनीस्था वासना। अनुमित्सयानुमितौ सिद्धेर्नप्रतिबन्धकत्वमिति भावः। तत्रासन्नपि स्थायित्वेन संभाव्यमान इति संबन्धः। अत्र पक्षे भट्टलोल्लटपक्षे च दूषणं स्वयं ग्रन्थकृता "न ताटस्थ्येन" इत्यनेन वक्ष्यते।

काव्यप्रकाशदर्पण :—सान्तरायनाटककाव्यश्रवणादेः राम एवायमिति रामत्वस्यायोगव्यवच्छेदेन अयमेव राम इत्यन्ययोगव्यवच्छेदेन चोभयथा या साम्यप्रतीतिः, न वा रामोऽयमिति औत्तरकालिके बाधे सति औत्तरकालिकबाधविशिष्टा रामोऽयमिति या मिथ्या प्रतीतिः, रामः स्याद्वा न वायमिति या च संशय-प्रतीतिः, राम सदृशोऽयमिति या सादृश्यप्रतीतिः ताभ्यो विलक्षणाया चित्रतुरगादिन्यायेन यथा बालानां चित्रतुरगे वस्तुपरिच्छेदशून्या तुरगोऽयमिति बुद्धिर्भवति तथाविधया रामोऽयमिति प्रतिपत्त्या ज्ञानेन ग्राह्ये नटे अभिनेतरि, सेयमित्यादिर्दैवादित्यन्तश्च यथाक्रममालम्बनोद्दीपनाभिधायकसंभोगविप्रलम्भशृङ्गार-प्रधानस्य। आदिपदादितरैक्यमिव काव्यानां यदनुसंधानं साक्षादिव करणम्। तद्बलात् शिक्षा उपदेशः। अभ्यासः पौनःपुन्येन प्रवृत्तिः । ताभ्यां वर्तितैः स्वकार्यमश्रुरोमाञ्चादि तस्य प्रकटनं येन तथाभूतेन नटेनैव प्रकाशितैः कार्यकारणसहकारादिभिर्विभावादिशब्दव्यपदेश्यैरनुमीयमानो रत्यादिर्भावः, तदा रामतादात्म्येन प्रतीते नटे सामाजिकानां प्रेक्षकाणां वासनया तन्मयीभावदायिन्या धिया चर्व्यमाणः पुनः पुनरनुमीयमानो रस इति श्रीशङ्कुकनामा कश्चिदाचार्य इति संबन्धः।

कारणादिभिः किंभूतैः ? तथा कृत्रिमतया अनभिमन्यमानैः। अनुमीयमान इत्यत्रानुमाने हेतुमाह। संयोगात् संबन्धात्। कोऽसौ संयोग इत्याह **गम्येति**। गम्यमनुमेयं रसादि-। गमकमनुमापकं कार्यकारणादि। रसनीयत्वेन स्पृहणीयत्वेन स्थायित्वेन दाढर्च दर्शनात्। कालान्तरेऽप्यवच्छेद्यत्वेन अत्रापि नटगतस्य रत्यादेर-नुमापकानां सामाजिकानामनुमानाभासोत्पत्तेः कथं सप्रकाशानन्दचमत्काररूपस्याविर्भावः अनुमानकारण-कत्वाङ्गीकारे तु रसस्य कार्यत्वप्रसङ्गोऽस्त्विति चेन्न, अग्रे निराकरिष्यमाणत्वात्।

न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्यते अपि तु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यते इति भट्टनायकः।

बालचित्तानुरञ्जनी—अस्मिन्नपि पक्षे अरुचेः भट्टनायकमतमवतारयति **न ताटस्थ्येनेत्यायादिना**। भट्टनायकः अनुमितिपक्षं विकल्पपूर्वकं दूषयति **न ताटस्थ्येनेति**। अयमभिप्रायः। रसस्य प्रतीतिः परगतत्वेन स्वगतत्वेन वा ?। नाद्यः, स्वरसनीयत्वाभावेन सर्वदा रसस्य नटे रसोऽस्तीत्येवकारेण तटस्थत्वप्रसङ्गात्। न द्वितीयः, अनुमीयमानत्वचर्व्यमाणत्वयोर्विरोधात्। करुणे दुःखित्वप्रसङ्गेन तत्र प्रवृत्त्यभावप्रसङ्गाद्वेति स एवोत्पत्तिपक्षं दूषयति **नोत्पद्यत इति**। दण्डचक्रादीनां निवृत्तौ घटादिवत् विभावादिकारणानां निवृत्ता-वपि रसस्यावस्थानप्रसङ्गात्। परगतत्वेन स्वगतत्वेन वेत्यादि उक्तदूषणप्रसङ्गान्नेति भावः।

वक्ष्यमाणमभिव्यक्तमपि दूषयति **नापि व्यज्यत इति** । सर्वेषामभिव्यक्तिप्रसङ्गेन भावकानामेवाभिव्यक्तिरिति नियमाभावप्रसङ्गात् शृङ्गारस्य पूर्वमसिद्धत्वात् परगतस्वगतेत्याद्युक्तदूषणप्रसङ्गाच्चेति भावः ।

एवमनुमित्युत्पत्त्यभिव्यक्तिपक्षं दूषयित्वा भट्टनायकः स्वसिद्धान्तमाह **अपित्विति** । दोषाभावगुणालङ्कारमये काव्ये चतुर्विधाभिनयरूपे नाट्ये च काव्यरूपस्य शब्दस्याभिधा भावना तद्भोगीकृतिरिति त्रयो व्यापाराः अभिधानं कर्तृ वाक्यभूतशब्दार्थालङ्कारादिविषयं, भावकत्वं शृङ्गारादिरसादिविषयं, भोजकत्वं सहृदयविषयमिति विवेकः । अभिधातः अभिधानकर्तृत्वव्यापारात् द्वितीयो भावकत्वव्यापारः नटं प्रेक्षकांश्च प्रति विभावादीनां साधारणकरणः साधारणीकृत आत्मा विभावादयो येन एवंविधेन भावकत्वव्यापारेण भाव्यमानो भावितः साधारण्येनानुसंधीयमानः स्थायी रसः । भोगेन भोजकत्वव्यापारेणानुभवस्मृतिविलक्षणेन भुज्यते चर्व्यते ।

सारबोधिनी—मतान्तरमाह **न ताटस्थ्येनेति** । अयं भाव्यभावकपक्षोऽत्र भाव्यो रत्यादिर्भावको विभावादिः । तथा च विभावादिभिर्भाव्यमानो रामादिगतरत्यादिः सामाजिकसाक्षात्कारविषयो रस इति निर्गलितोऽर्थः । अत्र प्रत्यासन्नास्त्रयः । रामादिर्नटः सामाजिकश्चेति । तत्र किंगतत्वेन रसः प्रतीयताम् ? तत्राद्यद्वयगतत्वं निरस्यति **न ताटस्थ्येनेति** । स्वसंबन्धबहिर्भावेनेत्यर्थः । तथाभावेऽरसत्वापत्तेः । तदुक्तम्

पारमित्याल्लौकिकत्वात् सान्तरायतया तथा ।
अनुकार्य्यस्य रत्यादेरुद्बोधो न रसी भवेत् ॥ सा० द० ३. १७-१८

पारमित्यादसाधारण्यात् । सान्तरायतया सव्यवधानतया, तेन न रामादिगतो रसः । तथा शिक्षाभ्यासादिमात्रेण राघवादिस्वरूपतां दर्शयन् नर्तको नैव रसस्यास्वादको भवेत् । तेन नटगतोऽपि न रसः । किन्तु सामाजिकगत एव । यदि नटोऽपि रसास्वादको भवेत्[११] तदा सोऽपि सामाजिक एव । अत एव ग्रन्थकृता रत्यादेः साधारण्यं रसोद्बोधहेतुरिति वक्ष्यते । अत एव रत्यादेरात्मगतत्वेन प्रतीतावपि न रसत्वम् । सभ्यानां व्रीडातङ्कादिप्रसङ्गात् । किन्तु साधारण्येन प्रतीतावेवेत्याह **नात्मगतत्वेनेति** ।

केचित्तु नात्मगतत्वेनेति रामादिगतरत्यादीनां तथा प्रतीतौ भ्रमत्वं स्यात् । आस्वादस्य प्रमात्वाव्यभिचारात् । तर्हि सामाजिकरत्यादिरेव तथास्त्वित्यत आह **नोत्पद्यत इति** । प्रागसिद्धेः । तर्हि विभावादिभ्यः किं स्यादिति । तदाह **काव्य इत्यादि** । विभावादिभिर्व्यज्यमान इति संबन्धः । व्यापारमाह **भावकत्वेति** । **अभिधात** इत्युपलक्षणम् । लक्षणात इत्यपि बोध्यम् । साधारणीकरणं नियतसंबन्धिगतत्वेनाप्रत्यायने सति प्रत्यायनम् । भाव्यमानो मुहुर्मुहुश्चिन्त्यमानः । तेन भावनोपनीतो रामादिरत्यादिः सामाजिकमनसि घ्राणोपनीतं सौरभ्यमिव चक्षुषि स्थायी भोगेन साक्षात्कारेण भुज्यते विषयीक्रियते । यथा कामिनोभावनानन्तरं तत्साक्षात्कारः, यथा वा निदिध्यासादिना आत्मसाक्षात्कारः । भोगस्वरूपमाह **सत्त्वेति** । रजस्तमोऽभिभवेन प्रादुर्भाव उद्रेकस्तेन प्रकाशते प्रादुर्भवति या आनन्दमयी संवित् तत्र विश्रान्तिर्विगलितवेद्यान्तरत्वेन स्थितिर्यस्य एवंभूतं सतत्त्वं स्वरूपं यस्य, गोत्रे सगोत्रवत्; तत्त्वसतत्त्वयोः पर्यायत्वात् । तत् स्वरूपेणेत्यर्थः । भावनोपनीतरामादिरत्यादिश्चिदानन्दस्वरूपसाक्षात्कारविषयो रस इति पर्यवसितोऽर्थः । "विश्रान्ति-

गतत्वेन'' इति पाठे गमिर्ज्ञानार्थो भावे निष्ठा। गतत्वं ज्ञानत्वम्। संवित्तौ विश्रान्तिर्यस्येति बहुव्रीहिः। तदेकात्मनेति पर्यवसितोऽर्थः।

केचित्तु अभिधा भावकत्वं भोगश्चेति त्रयो व्यापाराः शब्दस्य। तैः रसस्याभिव्यक्तिरित्यर्थमाहुः। अयमपि पक्षो न साधुः। साक्षात्कारस्य तथाविधत्वकल्पने मानाभावात्। न च व्यञ्जनास्थाने तथाविध भोग एव कश्चिद्व्यापारः कल्पनीय इति वाच्यम्। तथापि भावकत्वरूपव्यापारान्तरकल्पनस्यैव दोषत्वात्।

काव्यप्रकाशदर्पणः—ताटस्थ्येन औदासीन्येन रसः न प्रतीयते, तथा सत्यरसनीयत्वापत्तेः। नानुगतत्वेन, सभ्यानां व्रीडातङ्काद्यापत्तिप्रसङ्गात्। यदि चोत्पद्यते किं सीतादिविषयत्वेन, आत्मकार्यतादिविषयत्वेन वा। आद्ये पातकित्वापातः, द्वितीये रत्यादिसद्भावप्रसङ्गः स्यात्। नाभिव्यज्यते पूर्वसिद्धत्वाभावात् दीपेन घटस्येव हि पूर्वसिद्धस्येव व्यङ्ग्यत्वम्। किन्तु काव्यं नाट्यनिष्ठेन भावकत्वाख्येन व्यापारेण भाव्यमानः सकलसभ्यनिष्ठतया संभाव्यमानः स्थायी रामादौ स्थिरतरो भोगेन भुज्यते विषयीक्रियते। कोऽसौ भावकत्वव्यापार इत्याह **अभिधात इति**। द्वितीयेनेत्युपलक्षणम् तेन यस्य मते एक एवाभिधाव्यापारस्तन्मते द्वितीयेन, यस्य द्वौ तन्मते तृतीयेन, यस्य त्रयस्तन्मते चतुर्थेनेत्यर्थः विभावादिभिः साधारणीकरणञ्च रसादिकवित्वभावुकानां भेदाभावेन प्रत्यायनं, तदेव तस्य भावकत्वव्यापारस्यात्मा स्वरूपम्। कोऽयं भोग इत्याह **सत्त्वेति**। सत्त्वोद्रेकात् रजस्तमसी अभिभूयाविर्भावात्। प्रकाशः स्पष्टतरः, यद् ज्ञानं तद् रसोद्रेकरूपाया सवित् ज्ञानं तत्र विश्रान्तिर्बाह्यप्रमेयग्रहणराहित्येन स्थैर्यं तदेव सत्त्वं स्वरूपं यस्य तथाविधेन भोगेनेत्यर्थः। ''विश्रान्तिगतत्वेन'' इति पाठे विश्रान्तिं गतः प्रमाता, तस्य भावस्तत्त्वं इति भट्टनायकाख्यस्य विवरणमित्यर्थः। अत्रानुकार्यनिष्ठस्य स्थायिनः साधारण्येन प्रतीतस्यापि रसत्वं असन्निहितस्य भोगविषयतानुपपत्तेः। भोगश्च सच्चिदानन्दस्वरूप इत्युक्तम्। रसस्य च तदेकार्थतया निरूपयिष्यमाणस्य कथं तद्विषयकत्वम्। उपचारस्तु भोगविषयताङ्गीकारे अस्माकं एव पक्षः।

लोके प्रमदादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यवहार्यैर्ममैवैते शत्रोरेवैते तटस्थस्यैवैते न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते इति सबन्धविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलितपरिमित प्रमातृभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिङ्गन् अन्यत् सर्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः।

बालचित्तानुरञ्जनी लोक इति। लोके काव्यनाट्यव्यतिरिक्तस्य प्रमदाकटाक्षभुजाक्षेपनिर्वेदादिभिः कारणकार्यसहकारिभिः लिङ्गभूतैः स्थायिनो लौकिकचित्तवृत्तिविशेषस्य रत्यादिभावस्यानुमाने व्यत्यासः पौनःपुन्येन परिशीलनं तेन पाटवं प्रज्ञातिशयः। तद्वतो सामाजिकानां वासनात्मतया स्थित इत्युपरि संबन्धः। अनेनैतदुक्तं भवति लोके प्रमदादिभिः स्थायिनमनुमिमाना एवात्र शृङ्गारादिरसे अधिकारिणः न श्रोत्रियब्रह्मचर्यादयो नास्य मण्डपान्तर्गता अपि। एवं शृङ्गारिणश्च **न शान्तरस इति।** काव्ये नाट्ये वोक्तलक्षणे तैरेव प्रमदादिभिरेव लौकिककारणत्वकार्यत्वसहकारित्वपरिहारेण लौकिककारणादिशब्दवाच्यत्वं परित्यज्येत्यर्थः। कारणादिशब्दव्यवहार्यत्वाभावे कथं व्यवहार्यत्वमित्याशङ्क्य विभावानुभावव्यभिचारिभावव्यापारत्वेन लोकविलक्षणविभावानुभावव्यभिचारिशब्दवाच्यत्वमाह **विभावनादीति।** ननु विभावादीनां प्रतिनियतत्वेन किमसाधारण्येनेत्याह **साधारण्येनेति। ममैवैत इत्यादिना** तत्परिहारमभिनीय दर्शयति। **न ममैवैत इत्यादिना** एवंविधैः प्रमदादिभिरभिव्यक्तः सामाजिकानां प्रेक्षकाणां रत्याद्यनुभवेन यः वासना संस्कार तदात्मतया स्थितया (?) पूर्वमनभिव्यक्तत्वेन स्थित इत्यर्थः। एवंविधः स्थायी रत्यादिको भावः शृङ्गारादिको रस इति संबन्धः इत्युच्यत इति शेषः।

कीदृशो रस इत्यपेक्षायामाह प्रमात्रा साधारण्येन साधारणतया गोचरीकृतो विषयीकृतः, ननु रसस्यानियतपुरुषत्वे नित्यत्वेन कथं साधारण्यमत आह **नियतप्रमातृगतत्वेनेत्यादिना।** विभावादयः साधारणोपायाः तत्सामर्थ्यात् तस्मिन् काले विभावाद्यनुभावकाले विगलितायाः प्रतिनियतप्रमातृताया वशादुन्मिषितः स्फुरितः वेद्यान्तरसम्पर्कशून्यः, अपरिमितो भावश्चित्तवृत्तिविशेषो यस्य प्रमातुः तेन प्रमात्रा साधारणविभावनादिव्यापारवत्त्वात् विभावादीनां साधारण्यं तद्बलात् प्रमातुरपि साधारण्यं तेन च रसस्यापि साधारण्यमिति भावः। न केवलं रसस्य साधारण्यं युक्तिसिद्धं, किन्तु सर्वानुसिद्धमित्यभिप्रेत्य साधारण्येनेत्येतद्विशिनष्टि **सकलेति।** विषयविषयिभावस्य भेदगर्भत्वात् प्रमात्रात्मभूतस्य रसस्य कथं विषयीकरणमत आह **स्वाकार इति।** स्वाकारः प्रमात्राकारः यथा स्वाकारः प्रमाता स्वात्मानमहं जानामीति ज्ञेयरूपतया गोचरीक्रियते तद्वदित्यर्थः। अलौकिकरससद्भावे प्रमाणमाह **चर्व्यमाणतेति।** चर्वणानन्तरकाले न तिष्ठतीत्यर्थः। अत एवाह **विभावादिजीवितावधिरिति।** विभावादिव्यञ्जकाभावे व्यङ्ग्यस्य रसस्याप्यभाव इत्यर्थः। लौकिक व्यङ्ग्यव्यञ्जकवत् विभावादेः रसस्य च भेदः। न प्रतीयत इत्यत आह **पानकेति।** यथा गुडादिनिर्मिते पानके अनेकरससद्भावेऽपि न पृथक् प्रतीतिस्तथेत्यर्थः। रसस्य लोकोत्तरकार्यस्यास्वाद्यत्वमाह **अलौकिकेति।** तदेव दर्शयति **पुर इव परिस्फुरन्नित्यादिना। सर्वाङ्गीणमिति।** क्रियाविशेषणं विभावाद्यन्वयव्यतिरेकबलात् रसस्योत्पत्तिरस्तु नेत्याह **न चेति।** तत्र हेतुमाह **विभावेति।** निमित्तकारणानां दण्डादीनां नाशे घटादेरिव रसस्याप्यवस्थानप्रसङ्ग इत्यर्थः, परन्तु तर्हि ज्ञाप्यः ? नेत्याह **नापीति।** अज्ञानतया स्थितो ज्ञाप्यो भवति। रसस्तु न तथेत्यर्थः। कथं तर्हि प्रतीयत इत्याह **अपि त्वित्यादिना।** प्रदीपादिव्यङ्ग्यविलक्षणत्वेन व्यञ्जित आस्वादनीयः।

सारबोधिनी—सिद्धान्तपक्षमाह लोक इत्यादि। स्थाय्यनुमान इति। तेन तादृशा एव काव्यास्वादेऽधिकारिण इत्युक्तम्। न तु श्रोत्रियादयः। तादृशामेव रत्यादिभिः सह विभावादीनां कार्यकारणभावा

त्वधारणाभ्यासात्। अन्यथा कथमगृहीतसंबन्धेभ्यस्तेभ्यः स्थाय्यभिव्यक्तिः स्यादिति । व्यक्तः अभिव्यक्तानन्दांशचिदात्मना सहेति शेषः। विभावादिव्यपदेशे हेतुमाह **विभावनादीति**। विभावनानुभावनासञ्चारणाख्यास्त्रयो व्यापारास्तेषां च फलमीपत् प्रकाशः स्फुटतरप्रकाशः स्फुटतमप्रकाशः इति।

ननु कारणादिशब्दसत्त्वे कथं विभावादिशब्दा इत्यत आह **कारणत्वादीति**। [१२]सामाजिकनिष्ठरत्यादीनां न ते कारणादयो येन तथा स्युः। ननु काव्यादौ रामादिसंबन्धित्वेनावगतेभ्यः सीतादिभ्यः कथं सामाजिकरत्युद्बोधोऽसम्बन्धादित्यत आह **साधारण्येनेति** । काव्यनाट्यश्रवणमहिम्ना स्वस्य रामादिना भेदाग्रहे सति उभयसंबन्धित्वेन प्रतीतिः संबन्धिविशेषनिष्ठत्वेनाप्रतीतौ प्रतीतौ वा साधारण्येन प्रतीतिर्जायत इति नोक्तदोषः। ननु कथं तथापि सीतात्वादिज्ञाने सामाजिकनिष्ठरत्युद्बोध इति चेन्मैवम् परिहृतविशेषत्वात्। तथाहि—काव्योपात्ताः सीतादयः परिहृतजनकतनयात्वादिविशेषाः कामिनीमात्ररूपाः शब्देनाभिनयेन वा प्रतीयमाना विभावादितां प्राप्नुवन्ति । तदुक्तं भरतेन—"एता एव परिहृतविशेषा रसहेतव" इति । अयं विशेषपरित्यागो वाक्यार्थबोधकाले। ततो रसोद्बोध इति प्रागुक्तम्। साधारण्यप्रतीतिः किं स्वरूपेत्याह **ममैवेत्यादि**। संबन्धिविशेषस्वीकारनियमः प्रथमत्रये। परिहारनियमः उत्तरत्रये। अनध्यवसायात् अज्ञानादित्यर्थः। आत्मा प्रेष्ठः। शत्रुर्द्वेष्यः। उभयेतरस्तटस्थः उदासीनः। वर्णनीयस्य त्रैविध्यात् त्रिविधोपादानम्। मित्रस्य स्वपक्षनिक्षेपात् प्रागसिद्धौ कथं तस्याभिव्यक्तिरित्यत आह **वासनात्मतयेति**। स्थितः स्थिरतामापन्नः। तेनाङ्गतां बाध्यतां वा प्राप्तस्य रत्यादेर्न रसत्वं. किन्तु सञ्चारित्वम्। नन्वेवं विभावादीनां साधारण्येन यावद्ग्रहणं न भवति तावद्विभावादित्वमेव न भवतीत्युक्तम्, विभावादीनां साधारण्यं रत्यादिभावस्य तु स्वसंबन्धित्वेनैव ग्रहणात् कथं साधारण्यं कथञ्च तदा पारमित्ये रसतापत्तिः। एतदेव प्रागुक्तम्—"पारमित्याल्लौकिकत्वात्" इति । अत आह **नियतेत्यादि**। नियतः प्रमाता सामाजिकः। **साधारण्योपायबलादिति** । विभावादिसाधारण्येनेत्यर्थः। **परिमितेति**। परिमितप्रमातृता प्रमातृविशेषनिष्ठत्वम् । तस्य विगलनमग्रहः, तद्वशेनोन्मिषित उद्बुद्धो वेद्यान्तरसम्पर्कशून्योऽपरिमितो रत्यादिर्भावो यस्य तेन प्रमात्रेत्यन्वयः। अपरिमित्य साधारण्यम्। प्रमातृनिष्ठत्वेनाग्रहे सति गृह्यमाणत्वम्। भावो वर्णनीयस्तन्मयीभवनयोग्यः। **साधारण्येनेति** । प्रमातृविशेषसंबन्धाग्रहरूपेणेत्यर्थः। रत्यादेः साधारण्येन ग्रहश्चेन्न तदा स्वगतत्वेन सीताद्यालम्बनकरत्यादिप्रतीतौ सभ्यानां व्रीडातङ्कादिः स्यात्। परगतत्वेऽरस्यतापात इति। **अभिन्नोऽपीति**। अन्तःकरणावच्छिन्नस्य चैतन्यस्य प्रमातृत्वात् रत्याद्यवच्छिन्नस्य तस्य रसत्वात् चैतन्यांशमादाय अभिन्न इत्यर्थः। **स्वाकार इवेति** वादिमतेनेदं ज्ञानस्य तदाकारस्य विषयस्य चाभेदेऽपि यथा विषयविषयिभावस्तद्वदिहेत्यर्थः। **स्वस्य** ज्ञानस्याकारो विषयः। अभिन्नो ज्ञानस्वरूपत्वात् **चर्व्यमाणतेति**। प्रागेव व्याख्यातम्। इदानीं रसोद्बोधस्वरूपमाह **पुर इवेत्यादि**। यद्वा अलौकिकचमत्कारो नापह्नोतुं शक्य इत्यपेक्षायामाह **पुर इवेत्यादि** । **सर्वाङ्गीणमिति**। सर्वाङ्गव्यापनं यथा स्यात्। **ब्रह्मास्वादमिवेति**। मुक्तिदशायां ब्रह्ममात्रं प्रकाशते। रसे तु विभावादिसंभेदोऽपीति। भेदे ब्रह्मानन्दमिवेति दृष्टान्तदार्ष्टान्तिकभावः। "पुर इवे"त्यादि "अनुभावयन्" इत्यन्तं सर्वमलौकिकत्वप्रतिपादनाय। तदाह **अलौकिकेति**। अलौकिको लौकिकदर्शनादनुद्बुद्धः। **चमत्कारो** विस्मयः। अत एवोक्तम् [धर्मदत्तेन]—

"रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते।
तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः"॥ सा० द० तृ० प०

काव्यप्रकाशदर्पणः—संप्रति 'लोक' इत्यादिना 'इत्याचार्याभिनवगुप्तपादाः' इत्यन्तेन ग्रन्थेन तन्मतमुपन्यस्यते ग्रन्थकारेण। तेषु गौरवप्रकटनेन तन्मतस्यैवात्मनोऽभिमतत्वमुपदर्शितम्। ग्रन्थार्थस्तु—

लोके न तु नाट्यकाव्ययोः स्थायिनोऽनादिवासनान्तर्लीनरत्यादेरुत्पत्तेरनुमानेऽभ्यासस्य पाटवमुत्कर्षः। तद्वतां न तु व्याप्त्याद्यनुसंधानविलम्बितानां सामाजिकानां स्थायी रत्यादिकः। तैः प्रमदादिभिरेव कारणकार्यसहकारिपदवाच्यतापरित्यागेन पूर्वोक्तालौकिकविभावनादिव्यापारवत्वात्। न तु पर्यायान्तरवाच्यत्वमात्रेण लौकिकविभावादिशब्दव्यवहार्यैः साधारण्येन प्रतीतैरभिव्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतः। पानकरसन्यायेन यथा पानके खण्डमरिचकर्पूरादीनां रसो मिलितानामुपपद्यास्वाद्यते तथा संवलितविभावादिसुखचमत्कारात्मकः। स चर्व्यमाणः आस्वाद्यमानः शृङ्गारादिको रस इति संबन्धः। साधारण्यं प्रतीतिस्वरूपं दर्शयति **ममैवेत इत्यादि**। प्रतिनियतपुरुषगतत्वेन योऽसौ यस्य विशेपस्तस्य स एवैत इत्यादिरूपेण स्वीकारस्य न ममैवैत इत्यादिरूपेण परिहारस्य च यो नियमस्तस्यानध्यवसायापादनिश्चयात्। अत्र स्थायी रत्यादिक इति च स्थायिनां व्यभिचारित्वप्रकटनार्थम्। तदुक्तम्—

"रसावस्थः परं भावः स्थायितां प्रतिपद्यते" इति। यद्यपि

किमाकारः ? स चर्व्यमाण इत्याह **नियतेति**।

"सवासनानां सभ्यानां रसस्यास्वादनं भवेत्।
निर्वासनास्तु रङ्गातः काष्ठकुड्यात्मसंन्निभा"॥

इत्युक्तदिशा रसान्तरेषु बहुष्वपि विद्यमानेषु नियतः सवासनो यः प्रमाता तन्मात्रगतोऽपि न तु श्रोत्रियजरन्मीमांसकादिनिष्ठसाधारणतेति उपायानां विभावादीनां पूर्वोक्तप्रकारसाधारण्यप्रतीतिप्रभावात्। **तत्कालेति**। वेद्यान्तरेणानवच्छिन्नप्रवाहः।

इहास्मत्पितामहानुजकविपण्डितमुख्य श्रीचण्डिदासपादैरुक्तं परमार्थतस्त्वखण्डएवायं रसो वेदान्तप्रसिद्धब्रह्मतत्त्ववद्वेदितव्य इति।

यद्यपि चर्वण आस्वादनम्। तच्च स्वादः काव्यार्थसंभेदात्मानन्दसमुद्भव इत्युक्तनयेन रसास्वादनातिरिक्तः तथापि चर्व्यमाणो रस इति काल्पनिकं भेदमुररीकृत्य कर्मकर्तरि वा प्रयोगः। पर इवेत्याद्युत्प्रेक्षणेनचालौकिकानन्दरूपत्वं सूचितम्। **अलौकिकेति**। चमत्कारश्चित्तविस्तारैर्विषयापरपर्यायैः तद्रूपः। तस्य च पश्चाद्वचनेन सकलरसप्राणत्वम्। यदाहुः—

"त्रिकलिङ्गभूमण्डलाखण्डलमहाराजाधिराज श्रीनरसिंहदेवसभायां धर्मदत्तं स्थगयतः सकलसहृदयगोष्ठीगरिष्ठास्मत्स्वपितामह श्रीमन्नारायणदासपादाश्चमत्कार एव सकलरसप्राणभूतः तस्य रागाद्यंशशबलत्वे यथायथं शृङ्गारादिव्यपदेशः। तदभावेत्वद्भुतव्यपदेश इति कविभिःकाल्पनिकं भेदमुररीकृत्योक्तम्।

स च न कार्यः विभावादिविनाशेऽपि तस्य संभवप्रसङ्गात्। नापि ज्ञाप्यः सिद्धस्य तस्यासंभवात् अपि तु विभावादिभिर्व्यञ्जितश्चर्वणीयः। कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत् न क्वचिदृष्टमित्यलौकिकसिद्धेर्भूषणमेतन्न किंचि-

दूषणम् । चर्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्योऽप्युच्यताम् । लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोधशालिमितयोगिज्ञानवेद्यान्तरसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोऽप्यभिधीयताम् ।

बालचित्तानुरञ्जनी—ननु कारकव्यतिरिक्तहेत्वभावादेतदसङ्गत मित्याशङ्क्य तस्यैव लौकिकत्वमुच्यत इति न किञ्चिद्दूषणमित्याह **कारकेत्यादिना** । एवं तर्हि रस उत्पद्यत इति व्यवहारविरोध इत्याशङ्क्य भाक्तो व्यवहार इत्याह **चर्वणानिष्पत्त्येत्यादि** । तर्हि रसः प्रतीयत इति व्यवहारविरोध इत्याशङ्कायामपि व्यवहारो भाक्त इत्याह **लौकिकेत्यादिना** । विलक्षणशब्दः प्रत्येकमभिसंबध्यते । लौकिकप्रत्यक्षादिप्रमाणविलक्षणताटस्थ्यावबोधशालिमितयोगिज्ञानविलक्षणवेद्यान्तरसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदनविलक्षणं यस्य संवेदनं तद्गोचर इति । उपचारात् प्रत्येयः । ज्ञेयोऽप्यभिधीयताम् । लौकिकेति विशेषणं न प्रत्यक्षादिप्रमाणात् गुणालङ्कारादिमण्डितव्यञ्जकव्यङ्ग्यत्वेनालौकिकस्य रसस्य वैलक्षण्यमुक्तम् । अवबुध्यत इत्यनेनेत्यवबोधः । प्रमाणं नाटस्थ्येन तदद्वैतरूपेणावबोधजगद्ग्राहकं प्रमाणमित्यर्थः । तेन शालि यन्मितयोगिज्ञानम् । योगस्य मितत्वमद्वैतानवगाहित्वेन । ताटस्थ्यावबोधशालीत्यनेन मितयोगिज्ञानाद्रसस्य वैलक्षण्यमुक्तम् परिमितेतरयोगी अपरिमितयोगीत्यादि समुपजातब्रह्मसाक्षात्कार इत्यर्थः । तद्ध्यानं कीदृशम् ? तदात्ममात्रपर्यवसितम् । अत एव वेद्यस्य घटादेः संस्पर्शेन विषयीकरणेन रहितम् । अनेन परिमितेतरयोगिज्ञानाद्रसस्य विभावादिसंबन्धत्वात् वेद्यघटितस्य रसस्य वैलक्षण्यस्य शुद्धः [?]

सारबोधिनी—ननु मुनिसूत्रे विभावादिसंयोगादिति पञ्चम्या विभावादीनां हेतुत्वमुक्तम् । तत्त्वं च कारकत्वं ज्ञापकत्वं वा तत्तेषां संभवति । रसस्य कार्यत्वे ज्ञाप्यत्वे वा तत् किं रसः कार्यो ज्ञाप्यो वा ? इत्यत आह **स चेति** । तत्र हेतुमाह **विभावादीति** । विभावादीनां विभावादिज्ञानानां समवाय्यसमवायिकारणत्वाभावान्निमित्तकारणत्वं वाच्यम् । तथा च तन्नाशे रसप्रतीतिर्न स्यादित्यर्थः । वस्तुतो नैवम् । विभावादौ भासमानस्यैव रत्युद्बोधस्य रसत्वाभ्युपगमात् । व्यङ्ग्यत्वपक्षे यावद् व्यञ्जकं व्यङ्ग्योपलंभात् । द्वित्वादेस्तु जातित्वाङ्गीकारात् तत्र निमित्तकारणनाशनाश्यत्वं नास्तीत्यवधेयम् ।

अन्ये तु—विभावादिनाशे विभावादिज्ञानध्वंससंभवेऽपि तत्सत्त्वं स्यात्, ज्ञानस्य पूर्ववर्तित्वेनैव ज्ञानान्तरे कारणत्वात् । तत्सत्त्व एव तत्सत्त्वस्य पानकरसन्यायेनेत्यनेन दर्शितत्वात् इत्याहुः ।

वस्तुतो रत्याद्यवच्छिन्नं चैतन्यं रस इत्युक्तम् । तस्य स्वप्नेऽपि कार्यत्वं नास्तीति तत्त्वम् । **नापि ज्ञाप्य इति** । तत्र हेतुमाह **सिद्धस्येति** । अयं भावः । लोके पूर्वसिद्धा एव घटादयः प्रदीपादिभिर्व्यज्यन्ते । नैवं रसे । यतो विभावादिज्ञानजनिताभिव्यक्तिविषयीभूतस्य रत्यादेः रसत्वेन स कथं विभावादिभिर्ज्ञाप्यः स्यात् इति ।

यद्वा—नापि ज्ञाप्य इत्यस्य नापि फलव्याप्य इत्यर्थः । फलव्याप्यत्वं तु भग्नावरणचित् संबन्धित्वम् । तत्तु घटादौ, न तु चित्स्वरूपे रसे, स्वस्मिन् संबन्धाभावात्, भेद एव तत्सत्त्वात् । **सिद्धस्येति** । प्रमाणान्तर-

सिद्धस्येत्यर्थः। तस्य रसस्य चैतन्यरूपस्य स्वप्रकाशत्वेन प्रमाणान्तरसिद्धत्वं नास्तीत्यर्थः। **तथा च फल**-व्याप्यत्वं प्रमाणान्तरसिद्धे घटादौ, न तु स्वप्रकाशे रसे इति भावः। तर्हि विभावादिभिः किं क्रियत इत्याह **व्यञ्जितश्चर्वणीय इति**। व्यञ्जितश्चित्स्वरूपोऽभिव्यक्तानन्दांशो भवतीत्यर्थः। ननु तर्हि कथमुत्पन्नो रस इति व्यवहार इत्यत आह **चर्वणेति**। चर्वणाविशिष्टस्यैव रसत्वेन विशेषणस्योत्पन्नतया उत्पत्तिव्यवहार इत्यर्थः। नन्वेवमपि ज्ञाप्यत्वव्यवहारोऽनुपपन्न इत्यत आह **लौकिकेत्यादि**। विलक्षणपदं प्रमाणसंयोगिज्ञानेऽत्यन्तसंवेदनेत्यन्तैः प्रत्येकमन्वेति। **लोकोत्तरेति**। लौकिकाद्वैलक्षण्ये हेतुः। युञ्जानयोगिकज्ञानवैलक्षण्ये हेतुमाह **ताटस्थ्येनेति**। ताटस्थ्यं भेदः। तेन योगजधर्मप्रत्यासत्त्या अतीतानागतसर्वविषयाणामवबोधः। प्रकाशनं प्रकाशता। तच्छालिस्ववासनमिथ्याज्ञानस्य सम्यगनुच्छेदात्तेषां भेदावभासत्वात्। यद्वा—शालिपदं स्वरूपपरम्। **परिमितेति**। परिमितम् अभ्यासदशायां समाधेः कादाचित्कतया तत्समय एव प्रादुर्भूतम्। रसस्य तु विगलितवेद्यान्तरत्वेन युञ्जानयोगिज्ञानाद्वैलक्षण्यम्।

युक्तयोगिज्ञानाद्वैलक्षण्यमाह **स्वात्मेति**। शोभन आत्मेत्यर्थः। उच्छिन्नसवासनमिथ्याज्ञानत्वेन तस्य तथात्वम्। तन्मात्रपर्यवसितम्। तन्मात्रग्राहि तत् ततो वैलक्षण्यम् रसस्य रत्यादेरपि विषयीकरणात्। **परिमितेतरेति**। समाधिदार्ढ्येन सदातनत्वात् पारमित्यविरहः। कादाचित्कोद्रेकस्य परिमितत्वात्। संवेदनं सम्यग्वेदनम्। विनाशितसर्ववासनम्। अतोऽपि ततो वैलक्षण्यं, रसस्य रत्यादिवासनाघटितत्वात्। एवं ज्ञानं दृष्टमित्यपेक्षायामाह **लोकोत्तरेति**। तथा च विभावादिभिरभिव्यक्तानन्दांशस्वरूपतया स्वयंप्रकाशत्वेन ज्ञाप्यत्वव्यवहार इत्यर्थः। **विभावादिपरामर्शप्रधानत्वादिति**[13]। तदन्वयव्यतिरेकानुविधायित्वादित्यर्थः।

तद्ग्राहकं च न निर्विकल्पकं विभावादिपरामर्शप्रधानत्वात्। नापि सविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसंवेदनसिद्धत्वात्। उभयाभावरूपस्यचोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः।

बालचित्तानुरञ्जनी—ननु तद्ग्राहकं निर्विकल्पकमेवास्तु। तथा च व्यवहारो मुख्यः स्यादित्यत आह **तद्ग्राहकमिति**। विभावादिविशिष्टज्ञानजनकत्वेन तन्न निर्विकल्पकमित्यर्थः। अस्तु तर्हि सविकल्पकः। नेत्याह **नापीति**। अलौकिकानन्दमयस्य ब्रह्मस्वरूपस्य रसस्य स्वयंप्रकाशत्वेन तद्ग्राहकं सविकल्पकं न भवतीति भावः।

ननु रसस्य निर्विकल्पकसविकल्पकग्राह्यत्वाभावे इतरनिषेधस्येतरविधनान्तरीयकत्वन्यायेन निर्विकल्पकसविकल्पकग्राह्यत्वं विकटत्वमापद्येतेत्यत आह **उभयाभावरूपस्य चेत्यादि**। आपद्यमानमनुभयात्मकत्वमपि लोकोत्तरतां स्वयंप्रकाशरूपतामवगमयति। यदि कोटिद्वयमेव स्यात् विरोधस्तर्हि स्यात्। न चात्र तथा, स्वयंप्रकाशरूपायास्तृतीयकोटेरङ्गीकारादिति भावः।

अथवा, "न कार्यं" इत्यादिनोत्पत्त्यभिव्यक्तिनिषेधे आभ्यन्तरनिषेधन्यायेनोत्पत्त्यभिव्यक्तिरूपं विरुद्धमापद्येतेत्यत आह **उभयाभावरूपस्य चेत्यादि**। आचार्यग्रहणेन बहुवचनेन चायमेव पक्षः सिद्धान्त इति सूचितम्।

सारबोधिनी—निर्विकल्पकस्य ज्ञानान्तरस्यापेक्षत्वाभावान्न निर्विकल्पकमित्यर्थः। नापि सविकल्प

इति। विकल्पो विशिष्टज्ञानं, धर्मिग्राहकमानेन समूहालम्बनत्वेन सिद्धस्य रसावबोधस्य विभावादिविषयाणां परस्परसंबन्धाग्रहान्न सविकल्पकमित्यर्थः ।

ननु[१४] तथापि चैतन्यांशे सविकल्पकमस्त्वित्यत आह **स्वसंवेदनसिद्धत्वादिति**। स्वप्रकाशत्वादिति भावः । तत्त्वं तु स्वव्यवहारे संविदन्तरानपेक्षत्वम् ।

ननु तर्हि कथं वृत्तिव्याप्यत्वमिति चेत् आवरणभङ्गार्थमित्यवेहि। तथा च तत्त्वमसीत्यत्रैव संबन्धाग्राहिण्यपि वृत्तिरावरणभञ्जिकेति स्मर्तव्यम्। **उभयेति**। उभयपदेन निर्विकल्पकत्वसविकल्पकत्वाभिधानम्। सर्वनाम्नो विवक्षितवाचित्वात् निर्विकल्पकत्वाभावः। सविकल्पकमभावस्याधिकरणरूपत्वात् तथा सविकल्पकत्वाभावो निर्विकल्पकत्वम्। अत एवाभावस्याधिकरणत्वरूपत्वस्फोरणाय उभयरूपत्वमित्यत्र रूपपदप्रयोगः।

वस्तुतस्तु, याभ्यां हेतुभ्यामुभयाभावरूपत्वं ताभ्यामेव क्रमेण सविकल्पकत्वं निर्विकल्पकत्वञ्च। तथा च कञ्चिद्धर्मं पुरस्कृत्योभयाभावरूपत्वं लोक एव न दृष्टचरम्। न च रसस्तथा येन विरोधः स्यादित्याह **लोकोत्तरतामेवेति**। पूर्ववत् कारकत्वज्ञापकत्ववत्। केचित्तु नापि विकल्प इति स्वभिन्न इति शेष इत्याहुः। अभिनवगोपानसीगुप्तपादा इति। अस्य बालवलभीभुजङ्ग इति नाम। तदेव भङ्ग्यन्तरेणोक्तम्। यथा तौतातिता इति प्राञ्चः।

अत्रायं परिच्छेदः। काव्योपनिबन्धनमहिम्ना परिहृतसीतात्वादिविशेषैः साधारण्येन प्रतीतैर्विभावादिभिर्व्यञ्जितं वर्णनीयसाधारण्येन गृहीतसामाजिकरत्याद्यवच्छिन्नमात्मचैतन्यमानन्दांशे भग्नावरणमानन्दरूपतया प्रकाशमानं विभावादिसंभिन्नं रस इति। अत्र सीतादीनां विशेषपरिहारग्रहस्य साधारण्येन विना न कदाचिदपि विभावादित्वम्। तथा रत्यादिभावस्यापि साधारण्यग्रहं विना रत्युद्बोधस्य स्वप्नेऽपि न रसत्वमिति च न विस्मर्तव्यम्। अपि च तत्त्वमस्यादिवाक्यव्यवच्छेदेनार्थेन च विभावनादिव्यापारमहिम्ना रसाभिव्यक्तिः साक्षात्काररूपैव जायते तेन रससाक्षात्कार इति व्यवहारः "यत्साक्षात् अपरोक्षात् ब्रह्म" इति श्रुतेः। चैतन्यांशे साक्षात्वाच्च।

प्रयत्नतः प्रकटिता मया रसनिरूपणे।
गम्भीरा युक्तिसरसीसरसीकुरुते न कम्? ।।

काव्यप्रकाशदर्पणः-तद्ग्राहकमिति। सरस एव ग्राहकं ज्ञानम्। तच्च निर्विकल्पक इन्द्रियस्यातन्मात्राज्जात्यादिवैशिष्ट्यशून्यं स्वलक्षणावभासः। तद्धि इन्द्रियसंबद्धमात्रग्राहि रसस्तु असन्निहितानामपि परिभावादीनां यत् परामर्शनमनुसन्धानं तत्प्रधानं इति भावः। **नापीति**। विकल्पो विशेषज्ञानम्। चर्व्यमाणस्य चर्वणामात्रप्राणस्य स्वसंवेदनं स्वानुभवस्तत्सिद्धात्। अपरिस्फुटविभावादिप्रकाशतयेति शेषः। न खलु रसप्रतीतिकाले विभावाद्याकाराणां स्फुटोऽवभासः। उभयात्मकं निर्विकल्पकत्वाभावात्। निर्विकल्पकमुपचर्य्यतामिति भावः। पूर्ववदकार्य्यत्वात् ज्ञाप्यत्ववत् काव्यार्थतत्त्वज्ञानसंपत्तिः। श्रीः तद्योगात् श्रीमत्वम्। संप्रदायप्रवर्तकत्वादाचार्यत्वम्। पादा इत्यनेन गुरुगौरवसूचनम्। एतेन विभावादिसंभिन्नानुरक्ता आद्यु रत्याद्यंशकतडित्प्रकाशानन्दचमत्कारस्वरूपत्वं रसस्योक्तं भवति।

व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणाम्, अश्रुपातादयोऽनुभावाः शृङ्गारस्येव करुणभयानकयोः, चिन्तादयो व्यभिचारिणः शृङ्गारस्येव वीरकरुणभयानकानामिति पृथगनैकान्तिकत्वात् सूत्रे मिलिता निर्दिष्टाः ।

बालचित्तानुरञ्जनी—ननु विभावानुभावव्यभिचारिसंयोगादस्य रसस्य निष्पत्तिरिति विशेषाभिधाने व्यभिचारात् [सूत्रे] मिलिताः संमुग्धत्वेन [स्थिताः] निर्दिष्टा इत्यर्थः । ननु समूहादमुकस्य रसस्य निष्पत्तिरिति विशेषेण किमिति नोच्यत इत्यत आह **व्याघ्रादय इति** । "इत्यादौ" इत्यनेन प्रकारेण पृथक् अमुकविभावादिसंयोगन्यायेन [संयोगस्यान्यत्र] निर्देशेऽपि ।

सारबोधिनी—अथ कः पुनरयं स्थायी । चित्तवृत्तेराशु विनाशिन्याः स्थैर्याभावादन्यस्य वक्तुमशक्यत्वादिति चेदुच्यते । आप्रबन्धं विरुद्धाविरुद्धभावैरविच्छिन्नप्रवाहश्चित्तवृत्तिसन्तानविशेष एव स्थायी । न च तस्याशु विनाशित्वेन कथं स्थायित्वमिति वाच्यम् । वासनात्मतया सूक्ष्मरूपतया वावस्थानसंभवात् । अत एवोक्तम्—

विरुद्धैरविरुद्धैर्वा भावैर्विच्छद्यते न यः ।
आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः ॥

अन्येऽप्याहुः

चिरं चित्तेऽवतिष्ठन्ते संबध्यन्तेऽनुबन्धिभिः ।
रसत्वं ये प्रपद्यन्ते प्रसिद्धाः स्थायिनोऽत्र ते ॥

चिरमिति व्यभिचारवारणाय । अनुबन्धिभिर्विभावादिभिः । तथा—

सजातीयविजातीयैरतिरस्कृतमूर्तिमान् ।
यावद्रसं वर्तमानः स्थायीभाव उदाहृतः ॥

अथ विभावः ।

बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रिताः ।
अनेन यस्मात् तेनायं विभावः परिकीर्तितः ॥
आलम्बनं स तु रसो यमालम्ब्य प्रवर्तते ।
उद्दीप्यते रसो येन स चोद्दीपनसंज्ञकः ॥

अथानुभावः ।

स्थायिभावाननुभावयन्तः कटाक्षभुजाक्षेपादयो रसपोषका अनुभावाः । अत एव भरतः—

अनुभावो विकारस्तु भावसंसूचनात्मकः । इति ।।

सात्त्विका अप्यष्टौ स्तम्भादयोऽनुभावरूपा एवेति न पृथगुक्ताः । अथ व्यभिचारिणः ।

विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ ।।

वस्तुतो विभावनानुभावनासञ्चारणात्मकव्यापारत्रयवत्त्वमेव विभावादित्वम् । येषां व्यापाराणां रत्यादेरीषत्प्रकाशः स्फुटतरप्रकाशः, स्फुटतमप्रकाशः । फलं विगलितवेद्यान्तरत्वं चमत्कारः, पुरः स्फुरणादिकञ्च । अथ भावसामान्यलक्षणम्—

भावयति वासयति इति भावो वासना । वर्णनीयतन्मयीभवनयोग्यः[१५] । तदुक्तम्—
सुखदुःखादि भिर्भावैर्भावस्तद्भावभावनम् ।

ननु विभावादिभ्यः प्रत्येकमास्वादसंभवे मुनिसूत्रे द्वन्द्वेन, भवदीयसूत्रे "व्यक्तः स तैः" इत्यत्र तैरिति बहुवचनेन च किमिति साहित्यमुक्तमित्यत आह **व्याघ्रादय इति** । पृथगेकैकम् । अनैकान्तादव्यवस्थितेः । तथाहि । एते भीरूणां भयमिव वीराणामुत्साहमपूर्वदर्शिनां विस्मयं व्यापादितबन्धूनां क्रोधं जनयन्तीति नैकैकस्मिन् व्यञ्जकत्वमित्यर्थः । एवमनुभावसञ्चारिमात्रोपनिबन्धेऽपीत्याह **अश्रुपातादय इति । चिन्तादय इति च** । शृङ्गारेऽवगतरूपादीनां भयानके भयहेतुगतचण्डत्वादीनां चिन्तया परिपोषणात् ।

काव्यप्रकाशदर्पणः—इह ये केचिद्विभावानामन्यतमेनैव निष्पत्तिः । यत्र तु त्रयाणां सद्भावस्तत्रोद्भूटतया प्रतीतस्य एतस्यैव रसनबीजता । अन्यत् स्ववर्जनीयसन्निधितयावस्थितिरिति मन्यन्ते । तान् प्रत्याह **व्याघ्रादय इति** । अयमाशयः । यदि विभावमात्रस्योपनिबन्धे रसप्रतीतिस्तदा भयानकरसस्य निष्पत्तये व्याघ्रादिमात्रस्योपनिबन्धे कथं तस्य प्रतीतिः स्यात् ? ते हि भीरूणां भयमिव धीराणामुत्साहम् अपूर्वदर्शिनां विस्मयं व्याघ्रादिभयार्थानां [?] क्रोधं जनयन्तीत्यनेकरसविभावः । एवमश्रुपातादय इत्यादि व्याख्येयम् । अतश्च विभावानां पृथक् पृथक् रसनिष्पादकत्वे अनैकान्तिकदोषापातः । तदाहुः-पक्षसपक्षविपक्षवृत्तिरनैकान्तिक इति । इह हि येन विभावेन केवलेन भयानको निर्वाह्यः तस्य पक्षे वीरादावपि संभवः विभावादीनां मिलितानां तु कारणत्वेन कश्चिद्दोष इत्यभिप्रेत्योक्तम्—"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिरिति । एवञ्च मिलिता विभावादयः प्रतिनियतमेव रसं बोधयितुमीशत इत्याशयः यत् क्वचित्तु यत्र एकस्य द्वयोर्वा सद्भावस्तत्र यद्यन्यतमाक्षेपः संभवति तदा न दोष इत्याह—

वियदलिमलिनाम्बुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः ।
धरणिरभिनवाङ्कुराङ्कटङ्का प्रणतिपरे दयिते प्रसीद मुग्धे ।।२ ।।

इत्यादौ

बालचित्तानुरञ्जनी—केवलाद्विभावात् केवलादनुभावात् केवलाद् व्यभिचारिभावात् रसनिष्पत्ति-दर्शनादित्याशङ्क्याह **वियदित्यादिना**। आकाशं भ्रमरनीलोदकगर्भमेघच्छन्नम्, एवंविधा दिशां श्रीः भ्रमर-कोकिलध्वनिभिरलङ्कृता भूमिर्नवाङ्कुचिह्नबन्धा। अतः हे मुग्धे ! दयिते प्रणतिपरे मयि प्रसीद। आकाशादय उद्दीपनविभावाः। एतैरेव केवलैः रसः प्रतीयते।

सारबोधिनी—**वियदिति**। अलिमलिनश्चासावम्बुगर्भमेघश्चेति कर्मधारयस्ततो बहुव्रीहिः। अभिनवाङ्कुर एवाङ्कः अङ्कार्थं टङ्कः पाषाणदारण इति। अङ्के इति वा सप्तम्यन्ते। पीडाजनकत्वात् टङ्कः, मुग्धे विवेकरहिते। एवमुद्दीपनोदये मानभङ्गो भविष्यत्येव किमिति दयितस्य प्रणतिमुपेक्षस इति। यतः **कोकिलेति** केषाञ्चन कोकिलानां वर्षास्वपि मदः।

काव्यप्रकाशदर्पणः—**वियदित्यादि**। मधुकराणां कोकिलानां च कूजितं तैरिति लक्षणे तृतीया। वर्षास्वपि जम्बुफलास्वादनलम्पटानां च कूजितं वर्ण्यत इति न विरोधः। अभिनवाङ्कुरा एवं प्रज्ञाविशिष्टानि येषु एवंभूताः टङ्काः पाषाणदारणप्रायकुचोरःप्रदेशा यस्याः अधररागः। अत्र प्रणतिपरो नायकः मुग्धा च परस्पर मालम्बनं वर्णितस्वरूपं गगनादिचोद्दीपनम्। एतन्मात्रसद्भावे चावहित्थवेगादीनां[१६]। रोमाञ्च स्तम्भादीनां सामर्थ्यादाक्षेपः।

परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः कथमपि परिवारप्रार्थनाभिः क्रियासु।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मीमभिनवकरिदन्तच्छेदकान्तः कपोलः ॥२८॥

इत्यादौ

बालचित्तानुरञ्जनी—नायकं प्रति दूतीवचनम्। प्रियायाः शरीरं परिमृदितबिसिनीवत् म्लानम्। अस्याः क्रियासु प्रवृत्तिः क्लेशेन परिवारप्रार्थनाभिर्भवति। अभिनवगजदन्तखण्डकान्तिभिरस्याः कपोलः पूर्णस्य चन्द्रस्य शोभां प्राप्नोति। अत्राङ्गम्लानत्वादेः केवलादनुभावात् शृङ्गाररसोत्पत्तिः।

सारबोधिनी—**परीति**। मालतीमाधवे तथाह्यस्या इत्युपक्रमे श्लोकोऽयम्। क्रियासु परिवार-प्रार्थनाभिः बह्वीभिरेका प्रवृत्तिर्यत्र कुत्रचित्। ततो विषयवैमल्यम्। अभिनवस्य करिणो यो दन्तच्छेदः। तद्दन्तस्य कोमलत्वेनाशु रक्तसंबन्धस्तेन दुग्धालक्तकमिश्रणवर्णलाभः। निष्कलङ्कस्य कलामात्रावशिष्टस्य, ततः क्षमता पाण्डुता च। अङ्गं कपोल इति च जात्यभिप्रायमेकवचनम्। कौमार्येण सर्वतः पाण्डुताविरहात् "कपोलत्वम्" इत्येकवचनमिति केचित्।[१७]

काव्यप्रकाशदर्पणः—परिमृदितेत्यादौ चानुभावैर्व्यभिचारिणो निद्राच्छेदेन निर्वेदचिन्तादयः। आलम्बनं च माधवः। उद्दीपनञ्च चतुर्गुणश्रवणादिप्रकरणसामर्थ्यादवगम्यते।

दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने किञ्चाञ्चितभ्रूलतम् ।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥२९॥

इत्यादौ च ।

बालचित्तानुरञ्जनी—कृतापराधं प्राणेश्वरं प्रति नायिकाया नानाविधं भावमाह । नायिकायाश्चक्षुः कृतापराधे पुरुषे दूरे स्थिते सति उत्सुकम् । अनेनौत्सुक्यमुक्तम् । समीपमागते सति विवृतम् । अनेन व्रीडा । आगत्य संभाषणं कुर्वति विस्फारितं विकसितम् । अनेन हर्षः सूचितः । आलिङ्गनं कुर्वति सत्यरुणम् । अनेन कोपः । गृहीतवस्त्रे सति अञ्चितभ्रूलतम् । अनेनासूया । पादयोः प्रणिपातं कुर्वति बाष्पाम्बु तु पूर्णेक्षणम् । अनेन प्रसादः । एवं प्रपञ्चनिपुणं जातम् । अत्रौत्सुक्यादेः केवलात् व्यभिचारिणः सकाशाद्रसनिष्पत्तिः ।

सारबोधिनी—दूरादित्यादि । इतोऽन्यत्र वा यातीति शङ्कात् औत्सुक्यम् । दूरतो दर्शनेन ममौत्सुक्यमनेनावगतमिति लज्जया विवलितं तिर्यक्कृतम् । संभाषिणि सम्यक् भाषिणि अपूर्वालापेन हर्षोदयान्नयनविस्फारः । संश्लिष्यति संपर्काकाङ्क्षया सांनिध्यं गच्छति मामप्रसाद्यैव स्पर्शमिच्छतीति कोपादरुणम् । क्रोधात् सविधं परित्यज्य स्थानान्तरं गच्छन्त्या अञ्चलग्रहणम् । किञ्चिदित्यर्थे किञ्चेति । वस्तुतः समुच्चयार्थकमेव आरुण्ये सत्यञ्चलग्रहणेनाधिक्यात् । ततः कोपप्रकर्षोऽसूया । चरणानतिश्चरणशिरः संयोगः तेन व्यतिकरः संपर्को यस्य । ततश्च मानभङ्गात् प्रसादस्तदनुभावश्च ।

यद्यपि प्रसादो न व्यभिचारित्वेन गणितस्तथापि "मनः प्रसादो हर्षः स्यात्" इत्यादिना हर्षनिर्वचनाद्धर्षविशेष एव प्रसादो यस्मिन् सति प्रसादपात्रस्यापराधाः समूलं गच्छन्त्येव । प्रपञ्चः प्रकारवैचित्र्यम् ।

काव्यप्रकाशदर्पणः—दूरादिति । चरणानतिव्यतिकरः संपर्को यस्येति समासः । प्रपञ्चो नानाविधता । अत्रोक्तरूपमौत्सुक्यं विवलनादिभिश्चानुभावैः सूचिता व्रीडाहर्षादयो यथासंख्यं व्यभिचारिणः केवलायामित्यत्र स्फुटतयेति शेषः । असाधारणत्वं मुख्यत्वम् । अन्यतमस्य एकस्य द्वयोर्वा अपेक्षया द्वयस्येत्युपलक्षणम् । द्वयोरुपादाने एकस्यापेक्षकत्वम् ।

यद्यपि विभावानामनुभावानामौत्सुक्यव्रीडाहर्षकोपासूयाप्रसादानाञ्च व्यभिचारिणां केवलानामत्र स्थितिः, तथाप्येतेषामसाधारणत्वमित्यन्यतमद्वयाक्षेपकत्वे सति नानैकान्तिकत्वमिति ।

यद्यप्येतेषु श्लोकेषु विभावादयः केवलादस्य कारणत्वेन प्रतीयन्ते । तथाप्येतेषां प्राधान्येन तेनान्ययोराक्षेपात्सूत्रोक्तं मिलितानां कारणत्वम् । न कुत्रापि व्यभिचरतीति भावः । तत्र प्रथमश्लोके प्रसीदेति पदसामर्थ्यात् विभावेन कटाक्षभुजाक्षेपाद्यनुभाववर्गः, मुग्धपदात् व्यभिचारिवर्ग आक्षिप्यते ।

द्वितीयश्लोके अङ्गम्लानादिना अनुभावेन कथमपिपदार्पितः अभिलाषचिन्तौत्सुक्यादिव्यभिचारिवर्गः विभावश्च नायिकारूपः ।

तृतीये औत्सुक्यादिना व्यभिचारिणा दूरादित्यादि पदार्पितः सहसा प्रसरणादिरूप अनुभावः प्रेयसीति विभावश्चाक्षिप्यते ।

सारबोधिनी—ननु यद्येषामसाधारण्यं किमन्यद्द्वयाक्षेपकत्वम् इति चेन्न । रसस्य विभावादिसमूहालम्बनात्मकत्वेनैकस्मादभिव्यक्तेरसंभवात् ।

तद्विशेषानाह—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।

बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ।।२६।।

सारबोधिनी-तद्विशेषानिति । सामान्यज्ञानानन्तरं तत्रैव जिज्ञासोदयात् । नेदमभिनयात्मकं काव्यम् । श्रव्ये तु, शान्तोऽपि रसः । नाट्ये ह्यवस्थानुकृतौ सर्वविषयोपरमस्वरूपस्य तस्य च न संभवः । गीतवाद्यादेस्तद्विरोधित्वात् । तदुक्तम्—

न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा ।

रसः प्रशान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः ।।

काव्यप्रकाशदर्पणः-विशेषानिति । तस्य सामान्यतो निर्णीतस्य रसस्य । त इति विशेषास्तान् । तत्र शृङ्गारो नाम प्रौढतरपरस्पररागोत्तरसुरप्रकृतिः इति स्थायिभावः । तत्रालम्बनं नायकौ । उद्दीपनं तयोरेव यौवनादि । चन्द्रचन्दनकोकिलभ्रमरनिःश्वासदेशकालविशेषादिश्चानुभावाः । कटाक्षभुजाक्षेपालिङ्गनचुम्बनादयः सञ्चारिणः । अत आह—

एकोनपञ्चाशदमी च भावा युक्त्या निबद्धाः परिपोषयन्ति ।

आलस्यमौग्र्यं मरणं जुगुप्सा तस्याश्रयाद्वैतविरुद्धनिष्ठमिति ।।

एकोनपञ्चाशद्भावाश्च व्यभिचरिणः । स्थायिनोऽष्टौ । वाग्देशादिचेष्टावैकृताश्च ततो विकासो हासः । तत्कृती रसो हास्यः । तत्रालम्बनं विकृतवेषादिकः यः कोऽपि । उद्दीपनं तच्चेष्टादि ।

अनुभावा: अक्षिसङ्कोचनवदनस्मेरतादयः । सञ्चारिणोऽवहित्थाग्लानिमूर्च्छादयः । एवमादिरसस्य च यथोपपादितमस्मत्साहित्यदर्पणे । रौद्रः अपकारिणि प्रौढक्रोधप्रकृतिः । तत्रालम्बनमपकारी । उद्दीपनमपकारादिः । अनुभावोऽशस्फोटेन तर्जनादिः । सञ्चारिणो गर्वादयः । क्रूरसञ्चारभयस्थायिभावः स्त्रीणां च प्रकृतिर्भयानकः । तत्रालम्बनं क्रूरसत्त्वादि । अनुभावो नयनमीलनगात्रसङ्कोचनपलायनादिः । सञ्चारिणो जडताग्लानिमूर्च्छादयः । विकृतपूतमांसादिजुगुप्साप्रकृतिः बीभत्सः । तत्रालम्बनं पूतिमांसादि । उद्दीपनं तत्रैव कृमिपातादि । अनुभावास्तु उत्तमप्रकृतिगताः कार्यान्तरव्यासङ्गादयः । अधमगताश्च मुखविकृतित्वनिष्ठीवनादयः । व्यभिचारिणो निर्वेदापस्मारजाड्यादयः । लोकोत्तरवस्तुप्रतिभासको विस्मयप्रकृतिरद्भुतः । तत्रालम्बनं दिव्यपुरुषादि । अनुभावाः साधुवादशिरोधूलनादयः । सञ्चारिणो हर्षधृत्युत्साहादयः । एते शृङ्गारादयः । सात्त्विकबहुलगीतवाद्यादिपूर्वकाभिनयेन पुरावृत्तानुकारो नाट्यम् । तदाश्रया रसा महर्षिणा अष्टौ कण्ठोक्ताः । अन्ये तु महाकाव्यादौ "शान्तोऽस्ति नवमो रस" इत्याहुः तन्न तस्य सम्यक् नाट्यपोषकत्वाभावात् । यदाह धनिकः-- "पुष्टिर्नाट्येषु नैतस्य" इति ।

तत्र शृङ्गारस्य द्वौ भेदौ । संभोगो विप्रलम्भश्च । तत्राद्यः परस्परावलोकनालिङ्गनाधरपानपरिचुम्बनाद्यनन्तत्वादपरिच्छेद्य एक एव गण्यते । यथा—

शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनै—
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥३०॥

बालचित्तानुरञ्जनी—रसस्य सामान्यलक्षणमुक्त्वा रसस्य विशेषानाह **तदिति**। यद्यपि नवमः शान्तो रसोऽस्ति तथापि तस्य नटनीयत्वाभावान्न व्याघातः । अत एव "अष्टौ नाट्ये रसाः" इत्युक्तम् । सर्वप्राणिसुलभत्वात् प्रधानत्वाच्च प्रथमोद्दिष्टस्य शृङ्गाररसस्य द्वैविध्यमाह **तत्रेति** । संयुक्ताभ्यां भुज्यत इति संभोगः । संभोगास्वादलोभेन वियुक्ताभ्यामात्मा लम्यत इति विप्रलम्भः । ननु संभोगस्य परस्परावलोकनादिभेदेनानेकत्वात् कथं द्वैविध्यमत आह **तत्राद्य इति** ।

तत्र संभोगशृङ्गारमुदाहरति **यथेति** । स्वस्मिन् अनुरागं जिज्ञासमानेन केनचित् कामिनी, शून्यं वासगृहं विलोक्य शयनात् शनैः किञ्चिदुत्थायालीकनिद्रामुपागतस्य पत्युर्मुखं चिरं दृष्ट्वा विस्रम्भं परिचुम्ब्य तस्यैव जातपुलकां गण्डस्थलीमालोक्य लज्जावनतमुखी एवं स्वानुरागं प्रकाशयन्ती नवोढा काचन चिरं चुम्बिता ।

शून्यमित्यनेन परं काव्याङ्गत्वमुद्दीपनत्वं व्यज्यते । **वासगृहमिति** । स्रगादिसुरतोपकरणसंपत् व्यज्यते । "किञ्चिदुत्थाय" इति पूर्वशरीरमात्रेण शय्यात्यागः । **शनैरिति** मिथः सन्दानितोऽनुसंक्षोभनी-

कृता [?]। निद्राव्याजमिति अनुरागात् इयं स्वयं मे चुम्बनादिकं करिष्यतीति प्रतिनिर्देशात् तदा असौ प्रियतम इति । हसतेति झटिति व्याजनिद्राफलप्राप्तिः । चिरमिति अशिथिलकेशग्रहत्वम् । बाला चिरं चुम्बितेति विघ्नापगमसंभोगीकारश्च व्यज्यते ।

सारबोधिनी—द्वौ भेदाविति । उभयस्यापि रतिप्रकृतिकत्वात् । तदुक्तम्—

अनुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ ।
दर्शनस्पर्शनादीनि स संभोगो मुदान्वितः ॥
भावो यदा रतिर्नाम प्रकर्षमधिगच्छति ।
नाभिगच्छति चाभीष्टं विप्रलम्भस्तदोच्यते ॥ इति ॥

एक एव संभोगत्वसामान्यमाश्रित्य । तच्च विप्रलम्भभिन्नत्वे सति रतिप्रकृतिकत्वम् । **शून्यमिति** । शून्यम् इत्यनेनोद्दीपनातिशयः चुम्बनोपयोगिता च ध्वन्यते । एवं वासगृहम् इत्युपकरणसंपत्तिः । विलोक्य निपुणं निभाल्य । सहचरनिभृतसत्त्वशङ्कया । किञ्चिन्न तु सर्वतः । निद्राभङ्गे पार्श्वपरिवर्तनेन समाधास्यमानत्वात् । **शयनादुत्थायेति** । वामपार्श्वशयितस्य गण्डचुम्बनविधानयोग्यता उत्कण्ठातिशयश्च व्यज्यते । शनैर्वलयादिक-रणो यथा न स्यात् । "निद्राव्याजमुपागतस्य" इत्यनेन तदीयदार्ढ्यादिदर्शनाभिसंधानम् । "पत्युर्मुखम्" इत्यनेन युक्तानुरागित्वम् । "विस्रब्धम्" इत्यनेन रागातिशयादविमृश्यकारित्वम् । नम्रमुखी न तु नामितमुखी । लज्जातिशयात् तथा व्याकुलभूतात् येन मुखादनमनेऽपि न स्वातन्त्र्यम् । 'चिरम्' इत्यनेन लज्जापगमः संभोगस्वीकारश्च व्यज्यते । **हसतेति** । तव निखिलमेव रहस्यमवगतमिति हासः । लज्जत इति लज्जा पृथक् पदम् । ततो मुखनमनं लज्जनक्रियापेक्षया समानकर्तृकत्वेन आलोक्येत्यत्रौत्सुक्योत्पत्तिः । लज्जापदानुपादाने तु तदनुभावमुखनम्रत्वेन तत्प्रतीतौ अनुभावव्यङ्ग्यत्वपुष्ट्या भावध्वनित्वं स्यात् । उपादाने तु गोपनकृतपुष्टिराहित्येन शृङ्गाराङ्गत्वप्राप्तिः । अत एव हासस्यापि स्वपदेनोपादानम् ।

काव्यप्रकाशदर्पणः—तत्र संभोगः संयुक्तनायकविषयः । विप्रलम्भश्च विप्रयुक्तविषयः । संयोगवियोगौ च परस्परौ यत्र नापन्नतारूपौ । तेन दूतीप्रेषणादेः संयोगविषयत्वम् ईर्ष्यामानादेश्च विप्रलम्भविषयत्वमविरुद्धम् । **शून्यमिति** । अत्र नम्रशब्दः अन्तर्भूतणिजर्थः । तेन लोकन-नमनयोरेककर्तृकतया पूर्वकाले क्त्वाप्रत्ययः । इह नायकः आलम्बनविभावः । शून्यवासगृहादिरुद्दीपनविभावः । अनुभावा बालागतादिविलोकनादयः । नायकगताश्च व्याजनिद्रादयः । निद्रा या हि व्याजा तस्या न व्यभिचारित्वम् । व्यभिचारश्च नायकगताविलोकनेन शङ्कोत्थानेन चपलता । उत्थानस्य गतैर्मानित्रासः । चिरं निर्णयेन सुप्तो न वेत्ति सन्देहप्रभवो वितर्कः । 'विस्रब्धम्' इत्यनेन निद्रानिश्चयज्ञानेन हर्षः । परिचुम्बनेन औत्सुक्यम् । आलोकनेन च पतनोन्मुखनमनेन लज्जा नायिकानिष्ठैव । नायकगता च व्याजनिद्राश्रयेण धृतिः । चिरचुम्बनेनौत्सुक्यं हर्षश्च । एभिश्च साधारण्येन प्रतीतैः साधारण्येनाभिव्यक्तःसहृदयरतिभावः शृङ्गाररसरूपतां लभते । एवं वक्ष्यमाणोदाहरणेष्वपि विभावादिविवेको बोद्धव्यः ।

अत्र द्वयोरनुरागिणोरनुरक्तत्वोद्रेकेऽपि नायिकाया औत्सुक्यमधिकम् ।

तथा

त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि ।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥३१॥

सारबोधिनी—लक्ष्यान्तरमाह **त्वमिति** । ननु किम् उदाहरणान्तरेणेति चेदुच्यते । प्रथमं नायिकोत्कण्ठा वर्णनीया इत्यत्र तात्पर्यात् । तथा चाहुः "पूर्वं रक्ता भवेन्नारी पुमान् पश्चात् तदिङ्गितैः" इति । अत एव तथैवोदाहृतम् । वीटिका कञ्चुलिकाग्रन्थिः । सस्मितेत्यनेन कञ्चुलिकापसारणस्वरसो व्यज्यते । **सखीति** । आलीजनस्य सखी नायिकैव, सैव नेत्रोत्सवः । पत्युर्वल्लभस्य तं प्रत्यनुरक्तायाः सख्या दर्शनेन हर्षोदयात् ।

केचित्तु—"सखी विस्रम्भपात्रं स्यादाली स्नेहस्य भूमिकेति" दर्शनात् सखी नायिका च भिन्ना इत्याहुः । **अलीकेति** । शुको भोजनीयः । चकोरी चन्द्रिकापानाय मोचनीया । सखि नैकाकिनी कर्तुं शक्ष्यसि । तदहमपि ते द्वितीयकमाचरामीत्याद्यलीकवचनम् । **शनकैरिति** । हठेन निर्याणे सख्या लज्जासंभावनाभीरुत्वम् । अत्र नायिका आलम्बनम् । तत्र च नायक इत्युदाहरणभेदः ।

काव्यप्रकाशदर्पणः—नायकौत्सुक्यातिरेके पुनरुदाहरति **त्वमिति** । वीटिका ग्रन्थिः । सस्मितसखी सैव नायिका । नेत्रस्योत्सवो विकाशादिः ।

अपरस्तु—अभिलाषविरहेर्ष्याप्रवासशापहेतुक इति पञ्चविधः । क्रमेणोदाहरणम्—

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः ॥३२॥

बालचित्तानुरञ्जनी—एवं संभोगरसमुदाहृत्य विप्रलम्भस्य पञ्चविधत्वमाह **अपरस्त्विति** । पूर्वंमसङ्गे सङ्गे वा अभिलाषः । संभोगे सत्येव कुतश्चित् कारणात् असंयोगे विरहः । सपत्नीषु कान्तकृतविरहः कान्तकृतसंम्मानाद्यसहनमीर्ष्या । दिशान्तरगमनं प्रवासः । कुपितदेवादिकृतो वाग्दण्डः शापः ।

अभिलाषहेतुकमुदाहरति **प्रेमार्द्रा इत्यादि** । कस्यचित् कामिनो वचनम् । प्रेम स्नेहः तदेव चुम्बनादिना प्रकर्षं नीतं प्रणयः । स एव परिचयातिशयेन प्रचीयामानो रागः । सुन्दर्यस्तास्ता एवंविधा-

श्चेष्टा परिचयादुद्गाढरागोदया भवेयुः। मम तु प्रार्थनया कल्पितास्वपि यासु चेष्टासु क्षणात् अन्तःकरणस्यानन्देन सान्द्रोलयः तन्मयत्वं भवति।

सारबोधिनी—अपरस्त्विति। सङ्गमप्रत्याशाकालीनस्तदनुत्पादो विप्रलम्भः। प्राप्तिनिश्चयः प्रत्याशा। अभिलाप इच्छा। देशैक्येऽपि गुर्वादिपारतन्त्र्याद्विरहः। अन्यासङ्गिनि प्रिये कोप ईर्ष्या। अत्रेर्ष्यापदं मानोपलक्षणम्। तेन प्रणयकोपस्यापि परिग्रहः। तदुक्तम्—"मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भव" इति टीकाकृतः। प्रवासो वैदेश्यम्। विरहप्रवास योस्तु भेदं लक्ष्ये विवेचयिष्यामः। मुन्यादिकोपनियन्त्रणः शापः। हेतुर्नियतपूर्ववर्ती। अभिलाषस्यानुत्पादकत्वेऽपि तत्पूर्वकालीनत्वं नियतमेव, सिद्धे इच्छाविरहात्। अत्र प्राञ्चः—

यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये।
विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भः॥

इति दर्शनान्मूर्च्छितनायिकादिविषयकः करुणविप्रलम्भोऽप्यन्योऽप्यस्ति।

अभिलाषहेतुकमुदाहरति **प्रेमार्द्रा इति**। प्रेमैव काष्ठापन्नं प्रणयः। परिचयोऽत्यन्तसंघर्षः। निसर्गः स्वभावः। आशंसा इच्छा। लयस्तन्मयत्वम्। व्यापारः पटुत्वेन स्वविषयग्राहित्वम्।

काव्यप्रकाशदर्पणः—अपरो विप्रलम्भः। अभिलाषः सङ्गमप्रागभावः। विरहे एकस्थयोरपि गुर्वादिवशात् संभोगोपरोधः। ईर्ष्या अन्यासक्तेन कान्तेनापि कोपः। एवञ्चोपलक्षणम्। तेन प्रणयमानोऽपि सङ्गृह्यते। तदुक्तं मम साहित्यदर्पणे—

द्वयोः प्रणयमानः स्यात् प्रमोदेऽपि महत्यपि।
प्रेम्णः कुटिलगामित्वात्कोपो यः कारणं विना॥ इति [सा० द० ३. १६८]

प्रवासो भिन्नदेशता। शापो मुन्यादिक्रोधयन्त्रणोः, तस्य चापवादत्वात्। पूर्वभेदान्तरसंभवेऽप्यनेनैव व्यपदेशः। **प्रेमार्द्रा इति**। दर्शनादिगताभावव्यञ्जकः कश्चनविशेषः। प्रेम्णः तत्पूर्वको वशीकारः। प्रणयरहस्यसंवेदनं परिचयः। लयस्तन्मयत्वमिव।

अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक् सुहृद्
यो मां नेच्छति नागतश्च हहहा कोऽयं विधेः प्रक्रमः।
इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे
बाला वृत्तविवर्त्तनव्यतिकरा नाप्नोति निद्रां निशि॥२३॥

एषा विरहोत्कण्ठिता।

बालचित्तानुरञ्जनी—विरहहेतुकमुदाहरति **अन्यत्रेति**। नायकं प्रति दूतीवचनम्। निशान्तान्तरे गृहमध्ये अनेन सतीत्वम्। रात्रौ बाला वृत्तविवर्तनयोःव्यतिकरो यस्याः सा एवंविधा सती निद्रां नाधिगच्छति। तत्र हेतुः **व्रजतीति**। अनेन प्रकारेण अनेककल्पनास्वीकृतचित्ता। अनेककल्पनामेवाह मम नायकः, अन्यत्र अन्यस्यां नायिकायाम्। अनेन पत्युरनुरागः सूचितः। व्रजतीति का खलु कथा? संभावनैव नास्तीत्यर्थः।

तदेव दर्शयति । योऽसौ यद्वचनेन मां नेच्छति । अनेन परिवारानुकूलत्वम ताट्टक् सुहृदप्यस्य नास्ति अथवा नागतः । सहसा विधेरयं कः प्रक्रमः ? एषा स्त्री विरहोत्कण्ठिता । तथा चोक्तम्—

"विरमत्यव्यलीके तु विरहोत्कण्ठिता मता" ।। इति ।

सारबोधिनी--विरहहेतुकमुदाहरति **अन्यत्रे**ति । अन्यत्र प्रवासे नायिकान्तरगृहे वा । तत्तावदलीकमेव । तत्कथापि नास्ति । प्रक्रम आरम्भः विप्रलम्भस्य । कोऽयमित्यननुभूतपूर्वत्वात् । वृत्तविवर्तनेन मद्वृत्तविवर्तनं तस्य व्यतिकरः संबन्धो यस्याः । निशान्तान्तरे गृहाभ्यन्तरे । नन्वेतन्न भेदान्तरम्, प्रवासत्वेनैव सिद्धेः । न च भिन्नदेशत्वाभावान्न तथात्वम् । तद्विशेषणवैयर्थ्यादित्याह **एषे**ति । अनयोरैक्ये प्रोषितभर्तृकातोऽस्या भेदान्तरानुपपत्तेः । न चानुपपन्नम्, मुनिना नायिकायाः स्वाधीनभर्तृकत्वादिषोडशावस्थास्वीकारात् ।

काव्यप्रकाशदर्पणः–निशान्तं गृहं, वृत्तः प्रवृत्तः । निवर्तनस्य पार्श्वपरिवर्तनस्य व्यतिकरः पौनःपुन्यं यस्या एवेति प्रकरणादित्यर्थः ।

सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ।।३४।।

बालचित्तानुरञ्जनी--ईर्ष्याविप्रलम्भस्योदाहरणमाह **सा पत्युरित्यादि** । कविवचनम् । सा बाला भर्तुरग्रे प्रथमेऽपराधसमये अप्रियप्रस्तावे केवलं रोदिति । कीदृशी ? निर्मलकपोलयोर्यन्मूलं नेत्रयोरधोभागः तत्र क्षरितैः निमेषार्द्धबद्धबिन्दुजालतया लुठत् पतनशीलत्वेन लोलमुदकं येषां तैः, नैरन्तर्येण प्रथममेवोन्मृष्टकज्जलतया स्वच्छैः । एवंविधैरश्रुभिः पर्यस्ते लम्बितपक्ष्मणी नेत्रोत्पले यस्याः सा । ननु वक्रोक्त्यादिकं किमिति न करोतीत्यत आह । सख्या भावः सख्यम् । सखी दूती तस्याः उपदेशः, तं विना सविभ्रमं अङ्गवलनं वक्रोक्तिश्च । ताभ्यां संसूचनम् स्वाभिप्रायप्रकाशनं नो जानाति । रोदनत्वस्य सशब्दत्वपरिहाराय अश्रुभिरित्युक्तम् । अश्रुप्राचुर्यार्थं लोलालकैरित्युक्तम् । चिरकालरोदनसूचनार्थं स्वच्छैरित्युक्तम् । स्वल्पकाले तु कज्जलसंबद्धत्वात् ।

सारबोधिनी--ईर्ष्याहेतुकमुदाहरति **सा पत्युरिति** । सख्या भावः सख्यं तेनोपदेशः । पत्युरन्यासङ्गाद्बालाया ईर्ष्या ।

काव्यप्रकाशदर्पणः–सख्यं सौहार्द्रम् । तेनोपदेशोऽर्थात् सखीनामश्रुभिः पर्यस्तनेत्रोत्पलेति संबन्धः ।

प्रस्थानं वलयैः कृतं प्रियसखैरस्त्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित प्रियसुहृत्सार्थः किमु त्यज्यते ।।३५।।

बालचित्तानुरञ्जनी—प्रवासहेतुकं विप्रलम्भमुदाहरति **प्रस्थानमिति** । काचित् प्रोषितभर्तृका आत्मानं प्रति सोपालम्भमाह हे प्रियजीवित ! प्राणप्रिये यातुं निश्चितमनसि सति सर्वे सुहृदः सहैव प्रचलिताः । कथम् इत्यत आह प्रियसखैः वल्लभसहचरैः । एतद्विशेषणं विभक्तिविपरिणामेन सर्वत्र योजनीयम् । प्रिये तिष्ठति तिष्ठद्भिर्गच्छति गच्छद्भिरित्यर्थः । वलयैः कङ्कणैः प्रस्थानं कृतं दौर्बल्यात् । अश्रुभिरनवरतं गतम् । अश्रूणामप्रवृत्तिरेवावस्थितिः । गतिश्च प्रवृत्तिरेव न त्वभावः । तथा सति अश्रूणामभाव एव स्यात् । वृत्या सन्तोषेण क्षणमपि न स्थितम् । चित्तेनापि प्रथममेव गन्तुमुपक्रान्तम् । अन्तःस्थेन त्वयापि अवश्यं गन्तव्ये सति सुहृत्सार्थः किमिति परित्यज्यताम् ? गम्यतामेवेत्यर्थः । प्रियतमे गन्तुं निश्चितचेतस्यपि नायिका जीवने निरपेक्षा बभूव किल । गते सति किं वक्तव्यमिति भावः ।

काव्यप्रकाशदर्पण :—**प्रस्थानमिति** । अत्र प्रवासस्य भाविरूपो भेदः । यदुक्तं मयैव "भावी भवन-भूत" इति । "त्रिधा स्यात्तत्र कार्यज" इति कार्याज्जातः प्रवासभेदः ।

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥ ३ ॥

बालचित्तानुरञ्जनी—शापहेतुकं विप्रलम्भमुदाहरति **त्वामालिख्येति** । हे सखि ! धातुरागैः प्रणयकुपितां त्वाम् आलिख्य आत्मानं ते चरणपतितं यावत् कर्तुमिच्छामि तावत् मुहुर्मुहुरुपचितैरश्रुभिः मे दृष्टिरालुप्यते । तस्मिन् स्थितेऽपि आवयोः सङ्गमं क्रूरो विधिः न सहते ।

सारबोधिनी—**त्वामिति** । कुपितताया लौहित्यात् धातुरागैरित्युक्तम् । यक्षजातीयमेचकवर्णलाभार्थं शिलायामित्युक्तम् । अत्रेच्छासमयस्मरणोद्रिक्तविरहजनिताश्रुभिर्दृष्टिलोपस्तेन लिखनपादपतनयोर्द्वयोरप्यनिर्बाहः । अर्थान्तरं न्यस्यति । क्रूर इति । कृतान्तो दैवम् । तदेव कृतान्तो यमः । "कृतान्तो यमसिद्धान्त-दैवाकुशलकर्मसु" इत्यनुशासनात् । ननु "शठेन विधिना निद्रादरिद्रीकृत" इत्यत्रेव क्रूरपदेनासूयावगताव-सूयाख्यभावध्वनिरेवायं कथं विप्रलम्भोदाहरणमिति चेन्न विप्रलम्भावगमानन्तरं समर्थनीयवाक्येन क्रूरेत्यादिना भावाभिव्यक्तेरकिञ्चित्करत्वात् तस्य । न च तर्हि "शठेन विधिना" इत्यत्रापि तथा स्यात् यावत्तावत्पदाभ्यामेकवाक्यत्वेनैवान्वयादिति युक्तमेवेदं विप्रलम्भोदाहरणमिति ।

काव्यप्रकाशदर्पण :—**त्वामिति** । अत्र तवाकृतिलेखनं कथञ्चिन्निर्वाह्य पादपतनारम्भे त्वद्विलास-स्मरण विपुलान्तःकरणस्य मम प्रवाहतामाप । तैर्वाच्यैः समन्ताद्दर्शनविघातः क्रियत इति सर्वशास्त्रविदां श्रीमद्वाचस्पतिमिश्राणां व्याख्यानमपि निगूढमिति त्वन्येषां एतावत् विद्यमानसंधानेन वेदं रसध्वन्युदा-हरणम् । प्रबन्धपर्यालोचने तु विप्रलम्भसञ्चारी उन्माद एव ।

हास्यादीनां क्रमेणोदाहरणम्—

आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या मन्त्राम्भसा प्रतिपदं पृषतैः पवित्रे ।
तारस्वनं प्रथितथूत्कमदात्प्रहारं हा हा हतोऽहमिति रोदिति विष्णुशर्मा ॥३७॥

बालचित्तानुरञ्जनी–एवं शृङ्गारं सप्रपञ्चमुदाहृत्य हास्यादीनामुदाहरणकथनं प्रतिजानीते **हास्यादीनामिति**। तत्र हास्यस्योदाहरणमाह **आकुञ्च्येति** । कविवचनम्। वेश्या अशुचिं हस्तमाकुञ्च्य प्रतिपदं प्रतिक्षणं मन्त्रपूतानां जलानां बिन्दुभिः पवित्रे मम शिरसि स्थूलध्वनिप्रहितथूत्कारं यथा स्यात्तथा प्रहारं दत्तवती। अहं हतोऽस्मि। हाहा खेदे इति विष्णुशर्मा कश्चित् रोदनं करोति। अत्र विकृतचेष्टादिभिर्विभावः, कपोलोत्पुलकादिभिरनुभावः अवहित्थाग्लानिरूपादिव्यभिचारी हासस्थायिभावो हास्यः रसः ।

सारबोधिनी–हास्यरसमुदाहरति **आकुञ्च्येति**। संकुचिताग्रं कृत्वा मम मूर्ध्नि प्रहारमदादिति संबन्धः। मन्त्राम्भसां मन्त्रितपयसां प्रथितो विस्तारितः, थूगिति शब्दो यत्र प्रहारे। तारस्वरमित्यपि क्रियाविशेषणम्। **आकुञ्च्येत्यादि** "हा हा हतोऽहम्" इत्यन्तेन तादृशं शब्दमुच्चार्येत्यर्थः। शर्मा तन्नामा।

श्रवणेनापि हसितम्। अत्र विष्णुशर्मा आलम्बनम्। तस्य रोदनमुद्दीपनम्। द्रष्टुरुद्धे गजाद्यादयो व्यभिचारिणः। स्मितहसितातिहसितानि उत्तममध्यमाधमेष्वनुभावाः । यस्य हासस्तदनिबन्धोऽपि सामर्थ्यात्तदवसायः। तदुक्तम्—

यस्य हासः स चेत् क्वापि साक्षान्नैव निबध्यते ।
तथाप्येष विभावादिसामर्थ्यादवसीयते ॥ इति ॥

विकृतवाग्वेशादिदर्शनेऽवश्यं हासोदयादत्र हास्यो रसः ।

काव्यप्रकाशदर्पणः–**आकुञ्च्येति**। थूदिति प्रहारशब्दानुकरणम्। अत्र विष्णुशर्मा आलम्बनम्। कपोलोच्छ्वासनदृष्टिसङ्कोचादयो हर्षावहित्थाश्चानुभावव्यभिचारिणः । अनुक्ता अपि सामर्थ्याल्लभ्या। एवमन्यत्रापि ।

हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषः
धिक् प्राणान् पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ ।
इत्थं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां गिर-
श्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि ॥३८॥

बालचित्तानुरञ्जनी—करुणस्योदाहरणमाह **हा मातेति** । राजजननीमरणे कविवचनम् । हा मातः त्वरितासि वेगेन गतासि । कुत्र वर्तसे ? किमेतज्जातम् ? हा देवताः । ब्राह्मणानामाशिषः क्व । प्राणान् धिक् विनश्वरत्वात् । अकस्मात् वज्रं किं पतितम् ? अङ्गेषु अग्निः पतितः ? लोचने दग्धे । इत्थमनेन प्रकारेण घर्घरमध्ये रुद्धाः करुणाः सन्त्यः नगरस्त्रीणां विलापवचनानि चित्रलिखितानपि प्राणिनो रोदयन्ति भित्तीरपि शतधा कुर्वन्ति । अचेतनान् रोदयन्तीति किमु वक्तव्यमिति भावः । अत्रेष्टनाशादिविभावः । देवोपालम्भाश्रुपाताद्यनुभावः, चिन्तादिव्यभिचारी शोकस्थायिभावः करुणरसः ।

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥३९॥

सारबोधिनी—रौद्रमाह **कृतमिति** । "कुत्सिते कः" इति गुरोः पातक एव गुरुपातकम् । तस्य कर्तर्य्यनुमन्तरि अनिराकर्तरि दण्डः समुचित इति । तान् क्रमेणाह कृतमित्यादि । अहमनन्यसहायः । नरकरिपुणा श्रीकृष्णेन । अत्र नरकरिपुपदमुपहासं व्यनक्ति । क्रोधात् क्रमविस्मृत्या प्रागनुमन्तुरुपादानम् । अत्रापकरिणोऽर्जुनादय आलम्बनम् । अस्त्रोद्यमनमुद्दीपनम् । प्रतिज्ञानुभावः । अन्यनैरपेक्ष्यगम्यो गर्वः सञ्चारी ।

क्षुद्राः संत्रासमेते विजहित हरयः क्षुण्णशक्रेभकुम्भा.
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥४०॥

बालचित्तानुरञ्जनी—**क्षुद्राः संत्रासमिति** । इन्द्रजितो वचनम् । हे क्षुद्राः कपटाः, भयं परित्यजत । चूर्णितेन्द्रगजकुम्भाः एते ममामी बाणाः युष्मद्देहेषु निष्पतन्तः परां लज्जां दधति । हे सौमित्रे लक्ष्मण तिष्ठ । त्वमपि कोपानां पात्रं न हि । अहं मेघनादः इन्द्रजित् । ननु किञ्चित् भ्रूभङ्गविलासेनैव निवारितसमुद्रं रामचन्द्रमन्वेषयामि । अत्र प्रतिनायको विभावः । धैर्याद्यनुभावचिन्तादिर्व्यभिचारी, उत्साहस्थायिभावो वीरो रसः ।

सारबोधिनी—वीरमाह **क्षुद्रा इति** । एत इति । एत इत्येवं संबोधनासंभवात् । एते यूयं विजहितेत्यन्वयः । **सौमित्रे ति** । मातृसंबन्धोल्लेखनेन निर्वार्यत्वं[१८] व्याप्यते । अत्र राम आलम्बनम् । जलधिनियमनमुद्दीपनम् । नीचेषूपलक्षणम् । रामं प्रति स्पर्धा चानुभावः । ऐरावतकुम्भचूर्णनस्मृतिः "लज्जांदधती" तिगम्योगर्वश्च सञ्चारिणो । अथ विभावादिसाम्ये वीररौद्रयोर्न भेदः । न च स्थायिभेद एव भेदकः, तस्यापि

नियामकमुखप्रेक्षित्वात् । मैवम् । विवेचकत्वतदभावाभ्यामेव वैधर्म्यात् । इह क्षुद्रान् विहाय राममात्रान्वेषण-विवेचनस्य, रौद्रे चानिरावर्तृ—अनुमन्तृगतक्रोधविपयस्य तारतम्यलब्धक्रमोपन्यासमपहाय व्युत्क्रमोपन्यासेना-विवेचनस्य स्फुटत्वात् । क्रोधेनैव क्रमविस्मृतेरिति । यत्तु 'रक्तास्यनेत्रता रौद्रे युद्धवीरात्तु भेदिनीत्याहुः' तन्न, क्रोधसञ्चारिणि वीरेऽपि तस्याः सुलभत्वेन भेदकत्वानुपपत्तेः । स च दानधर्मयुद्धैर्दयया च समन्वित-श्चतुर्धा स्यादिति दिशा तेऽप्युदाहार्याः । तत्र दानवीरो भार्गवो यथा—

त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः ।

धर्मवीरो यथा

"राज्यं वसु च देहश्च भार्याभ्रातृसुताश्च ये ।
यच्च लोके ममायत्तं तद्धर्माय सदोद्यतम् ॥

दयावीरो जीमूतवाहनो यथा—

"शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवापि तावत् त्वं भक्षणात् किं विरतो गरुत्मन् ॥

इत्येतेषु दान-धर्म-दया विषयोत्साहोद्बोधाद्वीरत्वमेव ।

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥४१॥

बालचित्तानुरञ्जनी—भयानकरसमुदाहरति **ग्रीवेति** । दुष्यन्तवचनम् । अयं मृगः पश्चाद्गच्छति [अनुपतति पश्चाद्गच्छति धावति वा] रथे कण्ठस्य चक्रीकरणमनोहरं यथा तथा मुहुर्दत्तदृष्टिः सन् बाण-पतनभयात् स्थूलेन पृष्ठभागेन । अर्द्धे चेत्यनेन पश्चादेशः । शरीरस्य पूर्वभागं प्रविष्टः । अर्धभक्षितैः श्रमेण विततमुखाद्भ्रंशिभिः बालतृणैर्विक्षिप्तमार्गः एवंविधः सन् अधिकलङ्घनत्वात् आकाशे बहुतरं प्रयाति । भूम्यां स्वल्पं प्रयाति । पश्य ! अत्र विकृतस्वरश्रवणादिर्विभावः मुहुश्चञ्चलविलोचनाद्यनुभावःशङ्कादिर्व्य-भिचारी भयस्थायिभावो भयानको रसः ।

सारबोधिनी—भयमुदाहरति **ग्रीवेत्यादि** । गम्यदेशवैषम्यावैषम्यनिरूपणाय कादाचित्कविवर्तनं न रथदर्शनविच्छेदादाह **मुहुरिति** । **भूयसेति** । भूयसा लघुनि गोपनं न संभवतीत्यपि न गणयतीति भावः । ततो भयपोषणम् । स्यन्दनाद्भयमेव रसप्रकृतिर्न शरपतनादिति तद्भयस्य शब्दोपादानेऽपि न दोषः । **श्रम-विवृतेति** । अत्र स्यन्दनमालम्बनम् । श्रन् सरणमुद्दीपनम् । पलायनमनुभावः । श्रमः सञ्चारी ।

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसा—
न्यंसस्फिक्पृष्ठपिण्डयाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।
आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का—
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ।।४२।।

बालचित्तानुरञ्जनी—बीभत्समुदाहरति **उत्कृत्योत्कृत्येति** । श्मशानवर्णनम् । प्रेतानां मध्ये दरिद्रः करङ्कानशवान् चर्म प्रथमं छित्वा छित्वा पश्चात् पृथूत्सेधेन तेनाधिकानि अंसं गुदप्रदेशः पृष्टपिण्डाद्यवयवप्रदेशेषु सुललानि अतिदुर्गन्धीनि मांसानि भक्षयित्वा श्रान्तानि रक्ताद्यन्तनेत्राणि येन, प्रकटितदन्तः एवंविधः सन् उत्सङ्गस्थितान् शवान् अस्थिषु लग्नं विषमस्थानगतमपि मांसम् अव्यग्रं यथा तथा भक्षयति । अत्राहृद्यदर्शनादिविभावः, नासाविघूर्णनाद्यनुभावः, अपस्मारादिव्यभिचारी, जुगुप्सास्थायिभावो बीभत्सरसः ।

सारबोधिनी—बीभत्समुदाहरति **उत्कृत्योत्कृत्येति**[१८] । वीप्सायां यावत् संभवस्तावत् द्विविधः । प्रथमं कृत्तिं उत्कृत्योत्कृत्य मांसानि जग्ध्वा । अथ क्रव्यमव्यग्रमत्तीति संबन्धः । उत्सेध उच्छूनता । उच्छोप उच्छोद्य इत्यपि पाठान्तरम् । अर्थस्तु स एव । स्फिक् ऊरुमूलकटिसंधिभागः । पिण्डी जङ्घोर्ध्वभागः । पिण्ड इति पाठे तदाकारत्वात्तथा । स्थपुटं विषमगंभीरभागः । करङ्कस्याङ्कसंस्थात्वम् । बलवत्पिशाचान्तरशङ्कया । तत एव दृक्प्रेरणम् । दशनप्रकटनञ्च । अत्र शव आलम्बनम् । उत्कर्तनाद्युद्दीपनम् । नासाकुञ्चनादयोनुभावाः, उद्वेगादयः सञ्चारिणः ।

काव्यप्रकाशदर्पणः—उच्छाय उच्छूनता । पिण्डी जङ्घोर्ध्वभागः । रङ्कश्चिरदुर्लभाहारः । करङ्कोऽस्थिशेषं शिरस्स्थपुटम्, विकटगर्तविभागः । एषां शृङ्गारादिरसानां यथासंख्यमिति शेषः ।

चित्रं महानेष बतावतारः क्व कान्तिरेषाभिनवैव भङ्गिः ।
लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः ।।४३।।

बालचित्तानुरञ्जनी—अद्भुतरसमुदाहरति **चित्रमिति** । नायकवचनम् । एष पुरुषः महान् विकाररहितः । चित्रं बत हर्षे । एषा कान्तिः । क्व नु कुत्रापि । प्रकारः अभिनवः एव । धैर्यं लोकोत्कृष्टम् । अहो प्रभावः । आकृतिरपि का ? अपूर्वेव । ब्राह्मण एतद्विषयः । सर्गः नूतनः । अत्र लोकोत्तरवस्तुदर्शनादिविभावः, नेत्रविकासाद्यनुभावः हर्षादिव्यभिचारी विस्मयस्थायिभावोऽद्भुतरसः ।

सारबोधिनी—अद्भुतमुदाहरति **चित्रमिति** । बत श्लाघायाम् । चित्रं महान् बत क्व अभिनवा लोकोत्तरम् । "अहो" "क्वापि" "नूतन" इति शब्दाः स्वसमभिव्याहृतशब्दार्थस्य लौकिकत्वप्रकाशकाः । अवतार इति सदाचारप्रवर्तकत्वात् । "अविकार" इति पाठे विकारभावरहित इत्यर्थः । अत्र महापुरुष आलम्बनम् । तद्गुणातिशय उद्दीपनम् । स्तवादयोऽनुभावाः । मतिधृतिहर्षादयः सञ्चारिणः । एवं विभावाद्यो भावेष्वपि भाव्याः ।

एषां स्थायिभावानाह——

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥३०॥

स्पष्टम् ।

बालचित्तानुरञ्जनी—स्थायिभावापरिज्ञाने शृङ्गारादिरसनिरूपणं कर्त्तुमशक्यमित्यनेन वागङ्गाभिनयात्मकशृङ्गारादिरसनिरूपणं कर्त्तुमशक्यमित्यभिप्रेत्योत्तरश्लोकमवतारयति एषामित्यादि । वारयति **स्पष्टमित्यनेन** । वागङ्गाभिनयात्मका वहवोऽर्था विभाव्यन्ते उत्पाद्यन्ते येन स विभावः । स चालम्बनोद्दीपनभेदेन द्विविधः । वागङ्गादिभिर्यस्मादर्थोऽनुभाव्यते स वागङ्गोपाङ्गसंयुक्तः अनुभावः । एतौ स्पष्टत्वादुपेक्ष्य स्थायिभावनोपनीतत्वेन दुर्ज्ञानत्वमभिप्रेत्याह ।

सारबोधिनी—के ते स्थायिनो भावा इत्यपेक्षायामाह **एषां स्थायिभावानिति** । यदा आलम्बनादिभी रतिर्व्यज्यते तदा शृङ्गारः । यदा हासादयस्तदा अन्ये इत्यवधेयम् । स्थायिलक्षणं पूर्वमुक्तम् । अधुना रत्यादिलक्षणान्युच्यन्ते । यथा—

रतिर्मनोनुकूलेऽर्थे मनसः प्रवणायितम् ।
वागादिवैकृताच्चेतोविकासो हास उच्यते ॥
इष्टनाशादिभिश्चेतोवैक्लव्यं शोक उच्यते ।
प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोधसंज्ञकः ॥
कार्यारम्भेषु संरम्भ उत्साहः परिकीर्तितः ।
रौद्रशक्त्या तु जनितं वैक्लव्यं मनसो भयम् ॥
दोषेक्षणादिभिर्गर्हा जुगुप्सेति निगद्यते ।
विविधेषु पदार्थेषु लोकसीमातिवर्तिषु ॥
विस्तारश्चेतसो यस्तु विस्मयः स उदाहृतः ॥

अव्याख्याने बीजमाह **स्पष्टमिति** । ननु कथं शोकादिसंभिन्नत्वेन करुणादीनां रसत्वम् । न च तेषां रसत्वं नास्तीति वाच्यम् । अत्राप्येतस्याश्रुतचरत्वात् । अश्रुपातादेर्दुःखाद्याविष्कारस्यानुदयप्रसङ्गाच्चेति चेत् यद्यपि करुणो रसः सुखदुःखसंभिन्नस्तथापि शोकावच्छिन्नस्य चैतन्यस्यानन्दांशे भग्नावरणस्य करुणरसत्वे निरतिशयस्यानन्दांशस्योत्कटेच्छाविषयत्वात् । शोकांशे बलवद्दोषाभावात् तत्र सामाजिकानां प्रवृत्तिः । वर्णनीयतन्मयीभावेन शोकाभिव्यक्तेरश्रुपातादयो भवन्तीति न किञ्चिदनुपपन्नम् । एवं बीभत्सभयानकयोरपीति दिक् ।

काव्यप्रकाशदर्पण:—एषां शृङ्गारादिरसानां यथासङ्ख्यमिति शेषः । स्थायिनो भावाः । तदाहुः—

स्रक्सूत्रवृत्त्या भावानामन्येषामनुगामकः ।
न तिरोधीयते स्थायी तैरसौ पुष्यते परम् ॥ इति

रतिलक्षणम् । यथा मम साहित्यदर्पणे—

रतिर्मनोऽनुकूलेऽर्थे मनसः प्रवणयितम् इति ।

इयं च मदनाविष्टस्त्रीपुरुषनिष्ठैव शृङ्गारस्थायी ।

व्यभिचारिणो ब्रूते—

निर्वेदग्लानिशङ्काख्यास्तथासूया मदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥३१॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥३२॥
सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥३३॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ॥३४॥

बालचित्तानुरञ्जनी—व्यभिचारिण इति । स्वावमाननं निर्वेदः । तत्त्वज्ञानेन आपदा ईर्ष्यादिना वा अस्योत्पत्तिः । निष्प्राणता ग्लानिरित्याद्या याऽसकृत् क्षुद्भिरस्या उत्पत्तिः । अनर्थप्रतिपत्तिः शङ्का, परक्रौर्याद् दुर्नयाद्वा उत्पत्तिः । असूया परोत्कर्षाक्षमा । गर्वदौर्जन्यमत्युत्पन्नो मदः । हर्षोत्कर्षः, पानादस्योत्पत्तिः । श्रमः स्वेदः अध्वगत्यादेरस्योत्पत्तिः । आलस्यं जृम्भादिमत्, जाड्यश्रमादिभिरस्योत्पत्तिः । दैन्यमनौजस्यम्, दौर्गत्यादेरस्योत्पत्तिः । चिन्ता ध्यानम् इष्टानिष्टौ । मोहो विचित्तता प्रीतिः दुःखावेगानुचिन्तनैरस्योत्पत्तिः । स्मृतिः संस्कारः । सदृशज्ञानचिन्ताद्यैरस्याउत्पत्तिः । धृतिः सन्तोषः ज्ञानशक्त्यादेरस्या उत्पत्तिः । हर्षः प्रसन्नतायां सत्यां अश्रूद्भेदादि उत्सवादिभ्यः अस्योत्पत्तिः । आवेगः संभ्रमः अभिनयादिभिरस्योत्पत्तिः । जडता अप्रतिपत्तिः, इष्टानिष्टदर्शनाश्रुतिभिरस्या उत्पत्तिः । गर्वः मदः अभिजनलावण्यबलैः स्वैष्यादिभिरस्योत्पत्तिः । निद्रा मनःसंमीलनम्, चिन्तालस्यश्रमादिभिरस्याउत्पत्तिः । अपस्मारः आवेशः ग्रहदुःखाद्यैरस्योत्पत्तिः । सुप्तं केवलश्वासोछ्वासक्रियाविशिष्टनिद्रोद्भवं बिम्बजृम्भादिमादनविशिष्टपरिणामादेरस्योत्पत्तिः । अमर्षः अभिनिविष्टता अधिक्षेपापमानादेरस्योत्पतिः । अवहित्थमाकारगोपनम् । उग्रता द्विष्टे पुरुषे अपराधदौर्मुख्यचौर्यौश्चण्डत्वम् । व्याधयः सन्निपाताद्याः । उन्मादः अप्रेक्ष्यकारिता, संनिपातग्रहादिभिरस्योत्पत्तिः । मरणं प्रसिद्धम् । गर्जितादिना उत्पन्नो मनःक्षोभस्त्रासः । वितर्कौ विचारः, सन्देहादस्योत्पत्तिः ।

सारबोधिनी—भावाभिव्यक्तेर्व्यभिचारिघटितत्वेन तानाह **व्यभिचारिण इति**। सामान्यलक्षणं प्रागुक्तम्। अथैषां विशेषलक्षणानि। यथा—

तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम्।
बलस्यापचयो ग्लानिराधिव्याधिसमुद्भवः॥
चिन्ता वैक्लव्यजनिका शङ्कानिष्टासमुन्नयः। यथा—
आनीतैव मया सीता किं नानीतं पुरुद्विषः।
स चेदायाति लङ्कायां न जाने किं भवेत्तदा॥
परोत्कर्षाक्षमाऽऽसूया शङ्कोपहसितादिकृत्।
संमोहानन्दसंभेदो मदो मद्योपयोगजः॥
श्रमः स्वेदोऽध्वगत्यादेर्निद्राश्वासादिकृन्मतः।
श्रमादिजन्यमालस्यं पुरुषार्थेष्वनादरः॥
दौर्गत्याद्यैरनौजस्यं दैन्यं मलिनतादिकृत्।
ध्यानं चिन्ताहिताप्राप्तिः सन्तापादिकरी मता॥
मोहो विचित्तता भीतिदुःखवेगानुचिन्तनैः।
स्मृतिः पूर्वानुभूतार्थविषयं ज्ञानमुच्यते॥
अभीष्टार्थस्य संप्राप्तौ स्पृहापर्याप्तता धृतिः।
सङ्कोचश्चेतसो व्रीडा वैवर्ण्याधोमुखत्वकृत्॥
वाक्पारुष्यकरी चित्तस्यावस्था चापलं मता।

वाक्पारुष्यकरीत्युपलक्षणं वधबन्धनयोः। अवस्था अविमृश्यकारिता।

मनःप्रसादो हर्षः स्यादिष्टावाप्तिःस्तवादिभिः।
अनर्थातिशयाच्चेतस्यावेगः संभ्रमो मतः॥
क्रियास्वपाटवं जाड्यं चिन्तोत्कण्ठाभयादिभिः।
मनःक्षेपस्त्वपस्मारो ग्रहावेशादिसंभवः॥

व्याप्तित्वेनास्य प्राप्तावपि पुनरुपादानं बीभत्सभयानकयोः संभवनियमाय। व्याध्यन्तरस्य विप्रलम्भादावपि संभवात्।

सुप्तं निद्रामुपेतस्य विषयानुभवस्तु यः।
निद्राशमनहेतुभ्यो विबोधश्चेतनागमः॥

विषयेत्यादि। स्वोपज्ञानमित्यर्थः।

कोप एव स्थिरतरो ह्यमर्ष इति कथ्यते॥

अवहित्थं तु लज्जाद्यैर्हर्षाद्याकारगोपनम् ।
अधिक्षेपापमानादेश्चेतश्चण्डत्वमुग्रता ॥
शास्त्रोपदेशमन्त्राद्यै रर्थनिर्धारणं मतिः ।
विरहादेर्मनस्तापो व्याधिर्दुःखाङ्गतादिकृत् ॥
संनिपातग्रहादिभ्य उन्मादश्चित्तविभ्रमः ।
रोगादिभिः प्रागवस्था मरणस्य मृतिर्भवेत् ॥

मुख्यमरणस्य भावत्वायोगात् । वस्तुतस्तु मूर्च्छाविशेष एव मरणम् । अन्यथा आलम्बनोच्छेदे भावत्वानुपपत्तेः । अत एवोक्तम्—"वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरत" इति ।

औत्पातिकैर्मनःक्षेपस्त्रासः कम्पादिकारकः ।
पूर्वापरविचारोत्थं भयं त्रासात् पृथग् भवेत् ॥
तर्को विचारः सन्देहाद् भ्रूशिरोऽङ्गुलिनर्तकः ॥

विचारो विमर्शः । ग्रन्थविस्तरभयात् सुगमत्वाच्चेति नोदाहृताः ।

काव्यप्रकाशदर्पणः — व्यभिचारिण इति ।

विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ ॥

तत्र तत्त्वज्ञानापदीर्ष्यादिभिश्चिन्ताग्लानिदैन्यादिकृत् स्वावमाननं निर्वेदः । सदृशदर्शनादिजोऽनुमानादिकृद्वासनोद्वेगः स्मृतिः । यथा मम—

स्नपयति समवायं स्मेरवक्त्रारविन्द-
स्फुटदधरपुटान्तर्दर्शिता [न्त] विभेदम् ।
अलसचलितमौर्वी...... ......किञ्चिदाङ्ग
कलयति च मनो मे पक्ष्मलाक्ष्याः कटाक्षः ॥

हर्षशोकप्रहारेणोत्कण्ठादिजोऽस्थानहसितगीतप्रलपितादिकृच्चित्तसम्मोह उन्मादः । **यथा ममैव—**

किं कन्दर्पमुखं पिबाम मधुपैरेतैर्नवैः पल्लवैः
...च्युतशरैः करोति जगतां जेतुं प्रयासं वृथा ।
निद्रातुं शयितुं प्रयातुमथवा स्थातुं प्रभुः को भवेत्
एकोऽसौ कलकण्ठकण्ठकुहरे जागर्ति चेत् पञ्चमः ॥

एवमन्येषामपि व्यभिचारिणां कारणकार्य्यस्वरूपोदाहरणानि लोकप्रसिद्ध्या मदीयसाहित्यदर्पणोक्तरीत्या बोद्धव्यानि । भावाश्रितवृत्तयो नाम । उद्देश्यतः त्रयस्त्रिंशदुक्ताः । अन्या अपि चित्तवृत्तयः

एषामेव विभावानुभावरूपतया एष्वेवान्तर्भवितुमर्हन्तीत्याशयः । किञ्च रत्यादीनामपि स्थायित्वाभावे सञ्चारित्वमेव, तल्लक्षणायोगात् । हासक्रोधादयः शृङ्गारवीरादौ लवणाकर इव बुद्बुदप्राया उन्मग्ननिर्मग्ना दृश्यन्ते । अयमेव विशेषः । निर्वेदादयः पुनर्व्यभिचारिण एव न कदाचन स्थायिनो भवितुमर्हन्ति । ये तु विक्रमोर्वशीये मदीयचन्द्रकलाख्यनाटिकाप्रभृतिषु तु उन्मादादेर्ग्रन्थव्यापित्वम् । न तूपात्तस्थैर्यम् । तदुक्तं मम साहित्यदर्पणे उन्मादादेर्न तु स्थायिमात्रेण स्थैर्यमिति ।

निर्वेदस्यामङ्गलप्रायस्य प्रथममनुपादेयत्वेऽप्युपादानं व्यभिचारित्वेऽपि स्थायिताभिधानार्थम् । तेन

निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।

यथा—

अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः ।।४४।।

बालचित्तानुरञ्जनी—ननु निर्वेदस्यामङ्गलस्य प्रथमत उपादानमसङ्गतमित्याशङ्क्य शान्तरसं प्रति स्थायिभावत्वमप्यस्यास्तीति प्रथमतस्तस्योपादानमित्याह **निर्वेदस्येत्यादिना** । निर्वेदः स्थायिभावो यस्य ।

शान्तरसमुदाहरति **यथेति** । भर्तृहरिवचनम् । स्पष्टम् । अत्र वैराग्यादिविभावः यमाद्यनुभावः धृत्यादिव्यभिचारी निर्वेदस्थायिभावः शान्तो रसः । अत्र विरक्ता एवाधिकारिणः । न चैवं सर्वविषयत्वाभावाद्रसत्वाभाव इति वाच्यम् । शृङ्गारस्यापि सर्वविषयत्वाभावेनारसत्वप्रसङ्गात् ।

सारबोधिनी—ननु "अष्टौ नाट्ये रसाः" इति नाट्यस्य विशिष्योपादानेन श्रव्यकाव्ये रसान्तरमायाति । तत् कीदृगित्यपेक्षायामाह **निर्वेद इति** । अमङ्गलप्रायत्वं विषयवैराग्यस्वरूपत्वात् । अत्र तत्त्वज्ञानजन्यनिर्वेदस्य स्थायित्वं कारणान्तरजन्यस्य तस्य सञ्चारित्वम् । तदुक्तम्—

स्थायी स्याद्विषयेष्वेव तत्त्वज्ञानाद्भवेद्यदि ।
इष्टानिष्टवियोगाप्तिकृतस्तु व्यभिचार्यसौ ।।इति।।

शान्तस्यापि करुणादिवद्रसत्वं बोध्यम् । **अहाविति** । अत्र यथा अहिरनिष्टापादकस्तथा हारोऽपीति साम्यदृष्टिः । एवमुत्तरत्रापि यथायोगमूहनीयम् । स्त्रैणं स्त्रीसमूहः । प्रलपतोऽपि मम शिव शिवेति

अनर्थकवाक्योच्चारणेऽपि भगवन्नामग्रहणमेव कुर्वतः । यद्वा, प्रशब्दः प्रकर्षार्थः । तथा च प्रवदत इत्यर्थः । अत्रानित्यत्वादिपरिभावितं जगदालम्बनम् । तपोवनाद्युद्दीपनम् । सर्वसमत्वादयोऽनुभावाः । धृत्यादयः सञ्चारिणः ।

काव्यप्रकाशदर्पणः—**यदिति** । यच्च निर्वेदस्थायिभावतामवलम्ब्य ग्रन्थकृता अवान्तररस-स्वीकारःकृतः तत्प्राचीनस्य कस्यचिदाचार्यस्यानुरोधेनैव । निर्वेदस्तु स्वावमाननमात्रत्वात् विषयालम्बन-मात्रत्वाच्च सञ्चारी भवितुमर्हति । शान्तस्तु शमस्थायिभावो नवमो भवितुमर्हति । यदुक्तं तत्रैव—

शमो निरीहावस्थायामात्मविश्रामजं सुखमिति ।

तदुक्तं कृष्णद्वैपायनेन—

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ।। इति

स्त्रैणं स्त्रीसमूहः ।

रतिर्देवादिविषया व्यभिचारी तथाञ्जितः ।।३५।।

भावः प्रोक्तः

आदिशब्दान्मुनिगुरुनृपपुत्रादिविषया । कान्ताविषया तु व्यक्ता शृङ्गारः ।

उदाहरणम्

कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतम् ।
अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते ।।४५।।
हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् ।।४६।।

एवमन्यदप्युदाहार्यम् ।

बालचित्तानुरञ्जनी—'रसभाव तदाभाःस' इत्यत्रासंलक्ष्यक्रमव्यङ्‌ग्यत्वेन भाव उद्दिष्टस्तस्येदानीं लक्षणमाह **रतिरिति** । देवादिविषया रतिरञ्चिता व्यञ्जिता सती भावः प्रोक्तः तथा व्यभिचारी सन् भावः प्रोक्तः "अञ्चित" इति पाठे वर्णित इत्यर्थः । देवादीत्यत्रादिशब्दार्थमाह **आदिशब्दादिति** । ननु कान्ता-दिविषयेति वक्तव्यम् । कान्ताविषयरतेरपि भावत्वादित्याशङ्‌क्याह **कान्ताविषयेति** । तुशब्दः देवादिविषय-रतेर्विशेषद्योतनार्थः । यद्यपि कान्ताविषयरतेर्भावत्वं तथापि विभावादिभिरुपचिता सा शृङ्गाररस इति प्रसिद्धा । देवविषयं भावमुदाहरति । किञ्चित् वचनम् भक्तस्य । हे ईश ! कण्ठकोणविनिविष्टं विषमपि मे महामृतम् । स्वीकृतममृतमपि भवच्छरीराद्भिन्नवृत्ति तदमृतं मे न रोचते ।

मुनिविषयं भावमुदाहरति **हरत्यघमिति** । यस्य प्रसादादहमेव विष्णुरित्यादिश्लोकेषु गुर्वादि-विषयभावोदाहरणं द्रष्टव्यमित्याह **एवमन्यदिति** ।

सारबोधिनी--क्रमप्राप्तं भावं लक्षयति रतिरिति । व्यक्ता विभावादिभिः पूर्णा । तेनान्याङ्गत्वेन विभावादिकृतपुष्टिराहित्येन रत्युद्बोधमात्रं न रस इति ।

कण्ठेति । विनिविष्टं निविडं संलग्नम् । उपात्तं चन्द्रकलारूपं भेदवृत्ति भेदावभासविषयीभूतं, तदा मे मह्यं न रोचते । अत्र महादेव आलम्बनम् । ईशत्वमुद्दीपनम् । स्तवोऽनुभावः । धृतिमाहात्म्यादयः सञ्चारिणः । ननु कथमस्य न रसत्वमिति चेदुच्यते । स्वतन्त्रेच्छया मुनिना तथैव परिभाषाकरणात् । नव रसा अन्ये भावा इति ।

हरतीति । नारदं प्रति कृष्णस्योक्तिरियम् । एष्यतः आगमिष्यतः शुभस्य हेतुरिति संबन्धः । योग्यता इष्टसंपत्तिहेतुर्गुणयोगः । भवदीयस्य भवत्संबन्धिनो यस्य कस्यचित् । तव दर्शनस्य किं पुनर्वक्तव्यमिति केचित् ।

काव्यप्रकाशदर्पणः--संप्रत्युद्देशक्रमप्राप्तान् भावादीन् निरूपयति रतिरिति । अञ्जितः मुख्यतया यद्यपि काव्यार्थस्याखण्डबुद्धिवेद्यतया आस्वादनदशायां गुणप्रधानभावभासो नास्ति, तथाप्यास्वादोत्तरकालं विवेचकैरयमनुभूयते । तदुक्तं तत्रैव साहित्यदर्पणे--"यथा मरिचखण्डादेरेकीभावेऽपि पानके । तत्रैकं कस्यचित् क्वापि तथा सञ्चारिणो रस" इति । योग्यता माहात्म्यम् । देवताविषयरतेरपि सर्वाकारेणाहङ्काररहितत्वे शान्तेऽन्तर्भावः । क्वचित् स्थायिनामपि प्रकरणपर्य्यालोचनया परस्परानुरागप्रकर्षपरिपोषराहित्याभावत्वैव । यदाह--हरस्तु किञ्चित् परिवृत्तधैर्य इत्यादौ । अत्र विषयानौचित्यं विषयाभासः । अनौचित्यप्रवृत्तित्वञ्च भरतादिप्रणीतशृङ्गारादिरसलक्षणात्मकदेशमात्रयोगे बोद्धव्यम् । तच्चाधममात्रगतत्वे तिर्यगादिनिष्ठत्वे बहुनायकनिष्ठत्वे वा शृङ्गाराभासः, हासस्य गुर्वाद्यालम्बनत्वे हास्याभास इत्यादि ।

अञ्चितव्यभिचारी यथा--

'जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया
मा मां संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः ।
नो यावत्परिरभ्य चाटुशतकैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः ॥४७॥

अत्र विधिं प्रत्यसूया ।

बालचित्तानुरञ्जनी--व्यभिचारिभावमुदाहरति । कस्यचित् कामुकस्य मित्रं प्रति वचनम् । हे भ्रातः ! अद्य मया स्वप्ने प्रियतमा कोपपराङ्मुखी सती पाणिना मा स्पृश इत्युक्त्वा गन्तुं प्रवृत्ता सती दृष्टा । ततः अहं यावदालिङ्ग्य प्रियवाक्यशतैः प्रियतमामाश्वासयामीति जाने तावद्धूर्तेन दैवेन अहं निद्रादरिद्रः कृतः, बोधित इत्यर्थः । अत्र को वा व्यभिचारीत्यत आह अत्रेति । अत्रेर्ष्याहेतुकस्य विप्रलम्भरसस्य सत्त्वेऽपि प्राधान्येनासूयाकृतस्य चमत्कारस्यैव प्रतीतेः तेन व्यपदेशः ।

सारबोधिनी—जाने इति। जाने स्मरामि। स्मृत्वैव कथयामि। **न** त्वाहार्यम्। **वस्तुतस्तु** जाने इत्यस्य "शठेन विधिना" इत्यादिनान्वयः। एतादृशमकार्यं शठस्य विधेरेवेति। जाने इति क्रोधप्रकर्षः। **मा मेति**। विषादे वीप्सा। यद्वा-एकं मापदं द्वितीयान्तकर्मोपस्थापकम्। **पाणिनेति**। पाणिकम्पेनैव निषेधः। कोपे वचनायोगात्। **नो यावदिति** लोकोक्तौ। नो अस्माकं प्रियाभितिं वा संबन्धः। **अत्रेति**। असूया शठपदगम्या। यद्यपि रतिभावेन स्वप्नोद्दीपितेन विप्रलम्भः प्रतिभातीति रसध्वनिरेवायं तथापि विधिविषयिण्यसूयैव काव्यसर्वस्वत्वेनानुभूयत इति प्राधान्येन व्यपदेशात् भावव्यपदेश इति।

तदाभासा अनौचित्यप्रवर्त्तिताः।

तदाभासा रसाभासा भावाभासाश्च। तत्र रसाभासो यथा—

स्तुमः कं? वामाक्षि! क्षणमपि विना यं न रमसे
विलेभे कः? प्राणान् रणमखमुखे यं मृगयसे।
सुलग्ने को जातः? शशिमुखि! यमालिङ्गसि बलात्
तपःश्रीः कस्यैषा? मदननगरि! ध्यायसि तु यम्॥४८॥

अत्रानेककामुकविषयमभिलाषं तस्याः स्तुम इत्याद्यनुगतं बहुव्यापारोपादानं व्यनक्ति।

बालचित्तानुरञ्जनी--एवं रसभावौ लक्षयित्वा क्रमप्राप्तं तदाभासं लक्षयति **तदिति**। 'तदाभास' इत्यत्र तच्छब्दार्थमाह **तदिति**। तत्र रसाभासभावाभासयोर्मध्ये रसाभासस्योदाहरणमाह **स्तुम इति**। पुंश्चलीं प्रति कामिवचनम्। हे शोभननेत्रे! यं प्रियं विना क्षणमपि न रमसे कं स्तुमः? यमन्वेषयसि युद्धयज्ञे प्राणान् को विलेभे दत्तवान्। यथा रणे प्राणत्यागे कृतार्थः तथान्वेष्यमाणे मृग्यमाणेऽपीत्यर्थः। हे चन्द्रानने बलात् यामालिङ्गसि सुलग्ने जातः स कः? कामवसते यं ध्यायसि? कस्यैषा तपःश्रीः?

अत्र शृङ्गाररसस्याभासत्वमाह **अत्रेति**। एकस्याः रमणमृगणालिङ्गनध्यानरूपानुचितस्य वक्तृव्यापारस्योपादानं कर्तृ, बहुकामुकविषयं शृङ्गारप्रवृत्ताभासमिति भावः।

सारबोधिनी—तदाभासा इति। **स्तुमः कमिति**। विलेभे दत्तवान्। **अत्रानेकेति**। यद्यपि बहुव्यापारोपादानस्यैकविषयत्वमपि संभवत्यविरोधात् तथापि यं यमित्यसकृत् कर्मोपादानमनेकगतत्वमेव प्रकटयति। यद्येकविषयत्वमभिप्रेतं स्यात् तदा सकृदेव कर्मोपादानं कुर्यात्। अत एव नगरी वत्ससञ्चारणयोग्येति नगरीति संबोधनमपि सङ्गच्छते। अथवा रमणान्वेषणालिङ्गनादिव्यापारा बहवस्ते च सर्वे एव वर्त्तमानकालीनानेकत्वविषयत्वे संभवन्ति। तदाह **अनेककामुकविषयमभिलाषमिति**। **वर्त्तमानव्यानविषये**

परिरम्भादेर्वर्तमानत्वायोगात् । अत्रानेककामुकविषयत्वेन बलादालिङ्गनगम्यानुभयनिष्ठत्वेन च शास्त्र-लोकातिक्रमात् रतेराभासता । तदुक्तम्—

उपनायकसंस्थायां मुनिगुरुपत्नीगतायाश्च ।
बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम् ॥

आभासत्वं रतेः कथमित्यादि । नन्वेतावता लौकिकस्याभासत्वमागतं न तु सामाजिकनिष्ठस्येति-चेन्न, वर्णनीयतन्मयीभावेनैव तस्य रसत्वात् इत्यसकृदावेदितमिति । तथा वीरादीनां गुर्वादिविषय-त्वेनाभासत्वम् ।

काव्यप्रकाशदर्पणः—स्तुम इत्यादि । अत्रैकस्या नायिकाया बहुविषया रतिः प्रतीयते । तदाह **अत्रेति** । "स्तुम" इत्यनेनानुगतं "यं विना न रमस"इति रमणव्यापारोपादानम् । आदिशब्दात् कः प्राणान् विलेभ इत्यादिनानुगतं यं मृग इत्याद्यन्वेषणादिव्यापारोपादानं कर्तृ तस्या अनेककामुकविषयमभि-लाषं व्यनक्ति । तथाहि । यदि ह्यत्र बहुव्यापारोपादानमेकविषयं स्याद्यच्छब्दस्यैकदैव निर्देशः स्यात् तदत्र स्तुत्यादिमुख्यार्थेन बाधितुं सोपहासः स काकुरनेनोचितमप्रवृत्तस्य [?] शृङ्गारस्याभासतामभिव्यनक्ति पर्यन्ते हास्यं परिपोषयन्तीति भावः ।

भावाभासो यथा

राकासुधाकरमुखी तरलायताक्षी सा स्मेरयौवनतरङ्गितविभ्रमाङ्गी ।
तत् किं करोमि विदधे कथमत्र मैत्रीं तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः ॥४९॥

अत्र चिन्ता अनौचित्यप्रवर्तिता । एवमन्येऽप्युदाहार्याः ।

बालचित्तानुरञ्जनी—भावाभासस्योदाहरणमाह **राकेति** । रावणवचनम् । सा सीता पूर्णचन्द्रनिभा-नना चञ्चलदीर्घनेत्रा प्रौढयौवनतरङ्गितविभ्रमस्थानम् । तत्तस्मात् किं करोमि ? अत्र सीताविषये मैत्रीं कथं विदधे ? तत्स्वीकृतिविषये उपायः कः ? अत्र भावस्याभासत्वमाह **अत्रेति** ।

सारबोधिनी—भावाभासमाह **राकेति** । रावणोक्तिः । स्मेरमीषत् प्रकाशितम् । तरङ्गितो विभ्रमो यत्र तथाविधमङ्गं यस्याः पूर्वपूर्वेणोत्तरोत्तराङ्गायितम् । विभ्रमा स्यादिति वा पाठः । क उपायः स्यादिति योजना । स्वीकृतिस्तस्यां ममेति ज्ञानम् । यद्वा स्वीकृतिर्वशीकृतिः । व्यतिकरः संबन्धः । अथवा व्यतिकर-शब्दो विनार्थः । तेन तत्स्वीकृतिं विना क उपाय इत्यर्थः । तथा च तदीयस्वीकाराभावः स्फुट एवेत्यननुरक्तविषयत्वेन चिन्ताया अनौचित्यप्रवृत्तेः ।

काव्यप्रकाशदर्पणः—राकेति । स्मेरमीषद्विकसितम् । अत्र प्रकरणवशात् कस्यचिद् दुर्लभस्यार्थं [विना ?] निवर्त्यमानायां नायिकायां चिन्ताख्यो भावाभासः ।

भावस्य शान्तिरुदयः सन्धिः शबलता तथा ।।३६।।

क्रमेणोदाहरणम् ।

तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते ।
इत्युक्ते क्व तदित्युदीर्य सहसा तत् संप्रमार्ष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात्तन्व्या च तद्विस्मृतम् ।।५०।।

अत्र कोपस्य ।

बालचित्तानुरञ्जनी–भावशान्त्यादिरुक्तमित्यत्रादिशब्दार्थमाह **भावस्येति** । भावशान्तिः, भावोदयः, भावसन्धिः, भावशबलः । तत्र शान्तेरुदाहरणम् **तस्या इति** । धृष्टनायकस्य वचनम् । तस्याः सपत्न्याः घनं श्रीखण्डादिविलेपनं यत् स्तनयुगं तस्य प्रकृष्टमालिङ्गनं, तेन विलेपनमयी मुद्रा तया लम्बितं वक्षः मम चरणानतिवृत्तेन किमिति गोपाय्यात् इति प्रियतमे उक्ते सति क्व, तद्विलेपनं नास्त्येवेत्यभिधाय तद्विलेपनं प्रमार्ष्टुं मया सहसा रभसेन सा प्रियतमा आकृष्टा, तस्याश्चालिङ्गनसुखववशात् वक्त्रेऽधिकारिणं[?] विस्मृतमभूत् । चशब्दः आलिङ्गनकोपशान्त्योरेककालत्वद्योतनार्थः । अत्र कोपाख्यभावस्य शान्तिमाह **अत्रेति** । शान्तिरित्यनुषज्यते । अत्र रत्युत्पत्तौ कोपशान्तिवत् संभोगशृङ्गारोत्पत्तौ ईर्ष्याविप्रलम्भरसोऽप्यस्ति ।

सारबोधिनी–**भावस्येति** । अत्रैकत्वमविवक्षितम् । एकस्य संन्धिशबलत्वायोगात् । शान्तिः प्रशमः । तुल्यावस्थयोः संवलनं संधिः । पूर्वपूर्वोपमर्द्देन परस्परोदयः शबलता । ननु भावप्रशमभावोदयस्थले भावप्रशमभावोदयाभ्यां भावशबलत्वं स्यादिति चेन्न, तत्र भावप्रशमोदयात्रस्थयोरेव वर्णनीयत्वात् । **अत्र तु पूर्वपूर्वोपमर्दस्येति** । यथा चैतत्तथा लक्ष्येषु वक्ष्यामः ।

तस्या इति । अन्यथा योगेनान्यत्र मुद्राङ्कस्तद्युक्तं मुद्राङ्कितम् । **अत्रेति** । **कोपस्येति** । पदस्य यथायोगं सौत्राभ्यां भावस्येति शान्तिरिति पदाभ्यामन्वयः । एवमुत्तरेष्वपि ।

एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यो मानपरिग्रहग्लपितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणं
मा भूत् सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ।।५१।।

अत्रौत्सुक्यस्य ।

बालचित्तानुरञ्जनी–भावोदयमुदाहरति **एकस्मिन्निति**। कविवचनम्। एकस्मिन् शयने सपत्नीनामग्रहे सति खिन्नया कयाचिन्मुग्धया प्रियवाक्यानि कुर्वन्नपि प्रियतमः संभ्रमादिव ज्ञातः। ततस्तूष्णीं स्थितः सन् नाभून्म्लान इवेति द्रुतमेव वेगविवर्तितकन्धरं यथा तथा पुनरवलोकितः। अत्र भावोदय इत्यत आह **अत्रेति**। उदयः इत्यनुषज्यते।

उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः
सत्सङ्गप्रियता च वीररभसोत्फालश्च मां कर्षतः।
वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलयन्
आनन्दी हरिचन्दनेन्दुशिशिरस्निग्धो रुणद्धयन्यतः॥५२॥

बालचित्तानुरञ्जनी–भावसन्धिमुदाहरति **उत्सिक्तस्येति**। रामस्य वचनम्। उत्सिक्तस्य तपसः पराक्रमस्य। पराक्रमस्य च निधिभूतस्य परशुरामागमनस्यान्तः संपर्के प्रियत्वं वीरस्यावेगाधिक्यञ्च एकतो मां कर्षतः। अनेनावेगाख्यो भावो दर्शितः। एष सीतापरिरम्भश्चान्यतो मां रुणद्धि? कीदृशः? मुहुश्चैतन्यमामीलयन्नित्यादि। अनेन हर्षाख्यो भावः। अनयोरावेगहर्षायोरत्र सन्धिः।

सारबोधिनी–संधिमाह **उत्सिक्तस्येति**। आत्मन्यहंप्रत्यय उत्सेकस्तद्युक्तस्य दृप्तस्येत्यर्थः। रभस उत्साहः। उत्फाल उद्रेकः। आवेगस्त्वराविशेषः। पूर्वार्द्धगम्यः। हर्षस्त्वपरार्द्धगम्यः।

क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा
दोषाणां प्रशमाय न श्रुतमहो कोपेऽपि कान्तं मुखम्।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति॥५३॥

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता। भावस्थितिस्तूक्ता उदाहृता च॥३६॥

मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन।
ते भावशान्त्यादयः। अङ्गित्वं राजानुगतविवाहप्रवृत्तभृत्यवत्।

बालचित्तानुरञ्जनी–भावशबलमुदाहरति **क्वाकार्यमिति**। उर्वशीविरहितस्य पुरूरवस इयमुक्तिः। केषां भावानां शबलत्वमाह **अत्रेति**। शबलतेत्यनुषज्यते। "क्वाकार्यं शशलक्ष्मणः क्व च कुलम्" इति वाक्यद्वयेन वितर्को दर्शितः। "भूयोऽपि दृश्येत सा" इत्यनेन औत्सुक्यम्। "दोषाणामुपशान्तये श्रुतम्" इत्यनेन मतिः। "अहो कोपेऽपि कान्तं मुखम्" इत्यनेन स्मृतिः। "किं वक्ष्यन्त्यपकल्मषाः कृतधियः" इत्यनेन शङ्का। "स्वप्नेपि सा दुर्लभा" इत्यनेन तद्दैन्यम्। "चेतः स्वास्थ्यमुपैहि" इत्यनेन धृतिः। "कः खलु युवा धन्योऽधरं धास्यति" इत्यनेन चिन्ता। ननु भावस्य शान्त्यादिवत् स्थितिरपि किं नोक्ता, नोदाहृता

चेत्यत आह। **भावस्थितिरिति**। "व्यभिचारी तथाञ्जित" इत्यादौ उक्ता, जाने कोपपराङ्मुखीत्यादावुदाहृता च। यद्यपि तत्र साक्षात् भावस्थितिर्नोक्ता। तथापि भावसत्तायाः स्थितिरूपत्वात् भावस्वरूपोदाहरणेनैव स्थित्युदाहरणमुक्तमेवेति भावः।

ननु भावशान्त्यादयो रसं प्रत्यङ्गानि। कथं तेषामङ्गित्वमत आह **मुख्य इति**। कदाचन रसापेक्षया सातिशयचमत्कारे सतीत्यर्थः। श्लोकगततच्छन्दार्थमाह भावेति।

नन्वेकस्यैवाङ्गित्वमङ्गत्वञ्च विरुद्धमित्याशङ्क्य दृष्टान्तमाह **अङ्गित्वमिति**। यथा राज्ञा अनुगतस्य पश्चाद्गतस्य विवाहप्रवृत्तस्य भृत्यस्य प्राधान्यं तथा।

सारबोधिनी—शबलतामाह **क्वाकार्यमिति**। देवयानिदर्शनानन्तरं ययातेरियमुक्तिः। "क्वाकार्यम्" इत्यनेन शान्तसञ्चारिवितर्कावगमः। "भूय" इत्यादिव्यङ्ग्येन शृङ्गारसञ्चार्यौत्सुक्येन शान्तसञ्चारिवितर्कबाधनम्। एवमुत्तरोत्तरं सङ्गमनीयम्। श्रुतमहो कोपेऽपीत्यादितः स्मृतिः। वक्ष्यन्तीत्यादितः शङ्का। स्वप्नेऽपीति दैन्यम्। चेतः स्वास्थ्यमिति धृतिः। कः खल्विति चिन्ता। अत्रेति पार्यन्तिकचिन्तया शान्तस्याप्युपमर्द्देन शृङ्गारस्य विश्रान्तिः। सा च शत्रुविजयपूर्वकराज्यलाभ इव चमत्कारप्रकर्षनिदानमिति भावः। ननु भावस्य शान्त्यादिवत् स्थितिरप्येकावस्था, सा कथं नोक्ता इत्यपेक्षायामाह **भावस्थितिरिति**। उक्ता "व्यभिचारी तथाञ्जित" इत्यनेन। उदाहृता च, "जाने कोपपराङ्मुखी" इत्यनेन। प्रशमाद्यवस्थाचतुष्टयानवस्थितो भावो भावस्थितिः।

ननु विभावादिसमूहालम्बने रसोऽङ्गतां प्राप्तो भवतु तत्प्रशमादीनामुदासीनानां कथं प्राधान्यमित्यत आह **मुख्ये रसेऽपीति**। अङ्गित्वं प्राधान्यम्। आपातत इति शेषः।

काव्यप्रकाशदर्पणः—भावेति। भावा व्यभिचारास्तेषां प्रशान्त्यादयश्चेति भावः। **राजेति**। यथा विवाहप्रवृत्तो भृत्यो राज्ञाऽप्यनुगम्यमानो लोकैरारब्धमुखे सुखतया [?] प्रेक्षत इत्यर्थः। इदं च व्यासवाल्मीकिकालिदासप्रभृतिमहाकविभिरनुगम्यजीवितभूतस्यासंलक्ष्यक्रमरूपस्य रसादेस्तावं परकोयग्रन्थव्याख्याप्रसङ्गेन स्तोकस्तोकमुक्तम्। अल्पेनापि च प्रसङ्गेन सन्दर्भेण सशेषविशेषमवगन्तुकामा मदीयसाहित्यदर्पणमवलोकयन्तु विद्वांसः।

अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः ॥३७॥
शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः।

शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यः, अर्थशक्तिमूलानुरणनरूपव्यङ्ग्यः, उभयशक्तिमूलानुरणनरूपव्यङ्ग्यश्चेति त्रिविधः ॥३७॥ तत्र—

बालचित्तानुरञ्जनी—एवमसंलक्ष्यक्रममुक्त्वा संलक्ष्यक्रममाह **अनुस्वानेत्यादिना**। घण्टावादनानन्तरं यदनुरणनं सोऽनुस्वानः तदा तत्सदृशत्वेन संलक्ष्यः क्रमो यस्य तस्य व्यङ्ग्यस्यावस्थितिर्यत्र सः संलक्ष्यक्रमध्वनिः घण्टावादवत् व्यङ्ग्य इति विवेकः। स त्रिविधः। शब्दार्थोभयशक्त्युत्थत्वेन। तदेव त्रैविध्यं प्रकटयति **शब्दशक्तीत्यादिना**। तत्र तेषां मध्ये शब्दशक्त्युद्भवं ध्वनिसंभेदं लक्षयति तत्रेति।

सारबोधिनी—रस एव तु पार्यन्तिकोऽङ्गीति लक्ष्यक्रमं विभजते **अनुस्वानेति**। अनुस्वानः प्रतिध्वनिः। तदाभासस्तत्सदृशः। संलक्ष्यः क्रमः पौर्वापर्यमर्थात् व्यञ्जकेन सह यस्य एवंभूतस्य व्यङ्ग्यस्य स्थितिर्यत्र ध्वनौ काव्यभेदे स इत्यन्वयः। यथा ध्वनिप्रतिध्वन्योः क्रमो लक्ष्यते तथा वस्त्वलङ्कृतितद्व्यञ्जकयोरित्यर्थः। शब्दश्चार्थश्च उभयं च तेषां या शक्तयः तत उत्तिष्ठति प्रादुर्भवति यः स तथा।

काव्यप्रकाशदर्पणः—संप्रति क्रमप्राप्तं विवक्षितान्यपरवाच्यभेदस्य लक्ष्यक्रमव्यङ्ग्यस्यार्थवादपूर्वकं विभागमाह **अन्विति**। अनुस्वानेऽनुरणनं तत्सदृशः। अत एव संलक्ष्यः क्रमः पौर्वापर्यं यस्य तथाविधव्यङ्ग्यस्य स्थितिर्यत्र ध्वनौ काव्यभेदे स शब्दस्यार्थस्य तदुभयस्य च शक्त्या। उत्थानमुखोऽर्थात् व्यङ्ग्यो यत्रेति विग्रहः। वृत्तावपि शब्दशक्तिमूलं प्रतीतिप्रधानबीजं यस्य तथाविधोऽनुरणरूपी यत्रेति समासः। एवमन्ययोरपि। शब्दात् शक्तेः [अर्थ] शक्तेस्तु साचिव्यमिति भावः। प्रधानत्वेनेति गुणीभूतव्यङ्ग्यनिरासः।

अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते ॥३८॥

प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा।

वस्त्वेवेति? अनलङ्कारं वस्तुमात्रम्। आद्यो यथा—

उल्लास्य कालकरवालमहाम्बुवाहं देवेन येन जरठोर्जितगर्जितेन।

निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः ॥५४॥

अत्र वाक्यस्यासंबद्धार्थाभिधायकत्वं मा प्रसाङ्क्षीदिति प्राकरणिकाप्राकरणिकयोरुपमानोपमेयभावः कल्पनीय इत्यत्रोपमालङ्कारो व्यङ्ग्यः।

बालचित्तानुरञ्जनी—अलङ्कारव्यङ्ग्यमुदाहरति **उल्लास्येति**। राजस्तुतिः। येन देवेन राज्ञा जवेन गर्जितेन सिंहनादेन कालकरवालस्य कृष्णखड्गस्य महाम्बु धाराजलं तस्य वाहः प्रवृत्तिः तमुल्लास्य रणे युद्धे, धाराभिः त्रिजगति प्रज्वलितरिपूणां प्रतापः निवारितः। देवादिशब्दानां परिवृत्त्यसहिष्णुत्वात् अन्योऽर्थः कालः कृष्णः करः कान्तिर्यस्य स चासौ वालो बालश्च, वबयोरभेदात् देवेन इन्द्रेण, रणध्वनिः धाराजलापेक्षया रिपूणां तेजसां रणे शब्दे सति महानातप इति। तेजोविषये जनकोलाहले सतीत्यर्थः। प्रतापः सन्तापः। अत्रोपमालङ्कारस्य व्यङ्ग्यत्वं प्रतिपादयितुमाह **अत्रेति**। राजवर्णनं प्रस्तुतमिति प्रथमोऽर्थः प्राकरणिकः। द्वितीयोऽप्राकरणिकः। अनयोरुपमानोपमेयभावः कल्पनीयः। अन्यथा द्वितीयवाक्यस्यासंबद्धार्थाभिधायकत्वं नाम दोषः स्यात्। अतोऽत्रोपमालङ्कारो व्यङ्ग्य इत्यर्थः। ननु असंबद्धार्थत्वादेव द्वितीयोऽर्थः परित्यज्य तदौपम्यं च न कल्पनीयमिति केचन द्वितीयार्थप्रत्यायनार्थमेव विना तारदंशपदानां [?] प्रयोगात् अस्य व्यङ्ग्यस्य शब्दान्वयव्यतिरेकाभ्यां शब्दशक्तिमूलत्वं ज्ञातव्यम्।

सारबोधिनी-प्रधानत्वेनेति। तेन शब्दस्य यत्र प्राधान्यं अर्थस्यापि तत्र साचिव्यमिति। यद्वा प्रधानत्वेनेत्यनेन गुणीभूतव्यङ्ग्यनिरासः। नन्वलङ्कारोऽपि वस्तु, तत् कथं भेद इत्यत आह **अनलङ्कारमिति**।

उल्लास्येति। अत्र द्वितीयोऽर्थः शक्त्योपस्थाप्यत इति केचित्। वस्तुतो व्यञ्जनयैवोपस्थाप्यते।

ननु तर्हि "भद्रात्मन"इत्यादिरप्यस्योदाहरणं स्यात्, इष्टापत्तेः। वाच्यपक्षे उल्लास्य तीक्ष्णीकृत्य उद्यम्य वा कालो वैरिसंहर्ता। मह उत्सव एवाम्बु तस्य वाहः। ननु महाम्बुवाहमिव करवालं तमिव तमित्यर्थः किं न क्रियत इति चेन्न, तथा सति शब्दस्य परिवृत्तिसहिष्णुत्वे शब्दशक्तिमूलत्वानापत्तेः। देवेन राज्ञा धाराजलैः खड्गधाराकान्तिभिः, अतएव लोके रत्नादौ पानीयत्वव्यवहारः। जरठं प्रौढं गम्भीरं वा उर्जितं बलपूर्वं गर्जितं सिंहनादः। सकल एव रणे सर्वस्मिन्नेव युद्धे यद्वा सकल इति प्रतापविशेषणम्। व्यङ्ग्यपक्षे कालकरः श्यामरश्मिः। बालो नूतनः महाम्बुवाहो महामेघः। देवेन इन्द्रेण रणः शब्दः अर्थात् कुलिशाघातात्। रिपूणाम् अर्थाज्जलशत्रूणाम् तेजसां प्रकृष्टस्तापो निर्वापितो विध्मापितः। धाराजलैरविच्छिन्नपानीयैरित्यर्थः।

नन्वेवमर्थयोरसंबन्धे वाक्यभेदः स्यादित्यत आह **वाक्यस्येति**। व्यङ्ग्येन सहासंबद्धो यः प्रकृतो नृपतिस्तदभिधायकत्वं मा प्रसाङ्क्षीत्, मा प्रसक्तं भवत्विति प्राकरणिकाप्रकराणिकयोयोरुपमानोपमेयभावः। सादृश्यं संबन्धः कल्पनीयो निर्णेतव्य इत्यत्र काव्ये उपमालङ्कारो व्यङ्ग्य इति व्यवहर्तव्य इत्यध्याहार्यम्। ननु रूपकं किमिति संबन्धतया न कल्पत इति चेन्मैवम्। भावानवबोधात्।

"तद्रूपकमभेदो य उपमानोपमेययोः"

तथा "उपमैव तिरोभूतभेदा रूपकमिष्यते"

इत्यस्य च दर्शनाद्रूपकस्योपमाघटितत्वेनोपमाज्ञानाधीनज्ञानविषयत्वेन प्रथमोपस्थितत्वेन तस्या एव संबन्धत्वं कल्पयितुं युज्यत इति।

काव्यप्रकाशदर्पणः–उल्लास्येति। अत्र किं रणनृपतिर्ग्रथनीयः तेनाभिधेयोऽयमर्थः। येन देवेन राज्ञा कालो विप्रसंहर्ता करवालः खड्गः स एव महदम्बु धाराजलं वहतीति महाम्बुवाहः तमुल्लास्येत्यादिरिति केचित् व्याचक्षते। अन्ये तु करवाल एव महाम्बुवाहो मेघ इति रूपकसमासं स्वीकुर्वन्ति। नन्वेवमेकदेशविवर्तिरूपकमिति द्वितीयार्थस्य स्फुटाभावात् कथमिहोपमाध्वनिरिति चेन्न, तथाहि यत्र "जलदभुजगजं विषम्" इत्यादौ गरलत्वारोपणं विना जलदभुजगयोः सादृश्यमस्फुटम् तत्रैव रूपकाङ्कारो न्याय्य इति। इह तु खड्गमेघयोः सादृश्यं व्यक्ततया परसाचिव्यमपेक्ष्य स्वमात्रविश्रान्तमिति न रूपान्तरापेक्षम्। यश्चात्र कालकरं कृष्णरश्मिं बालमभिनवमम्बुवाहमुल्लास्य देवेन मेघाधिकारिणा धाराकारैर्जलैरित्यादि द्वितीयोऽर्थः स्फुरति। तस्याप्तुं भवसिद्धस्याशक्यापल्लवस्याभिधया नियन्त्रणाद्व्यञ्जनयैव बोद्धुमुचितस्यासंबद्धत्वं मा प्रसाङ्क्षीदिति फणिमेघाधिकारिणोरुपमानोपमेयभावः कल्प्यत इति भावः।

तिग्मरुचिरप्रतापो विधुरनिशाकृद्विभो मधुरलीलः।

मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान्॥५५॥

अत्रैकैकस्य पदस्य द्विपदत्वे विरोधाभासः।

बालचित्तानुरञ्जनी-अत्रैवोदाहरणान्तरमाह **तिग्मेति**। हे विभो तिग्मरुचिरप्रतापः तीक्ष्णमनोज्ञप्रतापः विधुराणां रिपूणां निशाकृत् क्षयकारी मधुरा लीला यस्य मतौ माने तत्त्वे वृत्तिर्यस्य प्रतिपदं स्थाने स्थाने पक्षाणामात्मीयानामग्रणीः एवंविधो भवान् विभाति। अत्र को वा अलङ्कारो व्यङ्ग्यः कथं च तस्य वाक्याद्भेद इत्याह **अत्रेति**। तिग्मरुचिः सूर्यः स कथं प्रतापः! विधुश्चन्द्रः स कथमनिशाकृत् ? मधुर्वसन्तः स कथमलीलः ? मतिमान् कथमतत्त्ववृत्तिः ? प्रतिपत् अपक्षाग्रणीः कथमिति एकपदस्य पदद्वये क्रियमाणे विरोधाभासः प्रतीयते। एकपदत्वेन परिहारसंभवादस्य विरोधस्य भासत्वं प्राकरणिकत्वात् प्रथमं वाच्यार्थः प्रतीयते । पश्चाद्विरोधवाचकानामप्यादीनाम् अभावेऽपि पदच्छेदमात्रेण विरोधाभासः प्रतीयत इति विरोधालङ्कारो व्यङ्ग्य इत्यर्थः।

सारबोधिनी--अलङ्कारान्तरमपि व्यङ्ग्यमित्याह **तिग्मरुचिरित्यादि**। तिग्मः शत्रुषु रुचिरो मित्रेषु विधुराणां शत्रूणां निशेव निशा मरणं तत्करोति। विभो स्वामिन्। मधुरा लीला चेष्टा यस्य। मतिः शास्त्रतत्त्वमानम्। मानश्चित्तवृत्तिसमुन्नतिः। तयोस्तत्त्वेन वृत्तिर्यस्य। प्रतिपदं प्रतिस्थानम्। पक्षाणां स्वीयानामग्रणीः। विरोधाभासस्तु तिग्मरुचिः सूर्यः स चाप्रतापः। विधुश्चन्द्रः। स च न निशाकर्ता मधुर्वसन्तः स च लीलारहितः। मतिमान् तत्त्वज्ञः। स चातत्त्ववृत्तिः। प्रतिपत् पक्षाधिभूता तिथिः। सा न पक्षाग्रणीः। न पक्षादिभूतेति। **अत्रेति**। द्विपदत्वे ज्ञात इति शेषः। अत्र सामाजिकानुसंधानमेव द्विपदत्वज्ञानोपायोऽस्तु तथापि "मृणालवलयादि दवदहनराशिरित्यादिवद्विरोधस्य वाच्यतैव भवितुमर्हति। तस्मादेकैकस्य पदस्य द्विपदत्वे वाच्यो विरोधाभास एकैकस्य पदस्य व्यङ्ग्य इत्यध्याहार्यः वस्तुतोऽप्रकृतत्वेन।

अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो।
अहितः सहितः साधुयशोभिरसतामसि ॥५६॥

अत्रापि विरोधाभासः।

बालचित्तानुरञ्जनी—एवमेकस्य पदस्य छेदं विरोधाभासमुदाहृत्य भिन्नयोर्विरोधाभासमुदाहरति **अमित इति**। समितःसङ्ग्रामात् प्राप्तैरुत्कर्षैः हर्षद हे प्रभो त्वम् अमितः मितवस्तुरहितः असतामहितोऽसि। साधुयशोभिः सहितोऽसि। अत्रालङ्कारव्यङ्ग्यत्वमाह **अत्रापीति**। अमितोऽपि कथं समितः। सहितः अहितोऽपि कथं हितः हितसहितः इति विरोधाभासः। परिहारस्तु प्राकरणिकार्थाश्रयणात्।

सारबोधिनी--**अमित इति**। समितः सङ्ग्रामात् अमितोऽपरिमित इत्यर्थः। वस्तुतोऽमित इति; क्विबन्तस्य पञ्चम्यन्तं रूपम्। तेनापरिमितात् सङ्ग्रामादित्यर्थः। अन्यथा विषयभेदे विरोधप्रसङ्गस्याभावात्। अहितोऽसतामिति संबन्धः। **अत्रापीति**। भिन्नपदत्वेऽपि अप्रकृतत्वेनेति बोध्यम्।

निरुपादानसंभारमभित्तावेव तन्वते।
जगच्चित्रं नमस्तस्मै कलाश्लाध्याय शूलिने ॥५७॥

अत्र व्यतिरेकः।

अलङ्कार्यस्यापि ब्राह्मणश्रमणन्यायेनालङ्कारता।

बालचित्तानुरञ्जनी–अलङ्कारान्तरमुदाहरति **निरुपादानेति**। निर्गतोपकरणसामग्रीकजगच्चित्रमभित्तौ कुर्वते कलया ज्ञानेन चन्द्रलेखया श्लाघ्याय शम्भवे नमः। अत्रालङ्कारान्तरमाह **अत्रेति**। अत्रोपमानभूतादन्यस्माच्चित्रकाराद् उपमेयरूपस्य शम्भोराधिक्यमिति व्यतिरेकालङ्कारो व्यङ्ग्य इत्यर्थः। अलङ्कार्यालङ्कारयोर्भेदात् अलङ्कारस्योपमादेः अलङ्कारव्यङ्ग्य इत्यत्र अलङ्कारशब्दव्यपदेशः कथमत आह **अलङ्कार्यस्यापीति**। यथा ब्राह्मणः सन् श्रमणो भवति पश्चात् भूतपूर्वगतया ब्राह्मण इत्युच्यते तथा अलङ्कारोऽप्यङ्गितया प्रधानव्यङ्ग्यपदवीमधिरोहते। अत्रालङ्कारत्वेन दृष्टत्वात् प्रकृतेऽप्यलङ्कार इत्युच्यत इत्यर्थः।

सारबोधिनी--**निरुपादानेति**। उपादानम् उपकरणं तूलादि। अभित्तौ शून्ये। चित्रं नानाकारमालेख्यम्। कला चन्द्रषोडशांशः। लेख्यक्रियायां कौशलञ्च। अत्र व्यतिरेक इति व्यङ्ग्य इत्यकषञ्जनीयम्। अत्र हि चित्रेणालेख्येनाप्रकृततया व्यङ्ग्येनानुभावेन व्यङ्ग्यस्य तत्कर्तुरप्रकृतस्य शूलिनश्च व्यतिरेकः सम्बन्धः प्रतीयते। तथाहि अन्ये शिल्पिनः अधारभित्याद्युपादानेन चित्रं कुर्वन्ति, अयं त्वन्यथैवेति तेभ्यः शूलिन उत्कर्षः प्रतीयते इति। न च तत्र वृत्त्यन्तरमित्यत आह **व्यङ्ग्य इति**। **ब्राह्मणेति**। श्रमणे बौद्धसंन्यासिनि यथा ब्राह्मणव्यपदेशस्तथाऽलङ्कार्यस्याप्यलङ्कारत्वव्यपदेश इत्यर्थः। वस्तुतो वाच्यापेक्षया प्राधान्येऽपि रसापेक्षया गुणीभावादलङ्कारत्वमेवेति।

काव्यप्रकाशदर्पणः—उपादानमुपकरणत्वं चित्रम्। नानाप्रकारकमालेख्यं च कलाशक्तिः। अत्र शिल्पिभ्य उत्कर्षप्रतीतेर्व्यतिरेकालङ्कारः। ननूक्तव्यङ्ग्यस्य प्राधान्ये ध्वनिरिति। इह च व्यङ्ग्यानामलङ्काराणां प्राधान्येऽलङ्कारत्वमेव। तत् कुतः? अलङ्कारत्वात्। यदाहुः—"काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते" इति। अत आह **अलङ्कार्यस्यापीति**। श्रमणः पाखण्डविशेषः। न च रसाद्युत्कर्षमात्रेणालङ्कारता वाच्यवाचकालङ्करणरसाद्युत्कर्ष एव हि तथाङ्गीकारात्। रसाद्यपेक्षया पुनरप्राधान्येऽपि न काचित् क्षतिरित्युक्तमेव।

वस्तुमात्रं यथा

पंथिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे।
उण्णअपओहरं पेक्खिऊण जइ वससि ता वससु॥५८॥

अत्र यद्युपभोगक्षमोऽसि तदा आस्स्वेति व्यज्यते।

बालचित्तनुरञ्जनीः–एवमलङ्कारव्यङ्ग्यमुदाहृत्य वस्तुमात्रव्यङ्ग्यमुदाहरति **वस्तुमात्रम् इत्यादि**। मा पथिक रात्र्यन्धक इह पत्थरत्थले ग्रामे। सत्थरं स्रस्तरं तृणादितुल्यमाणं मनाक्, एत्थि नास्ति। उण्णअपओहरं उन्नतपयोधरे मेघान् पश्येदित्येत्वम्। स्तनपक्षे द्विवचनस्य बहुवचनमिति बहुवचनम्। किं च पेक्खिऊण यदि वससि तदा वस। प्रस्थरस्थलमित्यनेन तत्रत्यानां स्त्रीणां दारुणसंभोगत्वं प्रतिपाद्यते।

सारबोधिनी–वस्तूदाहरति **पंथिअ इति**। स्वयंदूती–द्व्यर्थशब्देनाच्छाद्य रहस्यं पथिनं कथयति।

पथिक नात्र स्रस्तरमस्ति मनाक् प्रस्थरस्थले ग्रामे।
उन्नमतः पयोधरान् दृष्ट्वा यदि वससि तद्वस॥

पक्षान्तरे सत्थरं शास्त्रम् पत्थरत्थले मूर्खवत्कुले ग्रामे, न तु नगरे। पयोधरान् स्तनान्। प्राकृते द्विवचनस्थाने बहुवचनम्। अत्र शास्त्राभावादाकारेङ्गितज्ञानानधिष्ठिते ग्रामे सति चैवंविधोद्दीपने उन्नतस्तनदर्शनेन को नाम क्षमोऽन्यत्र गच्छतीति वदन्त्याः अभिप्रायः प्रकाशत इति वस्तुन्यपि व्यङ्ग्ये शब्दशक्तिमूलता। नानार्थशब्दानुपादाने प्रदर्शितव्यङ्ग्यानवगतेः। तदाह ब्रवीति। एतेन द्वितीयार्थेष्वेव शब्दशक्तिमूलता। उपभोगक्षमत्वेन स्थितौ पुनरर्थशक्तिमूलत्वमिति निरस्तम्। तत्रापि शब्दशक्त्युपयोगस्य दर्शितत्वात्। न च वाच्यव्यङ्ग्ययोरसम्बन्धे वाक्यभेदः स्यादिति वाच्यम्। आच्छाद्याच्छादकभावस्यैव संबन्धत्वात्। अत्र वाच्यमभिभूयैव व्यङ्ग्यस्य स्थितत्वात् न तयोरुपमानोपमेयभावः संबन्धः। द्वयोः समप्राधान्य एव तदवकाशादिति।

काव्यप्रकाशदर्पणः—पथिक नात्र प्रस्तरोऽस्ति मनाक् प्रस्थरस्थले ग्रामे।
उन्नतपयोधरां प्रेक्ष्य यदि वससि तद्वस॥

प्रस्तरणस्तृणादिशय्या। प्रस्तराः पाषाणाः। पयोधरो मेघः। व्यङ्ग्यपक्षे सत्तरं शास्त्रं रत्याद्यनुशासकम्। उन्नतपयोधरां माम् इत्यर्थः। न चेह स्रस्तरशब्दस्य शास्त्रार्थत्वे उपमाध्वनिः, सादृश्यस्याविवक्षितत्वात्। रहस्यसङ्गोपनार्थमेव द्व्यर्थप्रयोगः।

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम्।
यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च॥५६॥

अत्र विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इति ध्वन्यते।

बालचित्तानुरञ्जनी—अत्रैवोदाहरणान्तरमाह **शनिरिति**। भो नरेन्द्र त्वं यस्मै कुप्यसि तं शनिः शनैश्चरः अशनिर्वज्रश्च उच्चैर्निहन्ति। यत्र पुनः पुरुषविषये प्रसीदसि स पुरुषः उदारः अनुदारः अनुगता दारा यस्य एवंविधश्च सन् भवति। अत्र पूर्वार्द्धमेवोदाहरणम्। उत्तरार्द्धे उदारः अनुदार इति विरोधालङ्कारसद्भावेन अलङ्काररहितवस्तुमात्रव्यङ्ग्यस्यानुदाहरणत्वात्। न च पूर्वार्द्धेऽपि विरोधालङ्कारसद्भावात् कथमुदाहरणत्वमिति वाच्यम्? शनिरन्यः अशनिरन्यः इति विषयभेदेन विरोधाभावात्। अत एवात्र विषयभेदप्रदर्शनपूर्वकं वस्तुमात्रव्यङ्ग्यं दर्शयति **अत्रेति**। शब्दतः शनित्वाशनित्वरूपेण विरुद्धौ हनन लक्षणमेकं कार्यव्यत्ययेन, [कुरुतः] कदाचिच्छनिः कदाचिदशनिरित्यादिक्रमेण।

सारबोधिनी—उदाहरणान्तरमाह **शनिरिति**। अशनिः शनिविरोधी वज्रञ्च। असुरवन्नत्रो विरोधित्वमर्थः। उदारो महान् अनुदारस्तदितरः। पक्षे न विद्यते उदारो यस्मात् अनुगतदार इति वा। नृपप्रसादेन धनवत्तया प्रवासाद्यनुभवात् अनुगतदारत्वम्।

अत्र केचित्—अत्र द्वितीयार्थ एव विरोधः। विरुद्धयोर्द्वयोर्धर्मयोरुदारानुदारत्वयोरेकत्र धर्मिणि प्रतीतेः। न तु पूर्वार्द्धे, शन्यशन्योर्हननक्रियायां समुच्चयेनैवान्वयसंभवात्। तेन पूर्वार्द्धं प्रसङ्गादुक्तम्। प्रकृतोदाहरणं परार्द्धमेव। अत एव विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इत्यत्र **विरुद्धावपि**

द्विवचनेनैकस्यैव विरोधस्य सूचनम्। विरोधद्वये विरुद्धानां चतुष्टयेन बहुवचनं विदध्यादित्याहुः। **तन्न**। यत एकस्मिन्नेव नृपतिविद्विषि विरोधिद्वय हन्यमानत्वेन विरोधिद्वयहननत्योः शत्रुशत्रुत्वेन मित्रत्वात्। यच्चोक्तं नैविरुद्धाविति द्विवचनेनैकस्यैवा विरोधस्य सूचनमिति तदपि न चारु। हननस्य भानस्य चैकैकस्य कार्यस्य पृथक् पृथक् द्वाभ्यां निष्पादनेन द्विवचनस्यैव न्याय्यत्वात्। अत एवोक्तम्, **एकं कार्यमिति**। एकत्र कार्ये चतुर्भिर्विरोधिभिरनिर्वाहात्।

काव्यप्रकाशदर्पणः—शनिर्ग्रहः। अशनिः कुलिशम्। अत्रैकयोरेकविषयत्वाभावात् न विरोधालङ्कारः। उदारो महान् अनुगता दारा यस्येत्यनुदारः। अत्र तु विरोधालङ्कार एव। चकारस्य समुच्चयार्थत्वेनापि गतार्थत्वान्न विरोधालङ्कारस्य वाच्यत्वम्। **अत्रेति**। विरुद्धौ शन्यशनी।

अर्थशक्त्युद्भवोऽप्यर्थो व्यञ्जकः संभवी स्वतः ॥३९॥

प्रौढोक्तिमात्रात्सिद्धो वा कवेस्तेनोम्भितस्य वा।

वस्तु वालङ्कृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत् ॥४०॥

वस्त्वलङ्कारमथवा तेनायं द्वादशात्मकः।

स्वतःसंभवी न केवलं भणितिमात्रनिष्पन्नो यावद्बहिरप्यौचित्येन संभाव्यमानः। कविना प्रतिभामात्रेण बहिरसन्नपि निर्मितः कविनिबद्धेन वक्त्रेति वा द्विविधोऽपर इति त्रिविधः। वस्तु वालऽङ्कारो वाऽसाविति षोढा व्यञ्जकः। तस्य वस्तु वाऽलङ्कारो वा व्यङ्ग्य इति द्वादशभेदोऽर्थशक्त्युद्भवो ध्वनिः।

बालचित्तानुरञ्जनी—एवं द्विविधं शब्दशक्तिमूलानुरणनरूपं ध्वनिमुदाहृत्यार्थशक्तिमूलानुरणनरूपं सभेदमाह **अर्थेति**। अर्थशक्त्यद्भवा द्वादशात्मक इत्युपरिष्टात् संबन्धः। ध्वनेर्द्वादशविधत्वं व्यञ्जकार्थभेदाद्वक्तुं व्यञ्जकस्यार्थस्य द्वादशविधत्वमाह। **अर्थो व्यञ्जक इत्यादिना**। श्लोकद्वयं व्याकरोति **अर्थं स्वतःसंभविनः प्रतिपक्षभूतं इत्यादिना। प्रौढोक्त्यादि**विशेषणानुगतं किमप्यन्तरमाह। **इदं प्रथमकल्पित इति**।

ननु स्वतःसंभविनोऽपि कविनिबद्धत्वेनानयोः को भेदोऽत आह **तत्रेति**। यद्यप्युभयत्र कविनिबद्धत्वं तथापि एकत्रौचित्येन हि संभावितत्वं अन्यत्र तदभाव इति भेद इत्यर्थः। इदं प्रथमकल्पस्य **द्वैविध्यं प्रौढोक्तिमात्राद्यर्थ**व्याख्यानेन दर्शयति **कविनेत्यादिना** कवेः। प्रौढोक्तिमात्रसिद्धः, तेन कविना निबद्धः कल्पितो यो वक्ता तस्य प्रौढोक्तिमात्रसिद्धश्चेति द्विविधः। **वेति** त्रिविध इत्यर्थः। सूत्रगतौ वाशब्दौ चकारद्योतकौ। एवं प्रथमश्लोकं व्याकृत्य द्वितीयं व्याकरोति **वस्तु वेति**। त्रिधा व्यञ्जकोऽसावर्थः प्रत्येकं वस्त्वलङ्कारभेदेन द्विविध इति षोढा भवति। अर्थस्य द्वादशविधत्वेन तद्गतध्वनेरपि द्वादशविधत्वमाह **इति द्वादशेति**।

सारबोधिनी—**अर्थशक्त्युद्भव** इति। ध्वनाविति शेषः। स्वतःसंभवी लोकेऽपि दृष्टः। **प्रौढोक्ति**-श्चमत्कारानुगुणोक्तिः मात्रपदेन बहिः संभववारणम्। तेन कविना उम्भितस्य पूरितस्य वर्णनया उम्भितो नायकादिः। उभ उम्भ पूरण इति धात्वनुसारात्। कविनिबद्धवचनं कविवचनादधिक रागप्रकटकतयाऽधिक-चमत्कारकमिति द्वयोर्भेदः। अन्यथा स्वतःसंभवित्वं प्रौढोक्तिनिष्पन्नत्वं चेति द्वैरूप्यमेव विदध्यात्। तदाह **अपरो द्विविध** इति। असौ त्रिरूपोऽप्यर्थो वस्त्वलङ्कारूपेण प्रत्येकं व्यङ्ग्योऽपि वस्त्वलङ्काररूपाभ्यां **द्विरूप एवेति**। तेन हेतुनाऽयमर्थशक्त्युद्भवो ध्वनिर्द्वादशात्मको द्वादशविधः।

काव्यप्रकाशदर्पणः—अर्थस्य शक्त्या उद्भवः। अर्थव्यङ्ग्यस्य यत्र काव्येति। न कविना उत्थितस्य काव्ये पूरितस्य विरुद्धस्येति वाच्यम्। न खलु कवेस्तन्निबद्धस्यैव रागाद्याविष्टता। तेन प्रौढोक्तेस्तन्नि-बद्धवक्तृप्रौढोक्ति रधिकं सहृदयचमत्कारिणीति पृथगुक्ता।

क्रमेणोदाहरणम्—

अलससिरोमणि धुत्ताणं अग्गिमो पुत्ति धणसमिद्धिमओ।
इअ भणिएण णअङ्गी पप्फुल्लविलोअणा जाआ॥६०॥

अत्र ममैवोपभोग्य इति वस्तुना वस्तु व्यज्यते।

बालचित्तानुरञ्जनी—तत्र वस्तुरूपव्यङ्ग्यस्योदाहरणमाह **अलसेति**। पुत्ति हे पुत्रि अलससिरो-मणि अलसशिरोमणिः। धुत्ताणं अग्गिमो धूर्तानामग्रिमः। धणसमिद्धिमओ धनसमृद्धिमयः। इअ भणिएण इति भणितेन, णअङ्गो नताङ्गो, पप्फुल्लविलोअणा प्रफुल्लविलोचना, जाआ जाता। व्यङ्ग्यमाह **अत्रेति**। अलसत्वादस्यान्यत्र गमनाभावः। धूर्तत्वेन संभोगे रतिसम्पादकत्वम्। धनिकत्वेन धनदातृत्वमित्या-दिना वाक्यार्थरूपेण वस्तुना ममैवायमुपभोगयोग्यः। अहमेव चातुर्यात् एनमावर्जयिष्यामीति व्यज्यत इत्यर्थः।

सारबोधिनी—स्वतःसंभविनो वस्तुव्यञ्जकतामाह **अलसेति**।

अलसशिरोमणिः धूर्तानामग्रिमः पुत्रि धनसमृद्धिमयः।
इति भणितेन नताङ्गी प्रफुल्लविलोचना जाता॥

अलसत्वेनाप्रवासित्वम्। धूर्तत्वेन विदग्धत्वम्। धनसमृद्धया सुखित्वम्। प्रफुल्लविलोचनत्वेन हर्षो व्यज्यते। **अत्रेति**। वस्तुना प्रफुल्लविलोचनत्वादिरूपेण।

काव्यप्रकाशदर्पणः—अलसशिरोमणिः धूर्तानामग्रणीः पुत्रि धनसमृद्धिमयः।
इति भणितेन नताङ्गी प्रफुल्लविलोचना जाता॥

नताङ्गीति वेश्याया विशेषणम्। **अत्रेति**। वाच्येन वस्तुना मय्यैवोपभोग्य इति वस्तु व्यज्यत इति संबन्धः। अहं तु धन्या उक्तप्रकाररागावेशदायिवल्लभतयेति भावः।

धन्यासि या कथयसि प्रियसङ्गमेऽपि विस्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किञ्चिदपि स्मरामि ।।६१।।

अत्र त्वमधन्या, अहं तु धन्येति व्यतिरेकालङ्कारः ।

बालचित्तानुरञ्जनी—वस्तुरूपस्वतःसंभविनः अलङ्कारव्यङ्ग्यस्योदाहरणमाह **धन्यासीति** । हे सखि त्वं धन्यासि ! या त्वं रतान्तरेषु रतिविशेषेषु प्रियसङ्गेऽपि विश्वस्तप्रियवचनशतानि कथयसि । अहं तु प्रियेण करे नीवीं प्रति प्रणिहिते सति यदि किञ्चिदपि स्मरामि तर्हि सख्यः शपामि । न स्मराम्येव सुखपारवश्यादित्यर्थः । अत्र शपो नात्मनेपदम् । अत्रालङ्कारव्यङ्ग्यमाह **अत्रेति** । त्वमधन्या संभोगवृत्तान्तस्मरणाभावात् । अहं धन्या सुखातिशयेन तदानीन्तनवृत्तान्तस्मरणाभावात् । उपमानादुपमेयस्याधिक्ये व्यतिरेक इति व्यतिरेकालङ्कारो व्यज्यते ।

सारबोधिनी—स्वतःसंभविनो वस्तुनोऽलङ्कारव्यञ्जकतामाह **धन्यासीति** । प्रणिहिते नीव्यां करोऽर्पयितव्य इति प्रणिधानविषयीकृते मनसि सङ्कल्पिते न त्वर्पिते । अवाचकत्वापातात् भावलघुत्वापाताच्च **शपामीति** । अत्र मिथ्या निरसनमात्रार्थत्वान्न 'शपथे शप' इत्यात्मनेपदम् । तद्धेतुशरीरस्पर्शस्यैव शपथत्वात् । वैदग्ध्यतदभावाभ्यां धन्याधन्यत्वे इत्याह **अहं धन्या त्वमधन्येति** । अत्र सखीं प्रति धन्योक्तिर्विप्रलम्भाय न विवक्षिता । अन्वयानुपपत्या धन्यासीत्यत्राधन्यत्वे लक्षणेति निरस्तम्, विप्रलिप्सयापि धन्यत्वस्यैव विवक्षितत्वात् ।

दर्पान्धगन्धगजकुम्भकपाटकूटसङ्क्रान्तिनिघ्नघनशोणितशोणशोचिः ।
वीरैर्व्यलोकि युधि कोपकषायकान्तिः कालीकटाक्ष इव यस्य करे कृपाणः ।।६२।।

अत्रोपमालङ्कारेण सकलरिपुबलक्षयः क्षणात् करिष्यते इति वस्तु ।

बालचित्तानुरञ्जनी—स्वतःसंभविनोऽलङ्कारवस्तुव्यञ्जकस्यार्थस्योदाहरणमाह **दर्पान्धेति** । यस्य करे कृपाणः खड्गः, युधि युद्धे, कोपेन कषायकान्तिः महाकाल्याः कटाक्ष इव वीरपुरुषैर्व्यलोकि दृष्टः । कीदृशः ? दर्पेणान्धो यो गन्धगजः तस्य कुम्भ एव कपाटं तस्य कूटः शिखरं तत्र सङ्क्रान्तेर्निघ्नं प्रधानं घनं यच्छोणितं [तद्वत्] शोणशोचिः रक्तकान्तिः । अत्र व्यङ्ग्यमाह **अत्रेति** । वाच्येनोपमालङ्कारेण रिपुक्षयकरणलक्षणं वस्तु व्यज्यत इति शेषः ।

सारबोधिनी—स्वतःसंभविनोऽलङ्कारस्य वस्तुव्यञ्जकतामाह **दर्पेति** । यस्य गन्धमाघ्रायान्ये गजाः पलायन्ते स गन्धगजः । निघ्नमापन्नं, कषाया रक्ता । **अत्रेति** । उपमालङ्कारेण स्वतःसंभविना । सादृश्यस्य बहिरपि सत्त्वात् ।

अत्र केचित्—क्षणात् सकलरिपुक्षयकारित्वं कालीकटाक्षधर्मः। तत्साहश्यावगमे तदवगमो न स्यात् तत्सहशात्तद्धर्मावगमानुपपत्तेः। तस्मादुपमापदेनात्रोत्प्रेक्षाभिधानमित्याहुः। तन्न। तत्साहश्यावगमात् तद्धर्मस्य तन्मात्रवृत्तिरूपस्यावगमानुपपत्तिर्नतूभयसाधारणस्य। तेन रिपुबलक्षयकारित्वस्य कालीकटाक्षकृपाणोभयसाधारणस्य कृपाणेऽत्रबोधे न काचिदनुपपत्तिः। किञ्च, यदुक्तमुपमापदेनोत्प्रेक्षाभिधानं तदपि न, तथा सत्युत्प्रेक्षायाः कविप्रौढोक्तिनिष्पन्नत्वेन स्वतःसंभवित्वविरहेण तल्लक्ष्यता न स्यात्।

मिश्रास्तु—साम्यावगमानन्तरं उपमानगतधर्मान्तरमुपमेये प्रतीयत इति यथोक्तव्यङ्ग्यावगमे न बाधः। तदुक्तम्—"धर्मयोरेकनिर्द्देशेऽन्यसंवित्साहचर्यतः।" यथा—"कैलासगौरं वृषमारुरुक्षोः" इत्यत्र गौरत्वनिर्देशेनोच्छ्रायस्येत्याहुः।

काव्यप्रकाशदर्पणः—दर्पेति। गन्धगजो मत्तगजः। निघ्नमिति। शिष्टं दत्ता। अत्र हि यस्य कस्यचित् सदृशं वस्तु तस्य कार्यं करोति। तेन कालीकटाक्षतया संभाव्यमानः कृपाणः दृष्ट इति संभावनोत्थापनादुत्प्रेक्षैवेयमिति चण्डिदासपण्डितः। एतच्चिन्त्यम्। तथाहि कालीकटाक्षदर्शिनां भयक्षयो भवति तयैव त्वत्कृपाणदर्शिनामपि वैरिणामुपमाया युगत्वात्। इह च साधारणधर्मे बिम्बप्रतिबिम्बभावो नोत्प्रेक्षायां घटत इति वादिनां श्रीधरसान्धिविग्रहिकमधिक्षिपन्ते।

यदात्मनो विरचितं—

कण्ठे लुठन् काचन यक्षसूत्रं संवीक्षमाणः शितराम धैर्यः।
श्यामोपभासेतडितोपगूढ लसद्वलाङ्कः किमु वारिवाहः॥

इति श्लोकं दर्शमन्ति तदप्ययिचाररिताभिधानम्।

गाढकान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः।
ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरम् ॥६३॥

अत्र विरोधालङ्कारेणाधरनिर्दशनसमकालमेव शत्रवो व्यापादिता इति तुल्ययोगिता मम क्षत्याप्यन्यस्य क्षतिर्निवर्ततामिति तद्बुद्धिरुत्प्रेक्ष्यते इत्युत्प्रेक्षा च। एषदाहरणेषु स्वतः सम्भवो व्यञ्जकः।

बालचित्तानुरञ्जनी—अलङ्काररूपस्वतःसंभविनोऽलङ्कारव्यङ्ग्यस्योदाहरणमाह **गाढकान्तेति**। **यो राजा युद्धे कोपेन स्वकीयाधरं निर्द्दशन् गाढप्रियदन्तक्षतदुःखं कथयन् शत्रुस्त्रीजनस्य ओष्ठविद्रुमदलान्यमोचयत्।**

सारबोधिनी—स्वतःसंभविनोऽलङ्कारस्यालङ्कारव्यञ्जकतामाह **गाढेति**। **विरोधेति**। अत्रेष्ठविषयकदशनमोचनयोर्विरोधः। प्रतियोगिभेदेनाभास इति। यद्वा विरोधपदेनात्र कार्यकारणपौर्वापर्यविपर्ययरूपातिशयोक्त्यलङ्कारोऽभिधीयते। यतः स्वाधरनिर्द्दशनं कारणभूतं वैरियोषिदोष्ठानां कान्तदन्तक्षतमोचनं कार्यभूतं समकालतया निर्दिष्टमिति तुल्ययोगितेति।

अत्र केचित् अधरो निर्द्दष्टश्च, शत्रवो व्यापादिताश्चेति। तुल्यकालमेककालं योगो ययोस्तौ तुल्ययोगिनौ। तयोर्भावस्तुल्ययोगितेति व्युत्पत्त्या समुच्चयालङ्कारो व्यज्यत इत्यर्थः। न तु प्रकृतानामप्रकृतानां वा गुणक्रियान्यतरैकरूपधर्मसंबन्धात्मकायास्तुल्ययोगिताया प्रसङ्गोऽपीत्याहुः।

अन्ये तु अधरदशनशत्रुव्यापादनयोर्वीरानुभावत्वेन प्रकृतयोः सूर्यं[?]क्रियारूपैककालोपाधिसंबन्धेन तुल्ययोगितैवेति वदन्ति। तद्बुद्धिर्नृपबुद्धिरित्यर्थः। चकारेण संसृष्टिसूचनम्।

काव्यप्रकाशदर्पणः—**गाढेति**। **विरोधालङ्कारेणेति**। विरोधमूलेन कार्यकारणपौर्वापर्यविपर्ययरूपेणातिशयोक्त्यलङ्कारेणेत्यर्थः। तथाहि। स्वाधरनिर्दंशनं कारणम्। वरिस्त्रीणामोष्ठानां च कान्तदन्तक्षतमोचन कार्यभूतं समकालतया निर्दिष्टम्। **अधरेति**। अधरो निर्दष्टः शत्रवो व्यापादिताश्चेति तुल्यमेव कालं योगो ययोस्तौ तुल्ययोगिनौ तयोर्भावस्तुल्ययोगितेति व्युत्पत्त्या समुच्चयालङ्कारो व्यज्यत इति भावः। न तु प्रकृताप्रकृतसमानगुणक्रियासंबन्धतुल्यरूपा योगिता। ममेति निदर्शनरूपः। क्रूरपिशाचैः ममाधरं बिलरूपं प्राप्य अन्यान् धन्यान् सुखिनः करोत्विति बुद्ध्येव मुहुर्निजाधरं दष्टवानिति तस्य राज्ञो भूतिरुत्प्रेक्ष्यते। ततश्चात्र समुच्चयोत्प्रेक्षणयोरेकत्राश्रयान्नात्र प्रवेशलक्षणः सङ्करः।

कैलासस्य प्रथमशिखरे वेणुसंमूर्च्छनाभिः
श्रुत्वा कीर्तिं विबुधरमणीगीयमानां यदीयाम्।
स्रस्तापाङ्गाः सरसबिसिनीकाण्डसञ्जातशङ्का
दिङ्मातङ्गाः श्रवणपुलिने हस्तमावर्तयन्ति ॥६४॥

अत्र वस्तुना येषामप्यर्थाधिगमो नस्ति तेषामप्येवमादिबुद्धिजननेन चमत्कारं करोति त्वकीर्तिरिति वस्तु ध्वन्यते।

बालचित्तानुरञ्जनी—वस्तुव्यङ्ग्यस्योदाहरणमाह **कैलासस्येति**। कैलासभागशृङ्गे वेणुसंमूर्च्छनाभिः स्त्रीभिर्गीयमानां यस्य कीर्तिं श्रुत्वा दिग्गजाः सरसबिसिनीकाण्डमिति सञ्जातभ्रमाः सन्तः श्रवणमेव पुलिनं तत्र हस्तमावर्तयन्ति पुलिने विधानासाद्भवात्।

व्यङ्ग्यमाह **अत्रेति**। यद्यपि श्रवणपुलिन इत्यत्र रूपकालङ्कारसद्भावेऽपि भागस्य व्यञ्जकत्वाभावात् वस्तुना वस्तु व्यज्यत इत्यस्य न काचित् क्षतिः। अर्थाधिगमः गीताभिधेयज्ञानमेवमादिबुद्धिजननेन, बिसदण्डबुद्धिजननेन।

सारबोधिनी—कविप्रौढोक्तिनिष्पन्नं यथाक्रममुदाहरति **कैलासस्येति**। संमूर्च्छना रागः। तदुक्तम्—

"स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते।
संमूर्च्छनेति तं प्राहुर्गीततत्त्वविदो जनाः।" इति

अत्रेति। अयञ्चार्थो बहिरसन् कविभिरेवं वर्ण्यत इति भवत्यस्य तथात्वम्।

केसेसु बलामोडिअ तेण अ समरम्मि जअसिरो गहिआ।
जह कन्दराहि विहुरा तस्स दढं कंठअम्मि संठविआ ॥६५॥

अत्र केशग्रहणावलोकनोद्दीपितमदना इव कन्दरास्तद्विधुरान् कण्ठे गृह्णन्ति इत्युत्प्रेक्षा। एकत्र सङ्ग्रामे विजयदर्शनात्तस्यारयः पलाय्य गुहासु तिष्ठन्तीति काव्यहेतुरलङ्कारः। न पलाय्य गतास्तद्वैरिणोऽपि तु ततः पराभवं संभाव्य तान् कन्दरा न त्यजन्तीत्यपह्नुतिश्च।

केशेष्विति। केशेषु बलात्कारेण तेन समरे जयश्रीर्गृहीता । यथा कन्दराभिर्विबुधास्तस्य दृढ कण्ठे संस्थापिताः ।। तस्य विधुरा इति संबन्धः । कण्ठे सन्निवेशो इह चोत्प्रेक्षाव्यञ्जकत्वं समासोक्तेरेक-कन्दरा स्वस्त्रीव्यवहार समारोपं विना उद्दीपितमदना इवेत्युत्प्रेक्षाया असंभवात् । तदेवं वस्तुव्यञ्जक-मुदाहरणमिति प्रकारान्तरेण व्याचष्टे **एकत्रेति**। काव्यहेतुः काव्यलिङ्गम् । तस्य हि समक्षं जयश्री-ग्रहणात् भीता शत्रवः पलायिता इत्येवं रूपं दृढं कण्ठे स्थापिता इति [भागश्चापद्रुतेर्व्यञ्जकः ?] किं चात्रोत्प्रेक्षायाः ससन्देहेन सह काव्यलिङ्गमेकव्यञ्जकानुप्रविष्टम् ।

बालचित्तानुरञ्जनी—वस्तुरूपकविप्रौढोक्तिसिद्धस्यालङ्कारव्यङ्ग्यस्योदाहरणमाह **केसेस्विति**। तेण तेन, समरम्मि समरे, जअसिरी जयश्रीः, केशेषु च अमोडिअ बलात्कारेण, गहिआ गृहीता, जहा यथा, कंदराहिं कन्दराभिः, तस्स तस्य, विहुरा विधुराः शत्रवः दढं दृढं यथा तथा, कण्ठअम्मि कण्ठे, संठ-विआ संस्थापिताः ।

अत्र व्यङ्ग्यमाह **अत्रेति**। वाक्यार्थो न वस्तुरूपेण एकस्याः केशग्रहावलोकनेनान्यस्या अपि कामोद्बोध इति आलिङ्गनस्योत्प्रेक्षा व्यज्यत इत्यर्थः ।

अत्रैवालङ्कारान्तरमाह **एकत्रेति**। जयश्रीग्रहणेन वाक्यार्थभूतेन हेतुना जातभयाः शत्रवः पलाय्य गुहासु गता इति काव्यहेतुः काव्यलिङ्गाख्योऽलङ्कारो व्यज्यत इत्यर्थः ।

पुनरप्यत्रालङ्कारान्तरमाह **न पलाय्येति**। तद्वैरिणः पलाय्य न गता अपि तु तस्मात् सकाशात् कन्दराः तेषां पराभवं संभाव्य तान् न त्यजन्ति । कंदराभिः शरणं दत्तमित्यर्थः । प्रस्तुतस्य पलायनस्या-पह्नुवात् अपह्नुत्याख्योऽलङ्कारोऽत्र व्यञ्जक इत्यर्थः ।

सारबोधिनी—**केसेस्विति**।

केशेषु बलादामोक्ष्य तेन च समरे जयश्रीर्गृहीता ।
यथा कन्दराभिर्विधुरास्तस्य दृढं कण्ठे संस्थापिताः ।।

एकस्या नायककर्तृककेशाकर्षणदर्शनेनापरस्याः कामोद्रेकः स्यादेवेति समासोक्तिः । पुनरुत्प्रे-क्षाया एवाङ्गम् । असङ्कीर्णमाह **काव्यहेतुरिति**। चकारेण एकव्यञ्जनानुप्रवेशसङ्करसूचनम् ।

गाढालिंगणरहसुज्जुअम्मि दइए लहुं समोसरइ ।
माणंसिणीए माणो पोलणभीअ व्व हिअआहिं ।।६६।।

अत्रोत्प्रेक्षया प्रत्यालिङ्गनादि तत्र विजृम्भते इति वस्तु ।

बालचित्तानुरञ्जनी—अलङ्काररूपकविप्रौढोक्तिनिमित्तवस्तुव्यङ्ग्यस्योदाहरणमाह **गाढालिङ्ग-नेति**। माणंसिणीण मनस्विनीनां, माणो मानः, दइए दयिते, गाढलिंगणरहसुज्जुअम्मि गाढालिङ्गन-रभसोद्यते सति, पीलणभीअ व्व पीडनभीतयेव, हिअआहि हृदयात् ।

अत्र व्यङ्ग्यमाह अत्रेति। पुरुषेणालिङ्गने कृते सति स्त्रीकृतप्रत्यालिङ्गनमन्तरेण गाढालिङ्गनकृतभयासंभवात् प्रत्यालिङ्गनलक्षणं वस्तु व्यज्यत इत्यर्थः।

सारबोधिनी–गाढेति।

गाढालिङ्गनरभसोद्यते दयिते लघु समपसरति।
मनस्विन्या मानः पीडनभीत इव हृदयात्॥

अत्रेति। आदिपदेन प्रसादहसितादिग्रहणम्।

काव्यप्रकाशदर्पणः–गाढालिङ्गनरभसोद्यते दयिते लघुसमपसरति।
मनस्विनीनां मानः पीडनभीत इव हृदयात्॥

लघु शीघ्रम्। तत्र चालिङ्गनोद्यममात्रेणैव वाच्यस्य सिद्धे प्रत्यालिङ्गनप्रसादहसितादीनां न तदङ्गत्वम्।

जा ठेरं व हसन्ती कइवअणंबुरुहबद्धविणिवेसा।
दावेइ भुअणमंडलमण्णं विअ जअइ सा वाणी॥६७॥

अत्रोत्प्रेक्षया चमत्कारैककारणं नवं नवं जगत् अजडासनस्था निर्मिमीते इति व्यतिरेकः। एषु कविप्रौढोक्तिमात्रनिष्पन्नो व्यञ्जकः।

बालचित्तानुरञ्जनी–अलङ्काररूपकविप्रौढोक्तिनिर्मितस्यालङ्कारव्यङ्ग्यस्योदाहरणमाह **जा ठेरमिति।** वाणी ठेरं स्थविरम् ब्रह्माणं हसन्ती कइवअणंबुरुहबद्धविणिवेसा कविवदनांबुरुहबद्धविनिवेशा भुअणमण्डलं, अण्णं विअ अन्यदिव, दावेइ दर्शयति। सा वाणी जअइ जयति।

व्यङ्ग्यमाह **अत्रेति।** ब्रह्मासने हे पद्मे! प्रविश्य अचमत्कारकारि जगन्निर्मिमीते इति उपमानभूतात् ब्रह्मसर्गात् उपमेयभूतस्य कविसर्गस्याधिक्यमिति व्यतिरेकालङ्कारो व्यङ्ग्य इत्यर्थः।

सारबोधिनी–जा ठेरमिति।

या स्थविरमिव हसन्ती कविवदनाम्बुरुहबद्धविनिवेशा।
दर्शयति भुवनमण्डलमन्यदिव जयति सा वाणी॥

अण्णं विअ इत्यादिगम्यो व्यतिरेकः।

जे लंकागिरिमेहलासु खलिआ संभोगखिण्णोरईफारुप्फुल्लफणावलीकवलणे पत्ता दरिद्दत्तणं।
ते एह्लिं मलआनिला विरहिणीणीसाससंपक्किणो
जादा झत्ति सिसुत्तणे वि बहला तारुण्णपुण्णा विअ॥६८॥

अत्र निःश्वासैः प्राप्तैश्वर्या वायवः किं किं न कुर्वन्तीति वस्तुना वस्तु व्यज्यते।

बालचित्तानुरञ्जनी—कविनिबद्धवक्तृप्रौढोक्तिनिर्मितस्य वस्तुरूपस्य वस्तुव्यङ्ग्यस्योदाहरणमाह **जे लङ्केत्यादि**। जे ये मलयानिलाः, लंकागिरिमेहलाहिं लङ्कागिरिमेखलायां, खलिआ स्खलिताः सन्तः संभोगखिन्नोरगी, स्फारोत्फुल्लफणावलीकवलनात् प्राप्ता दरिद्दत्तणं दरिद्रत्वम्। पत्ता प्राप्ताः। ते मलयानिलाः, एह्णिं इदानीं, सिसुत्तणे वि शिशुत्वेऽपि विरहिणीणीसाससंपक्किणो निःश्वाससंपर्किणः सन्तः, तारुण्णपुण्णा विअ तारुण्यपूर्णा इव, बहला बहुलाः जादा जाताः।

अत्र व्यङ्ग्यमाह **अत्रेति**। यद्यपि तारुण्यपूर्णा इवेत्यत्रोत्प्रेक्षालङ्कारोऽस्ति तथापि तस्य व्यञ्जकत्वं नास्ति। अत एव विरहिणीनिःश्वाससंपर्किणः इत्यनेन वस्तुना निःश्वासैः प्राप्तैश्वर्याः किं किं न कुर्वंते इत्येतद्वस्तु व्यज्यत इत्यर्थः।

सारबोधिनी—कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नं यथाक्रममुदाहरति जे लंकेति।

ये लङ्कागिरिमेखलायाः स्खलिताः संभोगखिन्नोरगी-
स्फारोत्फुल्लफणावलीकवलने प्राप्ता दरिद्रत्वम्।
त इदानीं मलयानिला विरहिणीनिःश्वाससंपर्किणः
जाता झटिति शिशुत्वेऽपि बहलास्तारुण्यपूर्णा इव॥

अत्र पूर्णा इवेत्युत्प्रेक्षायाः सत्त्वेऽपि सा न व्यञ्जिका। तथा निःश्वाससंपर्कस्य बहुलत्वहेतोरुपादानात् संभवदपि काव्यलिङ्गं न व्यञ्जकम्। तदविवक्षायामपि तथाभिव्यक्तिसंभवात्। वस्तुतो वस्तुनः प्राधान्याद्वा वस्तुव्यञ्जकतोदाहरणतया दत्तमिदम्। निःश्वासैरित्यत्र निःश्वास इति क्वचित्पाठः।

सहि विरइऊण माणस्स मज्झ धीरत्तणेण आसासं।
पिअदंसणविहलंखलखणम्मि सहसत्ति तेण ओसरिअं॥६९॥

अत्र वस्तुना कृतेऽपि प्रार्थने प्रसन्नेति विभावना, प्रियदर्शनस्य सौभाग्यबलं धैर्येण सोढुं न शक्यते इत्युत्प्रेक्षा वा।

बालचित्तानुरञ्जनी—वस्तुरूपकविनिबद्धवक्तृप्रौढोक्तिनिर्मितस्यालङ्कारव्यङ्ग्यस्योदाहरणमाह **सहीति**। सहि सखि! धीरत्तणेण धैर्येण, मज्झ मम, मानस्स माणस्य, आसासं आश्वासम्, न अवस्थितमिति शेषः। तेण तेन, धैर्येण पिअदंसणविहलंखलखणम्मि, प्रियदर्शनविशृङ्खलक्षणे सहसत्ति सहसैव, ओसरिअं अपसृतम्।

अत्र व्यङ्ग्यमाह **अत्रेति**। वाक्यार्थरूपेण वस्तुना प्रार्थनालक्षणकारणाभावेऽपि स एवार्थः प्रसन्नतोत्पत्तिरिति विभावनालङ्कारो व्यज्यत इत्यर्थः।

सारबोधिनी—सहीति ।

सखि विरचय्यमानस्य मम धीरत्वेनाश्वासम् ।
प्रियदर्शनविशृङ्खलक्षणो सहसेति तेनापसृतम् ॥

विशृङ्खले कौतुकोत्तरले ।

काव्यप्रकाशदर्पणः--सखि विरचय्य मानस्य मम धीरत्वेनाश्वासम् ।
प्रियदर्शनविशृङ्खलक्षणे सहसा तेनापसृतम् ॥

अत्र विभावनोत्प्रेक्षयोः संसृष्टिः ।

ओल्लोल्लकरअरअक्खएहि तुह लोअणेसु मह दिण्णं ।
रत्तंसुअं पसाओ कोवेण पुणो इमे ण अक्कमिआ ॥७०॥

अत्र किमिति लोचने कुपिते वहसि इति उत्तरालङ्कारेण न केवलमार्द्रनखक्षतानि गोनायसि यावत्तेषामहं प्रसादपात्रं जातेति वस्तु ।

बालचित्तानुरञ्जनी—अत्रैव व्यङ्ग्यान्तरमाह **श्रोल्लेति** । नायकं प्रति नायिकावचनम् । हे प्रिय ! तुह तव । ओल्लोल्लकरअरअक्खखएहि आर्द्रार्द्रकरजरदनक्षतैः मह मम लोअणेसु लोचनयोः रत्तंसुअं रक्तसुकं पसाआ प्रसादः । दिण्णं दत्तः, कोवेण कोपेन, इमे लोचने ण न अक्कमिआ नाक्रान्ते ।

अत्र व्यङ्ग्यमाह **अत्रेति** । प्रतिवचनालिङ्गनात् प्रश्नमध्याहरति **किमितीति** प्रश्ने कृते सति उत्तररूपालङ्कारेण वाच्येन केवलं कृत्स्नं यथा स्यात् । आर्द्राणि यानि नखदन्तक्षतानि तावन्ति गोपायसि । भावादयो यावत् तेषां तत्कृतानाम् अहं प्रसादपात्रं जाता तददर्शनेन उत्पन्नकोपास्मि, अतस्त्वमतिदुष्ट इति वस्तु व्यज्यत इत्यर्थः ।

सारबोधिनी-श्रोल्लोल्ल इति ।

आर्द्रार्द्रकरजरदनखक्षतैस्तव लोचनयोर्मम दत्तः ।
रक्तांशुकं प्रसादः कोपेन पुनरिमे नाक्रान्ते ॥

नखक्षतैर्मम लोचनयोर्दत्त इति संबन्धः । **अत्रेति** । किमित्यादिप्रश्नस्य यदुन्नायकमुत्तरं "कोपेन" इत्यादिरूपमलङ्कार इत्यन्वयः ।

अत्रापह्नुतेर्वाक्यार्थस्याप्रसङ्गे प्रतिषेधानुपपत्त्या प्रश्नमाक्षिप्य विश्रान्तावुत्तरालङ्कारस्यैव व्यञ्जकत्वं नापह्नुतेः, तस्यास्तन्मुखनिरीक्षकत्वात् । सत्प्रतिपक्षोत्थापकस्योपाधेर्हेत्वाभासत्वाभाववत् ।

केचित्तु—अपह्नुतिसाचिव्येनोत्तरालङ्कारस्य व्यञ्जकत्वमित्याहुः ।

काव्यप्रकाशदर्पणः--आर्द्रार्द्रकरजरदनखक्षतैस्तव लोचनयोर्मम दत्तः ।
रक्तांशुकं प्रसादः कोपेन पुनरिमे नाक्रान्ते ॥

तवार्द्रैः करजरदनसक्षतैर्मम लोचनयोरिति संबन्धः। रक्तोंऽशुरेव रक्तांशुकम्। अत्रेति। उत्तरालङ्कारेण मम लोचने कोपेन न रक्ते अपि तु रक्तांशुकवती।

महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअन्ती।
अणुदिणमणण्णकम्मा अङ्गं तणुअं वि तणुएइ ॥७१॥

अत्र हेत्वलङ्कारेण तनोस्तनूकरणेऽपि तव हृदये न वर्तत इति विशेषोक्तिः। एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरो व्यञ्जकः। एवं द्वादश भेदाः।

बालचित्तानुरञ्जनी—कविनिबद्धवक्तृनिर्मितस्यालङ्कारव्यङ्ग्यस्योदाहरणमाह महिलेति। सुहअ सुभग, तुह तव, महिलासहस्सभरिए महिलासहस्रभरिते, हिअए हृदये, अमाअन्ती अमान्ती, सा स्त्री, अणुदिणं अनुदिनं, अनन्यकर्मा सती अङ्गं तणुअं वि तणुएइ तनुते, तनूकरोति।

अत्र व्यङ्ग्यमाह **अत्रेति**। अत्र कविना हि निबद्धया प्रौढोक्त्या निष्पन्नेन 'महिलासहस्रभरित' इत्येतत्पदं हृदये अवर्त्तमानत्वे हेतुत्वेनोक्त इति हेत्वलङ्कारेण वाच्येन तनोस्तनुत्वलक्षणे कारणे सत्यपि हृदयावर्त्तनकार्येणोक्तमिति विशेषोक्त्यलङ्कारो व्यज्यत इत्यर्थः।

सारबोधिनी—महिलेति।

कविनिबद्धवक्तृप्रोक्तमुपसंहरति **एष्विति**। प्रकृतमुपसंहरति **एवमिति**।

महिलासहस्रभरिते तव हृदये सुभग सा अमान्ती।
दिवसमनन्यकर्मा अङ्गं तनुकमपि तनयति॥

दिवसं व्याप्येत्यर्थः। अत्र 'अमान्ती' इत्यत्र महिलासहस्रभृतत्वं हेतुः। तनूकरणेऽमितत्वं हेतुरिति हेत्वलङ्कारः।

शब्दार्थोभयभूरेकः

यथा—

अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा।
तारकातरला श्यामा सानन्दं न करोति कम् ॥७२॥

अत्रोपमा व्यङ्ग्या।

बालचित्तानुरञ्जनी—संलक्ष्यक्रमव्यङ्ग्यस्य शब्दशक्तिमूलत्वेनार्थशक्तिमूलत्वेन भेदद्वयं प्रदर्श्य उभयशक्तिमूलत्वेन तृतीयं भेदमाह **शब्देति**। तमुदाहरति **यथेति**। श्यामा रात्रिः कस्यानन्दं न करोति? कथंभूता? अतन्द्रचन्द्राभरणं यस्या समुद्दीपितकामा नक्षत्रैस्तरला पक्षे श्यामा, योऽयं चन्द्रः शिरोभूषण-

विशेषः, कं हर्षं न करोति तारका तरला। इह चन्द्रेति तारकेति वा शब्दो व्यञ्जकः। चन्द्रादिशब्दं परित्यज्य इन्द्वादिशब्दप्रयोगे अर्थान्तरप्रतीतेः समुद्दीपितेति सानन्दमिति चार्थोऽपि व्यञ्जकः।

सारबोधिनी–शब्दार्थोभयेति। यद्यपि शब्दशक्तिमूलेऽपि अर्थस्य, अर्थशक्तिमूलेऽपि शब्दस्य व्यञ्जकत्वमस्तीत्युभयशक्तिमूलत्वं सर्वत्रैवास्ति तथापि तत्र तयोर्गुणप्रधानभावेन, अत्र तु द्वयोरेव प्राधान्येन व्यञ्जकत्वमित्युभयशक्तिमूलत्वम्। तथाहि। शब्दस्यार्थस्य वा प्राधान्ये शब्दस्य यत्र परिवृत्त्यसहिष्णुत्वं तत्र पदप्राधान्यम्, अन्यत्रार्थप्राधान्यम्।

अतन्द्रेति। प्रकृते चन्द्रसमुद्दीपिततारकाशब्दाः परिवृत्त्यसहिष्णवः, पर्यायान्तरोपादानेऽपरार्थासंभवात्। अत एवैतेषां शब्दप्राधान्यम्, अन्ये न तथेति तेषामर्थप्राधान्यमित्युभयोरेकत्र प्राधान्यसत्त्वादुभयशक्तिमूलत्वम्।

नन्वेवं "उल्लास्यकालकरवाल" इत्यादावप्युभयशक्तिमूलत्वं स्यादिति चेन्न, तत्र परिवृत्त्यसहिष्णूनां शब्दानां बाहुल्येनातथात्वात्।

इदं त्ववधातव्यम्। यत्र यस्य काव्यसर्वस्वत्वमनुभूयते तत्र तस्य प्राधान्यमिति। अन्यथा अतिप्रसङ्गात्। तथा चोभाभ्यां रात्रिनायकयोरुपमानोपमेयभावो व्यङ्ग्यः। अक्षरार्थस्तु श्यामा नायिका, अथ च रात्रिः, चन्द्रः शशी कर्पूरम्। तारका नक्षत्रम् अक्षि कनीनिका च। तरलो हारमध्यभागः।

भेदा अष्टादशास्य तत् ॥४१॥

अस्येति ध्वनेः ॥४१॥

ननु रसादीनां बहुभेदत्वेन कथमष्टादशेत्यत आह।

रसादीनामनन्तत्वाद्भेद एको हि गण्यते।

अनन्तत्वादिति। तथाहि–नव रसाः। तत्र शृङ्गारस्य द्वौ भेदौ। संभोगो विप्रलम्भश्च। संभोगस्यापि परस्परावलोकनालिङ्गनपरिचुम्बनादिकुसुमोच्चयजलकेलिसूर्यास्तमयचन्द्रोदयषड्ऋतुवर्णनादयो बहवो भेदाः। विप्रलम्भस्याभिलाषादय उक्ताः। तयोरपि विभावानुभावव्यभिचारिवैचित्र्यम्। तत्रापि नायकयोरुत्तममध्यमाधमप्रकृतित्वम्। तत्रापि देशकालावस्थादिभेदा इत्येकस्यैव रसस्यानन्त्यम्। का गणना त्वन्येषाम्। असंलक्ष्यक्रमत्वं तु सामान्यमाश्रित्य रसादिध्वनिभेद एक एव गण्यते।

वाक्ये द्व्युत्थः

द्व्युत्थ इति शब्दार्थोभयशक्तिमूलः।

बालचित्तानुरञ्जनी–सूत्रगतेदंशब्दार्थमाह **अस्येति**। लक्षणामूलाविवक्षितवाच्यस्यार्थान्तरसंक्रमितवाच्यात्यन्ततिरस्कृतवाच्यलक्षणौ द्वौ भेदौ। अभिधामूलविवक्षितान्यपरवाच्यस्यासंलक्ष्यक्रमो रसादिरेको भेदः। शब्दशक्तिमूलौ वस्त्वलङ्कारलक्षणौ द्वौ भेदौ। अर्थशक्तिमूला वस्त्वादयो द्वादशभेदाः। उभयशक्तिमूल एको भेद इत्यष्टादश भेदा इत्यर्थः। उक्ताष्टादशसंख्याक्षेपोत्तरत्वेनोत्तरसूत्रमवतारयति।

नन्विति । रसादीत्यादिशब्देन भावादिः । हेत्वसिद्धिमाशङ्क्य असिद्ध इत्याह **अनन्तत्वादिति** । सिद्धमिति शेषः । तदेव प्रतिपादयति **तथाहीति** । तयोः संयोगविप्रलम्भयोः । नायकश्च नायिका च नायकौ तयोः । एकस्यैव शृङ्गारस्येति अन्येषां हास्यादीनां भावादीनां वा ततस्तेत्र धर्मे कथं भेदः [?] अत आह **असंलक्ष्येति** । उक्तानां भेदानां मध्ये कस्य वाक्ये व्यञ्जके पदे वा व्यञ्जके सति भवति [?] वृत्तिरित्याकाङ्क्षायां विभागमाह **वाक्य इति** । काव्यरूपसमुदाये द्वाभ्यां शब्दार्थाभ्यामेकत्र भान यस्य स द्व्युत्थः । द्व्युत्थशब्दार्थमाह **द्व्युत्थ इति** । उभयशक्तिमूल एको भेदो वाक्य एव । व्यञ्जके सति भवति । यथा—अतन्द्रचन्द्रेत्यादि ।

सारबोधिनी—अष्टादशेति । अर्थान्तरसङ्क्रमितवाच्यात्यन्ततिरस्कृतवाच्यालक्ष्यक्रमव्यङ्ग्या इति त्रयः । शब्दशक्तिमूले वस्त्वलंकृती द्वे । अर्थशक्तिमूलाः द्वादश । उभयशक्तिमूलश्चैक इत्येकतया अष्टादश ध्वनयः स्युरिति ।

द्व्युत्थ इति । अत्र केचित्—प्रायिकमेतत् । तथाहि ।

तमनुगतवती शठं मदर्थे त्वमपि च मत्सदृशीकृतासि धात्रा ।
वहति वपुरिदं गतागतैस्ते नवरतखेदमवाप्य यद्दुकूलम् ॥

इत्यत्र नवरतेत्यत्र गुरुपरीति पाठे वक्तृबोद्धव्यवैशिष्ट्येन दूत्याः कामुकसंभोगप्रकाशेनार्थशक्तिमूलत्वम् । सति च तस्मिन् पाठे वक्त्रादिवैशिष्ट्यमनपेक्ष्यैव शब्दशक्तिरेव तत्र प्रभवतीति पदेऽप्युभयशक्तिमूलत्वदर्शनादित्याहुः ।

पदेऽप्यन्ये

अपि शब्दाद्वाक्येऽपि । एकावयवस्थितेन भूषणेन कामिनीव पदद्योत्येन व्यङ्ग्येन वाक्यव्यङ्ग्यापि भारती भासते । तत्र पदप्रकाश्यत्वे क्रमेणोदाहरणानि ।

यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा ।
अनुकम्प्योऽनुकम्प्यश्च स जातः स च जीवति ॥७३॥

अत्र द्वितीयमित्रादिशब्दाः आश्वस्तत्वनियन्त्रणीयत्वस्नेहपात्रत्वादिसङ्क्रमितवाच्याः ।

उभयशक्तिमूलादन्येऽर्थान्तरसंक्रमितवाच्यादयः, अन्ये सप्तदश पदव्यञ्जकेऽपि शब्दाद्वाक्येऽपि संभवन्तीत्यर्थः ।

ननु 'इदमुत्तममतिशयिनि' इत्यादौ समुदायरूपकाव्यविशेषप्रदर्शितस्य ध्वनेर्वाक्यव्यङ्ग्यत्वेन कथं व्यङ्ग्यत्वमत आह **एकेति** । वाक्यात् व्यङ्ग्यश्चेति विग्रहः । यथा सर्वावयवस्थितनानाभरणजातेन भासमानाया युवतेरेकावयवस्थितेनाभरणेनाभासमानत्वं तथा वाक्यव्यङ्ग्यस्यापि पदव्यङ्ग्यत्वमविरुद्धमित्यर्थः । तथा चोक्तं ध्वनिकारेण—

विच्छित्तिशोभिनैकेन भूषणेनेव कामिनी ।
पदद्योत्येन सुकवेर्ध्वनिना भाति भारती ।। इति

बालचित्तानुरञ्जनी—वाक्यप्रकाश्यत्वे उदाहरणान्युक्तानि । अथ पदप्रकाश्यत्वेनोदाहरणानि प्रतिजानीते तत्रेति । तत्रानुपयुज्यमानार्थान्तरसंक्रमितवाच्यपदद्योत्योदाहरणमाह **यस्येति** । यस्य नायकस्य मित्राणि सर्वदा मित्राण्येव नान्यानि । इत्यादिस्वभावः स नायको जातः । सफलजन्मवान् सफलजीवितश्च भवति । द्वितीयमित्रादिशब्दानामनुपयुज्यमानत्वेनाश्वस्तत्वाद्यर्थान्तरेषु सङ्क्रमितवाच्यत्वमाह **अत्रेति** । अत्र द्वितीयमित्रादिशब्दानामनुप्रयोगात्मनो मुख्यार्थबोधः सामान्यविशेषभावः संबन्धः । अतो मित्रादिशब्दा आश्वस्तत्वनियन्त्रणीयत्वस्नेहपात्रत्वादि यथासंख्यं लक्षयन्ति । प्रकाशनसंशयसंपादनानि व्यञ्जयन्ति । अत एव शुद्धस्यार्थस्याविवक्षितत्वादविवक्षितवाच्यत्वम् ।

सारबोधिनी—**पदेऽपीति** । अन्ये सप्तदशप्रकाराः । अपिशब्दस्यानुक्तसमुच्चयं वारयति **अपिशब्दादिति** । अलङ्कारादीनां पदांशव्यङ्ग्यत्वासंभवात् । **एकावयवेत्यादि** । वाक्यस्य व्यङ्ग्यं यत्रेति वाक्यव्यङ्ग्या, भासते चमत्कुरुते । तथा चैकस्य पदस्य प्राधान्येनोपयोगोऽन्येषां पदानां सहकारित्वेनेति भावः ।

अत्रेति । एकेनादिपदेन शत्रु अनुकम्प्य-जात-जीवतीतिपदानि द्वितीयेन च जन्मत्वश्लाघ्यजीवितत्वे परिगृह्यन्ते । विश्वासातिशयो नियन्त्रणातिशयः । नायकस्य स्थिरप्रकृतित्वं च व्यङ्ग्यम् । अत्र वाक्यार्थानां प्रत्येकविश्रान्तत्वेन नैकवाक्यता । तेन पदानामेव व्यञ्जकता न वाक्यस्येत्यवधेयम् । अत्रार्थान्तरसङ्क्रमितवाच्याया लक्षणाया व्यञ्जकत्वमुक्तम् ।

खलववहारा दीसन्ति दारुणा जहवि तहवि धीराणं ।
हिअअवअस्सवहुमआ ण हु ववसाआ विमुज्झन्ति ।।७४।।

अत्र विमुह्यन्तीति ।

लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः ।
तदा सुधास्पदमभूदधुना तु ज्वरो महान् ।।७५।।

अत्र तदादिपदैरनुभवैकगोचरा अर्थाः प्रकाश्यन्ते । यथा वा

बालचित्तानुरञ्जनी—अनुपपद्यमानार्थान्तरतिरस्कृतवाच्यपद्योदाहरणमाह **खलेति** । हिअअवअस्सबहुमआ हृदयवयस्यबहुमता यद्यपि खलव्यवहाराः दारुणाः, दीसन्ति दृश्यन्ते । तहवि तथापि, धीराणां बहुमआ बहुमताः, ववसाआ व्यवसायाः, ण(न)हु खलु, विमुज्झन्ति विमुह्यन्ति । अत्र व्यञ्जकं पदमाह **अत्रेति** । व्यञ्जकमिति शेषः । मुह्यतीत्येतत्पदं व्यवसायानामचेतनत्वेनासंभवात् स्वार्थंबाधितमोहात्मकं मुख्यार्थमनुपपद्यमानत्वादेवात्यन्ततिरस्कृतवाच्यं कार्यकारणभावसंबन्धादप्रवृत्तिं लक्षयत् अभिमतकार्यकारित्वादिप्रारब्धनिबर्हणादि धर्मान्तरं व्यनक्तीति भावः ।

सारबोधिनी—खलेत्यादि ।

खलव्यवहारा दृश्यन्ते दारुणा यद्यपि तथापि धीराणाम् ।
हृदयवयस्य बहुमता न खलु व्यवसाया विमुह्यन्ति ॥

हृदयस्य वयस्यता सदर्थग्राहकत्वात् । तेन बहुमताः अनुमोदिताः । अत्राचेतनस्य व्यवसायस्य मुख्यार्थान्वयो बाधित इति स्थगितत्वं लक्ष्यते । अभिमतकार्यकारित्वं च व्यज्यते ।

लावण्यं तदसौ कान्तिस्तद्रूपं स वचः क्रमः ।
तदा सुधास्पदमभूदधुना तु ज्वरो महान् ॥७५॥

अत्र तदादिपदैरनुभवैकगोचरा अर्थाः प्रकाश्यन्ते ।

बालचित्तानुरञ्जनी—विवक्षितान्यपरवाच्यस्यासंलक्ष्यक्रमव्यङ्ग्यस्य रसस्योदाहरणमाह **लावण्य-मिति** । तत् आह्लादकारि लावण्यं करचरणाद्यवयवातिरिक्तं धर्मान्तरं, सकलशरीराधायिका कान्तिः शरीरशोभा । तद्वत् सोऽप्यगोचररूपं सः, पूर्वक्रमः वचनपरिपाटी, तदा संभोगसमये अमृतोपमम् । अधुना विरहावस्थायां क्रूरोपमम् । अत्र पदप्रकाश्यमाह **अत्रेति** । तदसौ इत्यादिपदानि आह्लादकारित्व दृश्याति-मात्रशरीराणि व्यापकत्वादीनि अर्थान्तराणि व्यञ्जयन्तीत्यर्थः । यद्यपि वाक्येन विप्रलम्भरसस्य प्रतीतिः तथापि घटादिपदद्योत्याह्लादकारित्वादिविशिष्टस्यैव लावण्यादेरनुभवत्वमिति रसस्यापि पदप्रकाश्यत्वम-विरुद्धम् । अत एव विशिष्टलावण्याद्यनुभावप्रतीतिसमय एव रसस्यापि प्रतीतिरित्यसंलक्ष्यक्रमत्वम-विरुद्धम् ।

असंलक्ष्यक्रममुदाहरति **लावण्यमिति** । लावण्यादयोऽनुभवैकगोचरा न तु निर्वक्तुं शक्या इति । अत्र तदादीनां बुद्धिविषयतावच्छेदकादिप्रकारेण शक्त्युपगमे लावण्याद्यतिशयो व्यङ्ग्यः । अत्र विप्रलम्भ-प्रतीतेर्विभावादिसामग्रीसत्त्वेऽपि तदादिपदानां प्राधान्यमिति पदव्यञ्जकता ।

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ॥७६॥

अत्र भीताननेति । एतेन हि नीचैः शंसनविधानस्य युक्तता गम्यते । भावादीनां पदप्रकाश्यत्वेऽधिकं न वैचित्र्यमिति न तदुदाह्रियते ।

बालचित्तानुरञ्जनी—अस्यैवोदाहरणान्तरमाह । यथा—हे मुग्धे त्वया मुग्धतया बाल्यदुर्ललितेनैव सकलः कालवाहि किमारभ्यते ? तद्दृष्ट्या कारणं विनापि मानं धारय । धैर्यं स्थापय । अत्र प्रेयसि ऋजुतां दूरे कुरु । एवं सख्या प्रतिबोधिता नायिका भीताननां सती तां सखीं प्रति वचनमाह **किमिति** । ननु सखि नीचैः कथय । हि यस्मात्, हृदि स्थितः प्राणेश्वरः श्रोष्यति ।

अत्र पदप्रकाशमाह **अत्रेति**। भयकार्यस्य नेत्रभ्रमसङ्कोचशोषाधोनयनभ्रमवैवर्ण्यादेर्मुखे दर्शनान्मुखमेव भीतमित्युक्तम्। अत एवैतत्पदत्रयस्याकृतिमत्वप्रकाशनात् नीचैः शंसनविधानस्य युक्तत्वं व्यञ्जकम्। तत्तु असंलक्ष्यक्रमपदप्रकाश्यम्। भावतदाभासादीनामुदाहरणानि वाच्यानीत्यत आह **भावादीनामिति**। वाक्य प्रकाश्यानामपि भावादीनां रसापेक्षया निकृष्टचमत्कारत्वम्। पदप्रकाश्यानां तु ततोऽपि निकृष्टचमत्कारत्वमिति भावः।

सारबोधिनी—संभोगेऽप्युदाहरति **यथा वेति**। मुग्धे उपदेशाग्राहिणि। बधानेति बन्धनेनापसारणाशक्यता व्यज्यते **नीचैरिति**। नीचैः शंसनस्य विधानमप्राप्तप्रापणं हि प्रत्ययप्रतिपाद्यं भीतं भयजन्यविच्छायातियुक्तमाननं यस्याः, प्रवर्तनाया अनाहार्यत्वेन युक्तत्वम्। तच्चाननगतविच्छायत्वलक्षितभयगम्यमित्याह **भीताननेति**। भयप्रतिपाद्यकृत्रिमानुरागेण संभोगः प्रकृष्यत इति तस्य प्राधान्येन भीताननपदमूलता।

रुधिरबिसरप्रसाधितकरबालकरालरुचिरभुजपरिघः।
झटिति भ्रुकुटिविटङ्कितललाटपट्टो विभासि नृप भीम ॥७७॥

अत्र भीषणीयस्य भीमसेन उपमानम्।

भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः।
कस्य नानन्दनिष्यन्दं विदधाति सदागमः ॥७८॥

काचित् सङ्केतदायिनमेवं मुख्यया वृत्त्या शंसति।

बालचित्तानुरञ्जनी—विवक्षितान्यपरवाच्यस्य संलक्ष्यक्रमव्यङ्ग्यभेदे शब्दशक्तिमूलौ द्वौ भेदौ। अलङ्कारध्वनिः वस्तुध्वनिश्चेति। अलङ्कारध्वनेः शब्दशक्तिमूलस्य पदद्योत्यस्योदाहरणमाह **रुधिरेति**। रक्तसमूहपूतकरवालरुचिरभुजपरिघः रुचिरभ्रूभङ्गविद्धललाटपट्टो नृपभीमो विभाति। व्यङ्ग्यमलङ्कारमाह **अत्रेति**। भीषयते इति भीमः। इदं पदं प्रकृतायाः शक्तेः सामर्थ्यात् सादृश्यमापादयतीत्युपमालङ्कारो व्यङ्ग्यः।

शब्दशक्तिमूलानुरणनरूपस्य पदप्रकाश्यस्य वस्तुध्वनेरुदाहरणमाह **भुक्तिमुक्तीति**। भुक्तिं मुक्तिं च करोतीति भुक्तिमुक्तिकृत् एकान्तेन नियमेन समादेशे उपदेशे तत्परः प्रवणः संश्चासौ, आगमाख्यं वैदिकं शास्त्रं कस्यानन्दप्रवाहं न करोति अपि तु सर्वस्यापि करोतीत्यर्थः। अत्र व्यङ्ग्यमाह **क्वचिदिति**। सङ्केतदायिनं प्रकरणेन समागमव्याजेन स्तौतीत्यर्थः। तथाहि। सतः कान्तस्यागमनं भुवतेर्हेतोः मुक्तिं कृन्तति नाशयति। मुक्तिविरहभुक्तिं च करोतीति नायकोक्ते सङ्केतस्थाने समादेशनमाहतम्। तत्परः स्तुतिरूपं समागमनं पदद्योत्यवस्तुव्यङ्ग्यम्। न चात्रोपमालङ्कारो व्यङ्ग्य इति वाच्यम्। द्वयोरर्थयोर्विसदृशत्वात्।

सारबोधिनी—शब्दशक्तिमूलालङ्कारमाह **रुधिरेति**। बिसरः प्रसरः। **विटङ्केति**। "कपोतपालिकायां तु विटङ्कं पुंनपुंसकमित्यमरः। भ्रुकुट्यां विटङ्कवदाचरति ललाटपट्टो यस्य तादृक् भृकुट्या विटङ्कित

तरङ्गवत् भङ्गिभेदवत्त्वात् । अत्रेति । भीषयतीति भीषणीयः । कर्तरि अनीयर् । कृत्यल्युटोऽन्यत्रापीति वचनात् । भीमो भयङ्कर इति वाच्यः । भीमसेन पाण्डवभेदो व्यङ्ग्यः । तयोरुपमापि व्यङ्ग्या । विभासीति मध्यमपुरुषान्वयात् न रूपकम् । तत्र विधेयप्राधान्येनैवान्वयात् ।

शब्दशक्तिमूलवस्तुव्यङ्ग्यमाह भुक्तीति । भुक्तिः स्वर्गादिभोगः संभोगश्च । मुक्तिर्निश्रेयसमितरव्यासङ्गत्यागश्च । एकान्तः परमार्थस्वरूपं विजनश्च । समादेशो नियोग आह्वानश्च । सदागमः सच्छास्त्रम् । सतः सुन्दरस्यागमनश्च । मुख्यया वृत्त्या मुख्यप्रकारेण सदागमव्यपदेशरूपेणेत्यर्थः । द्वितीयार्थस्य रतिरूपस्य सङ्गोपनार्थमेव परार्थस्याभिधानान्नोपमाध्वनिः । द्वयोः समप्राधान्य एव तस्याः प्रवृत्तेरित्युक्तं प्राक् । किन्तु शब्दशक्तिमूलवस्तुध्वनिरेवायम् ।

सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं
यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रागतिः ।
आश्चर्यं तव सौकुमार्यमभितः क्लान्तासि येनाधुना
नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति ते नासितुम् ॥७९॥

अत्र वस्तुना कृतपुरुषपरिचया क्लान्तासीति वस्तु अधुनापदद्योत्यं व्यज्यते ।

बालचित्तानुरञ्जनी—अर्थशक्तिमूलस्य ध्वनेर्द्वादशप्रकाराणां मध्ये स्वतःसंभविना वस्तुना वस्तुव्यङ्ग्यपदप्रकाश्यमुदाहरति **सायमिति** । काञ्चित् सखीं प्रति कस्यचिदुक्तिः । सन्ध्यायां स्नानमाचरितम् । चन्दनेनाङ्गं समालिप्तम् । अत एवाविस्रब्धं यथा तथा अत्रागमनम् ।

हे सखि ! तत्र सौकुमार्यमाश्चर्यं येन कारणेनाभितः क्लान्तासि । अधुनानुकरणाभावेऽपि क्लान्तासीति ।

सारबोधिनी—सायमित्यादि । सायं स्नानं श्रमनाशकमुपासितं यत्नतः कृतम् । विश्रब्धा अभीता विश्वस्ता वा अभितो बाह्यतोऽभ्यन्तरतश्च । मीलनं मुद्रणं व्यतिकरः संबन्धः ।

अत्रेति । वस्तुना अधुनापदार्थेन । अधुना न कालान्तरे, एवं एवंविधः क्लमो दृष्ट इत्याकारेण । येनाधुनापदार्थस्योद्भटशक्तितया प्राधान्यम् ।

काव्यप्रकाशदर्पणः—अर्थशक्तिमूलेषूदाहरति सोऽयमिति । न विद्यते मिलनव्यतिकरः संपर्को यस्य तदमीलनव्यतिकरं यथा स्यात्तथा आसितुं स्थातुमित्यर्थः ।

तदप्राप्तिमहादुःखविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ॥८०॥

चिन्तयन्तो जगत्सूर्ति परब्रह्मस्वरूपिणम् ।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका ॥८१॥

अत्र जन्मसहस्रै रुपभोक्तव्यानि दुष्कृतसुकृतफलानि वियोगदुःखचिन्तनाह्लादाभ्यामनुभूतानीत्युक्तम् । एवं चाशेषचयपदद्योत्ये अतिशयोक्ती ।

बालचित्तानुरञ्जनी--एवंविधाधुनाशब्दार्थरूपेण स्वतःसंभविना वस्तुनाऽलङ्कारव्यङ्ग्यपदं पदप्रकाश्यमुदाहरति **तदिति**। विष्णुपुराणस्थं पद्यमिदम् । अन्या गोपकन्यका कृष्णाप्राप्तिजनितमहादुःखेन विनष्टसर्वपातका विष्णुचित्तया जनितशुद्धाभेदेन क्षीणपुण्यसमूहा तथा जगत्कारणं परब्रह्मस्वरूपिणं कृष्णं निरुच्छ्वासतया चिन्तयन्ती ध्यायन्तीव सती मुक्तिं प्राणवियोगं मोक्षञ्च । अत्र व्यङ्ग्यालङ्कारमाह **अत्रेति** । अत्राशेषचयशब्दयोरर्थरूपेण स्वतःसंभविनालङ्कारेण पदद्योत्यं व्यङ्ग्यम् ।

सारबोधिनी—वस्तुव्यङ्ग्यालङ्कारमाह **तदप्राप्तीति** । **अत्र जन्मसहस्रैरिति** । अयमर्थः । अत्राशेषचयपदप्रभावादनेकजन्मसहस्रभोग्यदुष्कृतसुकृतफलराशितादात्म्याध्यवसित भगवद्विरहदुःखचिन्ताह्लादयोः प्रत्यायनमिति अतिशयोक्तिद्वयप्रतीतिरशेषचयपदहेतुका ।

काव्यप्रकाशदर्पणः—**तदप्राप्तीति** । मुक्तिं तु त्राणाय मोक्षं "न तस्य प्राणा उत्क्रामन्ति । ब्रह्मैव सन् ब्रह्माप्येति इति शृतेः बृ० ४-४-६ । निरुच्छवासतया मोक्षेऽपि संबन्धः । अत्र भगवद्वियोगजं दुःखं तदनु ध्यानजं सुखं च जन्मसहस्रोपभोग्य सुकृतदुष्कृतफलराशितादात्म्येनाध्यवसितमिति अशेषचयपदाभ्यमतिशयोक्तिर्व्यंज्यते ।

क्षणदासावक्षणदा वनमवनं व्यसनमव्यसनम् ।
बत वीर तव द्विषतां पराङ्मुखे त्वयि पराङ्मुखं सर्वम् ॥८२॥

अत्र शब्दशक्तिमूलविरोधाङ्गेनार्थान्तरन्यासेन "विधिरपि त्वामनुवर्तते" इति सर्वपदद्योत्यं वस्तु ।

बालचित्तानुरञ्जनी—वस्तुव्यङ्ग्यमुदाहरति **क्षणदेति** । असौ क्षणदा रात्रिः अक्षणदा अनुत्सवदा । वनमरण्यम् । अवनम् रक्षणहेतुः । व्यसनमव्यसनम् । अवीनाम् अनेडकानां असनं प्रेरणं, इत्थं हे देवि ! त्वयि पराङमुखे सर्वंपराङ्मुखवत् । अत्र व्यङ्ग्यं वस्त्वाह **अत्रेति** । या क्षणदा सा कथमक्षणदा इत्यादिः । शब्दशक्तिमूलो विरोधः । अयमुपायो यस्य तेनार्थान्तिरन्यासाढ्येन त्वयि पराङ्मुखे सति भवद्विषतां सर्वपराङ्मुखमित्येवंरूपेणालङ्कारेण तवानुकूलमिति वस्तु सर्वपदद्योत्यं व्यज्यत इत्यर्थः ।

सारबोधिनी—अर्थशक्तिमूलालङ्कारव्यङ्ग्यवस्त्वाह **क्षणदेति** । क्षणदा रात्रिः, अक्षणदा तदितरा नोत्सवं दत्ते च । वनमवनं नारण्यं रक्षकञ्च । व्यसनं द्यूतादि । अव्यसनं व्यसनभिन्नं व्यस्यति बहुलीभवतीति व्यसनं पश्चान्नञा समासात् संक्षिप्तञ्च यद्वा अवीनां मेषाणां असनं क्षेपणमिति । **तवेति** द्वेषकर्मणि षष्ठी ।

काव्यप्रकाशदर्पणः-अक्षणोरन्वयः। [अक्षणोऽनुत्सवः ?] अत्र त्वं रक्षतु। अव्यसनं मेपाणां ज्ञानं यत्। अत्र क्षणादाकथमक्षणदेति विरोधालङ्कारः। सोऽङ्गमुत्थानहेतुर्यस्येति विग्रहः।

तुह वल्लहस्स गोसम्मि आसि अहरो मिलाणकमलदलो।
इअ णववहुआ सोऊण कुणइ वअणं महिसंमुहं ॥८३॥

अत्र रूपकेण त्वयास्य मुहुर्मुहुः परिचुम्बनं तथा कृतं येन म्लानत्वमिति मिलाणादिपदद्योत्यं काव्यलिङ्गम्। एषु स्वतःसंभवी व्यञ्जकः।

बालचित्तानुरञ्जनी--स्वतःसंभविनालङ्कारेण पदद्योत्यमलङ्कारव्यङ्ग्यमुदाहरति **तुहेति**। सखीवचनम्। हे सखि! गोसम्मि प्रभाते तुह वल्लहस्स तव वल्लभस्य, अहरो अधरः, मिलाणकमलदलो म्लानकमलदलः, असि आसीत्, इअ इति, सोउण श्रुत्वा, णववहु नववधूः, वअणं वदनम्, महीसंमुहं महीसंमुखम्, कुणइ करोति।

अत्र स्वभावमाह **अधरेति**। अधरो म्लानकमलदलमिति पदार्थरूपेण स्वतःसंभविना रूपकालङ्कारेण स्वभावशक्त्या हेतोः पदार्थलक्षणलक्षितः काव्यलिङ्गाख्यो मिलाणादिपदद्योत्यो व्यज्यत इत्यर्थः। म्लानत्वं प्रति परिचुम्बनादिरत्र हेतुः।

उपसंहरति **एष्विति**।

सारबोधिनी–अर्थशक्तिमूलालङ्कारव्यङ्ग्यमलङ्कारमाह **तुहेति**।

तव वल्लभस्य प्रातरासीदधरो म्लानकमलदलम्।
इति नववधूः श्रुत्वा करोति वदनं महीसंमुखम्॥

प्राकृते लिङ्गानियमाद्दलपदस्य पुंस्त्वम्। **अत्रेति**। रूपकेणाधरस्य म्लानकमलदलत्वरूपेण म्लानत्वे परिचुम्बनं हेतुरिति काव्यलिङ्गता। "उपमैव तिरोभूतभेदा रूपकमुच्यत" इति रूपकस्य स्वतःसंभवित्वमिति बोध्यम्।

काव्यप्रकाशदर्पणः--

तव वल्लभस्य प्रभाते आसीदधरो म्लानकमलदलम्।
इति नववधूः श्रुत्वा करोति वदनं महीसंमुखम्॥

महीसंमुखम् अवनतलज्जयेति भावः। मिलादिपदं म्लानकमल इति समस्तपदम्।

राईसु चंदधवलासु ललिअमप्फालिऊण जो चावं।
एकच्छत्तं विअ कुणइ भुअणरज्जं विजंभंतो ॥८४॥

अत्र वस्तुना येषां कामिनामसौ राजा स्मरस्तेभ्यो न कश्चिदपि तदादेशपराङ्मुख इति जाग्रद्भिरुपभोगपरैरेव तैर्निशातिवाह्यते इति भुअणरज्जपदद्योत्यं वस्तु प्रकाश्यते ।

बालचित्तानुरञ्जनी इदानीं कविप्रौढोक्तिनिर्मितेन वस्तुना पदद्योत्यं वस्तुव्यङ्ग्यमुदाहरति **राईस्विति** । जो यः, कामः चंदधवलासु चन्द्रधवलासु, राईसु रात्रिषु, ललिअं ललितम् । चावं चापं, अप्फालिऊण आस्फाल्य, विजंभंतो विजृम्भमाणः, एकच्छत्तमिव, [एकछत्रमिव] भुवनराज्यं, कुणइ करोति । अत्र वस्तुव्यङ्ग्यमाह **अत्रेति** । कविप्रौढोक्तिनिर्मितेन भुवनराज्यमिति पदार्थरूपेण वस्तुना कामस्य राज्ये कामिनो भृत्याः, भागनिष्ठत्वेन तदाज्ञापरा भुअणरज्ज पदद्योत्यं व्यज्यते इत्यर्थः ।

सारबोधिनी–राईस्विति ।

रात्रीषु चन्द्रधवलासु ललितमास्फाल्य यश्चापम् ।
एकच्छत्रमिव करोति भुवनराज्यं विजृम्भमाणः ॥

यः प्रकृतः कामः । चापास्फालनेन भुवनराज्यस्यैकच्छत्रीकरणं कविप्रौढोक्त्यैव सिद्धम् । **अत्रेति** वस्तुना भुवनराज्यपदार्थेन । तेभ्य इति तेषु मध्ये इत्यर्थः । तेभ्योऽपेत इति वा ।

काव्यप्रकाशदर्पणः–रात्रीषु चन्द्रधवलासु ललितमास्फाल्य यश्चापम् ।
एकच्छत्रमेव करोति भुवनराज्यं विजृम्भमाणः ॥

तेभ्यः कामिभ्यो योऽसौ स्मरस्यापदेशः कश्चित् पराङ्मुख इति । तेभ्य इत्यत्र निर्धारणे पञ्चमी । पक्षस्यानुमानविरुद्धत्वात् । आज्ञाराधानो राज्ञः कर्म राज्यम् । ते कुटिले सकलपुरुषहिंस्रत्वात् । वयसि यौवने अवस्थाविलम्बोऽद्य कार्यक्षमोऽपि पुनः सन्तापकदर्थितेन हृदयेन स्तनभरवश्येन विशुद्धजातिर्न च तमस्याहारः । विशुद्धाभिजला हे आश्रयार्थं पदाच्चलति सः ।

निशितशरधियार्पयत्यनङ्गो दृशि सुदृशः स्वबलं वयस्यराले ।
दिशि निपतति यत्र सा च तत्र व्यतिकरमेत्य समुन्मिषन्त्यवस्थाः ॥८५॥

अत्र वस्तुना युगपदवस्थाः परस्परविरुद्धा अपि प्रभवन्तीति व्यतिकरपदद्योत्यो विरोधः ।

बालचित्तानुरञ्जनी—कविप्रौढोक्तिनिर्मितेन वस्तुना अलङ्कारव्यङ्ग्यपदद्योत्यमुदाहरति **निशितेति** । कामः कृती, अराले वक्रे वयसि तारुण्ये निशितशरबुद्धयाङ्गनाया दृशि स्वसामर्थ्यमर्पयति । सा च यत्र यत्र निपतति तत्र तत्र किमवस्थाः अभिलाषचिन्ताद्याः व्यतिकरं मिश्रीभावं प्राप्य समुन्मिषन्ति ।

अत्र व्यङ्ग्यमलङ्कारमाह **अत्रेति**। व्यतिकरपदार्थरूपेण वस्तुना कविप्रौढोक्तिनिर्मितेनाभिलाषचिन्तादीनामवस्थानां सुखदुःखरूपाणां परस्परविरुद्धानां यौगपद्यमसंभाव्यमिति विरोधालङ्कारो व्यज्यत इत्यर्थः।

सारबोधिनी–निशितेति। अराले कुटिले, सर्वकामिहिंस्रत्वात्। अवस्थाः हसितरुदितप्रलपितमूर्च्छितादयः।

वारिज्जंतो वि पुणो संदावकदत्थिएण हिअएण।
थणहरवअस्सएण विसुद्धजाई ण चलइ से हारो॥८६॥

अत्र विशुद्धजातित्वलक्षणहेत्वलङ्कारेण हारोऽनवरतं कम्पमान एवास्ते इति ण चलइ पदद्योत्यं वस्तु।

बालचित्तानुरञ्जनी–कविप्रौढोक्तिनिर्मितेनालङ्कारेण पदद्योत्यं वस्तुव्यङ्ग्यमुदाहरति **वारिज्जन्तो इति**। संदावकदत्थिएण सन्तापकदर्थितेन, थणहरवअस्सएण स्तनभरवयस्येन हृदयेन वारिज्जन्तो विपुणो पुनः विसुद्धजाई विशुद्धजातिः, तस्या हारः ण चलइ चलति। विरहावस्थायां सन्तप्तेन हृदयेन, मत्समदुःखभागित्वेन वयस्या स्तनभर एव सन्तापमनुभवितुं त्वं कथमनुभवसीति निवार्यमाण इत्यर्थः। व्यङ्ग्यं वस्त्वाह **अत्रेति**। विशुद्धजातिरिति पदार्थरूपेण कविप्रौढोक्तिनिर्मितेन काव्यलिङ्गाख्येनालङ्कारेण किमत्र वार्यमाण इत्यर्थः। व्यङ्ग्यं वस्त्वाह **अत्रेति**। विशुद्धजातिरिति पदार्थरूपेण कविप्रौढोक्तिनिर्मितेन रूपकालङ्कारेण किमत्र भवतीति कम्पमान एवास्ते। वस्तु व्यज्यत इत्यर्थः।

सो मुद्धसामलंगो धम्मिल्लो कलिअललिअणिअदेहो।
तीए खंधाहि बलं गहिअ सरो सुरअसंगरे जअइ॥८६॥

अत्र रूपकेण मुहुर्मुहुराकर्षणेन तया केशपाशः स्कन्धयोः प्राप्तो यथा रतिविरतावप्यनिवृत्ताभिलाषः कामुकोऽभूदिति खंधपदद्योत्या विभावना। एषु कविप्रौढोक्तिमात्रनिष्पन्नशरीरः।

बालचित्तानुरञ्जनी–सोमुद्धेति। मुद्धसामलंगो मुग्धश्यामलाङ्गः। कलिअललिअणिअदेहो कलितललितनिजदेहः धम्मिल्लो धम्मिल्लः केशपाशः स एव सरो सरः, तीए तन्व्याः, खंधाइ स्कन्धाद्धेतो बलं लहिअ लब्ध्वा सुरअसंगरे सुरतसङ्गरे जअइ जयति।

अत्र व्यङ्ग्यमलङ्कारमाह **अत्रेति**। कविप्रौढोक्तिनिर्मितेन रूपकालङ्कारेण रतिलक्षणकारणाभावे च अभिलाषलक्षणकार्योत्पत्तिरूपो विभावनाख्योऽलङ्कारो व्यज्यत इत्यर्थः।

उपसंहरति एष्विति ।

सारबोधिनी--सो मुद्ध इति ।

स मुग्धश्यामलाङ्गो धम्मिल्लः कलितललितनिजदेहः ।
तस्याः स्कन्धाद्बलं गृहीत्वा स्मरः सुरतसङ्गरे जयति ।।

कलितेत्यादि स्मरविशेषणम् । स्कन्धादिति स्कन्धशब्देन शोभातिशयो व्यज्यते । **धम्मिल्ल एव** स्मर इति रूपकम् । स्कन्धोंऽशः सेनानिवेशश्च । बलं सामर्थ्यं सैन्यञ्च ।

णवपुण्णिमामिअंकस्स सुहअ को त्तं सि भणसु मह सच्चं ।
का सोहग्गसमग्गा पओसरअणि व्व तुह अज्ज ।।८८।।

अत्र वस्तुना मयीवान्यस्यामपि प्रथममनुरक्तस्त्वं न तत इति णवेत्यादि–पओसेत्यादिपदद्योत्यं वस्तु व्यज्यते ।

बालचित्तानुरञ्जनी-कविनिबद्धवक्तृप्रौढोक्तिनिर्मितेन तेन वस्तुना पदद्योत्यं व्यङ्ग्यमुदाहरति **णवपुण्णिमेति** । सुहअ हे सुभग, तं त्वं, णवपुण्णिमामिअंकस्स नवपूर्णिमामृगाङ्कस्य, को कः सि असि, मह मम, सच्चं सत्यं भणसु कथय, तह तव, अज्ज अद्य, सोहग्ग समग्गा सौभाग्यसमग्रा स्त्री पओसर अणिछ प्रदोषरजनीव ।

अत्र व्यङ्ग्यं वस्त्वाह **अत्रे**ति । कविना निबद्धा खण्डिता स्त्री वक्त्री तत्प्रौढोक्तिना वाच्यरूपेण यथा रजन्यां चन्द्रोदयकाल एव रक्तस्तथा तस्यां त्वं प्रथममेव वानुरक्तः । ततः पश्चात् तत इति वस्तु नवपदद्योत्या प्रदोषरजनी क्षणमात्रमेव सौभाग्यसमग्रा तथा सापीति यत्र समग्रा सेत्यादि पदद्योत्यं वस्तु चार्थशक्त्युद्भवतया व्यज्यत इत्यर्थः ।

सारबोधिनी--नवपूर्णिमामृगाङ्कस्य सुभग कस्त्वमसि भणं मम सत्यम् ।
का सौभाग्यसमग्रा प्रदोषरजनीव तवाद्य ।।

अत्र नवपदेन तरलत्वं पूर्णिमापदेन नायिकान्तरसंसर्गः मृगाङ्कपदेन ख्यातकलङ्कत्वं प्रदोषपदेन प्रकृष्टदोषत्वं, रजनीपदेनानुरागित्वं व्यज्यते । नवः प्रथमोदितः प्रदोषो रजनीमुखम् । अनयोः संबन्धः क्षणिक एवेत्याह **मयीत्यादि** । ननु प्रदोषरजनीवेत्युपमानैरपेक्ष्येण कथं व्यञ्जकत्वमिति चेन्न, तदनुपादानेऽपि व्यञ्जनासिद्धेरिति ।

काव्यप्रकाशदर्पण :—

नवपूर्णिमामृगाङ्कस्य सुभग कस्त्वमसि भण मम सत्यम् ।
का सौभाग्यसमग्रा प्रदोषरजनीव तवाद्य ।।

अत्र नवपदेन नवमत्वं, पूर्णिमापदेन नायकानामपि नायिकान्तरसंसर्गः मृगाङ्कपदेन ख्यातेः कलङ्कत्वम् । प्रदोषपदेन प्रकृष्टदोषत्वम् । रजनीपदेन रागित्वम् ।

सहि णवणिहुवणसमरम्मि अंकवालीसहीए णिबिडाए ।
हारो णिवारिओ विअ उच्छेरन्तो तदो कहं रमिअं ।।८९।।

अत्र वस्तुना हारच्छेदानन्तरमन्यदेव रतमवश्यमभूत् तत्कथय कीदृगिति व्यतिरेकः कहं-पदगम्यः ।

बालचित्तानुरञ्जनी—कविनिबद्धवक्तृप्रौढोक्तिनिर्मितेन वस्तुना पदद्योत्यमलङ्कारव्यङ्ग्यमुदाहरति सहीति । सहि हे सखि णवणिहुवणसमरम्मि नवनिधुवनसमरे, णिबिडाए निबिडायाः, अङ्कवाली-सहीए अङ्कपालीसख्या अङ्कपाली आलिङ्गनं सैव सखी तया उच्छेरन्तो उच्छ्रियमाणः द्वयोस्तृतीयतया स्पर्शविघ्नहेतुत्वात् अधिकीभवन् हारो हारः निवारित एव । यथा सख्या रतिकाले अन्यो निवार्यते तथा । गाढालिङ्गनेन हारस्त्रोटित इत्यर्थः । एतावदेव मया दृष्टं, तदो ततः, कहं कथं, रमिअं रमितम्, कथयेति शेषः । अत्र व्यङ्ग्यमलङ्कारमाह **अत्रेति** ।

सारबोधिनी—**सहीति** ।

सखि नवनिधुवनसमरेऽङ्कपालीसख्या निबिडया ।
हारो निवारित एवोच्छ्रियमाणः ततः कथं रमितम् ।।

अङ्कपाली आलिङ्गनम् । सैव सखी सुखहेतुत्वात् । "अङ्कपाली परीरम्भे कोटिधात्रिकयोरपी"ति मेदिनीकारः । निबिडा दृढा विश्वस्ता च । अत्र प्रसिद्धरतेभ्योऽधिकत्वेन व्यतिरेकः कहमिति-पदगम्यः, तस्य विस्मयार्थकत्वात् ।

काव्यप्रकाशदर्पणः—

सखि नवनिधुवनसमयेऽङ्कपालीसख्या निबिडया ।
हारो निवारित एवोच्छ्रियमाणस्ततः कथं रमितम् ।।

अङ्कपालीति । आलिङ्गनविशेष एव सखी तदुच्छ्रियमाणोऽभिभवतु । अन्यो न्याङ्गत्वस्यात्र विघ्नदायित्वात् इति भावः । निबिडा दृढा विश्वासततिः । अत्र कथमिति प्रश्नेन पूर्वरततोऽधिकमनोहरत्व-सूचनाद् व्यतिरेकः ।

पविसंती घरवारं विवलिअवअणा विलोइऊण पहं ।
खंधे घेत्तूण घडं हा हा णट्ठोत्ति रुअसि सहि किं ति ।।९०।।

अत्र हेत्वलङ्कारेण सङ्केतनिकेतनं गच्छन्तं दृष्ट्वा यदि तत्र गन्तुमिच्छसि तदा, अपरं घटं गृहीत्वा गच्छेति वस्तु किंतिपदद्योत्यम् ।

बालचित्तानुरञ्जनी – कविनिबद्धवक्तृप्रौढोक्तिनिर्मितेनालङ्कारेण पदद्योत्यवस्तुव्यङ्ग्यमुदाहरति **पविसंतीति**। सहि सखि ! घरवारं गृहद्वारं, पविसंती प्रविशन्ती, पहं पन्थानं, विलोइऊण पुरो विलोक्य, विवलिअवअणा विवलितवदना सती, घडं घटं खन्धे स्कन्धे, घेत्तूण गृहीत्वा, हा हा णट्टोत्ति नष्ट इति 'किंति किमिति, रुअसि रोदिषि।

अत्र वस्तुव्यङ्ग्यमाह **अत्रेति**। णट्ठोत्तीतिपदार्थरूपेण रोदनविषयेण हेत्वलङ्कारेण अपरं घटं गृहीत्वा गच्छेति वस्तु किंतिपदद्योत्यं व्यज्यत इत्यर्थः।

सारबोधिनी –

प्रविशन्ती गृहद्वारं विवलितवदना विलोक्य पन्थानम्।
स्कन्धे गृहीत्वा घटं हा हा नष्ट इति रोदिषि सखि किमिति॥

नष्ट इति हेतू रोदनस्य। खेप्पूणेति पाठान्तरम्। तत्र स्कन्धाक्षेप एव घटनाशे हेतुरिति।

यथा वा

विहलंखलं तुमं सहि दट्ठूण कुडेण तरलंतरदिट्ठिम्।
वारप्फंसमिसेण अ अप्पा गुरुओत्ति पाडिअ विहिण्णो॥६१॥

अत्र नदीकूले लतागहने कृतसंकेतमप्राप्तं गृहप्रवेशावसरे पश्चादागतं दृष्ट्वा पुनर्नदीगमनाय द्वारोपघातव्याजेन बुद्धिपूर्वं व्याकुलतया त्वया घटः स्फोटित इति मया चिन्तितं तत्किमिति नाश्वसिषि तत्समोहितसिद्धये व्रज। अहं ते श्वश्रूनिकटे सर्वं समर्थयिष्ये इति द्वारस्पर्शनव्याजेनेत्यपह्नुत्या वस्तु।

बालचित्तानुरञ्जनी–अस्यैवोदाहरणान्तरमाह **यथा वेति**। सहि सखि ! क्षुद्रेण घटेनोपलक्षिता त्वं विहलं विह्वलं, खलं प्रियं, दट्ठूण दृष्ट्वा, तरलतरदिट्ठी तरलतरदृष्टिर्जातेति शेषः। वारप्फसमिसेण द्वारस्पर्शमिषेण, अ अप्पा आत्मा, गुरुओत्ति गुरुरिति, पाडिअ विहिण्णो पतितविभिन्नः।

अत्र वस्तुव्यङ्ग्यमाह **अत्रेति**। कविनिबद्धा या सखी वक्त्री तत्प्रौढोक्तिनिर्मिते वारप्फंसमिसेण पदार्थेनापह्नुत्यलङ्कारेण ते श्वश्रूं बोधयिष्यामीति वस्तु।

सारबोधिनी–नन्वेतस्य स्वतःसंभवित्वमेवेत्यत उदाहरणान्तरमाह **यथा वेति**। **विहलमिति**। विह्वलां त्वां सखि दृष्ट्वा कूटेन तरलतरदृष्टिम्। द्वारस्पर्शमिषेणात्मा गुरुरिति पातयित्वा विभिन्नः। कूटो घटः।

जोह्णाइ महुरसेण अ विइण्णतारुण्ण उस्सुअमणा सा।
वुड्ढा वि णवोढव्विअ परहुआ अहह हरइ तुह हिअअं॥९२॥

अत्र काव्यलिङ्गेन वृद्धां परवधूं त्वमस्मानुज्झित्वाभिलषसीति त्वदीयमाचरितं वक्तुं न शक्यमित्याक्षेपः परवधूपदप्रकाश्यः ।

सारबोधिनी--

ज्योत्स्नया मधुरसेन च वितीर्णतारुण्यौत्सुक्यमनाः सा ।

वृद्धापि नवोढेव परवधूरहह हरति तव हृदयम् ॥

अत्रेति । उत्सुकेत्यादिविशेषणविशिष्टं परवधूत्वमेव हृदयहरणे हेतुः । नायकचेष्टाया अशक्यवक्तव्यत्वेनाक्षेपः ।

एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरः । वाक्यप्रकाश्ये तु पूर्वमुदाहृतम् । शब्दार्थोभयशक्त्युद्भवस्तु पदप्रकाश्यो न भवतीति पञ्चत्रिंशद्भेदाः ।

प्रबन्धेऽप्यर्थशक्तिभूः ॥४२॥

यथा गृध्रगोमायुसंवादादौ ।

अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसंकुले ।
कङ्कालबहुले घोरे सर्वप्राणिभयङ्करे ॥६३॥
न चेह जीवितः कश्चित् कालधर्ममुपागतः ।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥६४॥

इति दिवा प्रभवतो गृध्रस्य पुरुषविसर्जनपरमिदं वचनम् ।

आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत सांप्रतम् ।
बहुविघ्नो मुहूर्तोऽयं जीवेदपि कदाचन ॥६५॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम् ।
गृध्रवाक्यात् कथं मूढास्त्यजध्वमविशङ्किताः ॥६६॥

इति निशि विजृम्भमाणस्य गोमायोर्जनव्यावर्तननिष्ठं च वचनमिति प्रबन्ध एव प्रथते ।

अन्ये त्वेकादशभेदा ग्रन्थविस्तरभयान्नोदाहृताः, स्वयं तु लक्षणतोऽनुसर्तव्याः ।

अपि शब्दात्मपदवाक्ययोः ॥४३॥

सारबोधिनी—कङ्काल इति । "स्याच्छरीरास्थि कङ्काल" इत्यमरः । कालधर्मो मरणम् । दिवा प्रभवत इति । रात्रावन्धत्वात् । प्रबन्ध एव प्रथते, व्यञ्जकत्वेनेति शेषः । अथवा प्रबन्ध इति सप्तमी । उक्तरूपं वचनं प्रथत इत्यन्वयः ।

काव्यप्रकाशदर्पणः—पूर्वमर्थान्तरसङ्क्रमितवाच्यादीनां सामर्थ्यलक्षणप्रस्तावे । प्रबन्धो महाकाव्यम् । अर्थशक्तिभूर्द्वादशप्रकारः । कालधर्मो मरणम् । अस्य च श्लोकस्य पद्यान्तरसचिवस्येव महाकाव्यतेति स्पष्टार्थं महाकाव्यान्तरमुदाहरति **आदित्य इति** । स्नेहो जीवनोपायस [क ?] रणबीजम् । मुहूर्तः सन्ध्याकालः बहुविघ्नभूताद्यावेशसंभाविसाधारणत्वात् । अत्र स्वतःसंभवि विरक्तभावरक्तत्वं व्यज्यते । लक्षणतो लक्ष्यात् । तद्यथा रघुवंशे "समपूजतयात्यन्त" इत्यादि । न तुल्ययोगितया काव्यलिङ्गेन वा । रघुराघवयोर्व्यतिरेकालङ्कारः प्रतीयते ।

किन्तु कुमारसंभवे हिमगिरिवर्णने प्रौढोक्तिसिद्धालङ्कारसंसृष्ट्या हिमगिरेरुत्कर्षः प्रतीयते । अर्थशक्तिभूरित्युपलक्षणम् । शब्दशक्त्युद्भवेऽपि क्वचित् प्रबन्धव्यङ्ग्यो दृश्यते । यथा माघकाव्ये शिशुपाल-[दूत ?] भूतोक्तौ संध्यावाच्ये वर्णमात्ररूपो विग्रहः । उपमाध्वनिरपि तथाविधः संभाव्यते ।

पदैकदेशरचनावर्णेष्वपि रसादयः ।

बालचित्तानुरञ्जनी—पदैकदेशादिष्वपि भवतीत्याह । पदैकदेशेन पदस्यैकदेशा अंशाः प्रकृतिप्रत्ययसंबन्धकालवचनपुरुषव्यत्ययपूर्वनिपातविशेषविभक्तितद्धितोपसर्गनिपातसर्वनामप्रातिपदिकाव्ययीभावकर्मधारयादिविशेषाः । रचना संघटना, सा च त्रिधा, असमासा मध्यमसमासा अतिवर्णमृदुसूक्षात्मना प्रसिद्धा । तेषु निमित्तसप्तमी । निमित्तेषु द्योतकेषु वसतीत्यर्थः । "रसादय" इत्यादिशब्देन तदाभासादयः । यद्यपि विभावादीनां रसाभिव्यञ्जकत्वं तथापि विभावादीनामपि पदांशादिना प्रकाश्यमानत्वेन चमत्कारकारित्वात् । विभावाद्याश्रयं पदांशादीनामपि च द्योतकत्वमविरुद्धम् ।

सारबोधिनी—**पदैकदेश इति** । पदं द्विविधं सुबन्तं तिङन्तञ्च । एकदेशो नामधातु-स्वरूपः प्रकृतिभागः । सुप्तिङ्स्वरूपो विभक्तिभागः । वक्ष्यमाणोपसर्गादिरप्यत्रैवान्तर्भावः । इदमुपलक्षणम् । पुरुषव्यत्ययपूर्वनिपातादयोऽपि गृहीतव्या इति लक्ष्यप्रदर्शने वक्ष्यते ।

तत्र प्रकृत्या यथा

रइकेलिहिअणिअसणकरकिसलअरुद्धणअणजुअलस्स ।
रुद्दस्स तइअणअणं पव्वइपरिचुंबिअं जअइ ॥९७॥

अत्र जयतीति न तु शोभते इत्यादि । समानेऽपि हि स्थगनव्यापारे लोकोत्तरेणैव व्यापारेणास्य पिधानमिति तदेवोत्कृष्टम् ।

बालचित्तानुरञ्जनी—तत्र प्रकृत्या रसव्यङ्ग्यमुदाहरति **रइकेलीति** । रइकेलिहिअणिअसणकरकिसलअरुद्धणअणजुअलस्स रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य, हृतनिवसनश्चासौ करकिसलयरुद्धनयनयुगलश्चेति समासः । रुद्दस्स रुद्रस्य, पव्वइपरिचुंबिअं पार्वतीपरिचुम्बितं, तइअणअणं

कथने प्रयोजनमाह **समान इति** । पिधानमितरलोचनद्वयसाधारणोऽपि लोकोत्तरेणैव चुम्बनरूपेणास्य पिधानमिति तदेव तृतीयनयनमेव इतरनयनद्वयादुत्कृष्टमधिकम् । अयमर्थो जयतिप्रयोगात् नान्यस्मादतो भयप्रकृत्या संभोगो व्यज्यत इत्यर्थः ।

सारबोधिनी–तत्र धातुरूपपदैकदेशमुदाहरति रइ इत्यादि ।

रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य ।
रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति ॥

प्रकृत्यन्तरस्य न व्यञ्जकत्वमन्वयव्यतिरेकाभ्यां तदुपगमादित्याह न तु शोभत इति । **समानेऽपीत्यादि** । स्थगनमाच्छादनम् । तच्च हस्तादिना कृतं लौकिकम् । परिचुम्बनं तु पिधानोपकरणं केनाप्यदृष्टत्वाल्लोकोत्तरमित्याह **लोकोत्तरेणेति** । तदेव चुम्बनपिधानमेवोत्कृष्टं, चमत्कारविशेषानुगुणत्वात् । आनुगुण्यं च रागातिशयहर्षलज्जासंपत्तिद्वारकं, रसातिशयपोषणात् । तच्च नयनविषयेण जयतिना गम्यत इति न शोभतेः प्रयोगः । तेन रागातिशयार्थमेव व्यञ्जकत्वं, नोत्कर्षं प्रति । अनुशासनेन तत्र शक्त्युपगमात् ।

काव्यप्रकाशदर्पणः–पदैकदेशः प्रकृत्यादि । तस्यापि केवलस्य न वाचकत्वम् । तथापि वाचकसमुदायप्रविष्टस्य रसादिषु तत्तदतिशयाधायकत्वम् ।

रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य ।
रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति ॥

अत्रेति । शोभते भातीत्यादि । प्रकृतिस्वरूपरुद्धादिधातुप्रयोज्यधातोः संनिवेशो हस्तादिति पिधानात्तृतीयनयनपिधानस्योत्कर्षं शृङ्गारजीवितभूतं व्यनक्तीत्याशयः ।

यथा वा

प्रेयान् सोऽयमपाकृतः सशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद्यावन्न यात्युन्मनाः ।
तावत्प्रत्युत पाणिसंपुटगलन्नीवीनिबन्धं धृतो
धावित्वेव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः ॥६८॥

अत्र पदानीति न तु द्वाराणीति ।

बालचित्तानुरञ्जनी–अत्रैवोदाहरणान्तरमाह **यथेति** । कयाचिन्नायिकया सशपथं पादानतः प्रेयान् तिरस्कृतः । स उन्मनाः सन् द्वित्राण्यपि पदानि यावन्न याति तावत् धावित्वा प्रत्युत करयुगले गलन् नीवीनिबन्धो निरोधनं यस्मिन् कर्मणि कृतं प्रणामकञ्च यथा तथा धृतः । विचित्रता आश्चर्यं व्यङ्ग्यम् । तामाह **अत्रेति** । द्वित्राणि पदानीत्युक्तं न तु द्वाराणीति । द्वित्राणि द्वाराणीत्युच्यमाने रसाप्रतीतेः । अतो द्वित्रादिपदप्रकृत्या प्रेमातिशयो व्यज्यत इत्यर्थः ।

सारबोधिनी–अथ नाम्नो व्यञ्जकतामाह **यथा वेति**। न **तु द्वाराणीति**। तेन द्वारादिव्यवच्छेदो व्यङ्ग्यः। स च संभोगसञ्चार्यौत्सुक्यापोद्बलनद्वारा रसपरिपोषणकृत्।

तिङ्सुपोर्यथा

पथि पथि शुकचञ्चूचारुराभाङ्कुराणां
दिशि दिशि पवमानो वीरुधां लासकश्च।
नरि नरि किरति द्राक् सायकान् पुष्पधन्वा
पुरि पुरि विनिवृत्ता मानिनीमानचर्चा ॥६६॥

अत्र किरतीति किरणस्य साध्यमानत्वं, निवृत्तेति निवर्तनस्य सिद्धत्वं तिङा सुपा च तत्रापि क्तप्रत्ययेनातीतत्वं द्योत्यते।

बालचित्तानुरञ्जनी—तिङ्सुब्भ्यां रसव्यङ्ग्यमुदाहरति **तिङिति**। पथि पथि दिशि दिशि शुकचुञ्चूवत् चारूणाम् अङ्कुराणां, लतानां च नर्त्तकः कामः प्रतिमनुष्यं बाणान् विक्षिपति। व्यङ्ग्यमाह **अत्रेति** किरतीति वर्तमानाभिधायिप्रत्ययोऽतीतानागतरहितस्य किरणस्य वर्त्तमानस्य विधीयमानत्वेनोत्कर्षं व्यनक्ति। प्रत्ययोऽपि तदेव व्यनक्तीत्यर्थः।

सारबोधिनी–**पथि पथीति**। लासको नर्तकः। चर्चा प्रसङ्गः। कृपृवृजिमन्दिनिधाञः क्नुः [२·८१] इति औणादिकक्नुप्रत्ययेन किरणपदसिद्धिः। साध्यत्वसिद्धत्वे व्यङ्ग्ये एवेत्याह **तिङासुपा चेति**। किरणनिवृत्त्योः सिद्धत्वसाध्यत्ववैपरीत्येन कार्यकारणपौर्वापर्यविपर्ययरूपातिशयोक्तिगम्यमाननिवृत्तिशीघ्रभावित्वद्वारा वसन्तकालस्योद्दीपनातिशयो द्योत्यते। **क्तप्रत्ययेनेति**। ननु क्तप्रत्ययवाच्यस्यातीतत्वस्य कथं व्यङ्ग्यत्वमिति। अथ कस्य वा अतीतत्वं बोध्यताम्। न तावन्मानचर्चायाः तस्याः प्रकृतित्वाभावात्। प्रत्ययस्य प्रकृत्यर्थान्वितस्वार्थबोधकत्वात्। न वा निवृत्तेः अतीतत्वरूपायास्तस्या अतीतत्वाभावादिति चेदुच्यते। प्रकृत्या प्रत्ययेन च मानचर्चाया एवातीतत्वं शक्तिव्यञ्जनाभ्यां बोध्यते। न चैकतरवैयर्थ्यम्। सभेदान्यतरवैयर्थ्यमिति न्यायात्। न तथाप्यप्रकृत्यर्थान्वितस्वार्थबोधकत्वं क्तप्रत्ययस्य कथमिति वाच्यम्। व्यञ्जनशक्तिमहिम्नेत्यवधेहि।

यद्वा–अतिशयेन इतत्वं गतत्वं अतीतत्वम्। तथा च प्रकृत्या प्रत्यायितस्याप्यतीतत्वस्य पुनः क्तप्रत्ययेन प्रत्यायनमतिशयावगमात्। भुक्तभुक्त इत्यत्र द्वितीयभुक्तपदाद्यथा भुक्तत्वातिशयावगतिः मानचर्चान्तरासमानकालीनत्वमेव मानचर्चातीतत्वातिशय इति।

काव्यप्रकाशदर्पणः–प्रातिपदिकरूपप्रकृतेर्व्यञ्जकत्वे उदाहरति **पथि पथीति**। किरतीति किरणस्य वर्तमानविहितत्वात् साध्यत्वम्। निवृत्तेति कृदन्तप्रत्ययसिद्धम्। तेन कार्यस्य झटित्युत्पन्नत्वद्योतनेन तिङ्कृद्भ्यां रसोत्कर्षत्वम्। किं चैवमत्र कार्यकारणपौर्वापर्यव्यत्ययरूपातिशयोक्त्यलङ्कारस्य व्यङ्ग्यत्वम्। एवं च न केवलं रसध्वनेः पदमतिशयव्यङ्ग्यत्वम्। किन्तु वस्त्वलङ्कारयोरपीति ग्रन्थकृदभिप्रायः सूचितो भवति।

यथा वा

लिखन्नास्ते भूमिं बहिरवनतःप्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकैः
तवावस्था चेयं विसृज कठिने मानमधुना ॥१००॥

अत्र लिखन्निति न तु लिखतीति तथा आस्ते इति न तु आसित इति अपि तु प्रसादपर्यन्तमास्ते इति भूमिमिति न तु भूमाविति न हि बुद्धिपूर्वकमपरं किञ्चिल्लिखतीति तिङ्सुब्विभक्तीनां व्यङ्ग्यम् ।

बालचित्तानुरञ्जनी—अत्रैवोदाहरणान्तरमाह **यथा वेति** । प्राणदयितः प्राणवल्लभः बहिरवनतशिराः सन् भूमिं लिखन्नास्ते । तव सख्यः निराहाराः सत्यः निरन्तररोदनोच्छूननेत्राः पञ्जरस्थशुकैः पठनं हसनं च परित्यक्ते । तव चेयमवस्था । अतस्त्वमधुना मानं परित्यज ।

अत्र व्यङ्ग्यमाह **लिखन्निति** सुब्विभक्त्या । प्रसादपर्यन्तमास्त तदिति व्यज्यते लिखतीत्युक्तेऽस्यार्थस्याप्रतीतेः । आस्त इति तिङ्विभक्त्या तस्य चिन्ताकुलत्वं व्यज्यते । भूमावित्युच्यमाने पूर्वं चित्रलेखनस्यैव प्रतीयमानत्वात् अस्यार्थस्याप्रतीतेः । एवं सुबादयोऽपि प्रायः विशेषं व्यञ्जयन्ति । सोऽभिप्रायः स्वस्वविभावादिरूपणाद्वारेण रसादीन् व्यनक्तीत्यर्थः ।

सारबोधिनी-लक्ष्यान्तरमाह **यथा वेति** । **न तु लिखतीति** । तथा च लिखनस्य न साध्यत्वं किन्त्वप्राधान्यमबुद्धिपूर्वकत्वं व्यज्यते इति प्रसादपर्यन्तायाः स्थितेरेव साध्यत्वम् । तदाह **अपि त्विति** । **तथेति** । स्थितेर्वर्तमानत्वस्य वर्तमानतावाचितेति प्रत्ययवाच्यतया व्यङ्ग्यमाह **न त्विति** । तेनात्र स्थित्या प्रतीताविच्छेदो व्यङ्ग्यः । **भूमिमिति** । भूमावित्यधिकरणताभिधानेनाकांक्षितस्य कर्मणि उद्देश्यत्वं प्रतीयेत, न चात्र तथेत्यर्थः । तदाह **नहीति** ।

सबन्धस्य यथा

गामारुहम्मि गामे वसामि णअरठ्ठिइ ण जाणामि ।
णाअरिआणं पइणो हरेमि जा होमि सा होमि ॥१०१॥

अत्र नागरिकाणामिति षष्ठ्याः ।

'रमणीयः क्षत्रियकुमार आसीत्' इति कालस्य ।

एषा हि भग्नमहेश्वरकार्मुकं दाशरथिं प्रति कुपितस्य भार्गवस्योक्तिः ।

वचनस्य यथा—

ताणं गुणग्गहणाणं ताणुक्कंठाणं तस्स पेम्मस्स ।
ताणं भणिआणं सुंदर एरिसिअं जाअमवसाणं ॥१०२॥

अत्र गुणग्रहणादीनां बहुत्वं प्रेम्णश्चैकत्वं द्योत्यते ।

बालचित्तानुरञ्जनी—संबन्धेन व्यङ्ग्यमुदाहरति **संबन्धस्येति**। गामारुहम्मि ग्रामरुहास्मि, अन्यत्र जातास्मीति वा गामे वसामि ग्रामे वसामि, णअरठ्ठिइं नगरस्थितिं, ण जाणामि न जानामि, णाअरिआणं नागरिकाणां, पइणो पतीन् हरेमि हरामि । जा होमि या भवामि सा होमि सा भवामि ।

अत्र व्यङ्ग्यमाह **नागरिकाणामिति**। नागरिकाणां पतीनित्यत्र संबन्धार्था षष्ठी । नागरिकाभिहृतचित्ता मयि शक्तिरतिशयेनेति वैदग्ध्यातिशयं व्यनक्ति । नागरिका युवतीरिति समासे संबन्धस्य गूढतया उक्तस्य व्यङ्ग्यस्याप्रतीतेरित्यर्थः ।

कालेन व्यङ्ग्यमाह **रमणीय इति** । अत्र वर्तमानं श्रीरामं प्रति परशुरामप्रयुक्तः भूतकाले विहितश्चासीदिति लिङ्प्रयोगः तद्धननसुकरत्वकथनेन परशुरामस्य जयस्त्ववचनेन वीररसोत्कर्षं व्यनक्ति । कालस्य काले विहितस्य लटः व्यञ्जकत्वम्, उपचारात् । अन्यथा पदैकदेशद्योत्यो रसोऽत्र न प्रतीयते तादृशपदाप्रयोगात् इत्याह **यथेति** । कुपितस्येत्यनेन राज्ञि रसोऽत्रास्तीत्युक्तम् । वचनव्यञ्जकत्वमुदाहरति **वचनस्येति**। हे सुन्दर ! ताण तेषां गुणग्गहणाणां गुणग्रहणानां ताणुक्कंठाणं तासामुत्कण्ठानां, तस्स तस्य, पेम्मस्स प्रेम्णः, ताणं तेषां, भणिआणं भणितीनां, एरिसिअं जाअमवसाणम् । व्यङ्ग्यमाह **अत्रेति**। तेषां गुणग्रहणानामित्यत्र बहुवचनेन हृदयाकर्षि वैदग्ध्यबहुत्वं ध्वन्यते । तद्द्वारा विप्रलम्भोऽपि द्योत्यत इत्यर्थः । तस्य प्रम्ण इत्येकवचनेन प्रेमैकत्वमखण्डत्वं ध्वन्यते । तद्द्वारा विप्रलम्भोऽपि द्योत्यते । तादृशेनैव प्रकर्षप्रतीतेः । तद्द्वारा सातिशयोऽपि द्योत्यत इत्यर्थः । न च सुपां वाचकत्वेन द्योतकत्वं न संभवतीति, वाच्यस्यार्थद्रव्यलिङ्गसंख्याकारकप्रातिपदिकार्थ इति मतमाश्रित्य भाष्यकारेण सुपां द्योतकत्वाङ्गीकारात् ।

सारबोधिनी—गामेत्यादि ।

ग्रामीणास्मि ग्रामे वसामि नगरस्थितिं न जानामि ।
नागरिकाणां पतीन् हरामि या भवामि सा भवामि ॥

नगरस्थितिर्नगरमर्यादा वैदग्धी । **अत्रेति** । षष्ठ्या अनादरो व्यङ्ग्य इत्यर्थः ।

ननु "षष्ठी चानादर" इत्यनुशासनात् कथमनादरस्य व्यङ्ग्यत्वमिति चेदुच्यते । ताः पश्यन्तीरनादृत्येति व्यज्यते इति केचित् ।

अन्ये तु—"नागरिकाणाम्" इत्यपहाय "तत्पतीन्" इत्युक्तौ तेष्वनादरः प्रतीयत एव । तत्र व्यञ्जनैवेत्यर्थ इत्याहुः । वस्तुतस्तु अनादरो व्यङ्ग्यो वाच्यो वा स्यादित्यत्र नाग्रहः कर्तव्यः । किन्तु षष्ठ्या अनादरं प्रत्याय्य रसस्यैव व्यङ्ग्यत्वम् । अतएव ग्रन्थकृता "पदैकदेश" इत्यादिना रसादेरेव व्यंग्यत्वं प्रतिज्ञातम् । एवं सर्वत्र बोध्यम् । **रमणीय इति** । कालस्यातीतकालविहितलुङ्प्रत्ययबोधितस्यातीतकालोपदेशाद्वर्तमानत्वभविष्यत्वव्यवच्छेदोऽवगम्यते । मत्क्रोधकवलितस्यास्य स्थितेर्न वर्तमानत्वं न वा भविष्यत्वमित्यर्थः । **ताणेति** ।

तेषां गुणग्रहणानां तासामुत्कण्ठानां तस्य प्रेम्णः ।
तेषां भणितानां सुन्दर ! ईदृशं जातमवसानम् ॥

बहुत्वं नानाप्रकारत्वम् । एकत्वमैकरूप्यम् । तस्यैव प्रेमप्रकर्षकाष्ठानुरूपत्वात् बहुत्वादिसंख्याविशेषस्तु वाच्य एव ।

काव्यप्रकाशदर्पणः–

ग्रामरुहास्मि ग्रामे वसामि नगरस्थितिं न जानामि ।
नागरिकाणां पतीन् हरामि या भवामि सा भवामि ॥

ग्रामरुहा ग्रामजाता यस्यानादरव्यञ्जकत्वं इत्यर्थः । आसीदिति । वर्तमान एव क्षत्रियकुमारोऽतीतकालस्यामर्षप्रकर्षद्योतकता ।

तेषां गुणग्रहणानां तासामुत्कण्ठानां तस्य प्रेम्णः ।
तेषां भणितानां सुन्दर ईदृशं जातमवसानम् ॥

एकत्वमनेकैरपि हेतुभिरन्यथाभावमप्राप्तवादिति भावः ।

पुरुषव्यत्ययस्य यथा

रे रे चञ्चल लोचनाञ्चितरुचे चेतः प्रमुच्य स्थिर-
प्रेमाणं महिमानमेणनयनामालोक्य किं नृत्यसि ।
किं मन्ये विहरिष्यसे बत हतां मुञ्चान्तरांशामिमा-
मेषा कण्ठतटे कृता खलु शिला संसारवारांनिधौ ॥१०३॥

अत्र प्रहासः ।

पूर्वनिपातस्य यथा

येषां दोर्बलमेव दुर्बलतया ते संमतास्तैरपि
प्रायः केवलनीतिरीतिशरणैः कार्यं किमुर्वीश्वरैः ।
ये क्ष्माशक्र ! पुनः पराक्रमनयस्वीकारकान्तक्रमा-
स्ते स्युर्नैव भवादृशास्त्रिजगति द्वित्राः पवित्राः परम् ॥१०४॥

अत्र पराक्रमस्य प्राधान्यमवगम्यते ।

बालचित्तानुरञ्जनी–पुरुषव्यत्ययव्यञ्जकत्वमुदाहरति **पुरुषव्यत्ययेति** । कश्चिद्वैराग्यवान् चित्तं प्रत्याह । त्वं चपललोचना स्त्री तस्यामञ्चिता रुचिर्यस्य । एवंविध रे रे चेतः स्थिरप्रेमाणं महिमानं हित्वा, अबलां विलोक्य किं नृत्यसि ? विहरिष्यामीति किं मन्यसे ? बत खेदे । हतामिमां मुञ्च । संसारसमुद्रे एषा स्त्री कण्ठतले शिलीकृता खलु ।

व्यङ्ग्यमाह **अत्रेति**। हासः सपरिहासः। "प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च" [पा १-४-१०६] इत्यनेन मन्योपपदे मध्यमः मन्यतेश्चोत्तमोऽभिधीयेत। अतः असमये विहरिष्यस इति पुरुषव्यत्ययेन प्रहासो द्योत्यत इत्यर्थः।

पूर्वनिपातस्य व्यञ्जकत्वमाह। येषां राज्ञां दोर्बलमेव ते राज्ञः नो दुर्बलतया संमताः प्रायः केवलनीतिरीतिशरणैः राजभिस्तैः किं कार्यम् पराक्रमस्वीकारेण मनोहरगतास्ते नैव स्युः। लोकत्रये भवादृशास्त्वादृशाः द्वित्राः अपरे सन्ति।

अत्र व्यङ्ग्यमाह **अत्रेति**। पराक्रमनयेत्यत्र नयशब्दस्याल्पाच्तरमिति पूर्वनिपातेऽपि पराक्रमशब्दस्यास्यार्ह्यहितत्वात् पूर्वनिपातः कृतः। तेन तस्य प्राधान्यं व्यज्यत इत्यर्थः। न चात्र पूर्वनिपातस्य पदैकदेशत्वं नास्तीति वाच्यम् पदधर्मस्य पूर्वनिपातस्य पदैकदेशत्वोपचारात्।

सारबोधिनी–पुरुषेति। पुरुषः प्रथममध्यमोत्तमरूपः पूर्वनिपातस्य व्यञ्जकत्वमाह **येषामित्यादि**। **दोर्बलमेवेति**। एवकारेण नीतिव्यवच्छेदः। **भवादृशा इति**। भवत्तुल्या इत्यर्थः। पराक्रमनयेति पराक्रमस्य पूर्वनिपातेन प्राधान्येनार्चितत्वमवगम्यते। न च यच्चार्चितं द्वयोरित्यनेनानुशिष्टार्थस्य कथं व्यङ्ग्यतेति वाच्यम् अर्चायामननुशासनात्। वस्तुतोऽर्चितस्य पूर्वनिपातविधानात्।

काव्यप्रकाशदर्पणः–अचिन्त्या प्रादुष्कृता किं मन्यसे ? विहरिष्यामीत्यर्थे। किं मन्ये विहरिष्यस' इति प्रहासार्थे पुरुषव्यत्ययः। "प्रहासे च मन्योपपदे मन्यतेरुत्तम" [पा० १-४-१०६] इत्यनुशासनात्। प्रहासः सोपहासो तत्प्रासः।

दुर्बलतया विशिष्टा संमता इत्यर्थः। नीतिशास्त्रेषु दण्डस्य चतुर्थोपायत्वेन गणितत्वात्। रीतिः प्रकारः सा यस्य अल्पाच्तरत्वात् पूर्वनिपाते प्राप्तेऽप्युचितद्योतनाय पराक्रमस्य पूर्वनिपातः।

विभक्तिविशेषस्य यथा–

प्रधनाध्वनि धीरधनुर्ध्वनिभृति विधुरैरयोधि तव दिवसम्।
दिवसेन तु नरप भवानयुद्ध विधिसिद्धसाधुवादपदम् ॥१०५॥

अत्र दिवसेनेत्यपवर्गतृतीया फलप्राप्तिं द्योतयति।

भूयो भूयः सविधनगरीरथ्यया पर्यटन्तं
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था।
साक्षात्कामं नवमिव रतिर्मालती माधवं यत्
गाढोत्कण्ठालुलितलुलितैरङ्गकैस्ताम्यतीति ॥१०६॥

अत्रानुकम्पावृत्तेः करूपतद्धितस्य।

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥१०७॥

अत्र प्रशब्दस्योपसर्गस्य ।

कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः ।
तमांसि तिष्ठन्ति हि तावदंशुमान् न यावदायात्युदयाद्रिमौलिताम् ॥१०८॥

अत्र तुल्ययोगिताद्योतकस्य 'च' इति निपातस्य ।

बालचित्तानुरञ्जनी–विभक्तिविशेषस्य व्यञ्जकत्वमुदाहरति **विभक्तीति**। हे धीर तव विधुरैः शत्रुभिः प्रधनशब्दधारिणि युद्धप्रदेशे दिवसमयोधि । हे नृप भवांस्तु दिवसेन विधिना अनुष्ठानेन सिद्धः साधुवादः कीर्त्तनतः स्तुतिमात्रेण तस्य पदं यथा तथा । अत्र व्यङ्ग्यमाह **अत्रेति** । "अपवर्गे तृतीया" [पा २-३-६] इति फलप्राप्तौ तृतीयाविधानात् तृतीया फलप्राप्तिद्योतिका । अत एव शत्रूणां जयाभावः ।

तद्धितस्य व्यञ्जकत्वमुदाहरति **भूयो भूय इति** । अभिनवकाममिव गृहवलभीतुङ्गगवाक्षस्था मालती भूयोभूयः समीपस्थनगरीवेश्मान्यटते । माधवः पुनः पुनरवलोक्य दृढौत्सुक्येन ललितं यथा स्यात् तथा लुलितैरङ्गकैस्ताम्यति इति कथितम् । न त्ववन्तिकया इति । अत्र व्यङ्ग्यमाह **अत्रेति** "अनुकम्पायाम्" [पा० ५-३-६७] इत्यनेन अनुकम्पायाः कप्रत्ययविधानात् । **अङ्गकैरिति** । तद्धितेन कप्रत्ययेनानुकम्पा व्यज्यते । तयाऽनुकम्पया दौर्बल्याद्यवस्थादिवचनात् विप्रलंभरसप्रकर्षो ध्वन्यत इत्यर्थः ।

उपसर्गस्य व्यञ्जकत्वमुदाहरति **परिच्छेदेति** । इयत्तारहितः सकलशब्दगोचरः **अस्मिन् जन्मनि** पुनर्द्वितीयवारम् अनुभवपथं न गतवान् । विवेकस्य प्रकर्षेण नाशादुपचितः **महामोहगहनः एवंविधः कोऽपि** विकारः अन्तर्जडयति तापं च कुरुते ।

व्यङ्ग्यमाह **अत्रेति** । प्रध्वंसादित्यत्र प्रशब्दः प्रकर्षं द्योतयन् आत्यन्तिकविवेकाभावं व्यनक्तीत्यर्थः ।

निपातव्यञ्जकत्वमुदाहरति **कृतमिति** । हे राजन् ! त्वया मनाक् गर्वाभिमुखं मनः कृतं च । अन्यत् किं तव शत्रव एवं निहताश्च । तमांसि तावत् तिष्ठन्ति यावत् सूर्यं उदयपर्वतं न प्राप्नोति ।

अत्र व्यङ्ग्यमाह **अत्रेति** । चेतिनिपातः । वीररसनिष्ठतुल्ययोगितालङ्कारः वीररसप्रकर्षं व्यनक्तीत्यर्थः । यद्यपि 'च' पदमेव न, पदैकदेशः तथापि पदैकदेशस्यैव च स्वातन्त्र्येणाप्रयोगात् पदैकदेशस्यैवोपचारः ।

सारबोधिनी--प्रधनेत्यादि । प्रधनं युद्धमेवाध्वा प्रवेशनिःसरणहेतुत्वात् विधुरैः शत्रुभिः दिवसं व्याप्य विधिसिद्धमनाहार्यपदं स्थानम् । अपवर्गः फलप्राप्तौ क्रियासमाप्तिः । अयुद्धेति क्रियापदम् । तेन समानायामपि युद्धक्रियायां तव जयरूपफलप्राप्तिरभूदिति भावः । फललाभ एव **क्रियासमाप्तेरिति ।**

भूयो भूय इति । लुलितलुलितैरिति इतस्ततः परिवर्तनशीलैः । ललितलुलितैरिति वा पाठः । अनुकम्पावृत्तेः अनुकम्पार्थकस्यानुकम्पव्यङ्ग्येन सौकुमार्येण दुःखक्षमत्वानधिकारित्व व्यञ्जनद्वारा विप्रलम्भः पुष्यते । **परिच्छेदेति ।**

परिच्छेदो विरतिः । सकलानि शक्तिलक्षकव्यञ्जकानि **प्रशब्देति । प्रशब्दस्य** ध्वंसप्रकर्षेण समूलोन्मूलकत्वव्यक्तिः ।

कृतं चेति । निपातस्येति । चकारद्वयगम्यमानैककालतया वीररसप्रकर्षः प्रतीयते ।

काव्यप्रकाशदर्पणः–फलःप्राप्तौ सत्यां क्रियासमाप्तिरपवर्ग इति न वंशिकथितमिति प्रकरणासङ्गतिः । अनुकम्पायां प्रवृत्तिर्यस्येत्यर्थ इति विग्रहः । परीति पुनः शब्दोऽत्र द्वितीयपादमात्रे ।

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम् ।
बन्दीवैष यशांसि गायति मरुद्यस्यैकबाणाहति-
श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः ॥१०९॥

अत्रासाविति भुवनेष्विति गुणैरिति सर्वनामप्रातिपदिकवचनानां न त्वदिति न मदिति, अपितु अस्मदित्यस्य सर्वाक्षेपिणः, भाग्यविपर्ययादित्यन्यथासंपत्तिमुखेन न त्वभावमुखेनाभिधानस्य ।

तरुणिमनि कलयति कलामनुमदनधनुर्भ्रुवोः पठत्यग्रे ।
अधिवसति सकलललनामौलिमियं चकितहरिणचलनयना ॥११०॥

अत्र, इमनिजव्ययीभावकर्मभूताधाराणां स्वरूपस्य तरुणत्वे, इति धनुषः समीपे, इति मौलौ वसतीति त्वादिभिस्तुल्ये, एषां वाचकत्वे, अस्ति कश्चित् स्वरूपस्य विशेषो यश्चमत्कारकारी स एव व्यञ्जकत्वं प्राप्नोति ।

एवमन्येषामपि बोद्धव्यम् ।

बालचित्तानुरञ्जनी–सर्वनामवचनप्रातिपदिकवचनानां व्यञ्जकत्वमुदाहरति **रामोऽसाविति ।** राघवानन्दे रावणमुद्दिश्य कुम्भकर्णस्य[?] वचनम् । असौ रामः भुववेषु विक्रमगुणैः संधिविग्रहादिभिः परां

प्रसिद्धि प्राप्तः। अस्माकं भाग्यानां नाशात् यदि दैवतं रामं न जानाति ।एष वायुः बन्दीव यस्य रामस्य एकबाणात् कृतानि श्रेणीभूतविशालतालानां विवराणि तेभ्य उद्‌गीर्णैः सप्तभिः स्वरैः यशांसि गायति।

अत्र व्यङ्ग्यमाह **अत्रेति**। **असाविति** सर्वनामैकवचनं चासावेव रामो नान्यो रामोऽस्तीति व्यनक्ति। **भुवनेष्विति**। बहुवचनं सर्वेषु भुवनेषु न त्वेकस्मिन्निति प्रसिद्धैः सार्वत्रिकत्वं व्यनक्ति। अत्रैव बहुवचनं गुणानां बहुत्वं व्यनक्ति। अस्मदिति सर्वेषां नाशं व्यनक्ति। त्वन्मदित्युक्ते सर्वनाशाप्रतीतेः भाग्य-विपर्ययादिति पर्यायात् वैपरीत्यात् यानि भाग्यानि आसन् तानीदानीमन्यथा सपन्नानीत्यभिधानं भाग्याभासं व्यनक्ति। अभावमुखेनाभिधानं न व्यनक्तीत्यर्थः। अत्र सर्वत्र रामविषयाभावः।

पदैकदेशबोध्यः इमनिजव्ययीभावानां कर्मभूताधाराणां व्यञ्जकत्वमुदाहरति **तरुणिमनीति**। तरुणिमनि तारुण्ये कलयति सति भ्रुवोरग्रे शिष्यभूतो कामधनुषः उपाध्यायस्य समीपे पठति सति चकित-चलनयना इयं स्त्री सर्वस्त्रीणां मौलिमधिवसति।

अत्र व्यङ्ग्यमाह **अत्रेति**। इमनिजव्ययीभावकर्मधाराणां स्वरूपव्यञ्जकत्वमिति संबन्धत्वा-दिभिः स्त्रीप्रत्ययाद्यैः इमनिजव्ययीभावकर्मभूताधाराद्यैः स एव विशेषो व्यङ्ग्य इति शेषः। प्राप्नोतीति यो विशेषो व्यङ्ग्यः स्वसाधकव्यञ्जकास्तित्वं प्राप्नोतीत्यर्थः। श्रुतिकटुत्वादिहीनो माधुर्यादियुक्तः शब्दगोचरः स्वसंबन्धो विशेषः। इमनिजादीनां स्वरूपेण विभावादिद्वारा। तथा पारम्पर्येण व्यज्यत इत्यर्थः उक्तप्रका-रेणान्येषामपि पदैकदेशादीनां व्यञ्जकत्वमुदाहार्यमित्याह **एवमिति**। पूर्वगणितेषु भेदेषु पदवाक्यप्रकाश्यौ, ताभ्यां पदैकदेशद्योत्यः रचनाद्योत्यः वर्णद्योत्यः प्रबन्धद्योत्यः पदद्योत्यो वाक्यद्योत्यश्चेति षड्भेदा इत्यर्थः।

काव्यप्रकाशदर्पणः–रामोऽसाविति। सप्तभिः षड्जादिभिः। **असाविति**। सर्वनाम्ना साक्षात् क्रियमाणतदीयलोकोत्तरप्रसिद्धिर्व्यज्यते। वचनं बहुवचनम्। गुणैरित्येकत्र प्रातिपदिकं बहुवचनं चोत्कर्ष-व्यञ्जकम् **न त्वदिति**। त्वद्भाग्यविपर्ययादिति। **मदिति**। मद्भाग्यविपर्ययादिति। **अस्मदिति**। सकल-स्वकुलपरिग्रहः। **अथेत्यादि**। अत्र 'भाग्यात्' इत्यनुक्तावपि भाग्यविपर्ययादिति वचनेनास्माकं भाग्येन पूर्व-मभावः।

तरुणिमनीति। मदनधनुषः[समीपे]पुनः शिक्षां कुर्वतीत्यर्थः। स्वरूपस्य विशेषप्रत्ययादिमनिच् प्रत्ययस्य श्रुतिकटुत्वपरिहारेण सहृदयसङ्गतित्वम्। अव्ययीभावसमासस्य च मदनधनुषो गुणीभावेन भ्रूलताग्रस्य जगद्वशीकरणसाम्राज्यं कर्मभूताधारस्य चाधारैकदेशवृत्तित्वपरिहारेण सकलाधारव्यावृत्तम-प्यास्वादप्रकर्षं द्योतयति। **स एवेति**। व्यञ्जकव्यंग्यतावनियामकः। **एवमिति**। उक्तप्रकारेणान्येषां प्रकृत्यादीनां कर्मप्रवचनीयादीनां च नायिकादिष्ववान्तरमहावाक्यव्यङ्ग्योऽसौ रसादिरपि तु सर्वेष्वेव दृश्यश्रव्यादिप्रबन्धेषु मुख्यतया व्यङ्ग्यो यः अन्यथा काव्यहानेरिति भावः।

वर्णरचनानां व्यञ्जकत्वं गुणस्वरूपनिरूपणे उदाहरिष्यते। अपिशब्दात् प्रबन्धेषु नाटकादिषु। एवं रसादीनां पूर्वगणितभेदभ्यां सह षड्भेदाः।

भेदास्तदेकपञ्चाशत्

व्याख्याताः।

तेषां चान्योन्ययोजने ।।४३।।

संकरेण त्रिरूपेण संसृष्ट्या चैकरूपया ।

न केवलं शुद्धा एवैकपञ्चाशद्भेदा भवन्ति । यावत्तेषां स्वप्रभेदैरेकपञ्चाशता संशयास्पदत्वेनानुग्राह्यानुग्राहकतयैकव्यञ्जकानुप्रवेशेन चेति त्रिविधेन संकरेण परस्परनिरपेक्ष-रूपयैकप्रकारया संसृष्ट्या चेति चतुर्भिर्गुणने ।

वेदखाब्धिवियच्चन्द्राः

शुद्धभेदैः सह ।

शरेषुयुगखेन्दवः ।।४४।।

तत्र दिङ्मात्रमुदाह्रियते ।

खणपाहुणिआ देअर जाआए सुहअ किंपि दे भणिआ ।
रुअइ पडोहरवलहीघरम्मि अणुणिज्जउ वराई ।।१११।।

अत्रानुनयः किमुपभोगलक्षणेऽर्थान्तरे संक्रमितः किमनुरणनन्यायेनोपभोगे एव व्यङ्ग्ये व्यञ्जक इति सन्देहः ।

बालचित्तानुरञ्जनी–मिलित्वा कियन्तो भवन्तीत्यत आह **भेदा इति**। वाक्ये अर्थान्तरसंक्रमित-वाच्यादयोऽष्टादश । पदे च सप्तदश, प्रबन्धे चार्थशक्तिभूः द्वादश, रसादीनाञ्च पदैकदेशरचनावर्णप्रकाश्य-त्वेन चत्वार इति सर्वं सङ्कलने एकपञ्चाशद् भेदाः इत्यर्थः । वाक्यं पूरयति **व्याख्याता इति**। ध्वनेर्मिश्र-भेदमाह **तेषामिति**। तेषाम् एकपञ्चाशत्संख्याकानां शुद्धानां स्वभेदैरेकपञ्चाशद्भेदैरेकपञ्चाशता गुणने एकाधिकषड्विंशतिशतानि भेदा भवन्ति । तत्र योजनं प्रकारः । अर्थान्तरसङ्क्रमितवाच्येनेतरेषां भेदानां योजनेऽर्थान्तरसङ्क्रमितवाच्यस्यैकपञ्चाशद्भेदाः । एवं शुद्धभेदानत्रोक्त्वाऽपरानपि भेदान् संकरसंसृष्टि-भ्यामाह **संकरेणेति**। सूत्रं व्याकरोति **न केवलमिति**। त्रिरूपेणेत्येतद्व्याकरोति **संशयेति**। को मुख्यः को वा गौण इति संशयः । अनुग्राह्यानुग्राहकता अङ्गाङ्गिभावः । अङ्गी प्रधानम् । अङ्गमप्रधानम् । व्यञ्जकः शब्दः । तत्र एकव्यञ्जकानुप्रवेशः । एकेनैव पदादिना युगपत् द्वयं प्रतिपत्तिः । एकरूपयेत्येतद्व्याकरोति **परस्परेति**। सङ्करस्त्रिरूपः । संसृष्टिरेकरूपः । एवमेकाधिकषट्त्रिंशत् शतानि चतुर्भिर्गुणने परस्पर-योजनेऽपि अन्ये भेदा भवन्तीत्यर्थः । एतेषां संख्यानां भेदानाह **वेदेति**। वेदाश्चत्वारः खं शून्यं बिन्दुः, अब्धयश्चत्वारः, वियत् शून्यं बिन्दुः, चन्द्र एकः एवमङ्कः कर्तव्यः (१०४०४)

एकमयुतं चतुरधिकचतुःशती चेति । एतेषामेव शुद्धभेदैः सह मेलने संख्यामाह **शुद्धेति**। शराः पञ्च, इषवः पञ्च, युगानि चत्वारि, खं शून्यं इन्दुरेकः एवमङ्कः कर्तव्यः (१०४५५) एकमयुतपञ्चपञ्चाश-दधिका चतुःशतीति भावः । सङ्करादाह **तत्रेति**। संशयास्पदत्वेन ध्वनिद्वयसङ्कीर्णस्योदाहरणमाह **खणेति**। **सुहअ शुभे, देअर** हे देवर ! जाआए जायायाः, किंपि किमपि, भणिअ भणिता सती, खणपाहुणिआ खणे

उत्सवे, पाहुणिका निमन्त्र्याहूता पडोहरवलहीधरम्मि गृहपश्चाद्भागी रुअइ रोदिति । वराई वराकी, साअणुणिज्जहु अनुनीता । संशयमत्र दर्शयति अत्रेति । स्वभार्यावचनेन रोदनानुनयकरणे सिद्धेऽपि अनुनीयतामित्येतत् मुख्यार्थस्य बाधे सति स्वविपर्ययीभूतार्थविषये संबन्धे सति उपभोगलक्षणमर्थान्तरं लक्षयन् सन्तोषेत्यादिनाभिव्यनक्ति । किं वा स्वार्थमभिधत्ते । 'देव' 'सुभग' शब्देन दत्तावकाशमुपभोगं व्यनक्ति इत्यर्थान्तरसङ्क्रमितवाच्यविवक्षितान्यपरवाच्ययोरन्यतरनिर्णायिकाभावात् सन्देहास्पदत्वेन सङ्कर इत्यर्थः ।

सारबोधिनी—एवमिति । पूर्वगणितभेदाभ्यां वाक्यपदप्रकाश्याभ्याम् । षडिति । वाक्यपदपदैकदेशवर्णरचनाप्रबन्धव्यङ्ग्यभेदात् ।

एकपञ्चाशदिति पूर्वगणिताः । पंचत्रिंशत् । प्रबन्धव्यङ्ग्या अर्थशक्त्युद्भवा द्वादश । अलक्ष्यक्रमस्य पदैकदेशरचनावर्णप्रबन्धव्यङ्ग्यत्वेनापरे चत्वारो भेदास्तदेकतया एकपंचाशत्तदाह व्याख्याता इति । पूर्वगणनोट्टंकनेनेत्यर्थः । इमे शुद्धभेदाः । संकीर्णभेदानाह तेषामिति । वेदेत्यादि । एकपंचाशता ह्येकपंचाशद्गुणनात् विपु[दु ?]र्व्योमरसाः पक्षौ । तैर्वेदगुणितैर्मताः । वेदाश्चत्वारः । खं बिन्दुः । चन्द्र एकः । अंकशास्त्रे तथैव संकेतकरणात् । तेन चतुरधिकचतुःशत्युत्तरदशसहस्री भवति (१०४०४) । वस्तुतः पुनरियती संख्या न भवति । पूर्वं पूर्वमिश्रणेन गतार्थतया परपरमिश्रणानामेकादिसंख्याह्रासात् वेदखाब्धि शराः स्युः (५४०४) अत एव विरोधालङ्कारे—

जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद्गुणैस्त्रिभिः ।
क्रिया द्वाभ्यामथ द्रव्यं द्रव्येणैवेति ते दश ॥

इति जातिगुणक्रियाद्रव्याणां विरोधे दशत्वस्याभिधास्यमानता । अन्यथा प्रत्येकं चतुष्टये षोडशैव स्युः । गुणजात्योर्विरोधस्य जातिगुणविरोधानन्यत्वेन गुणविरोधानां त्रित्वात् । एवं क्रियाद्रव्ययोर्विरोधयोर्द्वित्वैकत्वे एवं च प्रकृतेऽपि । अर्थान्तरसंक्रमितवाच्यात्यन्ततिरस्कृतवाच्ययोः परेण सह पूर्वस्य यन्मिश्रणं, पूर्वेण सह परस्यापि तदेवेति दिशा व्यक्त एवोत्तरोत्तरेषु संख्याह्रासः ।

खणेति ।

क्षणप्राघुणिका देवर जायया सुभग किमपि ते भणिता ।
रोदिति गृहपश्चाद्भागवलभीगृहेऽनुनीयतां वराकी ॥

क्षणप्राघुणिकी उत्सवातिथिः पडोहरशब्दो देशभाषायां गृहपश्चाद्भागवाची । **सन्देह इति** । अविवक्षितवाच्यविवक्षितान्यपरवाच्योरिति शेषः ।

काव्यप्रकाशदर्पणः—पूर्वगणिताभ्यां पदवाक्यवृत्तित्वेन द्वाभ्यां पदाभ्याम् । तत् तस्माद्धेतोः । **एकपञ्चाशदिति** । पूर्वगणिताष्टादशभेदानां मध्य उभयशक्त्युद्भवो दा वाक्यमात्रे अन्ये सप्तदश वाक्यपदेति पञ्चत्रिंशत् । अर्थशक्त्युद्भवा द्वादश प्रबन्धेऽपि । इति सप्तचत्वारिंशत् । असंलक्ष्यक्रमव्यङ्ग्यस्य च पदांशवृत्तित्वेनापि चातुर्विध्यमिति । व्याख्याता दर्शिताः । न त्वभावत एवेति नियमः । शब्दशक्त्युद्भव-

स्यापि दर्शितत्वात् । तेषामिति । अयमर्थः प्रथमभेदस्य । सजातीयविजातीयेन सह संकरसंसृष्टिभ्यां संमिश्रणे चत्वारो भेदाः । द्वितीयभेदेन सहैवं चत्वार इत्यष्टौ । तृतीयेन सह द्वादश । एवं प्रत्येकं चत्वार्यन्तिमभेदपर्यन्तमिश्रणे एकस्य भेदस्य चतुरधिकं भेदशतद्वयमिति । एकपञ्चाशतो भेदानां संभूय । वेदाश्चत्वारः । वियत् शून्यम् । एवं चाङ्कविन्यासवैलोम्यं संख्याशास्त्रप्रसिद्धत्वात् अयुतमेकशतचतुष्टयचत्वारो ध्वनिभेदा इत्यर्थः । शुद्धभेदैरेकपञ्चाशता सह च । शराः पञ्च, इषवः पञ्च । युगं चतुष्टयम् । खं शून्यम् । इन्दुरेकः । द्वितीयभेदस्य तु शतद्वयमेव । प्रथमभेदेन सहास्य भेदस्य योग्यता न संभवति । तथाहि । योऽसौ प्रथमभेदस्य संकरसंसृष्टिभ्यां द्वितीयभेदेन सहेति व्यवस्था । एवं हि द्वितीयतृतीयादिष्वन्तिमभेदस्य । एवं क्रमेण चत्वारश्चत्वारश्चत्वारतया भावनीयाः इति संभूयैषां व्यङ्ग्यानां एकपञ्चाशत् सिन्धुगगनसखिशरसंख्या भेदाः । सिंधुश्चत्वारः । गगनं शून्यम् । सखी त्रयः । शराः पञ्च एवं पञ्चसहस्राणि शतत्रयश्चत्वारश्च भेदाः शुद्धभेदैः सह पञ्चाशदधिका इति ।

अस्य ग्रन्थकारस्यायमाशयः । एष्वेकपञ्चाशत् भेदेषु मध्ये प्रथमस्य द्वितीयस्य अन्तिमस्य वा यस्य प्रथमबुद्धिविषयत्वं तस्य प्रथमगणनीयत्वमिति सर्वेषां चतुरधिकशतपरिमिता भेदाः किमर्थं क्रमेण चत्वारश्चत्वारः पातनीया इति ।

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति ह हा हा देवि धीरा भव ॥११२॥

अत्र लिप्तेति पयोदसुहृदामिति चात्यन्ततिरस्कृतवाच्ययोः संसृष्टिः । ताभ्यां सह रामोऽस्मीत्यर्थान्तरसङ्क्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेन रामपदलक्षणैकव्यञ्जकानुप्रवेशेन चार्थान्तरसंङ्क्रमितवाच्यरसध्वन्योः संकरः । एवमन्यदप्युदाहार्यम् ।

इति काव्यप्रकाशे ध्वनिनिर्णयो नाम चतुर्थ उल्लासः ॥

बालचित्तानुरञ्जनी—**स्निग्धेति** । विरहिणो रामस्योक्तिरियम् । स्निग्धा श्लक्ष्णा श्यामला अत्यन्तकृष्णा या कान्तिस्तया लिप्तं वियदाकाशं यैस्तथाभूताः । वेल्लन्त्यः शोभन्त्यः बलाकाः बकपंक्तयो येषु तथाभूता घनाः मेघाः । कामं यथेच्छम् । अत्र रामपदेन दुःखपात्रतालक्षणया व्यज्यमानस्य राजत्यागारण्यगमनवल्कलधारणपितृशोकाद्यधिगतदुःखसहनातिशयोऽवगम्यते । तेन च परिपुष्टः सन् विप्रलम्भो रसः प्रकाश्यते ।

इति श्रीनरहरिसरस्वतीतीर्थविरचितायां काव्यप्रकाशटीकायां चतुर्थं उल्लासः ।

सारबोधिनी-अपरसङ्करद्वयं संसृष्ट्या सहोदाहरति **स्निग्धेति** । वेल्लनं सविलासखेलनम् । पयोदसुहृदां मयूराणां कामं प्रभूतम् । दृढं बलवत् । सहे इत्युत्तमपुरुषैकवचनम् । भविष्यति जीविष्यतीत्यर्थः । खेदातिशये ह ह हेति त्रयो निपाताः । स्मृतिसङ्कल्पोपनीतां सीतां संबोध्याह **वैदेहीति** । **धीरेति** ।

वियतो निःस्पर्शनस्य लेपनासंभवात्। लिप्तेतिपदेन व्यापनम्। सुहृदामित्यत्राचेतनस्य मित्रत्वाभावात् सुहृदामित्यनेन परितोषकारित्वं च लक्ष्यते। तदतिशयौ च व्यङ्ग्यौ। लेपसुहृत्त्वयोः सर्वथान्वयाप्रवेशात् वाच्ययोरत्यन्ततिरस्कारः। संसृष्टिरिति। सङ्कराभावादिति भावः। अर्थान्तरेति। दुःखसहिष्णुत्वेन वाच्यस्य रामस्यैवान्वयात्। अस्य च एतादृशव्यतिकरसहस्रसंपातेऽपि प्राणधारणादात्मनि न्यक्कारो व्यङ्ग्यः। तत्र घन[व्यापन?]केकाचिरस्थायित्वयोर्लिप्तसुहृत्पदव्यङ्ग्ययोरनुग्राहकत्वं सुव्यक्तमेव। ताभ्यां सहार्थान्तरसंक्रमितवाच्यस्य सङ्कर इत्यन्वयः। रामपदेति। दुःखसहिष्णुत्वलक्षणया व्यज्यमानस्य राज्यत्यागवनवासजटाधारणफलमूलाहारस्त्रीवियोगपितृशोकपात्रतायाः परदुःखासहनत्वातिशयस्यावगमेऽवगतैः शोकधैर्यनिर्वेदादिभिः परिपुष्टो विप्रलम्भः प्रकाश्यत इति दुःखसहनातिशयवस्तुध्वनिरसध्वन्योरेकरामपदेऽनुप्रवेशः सङ्कर इति भावः।

ननु विप्रलम्भास्वादे वस्तुनो गुणीभावे कथं तस्य ध्वनित्वमिति चेत् सत्यम्। वाच्यतः प्राधान्यमात्रेण तस्य ध्वनित्वम्। आस्वादे तु सर्वेषां गुणीभावव्यभिचार एवेत्युक्तमेव।

इति सारबोधिन्यां चतुर्थ उल्लासः।

Foot Notes

१. निरूपणे A. B. २. तन्नान्तरीयकतया A. ३. यद्वक्ष्यति हि A. ४. A omits इदमुपलक्षणम् ५. विशेष्यवैयर्थ्यम् A. ६. A adds "पदे हरिः सिंह इत्यत्र सिंहकृष्णयोरभिधामूलरूपकध्वनावतिप्रसङ्गः स्यात् ७. प्रवृत्तेः A. ८. सेयमिति A. ९. स्यादिति F १०. A omits लौकिकसुखानुमितिवारणाय रसनीयत्वेनेति। रसनमास्वादो निरतिशयसुखरूपता। ११. तदा सोऽपि सामाजिक एव A & F १२. असन्निहितसीतादिभ्यः सामाजिकरत्यनुत्पादादाराध्यत्वज्ञानस्य A. १३. विभावादीति १४. B omits विभावादीति, १५. कपोल इत्येकत्वमिति केचित् B, १६. निर्वीर्यत्वम् A.।

अथ पञ्चम उल्लासः

एवं ध्वनौ निर्णीते गुणीभूतव्यङ्ग्यप्रभेदानाह ।

अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।
संदिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ॥४५॥
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदाः स्मृताः ।

कामिनीकुचकलशवद् गूढं चमत्करोति, अगूढं तु स्फुटतया वाच्यायमानमिति गुणीभूतमेव ।

बालचित्तानुरञ्जनी—एवं सप्रपञ्चस्योत्तमकाव्यस्य निरूपणानन्तरं मध्यमकाव्यस्य प्रपञ्चो युक्त इति चतुर्थपञ्चमयोरुल्लासयोः सङ्गतिं कथयितुमुत्तरसूत्रमवतारयति **एवमिति** । व्यङ्ग्योऽर्थो ललनालावण्यप्रख्यो यः प्रतिपादितस्तस्य प्राधान्येन उत्तमं काव्यं ध्वनिः । तस्मिन् निर्णीते गुणभावे च वाच्यवाचकत्वप्रकर्षे गुणीभूतव्यङ्ग्यो नाम मध्यमकाव्यभेदः अताद्दशि गुणीभूतेत्यादिना सामान्येन लक्षितः । तस्य भेदान् विशेषानाहेत्यर्थः । अगूढं, अपरस्याङ्गं, वाच्यसिद्ध्यङ्गं, अस्फुटं, संदिग्धप्राधान्यं, तुल्यप्राधान्यं, काक्वाक्षिप्तं, असुन्दरं चेति मध्यमकाव्यस्याष्टौ भेदाः । अगूढस्य वाच्यत्वाभावान्मुख्यत्वमेव न गुणत्वमित्याशङ्कानिवारणार्थं गूढरसस्य मुख्यत्वं सद्दष्टान्तमाह **कामिनीति** । व्यङ्ग्यप्रतीतौ त्रयः प्रकाराः द्रुतत्वं मध्यमत्वं विलम्बितत्वञ्चेति । तत् गूढत्वं नाम मध्यमत्वम् । तदेव

नान्ध्रीपयोधर इवातितरां प्रकाशो नो गुर्जरीस्तन इवातितरां निगूढः ।
अर्थो गिरामपिहितः पिहितश्च किञ्चित् [कश्चित्] सौभाग्यमेति मरहट्टवधूकुचाभः ॥

इति न्यायेन चमत्करोति । अतस्तदेव मुख्यमित्यर्थः । यदर्थमेतदुक्तं तदाह **अगूढन्त्विति** । यद्यपि वाच्यत्वं नास्ति तथापि अगूढं स्फुटतया वाच्यसदृशमिति गुणीभूतमेवेत्यर्थः । व्यङ्ग्यं वस्त्वलङ्काररसरूपतया त्रिविधम् । तत्र वस्तुमात्रव्यङ्ग्यस्य अर्थान्तरसङ्क्रमितवाच्यस्य शब्देभ्यो वाच्यरूपवाक्यार्थापेक्षया गुणीभावे सति गुणीभूतव्यङ्ग्यत्वम् ।

सारबोधिनी—अवसरप्राप्तं मध्यमं काव्यं लक्षयतीत्याह **एवमिति** । एवं भेदप्रदर्शनद्वारा । अगूढम् असहृदयैरपि झटिति संवेद्यम् । अपरस्य सव्यङ्ग्यस्य वाच्यस्य वा अङ्गमुत्कर्षकम् । वाच्यस्य वाच्यार्थस्य कुतोऽपि वैगुण्यादविश्रान्तस्य सिद्धिर्विश्रान्तिरङ्गं निदानम् । अस्फुटं सहृदयैरपि झटित्यसंवेद्यम् । संदिग्धं तुल्यं वा प्राधान्यं चमत्कारिता यत्र । संदिग्धं वाच्यकृतं व्यङ्ग्यकृतमिति न

निश्चितम् । चमत्कारे वाच्यव्यङ्ग्ययोर्द्वयोरपि अङ्गत्वेन तुल्यता । काकुर्ध्वनेर्विकारस्तयाऽऽक्षिप्तं प्रकाशितम् । असुन्दरं चमत्कारे वाच्यमुखनिरीक्षकम् । अष्टाविति न्यूनाधिकसंख्याव्यवच्छेदाय । तेनाप्रधानं संदिग्धंतुल्यप्राधान्यं चेति मध्यमं त्रिविधं स्मृतमिति निरस्तम् । उपाधिवैलक्षण्यस्य दुरुपायत्वेन परिभाषाकर्तुः स्वतन्त्रेच्छत्वात् । **कामिनीति** । कामिनीकुचकलशस्य गूढतानिबन्धनमेव चारुत्वं तथा व्यङ्ग्यस्यापि । एवमतिगूढतानिबन्धनमचारुत्वञ्च । अत एवास्फुटमपि गुणीभूतव्यङ्ग्यं, न ध्वनिः ।

तदुक्तम्—

नान्ध्रीपयोधर इवातितरां प्रकाशो नो गुर्जरीस्तन इवातितरां निगूढः ।
अर्थो गिरामपिहितःपिहितश्च किञ्चित्सौभाग्यमेति मरहट्टवधूकुचाभः ।। इति ।

काव्यप्रकाशदर्पणः—वृत्तिकृदुल्लाससङ्गतिमाह एवमिति । निर्णीते भेदप्रभेददर्शनेन निश्चयं प्रापिते । अङ्गमप्रधानम् । वाच्यसिद्ध्यङ्गं कारणम् । अस्फुटं सहृदयानामपि क्लेशप्रत्येयमिति हि गूढव्यङ्ग्याद्भेदः । संदिग्धप्राधान्यं तुल्यप्राधान्यं च । काक्वाक्षिप्तं वाच्यवत् स्फुटीकृतम् । अत्यन्तवाच्याद्यर्थेष्वचमत्कारं व्यङ्ग्यमिति प्रतिपदान्वयः । भिदा विशेषाः । अस्माभिः पूर्वं उक्ता इदानीं स्मृताः ।

अगूढं यथा—

यस्यासुहृत्कृततिरस्कृतिरेत्य तप्तसूचीव्यधव्यतिकरेण युनक्ति कर्णौ ।
काञ्चीगुणग्रथनभाजनमेष सोऽस्मि जीवन्न संप्रति भवामि किमावहामि ।।११३।।

अत्र जीवन्नित्यर्थान्तरसङ्क्रमितवाच्यस्य ।

उन्निद्रकोकनदरेणुपिशङ्गिताङ्गा गायन्ति मञ्जु मधुपा गृहदीर्घिकासु ।
एतच्चकास्ति च रवेर्नवबन्धुजीवपुष्पच्छदाभमुदयाचलचुम्बि बिम्बम् ।।११४।।

अत्र चुम्बनस्यात्यन्ततिरस्कृतवाच्यस्य ।

बालचित्तानुरञ्जनी—शत्रुकृततिरस्कारश्रवणानन्तरं कस्यचिद्राज्ञो वचनम् । असुहृदा शत्रुणा कृततिरस्कृतिः यस्य मे कर्णौ तप्तसूचीव्यधव्यतिकरेण युनक्ति एष सोऽहं काञ्चीगुणग्रथनभाजनं स्त्रीरूपोऽस्मि । अतः सम्प्रति जीवन्न भवामि । किमावहामि किं करोमि ? अस्मीत्यव्ययमहमर्थे अहंशब्दपर्यायो वा । अस्मिन् पक्षे एकाश्रयः । एतस्मिन् श्लोके प्रकृतोपयुक्तमतमाह अत्रेति । जीवन्न भवामीत्यनेन स्वार्थस्यानुपयुक्तत्वात् जीवत् कार्यकारणं लक्ष्यते । लक्षितेऽर्थान्तरे सङ्क्रमितवाच्यः शब्दः तस्य व्यङ्ग्यं विक्रमराहित्यं वस्तु अतिस्फुटत्वेनाप्रधानं वाच्यस्यैव ,चमत्कारित्वात् । झटिति पराक्रमरहितत्वं प्रतीयत इति अगूढव्यङ्ग्यमित्यर्थः । अथवा जीवन्न भवामीत्यनेन कष्टजीवनत्वं लक्ष्यते । मरणमेव श्रेय इति व्यङ्ग्यम् । शिष्टं समानम् ।

सारबोधिनी-यस्यासुहृदिति । बृहन्नलादशायामर्जुनस्य वाक्यमिदम् । आवहामि करोमि । शरणागतस्य तप्तशलाकया कर्णवेध इति देशाचारः । जीवन्न भवामीति जीवने जीवनाभावबोधने बाध इति लक्षणा, अश्लाघ्यजीवितत्वं लक्ष्यतावच्छेदकम् । नञा तदभावबोधनेन कष्टजीवितत्वं प्रतीयते ।

केचित्तु—कष्टजीवितत्वमेव लक्ष्यतावच्छेदकम् । न च तथा सति नञा तदभावबोधनेऽसङ्गतिः स्यादिति वाच्यम् । नञस्तथाविधतात्पर्यमात्रग्राहकत्वात् । अस्मन्मरणमेव श्रेय इत्यनुतापातिशयो व्यङ्ग्यः । स च सर्वजनवेद्यत्वादगूढ एव ।

उन्निद्रेति । कोकनदं रक्तोत्पलम् । **अत्र चुम्बनस्येति** । वक्त्रसंयोगस्य बाधितत्वात् । संयोगे लक्षणा । संयोगत्वेनापि तद्वचक्तेरनन्वयादत्यन्ततिरस्कृतवाच्यत्वम् । व्यङ्ग्यश्च प्रातःकालारम्भो वाच्यवत् प्रतीयत इत्यगूढः ।

काव्यप्रकाशदर्पणः—आवहामि करोमि । अत्र जीवन् न भवामीति जीवत इति वचनात् बाधितश्चार्थः अश्लाघ्यजीवनत्वं लक्षयति । तदतिशयश्च वाच्यवत् सर्वजनगोचर इत्यगूढः । अस्य च व्यङ्ग्यस्य वाच्याधिकारत्वाभावात् गुणीभूतम् । एवं तुल्यप्राधान्यादिष्वपि ज्ञेयम् । वदनसंसर्गरूपस्य चुम्बनस्य प्रकृतेऽसंभवात् संसर्गमात्रं लक्ष्यते ।

अत्रासीत् फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः ।
दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं प्रापितः
केनाप्यत्र मृगाक्षि ! राक्षसपतेः कृत्ता च कण्ठाटवी ।।११५।।

अत्र केनाप्यत्रेत्यर्थशक्तिमूलानुरणनरूपस्य । 'तस्याप्यत्र' इति युक्तः पाठः ।

बालचित्तानुरञ्जनी—अगूढव्यङ्ग्यत्वमुदाहरति **अत्रासीदिति** । प्रतिप्रयाणे रामः सीतां प्रत्याह । हे मृगाक्षि ! सीते ! अत्रास्मिन् प्रदेशे फणिन एव पाशास्तैः कृतं बन्धनं तस्य विधिः अस्माकमासीत् । अत्र भवत्या देवरे लक्ष्मणे शक्त्या अस्त्रविशेषेण वक्षसि गाढं ताडिते सति हनुमता द्रोणाद्रिः सञ्जीवनीविशिष्टः अत्राहृतः । अत्र दिव्यैः लक्ष्मणशरैरिन्द्रजित् लोकान्तरं प्रापितः । अत्र केनापि राक्षसपतेः रावणस्य कण्ठाटवी कृत्ता । अत्र प्रकृतोपयुक्तमंशमाह **अत्रेति** । केनापीत्युक्ते मयेति व्यङ्ग्यं काठिन्येन प्रतीयत इति गूढव्यङ्ग्य इत्यर्थः । केनापीत्यस्मिन् पाठे मध्यमकाव्यत्वमस्ति । कस्मिन् पाठे उत्तमत्वमित्याकाङ्क्षायामाह **तस्यापीति** । अस्मिन् पाठे मयेति व्यङ्ग्यस्य गूढत्वादुत्तमत्वमित्यर्थः ।

सारबोधिनी—अत्रासीदिति । विमानेनायोध्यां प्रति प्रयाणे सीतां प्रति रामस्येयमुक्तिः । **विधिरिति** । विधेर्दुरतिक्रमत्वेन स्वापमानतिरोधापनम् । भवद्देवर इति संबन्धोद्भावनेन वात्सल्योत्पादनया पराभवज्ञानतिरोधापनम् । अहङ्कारप्रकटनप्रसङ्गधिया धीरोदात्तेन रामेण मयेत्यपहाय केनापीत्युक्तम् । अपिरत्र हेलायाम् । **अत्रेति** । अनिर्द्धारितविशेषत्वेन किमः शक्तौ मयेत्यर्थो व्यङ्ग्यः । स च प्रसिद्धिवशादगूढः । **तस्याप्यत्रेति** । तत्तत्संभवातिशयवत्त्वेन ख्यातस्य युक्त इति तथा च ध्वनित्वमेवेति **भावः** ।

अत्रायमभिप्रायः । अत्र वर्णनीयनायकोत्कर्षोऽपि कवितात्पर्यविषयः । स च केनापीति पाठे मयेति व्यङ्ग्येन प्रागेव प्रतीयत इति तत्राप्यगूढता स्यात् । तस्यापीति पाठे तु तज्जयान्नायकोत्कर्षप्रतीतौ गूढतेति ध्वनित्वमेव स्यादिति । न च तथा सति मयेत्यध्याहारे न्यूनपदत्वमेव स्यादिति वाच्यम् । एवं जयानुस्मृत्या सीतया सहालापेन च हर्षयुते वक्तरि तस्यादोषत्वात् । धीरोदात्तस्य रामस्य मयेत्यवक्तव्यत्वात् ।

ननु कथं शब्दशक्तिमूलवस्त्वलंकृतिव्यङ्ग्यं नोदाहृतमिति चेन्मैवम् । प्रकृतवाक्यार्थप्रतीतिव्यवधानेन प्रतीयमानस्य द्वितीयार्थस्यालङ्कारस्य वा झटित्यसंवेद्यत्वेन गूढत्वात् । एवं विभावादिव्यङ्ग्येष्वलक्ष्यक्रमेषु तत्प्रसङ्गः । विभावाद्यनुसंधानस्य व्यवधायकत्वात् । अत एव पदव्यङ्ग्येष्वेवोदाहृतं वाक्यव्यङ्ग्येषु वाक्यार्थप्रतीत्या व्यवधानेन न झटित्यवभासः । एवमन्यत्र स्वयमूह्यम् ।

काव्यप्रकाशदर्पण–अत्रेति । अत्र श्रीरामो वक्ता । केनापीति सोच्छ्वासवचनेन मयेत्यात्मनः प्रकटनं न युक्तमिति गुणीभूतव्यङ्ग्यत्वम् । "तस्यापी"तिपाठे तस्य तथाविधस्य ममेत्यर्थः । तथास्य श्लोकस्य ध्वनित्वमित्याशयः ।

अपरस्य रसादेर्वाच्यस्य वा वाक्यार्थीभूतस्य अङ्गं रसादि अनुरणनरूपं वा ।

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥११६॥

अत्र शृङ्गारः करुणस्य ।

कैलासालयभाललोचनरुचा निर्वर्तितालक्तक-
व्यक्तिः पादनखद्युतिर्गिरिभुवः सा वः सदा त्रायताम् ।
स्पर्धाबन्धसमृद्धयेव सुदृढं रूढा यया नेत्रयोः
कान्तिः कोकनदानुकारसरसा सद्यः समुत्सार्यते ॥११७॥

अत्र भावस्य रसः ।

बालचित्तानुरञ्जनी–रसादेरङ्गिनः रसाद्यङ्गं वाक्यार्थीभूतस्य प्रधानस्य वाच्यस्य वस्त्वलङ्काररूपस्याङ्गिनः अनुरणनरूपं वस्त्वलङ्काररूपं वा अङ्गं भवतीत्यर्थः । रसस्याङ्गिनः अङ्गभूतं रसमुदाहरति **अयमिति** । भूरिश्रवसो रणभुवि पतितहस्तावलोकनानन्तरं वचनम् । रशनां मेखलां संभोगावसरे ऊर्ध्वं कर्षति, पीनौ स्तनौ मर्दयति, नाभिश्च ऊरू च जघनं च नाभ्यूरुजघनं स्पृशति, नीवीं विस्रंसयति । सोऽयं करः । "अयं स रशनोत्कर्षी नीवीविस्रंसनः करः नाभ्यूरुजघनस्पर्शी पीनस्तनविमर्दन इति युक्तः पाठः, संभोगक्रमलाभात् । तथापि शोकार्तोक्तत्वे न दोषाय । अत्र को रसः कस्याङ्गमित्याकाङ्क्षायामाह

विधत्ते । **अत्रे ति** । युद्धस्थले पतितकरावलोकनेन अनुभूतप्राक्तनसंभोगवृत्तान्तः स्मर्यमाणः। सत्वत्र इदानीं तया शोकस्थायिभावः प्रतिपद्यते इति करुणस्याङ्गिनः पोषकत्वेनोपकारकत्वात् अङ्गभूतो विप्रलम्भ-शृङ्गार इत्यर्थः ।

भावस्याङ्गभूतं रसमुदाहरति **कैलासेति** । गिरिभुवः पार्वत्याः । कैलासालयजा तस्य ललाट-लोचनरुचा अरुणकान्त्या निर्वर्तिता निष्पादिता अलक्तकव्यक्तिः लाक्षाकान्तिर्यस्याः । प्रसादार्थं गौरीपादयोः शिवस्य पतनात् सा पादनखद्युतिः वः युष्मान् सदा त्रायतां रक्षतात् । नेत्रकान्तिः स्पर्धाबन्धसमृद्ध स्थितया यत्पादनखद्युत्या सुदृढं रूढा कोकनदस्यानुकारः अनुकरणं तेन सरसा नेत्रयोः कान्तिः सद्यः समुत्सार्य तिरस्क्रियते । शम्भौ प्रणमति सति गौरी आकृतलोचनारुणा भासतेत्यर्थः ।

अत्रेति । अत्र पार्वतीविषयस्य रत्याख्यस्य भावस्य शृङ्गारोऽङ्गं कमलाद्युपमितस्य सुखादेरिव रसाद्युपकृतस्यापि रसादेश्चारुत्वदर्शनात् उपस्कारकस्य रसादेरपि वस्तुन इवालङ्कारत्वमनु-भवसिद्धमङ्गीकर्तव्यम् ।

सारबोधिनी-अत्र प्राञ्चः । वाक्यार्थीभूतस्य प्रधानस्य रसादे रसादिवाच्यस्यानुरणनरूपमङ्ग-मिति यथाक्रममन्वय इति योजयन्ति । टीकाकृतस्तु अनुरणनरूपमित्यतो वाकारं पठित्वा वाच्यस्यानुरणनं वेति योजयन्ति। न च रसस्य वाच्याङ्गत्वासंभव इति वाच्यम् ।

तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी ।
निवसन् बाहुसहायश्चकार रक्षःक्षयं रामः ।।

इत्यत्रेदमरण्यमीदृशं स्थित्वा व्यसन्यपि बाहुमात्रसहायोऽपि रक्षांसि जिगायेति रामगतवीरस्य वाच्यारण्योत्कर्षकत्वेनाङ्गभावात् । अत एव महतां चोपलक्षणमिति लक्षितेन उदात्तालङ्कारेण महतां रसादीनामुपलक्षणमङ्गभाव इति वाच्यम् ।

अयमिति । एतच्च समरभूमिपतितं भूरिश्रवसो हस्तमालोक्य तद्वधूरभिदध्यौ । शृङ्गारोचित-रशनाकर्षित्वादिविलासस्मरणं विगलद्हृदयत्वात् शोकावेगमधिकमुपजनयतीति शृङ्गारस्य करुणपोषकत्व-मित्याह **शृङ्गारः करुणस्येति** ।

कैलासालयेति । कैलासालयः शिवः । अत्र गिरिभुवः कोपवशात् नेत्रयोः शोणकान्तिरासीत् सपादप्रणते शिवे उपगतेति तत्त्वम् । तत्रेदमुत्प्रेक्ष्यते स्पर्धाबन्धेति । रूढा उपचिता । **अत्रे ति** । भावस्य त्रायतामित्यवगतस्य कविनिष्ठस्य रसो महादेवनिष्ठा रतिः प्रणत्यवसेया । महादेवोऽपि यत्प्रसादाय प्रणमति तत्र भक्तिरुचितेति रसस्य भावाङ्गता । एवं सर्वत्राङ्गाङ्गिभावेन बोध्यम् ।

काव्यप्रकाशदर्पणः—वाक्यार्थीभूतस्य रसादे रसरूपं व्यङ्ग्यम् करुणस्य प्रकृतस्य परिपोषकत्वा-**दङ्गत्वं शृङ्गारस्येति** भावः ।

अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारास्तदाम्भोधय-
स्तानेतानपि बिभ्रती किमपि न क्लान्तासि तुभ्यं नमः ।
आश्चर्येण मुहुर्मुहुः स्तुतिमिति प्रस्तौमि यावद्भुव-
स्तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः ॥११८॥

अत्र भूविषयो रत्याख्यो भावो राजविषयस्य रतिभावस्य ।

बालचित्तानुरञ्जनी—भावस्याङ्गभूतं भावमुदाहरति **अत्युच्चा इति**। कश्चिद्राजानं स्तौति । हे पृथ्वीपते ! परितः अत्युच्चाः गिरयः स्फुरन्ति । तानेतानपि बिभ्रत्यपि त्वं किमपि क्लान्ता श्रान्ता नासि । तादृश्यै तुभ्यं नमः इति । आश्चर्येण मुहुर्मुहुः स्तौति । हे राजन् ! तावत् इमां बिभ्रत् तव भुजः स्मृतः । वाचो मुद्रिताः । राजप्रभावख्यापने कवेरतितरा रतिः । तस्याश्च भूविषयरतिरेव स्थायी भावोऽङ्गम् न चात्र शृङ्गारः परस्परावस्थावन्धात्मिकाया रतेस्तावत् ततोऽत्र प्रेयस्विदलङ्कारः । "प्रेयः प्रियतराख्यानं विद्यते यन्निबन्धना" इति वचनात् ।

सारबोधिनी-अत्युच्चा इति । स्फारा विस्तीर्णाः । किमपि किञ्चिदपि ।

बन्दीकृत्य नृप द्विषां मृगदृशस्ताः पश्यतां प्रेयसां
श्लिष्यन्ति प्रणमन्ति लान्ति परितश्चुम्बन्ति ते सैनिकाः ।
अस्माकं सुकृतैर्दृशोर्निपतितोऽस्यौचित्यवारांनिधे
विध्वस्ता विपदोऽखिलास्तदिति तैः प्रत्यर्थिभिः स्तूयसे ॥११९॥

अत्र भावस्य रसाभासभावाभासौ प्रथमार्धद्वितीयार्धद्योत्यौ ।

अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ।
ददृशे तव वैरिणां मदः स गतःक्वापि तवेक्षणे क्षणात् ॥१२०॥

अत्र भावस्य भावप्रशमः ।

बालचित्तानुरञ्जनी-भावस्याङ्गभूतो रसाभासभावाभासौ दर्शयति **बन्दीकृत्येति** । कश्चिद्राजानं स्तौति । हे नृपते ! तव सैनिकाः द्विषां मृगदृशः प्रियाः बन्दीकृत्य ताः पश्यतां प्रेयसाम् । अनादरे षष्ठी । पश्यतः प्रियाननादृत्येर्थः । ताः श्लिष्यन्ति, प्रणमन्ति, परितः लान्ति परितः आददते, चुम्बन्ति । हे अचिन्त्यवारांनिधे अचिन्त्यसमुद्रत्वसुकृतिः । अस्माकं दृशोर्निपतितोऽसि । यतः तत् तस्मात् अखिला विपदो विध्वस्ताः" । इति तैः प्रत्यर्थिभिः शत्रुभिः त्वं स्तूयसे । अत्र कस्य को वा अङ्गमित्याकाङ्क्षायामाह **अत्रेति** । शत्रुस्त्रीणां रत्यभावे सैनिकानामनौचित्यप्रवृत्तत्वात् रसाभासः प्रथमार्धेन द्योतितः शत्रूणाञ्च औचित्ये दैन्यादीनि भावाभासो द्वितीयार्धेन द्योतितः । तौ च वर्णनीयत्वेन अङ्कितस्य राजविषयस्य रतिभावस्याङ्गमित्यर्थः । ऊर्जस्विदलङ्कारः ।

"अनौचित्यप्रवृत्तानां कामक्रोधादिकारणात् ।
भावानां च रसानां च बन्ध ऊर्जस्वि कथ्यते" इति वचनात् ।

भावस्याङ्गं भावशान्तिमुदाहरति **अविरलेति** । हे राजन् ! तव वैरिणां यो मदः मुहुः अविरलैः करवालस्य कम्पनैः भ्रुकुटीतर्जनगर्जनैश्च सह दृष्टः स मदः तव नेत्रेक्षणात् क्वापि गतः । अत्रापि राजविषयकरतिभावस्य मदलक्षणव्यभिचारिभावस्य भावप्रशमोऽङ्गम् । अत्र भावपरिहाररूपं समाहितमलङ्कारः । प्रशमसहितयोरेकार्थत्वात् भावस्याङ्गम् ।

सारबोधिनी—अविरलेति । **अत्रे**ति । भावप्रशमो भावस्याङ्गमिति संबध्यते । एवमुत्तरत्राप्यनुषञ्जनीयम् ।

ननु मदगतपदाभ्यां मदप्रशमयोर्वाच्यतया कथं प्रशमतेति चेन्न । गत इत्यनेन गमनस्य मुख्यार्थस्य बाधात् शान्त इत्यर्थो लक्ष्यते । प्रशमातिशयो व्यज्यते । एवं प्रकृतगर्वार्थकेन मदशब्देन "मदो मद्योपयोगज" इत्यनेनोक्तो मदस्तयोरभेदरूपः संबन्धोऽपि व्यज्यते । तथा च भावप्रशमोऽभिव्यक्तः । सभङ्गमिति ।

साकं कुरङ्गकदृशा मधुपानलीलां कर्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते ।
अन्याभिधायि तव नाम विभो गृहीतं केनापि तत्र विषमामकरोदवस्थाम् ॥१२१॥

अत्र त्रासोदयः ।

असोढा तत्कालोल्लसदसहभावस्य तपसः
कथानां विश्रम्भेष्वथ च रसिकः शैलदुहितुः ।
प्रमोदं वो दिश्यात् कपटवटुवेषापनयने
त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः ॥१२२॥

अत्रावेगधैर्ययोः सन्धिः ।

बालचित्तानुरञ्जनी—भावोदयमुदाहरति **साकमिति** । हे राजन् तव वैरिणि विषमावस्थामकरोत् । अत्र राजविषयकरतिभावस्य शत्रूणां विषमावस्थयात्र सलक्षणो भावोदयो नामालङ्कारः ।

भावस्याङ्गं भावसंधिमुदाहरति **असोढेति** । शैलदुहितुः तस्मिन् काले उल्लसन् असहभावः अशक्तत्वं । पार्वतीदौर्बल्यं यत्र तत् तस्या तपसः । कर्मणि षष्ठी । असोढा तपो मुञ्च त्वमिति भगवतापेक्षितमिनित्वसहत्वं तपसः । अथ च कथानां विश्रम्भेषु रसिकः । अस्या विस्रब्धं शृणोतीत्यभिलाषवानित्यर्थः । कपटेन यो ब्रह्मचारिवेषः तस्यापनयने त्वराशैथिल्याभ्यां युगपदभियुक्तः प्रेरितः स्मरहरः वो युष्मभ्यं प्रमोदं दिश्यात् ।

अत्र त्वराभिव्यङ्ग्य आवेगः, शैथिल्याभिव्यङ्ग्यं धैर्यम्, तयोः संधिः स्मरहरविषयस्य रत्याख्यभावस्याङ्गम् । अत्र भावसंधिरलङ्कारः ।

सारबोधिनी—**साकमिति** । तत्र वैरिणि ।

असोढेति । तपसोऽसोढा झटिति फलं दत्त्वा तपसः सकाशात् पार्वतीं निवर्तयितुं तयोर्विशेषयति **तत्कालेत्यादि** । तत्काले वपुःप्रादुर्भावकाले उल्लसन् प्रादुर्भवन्, असहभावः फलप्रदाने कालविलम्बाक्षमत्वम् । **अत्रेति** । त्वरागम्य आवेगः शैथिल्यगम्यं धैर्यम् । यस्येत्यादि । किञ्चिदभियोक्तारम् ।

पश्येत्कश्चिच्चल चपल रे का त्वराऽहं कुमारी
हस्तालम्बं वितर हहहा व्युत्क्रमः क्वासि यासि ।
इत्थं पृथ्वीपरिवृढ भवद्विद्विषोऽरण्यवृत्तेः
कन्या कञ्चित् फलकिसलयान्याददानाऽभिधत्ते ॥१२३॥

अत्र शङ्कासूयाधृतिस्मृतिश्रमदैन्यविबोधौत्सुक्यानां शबलता ।

एते च रसवदाद्यलङ्काराः । यद्यपि भावोदयभावसंधिभावशबलत्वानि नालङ्कारतयोक्तानि तथापि कश्चिद् ब्रूयादित्येवमुक्तम् ।

बालचित्तानुरञ्जनी—भावस्याङ्गभूतां भावशबलतामाह **पश्येदिति** । वने काचित् कन्या रत्यर्थिनं प्रत्याह । कश्चित् पश्येत् । हे चपल चञ्चल का त्वरा ? अहं कुमार्यस्मि । हस्तालम्बं वितर देहि । हहहा व्युत्क्रमः व्युत्क्रमो जायते । असोत्यव्ययं युष्मदर्थे । त्वं क यासि ? इत्थं पृथ्वीपरिवृढ राजन् ! अरण्यवृत्तेः भवद्विद्विषः कन्या फलकिसलयान्याददाना सती कञ्चिदभिधत्ते । इति राजानं कश्चित् स्तौति । अत्र केषां शबलता ? तत्राह **अत्रेति** । पश्येत् कश्चिदिति शङ्का । रे चपलेत्यसूया । का त्वरेति धृतिः । अहं कुमारीति स्मृतिः । हस्तालम्बं वितरेत्यौत्सुक्यम् । एतेषां शबलता पूर्वपूर्वोपमर्द्देनोपनिबद्धा । सा राजविषयक रतिभावस्याङ्गमित्यर्थः ।

अत्र भावशबलतैवालङ्कारः । यत् प्रतिज्ञातं रसवदादयोऽलङ्कारा वक्ष्यन्त इति तत्प्रस्तुतमित्यनुस्मारयति । **एते चेति** । त एवार्थे प्राधान्ये सति ध्वनिना व्याप्तविषयत्वात् । रसः शृङ्गारादिः । प्रेयः प्रियतराख्यानम् । ऊर्जो बलं तानि विद्यन्ते येषु समाहितेषु [?] । एते रसवदाद्यलङ्कारा उक्ता इत्यर्थः ।

ननु रसादिचतुष्टयस्य रसवदाद्यलङ्कारत्वं युक्तं न भावोदयादीनां पुरातनैरलङ्कारकारैरनुक्तत्वादिति शङ्कामनुवदति **यद्यपीति** । अप्राधान्यात् रसादिचतुष्टयस्य अलङ्कारत्ववत् भावोदयादीनामप्यप्राधान्यात् अलङ्कारत्वं दुर्वारम् । भावोदयभावसंधिभावशबलताश्च पृथगलङ्कारा इत्यलङ्कारसर्वस्व-

कारसूत्रानुरोधेन कश्चिद् ब्रूयात् तदप्यङ्गीकार्यमित्येवमुक्तमिति परिहरति **तथापीति** । **एवमिति** । अलङ्कारतयेत्यर्थः ।

ननु गुणीभूतव्यङ्ग्यस्य मध्यमकाव्यस्यापि रसभावार्थपर्यालोचनया उत्तमकाव्य एव पर्यवसानान्मध्यमोत्तमकाव्ययोः सङ्करः संसृष्टिर्वा स्यात् इत्याशङ्कामनुवदति **यद्यपीति** । स्वप्रभेदादिभिरित्यादिशब्देनालङ्कारो ग्राह्यः । स्वशब्देन मध्यमोत्तमशब्दयोः काव्ययोर्ग्रहणम् । सालङ्कारैर्ध्वनिप्रभेदैः, सालङ्कारैर्गुणीभूतव्यङ्ग्यैरित्यर्थः । यद्यपि साङ्कर्यादिकमस्ति तथापि न्यायान्निर्णय इति परिहरति **तथापीति** । प्राधान्यमत्र वर्णनीयतया द्रष्टव्यम् । अयं स रशनोत्कर्षीत्यादौ कविना वर्ण्यमानत्वात् [शृङ्गारस्य] प्राधान्यमस्तीति मध्यमकाव्यमस्तीति भावः ।

सारबोधिनी—अत्रेति । पश्येत्कश्चिदित्यनेन शङ्का । चलचपलेत्यनेनासूया । का त्वरेति धृतिः । अहं कुमारीत्यन्तेन मम कुमार्या नैवं स्वातन्त्र्यमित्यर्थपरेण कौमार्यस्मरणात् स्मृतिः । हस्तालम्बमित्यनेन श्रमः । हहहेति दैन्यम् । व्युत्क्रम इति विबोधः । अत्र विबोधपदेन मतिरुच्यते । क्वासि यासीत्यौत्सुक्यम् । शबलता पूर्वपूर्वोपमर्देन परपरोदयः ।

केचित्तु एषां समप्राधान्येन तिलतण्डुलवत् चर्व्यमाणता शबलता राजविषयकस्य रतिभावस्याङ्गमित्याहुः । एते च गुणीभूतव्यङ्ग्ये उदाहरिष्यन्त इति स्ववचनं सङ्गमयति **एते चेति** । रसवदादिपदानि तत्रैव व्याख्यातानि । अथ रसवदादीनां परिष्कारकत्वाभावात् तेषामिति कश्चिदिति इतरोत्कर्षकत्वस्यालङ्कारत्वव्यवहारबीजस्य सत्त्वेऽलङ्कारत्वानुपपत्तिरबोधायैव पर्यवस्यतीत्याक्षिप्ताः प्राञ्चः ।

नन्वयं स रशनेत्यत्र प्रकरणगम्यकरुणस्य प्राधान्येन संभवति ध्वनित्वे कथं गुणीभूतव्यङ्ग्यतेत्याह **यद्यपीति** । विषय आश्रयः । आदिपदेन विजातीयप्रभेदपरिग्रहः । **क्वचिदित्यादि** । यत्र यन्मुखेन चमत्कारस्तत्र तेनैव व्यवहार इत्यर्थः । तेनात्र करुणस्य गुणीभूतव्यङ्ग्यशृङ्गारमुखेन चमत्कारित्वात् तेनैव व्यवहारो न ध्वनित्वेन । तदाह **प्राधान्येनेति** । प्राधान्यं तु चमत्कारप्रयोजकत्वम् । अनुरणनरूपयोरलङ्कारवस्तुनोर्वाच्याङ्गत्वं क्रमेणाह ।

काव्यप्रकाशदर्पणः—पश्येत्कश्चिदिति । अत्र यं पुरुषं ब्रवीति तस्मात् समं गोप्यः कश्चिद्व्यापार आक्षिप्यते । तेनात्र शङ्का च । **त्वरेति** । आवेगविशृङ्खलार्थं स्थापनरूपा धृतिः । अहं कुमारीति स्मृतिः । हस्तालम्बमित्यादिना तदङ्गस्य औत्सुक्यात् न विफलावचः [?] श्रमः । कातर्यप्रकटनं दैन्यम् । हहहा व्युत्क्रमविशेषेणं कथमेवं मया कुमार्या क्रियत इति बोधोऽयमिति यावत् । नीतिमार्गानुस्मृत्यादेरेवार्थनिर्धारणमिति । क्वासि यासीति । तस्य तद्गतरागातिरेकबोधार्थं कच्चित् कुतश्चिन्मिथ्यागमनमालोक्यौत्सुक्यम् ।

रसवदादीति । अयं स रशनेत्यत्र कैलासालयेत्यत्र च रसवदलङ्कारः । अत्युच्चा इत्यादिषु षट्सु क्रमेण प्रेय ऊर्जस्वी समाहितभावोदयभावसंधिभावशबलता व्याख्याताः । षट् प्राचीनैरुक्ताः । एषां गुणीभूतरसादीनां स्वव्यञ्जकवाच्यत्वाच्चमत्कारोपस्कृतामलङ्कारव्यपदेशः । ननु ध्वनिगुणीभूतव्यङ्ग्यानां ध्वनिमिश्रणस्य प्रथग्वक्ष्यमाणत्वात् शुद्धानामेवोदाहरणम् । अयं स रशनेत्यादौ तु करुणादिसंभेद इत्याह

यद्यपीति । स्वप्रभेदैः सजातीयप्रभेदैः अयं स इत्यादौ करुणादेस्तत्प्राधान्येऽपि संभोगशृङ्गारादिद्वारेणवास्वादप्रकर्ष इति तेनैव गुणीभूतेन व्यवहारो न्याय्यः । यच्चैवंभूतानामपि मिश्रीभावस्थलेऽप्युदाहरणं तस्मिन् मिश्रीभावफलमिति ।

जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृतालङ्काभर्तुर्वदनपरिपाटीषु घटना मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥१२४॥

अत्र शब्दशक्तिमूलानुरणनरूपो रामेण सहोपमानोपमेयभावो वाच्याङ्गतां नीतः ।

बालचित्तानुरञ्जनी—शब्दशक्तिमूलमपरस्याङ्गमुदाहरति जनस्थान इति । याचकवचनम् । मया याचकेन रामत्वं रामचन्द्रत्वमाप्तम् । तदेव विशेषणैराह । जनानां स्थाने, पक्षे दण्डकारण्ये, कनकमृगस्य मार्गणमन्वेषणम् तत्र तृष्णा तद्युक्तधिया पक्षे, कनकमृगे तृष्णा तदन्वितधिया, भ्रान्तं पर्यटितम् । वै प्रसिद्धौ । देहि विश्राणयेति, पक्षे वैदेहि सीते ! इति वचः प्रतिपदं उपसृत्य यथा स्यात् तथा प्रलपितम् । अलमत्यर्थं काभर्तुः ईषद्भर्तुः, अल्पत्वेन तु कुत्सितत्वं लक्ष्यते । वदनपरिपाटीषु वचनश्रेणिषु घटना आदेशकारितेति यावत् कृता, पक्ष लङ्काभर्तुः रावणस्य, वदनानां परिपाटी पङ्क्तिः, [तत्र] इषुघटना शरयोजना कृता, कुशलं वसु धनं यस्य तस्य भावस्तत्ता, पक्षे कुशलवौ सुतौ यस्याः सा कुशलवसुता सीता तु नाधिगता न प्राप्ता । किं कस्याङ्गमित्याकाङ्क्षायामाह **अत्रेति** । शब्दशक्तिर्मूलं यस्यानुरणनरूपः व्यङ्ग्यतायोग्यः । 'अनुरणनोपम' इति पाठे अनुरणनसदृशः रामवृत्तान्तस्याप्राकरणिकत्वात् । स्वविशेषणोपमेयकथनेनैव रामत्वे सिद्धे रामत्वमिति शब्देनोपादानात् उपमानोपमेयभावो वाक्यार्थीभूतस्य वाच्यस्यार्थस्याङ्गमित्यर्थः ।

सारबोधिनी—**जनस्थान इति** । जनानां स्थानं जनस्थानं नगरग्रामादि दण्डकारण्यं च । कनके मृगतृष्णा निष्फलाशा कनकमृगे तृष्णा च । वै निश्चितम् । देहि प्रयच्छ । वैदेही सीता च । भर्तुर्भरणकर्तुः परिपाटीषु सुव्रविवलनाङ्गमोठनानवधानादिषु का घटना न कृता । यद्वा, काभर्तुः कुत्सितभर्तुः वदनपरिपाटीषु वचनभङ्गीषु घटना योजना । अलम् अत्यर्थेन कृता, अलं व्यर्थं वा, पक्षे लङ्काभर्तुः रावणस्य वदनानां परिपाट्यां इषुघटना, शरसंयोजनं च । कुशलं वसु धनं यस्य । एवंभूतौ तौ कुशलवौ सुत यस्याः सा सीता च ।

अत्र प्रकृताप्रकृतयोः कवयितृरामयोः साम्यं व्यञ्जनया बोध्यत इत्याह **रामेणेति** । उपमानोपमेयभावः साम्यम् । शब्दानां परिवृत्त्यसहिष्णुत्वेन शब्दशक्तिमूलता । वाच्यस्य "मयाप्तं रामत्वम्" इत्यस्यान्यत्रान्यतादात्म्यारोपरूपातिशयोक्तिरूपस्याङ्गतामुत्कर्षतां नीतः । मयाप्तं रामत्वमित्यभिधाय कविनेति शेषः । तदनुक्तावुपमाध्वनित्वानपायः स्यात् ।

अयमर्थः । तत्सदृशे तत्त्वारोपस्याचमत्काररूपत्वात् । वाच्यस्य तत्त्वारोपस्य प्रतीयमान साम्यमुत्कर्षकमित्यपराङ्गता । अथ कुतो रामत्वम् इत्याकाङ्क्षायां निवर्तकस्य साम्यस्य वाच्यसिद्ध्यङ्गत्वमेव नापराङ्गत्वमिति चेन्न । जनस्थानभ्रमणादिरूपसाम्यस्य शब्दशक्तिमूलव्यङ्ग्यतः प्रागेवावगतौ रामत्वा-

रोपरूपवाच्यस्य सिद्धत्वात् । अङ्गोपमायां तु जनस्थानेत्यादिशब्द एव साधर्म्यम् । "वाच्यताम्" इति पाठे वाच्यपदात् तत्प्रत्ययः । तेन वाच्यतां वाच्योत्कर्षताम् इत्यर्थः ।

अन्ये तु, वाच्यतां नीतः मयाप्तं रामत्वमित्यनेनेति शेषः । वारणेन्द्रलीलाम् इति निदर्शनोदाहरणवद्रामत्वमित्यस्य बाधात् रामसदृशार्थकेन तेन वाच्यवत् प्रतीतत्वात् इत्यर्थः । तदङ्गं तु शब्दशक्तिमूलो द्वितीयार्थं इति वदन्ति ।

काव्यप्रकाशदर्पणः—अथ शब्दशक्तिमूलं क्रमेणोदाहरति जनेति । जनस्थानं नगरग्रामादि दण्डकारण्यं च । कनकं प्रति मृगतृष्णा निष्फला । कनके मृगे तृष्णा च । वं निश्चितम् । देहं प्रतिच्छविः देहतृष्णा च । अलं व्यर्थम् । काभर्तुः कुत्सितस्वामिनो यद्वदनं तस्य परिपाटीषु परम्परासु, लङ्काभर्तुः रावणस्य वदनानां मुखानां, परिपाटी पंक्तौ, इषुघटना शरसंयोगश्च, कुशलं शुद्धं वसु धनं यस्य, एवंभूतौ कुशलवौ सुतौ यस्याः सा सीता च उपमानोपमेयभावः सादृश्यं, वाच्यतामन्वयोपपादकताम् । वाच्याङ्गम् इति पाठे तु वाच्यः वाच्यार्थः तदङ्गता । असंबन्धरूपाया अतिशयोक्तेरङ्गताम् । अत्र रामत्वम् इत्यध्यवसायेऽपि शब्दशक्तेरेव प्रतीयमानरामतादात्म्यं च तेनाविष्कृतमिति गोपनकृतचारुतामिव स्यात् । गुणीभूतव्यङ्ग्यत्वमिति भावः ।

आगत्य संप्रति वियोगविसंष्ठुलाङ्गीमम्भोजिनीं क्वचिदपि क्षपितत्रियामः ।
एतां प्रसादयति पश्य शनैः प्रभाते तन्वङ्गि पादपतनेन सहस्ररश्मिः ॥१२५॥

अत्र नायकवृत्तान्तोऽर्थशक्तिमूलो वस्तुरूपो निरपेक्षरविकमलिनीवृत्तान्ताध्यारोपेणैव स्थितः ।

बालचित्तानुरञ्जनी—अर्थशक्तिमूलानुरणनरूपव्यङ्ग्यमुदाहरति । कश्चिन्नायको नायिकां प्रत्याह हे तन्वङ्गि ! पश्य क्वचित् क्वचिदपि द्वीपे क्षपिता त्रियामा रात्रिर्येन स सहस्ररश्मिरागत्य सप्रति प्रभाते पादपतनेन किरणपतनेन कृत्वा वियोगेन विसंष्ठुलाङ्गीं कृशामित्यर्थः । एताम् अम्भोजिनीं शनैः प्रसादयति लक्षणया विकासयतीत्यर्थः । अत्र वाच्यस्याङ्गं किमित्याकाङ्क्षायामाह अत्रेति । अत्र श्लिष्टपदोक्तौ प्रस्तुतरविकमलिनीवृत्तान्तस्य वाच्यस्य प्रधानस्य सामर्थ्यात् वाच्यसंस्कारकत्वेनागतो नायकवृत्तान्तोऽङ्गम् । ननु वियोगसंष्ठुलाङ्गीपादपतनेनेति श्लिष्टशब्दसद्भावात् किमुभयशक्तिमूलः अर्थशक्तिमूलो वेति शङ्कायामाह अत्रेति । माम्ना व्यपदेशा भवन्तीति न्यायात् अर्थस्यैवाधिक्यात् अर्थशक्तिमूल एवेति भावः ।

ननु किमयमुपमालङ्कारध्वनिः ? किं वा वस्तुध्वनिरित्याकाङ्क्षायामाह **वस्तुरूप** इति । **उल्लासस्य** कालकरवालेत्यादाविव श्लिष्टशब्दभावनया पार्थक्येनार्थद्वयप्रतीत्यभावान्नोपमालङ्कारः । किन्तु वस्तुरूपालङ्कार एवेत्यर्थः । नन्वयं वाच्यसिद्ध्यङ्गमस्तु, मास्तु परस्याङ्गमित्यत आह **निरपेक्षेति** ।

रविकमलिन्यौ न हि नायिकानायकवृत्तान्तमपेक्षेते अध्यारोपेणेत्यनेनैवयप्रतिपत्तिः साध्यते । एवकारेण गुणभावं विना प्रकारान्तरेणान्वयाभावः । निरपेक्षत्वेन सिद्धस्य वाच्यस्य यदुपोद्वलकं तदपराङ्गम् । यत्तु वाच्येऽत्यन्तमेवोपकारकं तद्वाच्यसिद्ध्यङ्गमिति विवेकात् नायं वाच्यसिद्ध्यङ्गमिति भावः ।

सारबोधिनी—आगत्येति । वियोगो द्वीपान्तरसञ्चारेण संबन्धाभावो विरहश्च । विसंष्ठुलं सङ्कुचितम् । कार्कश्यादिना पूर्वावस्थातो विसंवादि च । क्वचित् द्वीपान्तरे नायिकान्तरे च प्रसादनं विकसनं मानापनयनञ्च । पादो रश्मिश्चरणश्च । पतनमधःसंयोगः प्रणामश्च । अत्रेति । नायकेत्येकशेषः । वृत्तान्तो व्यवहारः । स एव न तत्प्रतियोगिनौ नायिकानायकौ, तदुपस्थापकविरहात् । व्यवहारावच्छेदकत्वेनैव तयोः प्रतीतेः तेन प्राधान्येन तदनुपस्थितौ नोपमारूपकध्वनी । तदाह वस्तुरूप इति । यद्यपि पादपतनेनेति श्लिष्टपादसद्भावात् शब्दशक्तिमूलं संभवति । तथाप्यर्थशक्तिमूलत्वेन व्यपदेशः, प्राधान्यात् । तद्व्यतिरेकेणापि नायकवृत्तान्तावगमाच्च ।

ननु प्रकृताप्रकृतवृत्तान्तयोरभेदो वाक्यार्थोऽप्रकृतवृत्तान्तोपस्थितिं विना न पर्यवस्यतीति वाच्यसिद्ध्यङ्गत्वमापतितमित्याह **निरपेक्षेति** । अप्रकृतवृत्तान्तोपस्थितिं विनापि वाक्यार्थस्य पर्यवसानं तु न तत्साकाङ्क्षत्वम् अपि तु तेनोत्कर्षणीयत्वमेवेत्यर्थः । अस्या व्यङ्ग्योक्तेर्वाच्योत्कर्षकत्वेन समासोक्तित्वं तथा द्वयोर्वृत्तान्तयोरारोप्यारोपविषयताया एव संबन्धत्वात् ।

टीकाकृतस्तु—रसस्य वाच्याङ्गत्वेऽप्येतदेवोदाहरणमिति वदन्ति । तेषामयमाशयः । खण्डितानुनयनलक्षणनायकवृत्तान्ततादात्म्यावगम आक्षिप्तरतिरूपेण रसेन वाच्यस्य रविकमलिनीवृत्तान्तस्य परिपोषणमिति रसस्य वाच्याङ्गतेति ।

काव्यप्रकाशदर्पणः—आगत्येति । विसंष्ठुलं बिल्वमिति । प्रसादयति विकासयति प्रसन्नां करोति च । पादानां रश्मीनां पतनं प्रणामश्च । नायकश्च नायिका च नायकावित्येकशेषः । अध्यारोपेणैव स्थित इति । न ह्यत्र रविकमलिनीवर्णनरूपवाच्यार्थवत् प्रतीयमानो नायककेलिरूपोऽर्थो वाच्यार्थतां लभते । विशेष्याभिधायिनोः पदयोः उभयार्थानुप्रतिपादकत्वाभावात् । प्रसादयतीत्येतावन्मात्रेणैव प्रकृतनिर्वाहात् । पदद्वयस्य द्व्यर्थत्वेऽपि नोत्कटा शब्दशक्तिरित्यर्थशक्तिमूलोक्तिः । निरपेक्षेत्यनेनास्य वाच्यसिद्ध्यङ्गताया भेदश्च रसादौ चानुरणनरूपस्य गुणीभावः । व्यभिचार एवेति (?) वस्यागमनम् (?) । मुखविकारकारी कश्चिदान्तरो धर्मः येन दिग्भ्रमणमिव दृश्यते ।

वाच्यसिद्ध्यङ्गं यथा

भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादम् ।
मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् ॥१२६॥

अत्र हालाहलं व्यङ्ग्यं भुजगरूपस्य वाच्यस्य सिद्धिकृत् ।

यथा वा

गच्छाम्यच्युत दर्शनेन भवतः किं तृप्तिरुत्पद्यते
किं त्वेवं विजनस्थयोर्हतजनः संभावयत्यन्यथा ।
इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसा-
माश्लिष्यन् पुलकोत्कराञ्चिततनुर्गोपीं हरिः पातु वः ॥१२७॥

अत्राच्युतादिपदव्यङ्ग्यमामन्त्रणेत्यादिवाच्यस्य । एतच्चैकत्र एकवक्तृगतत्वेनापरत्र भिन्नवक्तृगतत्वेनेत्यनयोर्भेदः ।

बालचित्तानुरञ्जनी—अपरस्याङ्गं सप्रपञ्चमुदाहृत्य क्रमप्राप्तं वाच्यसिद्धयङ्गमुदाहरति **वाच्येति** । जलदा एव भुजगाः सर्पाः, तत्तु विषम् उदकम् । वियोगिनां भ्रमिश्चेतसोऽनवस्थानम् । अरतिं विषयेष्वनभिलाषं अलसहृदयतां, प्रलयं इन्द्रियाणां नष्टचेष्टतां, मूर्च्छां मनसो बाह्येन्द्रियैः सह शक्तिनिरोधः । तमः सत्येत्र चिन्तासामर्थ्ये बाह्येन्द्रियशक्तिनिरोधः, शरीरकार्श्यं, मरणशब्देन प्राणत्यागसाधिका पूर्वक्रियैव पाशबन्धाद्यनुसरणता विवक्ष्यते । तच्च प्रसह्य बलात्कारेण कुरुते । चकार उक्तसमुच्चयार्थः ।

अत्र किं व्यङ्ग्यं कथं वाच्यसिद्धयङ्गं तत्राह **अत्रेति** । जलदा एव भुजगा इति । जलदानां भुजगरूपणं वाच्यं हालाहलं वस्तु व्यङ्ग्यं विना न सिद्ध्यतीति हालाहलवाच्यस्य सिद्धिकृत् वाच्यस्य भुजगार्थस्य निर्वाहाय विषमितिपदप्रकाश्यशब्दशक्तिमूलो हालाहलो वाच्यसिद्धयङ्गम् । अत एव सापेक्षत्वापरस्याङ्गादस्य भेदः ।

अत्रैवोदाहरणान्तरमाह **यथा वेति** । । हे अच्युत कृष्ण अक्षरणशील गच्छामि । भवतो दर्शनात् सुरतसेवाविकलेन प्रीतिः किमुत्पद्यते ? किन्तु हतजनः एवं विजनस्थयोरावयोरन्यथा संभावयति मन्यते इत्यनेन प्रकारेणामन्त्रणभङ्गिः अच्युतेत्यामन्त्रणप्रकारस्तेन सूचितम् । यद्वृथावस्थानं तज्जनितः खेदः । तेनालसां गोपीं श्लिष्यन् पुलकानामुत्करः समूहस्तेनाञ्चिता तनुर्यस्य स हरिः वः पातु ।

अत्र किं व्यङ्ग्यमित्याकाङ्क्षायामाह **अत्रेति** । अच्युतेत्यामन्त्रणेन मद्विषये त्वं न चरम इति यद्व्यङ्ग्यम् तदामन्त्रणभङ्गीत्यादिवाच्यस्य सिद्धयङ्गमिति शेषः । वाच्यमेवात्र वैदग्ध्यातिशयकारि तदपि वाच्यं स्वोत्पत्तौ चोपकारकं व्यङ्ग्यमपेक्षते । स्वस्यैवालाभादिति भावः । उदाहरणद्वयस्यैको भेदस्तत्राह **एतच्चेति** । एतद्व्यङ्ग्यं एकत्र भ्रमिमरतिमित्यादौ एक एव कविर्वक्ता, अन्यत्र गच्छाम्यच्युत इत्यादौ पूर्वार्धे गोपी वक्त्री, अपरार्धे कविर्वक्तेत्यनयोरुदाहरणयोर्भेद इत्यर्थः ।

सारबोधिनी—भ्रमिमिति । भ्रमिश्चेतसोऽनवस्थानम् । अरतिर्विषयेष्वनभिलाषः । प्रलयो बहिरिन्द्रियचेष्टाविरहः । मूर्च्छा मनसो बहिरिन्द्रियासंबन्धः । तमोऽन्धकारदर्शनम् । विषं जलं हालाहलश्च । **अत्र हालाहलमित्यादि** । तथा च जलगरलोद्गारित्वरूपसाधर्म्येण जलदभुजगयोः रूपणमुपपन्नमिति भावः ।

ननु गरलस्य न व्यङ्ग्यता । सत्यपि वृष्टिप्रकरणे प्रसिद्धिवशादभिधया विषपदेन द्रागेव गरलोपस्थितेः । यतः प्रकरणात् प्रसिद्धिरेव बलवती, अन्यथा निरूतार्थविलोपप्रसङ्गात् । प्रकरणबलादप्रसिद्धस्य प्रागुपस्थितौ तद्दोषस्यानवकाशादभिधया व्यञ्जनया च जलस्य पुनर्गरलस्योपस्थितिरिति जला-

भिन्ने गरले जलदभिन्नभुजगे जन्यत्वावगमः अभिधाया विरतत्वात् व्यञ्जनयैव गरलप्रत्यायनञ्च। न च पुनरभिधयैव गरलप्रत्यायनमस्तु किं व्यञ्जनयेति वाच्यम्। तथा सत्यावृत्तिकल्पनापत्तेः। अस्मन्मते तु तेनैवाभिधेयद्वारा व्यञ्जनसिद्धिरित्युक्तम्। अन्यथैवमावृत्तिकल्पने गतं शाब्दीव्यञ्जनयेत्यलं बहुना। न च जलगरलयोर्जलदभुजगयोश्च न कथमुपमेति वाच्यम्। अम्याद्यष्टविधकार्यस्य गरलादेवोपपत्तेः, न तु तत्सदृशादिति।

लक्ष्यान्तरमाह **गच्छामीति**। अच्युतः तन्नामकः, अपरिच्युतधैर्यश्च। किं दर्शनेन? अपि तु संभोगेन। संभावयतीत्यन्यथा संभावनमावश्यकम्। तत् किमित्यात्मानं वञ्चयाव इत्यर्था व्यङ्ग्याः। ते चामन्त्रणाद्यर्थस्योपपादकाः। अन्यथा आमन्त्रणभङ्गिस्वरूपाज्ञानेन इत्यर्थाद्येनान्वयः स्यादित्याह **एतच्चेति**। एतद्वाच्यसिद्ध्यङ्गम्।

काव्यप्रकाशदर्पणः--प्रलयो नष्टचेष्टता। अत्र शब्दवाच्ये जले गरलार्थप्रतीतिं विना जलदभुजगयोस्तादात्म्यरूपमसङ्गतमिति शब्दशक्तिमूलालङ्कारस्य वाच्यसिद्ध्यङ्गता। गच्छामीति। अपरित्यक्तधैर्य दर्शनेन किं फलम्? किन्तूपभोगेनैव। किन्त्विति।

अत्र यद्यपि व्यङ्ग्ययोरलङ्कारवस्तुरूपतयाऽप्युदाहरणद्वयदर्शनमुक्तम्, तथापि प्रकारान्तरेण भेदमाह **एकत्रेति**। एकत्र अयं स रशनेत्यादौ व्यङ्ग्य कविनिबद्धवक्तृगतम्। आमन्त्रेत्यादिवाच्यं तु कविगविगतम्।

अस्फुटं यथा

अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम्॥१२८॥

अत्रादृष्टो यथा न भवसि वियोगभयं च यथा नोत्पद्यते तथा कुर्या इति क्लिष्टम्।

बालचित्तानुरञ्जनी--वाच्यसिद्ध्यङ्गमुदाहृत्य तदुत्तरमुदाहरति **अस्फुटं यथेति**। काचित् प्रियं प्रत्याह। त्वयि अदृष्टे दर्शनोत्कण्ठा, दृष्टे सति परित्यज्य गमिष्यसीति दर्शनविच्छेदभीरुता। अतः अदृष्टेन भवता कृत्वा मया सुखं न लभ्यते। दृष्टेन कृत्वापि सुखं न लभ्यते। अत्र किं व्यङ्ग्यमस्फुटमित्याकाङ्क्षायामाह **अत्रेति**। तथा कुर्या इति व्यङ्ग्यमस्फुटत्वेन प्रतीयत इति न तथा चमत्कारकारीति क्लिष्टम्। युक्तं शब्दार्थशक्त्या प्रकाशमानं व्यङ्ग्यमितरदस्फुटमिति विवेकः।

सारबोधिनी--**अदृष्ट इति**। अदृष्टयोर्भवदर्थं एव विशेष्यः। भवतेति हेतौ तृतीया। क्लिष्टं व्युत्पन्नैरपि झटित्यसंवेद्यम्।

काव्यप्रकाशदर्पणः-**अदृष्ट इति**। अत्रार्थप्रतीत्यनन्तरं विपर्यालोचनैव प्रतीतिविषयत्वात्। व्यङ्ग्य क्लिष्टं सहृदयानामप्यगोचरम्। **संदेह इति**। वाच्यव्यङ्ग्ययोर्द्वयोरपि प्रधानप्रत्यासत्तिविशेषात्।

संदिग्धप्राधान्यं यथा

हरस्तु किञ्चित् परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ।।१२६।।

अत्र परिचुम्बितुमैच्छदिति किं प्रतीयमानं किं वा विलोचनव्यापारणं वाच्यं प्रधानमिति सन्देहः ।

बालचित्तानुरञ्जनी—क्रमप्राप्तं सन्दिग्धप्राधान्यमुदाहरति **सन्दिग्धेति** । चन्द्रोदयारम्भे अम्बुराशिरिव किञ्चित् परिवृत्तधैर्यो हरस्तु किञ्चित् फलमधरयतः बिम्बफलाधरौ ओष्ठौ यस्य, तस्मिन् मुखे विलोचनानि व्यापारयामास । ओष्ठद्वयं मुखं चेति स्थानत्रये व्यापारणार्थं विलोचनानीति बहुवचनम् । अत एवैतत्सचमत्कारम् । अत्र संदिग्धप्राधान्यं कथमित्यत आह **अत्रेति** । चुम्बितुमैच्छदिति प्रतीयमानं प्रधानं किं वा विलोचनव्यापारणं वाच्यं प्रधानमिति सन्देहः । उभयोश्चमत्कारकारित्वादित्यर्थः ।

सारबोधिनी—**हरस्त्विति** । विलोचनानीति बहुवचनेनोत्कण्ठातिशयो व्यज्यते । तेन रागातिशयपूर्वकदर्शनस्य संभोगान्तरङ्गस्य सामग्र्या चुम्बनेच्छयापि प्राधान्यम् । प्रधानं चमत्कारप्रयोजकम् ।

तुल्यप्राधान्यं यथा

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यस्तथा मित्रमन्यथा दुर्मनायते ।।१३०।।

अत्र जामदग्न्यः सर्वेषां क्षत्रियाणामिव रक्षसां क्षणात् क्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम् ।

बालचित्तानुरञ्जनी—तुल्यप्राधान्यमुदाहरति **तुल्येति** । जामदग्न्यो रावणस्य प्रधानपुरुषं प्रत्याह । ब्राह्मणावज्ञातिक्रमो भवद्भिश्च क्रियते तर्हि सा भवतां भूतय एव । तथा जामदग्न्योऽहं मित्रम् । अन्यथा जामदग्न्योऽयं दुर्मनायते । व्यङ्ग्यकथनपूर्वकं प्राधान्यमाह **अत्रेति** । वाच्यस्य दौर्मनस्यलक्षणस्य रक्षःक्षयलक्षणस्य व्यङ्ग्यस्य च समकाल प्रतीत्या तुल्यं प्राधान्यमित्यर्थः ।

सारबोधिनी—**ब्राह्मणेति** । अत्र भूत्युपदेशमित्राभिधानं साम वाच्यम् । उक्तरूपश्च दण्डो व्यङ्ग्यः । तथा चोभयोरपि अनर्थनिबन्धकत्वेन तुल्यता ।

काव्यप्रकाशदर्पणः—**ब्राह्मणेत्यादि** । रावणं प्रति परशुरामस्य वाक्यमिदम् । भवतां रक्षसां मित्रं जन्मप्रभृति अखिलरहस्यवेदी । अत्र वाच्यव्यङ्ग्ययोः सामदण्डयोस्त्वल्पतयैव । वैरिमोचनपर्यन्ते त्वप्रस्तुतप्रशंसावत् परस्परानपेक्षया चमत्कारास्पदत्वात् द्वयोरपि समप्राधान्यम् । पूर्ववत् सन्देहालङ्कारवत् ।

वाच्यस्य निषेधस्य सहभावे समकालमेव झटित्यर्थंप्रतिभासात् । अत एवात्र विद्यमानानेव मुख्यार्थबाधात् रससंबन्धानपश्यतां केषाञ्चित् लक्षणावृत्त्यङ्गीकारः ।

काक्वाक्षिप्तं यथा

मथ्नामि कौरवशतं समरे न कोपाद् दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरू संधिं करोतु भवतां नृपतिः पणेन ॥१३१॥

अत्र मथ्नाम्येवेत्यादि व्यङ्ग्यं वाच्यनिषेधसहभावेन स्थितम् ।

बालचित्तानुरञ्जनी--क्रमप्राप्तं काक्वाक्षिप्तमुदाहरति काक्वाक्षिप्तमिति । भीमवचनम् । समरे कोपात् कौरवाणां शतं न मथ्नामि ? दुःशासनस्य उरस्तः रुधिरं न पिबामि ? सुयोधनस्योरू गदया न सञ्चूर्णयामि ? नृपतिः युधिष्ठिरः पणेन भवतां संधिं करोतु । अत्र किं व्यङ्ग्यम्, तस्य वा कथं गुणभावस्तदाह **अत्रेति** । वाच्यश्चासौ निषेधश्च, तेन भेदे न वाच्यप्रतीत्यनन्तरं प्राधान्यम् । अत्र तु शक्तिरेव स्वासिद्धेराक्षिप्तकाकुसहाया सती अर्थविशेषप्रतिपत्तिहेतुर्न तु काकुमात्रमिति उभयोर्वाच्यव्यङ्ग्ययोर्युगपत् प्रतीतत्वाद् गुणीभूतव्यङ्ग्यत्वमित्यर्थः । न चात्र विपरीतलक्षणास्तीति वाच्यम् । उच्चारणकाल एव कोपात् गद्गदस्वरादिसाकाङ्क्षकाकुबलात् निषेधस्य निषिध्यमानतयैव युधिष्ठिराभिमतसंधिमार्गाक्षमारूपत्वाभिप्रायेण प्रतीतिरिति मुख्यार्थबाधाद्यभावात् ।

सारबोधिनी--**मथ्नामीत्यादि** । सन्धिश्रवणकुपितस्य भीमसेनस्योक्तिरियम् । **मथ्नामीति** । न मथ्नामीति । तेन सत्कृतसंधाने नास्माकं संधिः । **अत्रेति** । प्रतिज्ञातस्य विरुद्धनिषेधाभिधायिषु नञ्सु काकुर्निषेधान्तराक्षेपिका अभावाभावश्चावधारणमेवेत्याह **मथ्नाम्येवेत्यादि** । नन्ववधारणस्य चमत्कारित्वे ध्वनित्वे संभवति कथं गुणीभाव इत्यत आह **वाच्येति** । सहभावेन समकालं प्रतीयमानत्वेन तेन व्यङ्ग्यकृतचारुत्वस्य वाच्यनिर्वाहकत्वाग्रहान्न ध्वनित्वम्, किन्तु गुणीभूतत्वमेवेति भावः । अत एव काकुव्यङ्ग्यस्य पदार्थस्थानीयत्वेनाक्षिप्तपदं झटिति प्रत्यायितमित्येतत्परम् । यत्र काकुतोऽपि विलम्बेन प्रतीतिस्तत्र ध्वनित्वमेव । **यथोदाहृते "गुरुः खेदं खिन्न" इत्यत्र** ।

असुन्दरं यथा--

वाणीरकुडंगुड्डीणसउणिकोलाहलं सुणंतीए ।
घरकम्मवावडाए बहुए सीअन्ति अंगाइं ॥१३२॥

अत्र दत्तसंकेतः कश्चिल्लतागहनं प्रविष्ट इति व्यङ्ग्यात् सीदन्त्यङ्गानीति वाच्यं सचमत्कारम् ।

बालचित्तानुरञ्जनी--असुन्दरमुदाहरति **असुन्दरेति** । **वाणीरकुडंगुड्डीणसउणिकोलाहलं** वानीरा वेतसाः कुञ्जलताः, गहनवाणीरकुञ्जोड्डीनशकुनिकोलाहलं, **सुणंतीए** शृण्वत्याः, **घरकम्म**-

वावडाए गृहकर्मव्यापृतायाः, बहुए वध्वाः, अंगाइ अङ्गानि, सीअन्ति सीदन्ति। अत्रापि अङ्गानीति बहुवचनेन एकमपि न तादृगङ्गं यदात्मानं सञ्चारयितुं शक्नोति। एवं शकुनिकोलाहलश्रवणमात्रेण अङ्गसादोऽभूदिति वाच्यस्य स्मरणस्य प्रतीतिहेतुत्वेन चमत्कारकारित्वेनासुंदरत्वाद्व्यङ्ग्यमसुन्दरमित्यर्थः।

सारबोधिनी—**वाणीरेति**।

वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः।
गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि ॥

अत्रौत्सुक्यावेगसंवलितमनुभावभूतमङ्गावसादरूपं वाच्यमेव मन्मथोन्मादं प्रत्याययति। दत्तसङ्केत इत्यादिव्यङ्ग्यं तु तन्मुखप्रेक्षितत्वादसुन्दरमिति।

काव्यप्रकाशदर्पणः—वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः।
गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि ॥

अत्रौत्सुक्यावेगसंवलितसत्त्वभावभूतं वाच्यमेव तन्मन्मथोन्मादं प्रत्याययति। दत्तसंकेत इत्यादि तु तटस्थप्रायमेवेति भावः। एतच्च वाच्यसिद्ध्यङ्गतादेरपवादभूतत्वाद्भिन्नम्। तेषु हि व्यङ्ग्यस्यापि चारुत्वं संभावितम्।

एषां भेदा यथायोगं वेदितव्याश्च पूर्ववत् ॥४६॥

यथायोगमिति।

"व्यज्यन्ते वस्तुमात्रेण यदालङ्कृतयस्तदा।
ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तेस्तदाश्रयात् ॥" [ध्वन्या० २/२९]

इति ध्वनिकारोक्तदिशा वस्तुमात्रेण यत्रालङ्कारो व्यज्यते न तत्र गुणीभूत व्यङ्ग्यत्वम्।

बालचित्तानुरञ्जनी—अगूढादीनामन्योन्ययोजने सङ्करसंसृष्टी च [इति] पूर्ववदेव द्रष्टव्यमित्याह **एषामिति**। एषामगूढादीनां भेदाः शुद्धध्वनिवत् द्रष्टव्याः। यावन्तः शुद्धध्वनिभेदाः तावन्तः सर्वेऽपि मध्यमकाव्यस्यापि किं सन्ति? नेत्याह **यथायोगमिति**। यथासंभवमित्यर्थः। यथायोगंशब्दार्थं ध्वनिकारवदनसंवादपूर्वकमाह **यथेति**। यदा वस्तुमात्रेण केवलवस्तुना अलङ्कृतयः अलङ्कारा व्यज्यन्ते तदा तासामलङ्कृतीनां ध्रुवं निश्चयेन ध्वन्यङ्गता। ध्वनिः शब्दार्थौ [?]अङ्गतां व्यञ्जकत्वेन यासां तासां भावस्तत्ता। अत्र हेतुमाह **काव्यवृत्तेस्तदाश्रयादिति**। व्यङ्ग्यालङ्कारपरत्वात् अलङ्काराणां व्यङ्ग्यानां प्राधान्यात् तत्र काव्ये न गुणीभूतव्यङ्ग्यम्। यदि तत्र व्यङ्ग्योऽर्थो मुख्यो न भवेत् तदा वस्त्वेव मुख्यं स्यात्। न च वस्तुमात्रे काव्यशब्दप्रवृत्तिः। शब्दचित्रत्वेन जघन्यत्वात्।

सारबोधिनी—**एषामिति**। एषां समनन्तरमेवोक्तप्रकाराणाम्। यथायोगं यथासंभवम्। **पूर्ववत्** ध्वनिभेदवत् अर्थान्तरसङ्क्रमितवाच्यत्वादिना। यत्तु अष्टानामेवैषां गुणीभूतव्यङ्ग्यभेदानां परस्पर-

योगातिदेशकमिदमिति तन्न तथा सति वस्तुनाऽलङ्कारव्यक्तौ यथायोगमित्यनेन गुणीभूतत्व-व्यवच्छेदानौचित्यात्प्रसङ्गाभावात् । तदेवाह व्यज्यन्ते वस्तुमात्रेणेति । वस्तुमात्रेण वाच्यालङ्कारशून्येन । तद्वत्त्वे तु विशेषो व्यज्यते । ध्वन्यङ्गता ध्वनिविशेषहेतुता । काव्यवृत्तेस्तदाश्रयात्, तदुद्देशेनैव कविना काव्यनिर्वाहात् । तत्कृतचारुत्वेनैव शब्दार्थयोः काव्यत्वलाभादित्यर्थः । न तत्रेति । न गुणीभूतव्यङ्ग्यत्वमपि तु ध्वनित्वमेव । तथा च तैर्भेदैर्न्यूनोऽत्रप्रकारः ।

इदमत्राकूतम् । अलङ्काराः कदाचिदङ्गभूतवाच्यालङ्काररहितेन वस्तुमात्रेण व्यज्यन्ते कदाचिद्वाच्यालङ्कारसहितेन वस्तुना । तत्राद्ये वस्तुमात्रापेक्षयाऽलङ्कारस्याधिकं चारुत्वमिति तत्र सर्वत्र ध्वनित्वमेव । उत्तरत्रापि यत्र वाच्यालङ्कारापेक्षया व्यङ्ग्यालङ्कारस्याधिकं चारुत्वं तत्र गुणीभूतत्वम् । यथा—

नैसर्गगुणविनीतं जनयति कापिञ्जलो वंशः ।
आजन्मनो ह्यपूर्वं सूते रत्नाकरो रत्नम् ॥

इत्यत्र प्रतिवस्तूपमाव्यङ्ग्यायामगूढायामुपमायाम् । यत्र च व्यङ्ग्यालङ्कारस्याधिकं चारुत्वं तत्र ध्वनित्वमेव । यथा 'गाढकान्तदशनक्षतव्यथे'त्यादौ विरोधव्यङ्ग्यायां तुल्ययोगितायम् ।

काव्यप्रकाशदर्पणः—एषां समनन्तरोक्तगुणीभूतव्यङ्ग्यप्रकाराणां यथायोगं यथासंभवम् । पूर्ववत् ध्वनिप्रकारवत् । ध्वन्यङ्गतेति । अङ्गता उपाधिता । तेनोपाधिना काव्यस्य ध्वनित्वमेव न तु गुणीभूतव्यङ्ग्यत्वमिति भावः । काव्यवृत्तेस्तदाश्रयात् । तदभिवादनपूर्वकं ता एताश्च प्राचीनानुसारेणोक्तम् ।

ज्योत्स्नापूरप्रसवधवले सैकतेऽस्मिन् सरय्वा
वादद्यूतं सुचिरमभवत् सिद्धयूनोः कयोश्चित् ।
एकः प्राह प्रथमनिहतं केशिनं कंसमन्यः
स त्वं तत्त्वं कथय भवता को हतस्तत्र पूर्वम् ॥

इत्युदाहरणं ये केचिद् ध्वनौ पठन्ति तदयुक्तम् । भवतेत्यनेन कृष्णतारूपणस्य स्फुटीकृतत्वादिति लोचनकारोक्तदिशाऽगूढाख्यगुणीभूतव्यङ्ग्यभेदस्य वाच्याङ्गतादर्शनात् । वाच्यालङ्कारस्य पुनर्गुणीभूतालङ्कारस्य व्यञ्जकत्वम् । यथा "साहित्यपाथोधिसुधारसज्ञः कापिञ्जलः कश्चिदपीह लोके" इत्यादिषु वाच्यानां दृष्टान्तप्रतिवस्तूपमादीनां गुणीभूतोपमाव्यञ्जकता ।

सालङ्कारैर्ध्वनेस्तैश्च योगः संसृष्टिसङ्करैः ।

सालङ्कारैरिति तैरेवालङ्कारैः । अलङ्कारयुक्तैश्च तैः । तदुक्तं ध्वनिकृता

"सगुणीभूतव्यङ्ग्यैः सालङ्कारैः सह प्रभेदैः स्वैः ।
सङ्करसंसृष्टिभ्यां पुनरप्युद्योतते बहुधा" ॥ इति । [ध्वन्या० ३ । ४४]

बालचित्तानुरञ्जनी--सालङ्कारैरिति । सालङ्कारैरित्यनेन शुद्धस्य ध्वनेः केवलैरलङ्कारैर्योगः । अलङ्कारयुक्तैश्च तैरित्यनेन अलङ्कारयुक्तैर्गुणीभूतव्यङ्ग्यैर्योगश्चेति पक्षद्वयमुक्तम् । तैश्चेत्यनेन गुणीभूतव्यङ्ग्यैः केवलैर्योग इति तृतीयः पक्षः । एवं त्रयः पक्षा इत्यर्थः । उक्तेऽर्थे संमतिमाह **तदुक्तमिति** । गुणीभूतव्यङ्ग्यैः अलङ्कारैश्च सह ये वर्तन्ते तैः सङ्कीर्णतया संसृष्ट्या वा स्वभेदसङ्कीर्णः स्वप्रभेदसंसृष्टो गुणीभूतव्यङ्ग्यसङ्कीर्णो गुणीभूतव्यङ्ग्यसंसृष्टो वाच्यालङ्कारान्तरसङ्कीर्णो वाच्यालङ्कारान्तरसंसृष्टः संसृष्ट्यालङ्कारान्तरसङ्कीर्णः संसृष्ट्यालङ्कारान्तरसंसृष्टश्चेति अनन्तप्रकारो ध्वनिरिति भावः । तत्र ध्वनिगुणीभूतव्यङ्ग्ययोः संसृष्टत्वं यथा —

तेषां गोपवधूविलाससुहृदां राधारहःसाक्षिणां
क्षेमं भद्र ! कलिन्दशैलतनयातीरे लतावेश्मनाम् ।
विच्छिन्ने स्मरतल्पकल्पनमृदुच्छेदोपयोगेऽधुना
ते जाने जरठीभवन्ति विगलन्नीलत्विषः पल्लवाः ॥

मय्यनासीने का स्मरतल्पकल्पनेति भावः । अत एवान्योन्यानुरागनिश्चयगर्भमेवाह **जाने इति** । वाक्यार्थस्यात्र कर्मत्वमधुना जरठीभवन्ति मयि तु संनिहिते अनवरतोक्तोपयोगान्न ते जराजीर्णतामापुरित्यर्थः । विगलन्नीला त्विट् येषाम्, अनेन चिरकालप्रोषितस्याप्यौत्सुक्यं ध्वनितम् । अत्र तु सुशब्दे साक्षिशब्देऽविवक्षितवाच्यो ध्वनिभेदः । ते जाने इत्येते च पदे गुणीभूतव्यङ्ग्ये । रूपभेद इति पदेनासाधारणगुणगणोऽभिव्यक्तोऽपि गुणत्वमवगते वाच्यस्यैव स्मरणस्य प्राधान्येन चारुत्वहेतुत्वात् जाने इत्यनेनोत्प्रेक्षमाणा तत्र धर्मव्यञ्जकेनापि वाच्यमेवोत्प्रेक्षणरूपतया प्रधानीक्रियते [???] ।

तयोः सङ्करो यथा—

"न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापस" इत्यत्रालक्ष्यक्रमव्यङ्ग्यस्य रौद्रस्य वाक्यार्थीभूतस्य व्यङ्ग्यविशिष्टवाच्याभिधायिपदैः सङ्करः । यदरयः इत्यादिभिः विभावादिरूपतया रौद्र एवानुगृह्यते वाच्यस्यैव क्रोधोद्दीपकत्वात् गुणीभूतव्यङ्ग्यता ।

वाच्यालङ्कारसंसृष्टत्वं च पदापेक्षया यथा--

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥

कूजितान्दोलितशिप्रातरङ्गजमधुरशब्दमिश्रं भवतीति दीर्घत्वम् विकसितकुसुमामोदेन या मैत्री । अभ्यासाङ्गवियोगान्योन्यानुकूल्यलाभः, तेन कषायः उपरक्तः मकरन्देन कषायः कषायीकृतः । प्रार्थनार्थं चाटूनि कारयति प्रियोऽपि संभोगार्थं चाटूनि करोति । अङ्गेषु चातुः षष्ठिकप्रयोगेष्वनुकूलः ।

अत्र मैत्रीपदं ह्यविवक्षितवाच्यो ध्वनिः। पदान्तरे चोत्प्रेक्षादिवाच्यालङ्कारसङ्कीर्णत्वं वा लक्ष्यक्रमव्यङ्ग्यापेक्षया रसवति सालङ्कारे काव्ये सर्वत्रैव द्रष्टव्यम्। न त्वत्र ध्वनेर्भेदादिभिः संसृष्टिसङ्करौ, किन्तु तेषामन्योन्ययोजनयाऽपि तौ स्यातामित्याह अन्योन्ययोगादिति। सूत्रं व्याकरोति एवमिति।

सारबोधिनी—ध्वनिगुणीभूतव्यङ्ग्यमिश्रणमाह सालङ्कारैरित्यादि। ध्वनेर्योगो मिश्रणम्। **तैरेवालङ्कारैरिति**। समासोक्तिस्थले—'आगत्य संप्रति वियोगे'त्यादौ व्यङ्ग्यस्य नायकवृत्तान्तस्य रविकमलिनीवृत्तान्तोत्कर्षतां प्राप्य समासोक्त्यलङ्कारतां प्राप्तैः अलङ्कारयुक्तैरित्यर्थः। स्वोक्ते प्रामाणिकसंमतिमाह **तदुक्तमिति**। सः ध्वनिः प्रभेदैः अर्थान्तरसङ्क्रमितवाच्यादिभिः। सालङ्कारैर्वाच्यालङ्कारसहितैः। **भेदेति**। प्रभेदोऽवान्तरभेदः।

काव्यप्रकाशदर्पणः—**सालङ्कारैरिति**। ध्वनेरुक्तभेदवतः तैर्गुणीभूतव्यङ्ग्यैः अर्थादष्टानामप्येषां ध्वनिभेदसंख्यानामित्याह। सजातीयसंसृष्टौ षट्त्रिंशत्क्रमः, सङ्करे तु शतमष्टोत्तरमिति। ततश्चत्वारिंशदधिकशुद्धभेदाष्टकेन सह चैवंविधसंख्याकभेदवद्भिः। **संसृष्टीति**। एकया संसृष्ट्या त्रिभिश्च सङ्करैर्योगः संबन्धः। **तैरेवालङ्कारैरिति**। वाच्यालङ्कारव्यङ्ग्यैः। अलङ्कारयुक्तैरिति वाच्यालङ्कारयुक्तैः। उद्योतते प्रकाशते। ध्वनिरित्यनुषङ्गः। भेदानां विशेषाणां गुणने शुद्धजातीयसङ्कीर्णसंसृष्टतया शृङ्गारस्य विवक्षितान्यपरवाच्यविशेषासंलक्ष्यक्रमविशेषरसविशेषस्य संख्यानन्त्यं पूर्वोक्तरीत्या शुद्धसङ्कीर्णसंसृष्टताभिन्नानां ध्वनिगुणीभूतव्यङ्ग्यानाम्। संप्रति व्यञ्जनावृत्तिसद्भावे विप्रतिपत्ति निरासादिभिराभासमानस्य प्रकारस्य प्रकरणस्य संप्रतिपत्तये संक्षिप्य ध्वनिगुणीभूतव्यङ्ग्यभेदमहासङ्कलनेन सङ्क्षेपेण ध्वनेः, ध्वननव्यापारोपहितस्य। तेन ध्वनेर्गुणीभूतव्यङ्ग्यस्यापीत्यर्थः। त्रीणि स्वरूपाणि वस्त्वलङ्काररसादिलक्षणविचित्रं वक्रोक्तिरूपं अलङ्काररूपम्। अलङ्कार्यत्वेऽपि वक्रोक्तिरूपतया अलङ्कारपदवाच्यम्। एतदेवाह अत्रापीति। लक्ष्यते ज्ञायतेऽनेनेति लक्षणं नाम यस्य रसभावादेरित्यर्थः।

अन्योन्ययोगादेवं स्याद्भेदसंख्यातिभूयसी ॥४७॥

एवमनेन प्रकारेण अवान्तरभेदगणनेऽतिप्रभूततरा गणना। तथाहि शृङ्गारस्यैव भेदप्रभेदगणनायामानन्त्यम् का गणना तु सर्वेषाम्।

सङ्कलनेन पुनरस्य ध्वनेस्त्रयो भेदाः, व्यङ्ग्यस्य त्रिरूपत्वात्। तथाहि। किञ्चिद्वाच्यतां सहते। किञ्चित्त्वन्यथा। तत्र वाच्यतासहमविचित्रं विचित्रं चेति। अविचित्रं वस्तुमात्रम्। विचित्रन्त्वलङ्काररूपम्। यद्यपि प्राधान्येन तदलङ्कार्यम्, तथापि ब्राह्मणश्रमणन्यायेन तथोच्यते। रसादिलक्षणस्त्वर्थः स्वप्नेऽपि न वाच्यः। स हि रसादिशब्देन शृङ्गारादिशब्देन वाऽभिधीयेत। न चाभिधीयते। तत्प्रयोगेऽपि विभावाद्यप्रयोगे तस्याप्रतिपत्तेः। तदप्रयोगेऽपि विभावादिप्रयोगे तस्य प्रतिपत्तेश्चेत्यन्वयव्यतिरेकाभ्यां विभावाद्यभिधानद्वारेणैव प्रतीयत इति निश्चीयते। तेनासौ व्यङ्ग्य एव। मुख्यार्थबाधाद्यभावान्न पुनर्लक्षणीयः।

बालचित्तानुरञ्जनी—गणनायाः प्रभूततरत्वमेवोपपादयति तथाहीति। एकस्यैव शृङ्गारस्य भेद-

प्रभेदगणनायामानन्त्यम्, किं वक्तव्यं सर्वेषाम्! तद्गणनायामानन्त्यं स्यादित्यर्थः। यद्येवमानन्त्यं स्याद्भेदानां भेदगणनमेव दुर्घटमित्यत आह सङ्कलनेनेत्यादि। सङ्कलनं सङ्ग्राहकेणाप्युपाधिना एकीकरणमित्यर्थः। तत्र हेतुमाह **व्यङ्ग्यस्येति**। त्रिरूपत्वाद्वस्त्वलङ्काररसरूपत्वादित्यर्थः। तदेव विशदयति **तथाहीति**। किञ्चित् रसादिरूपम्। अन्यथा वाच्यतां न सहते। वाच्यत्वस्य स्पर्शाक्षमत्वमित्यर्थः। तयोर्मध्ये वाच्यतासहस्य द्वैविध्यमाह **तत्रेति**। तयोः स्वरूपमाह **अविचित्रमिति**। मात्रग्रहणेन एतदाह। यथा विधिनिषेधादुभयात्मतया वस्तुध्वनिः सङ्क्षेपेण सुवचः न तथालङ्कारध्वनिः, अलङ्काराणां भूयस्त्वादिति। ननु यदालङ्कारो व्यङ्ग्यः तदा तस्यालङ्कार्यत्वात् कथमलङ्कारध्वनिरित्याह **यद्यपीति**। तथेत्यलङ्कारध्वनिः। तुशब्देन रसादेः वस्त्वलङ्काराभ्यां विशेषं दर्शयन् आह **रसादीति**। आदिशब्देन भावतदाभासतत्प्रशमा उच्यन्ते। रसादयः केवलं व्यापारेण जीवतया भवन्ति। व्यापारान्तरेणेत्याह **स हीति**। यदि स रसादिर्वाच्यः स्यात् तदा अयं रसः, अयं शृङ्गारः, अयं वीरः इत्यादिशब्दैरभिधेयेत। तदाभिधेयविभावादिप्रयोगाद्यन्वयव्यतिरेकित्वादित्यर्थः। अन्यथा व्यतिरेकानुविधायित्वमेवाह **तत्प्रयोगेऽपीति**। रसादिशृङ्गारादिशब्दप्रयोगेऽपीत्यर्थः। **प्रतीयत इति**। प्रतीतिविषय इत्यर्थः। रसभावादिशब्दसहिते "शृङ्गारी गिरिजानन" इत्यादौ केवलशृङ्गारहास्यकरुणादिशब्दमात्रभाजि विभावादिप्रतिपादनरहिते मनागपि न रसप्रतीतिः। रसशृङ्गाराद्यभिधानं विनापि केवलेभ्यो विभावादिभ्यः प्रतीतिश्चेत्यन्वयव्यतिरेकाभ्यां न कथञ्चिदभिधेयत्वं रसादीनामिति भावः। एतेन स्वसंवेदनासिद्धत्वमुक्तमिति द्रष्टव्यं तर्हि रसादिर्लक्ष्य एवास्तु नेत्याह **मुख्यार्थेति**। मुख्यार्थे विभावानुभावादौ लक्षणामूलबाधाद्यभावान्न लक्षणा काव्यात्मकशब्दनिपीडनेन रसचर्वणादर्शनात्। अत एवालक्ष्यक्रमो रसादिरित्युक्तमिति भावः।

ननु द्वितीयोल्लासे व्यङ्ग्यविचारःकृतः पुनः किमिति क्रियत इत्याशङ्क्यात्र लक्षणामूलध्वनेर्व्यङ्ग्यत्वमुपपादितमित्याह प्रतिपादितं विस्तरेणेति शेषः। तर्हि किमवशिष्टमित्याशङ्क्य **अर्थान्तरेति**। अभिधामूलस्य ध्वनेर्व्यङ्ग्यत्वं पूर्वं नोपपादितमिति तत्प्रतिपादनायाह **शब्दशक्तीति**।

सारबोधिनी—संप्रति व्यञ्जनायां वादिविप्रतिपत्तिनिरासाय प्रकरणान्तरमारभते। **सङ्कलनेनेति**। सङ्कलनं सङ्ग्रहः। सङ्क्षेप इति यावत्। केनाप्युपाधिना एकीकरणं ध्वनेर्ध्वननव्यापारोपहितस्य तेन गुणीभूतव्यङ्ग्यस्यापि सङ्ग्रहः। त्रिरूपत्वात् वस्त्वलङ्काररसादिरूपत्वात्। सहत इति वाच्यमपि कर्तुं शक्यत इत्यर्थः। तच्च वस्त्वलङ्काररूपम्। **किञ्चिदिति**। रसादिरूपम्। रसादिति लक्षणशब्दो लक्ष्यते। ज्ञाप्यतेऽनेनेति नामार्थः। आदिशब्दाद्भावादिपरिग्रहः। स्वप्नेऽपीति। सर्वथैवेत्यर्थः। अत्र हेतुमाह **स हीति**। हि यस्मात्। अभिधानं चर्वणेति केचित् तन्न तथा सति लक्षणापत्तेः। वस्तुतस्तु अभिधीयेतेत्येव पाठः। लिङर्थस्तु चर्वणारूपेष्टसाधनत्वम्। **तदिति**। तस्य रसादिपदस्य शृङ्गारादिपदस्य वा। प्रयोगेऽपीत्यर्थः। अप्रतिपत्तेरिति। अचमत्कारित्वादित्यर्थः। **विभावादिति**। तेन विभावादिघटितसामग्र्या एव तद्व्यञ्जकत्वं न रसादिपदस्य, प्रत्युत तस्य स्वशब्दवाच्यत्वे दोष इति वक्ष्यते। प्रतीयत इति चमत्कारविषयीक्रियत इत्यर्थः बेनासौ व्यङ्ग्य एवेति। चमत्कारगोचर इति शेषः। नन्वलङ्कारादेरप्यलङ्कारपदेनोपादाने उपमादिपदेन वा न चमत्कारः प्रादुर्भवतीति कथं रसादिवैलक्षण्यमिति चेन्न। तेषां पदसमन्वयबलेन क्वचित्प्रतीतानामपि चमत्कारित्वदर्शनात् नैवं रसादीनामिति तेषां विभावादिद्वारकैव प्रतीतिः। अथ विभावादिवाचकेभ्यो रसप्रतीतिनियमेन तत्र तेषां शक्त्यभावाल्लक्षणास्तु इत्याशङ्क्य निराकरोति।

काव्यप्रकाशदर्पणः—स्वप्नेऽपीति । सर्वथेत्यर्थः । तस्यावाच्यत्वे हेतुमाह स हीति । हि यस्मात् । तस्य रसादिपदस्य शृङ्गारादिपदस्य वा प्रयोगे । तदप्रयोगेऽपीति । "शून्यं वासगृहमि"त्यादौ विभावादिसामग्र्या । एवं च "शृङ्गारः सखि मूर्तिमानिव मधौ मुग्धे हरिः क्रीडती"त्यादौ विभावादिसामाग्र्या एव तद्व्यञ्जकत्वम्। न च शृङ्गारादिपदस्य प्रधानरसस्य स्वशब्दवाच्यत्वे दोष इति वक्ष्यते ।

अर्थान्तरेति । वाच्यपदस्य प्रत्येकमन्वयः । प्राक् लक्षणानिरूपणप्रस्तावे । शब्देति । "भद्रात्मन" इत्यादौ नियन्त्रणेनाशक्यान्तरस्याभिधाने निर्विवादमिति तत्रैवास्मद्व्याख्यारीत्या । अर्थेति । विशेषे संसृष्टकरेणायुज्यते न शक्यते, अनन्तदोषादित्यर्थः ।

अर्थान्तरसङ्क्रमितात्यन्ततिरस्कृतवाच्ययोर्वस्तुमात्ररूपं व्यङ्ग्यं विना लक्षणैव न भवतीति प्राक् प्रतिपादितम् । शब्दशक्तिमूले तु अभिधाया नियन्त्रणेनानभिधेयस्यार्थान्तरस्य, तेन सहोपमादेरलङ्कारस्य च निर्विवादं व्यङ्ग्यत्वम् ।

अर्थशक्तिमूलेऽपि विशेषे सङ्केतः कर्तुं न युज्यत इति सामान्यरूपाणां पदार्थानामाकाङ्क्षासंनिधियोग्यतावशात्परस्परसंसर्गो यत्रापदार्थोऽपि विशेषरूपो वाक्यार्थस्तत्राभिहितान्वयवादे का वार्ता व्यङ्ग्यस्याभिधेयतायाम् ।

बालचित्तानुरञ्जनी–शब्दशक्तीति । शब्दशक्तिमूलानुरणनरूपव्यङ्ग्ये ध्वनौ "गावो वः पावनानामि"त्यादौ नियन्त्रणेन प्रकरणनैयत्येनानभिधेयस्यावाच्यस्य सुरभिलक्षणस्यार्थान्तरस्य व्यङ्ग्यत्वम् । तेन व्यङ्ग्यरूपेणार्थान्तरेण सह प्राकरणिकस्यार्थस्योपमानोपमेयभावपरिकल्पनात् । उपमादेरलङ्कारस्य व्यङ्ग्यत्वं च सर्वसंमतमिति भावः । अर्थशक्तिमूले कथमित्याशङ्क्याह । अर्थशक्तिमूले ध्वनौ व्यङ्ग्यस्याभिधेयतायां का वार्तेति सम्बन्धः । विशेषे व्यक्तिविशेषे सङ्केतः कर्तुं न शक्यते । आनन्त्यात् व्यभिचारादिति भावः । **सामान्यरूपाणामिति** । सामान्यभूतस्यार्थमात्रविश्रान्तानामित्यर्थः । तथा चोक्तम्–सामान्ये हि पदं प्रवर्तते, विशेषे वाक्यमिति । प्रतिपत्तुर्जिज्ञासा आकाङ्क्षा । आकांक्षितस्य नैकट्यं संनिधिः । संबन्धार्हत्वं योग्यता । एतत्त्रितयवशात् संसर्गे सति विशेष्यविशेषणभावलक्षणः परस्परमनुकूले अन्वये सति अपिशब्दो भिन्नक्रमः । यत्र वाक्यार्थोऽपि अपदार्थः पदैरनभिधेयः तदभिहितानां पदार्थानां उत्तरकालान्वये परस्परानुकूललक्षणं [?] वदतां भाट्टादीनां मते व्यङ्ग्योऽभिधेयो न भवतीति किं वक्तव्यमित्यर्थः ।

सारबोधिनी—मुख्यार्थेति । न च तात्पर्यानुपपत्त्या लक्षणास्त्विति वाच्यम् अतात्पर्यविषयीभूतस्यापि ध्वननात् । न च योगोऽस्ति न च ज्ञाप्यज्ञापकभावयोगोऽस्तीति वाच्यम् । वृत्तिं विना तस्यैवासिद्धेः । नापि प्रयोजनमस्ति । न हि रसे लक्ष्ये प्रयोजनान्तरं रसपर्यन्तेनैव प्रतीतिविश्रान्तेरिति । ननु मा भवतु रसादौ लक्षणा, वस्तुनि व्यङ्ग्ये साऽस्त्विति । अत आह **अर्थान्तरसङ्क्रमितेत्यादि** । तत्र रूढ्यभावेन प्रयोजनवत्यां लक्षणायां प्रयोजनस्य व्यङ्ग्यत्वमेव न लक्ष्यत्वमनवस्थापत्तेरित्याह **प्रागिति** । प्रतिपादितमेवमप्यनवस्था स्यादित्यादिना ।

शब्दशक्तीत्यादि । अनभिधेयस्य तदानीमभिधया बोधयितुमुपमादेरलङ्कारस्य चाभिधाप्रवृत्त्यविषयस्य निर्विवादि व्यङ्ग्यत्वम् । शाब्दबोधस्य वृत्तिविषयत्वानियमात् ।

अभिहितान्वयवादे व्यङ्ग्यस्याभिधेयतां निरस्यति **अर्थेत्यादि**। विशेषे तद्व्यक्तिविशेषे पदार्थ-संसर्गो वा न युज्यते न शक्यते आनन्त्यात् व्यभिचाराच्च । वाक्यार्थस्यापूर्वत्वेन प्रागनुपस्थितेश्च। कथं तर्हि वाक्यार्थावगतिरित्याह **आकाङ्क्षेति**। अयमर्थः–पदार्थशक्तत्वेन ज्ञातं पदं स्वार्थस्मरणद्वारा आकाङ्क्षादिसांनिध्यात् समभिव्याहृतपदार्थेन सह स्वार्थान्वयं बोधयतीति कार्यकारणभावकल्पना । इयमेव संसर्गमर्यादेत्युच्यते। तथा च संसर्गमर्यादयैव वाक्यार्थबोध इति भाव इत्युक्तं प्राक्। इदं भट्टैकदेशिमते। भट्टैस्तु संसर्गांशे लक्षणाया एव स्वीकृतत्वात्। सामान्यरूपाणां जातिरूपाणां विशेषवपुर्वैशिष्ट्यात्मा। **का वार्तेति**। शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात्। व्यङ्ग्यस्य वाक्यार्थादपि दूरभावित्वाद्व्यङ्ग्यस्याभिधेयतायां कः प्रसङ्ग इत्यर्थः।

काव्यप्रकाशदर्पणः—सामान्यरूपाणामिति विशकलिताकाराणां पदार्थानां पदैरभिधया बोधितानाम्। अत्र विशेषे सुलक्षणे सामान्यरूपाणां गोत्वादिसामान्यानामेव पदैरभिधानानन्तरं तद्विभावादाक्षिप्तसुलक्षणानाम्। नैयायिकमते तु विशेषे प्रस्तुतोपयोगिनि। ततो नानन्त्यव्यभिचारः। सङ्केतस्याशक्यतया जात्यवच्छेदकतया पदैरभिहितानां परस्परं संसर्गे विशेषणरूपद्वितीयलक्षणोपनीते अपदार्थः एकैकपदलभ्यार्थः विशेषेण सहान्वितानामिति लक्षणास्वरूपः। वस्त्वलङ्काररूपस्य व्यङ्ग्यार्थस्य वाक्येऽपि पश्चाद्भागितया। शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इति। येन अभिधावृत्तिबोध्यतया दुरधिप्रकर्षात् का कथेत्यर्थः।

येऽप्याहुः–

"शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया ॥१॥
अन्यथाऽनुपपत्त्या तु बोधेच्छक्तिं द्वयात्मिकाम्।
अर्थापत्त्याऽवबोधेत संबन्धं त्रिप्रमाणकम्" ॥२॥

इति प्रतिपादितदिशा 'देवदत्त गामानय' इत्याद्युत्तमवृद्धवाक्यप्रयोगाद्देशान्तरं सास्नादिमन्तमर्थं मध्यमवृद्धे नयति सति 'अनेनास्माद्वाक्यादेवंविधोऽर्थः प्रतिपन्नः' इति तच्चेष्टयानुमाय तयोरखण्डवाक्यवाक्यार्थयोरर्थापत्त्या वाच्यवाचकभावलक्षणं सम्बन्धमवधार्य बालस्तत्र व्युत्पद्यते। परतः 'चैत्र गामानय', देवदत्त अश्वमानय, देवदत्त गां नय' इत्यादिवाक्यप्रयोगे तस्य तस्य शब्दस्य तं तमर्थमवधारयतीति अन्वयव्यतिरेकाभ्यां प्रवृत्तिनिवृत्तिकारि वाक्यमेव प्रयोगयोग्यमिति वाक्यस्थितानामेव पदानामन्वितैः पदार्थैरन्वितानामेव सङ्केतो गृह्यत इति विशिष्टा एव पदार्था वाक्यार्थः। न तु पदार्थानां वैशिष्ट्यम्।

बालचित्तानुरञ्जनी—अन्विताभिधानवादिमतेऽपि व्यङ्ग्यस्य वाच्यत्वं नोपपद्यत इत्याह **येऽप्याहुरिति**। ये अन्विताभिधानवादिनः तन्मतं प्रतिपादयितुमाह **शब्दवृद्धेत्यादि**। **शब्दाश्च वृद्धाभिधेयाश्च** तान् वृद्धयोः व्यवहरमाणयोः कियद्व्युत्पन्नः पार्श्वस्थो बालः श्रोतुर्मध्यमवृद्धस्य प्रतिपन्नत्वमर्थावगतिस्वरूपं

अर्थानयनलक्षणया चेष्टयानुमानेन पश्यति । ततो मध्यमवृद्धबुद्धचन्यथानुपपत्त्या शब्दैः प्रतिपादितां शक्तिं अर्थे च प्रतिपाद्य, तामवगच्छेत् । एवं च प्रत्यक्षानुमानार्थापत्तिलक्षणं त्रिप्रमाणकं संबन्धं बुद्धचन्ते लोकाः । अर्थापत्त्या, अर्थापत्तेः साक्षात् व्यक्तिविषयत्वात् इतरयोश्चार्थापत्तेरनुत्पादकत्वादिति भावः । प्रतिपादितदिशा प्रतिपादितप्रकारेण, तच्चेष्टया मध्यमवृद्धचेष्टया, तत्र वाक्यवाक्यार्थविषये, व्युत्पद्यते व्युत्पन्नो भवति । व्यवहर्तृ गतयोः शब्दप्रयोगार्थप्रतिपत्त्योरविभक्तोद्देशवाक्यत्ववाक्यार्थनिष्ठतया पूर्वं हेतुफलत्वमनयोर्भवतीत्यर्थः । तर्हि व्युत्पत्तिः कथमत आह परत इति । परतः तदनन्तरम् । चैत्र गामानय देवदत्त अश्वमानयेत्यत्र आनयनक्रिययोरुद्वापावापौ, अन्वयव्यतिरेकाभ्यां पदानां सङ्केतो गृह्यत इति संबन्धः । प्रवृत्तिनिवृत्तीति वृद्धव्यवहाराभ्यां शब्दार्थसंबन्धाध्यवसायः । स च व्यवहारः प्रवृत्तिनिवृत्तिरूपः । प्रवृत्तिनिवृत्ती च विशिष्टार्थनिष्ठे इति । अतो विशिष्ट एव पदार्थे पदानां संबन्धाध्यवसाय इत्यर्थः । वाक्यमेवेति । अनन्वितार्थपदं प्रयोगयोग्यमिति प्रयोज्यं वाक्यमेवेत्यर्थः । अन्वितैः इतरपदार्थान्वितैः । विशिष्टा एवेति । अन्वितानां विशिष्टानामेव पदार्थानामभिधेयत्वम् । वाक्यार्थो हि क्रियाकारकसंसर्गरूपः । कारकाणां क्रियासंसर्गोन्मुखतया क्रियाणामपि कारकविरहासहिष्णुत्वेनान्वितानामेव स्वशब्दैरभिधानं भवतीत्यर्थः । एवकारव्यावर्त्यमाह नत्विति । सामान्याकारेणाभिहितानां पदार्थानां पश्चाद्वैशिष्ट्यं वाक्यार्थत्वेन न संभवति । ननु किं पदार्थसामान्यान्विते स्वार्थे पदानां संकेतग्रहः, आहोस्वित् पदार्थानां विशेषान्विते ? नाद्यः, विशेषतो व्युत्पत्तिर्न स्यात् । नापि द्वितीयः, प्रतिवाक्यं स्वार्थस्य विशेषरूपत्वात् । अस्यैव वाचकमित्येवंरूपेण पदानां प्रत्यभिज्ञानम् तस्मात् आनन्त्यदोषश्च स्यादित्यन्विताभिधानवादपक्षः ।

सारबोधिनी--एवमभिहितान्वये व्यङ्ग्यस्याभिधेयतां निरस्यान्विताभिधानवादेऽपि तन्निरस्यति **येऽपीत्यादि** । आद्या व्युत्पत्तिर्व्यवहारात् । अत्र व्युत्पादको वृद्धः प्रयोजकश्च प्रयोज्यः । व्युत्पित्सुश्च बालो वृद्धव्यवहारदर्शनाद्व्युत्पद्यते । तदाह **शब्देति** । शब्दो गामानयेत्यादिरूपः । एतान् श्रोत्रादिना, प्रत्यक्षेण प्रत्यक्षहेतुना । अत्र व्युत्पत्तिकाले पश्यति जानाति । श्रोतुः प्रयोज्यवृद्धस्य प्रतिपन्नत्वं ज्ञातार्थत्वम् अनुमानेन चेष्टया गवानयनादिचेष्टारूपेणानुमानेन पश्यति जानाति । अनुमानस्य येयमस्य स्वतन्त्रप्रवृत्तिः सा बुद्धिपूर्विका स्वतन्त्रप्रवृत्तित्वात् मदीयैवंविधप्रवृतिवत् । सा च बुद्धिरेतद्वाक्यजन्या एतदन्वयव्यतिरेकानुविधानात् । बुद्धिप्रवृत्त्योस्तु समानविषयत्वं स्वाभाविकमेव । **द्व्यात्मिकामिति** । आश्रयभूतस्य वाक्यस्य वाचकत्वं विषयभूतस्यार्थस्य वाच्यत्वमेतद्रूपात्मा स्वरूपं यस्यास्तथाभूतां शक्तिं वाच्यवाचकभावात्मिकामित्यर्थः । अनुपपत्तिश्च शब्दादर्थज्ञानं वृत्तिं विनानुपपन्नम् अन्यथातिप्रसङ्गात् । सा च शक्तिः स्वाभाविकसंबन्धत्वादित्याकारा । **त्रिप्रमाणकमिति** । प्रत्यक्षमनुमानमर्थापत्तिश्चेति प्रमाणत्रयम् अनुपपत्तेरप्यर्थापत्तिभेदत्वात् ।

कारिकाद्वयं विवृणोति **देवदत्तेति** । देवदत्तेत्यादि सत्यन्तं शब्देत्यादेः पश्यतीत्यन्तस्य विवरणम् । वाच्यवाचकसंबन्धग्रहणमेव व्युत्पत्तिरेतन्निर्विभागस्यार्थस्य प्रतिपादकमित्यवधारयतीत्यर्थः । वाच्यवाचकभावसंबन्धमिति शक्तिमित्यस्य विवरणम् । **परत इत्यादि अवधारयतीत्यन्तश्च** त्रिप्रमाणकमित्यन्तस्य विवरणम् । **विशेषशक्त्यवधारणमाह परत इत्यादि** । तस्य गवादिशब्दस्य तं तं गवादिरूपमर्थम् । विशेषशक्त्यवधारणे हेतुमाह **इत्यन्वयव्यतिरेकाभ्यामिति**। इति गवादिपदप्रयोगाप्रयोगाभ्याम् यावन्वयव्यतिरेको गवादिषु प्रवृत्यप्रवृत्ती ताभ्यां हेतोरित्यर्थः । ननु तथापि पदार्थवैशिष्ट्यरूपो वाक्यार्थः

आकाङ्क्षादिमहिम्ना भासताम्, किं तत्र शक्त्येत्यत आह **प्रवृत्तिनिवृत्तीत्यादि** । प्रवृत्तिनिवृत्तिकारीति प्रवृत्तिनिवृत्तिकारित्वादित्ययमर्थो बोद्धव्यः । **गामानयेति** । गवानयने प्रवृत्तिकारि, गां नयेत्यत्रैव निवृत्तिकारि । **प्रयोगयोग्यमिति** शब्दप्रयोगस्य परार्थत्वात् । वाक्येनैव परस्येष्टानिष्टसाधनयोः प्रवृत्तिनिवृत्तिसंभवात् अतो वाक्यस्यैव सदा प्रयोगादन्वितेऽर्थे उपस्थितत्वात् पदानामभिधानसामर्थ्यमवधार्यते इति वर्तुलितार्थः । **इतीति** । यस्मादेवं व्युत्पत्तिग्रहणप्रकारस्तस्माद्वाक्यस्थितानां वाक्यतया परस्परान्वितबोधकतया स्थितानां पदानां अन्वितैः पदार्थैः सह सङ्केतो गृह्यत इत्यन्वयः । **पदानामिति** । विशेषयति **अन्वितानामिति** । परस्परसाकाङ्क्षाणामित्यर्थः । तेन 'दण्डेन गां नये'त्यत्र करणत्वान्विते गवि न गोपदस्य शक्तिः, प्रत्ययस्य स्वप्रकृत्यर्थं प्रत्येव साकाङ्क्षत्वात् । अन्वितैः पदार्थान्तरेण संसृष्टैः पदार्थैः । **इतीति** । यतोऽन्विते व्यवहारस्तत इत्यर्थः । विशिष्टाः पदार्थाः पदवृत्तिविषयाः न त्वन्वितपदानां पदवृत्तिविषयाणां वैशिष्ट्यमन्वयो वृत्तिं विनैवाकाङ्क्षादिगम्य इति शेषः ।

काव्यप्रकाशदर्पणः—संप्रत्यन्विताभिधानवादिभिरपि व्यञ्जनावृत्तिरङ्गीकार्येत्याह **आक्षिप्येति** [?]। आहुरित्यादिना विध्यादेश्चर्चेत्यन्तेन ग्रन्थेन । येऽप्याहुस्तेऽप्यन्विताभिधानवादिनां मत इति तूत्तरेण संबन्धः । इतिशब्देन शब्देत्यादिकारिकाद्वयपरामर्शः । दृशा दर्शनेन । दिशेति पाठे मार्गेण । कारिकार्थश्च, शब्दो गामानयेत्यादिवाक्यम् वृद्धौ प्रयोजकप्रयोज्यावभिधेयः प्रयोजकवृद्धस्य गामानयेत्यादिवाक्यश्रवणानन्तरं प्रयोज्यस्य गवानयनादिः, एतान् श्रोत्रेण प्रत्यक्षेण पश्यति गृह्णाति । अर्थात् व्युत्पित्सु अत्र व्युत्पत्तिकाले श्रोतरि प्रयोज्यवृद्धस्य प्रतिपन्नत्वं वृद्धवाक्यावगतित्वं गवानयनादिचेष्टया अनुमानेन पश्यति जानाति । अनुमितिशरीरं च, येयं प्रयोज्यवृद्धस्य प्रवृत्तिः सैतदनुगुणपूर्विका प्रवृत्तित्वात् तदादायैवंप्रवृत्तित्वात् । सा च बुद्धिरेतत्प्रयोगजन्या एव । तदन्वयव्यतिरेकार्थानुविधानादिति । द्वयम् आश्रयभूतस्य वाक्यस्य वाचकत्वं विषयभूतस्य चार्थस्य व्यङ्ग्यस्यानियमनं आत्मा स्वरूपं यस्यास्तथाभूतां शक्तिं वाच्यवाचकरूपं संबन्धम् । अन्यथानुपपत्त्या अर्थात् प्रयोज्यवृद्धे प्रवृत्ते जानाति । नन्वेवं भिन्नवाक्यभागयोगात् प्रतिवाक्यं व्युत्पत्तिरपेक्षणीया, सा चानान्त्याद्दुरुपपादेति शब्दव्यवहारोच्छेदः स्यादित्यत आह **अर्थापत्त्या चेति** । चकारेण बोधेच्छवितं द्वयात्मिकामित्यस्य परामर्शः । अवगम्यत इति नु अर्थत एव । अयमर्थः । गृहीतसङ्केतात् वाक्यभागरूपस्य पदस्याकारो यस्मिन्नर्थे सङ्केतस्तस्मिन्नर्थे तस्यैव पदस्य शक्तिरर्थापत्त्यावधार्यत इति । नानावाक्येषु पूर्वापरपदयोगेऽपि न व्यामोहः । एवं चोक्तप्रकारेण प्रत्यक्षादित्रिप्रमाणकं वाच्यवाचकसंबन्धं व्युत्पित्सुरेव जानाति । शब्देत्यादि । पश्यतीत्यन्तस्य कारिकाभागस्य देवदत्तेत्यादिना सतीत्यन्तेन विवरणम् । श्रोतुरित्यादेश्चेष्टेत्यन्तस्य अनेनेत्यादिना अनुमायेत्यन्तेन ग्रन्थेन, अन्यथानुपपत्त्यादेर्द्वयात्मिकामित्यन्तस्य तयोरित्यादिना, अन्यथानुपपत्त्येति कारिकापदार्थस्यार्थः । अर्थापत्त्येति अर्थापत्त्या चेत्यस्य परत इत्यादिना अन्वयव्यतिरेकाभ्यामित्यन्तेन, अयमर्थः—यस्य पदस्यान्वये यस्यानुभागस्यान्वयः यस्य व्यतिरेके व्यतिरेकस्तस्य तस्य शब्दस्य शब्दस्य तं तमर्थं जानातीति व्यवहारेषु वृद्धानां वाक्यश्रवणादिषु आवापोद्वापभेदेन पदानां शक्तिनिश्चय इति । **प्रकृते योजयति इतीति** । इत्युक्तप्रकारेण प्रवृत्तिनिवृत्तिकारीति हेतुगर्भं विशेषणं, तेन प्रवृत्तिनिमित्तकारित्वादित्यर्थः । गामानयेति वाक्ये गवामानयनप्रवृत्तिकारिणम् आनयेत्यर्थः [?]। मा आनयेति वाक्ये तत्रैव निवृत्तिकारि इति । शब्दस्यान्वयव्यतिरेकाभ्यामित्यतः पूर्वपाठे इतिशब्दः प्रकारार्थः । अन्वयव्यतिरेकाभ्यामिति पदस्योत्तरवाक्ये योजना । वाक्यमेवेत्येवकारेण एकस्य विशकलितानर्थवाक्यानां व्यवच्छेदः [?]। इति हेतोः यस्मात् प्रयोजकादेव संबन्धनिश्चय

इति भावः । **इतीति** । यस्मादेवं व्युत्पत्तिग्रहणप्रकारः तस्मात् वाक्यस्थितानां वाक्यतयैकार्थप्रतिपत्त्यर्थं गुणतया स्थितानामेव पदानामन्वितैः पदार्थान्तरसंसृष्टैः पदार्थैः सहान्वितानां समभिव्याहृतानामेव **सङ्केतो गृह्यते । स च सम्यक्** केतनं ज्ञापनम् ।

उपसंहरति **इतीति** । इति हेतोः विशिष्टा गुणप्रधानभावेन परस्परान्विता एव पदार्थाः वाक्यार्थः, न तु विशकलिततया प्रथमं पदैरभिहितानां पदार्थानां वैशिष्ट्यम्, पश्चात् वृत्त्यन्तरयोः संसर्गमात्रम् न तु गामानयेत्यादौ यानि गवादिपदानि तान्येव गां बधान अश्वमानयेत्यादावपीति ब्रूयात् । विशेषेषु चानन्त्यव्यभिचारापातात् । क्रियासामान्यात् कारकपदानां कारकसामान्येऽन्यान्वितानामेव क्रियाणां क्रियापदानामन्वयव्यतिरेकमूलकस्य संबन्धग्रहणात् संबन्धानुसारेणैवाभिधानात् ।

यद्यपि वाक्यान्तरप्रयुज्यमानान्यपि प्रत्यभिज्ञाप्रत्ययेन तान्येवैतानि पदानि निश्चीयन्त इति पदार्थान्तरमात्रेणान्वितः पदार्थः सङ्केतगोचरः, तथापि सामान्यावच्छादितो विशेषरूप एवासौ प्रतिपद्यते व्यतिषक्तानां पदार्थानां तथाभूतत्वादित्यन्विताभिधानवादिनः ।

तेषामपि मते सामान्यविशेषरूपः पदार्थः सङ्केतविषय इत्यतिविशेषभूतो वाक्यार्थान्तर्गतोऽसङ्केतितत्वादवाच्य एव यत्र पदार्थः प्रतिपद्यते तत्र दूरे अर्थान्तरभूतस्य 'निःशेषे'-त्यादौ विध्यादेश्चर्चा ।

अनन्वितोऽर्थोऽभिहितान्वये पदार्थान्तरमात्रेणान्वितस्त्वन्विताभिधाने, अन्वितविशेषस्त्ववाच्य एव इत्युभयनयेऽप्यपदार्थ एव वाक्यार्थः ।

बालचित्तानुरञ्जनी—यद्यपीति । सङ्केतगोचरो यद्यपीति संबन्धः । यद्यपि वाक्यान्तरे दृष्टप्रयोगाणि तान्येवैतानीत्यर्थः । **व्यतिषक्तानामिति** । वाक्यस्यैव प्रयोगार्हत्वात् पदार्थान्तरैरन्वितानामित्यर्थः । **तथाभूतत्वादिति** । सामान्यावच्छादिते विशेषरूपत्वादित्यर्थः । प्रथमपक्ष एव स्वीकृतत्वात् विशेषे व्युत्पत्त्यभावः । 'निर्विशेषं न सामान्यमि'ति न्यायेन विशेषे पर्यवसानादिति भावः ।

एवमन्विताभिधानं प्रदर्श्य व्यङ्ग्यस्यावाच्यतामाह **तेषामिति** । सामान्यतः कृताशेषविशेषाणि भवन्तीति तत्प्रतीतिर्नान्तरीयकतयैवेति विशेषसिद्धिः । 'निर्विशेषं न सामान्यं भवेच्छशविषाणवत् ।' ततः सामान्यावगतो विशेष एव सङ्केतविशेषः । ततश्च सामान्यरूप एव पदार्थोऽसङ्केतितत्वात् अनभिधेय इत्यर्थः । **अतिविशेषभूत इति** । विशेषमतिक्रान्तः अतिविशेषः संभूतः प्राप्तः अतिविशेषभूतः सामान्यपदार्थ इत्यर्थः । यत्र तु सामान्यरूपोऽपि पदार्थः प्रतिपद्यते प्रतीतिविषयः न वाच्यः, तत्रैव कथं व्यङ्ग्यस्य च विध्यादेरर्थान्तरस्यावाच्यतामाह **अन्वितविशेष इति** । अन्विताः विशेषाः यत्र स संसर्ग इत्यर्थः । यतोवाच्यस्ततः पक्षद्वयेऽप्यपदार्थ एव वाक्यार्थः ।

सारबोधिनी—ननु तत्रापि संसर्गविशेषो वाच्य एव, इतरपदार्थान्वित एव शक्तिग्रहात् । **अन्यथा** गामानयेत्यनन्तरं गामपसारयेत्युक्तौ तदेवेदं पदमिति प्रत्यभिज्ञा न स्यात् । गवानयनतदपसारणरूपार्थभेदेन

शब्दभेदादित्यपेक्षायामाह **यद्यपीति** । **तथापीति** । सामान्यावच्छादितः क्रियापदार्थान्वितकारकत्वादि-सामान्यधर्मैरपरिगृहीतः। विशेषरूप आनयनत्वाद्यन्वितघटादिरूपः असौ सङ्केतः । व्यतिषक्तानां संसृष्टानाम्। तथाभूतत्वात्, सामान्यरूपेण विशेषस्यैव बोधविषयत्वात्, यथा घटस्य रूपमित्यत्र षष्ट्या संबन्धत्वेन समवायस्य । विशेषसामान्यरूप[6] इति सामान्येन विशेषरूपः शक्यः, न तु विशेषरूपत्वेनेत्यर्थः । अतिविशेषः प्रकृतोपयोगी योग्यः वाक्यान्तर्गतः वाक्यप्रयोगोद्देश्यः । "वाक्यार्थान्तर्गत" इति पाठे वाक्यार्थे भासमाने योग्यताबलाद्भासमान इत्यर्थः । **असङ्केतितत्वादिति** । सामान्यलक्षणप्रत्यासत्त्यभावेन सङ्केतग्रहकाला-प्रत्यासन्नतया सङ्केतो[7]विषयत्वात्। अवाच्योऽनभिधेयः पदार्थः अन्वयव्यतिरेकाभ्यां पदैकगम्यः। **दूर इति** । अनभिधेयार्थप्रतीत्यनन्तरं वक्तृबोद्धव्यवैशिष्ट्येन प्रतीयमानस्य व्यङ्ग्यस्यातिविप्रकृष्टकत्वात् अर्थान्तरभूतस्य तदन्तिकगमननिषेधे विरोधिनस्तदन्तिकगमनस्य विध्यादेश्चर्चा प्रसङ्गः । वादिद्वयमतं युगपदुपसंहरति **अनन्वित इत्यादि** । अन्वितविशेषः प्रकृतोपयोगी अपदार्थः पदवृत्त्यविषयः वाक्यार्थः संसर्गः ।

काव्यप्रकाशदर्पणः—पदानां सामान्याभिधायितैव युक्ता। ततश्च विशेषान्वयरूपस्य वाक्यार्थस्य प्रतीतिरनुपपन्नेत्याह **यद्यपीति** । प्रत्यभिज्ञारूपः प्रत्ययो ज्ञानं स च प्राचीनेदानीन्तनदशाविशिष्ट-धर्मिबोधान्निश्चीयते। अवधितया विषयीक्रियत इति हेतोः एकदेशमात्रेण प्रतिबन्धविरहात् सामान्य-मात्रविषयताविश्रान्तेत्यर्थः । सामान्यावच्छादितोऽभिहितः सामान्यं विनाऽलभ्यः विशेषरूपः । कृताविति योग्यः असौ कान्विति क्रियाभेदः [?] प्रतिपाद्यते पदैः कुत इत्याह व्यतिषक्तानां गुणप्रधानभावेनान्वितानां पदार्थानां तथाभूतत्वात् प्रकृतविशेषार्थप्रतीतिकृत् । गुणप्रधानभावेनान्वयश्चाकाङ्क्षादिसामग्रीवशादिति भावः । पदानामिति पाठे तु व्यतिषक्तानां समभिव्याहृतरूपाणां पदानां तथाभूतत्वात् येन तथाविधार्थ-प्रतिपत्तिक्षमत्वादित्यर्थः । समभिव्याहारमाह **तेषामपीति** । इति पूर्वोक्तप्रकारेणेत्याहुरित्यन्विताभि-धानवादिन इत्यर्थः । सामान्यविशेषरूपप्रवृत्तिविषयस्य सङ्केतकानां समन्वितत्वात् सामान्यरूपः पदार्था-न्विततया च विशेषरूपः पदार्थः एकैकपदबोध्यः अतिविशेषभूतः प्रकृतोपयोगिशरीरः । तदेतदाह वाक्या-न्तिरतः संसूच्यमानक्रियाकारकविशेषार्थकतया [?] असौ समुदितशरीरो वाक्यार्थ उच्यत इत्यर्थः । अवाच्य एव प्रतिपद्यते व्यवह्रियते बोध्यते वा पदैः, अर्थान्तरभूतस्य संसृष्टो प्रतिपाद्यार्थातिरिक्तस्य विध्यादे-विध्यादिर्व्यङ्ग्यस्य वाच्यान्तरस्य वृद्धप्रयोगादेव । स च वाक्यरूप एव । वाक्यं चान्वयबोधनियतम्। ततश्चोपदेशकाले उचित एव संबन्धग्रहणात् तत इत्यर्थः । वाचकमते तु पूर्वोक्तरीत्या निःशेषेत्यादौ विधेर्लक्षणत्वात् । अयमर्थः शब्दतदर्थवाच्यवाच्यवाचकव्युत्पन्नानामेव वाक्यार्थप्रतीतिव्युत्पत्तिम् तदनुसारेणैव नियोगकालेऽप्यन्विततयैव प्रथमतः प्रतीतिः । ततश्च वाच्य एव वाक्यार्थः । किं तावत् तात्पर्याख्य-वृत्त्यन्तरकल्पनयेति वदतो वक्तव्या[?]आनन्त्यव्यभिचाराभ्यां विशेषेषु सङ्केतग्रहणस्याशक्यतया कारक-सामान्यान्विते क्रियासामान्ये, क्रियासामान्यान्विते कारकसामान्ये स्वयमाश्रयणीयः । ततश्चाभिधायाः सामान्यान्विते प्रतीतेऽपि तन्मात्रस्याकिञ्चित्करतया प्रकृतविनियोगयोग्यस्य कारकविशेषान्वितस्य क्रिया-विशेषस्य बोधने भवन्मते तात्पर्याख्यद्वितीलक्षणावृत्त्योरङ्गीकारात् व्यञ्जनैव वृत्तिरुपासितुमुचिता । तत्पश्चाद्भाविनोर्व्यङ्ग्यवस्त्वलङ्कारयोः पुनरभिधाने का कथा ! एवं युक्त मतद्वये वृत्त्यङ्गीकारास्या-वश्यकत्वमुपसंहरति **अनन्वित इति** ।

यदप्युच्यते नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते इति । तत्र निमित्तत्वं कारकत्वं

ज्ञापकत्वं वा। प्रकाशकत्वान्न कारकत्वम्। ज्ञापकत्वं तु अज्ञातस्य कथम्? ज्ञातत्वं च सङ्केतेनैव, स चान्वितमात्रे, एवं च निमित्तस्य नियतनिमित्तत्वं यावन्न निश्चितं तावन्नैमित्तिकस्य प्रतीतिरेव कथमिति नैमित्तिकानुसारेण निमित्तानि कल्प्यन्त इत्यविचारिताभिधानम्।

बालचित्तानुरञ्जनी—अन्विताभिधानवादित्वादेकदेशिमतं दूषयितुमाह यदप्युच्यत इति। नैमित्तिकार्थानुसारेण वाक्यार्थतात्पर्यार्थानुसारेण निमित्तानि पदार्थाः कल्प्यन्ते। ततो नैमित्तिक एवायं न व्यङ्ग्य इति वदन् वादी प्रष्टव्यः। किं नियतत्वं कारकत्वं ज्ञापकत्वं वेति विकल्प्याद्यं दूषयति शब्दस्येति। द्वितीयेऽपि ज्ञापकत्वमज्ञातस्य वा। नाद्य इत्याह **ज्ञापकत्वन्त्विति**। द्वितीयेऽपि अन्यस्मात् ज्ञानं सङ्केताद्वा, नाद्यः, असंभवादित्यभिप्रेत्य द्वितीयं दूषयति **ज्ञातत्वञ्चेति**। स च सङ्केतः अन्वितमात्रे सामान्यावच्छादितविशेषरूपे। अस्तु को दोष इत्याशङ्क्य निमित्तप्रतीतौ नैमित्तिकप्रतीतिः नैमित्तिकप्रतीतौ निमित्तप्रतीतिरित्यन्योन्याश्रय इत्याह **एवञ्चेति**। फलितमाह इति **नैमित्तिकेति**।

सारबोधिनी-ननु व्यङ्ग्यप्रतीतिर्नैमित्तिकी, निमित्तान्तरानुपलब्धेः शब्द एव निमित्तम्," तच्च बोध्यबोधकत्वरूपम्। निमित्तत्वं वृत्तिं विना न संभवतीति अभिधैव वृत्तिरित्याह **यदपीति**। **अज्ञातस्येति**। प्रत्यक्षेतरप्रमाणस्य 'ज्ञानकारणत्वनियमात्, स चान्वितमात्रे नान्वितविशेषे न वा विध्यादौ।

नन्वस्तु विशेष एव सङ्केत इत्यपेक्षायामाह **एवञ्चेति**। निमित्तस्य शब्दस्य चेत्यर्थः। नियतनिमित्तत्वं विशेषसङ्केतत्वम्। तेषाञ्च विशेषसङ्केतज्ञाने तदुपस्थितिस्तदुपस्थितौ च सङ्केतज्ञानमित्यन्योन्याश्रयः स्यादिति भावः।

काव्यप्रकाशदर्पणः—अन्वितविशेषविशेषः व्यङ्ग्यरूपः अपदार्थोऽन्वितैरनन्वितैर्वा पदैर्बोध्योऽनभिधेयश्च, स न वाक्यार्थः। दिवादिभोजनरहितेऽपि रात्रिभोजनापेक्षेऽपि पीनशब्दनिमित्तका यस्य यस्यार्थप्रतीतिः तस्यापेक्षशब्दस्य निमित्तता कल्प्यते किं व्यापारान्तरकल्पनयेति वदन्तं गुरुदर्शनैकदेशिनां मतमनूद्य दूषयति **तदपीति**। शब्दो हि नाज्ञानादिव घटं करोति किन्तु दीपवत् प्रकाशयति ज्ञापयति वेति प्रत्यक्षेतरप्रमाणानां हि ज्ञाते कारणत्वम्। शब्दान्तरस्य करणत्वे गामानयेत्यादिवाक्येषु ज्ञानाविशेषे प्रयोगाःस्यात्। स च सङ्केतः पूर्वोक्तदिशाऽन्वितमात्रे, न तु व्यङ्ग्येऽर्थे।

उपसंहरति **एवञ्चेति**। नैमित्तिकस्यानियतनिमित्तत्वमित्यस्यार्थः नियामकरूपसंबन्धशालित्वम्, नैमित्तकस्य व्यङ्ग्यार्थस्य संबन्धग्रहणात्। पुरस्कारेऽपि च वाक्यार्थप्रतीतिर्धर्मिग्राहकप्रमाणगम्या। यदि तु पूर्वसङ्केतग्रहेण संस्कृतस्य प्रतिभानवतः तया प्रतिपत्तिर्भवतीत्यनेन क्रमेण निमित्तनैमित्तिकभावोऽभिधीयते। तदेतदङ्गीक्रियत एव। व्यङ्ग्यव्यञ्जकभावं प्रत्युपात्तयोः शब्दार्थयोः प्रथममुपपादनीयत्वात्। तदुक्तं ध्वनिकृता—

आलोकार्थी यथा दीपशिखायां यत्नवान् जनः।
तदुपायतया तद्वदर्थे वाच्ये तदादृतः॥
यथा पदार्थद्वारेण वाक्यार्थः संप्रतीयते।
वाच्यार्थपूर्विका तद्वत् प्रतिपत्तस्य वस्तुनः॥ [इति ध्व० लो० १।९,१०]

ननु तर्हि भट्टनयवत् पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादौ रात्रौ भुंक्त इत्यादिवाक्यशेषवदत्रापि व्यङ्ग्यार्थप्रतीतौ वाक्यविशेषः कल्प्यतामिति चेन्न। धर्मिकल्पनातो वरं धर्मकल्पनमिति न्यायात्। व्यापारान्तरकल्पनस्यैव न्यायात्।

ये त्वभिदधति 'सोऽयमिषोरिव दीर्घदीर्घतरो व्यापारः' इति 'यत्परः शब्दः स शब्दार्थ' इति विधिरेवात्र वाच्य इति। तेऽप्यतात्पर्यज्ञास्तात्पर्यवाचोयुक्तेर्देवानां प्रियाः। तथा हि—'भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यत' इति कारकपदार्थाः क्रियापदार्थेनान्वीयमानाः प्रधानक्रियानिर्वर्तकस्वक्रियाभिसंबन्धात् साध्यायमानतां प्राप्नुवन्ति। ततश्चादग्धदहनन्यायेन यावदप्राप्तं तावद्विधीयते।

बालचित्तानुरञ्जनी—एकदेश्यन्तरमतं दूषयितुमाह **ये त्वभिदधतीत्यादि**। यथा इषुः उरश्छदं, उरश्च भित्त्वा जीवितं गृह्णाति न कश्चित् प्रवृत्तिभेदस्तथा शब्दस्याभिधाव्यापार एक एव स्वार्थमर्थान्तरं वा गमयतीति न व्यापारभेद इत्यर्थः। **यत्पर इति**। अभिधा हि यत्पर्यन्ता तत्रैवाभिधायकत्वमुचितम्। तत्पर्यन्तता सा च प्रधानभूतव्यङ्ग्ये स्यादिति ध्वनेर्यन्निरूपितं तत्राप्यभिधाव्यापारेण भवितुं युक्तम्। ततो व्यङ्ग्यस्य विधेः प्राधान्येन वाच्यत्वमेव न्याय्यमिति तेषामभिप्रायः। तात्पर्यवाचोयुक्तेर्यत्परः शब्दः स शब्दार्थ इति वचनस्यातात्पर्यज्ञाः अभिप्रायं न बुध्यन्त इत्यर्थः। देवानां प्रियाः पशव इत्यर्थः। यद्वा, देवानामिन्द्रियाणां प्रियाः सुखिनः अज्ञा इति यावत्। एतदेव व्याचष्टे **तथाहीति**। भूतं प्रमाणान्तरेण सिद्धम्। भव्यं, भवतीति व्युत्पत्त्या साध्यम्। **कारकपदार्था इति**। यथा देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीत्यादावोदनपाकश्चेदन्यतः सिद्धः तदा स्थाल्यामधिकरणत्वमात्रं विधेयम्। तस्यैव साध्यत्वात्। **स्वक्रियेति**। लोहितोष्णीषत्वाभिधानादिकाः क्रियाः। ननु कारकस्य साधनाभावात्तत्र वाक्यस्य तात्पर्यं न स्यादित्याशङ्क्याह **साध्यायमानतामिति**। साध्यस्वरूपतामित्यर्थः। फलितमाह **ततश्चेति**।

सारबोधिनी—मतान्तरमवतारयति **सोऽयमिषोरिवेति**। यथा बलवता प्रेरित इषुरेकेनैव वेगाख्येन व्यापारेण वर्मभेदमुरोभेदं प्राणहरणं च रिपोः करोति तथा शब्दः एकेनैव शक्तिव्यापारेण पदार्थस्मृतिं, वाक्यार्थबुद्धिं, व्यङ्ग्यप्रतीतिं च विधत्ते। ततो व्यङ्ग्यस्य वाच्यत्वमेवेत्यर्थः। **विधिरेवेति**। निःशेषेत्यादौ गतासीति विधिर्वाच्य एवेत्यर्थः। दूषयति **त इति**। तात्पर्यवाचोयुक्तेस्तात्पर्यशब्दप्रयोगस्यातात्पर्यज्ञाः, किमुद्दिश्य यत्परः शब्दः शब्दार्थ इति प्रयुज्यते इत्यस्यानभिज्ञाः देवानां प्रियाः पशवः। **वाचोयुक्तेरिति**। देवानां प्रिया इति चालुक् समासः। तात्पर्यविषये शब्दः प्रमाणमित्यस्य उपात्तशब्दैः प्रतिपाद्येष्वर्थेषु यदंशे विधेयत्वं तत्रैव तात्पर्यमित्यत्रैव यत्परः शब्दः स शब्दार्थ इत्यस्य तात्पर्यमिति सिद्धान्तयति **तथा हीति**। भूतं सिद्धं, भव्यं साध्यम्। समुच्चारणे समभिव्याहारे। यद्यपि कारकपदार्थाः सिद्धस्वभावास्तथापि कुर्वदेव कारकं नाकुर्वदन्यथा प्रधानक्रियां प्रति नानुकूलं स्यात् अतः क्वचित्तत्रापि तात्पर्यमित्याह **कारकपदार्था इति**। **प्रधानेति**। घटमानयेत्यत्रानयनं समीपदेशसंयोगध्वंसहेतुविभागजनकस्पन्दः। घटस्य स्वरूपतः सिद्धावपि स्पन्दाश्रयत्वेन साध्यत्वम्। विशेष्ये बाधे स्पन्दस्यैव तथात्वमिति **न्यायः** प्रयोगः। तत इति उक्तन्यायादित्यर्थः। **अदग्धेति**। अदग्धमेव दहनेन दह्यते यथेत्यर्थः। **अप्राप्तमेवेति**

प्राप्तस्याप्राप्तप्रापणरूपविधानासंभवादित्यर्थः । प्रणवसञ्चारः[१०] प्रमाणान्तरादतिदेशात् । अन्यतः प्रधान-विषयकवाक्यात् वहनस्य सिद्धिः[११] ।

काव्यप्रकाशदर्पणः–सम्प्रति तदेकदेशान्तराणां परस्परोपकारकशक्तिद्वयमुपन्यस्य दूषयति **ये त्विति ।** यथा खलु धनुष्मता प्रयुक्तो बाणः एकेनैव घातेन शत्रोः कवचयुग्मादिकमनेकं निर्भिनत्ति तथैव शब्दस्याभिधाव्यापारो तद्वदवश्यं बोधयति । यत्परः यदुद्देशेन प्रयुक्तः शब्दः स शब्दार्थः शब्देनावश्यं बोध्यः इति हेतोरत्र निःशेषेत्यादौ विधिर्वाच्य एव, इत्येवकारस्य व्यग्रप्रयोजना [?] इति । ये तु, ये पुनरभिदधति तेऽतात्पर्यज्ञास्तात्पर्यवाचोयुक्तेस्तात्पर्यप्रयोगस्य देवानां प्रियाः पशवः । तात्पर्यप्रयोगं न जानन्तीत्यर्थः । कुत इत्याह तथा हीति । भूतानि सिद्धरूपाणि कारकाणि, भव्यं साध्यं क्रियारूपम् एषां समुच्चारणे तद्वाचक-पदानां समभिव्याहारे भव्याय साध्यरूपतया कारकपदार्था लोहितोष्णीषा इत्यादयः । स्वक्रियाः स्वस्यैवान्तर्लीना या क्रिया तदभिसंबन्धात् । यद्यपि कारकस्वरूपं पूर्वसिद्धमेव तथापि क्रियावत एव कारकत्वात्, क्रियायाश्च साध्यरूपत्वात्, कारकाण्यपि साध्यरूपाणीति भावः । अदग्धस्य भागस्य पुनर्दाहो यथा तथा सर्वपदार्थानां विध्यर्हत्वेऽपि योऽर्थः प्रमाणान्तरेण प्राप्तः स एव विधीयते प्राधान्येनोपदिश्यते । प्राप्ते तूपदेशवैयर्थ्यात् । तथाहि । दग्ध एव प्राधान्यम् । अत्रैव तात्पर्यशक्तिविश्रान्तिरिति न पुनः प्रतीतिमात्रे ।

यथा ऋत्विक्प्रचरणे प्रमाणान्तरात् सिद्धे "लोहितोष्णीषा ऋत्विजः प्रचरन्ति" इत्यत्र लोहितोष्णीषत्वमात्रं विधेयं हवनस्यान्यतः सिद्धेः "दध्ना जुहोती"त्यादौ दध्यादेः करणत्वमात्रं विधेयम् ।

क्वचिदुभयविधिः क्वचित्त्रिविधिरपि यथा "रक्तं पटं वय" इत्यादौ एकविधिर्द्वि-विधिस्त्रिविधिर्वा । ततश्च यदेव विधेयम् तत्रैव तात्पर्यम् इत्युपात्तस्यैव शब्दस्यार्थे तात्पर्यं न तु प्रतीतिमात्रे । एवं हि "पूर्वो धावति" इत्यादावपराद्यर्थेऽपि क्वचित्तात्पर्यं स्यात् ।

बालचित्तानुरञ्जनी—उदाहरणमाह **यथेति** । अन्यत् सर्वं प्रमाणान्तरसिद्धमिति लोहितोष्णी-षत्वमात्रमेव सर्वैः कारकैः साध्यत इत्यर्थः । उदाहरणान्तरमाह **हवनस्येति** । **अन्यत् इति** । अग्निहोत्रं जुहोतीत्यनेन । अनयोरुदाहरणयोरेकमेव वस्तु विधेयं न तु द्वयमिति मात्रशब्दार्थः । मात्रशब्दव्यावर्त्यमाह **क्वचिदिति । यथेति** । रक्तत्वं वा न वेदं नान्यत् सिद्धं तदा पटमात्रं विधेयम् । क्वचित्तु साक्षाच्छब्देनैवं त्रयं विधेयम् । फलितमाह **ततश्चेति** । उपात्तस्य उक्तस्यैव शब्दस्य संबन्धिन्यर्थेऽभिधेये तात्पर्यं न तु निमित्तान्तरेण प्रतीतिमात्रेण व्यङ्ग्ये तात्पर्यावकाशः । ज्ञानमात्रे तात्पर्यप्रसङ्गे अङ्गीक्रियमाणे बाधकमाह **एवं हीति** । पूर्वशब्दस्य सापेक्षत्वादपराद्यर्थोऽपि प्रतीयेत इति तत्रापि तात्पर्यं स्यादित्यर्थः ।

सारबोधिनी—उभयविधिः । ब्राह्मणं स्नातं भोजयित्वा तमानयेत्यत्र स्नानप्राप्तौ भोजनानयनयो-र्विधानम् । अत्रैव स्नपयित्वेत्युक्तौ त्रिविधिः । लोकेऽप्युदाहरति **यथेति** । रक्तत्वपटवयनानां मध्ये एकस्य द्वयोस्त्रयाणां वा असिद्धौ एकविधिर्द्विविधिस्त्रिविधिरित्यर्थः । प्रकृतमनुसरति **ततश्चेति** । अर्थे वृत्तिविषये तस्यैव विधेयत्वादित्यर्थः । तात्पर्यं प्रामाण्यनियामकमिति शेषः । अतिप्रसङ्गवारणायाह **न त्विति** । इष्टा-पत्तिं परिहरति **एवं हीति** । अपराद्यर्थे पूर्वादिप्रतियोगित्वेनार्थापत्त्या गम्येऽन्यलभ्यत्वेनापदार्थे तात्पर्यवृत्ति-साधकं स्यादित्यर्थः ।

[मात्रशब्दव्यावर्त्यमाह **क्वचिदिति**। उदाहरति **यथेति**। रक्तत्वं वा न वेदं नान्यतः सिद्धं तदा पटमात्रं विधेयम्। पटो वा न वेत्युभयमन्यतः सिद्धं तदा पटमात्रं विधेयम्। क्वचित्तु साक्षाच्छब्देनैव त्रयं विधेयम्।]

काव्यप्रकाशदर्पणः—अनुपात्त एव पदे वाक्यार्थप्रत्ययान्तरबोध्येऽर्थे एव हानिप्रसङ्गः इत्याह **एवमिति**। अपराद्यर्थे पूर्वाद्यर्थेनावधिभावेनाक्षिप्ते भवतापि तात्पर्यविशेषतयाऽनङ्गीकृत इति भावः। अयमाशयः-वाच्यार्थव्यङ्ग्यार्थप्रतीत्योर्हेतुफलभावाङ्गीकारात् नैयायिकाभिधया तात्पर्येण वा वृत्त्या युगपत् प्रतीतिः। क्रमप्रतीत्यङ्गीकारे तु लक्षणाङ्गीकारस्याप्यनुचितत्वात् अङ्गीकृततात्पर्याणां च विरम्य व्यापार-स्वीकरणात् न केवलमपराद्यनु साधारणयोर्वस्त्वलङ्कारयोस्तात्पर्यं न प्रसज्यति[?], किन्तु वाचकत्वात् प्रधानभूतयोरपीति भावः।

यत्तु "विषं भक्षय मा चास्य गृहे भुङ्क्थाः" इत्यत्र 'एतद्गृहे न भोक्तव्यम्' इत्यत्र तात्पर्यमिति स एव वाक्यार्थ इति, **उच्यते** तत्र चकार एकवाक्यतासूचनार्थः। न चाख्यात-वाक्ययोर्द्वयोरङ्गाङ्गिभाव इति। विषभक्षणवाक्यस्य सुहृद्वाक्यत्वेनाङ्गता कल्पनीयेति विषभक्षणादपि दुष्टमेतद्गृहे भोजनमिति सर्वथा मास्य गृहे भुङ्क्थाः, इति उपात्तशब्दस्यार्थे एव तात्पर्यम्।

बालचित्तानुरञ्जनी—विषं भक्षयेत्यत्र व्यभिचारादित्याशङ्क्याह **यत्त्विति**। विषं भक्षयेत्येत-द्वाक्यस्य पुत्रं प्रति मात्रोक्तस्य मा चास्य गृहे भुङ्क्था इति तात्पर्यादनुपात्तेऽपि तात्पर्यमिति पूर्वपक्षिणोऽ-भिप्रायः। उच्यत इति यत् तत्रेति संबन्धः चकारादेकवाक्यतावगमात्। आख्यातयोरङ्गाङ्गिभावाभावे-नैकवाक्यतायामसम्भवात् विषभक्षणवाक्यस्यास्य गृहे न भोक्तव्यमिति कृदन्तवाक्यत्वकल्पनेनाङ्गाङ्गि-भावो विषभक्षणादपि दुष्टमेतद्गृहभोजनमिति सर्वथा मास्य गृहे भुङ्क्था इति उपात्तशब्द एव तात्पर्यमिति सिद्धान्ताभिप्रायः।

सारबोधिनी—ननु'पात्तस्यैव शब्दस्यार्थे तात्पर्यं न तु प्रतीतिमात्रे' इति यदुक्तं तदसङ्गतम्। **यत्त्विति**। विषं भक्षयेत्येतद्वाक्यस्य नास्य गृहे भोक्तव्यमित्यत्र तात्पर्यादुपात्तशब्दादन्यत्र तात्पर्यं प्रसक्त-मिति पूर्वपक्षिणोऽभिप्रायः। परिहरति **तत्र चेति**। विषं भुंक्ष्वेत्येतावन्मात्रस्याकस्मादुच्चरितस्य साकाङ्क्ष-त्वात् समनन्तरोच्चारितेन मा चेत्यादिना एकवाक्यता। सा च चकारेण सूच्यत इत्यर्थः। **न चेत्यादि**। अत्र द्वयोराख्यातवाक्ययोरसंबन्धः समत्वात् स्यात्। अत उभयोः संबन्धार्थमेकस्य गुणीभावः कल्पनीयः। तत्र विषं भुंक्ष्वेत्येतस्य सुहृद्वाक्यत्वेन तथाविधन्नियोगानुपपत्त्या गुणभावो युज्यते। गुणानां च परार्थत्वात्, परार्थैकानुबन्धितया स्वार्थयोगो युक्त इति एतद्गृहभोजनस्यात्यन्तगर्हितत्वपरत्वमस्य वाक्यस्यावगम्यते, तथाहि विषं भुंक्ष्वेत्येतस्य विषभक्षणप्रतियोगित्वे लक्षणबलवदनिष्टान्नुबन्धित्याह[?]। विषभक्षणादपीत्याह **दुष्टमिति**। बलवदनिष्टानुबन्धीत्यर्थः। अत्र विषभक्षणादपीति स्वार्थः। दुष्टमित्यादिस्तु परार्थः। ततस्तदन्विततया स्वार्थबोधे उपात्तशब्दस्यार्थ एव तात्पर्यमिति दीर्घदीर्घाभिधानं दूषयति।

काव्यप्रकाशदर्पणः--ननु यद्युपात्तस्य वाचकस्यैवार्थे तात्पर्यं प्रसज्यति [तदा] विषं भक्षयेत्यादिवाक्ये का गतिरित्याह यस्त्विति । स एव वाक्यार्थो वाक्योद्देश्य इति तत्र तात्पर्यात् उच्यत इति संबन्धः । चकार इति अर्थैकत्वात् एकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादिति [पू० मी० २।१।४७] जैमिनिवचनात् । विषं भुंक्ष्वेत्यादिवाक्ये तावन्मात्रस्याकस्मादुच्चरितस्य साकाङ्क्षत्वात् । समनन्तरोच्चारितेन मा चेत्यादिना एकवाक्यता । सा चकारेण सूच्यत इति भावः । न चेति । कृद्वाच्यत्वेनानुवाद्यत्वम्, आकस्मिकतया विधिवाक्यस्याङ्गता । अर्थवादान्ते इत्यर्थः । तत्र किमित्याह विषभक्षणादपीति । दुष्टं अधिकदोषावहम् इत्यनेन नयेन उपात्तानामेव शब्दानामर्थे सङ्क्रमान्न संसृष्टाकारेण तात्पर्यं पर्यवस्यति न तु व्यर्थे तद्वतस्तत्र [?] भुंक्ष्वेति पदस्य भक्षणादपीति न साक्षादर्थः किन्तु व्यङ्ग्य एव इत्यभियुक्तानां मतम् ।

यदि च शब्दश्रुतेरनन्तरं यावानर्थो लभ्यते तावति शब्दस्याभिधैव व्यापारः, ततः कथं 'ब्राह्मण पुत्रस्ते जातः' 'ब्राह्मण कन्या ते गर्भिणी' इत्यादौ हर्षशोकादीनामपि न वाच्यत्वम् कस्माच्च लक्षणा, लक्षणीयेऽप्यर्थे दीर्घदीर्घतराभिधाव्यापारेणैव प्रतीतिसिद्धेः किमिति च श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पूर्वपूर्वबलीयस्त्वमित्यन्विताभिधानवादेऽपि विधेरपि सिद्धं व्यङ्ग्यत्वम् ।

बालचित्तानुरञ्जनी—अनुपात्तेऽपि तात्पर्यकल्पनायामतिप्रसङ्गमाह यदि चेति । शब्दो हि सङ्केतसापेक्षः स्वार्थमभिधत्ते, न निरपेक्षः । अतो यत्रैवास्य सङ्केतस्तत्रैवाभिधाव्यापारः, नार्थान्तरे । तत्र सङ्केताभावात् । अन्यथा 'ब्राह्मण पुत्रस्ते जातः, कन्या ते गर्भिणी' इत्यादिवाक्यश्रवणानन्तरं प्रतीयमानहर्षशोकादीनां वाच्यत्वं स्यादिति भावः । अनुपात्तेऽपि तात्पर्यकल्पनायां लक्षणा न स्यादिति भावः । तत्रैव दूषणान्तरमाह **किमिति चेति** । श्रुत्यादीनां लक्षणानि त्वस्माभिरनन्तरोक्तप्रकरणे दर्शितानि । यथा

श्रुतिः शब्दानपेक्षः स्यादभिधातुं पदान्तरे ।
श्रुतसर्वार्थसामर्थ्यं लिङ्गमित्युच्यते बुधैः ॥
पदद्वयं मिलित्वा कृकवाकामितीति [?]
प्रधानवाक्यमङ्गोक्त्याकाङ्क्षं प्रकरणं मतम् ।
स्थानं समानदेशत्वं समाख्या यौगिको रवः ।
एतेषां पारदौर्बल्यं विरोधे पूर्वधर्मतः ।
अर्थस्य विप्रकर्षेण विप्रकर्षस्तु कथ्यते ॥
पञ्चभिः स्याद् व्यवहिता सा समाख्या पुनः......
वाक्यं द्वयेन चैकेन लिङ्गं स्यात् केवला श्रुतिः ॥
बाध्यैव स्यात् समाख्या [तु] बाधिकैव श्रुतिः पुनः ।
बाध्यबाधकरूपेण लिङ्गादीनि यथोचितम् ॥

एतेषामुदाहरणानि प्रदीपिकायां प्रदर्शितानि । यथा-तत्र तावत् श्रुतिलिङ्गयोर्बलाबलत्वे चिन्ता । तत्र 'कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे' इत्यादिका ऐन्द्री ऋक् । 'ऐन्द्रया गार्हपत्यमुपतिष्ठत' इति द्वितीयारूपा श्रुतिः । ननु इन्द्रस्यैवोपस्थानं उत इन्द्रस्य गार्हपत्यस्य वा, किं वा उभयोः उत गार्हपत्यस्येति

विशेषहेतोरभावात् संशयः । तत्र इन्द्रस्य प्रकाशनसामर्थ्यरूपाल्लिङ्गात् मन्त्रस्य इन्द्रविषयक्रियासाधनत्वं गम्यते । अन्यथा अनेन इन्द्रप्रकाशनं व्यर्थं स्यात् । अत एव मन्त्रकरणक्रियां प्रति इन्द्रः प्रधानमिति एवंविधबुद्ध्युत्पादनं लिङ्गविनियोगः । का क्रियेति विषयजिज्ञासायां ऐन्द्रचोपतिष्ठत इत्यनेनाधिकपदद्वयरूपेण वाक्येन उपस्थानक्रियायां पर्यवसानं क्रियायाः । एतदुक्तं भवति--ऐन्द्रचेण मन्त्रेण द्वन्द्वमुपतिष्ठितमिति [?] गार्हपत्यमित्यनया द्वितीयान्तपदरूपया श्रुत्या गार्हपत्यः प्रधानं गम्यते । तद्गुणीभूय [न] किञ्चित्करणकक्रियामन्तरेण न सम्भवति । ततस्तादृशीं काञ्चन क्रियां प्रति गार्हपत्यः प्रधानमित्येतद्-बुद्ध्युत्पादनं श्रुतिविनियोगः । ऐन्द्रचोपतिष्ठत इति पदद्वयेन मन्त्रविशेषक्रियाविशेषयोः पर्यवसानं भवति । एवञ्च सति ऐन्द्रचेण मन्त्रेण गार्हपत्यमुपतिष्ठत इत्यर्थो भवति । तदेवं श्रुतिलिङ्गयोर्विरोधे सति श्रुनिवदेव लिङ्गादेरपि मानत्वाविशेषात् तदर्थप्रतीतेः श्रुतिलिङ्गाधीनत्वादिन्द्रोपस्थानस्य लिङ्गाधिगतिसमये श्रुत्या गार्हपत्योपस्थानावगमात् व्रीहियववद् विकल्पेन द्वयोरुपस्थापनमित्येकः पक्षः । गुणानां प्रति प्रधानव्या [मा ?] वृत्तरुपस्थानद्वयेऽपि मन्त्रावृत्तेरुपपत्तेः । श्रुतिबलीयस्त्वेऽपि विरोधाभावेन लिङ्गस्य बाधात् उपस्थानसमुद्भव इति पदान्तरलिङ्गस्य सामर्थ्यरूपत्वेन श्रुत्यपेक्षया बलवत्त्वात् । अशेषशब्दप्रवृत्तेर्वस्तुशक्त्यनुसारित्वात् इन्द्रस्यैव लिङ्गादुपस्थानमित्यपरः पक्षः । मन्त्रेण तदर्थप्रतिपादनात् पुनः शक्तिं निरूप्य मन्त्रस्याकाङ्क्षावशात् इन्द्रशेषत्वे श्रुतिर्यावत् कल्प्यते तावत् श्रुत्या गार्हपत्याङ्गत्वे मन्त्रस्यावगते सति आकाङ्क्षोपशान्तेः श्रुतिकल्पनाया निर्मूलत्वात् अतिशीघ्रवृत्तं श्रुत्या मन्त्रगतेन्द्रप्रकाशनसामर्थ्ये [न] लिङ्गं बाध्यते । न च लिङ्गस्य विरोधाभावात् अबाध इति वाच्यम् । प्रामाण्यस्याकाङ्क्षाधीनत्वात् । आकाङ्क्षायाश्च श्रुत्या प्रत्याख्यानाद् विरोधसिद्धिः । विरोधेन प्रत्यक्षेणेवानुमानं श्रुत्या लिङ्गं दुर्बलत्वेन बाध्यते । तस्मादिन्द्रोपस्थानमेव श्रुतिवशेन वक्तव्यमिति सिद्धान्तः ।

लिङ्गवाक्ययोर्विरोधस्योदाहरणम्—'स्योनं ते सदनं करोमि, घृतस्य धारया सुशेवं कल्पयामि, तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः' इति दर्शपूर्णमासयोः श्रूयते । हे पुरोडाश तव समीचीनं स्थानं करोमि । तत्स्थानं घृतस्य धारया सुष्ठु सेवितुं योग्यं कल्पयामि । हे व्रीहि सारभूत त्वं समाहितमनस्कः तस्मिन् समीचीने सदनस्थितो भवेत्यर्थः । तत्र सकलो मन्त्रः सदनकरणे पुरोडशसादने च विनियोक्तव्यः । किं वा कल्पयामीत्येतत् सदनकरणे तस्मिन् सीदामृतेत्यादि पुरोडाशासादन इति वाक्यैकत्वपदन्वाभ्यां संशयः । सति सम्भवे वाक्यभेदस्यान्याय्यत्वात्, तस्मिन्निति पूर्वसापेक्षत्वात् वाक्यैक्यादुभयत्र समासो[?]मन्त्रो विनियोक्तव्यः अथवा लिङ्गवाक्ययोः समानबलत्वात् मानत्वाविशेषात् न्यस्तस्य[?]वा विकल्पेन उभयत्र विनियोग इति पूर्वः पक्षः । लिङ्गवाक्ययोर्द्वयोरपि श्रुतिद्वारा विनियोजकत्वाविशेषेऽपि लिङ्गेन साक्षादेव श्रुतिकल्पनावाक्येन [तु] किं लिङ्गद्वारा तत्कल्पना कृता । श्रुतिविप्रकर्षादितरस्य च तत्सन्निकर्षेण बलवत्त्वात् पूर्वार्द्धस्य सदनकरणे परापेक्षामन्तरेण सामर्थ्यावगमात् । उत्तरार्द्धस्यापि तस्यैव पुरोडाशप्रसादने सामर्थ्यस्य क्लृप्तत्वात् अर्थभेदे नानावाक्यत्वावगमात् विसृज्य विनियोगो लिङ्गबलीयस्त्वादिति सिद्धान्तः ।

वाक्यप्रकरणयोर्विरोधोदाहरणम्—सूक्तवाकनिगदः तत्र अग्नीषोमाविदं हविरजुषेतामवीवृधेनां महो ज्यायोऽक्राताम् इत्यादिश्रुतौ इदं हविरजुषेतामित्यादीनि देवतापदेन एकवाक्यभूतानि । तत उपस्थितप्रकरणविशेषात् अन्यत्रापि सर्वत्र प्रयोक्तव्यानि । किं वा देवतापदैकवाक्यतया तथैव व्यवस्थितानीति प्रकरणस्य वाक्यतो बलीयस्त्वाबलीयस्त्वाभ्यां संशयः । प्रधानाकाङ्क्षमप्रधानमिति न्यायेन

सर्वस्य प्रधानार्थत्वमङ्गीकर्तव्यम् । तथा च वाक्याद् विनियोगात् प्राकरणिकविनियोगो बलवानिति पूर्वः पक्षः । वाक्येन सामर्थ्यं बुद्ध्वा [?] श्रुतिं कल्पयित्वा तया विनियोगे गम्यमाने प्रकरणाद् वाक्यादि-परम्परया विनियोगस्य विप्रकृष्टत्वेन प्रकरणस्य ततो दुर्बलत्वम् । अतो वाक्यीयो विनियोगो बलवानिति सिद्धान्तः ।

प्रकरणस्थानयोर्विरोधोदाहरणम्—राजसूये बहुषु यागेषु फलवस्तुसमप्रधानेषु अभिषेचनीय संज्ञः सोमयागः [पठितः] तत्सन्निधावक्षैर्दीव्यति राजन्यं जिनातीत्यादिना देवनादयो धर्माः श्रुताः । ते किं सर्वस्य राजसूयस्याङ्गभूता उत अभिषेचनीयस्यैवेति प्रकरणसन्निधिभ्यां संशयः । सन्निधिविशेषात् अभिषेचनीयाङ्गत्वम् । प्रकरणानुसरणे सन्निधिविशेषस्य निरर्थकत्वं स्यात् । सन्निध्यनुरोधात् प्रकरणं विशेषसङ्कुचितमपि सावकाशम् । अतो देवनादयः अभिषेचनीयस्याङ्गानीति पूर्वः पक्षः । देवनादीनां प्रकरणविशेषात् सर्वार्थत्वात् अविशेषतः सर्वाकाङ्क्षायामपि यावत [?] सन्निधि विशेषात् अभिषेचनी-यस्य विशेषाकाङ्क्षां कल्पयित्वा तादर्थ्यकल्पनायाः क्लृप्तत्वात् आकाङ्क्षातः सर्वार्थतावगमस्य सन्नि-कृष्टत्वात् आकाङ्क्षाकल्पनयाऽभिषेचनीयार्थत्वस्य विप्रकृष्टत्वात् एतेऽर्थाः सर्वार्था इति सिद्धान्तः ।

क्रमसमाख्ययोर्विरोधोदाहरणम्—पौरोडाशिकसमाख्याने दर्शपूर्णमासकाण्डे सान्नाय्यपात्र-संस्कारक्रमे समाम्नातः शुन्धध्वं दैव्याय कर्मण इत्यादिमन्त्रः । स किं समाख्याया बलीयस्त्वात् पुरोडाश-पात्राङ्गं किं वा क्रमस्य बलवत्त्वात् सान्नाय्यपात्राङ्गम् आहोस्विदविशेषादुभयाङ्गमिति संशयः । विशेषाग्रहणात् उभयोरपि क्रमसमाख्ययोस्तुल्यबलत्वेन उभयाङ्गं, सम्बन्धवचनत्वेन समाख्याया बली-यस्त्वात् पुरोडाशपात्राङ्गमिति पूर्वः पक्षः । दण्डी पुरुषः, [अत्र] प्रकृत्या दण्डस्य उक्तत्वात् प्रत्यये न पुरुषस्याभिधानात् मिथो योगस्य समभिव्याहारकल्पनया वाक्याभावात् इहापि समाख्यायाः सम्बन्ध-वचनत्वानङ्गीकारात् । तद्वचनत्वेऽपि तस्यास्तत्राप्रमाणत्वात् तामवलंब्य पुरोडाशस्वरूपस्य काण्ड-स्वरूपस्य च सामान्यसम्बन्धं परिकल्प्य अपेक्षावशात् एकवाक्यत्वमुपेत्य ततः सामर्थ्यकल्पनया ततः श्रुतिं कल्पयित्वा तया विनियोगो यावदवगम्यते तावत् क्रमकृतसम्बन्धमात्रस्य प्रत्यक्षत्वात् तस्मादारभ्य श्रुत्यर्थप्रतिपत्तेः सन्निकर्षात् शुन्धध्वम् इति मन्त्रः सान्नाय्यपात्राङ्गमिति सिद्धान्तः । तदुक्तं श्रुतिलिङ्ग-वाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति । श्रुत्यादीनां समवायः समान-विषयत्वेनैकार्थसन्निपातः । तत्र परस्य दौर्बल्यं तस्य पूर्वानुमानद्वारा तत्सम्बन्धात् तेनार्थसाधकस्य ततो विध्युत्कर्षात् पूर्वस्य प्राबल्यम् । तस्यार्थसाधने परापेक्षाभावात् तेन सन्निकर्षादिति सूत्रार्थः । अत्रोदाहरणं आचार्यसुन्दरपाण्ड्येन दर्शितमिति ।

विरोधिनोस्तदेको हि तत्फलं प्राप्नुयात्तयोः ।
निःश्रेण्यारोहणं प्राप्य प्राप्तिमात्रो ददाति च [?] ।
एकमेव फलं प्राप्तुमुभावारोहतो यदा ॥
एकसोपानवर्त्येको भूमिष्ठश्चापरस्तयोः ।
उभयोस्तु जवस्तुल्यः प्रतिबन्धश्च नान्तरा ॥
प्रथमे तद् गृहीतेऽस्मिन् यस्मिन्नेव तरे मुधा इति ।

[प्रथमेन गृहीतेऽस्मिन् पश्चिमेवेतरन्मुधा] अत्रापि दीर्घदीर्घाभिधाव्यापारेणैव शेषशेषिभाव-प्रतीतेः सर्वेषां सामान्यात् सबलदुर्बलभावो न स्यादिति भावः ।

सारबोधिनी—कन्या कुमारी अनूढा, तस्या गर्भाच्छोकः। हर्षशोकादीनां मुखप्रसादाप्रसादानुमितत्वेन। नन्वलक्ष्येष्वेव वृत्तिरिति न तेषु परिवृत्तिरित्यतो दोषान्तरमाह **कस्माच्चेति**। लक्षणीये मुख्यार्थबाधात् प्रतीयमाने। नन्वेवं लक्ष्यार्थस्य मुख्यार्थतायां मुख्यार्थबाधज्ञानं न सम्भवतीति अस्वरसादाह **किमिति चेति**। यदाह जैमिनिः—श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति। विप्रकर्षो विलम्बेनोपस्थितिः। श्रुत्यनन्तरं प्रतीयमानानां सर्वेषामेवार्थानामभिधेयत्वेनोपस्थितेर्विलम्बाभावात् विप्रकर्षविरहेण पूर्वंपूर्वस्य बाधकत्वं उत्तरोत्तरस्य बाध्यत्वमिति व्यवस्था न स्यादित्यर्थः। तदुक्तम्—

बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा।
मध्यमानां तु बाध्यत्वं बाधकत्वं व्यवस्थया ॥ इति

—किमिति च पूर्वंपूर्वं बलीयस्त्वमित्यन्वयः।
अभिधातु पदेऽन्यस्मिन्ननपेक्षो रवः श्रुतिः।
सर्वत्रावगता शक्तिर्लिङ्गमित्यभिधीयते ॥
संहृत्यार्थाभिधायित्वं पदानां वाक्यमुच्यते।
प्रधानवाक्यस्याङ्गोक्त्याकाङ्क्षा प्रकरणं मतम् ॥
स्थानं समानदेशत्वं समाख्या यौगिको रवः।
श्रुतिर्द्वितीया क्षमता च लिङ्गं वाक्यं पदान्येव तु संहतानि।
सा प्रक्रिया या कथमित्यपेक्षा स्थानं क्रमो योगबलं समाख्या ॥

यथा व्रीहीनवहन्तीत्यत्र द्वितीयाश्रवणमात्रेणावहननक्रियायां विनियोगोऽवगम्यते। क्षमता यथा दाहे वह्नेर्योग्यता। उदाहरणम्—बर्हिर्देवसदनं दामीति। दाप् लवने इत्यस्य रूपम्। योग्यतावशात् बर्हिश्छेदनेऽस्य मन्त्रस्य विनियोगः। संहृत्येति विशेष्यविशेषणभावं प्राप्येत्यर्थः। तेनाकाङ्क्षादिपरिग्रहः। यथा श्वेतं छागमालभेतेत्यत्र अन्वये श्वेतस्य प्रत्येकमालम्भनक्रियान्वयित्वेऽप्याकाङ्क्षादिमहिम्ना श्वेतस्यछागावच्छेदकता वाक्याद् व्यवस्थाप्यते। प्रधानेत्यादि। यथा दध्ना जुहोतीत्यत्र दधियागस्याग्निहोत्राङ्गतावगमः। अग्निहोत्रं जुहोतीत्यस्य प्रधानवाक्यस्य कथमित्याकाङ्क्षायां तदभिधानात्। स्थानमित्यादि। समानदेशत्वम् यो, यद्देश्यः तद्देशे तस्य विनियोगः। यथा हव्यकव्ये स्वाहा स्वधेत्यत्र हव्ये स्वाहा कव्ये स्वधेत्यस्य विनियोगः, तुल्यक्रमत्वात्। समाख्येति। योगेनावयवशक्त्याऽर्थं प्रत्याययतीति यौगिको रवः शब्दः। हौत्रमौद्गात्रमाध्वर्यवमिति। होतुरिदमित्यादि योगबलेन हवनं होतरि गानमुद्गातरि विनियुज्यते। न चेदं लिङ्गम्, गानेऽपि होतुः क्षमत्वात्। अत्र पारदौर्बल्योदाहरणानि अप्रकृतत्वाद् गौरवभयाच्च न लिखितानि। इत्यन्वितेति एकदेशिमतोपसंहारोऽयम्। मतान्तरं तु प्रागुपसंहृतम्। न तु निःशेषेत्यादौ तदन्तिकमेव रन्तुं गताऽसीत्यर्थः प्रतीयते। स चान्वयरूपोऽप्राप्ततया विधेयत्वेन तात्पर्यविषय इति तत्राभिधैवास्तु किं वृत्त्यन्तरेण। न चान्वयबोधाद् वाक्यस्य विरतिः विवक्षितवाक्यार्थबोधाजननात्। अन्यथा जनितखण्डवाक्यार्थबोधस्य महावाक्यार्थबोधकत्वं न स्यात्।

काव्यप्रकाशदर्पणः-एवं यत्परः शब्दः स शब्दार्थ इति पक्षस्य निरासेनापि सेयमिषोरित्यादिपक्षं प्रकारान्तरेणापि परिहरति **यदि चेति**। **हर्षेति**। हर्षादयो हि न तेनापि वाच्यत्वेनाभ्युपगम्यन्ते यतोऽमी वाच्यार्थप्रतीत्या क्रियन्ते। न खलु शब्दस्य कारकत्वम्, पूर्वोक्तरीत्यादिना ज्ञापकत्वात्। तस्माच्छब्दवाक्यार्थः

निष्पत्तिः [?] प्रतीयते । तत्प्रनिपत्त्या हर्षापुपमि [?] एवमपि च शब्दाङ्गीकारे शब्दादेव केवलात् सकलार्थ-प्रतिपत्तिः । श्रुतार्थापत्त्यादिप्रमाणान्तरस्वीकारेणापि निरर्थकं स्यात् । लक्षणेत्यनन्तरं पृथगुच्यत इति शेषः । यद्यभिधायास्तात्पयस्य वा लिखितशब्दार्थप्रत्यायनसामर्थ्यं तदा श्रुत्यादिप्रमाणान्तर विकस्य [?] समवाये पारदौर्बल्यमित्यपकर्षादिति भवतः प्रक्रिया कल्पनीयेति उपपद्यते । सर्वेषां समनुपसङ्गादित्याह [?] **किमिति चेति** । द्वितीयान्तं पदं श्रुतिः । तृतीयान्तमपीति भट्टः । पदार्थसामर्थ्यं लिङ्गं, यथा लिङ्गस्यातं [?] यौगिकं नाम समाख्याता शब्देत्येवं एषां समवाये पूर्वस्य बलीयस्त्वम् तत्रोत्तरोत्तरेषां दौर्बल्यं अर्थ-विप्रकर्षात् । यथा दर्शपूर्णमासयोः ब्रीहीनवहन्तीत्यादौ यौगिकसमाख्यया विनियोगः । तत्र लिङ्गापेक्षया श्रुतेर्बलीयस्त्वं यथा ऐन्द्रचा गार्हपत्यमुपतिष्ठत इति । अत्र ऐन्द्रचा च इन्द्रप्रकाशनसामर्थ्यात् लिङ्गलक्षण [?] लिङ्गात् इन्द्रोपस्थाने विनियोगो गार्हपत्यमिति द्वितीयया श्रुत्या बाध्यते । अयमाशयः—ऐन्द्रचेत्यादौ श्रुतौ यतः श्रुतेर्बलीयस्त्वं तदपदार्थत्वेन व्यञ्जनानङ्गीकारेण निर्वहतीति उपसंहरतीति । अपिशब्दात् अभिहितान्वयवादादौ विधेर्निःशेषेत्यादि व्यङ्ग्यस्यापि [?]।

किञ्च 'कुरु रुचिम्' इति पदयोर्वैपरीत्ये काव्यान्तर्वर्तिनि कथं दुष्टत्वम् । न ह्यत्रा-सभ्योऽर्थः पदार्थान्तरैरन्वितः, इत्यनभिधेय एवेति, एवमादि अपरित्याज्यं स्यात् ।

बालचित्तानुरञ्जनी—पुनरप्यन्विताभिधानवादिनं दूषयति **किञ्चेति** । ['क्वन्तर्वर्तिनि' इति पाठे] कुशब्दः अन्ते यस्य वैपरीत्यस्य तस्मिन्वैपरीत्ये रुचिङ्कुर्वित्यादिरूपेऽन्विताभिधानपक्षेऽपि दुष्टत्वं प्रतीयतां को दोषस्तत्राह **न हीति** । लाटभाषायां चिङ्कुरिति मदनमन्दिरान्तर्वर्तिमध्यपर्यायः । तदर्थोऽसभ्यः । तस्य [न स ?] पदार्थान्तरैरन्वितश्चारु । तेनानभिधेयभावे प्रतीयमानत्वेन व्यङ्ग्यत्व-मङ्गीकर्तव्यं स्यादिति भावः [?]।

सारबोधिनी—किञ्चेति । क्वन्तर्वर्तिनि कुशब्दोऽन्तर्वर्ती यत्र तादृशे वैपरीत्ये रुचि कुर्विति पाठे दुष्टत्वम् । सन्धौ चिङ्कुपदस्य निष्पादनात् । क्वचित्काव्यान्तर्वर्तिनीत्यपि पाठः सुगमः । ननु चिङ्कुपदस्य वाचकत्वमेवेत्यत आह **नहीति** । असभ्योऽर्थो व्यङ्ग्यो वराङ्गरूपः । **अन्वित इति** । तत्रैवाभिधाङ्गीकारात् । व्यञ्जनानङ्गीकारेऽनन्वितस्यासभ्यार्थस्याशक्यतया वृत्त्यभावेन तं प्रत्यबोधकस्य चिङ्कुपदस्य दुष्टता न स्यादित्याह **एवमादीति** । एवमादि पदमिति शेषः । अपरित्याज्यं काव्य इति शेषः ।

काव्यप्रकाशदर्पणः—शब्दादलङ्कृतध्वनेः सम्प्रति रसाभावतद्वरिदिति [?] नये व्यञ्जकत्वमङ्गी-कार्यमिति दर्शयति । वैपरीत्यं रुचिं कुर्विति पाठः । अत्र हि चिङ्कुपदं काश्मीरादिभाषायां अश्लीलार्थ-बोधकम् । उत्कलादिभाषायां धृतवांडकमिवेत्यादिकमसभ्योऽश्लीलः । अपरित्याज्यं स्यात् व्यञ्जनानङ्गी-कारात्, तत्प्रतीतेरसम्भवात् ।

यदि च वाच्यवाचकत्वव्यतिरेकेण व्यङ्ग्यव्यञ्जकभावो नाभ्युपेयते तदाऽसाधुत्वादीनां नित्यदोषत्वं कष्टत्वादीनामनित्यदोषत्वमिति विभागकरणमनुपपन्नं स्यात् । न चानुपपन्नम् सर्वस्यैव विभक्ततया प्रतिभासात् । वाच्यवाचकभावव्यतिरेकेण व्यङ्ग्यव्यञ्जकताश्रयणे तु व्यङ्ग्यस्य बहुविधत्वात् क्वचिदेव कस्यचिदेवौचित्येनोपपद्यत एव विभागव्यवस्था ।

'द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः' इत्यादौ पिनाक्यादिपद-वैलक्षण्येन किमिति कपाल्यादिपदानां काव्यानुगुणत्वम् ।

बालचित्तानुरञ्जनी—स्वदर्शनेऽपि बाधकं तर्कमाह **यदीति**। असाधुत्वादयश्च्युतसंस्कारत्वाद-यस्तेषां नित्यदोषत्वं, सर्वदा सर्वत्र परिहरणीयत्वात् । कष्टत्वादयः अधाक्षीदद्राक्षीदित्यादिश्रुतिकटुत्वादयः, तेषामनित्यदोषत्वम्, शृङ्गारशान्ताद्भुतादौ रसानुपयोगित्वेन हेयत्वात्, वीररौद्रादौ वाऽभ्युपयोगाद-हेयत्वादित्यर्थः । श्रुतिकटुत्वादयः शृङ्गारादौ व्यङ्ग्ये सति हेयाः न वाच्ये अर्थमात्रे । न च व्यङ्ग्येऽपि शृङ्गारादिव्यतिरिक्त इति विभागः स्वदर्शनवृद्धैः कृतः व्यङ्ग्यव्यञ्जकभावानङ्गीकारे न स्यादिति भावः । तदङ्गीकारे व्यवस्था स्यादित्यन्वयमाह **वाच्येत्यादिना** ।

पुनरपि वाच्यव्यङ्ग्ययोर्भेदं दर्शयन् अन्विताभिधानवादिनां दोषमाह **द्वयं गतमित्यादिना**। पूर्वं चन्द्रकलैव शोच्या जाता इदानीं त्वमपीति द्वयं शोच्यमभूदित्यर्थः । अत्र कपालिन इत्यनेन बीभत्सो व्यज्यते । कपालिन इत्यनेनेति कपालिपदोपादानं तस्य काव्यानुगुणत्वं न स्यात् वाच्यव्यङ्ग्यविभागा-नङ्गीकार इत्यर्थः ।

सारबोधिनी—यदि चेति । असाधुत्वं व्याकरणव्युत्पत्तिविरहः । कष्टत्वं श्रुतिकटुता । अनित्य-दोषत्वं । रसविशेषापकर्षकत्वम् सर्वैः सहृदयैः व्यञ्जनोपगमे विभागबीजमाह **वाच्यवाचकेत्यादि** । **क्वचि दिति** । मधुरे शृङ्गारादिरसे मधुरवर्णस्यौचित्यम् । **द्वयमिति** । सम्प्रति द्वयं गतमित्यन्वयः । यत्र हि शिवनिन्दायां तात्पर्यम् तत्र पिनाक्यादिपदोपादाने पिनाकवत्तया वीरागते निन्दा न स्यादित्याह **पिनाक्या-दीति** । अशुचिकपालधारणया स्पर्शाद्यनर्हतया हेयताऽवगम्यते । तेनायमर्थः । कस्यापि न वाच्य इति व्यञ्जनैव लब्धप्रसरा इत्याह **काव्यानुगुणत्वमिति** । अनुगुणत्वमुत्कर्षकत्वम् ।

काव्यप्रकाशदर्पणः—नित्यदोषत्वम् सार्वत्रिकत्वात् । कष्टत्वं कष्टोच्चार्यत्वम् । श्रुतिकटुत्वम्, तत्प्रभृतीनामनित्यदोषत्वम् रौद्रादावदुष्टत्वात् । यथा मम नृसिंहविजये

स्फुटविकटचपेटापातनेनायमष्टौ सपदि कुलगिरीन् वा खण्डशश्चूर्णयामि ।
प्रलयमरुदुदारस्फीतदत्तोद्धतं वा [तं ?] प्रसृतितिरयगारा तामवातक्षिपामि [?] ॥

तथा च ममैव—

निःश्वासोत्पातवातप्रवधुतकुलाहार्यमुघुष्टदंष्ट्रा
जातः स्फुलिंगप्रकरणविरचितो त्वालिकायानिशङ्कम् ।
अर्द्धे पारींतनद्धे नवमहहमहालोकमालोक्यलोकाः
स्तोकः स्तोकावशेषःशरणमुपययुर्वा विधिं वा [?] ॥

सर्वस्यैव रसावेदिनः । कस्यचिद्रसादेवौचित्येन समनन्तरोक्तप्रकारेण अनित्यदोषाणां क्वचिदा-नुगुण्यं द्रढयति **द्वयमिति** । अत्र प्रथममन्यथेति शेषः । वाच्यत्वं शोचनीयत्वम् । **काव्यानुगुणत्वमिति**

पाठे काव्यस्योत्कर्षकत्वम् । कपालिपिनाकिपदयोर्द्वयोरपि साम्येन भगवद्वाचकत्वे कपालिपदेन संवन्धनिमित्तकस्य सकलामङ्गलविघ्ननिन्दितवाचकत्वादेः प्रत्ययनीतापहृतपोषकत्वम् । न चैतत् शृङ्गारादिरसोचितमित्यमङ्गलरूपाश्लीलस्यानित्यदोषता । एवञ्च व्यञ्जनाभावे कपाल्यादिपदं सर्वत्रैव वर्जनीयं स्यादिति भावः ।

अपि च वाच्योऽर्थः सर्वान् प्रतिपत्तृन् प्रति, एकरूप एवेति नियतोऽसौ । न हि 'गतोऽस्तमर्क.' इत्यादौ वाच्योऽर्थः क्वचिदन्यथा भवति । प्रतीयमानस्तु तत्तत्प्रकरणवक्तृप्रतिपत्त्रादिविशेषसहायतया नानात्व भजते । तथा च 'गतोऽस्तमर्कः' इत्यतः सपत्नं प्रत्यवस्कन्दनावसर इति, अभिसरणमुपक्रम्यतामिति, प्राप्तप्रायस्ते प्रेयानिति कर्मकरणान्निवर्तामह इति, सान्ध्यो विधिरुपक्रम्यतामिति, दूरं मा गा इति, सुरभयो गृहं प्रवेश्यन्तामिति सन्तापोऽधुना न भवतीति, विक्रेयवस्तूनि संह्रियन्तामिति, नागताऽद्यापि प्रेयानित्यादिरनवधिर्व्यङ्ग्योऽर्थः, तत्र तत्र प्रतिभाति ।

बालचित्तानुरञ्जनी–इदानीं वाच्यस्यैकविधत्वं व्यङ्ग्यस्य बहुविधत्वं विविच्य दर्शयति **अपि च वाच्य** इत्यादिना । अनवधिरनन्तः, वाच्यस्यैकविधत्वाद्व्यङ्ग्यस्य बहुविधत्वादुभयोर्भेदोऽङ्गीकर्तव्य इत्यर्थः ।

सारबोधिनी–किञ्च वाच्यव्यङ्ग्ययोर्वाच्यः साधारणो व्यङ्ग्यस्तु नानारूपः प्रकाशत इत्यतोऽपि वाच्याद्व्यङ्ग्यस्य भेद इत्याह **वाच्योऽर्थ इति** । ननु नैतद्वैधर्म्यं नानार्थसैन्धवपदे नानार्थावगमदर्शनादिति चेन्न । तत्र यथानुशासनमेव बोधनात् । प्रकृते त्वनियतस्यैवेत्यस्य भेदकत्वात् ।

अत एवोक्तमनवधिर्व्यङ्ग्योऽर्थस्तत्र तत्र प्रतिभातीति । अवस्कन्दनं प्रसभमवमर्दनम् । तत्र तत्र बोद्धरि योधाभिसारिकावासकसज्जावैतनिकब्राह्मणपथिकगोरक्षकसन्तापभीतवणिग्विरहिण्यादिरूपे इत्यर्थः ।

काव्यप्रकाशदर्पणः—किञ्चैकत्र वाक्ये एक एवाभिधेयः व्यङ्ग्यस्तु वक्त्रादिवैचित्र्यादनेक इत्यभिधातो विलक्षणैव व्यञ्जनेत्याह **अपि चेति** । वाच्योऽर्थः समभिव्याहृतपदबोध्यः । अवस्कन्दनं प्रसभमवमर्द्दनम् । सुरभयो गावः ।

वाच्यव्यङ्ग्ययोः, 'निःशेषे'त्यादौ निषेधविध्यात्मना,

मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमुदाहरन्तु ।
सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम् ॥१३३॥

इत्यादौ संशयशान्तशृङ्गार्यन्तरगतनिश्चयरूपेण,

कथमवनिप दर्पो यन्निशातासिधारा-
दलनगलितमूर्ध्नां विद्विषां स्वीकृता श्रीः ।
ननु तव निहतारेरप्यसौ किं न नीता
त्रिदिवमपगताङ्गैर्वल्लभा कीर्तिरेभिः ॥१३४॥

इत्यादौ निन्दास्तुतिवपुषा स्वरूपस्य,

पूर्वपश्चाद्भावेन प्रतीतेः कालस्य शब्दाश्रयत्वेन शब्दतदेकदेशतदर्थवर्णसङ्घटनाश्रयत्वेन च आश्रयस्य शब्दानुशासनज्ञानेन प्रकरणादिसहायप्रतिभानैर्मल्यसहितेन तेन चावगम इति निमित्तस्य बोद्धृमात्रविदग्धव्यपदेशयोः प्रतीतिमात्रचमत्कृत्योश्च करणात् कार्यस्य गतोऽस्तमर्क इत्यादौ प्रदर्शितनयेन संख्यायाः,

कस्स व ण होइ रोसो दट्ठूण पिआइ सव्वणं अहरं ।
सभमरपडमग्घाइणि वारिअवामे सहसु एण्हिं ॥१३५॥

इत्यादौ सखीतत्कान्तादिगतत्वेन विषयस्य च भेदेऽपि यद्येकत्वम् तत् क्वचिदपि नीलपीतादौ भेदो न स्यात् । उक्तं हि "अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्च" इति ।

वाचकानामर्थापेक्षा व्यञ्जकानान्तु न तदपेक्षत्वमिति न वाचकत्वमेव व्यञ्जकत्वम्। किञ्च "वाणीरकुडंगु" इत्यादौ प्रतीयमानमर्थमभिव्यज्य वाच्यं स्वरूपे एव यत्र विश्राम्यति तत्र गुणीभूतव्यङ्ग्येऽतात्पर्यभूतोऽप्यर्थः स्वशब्दानभिधेयः प्रतीतिपथमवतरन् कस्य व्यापारस्य विषयतामवलम्बतामिति ।

बालचित्तानुरञ्जनी—वाच्यव्यङ्ग्ययोर्विषयभेदादेकत्वं नास्तीत्याह **वाच्यव्यङ्ग्ययोरित्यारभ्य किञ्चेत्यतः** पूर्वग्रन्थेन । निषेधविध्यात्मनेत्यादीनां तृतीयान्तानां शब्दानां विषयभेदेऽपीत्युत्तरत्र सम्बन्धः । हे आर्याः विद्वांसः ! भवन्तः मात्सर्यमुत्सार्य निवार्य मर्यादासहितं कार्यं विचार्य इदं वक्ष्यमाणं वदन्तु । तदेवाह-भूधराणां पर्वतानां नितम्बाः मध्यप्रदेशाः सेव्याः किम् स्मरेण कामेन स्मेराणामीषद्धासयुक्तानां विलासिनीनां पश्चाद्भागाः सेव्या इतीदं वदन्त्विति सम्बन्धः । अत्र संशयो वाच्यः । शान्तशृङ्गारान्यतरनिश्चयश्च व्यङ्ग्य इत्यर्थः ।

कश्चित्कश्चिद्राजानमाह, हे राजन् त्वया निशातया तीक्ष्णया असिधारया दलनं खण्डनं तेन छिन्नशिरसां शत्रूणां श्रीः स्वीकृतेति यदयं कथं दर्पः । किन्तु विपद्भ्योऽर्थो जातः । तमेवाह–निहतारेर्मारितशत्रोरपि तव वल्लभा असौ कीर्तिः अपगताङ्गैर्मृतैरेभिः शत्रुभिः त्रिदिवं स्वर्गं किं न नीता,

—

नीतेव। अत्र मृतैरपि शत्रुभिर्वल्लभा स्वर्गं नीतेति निन्दा वाच्या। स्तुतिर्व्यङ्ग्येति वाच्यव्यङ्ग्ययोस्त्वत्र भेदेऽपीत्युत्तरत्र सम्बन्धः। पूर्वं वाच्य प्रतीयते पश्चाद्व्यङ्ग्यमिति वाच्यव्यङ्ग्ययोः कालस्य भेदेऽपि; वाच्यं शब्दाश्रयमेव व्यङ्ग्यं तु शब्दाश्रयं, तदेकदेशाश्रयं, अर्थाश्रयं वर्णरचनाद्याश्रयञ्च। शब्दशब्दैकदेशादिभिरपि व्यञ्जकत्वस्य प्रतिपादितत्वादिति वाच्यव्यङ्ग्ययोर्निमित्तस्य कारणस्य भेदेऽपि; वाच्यबोद्धाबोद्धैबोच्यते व्यङ्ग्यबोद्धविद्भ्य इति [?]। तथा चोक्तम्

शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम्॥इति। [ध्व० १।७]

तथा च वाच्योऽर्थः प्रतीतिमात्रकारी व्यङ्ग्यश्चमत्कारकारीति वाच्यव्यङ्ग्ययोः कार्यस्य भेदेऽपि, गतोऽस्तमर्क इत्यादौ प्रदर्शितन्यायेन वाच्यस्तावदेकः व्यङ्ग्यश्च प्रकरणादिविशेषसहायतया अनेकप्रकार इति वाच्यव्यङ्ग्ययोः संख्याया भेदोऽपि।

काचिद्विदग्धा सखी काञ्चिदविनीतां उपपतिखण्डिताधरां नायिकां तत्पतिसन्निधौ तमपश्यन्तीव नायिकावाच्यतानिवारणायाह **कस्स इति**। सभमरपउमग्घायिणि सभ्रमरपद्माघ्रायिणि हे सभ्रमरपद्माघ्राणशीले। वारिअवामे हे वारितवामे वारणानङ्गीकारिणि हे सखि, पिआइ प्रियायाः सव्वणं सव्रणं, अहरं अधरं, दट्ठूण दृष्ट्वा, कस्स वा कस्य वा, रोसो रोषः, ण होइ न भवति। अपि तु भवतीत्यर्थः। अतः सहसु सहस्व। उपालम्भानिति शेषः। "वाच्छद्मपद्ममूर्खद्वार" [?] इति सूत्रेण दकारमकारयोर्मध्ये पउमेति रूपम्। "पद्मेमी"ति सूत्रेणोत्वपक्षे "पोम्मं" इति रूपं 'इर' इति सूत्रेण शीलाद्यर्थानां तृन्तादीनामिरादेशः [?]। इदानीं सहस्वेति वाक्यं अविनीतसखीविषयं भ्रमरेणाधरो दष्टः नान्यथेति अस्यापराधो नास्तीति त्वया अन्यथा शङ्का न कार्येति कान्तविषयम् भ्रमरेणापीडितोऽधर इति मया समर्थितम्। अतस्त्वया न भेतव्यमिति व्यङ्ग्यमुपपतिविषयम् भ्रमरेण दष्टोऽधरः न रमणेन अतस्त्वया संरम्भो न कर्त्तव्य इति सपत्नीविषयम् अन्यथा न शङ्का कार्येति प्रतिवेशिकविषयम्, अद्य मया यथा कथञ्चित् समाहितम्, अतः परं सावधानतया त्वया भवितव्यमिति नायिकाविषयम् इत्यादि प्रकारेण वाच्यव्यङ्ग्ययोर्विषयस्य भेदेऽपि रूपभेदात् कारणभेदात् कार्यभेदात् संख्याभेदात् विषयभेदाच्च वाच्यव्यङ्ग्ययोरत्यन्तभेदः। तथाप्येकत्वाङ्गीकारे नीलपीतादेरपि भेदो न स्यादित्याह **यद्येकत्वमिति**। **तत्तर्हि** वृद्धसम्मतिमाह **उक्तं हीति**। अयमेव हि घटपटयोर्भेदः जलाहरणशीतत्राणप्रदविरुद्धधर्माध्यासः अयमेव हेतुः यत्कारणभेदश्चेत्यर्थः। भेदकान्तरमाह **वाचकानामिति**। नियताभिधाव्यापाराणां वाचकानां शब्दानां तत्तद्वर्णादीनामर्थनिरपेक्षाणामनियतव्यञ्जकशक्तीनां कथं न वैलक्षण्यमित्यर्थः। **किञ्चेति**।

वाणीरकुडंगुड्डीण सउणिकोलाहलं सुणंतीए।
घरकम्मवावडाए बहुए सीअंति अंगाइं॥
वेतसीकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः।
गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि॥

इत्यादौ वाच्यार्थप्रतीतिपुरःसरा प्रतीयमानार्थप्रतीतिः तदनन्तरं तृतीयकक्षायां वाच्यप्राधान्यात् स्वरूप एव विश्राम्यति। तत्र गुणीभूतं व्यङ्ग्यं यस्य तस्मिन् काव्ये अतात्पर्यभूतः शब्दान-

भिधेयः रसादिस्वरूपोऽर्थः प्रतीयमानः कस्य व्यापारस्य विषयतामवलम्बतां व्यञ्जकव्यापारव्यतिरेकेणेति शेषः।

सारबोधिनी--वाच्यव्यङ्ग्ययोर्भेदे उपपादकान्तरमाह **वाच्येति**। निषेधविध्यात्मना वाच्यव्यङ्ग्ययोः स्वरूपस्य भेदेऽपि यद्येकत्वमिति दूरेणान्वयः। **मात्सर्येति**। वाच्यव्यङ्ग्ययोः संशयरूपतया निश्चयरूपतया च स्वरूपस्य भेदेऽपीत्यत्रापि योज्यम्। **शान्तेति**। शान्तशृङ्गार्यन्तरगतः शान्तशृङ्गार्यन्तरविषयको यो निश्चयः, शान्तस्य भूधराणां नितम्बः, शृङ्गारिणाञ्च विलासिनीनामित्याकारः। अभिधाया अविषयत्वादयमर्थोऽवाच्यः। तथा च संशयो वाच्यो निश्चयश्च व्यङ्ग्य इति।

कथमित्यादि। अत्र निन्दावाक्यार्थो वाच्यः। स्तुतिर्व्यङ्ग्या। वपुषा स्वरूपेण। वाच्यव्यङ्ग्ययोः स्वरूपस्य भेदेऽपि यद्येकत्वमिति दूरेणान्वयः। **असाविति**। असौ कीर्तिः।

पूर्वपश्चाद्भावो व्यञ्जकव्यङ्ग्यस्वरूपत्वात्। पूर्ववर्तित्वेनैव कारणत्वात्। अभिधाव्यञ्जनयोराश्रयभेदमाह **शब्देत्यादि**। निमित्तभेदमाह **शब्दानुशासनेति**। कार्यभेदमाह **बोद्धृमात्रेति**। विदग्धो रसिकः। व्यपदिश्यत इति व्यपदेशः। भावे घञ्। चमत्कृतिरास्वादः।

कस्सेति। प्रेष्यागते प्रियाया उपपतिदष्टाधरं व्रणं वीक्ष्य विमनायमाने गृहपतौ विदग्धसखी समाधत्ते।

कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।
सभ्रमरपद्माघ्रायिणि वारितवामे सहस्वेदानीम्॥

वारितकर्मणि वामा विरुद्धाचारिणी। वारितस्य भ्रमरस्य पद्माघ्राणं दंशकारणं अधरदंशनं चावश्यमाचरयसि। वपतिक्रोधनियन्त्रणमनुभव। एण्हिं इदानीमविचारदशायां प्रतिनायकसन्निधौ तत्सन्निधौ च सर्वं सुखाय भविष्यति।

सखीत्यादि। वक्त्री [वक्त्र्याः ?] सखी। नायिका, सा वाच्यस्य विषयः। सैव कान्ता यस्य तत्कान्तो गृहपतिः। इयं भ्रमरेण दष्टाधरा, न षिङ्गेनेति व्यङ्ग्यस्य नायको विषयः। आदिपदादुपपत्यादिग्रहणम्। पुनरेवं मा कृथा इत्यस्योपपतिः। ममैव वैदग्ध्यं इत्यस्य प्रतिवेशिनी इत्यादि। भेदेऽपीति प्रतिपङ्क्त्यन्तेनान्वेति, भेदे वैधर्म्ये। **उक्तमित्यादि**। भेदोऽन्योन्याभावः। विरुद्धस्य तदवृत्तेर्धर्मस्याध्यासो ज्ञानम्। ज्ञायमानवैधर्म्यमेवान्योन्याभाव इति वादिमतेनायं भेदहेतुरन्योन्याभावविषयकः। न केवलं वाच्यव्यङ्ग्ययोरेव वैधर्म्यमपि तु वाचकव्यञ्जकयोरपीत्याह **वाचकानामित्यादि**। गृहीतसङ्केतं सन्तमेवार्थं वाचका बोधयन्तीति तेषामर्थापेक्षा। असदेव पावनत्वादिकं तटे बोधयतांव्यञ्जकानां नार्थापेक्षेत्यर्थः।

काव्यप्रकाशदर्पणः--संप्रति पदवैलक्षण्यदर्शनेनापि वाच्याद् व्यङ्ग्यभेदं दर्शयन् आह **वाच्यव्यङ्ग्ययोरिति**। एवं स्वरूपादिभेदेऽपि यद्येकत्वं वाच्यव्यङ्ग्ययोः क्वचिदपि नीलपीतादौ भेदो न स्यादिति संबन्धः। संशये प्रकरणादिति नियमाभावदशायामरसिके व्यङ्ग्यसंभेदरहिते, वपुषा स्वरूपेण, स्वरूपस्येति समनन्तरोक्तेषु त्रिष्वपि तृतीयान्तेषु संबन्धः। शब्दशास्त्रं व्याकरणम्। अर्थानुशासनं मीमांसादि। प्रकरणवक्त्रादिसहकृतेन प्रतिभासात्। काव्यरसस्य ज्ञानाच्च गुणान्तरातिशयविशेषस्य

नैर्मल्येन वाच्यप्रतीतेरपि प्रकरणादिसाहाय्यस्याङ्गीकारेऽपि तत्सहिततत्प्रतिभानैर्मल्याङ्गत्वं व्यङ्ग्यस्यैवेति विशेषः। गतोऽस्तमर्क इत्यादेर्विषयाभेदापेक्षया पुनरुक्तेः।

कस्य न वा भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।
सभ्रमरपद्माघ्राणशीले वारितवामे सहस्वेदानीम्॥

वारितवामे प्रतिकूलकारिणि। तत्र वाच्यं सखीविषयं भ्रमरेण दष्टाधरेयं न पुनः परेणेति व्यङ्ग्यं तत्कान्ताविषयमभेदेऽपीति प्रतिपाद्यत इत्यन्वयः। एकत्वं एकवृत्तिबोध्यता। लक्षणामेकजातीयाम्। अयमेव हि भेदो यद् विरुद्धधर्माध्यासः। अयमेव भेदहेतुः यः कारणभेद इत्यर्थः। प्रकारान्तरेणापि व्यङ्ग्यस्य वाच्याद्भेदमाह **वाचकानामिति**। अयमर्थः यस्य शब्दस्य योऽर्थो वाच्यस्तस्यार्थस्य पूर्वपरिज्ञाने तस्य शब्दस्य तद्वाचकत्वं ज्ञातुमशक्यम्। अतः शब्दानां वाचकत्वं सङ्केतितार्थज्ञानसापेक्षमवगम्यते। व्यञ्जकं व्यङ्ग्यार्थस्य पूर्वज्ञानापेक्षयापि भवतीत्यपि न वाचकत्वमेव व्यञ्जकत्वम्। तद्वाचकानां वाचकत्वाद्भिन्नपदार्थज्ञानापेक्षा। व्यञ्जकानां तु सङ्गीतकाकलीकोलाहलादीनां रसादिव्यञ्जकत्वेन पदार्थप्रतिसन्धानाभावोऽपीत्युभयोर्भेदः।

तात्पर्यवृत्तौ च व्यङ्ग्यार्थबोधनमिति वादिनं प्रति दूषणान्तरमाह **किञ्चेति**। यत्परः शब्दः स शब्दार्थ इति न्यायेन व्यङ्ग्यस्य गुणीभावे शब्दस्य तत्परत्वाभावात्। व्यञ्जनानङ्गीकारे शब्दार्थत्वमनुपपन्नं स्यादिति कस्य व्यापारो संवेद्यः। पूर्वं व्यञ्जनादृत इति शेषः। ननु गतोऽस्तमर्क इत्यादिवाक्येन प्रकरणादिरूपज्ञापकान्तरसहायेन बोधितस्य कान्तमभिसरेत्यादिव्यङ्ग्यार्थस्य कथं शब्दप्रमाणबोध्यत्वं शब्दैकसमधिकत्वाभावादिति चेत् अत्र केचिदाहुः यथा शब्दस्य बोधितस्य क्वचिद्वाक्यस्यार्थस्य सत्यासत्यजिज्ञासायां सत्यमेवायं प्रोक्तवानित्यन्वभावेन साधिते सत्यत्वे यथा शब्दप्रमाणवेद्यत्वं तथा व्यङ्ग्यस्यापीति।[?] नैवम्। तथाहि। वाच्योऽर्थो यः शब्दप्रमाणविषयः तस्य क्वचित् सत्यासत्यजिज्ञासायां सत्यत्वमनुमानविषय इति शब्दानुमानप्रमाणयोर्भिन्नविषयत्वम्। व्यङ्ग्यस्त्वेक एव शब्दप्रमाणेन प्रकरणादिना च बोध्यत इति दृष्टान्तदार्ष्टान्तिकयोर्विषयभेदात् का गतिरिति चेत् अत्रैवं सङ्गतिः यथा प्रमाणादेर्विष्णुसिहाद्यनेकार्थस्यापि हर्यादेरेकविधधियोऽनवच्छेदकत्वम्, यथानेकव्यञ्जकस्यापि शब्दस्यैकव्यङ्ग्ये प्रकरणसाम्यस्येतिकर्त्तव्यतारूपतया शब्दस्याङ्गत्वं साङ्गस्य व्यवधायकत्वं न्यायसिद्धमेवेति न शब्दप्रामाण्यव्याकोपः। इह च यद्यपि वाक्यार्थस्य प्रतीत्यनन्तरं तस्य सत्यासत्यजिज्ञासायां प्रतिपाद्यत्वं प्रमाणान्तरेणार्थज्ञानेनैव बोध्यते तथापि सत्यासत्यजिज्ञासातः पूर्वंव्युत्पन्नाया वाक्यार्थप्रमाया अप्रमात्वाभावात् शब्दैकसमासगम्यत्वाच्च न शब्दप्रामाण्यव्याकोपः। न हि चक्षुरादिना प्रतीतौ सत्यासत्यजिज्ञासायां प्रत्यक्षप्रामाण्यं व्याकुप्यते।

ननु 'रामोऽस्मि सर्वं सहे' इति 'रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये नोचितम्' इति 'रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं पराम्' इत्यादौ लक्षणीयोऽप्यर्थो नानात्वं भजते विशेषव्यपदेशहेतुश्च भवति तदवगमश्च शब्दार्थायत्तः प्रकरणादिसव्यपेक्षश्चेति कोऽयं नूतनः प्रतीयमानो नाम।

उच्यते–लक्षणीयस्यार्थस्य नानात्वेऽपि, अनेकार्थशब्दाभिधेयवन्नियतत्वमेव । न खलु मुख्येनार्थेनानियतसम्बन्धो लक्षयितुं शक्यते । प्रतीयमानस्तु प्रकरणादिविशेषवशेन नियत-सम्बन्धः अनियतसम्बन्धः सम्बद्धसम्बन्धश्च द्योत्यते ।

न च

अत्ता एत्थ णिमज्जइ एत्थ अहं दिअहए पलोएहि ।
मा पहिअ रत्तिअन्धअ सेज्जाए मह णिमज्जहिसि ॥१३६॥

इत्यादौ विवक्षितान्यपरवाच्ये ध्वनौ मुख्यार्थबाधः । तत्कथमत्र लक्षणा । लक्षणायामपि व्यञ्जनमवश्यमाश्रयितव्यमिति प्रतिपादितम् ।

यथा च समयसव्यपेक्षाऽभिधा तथा मुख्यार्थबाधादित्रयसमयविशेषसव्यपेक्षा लक्षणा अत एवाभिधापुच्छभूता सेत्याहुः ।

बालचित्तानुरञ्जनी–ननु यथा व्यङ्ग्यः प्रकरणादिबलादनेकस्तथा लक्ष्योऽपीति, तत्र व्यङ्ग्य-स्यान्तर्भावो भविष्यतीति शङ्कते **नन्विति** ।

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति ह हा हा देवि धीरा भव ॥

इति श्लोके रामोऽस्मीत्यत्र कठिनहृदयत्वं वनवासादिदुःखभाजनत्वञ्चेत्यादिरनन्तो लक्ष्योऽर्थः ।

प्रत्याख्यानरुषः कृतं समुचितं क्रूरेण ते रक्षसा
सोढं तच्च तथा त्वया कुलजनो धत्ते यथोच्चैः शिरः ।
व्यर्थं सम्प्रति बिभ्रता धनुरिदं त्वद्व्यापदः साक्षिणा
रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये नोचितम् ॥

इति श्लोके, रामेण प्रियजीवितेत्यत्र कातरत्वं, कैतवस्नेहत्वं वेत्यादिर्लक्ष्योऽर्थः। 'रामोऽसावि'त्यत्र सर्वलोकातिशायित्वं खरदूषणादिराक्षसहिंसानिपुणत्वं लक्ष्योऽर्थ इति लक्ष्योऽर्थो नानाविध इत्यर्थः । यथा व्यङ्ग्यबोद्धृव्यंञ्जक इति व्यपदेशस्तथा लक्ष्यार्थबोद्धृलक्षक इति विशेषव्यपदेश इत्यपि समानम् । अतो व्यङ्ग्यं लक्ष्येऽन्तर्भवतीति न व्यङ्ग्यं पृथगिति भावः ।

व्यङ्ग्यलक्ष्ययोर्भेदं दर्शयन् परिहरति–**उच्यत इति** । व्यङ्ग्यवल्लक्षणोयो नानाविधो गोशब्दार्थवन्नियतसम्बन्ध एव । यथा गङ्गायां घोष इत्यादौ मुख्येन गङ्गाशब्दार्थेन तटादिर्लक्ष्यते न तथा पावनत्वादिरपि अनियतसम्बन्धो लक्षयितुं शक्यत इति उक्तमेवार्थं विशदयति **न खल्विति** । व्यङ्ग्योऽर्थस्तावदेवंविधो न भवतीत्याह **प्रतीयमानस्त्विति** ।

यत्र यत्र व्यङ्ग्यप्रतीतिस्तत्र लक्षणा न भवतीत्याह **न चेति** ।

अत्ता एट्ठ णुमज्जइ एट्ठ अहं दिअसअं पुलोएहि ।
मा पहिअ रत्तिअंधअ सेज्जाए महं णुमज्जिहिसि ।।
श्वश्रूरत्र निषीदति अत्राहं दिवसकं विलोकय ।
मा पथिक रात्र्यन्ध ! शय्यायामावयोर्निषीदसि ।।

अत्र च न मुख्यार्थबाध इत्यन्वयः । मुख्यार्थबाधाभावादत्र लक्षणा नास्तीत्यर्थः । किञ्च प्रयोजनं विना लक्षणाया नोपयोग इति लक्षणायामपि व्यञ्जनाव्यापारोऽङ्गीकर्तव्य इति प्राक् प्रतिपादितम् । अतस्तयोर्भेदोऽङ्गीकर्तव्य इत्याह **लक्षणायामपीति** ।

ननूभयोर्नियतत्वानियतत्वरूपात्तत्र भेदोऽस्तु नानात्वभजनादिना धर्मेणाभेदः किं न स्यादित्यत आह **यथा चेति** । अभिहितान्वयपक्षमाश्रित्य मुख्यार्थबाधादित्रयमेव समय इत्युक्तम् । यथा अभिधालक्षणयोः सङ्केतापेक्षत्वसाम्येऽपि मुख्यार्थबाधादित्रयरूपसङ्केतविशेषादिना भेदस्तथा लक्षणाव्यञ्जनयोरपि नानात्वभजनादिधर्मसाम्येऽपि नियतत्वानियतत्वरूपावान्तरभेदेन भेद इति भावः । अभिधालक्षणयोर्भेदकमाह **अत एवेति** । यत उभयोर्भेदः, अतः मुख्यया वृत्त्या सङ्केतग्रहणमपि तत्रास्तीति अभिधाशेषभूता लक्षणा । उभयोरभेदे शेषशेषिभावो न स्यादिति भावः । व्यञ्जना लक्षणैवेति यदुक्तं तद्दूषयति **न चेति** ।

सारबोधिनी––ननु व्यङ्ग्येषु नानात्वमर्थान्तरसङ्क्रमितवाच्यध्वनित्वादिविशेषव्यपदेशविषयत्वं शब्दार्थाधीनत्वं प्रकरणादिसव्यपेक्षत्वमिति धर्मा दृश्यन्ते, ते च लक्ष्येष्वपीति व्यङ्ग्या लक्ष्या एवेत्याह **रामोऽस्मीति** । 'रामोऽस्मी'त्यत्र दुःखसहिष्णुत्वेन, 'रामेण'त्यत्र निःस्नेहत्वेन 'रामोऽसावि'त्यत्र विविधगुणाश्रयत्वेन प्रतीतेर्नानात्वमित्यर्थः । विशेषव्यपदेशाः अर्थान्तरसङ्क्रमितवाच्यादयो लक्षणाहेतुविषयाः । लक्ष्यस्यावगमः लक्षणया शब्देन प्रतिपाद्यत्वात् । यतः मुख्यार्थबाधज्ञाने मुख्यार्थज्ञानस्यावश्यकतया प्रकरणादितात्पर्यग्राहकत्वेन तस्यापेक्षणीयत्वात् । तात्पर्यानुपपत्तेरेव लक्षणाबीजत्वात् । तस्माल्लक्ष्ये वैधर्म्यानाश्रयत्वेन लक्ष्यतो न तद्भेद इत्याह **कोऽयमिति** । प्रतीयमानो व्यङ्ग्यः ।

सिद्धान्तयति **उच्यत इति** । **अनेकार्थशब्दाभिधेयवदिति** । भद्रात्मन इत्यादिवदित्यर्थः । नियतत्वं नियतसम्बन्धत्वम्, वाच्यावाच्ययोरेकप्रतिपाद्यविषयत्वम् । तच्चानुपदं विवेचयिष्यते । **सम्बन्ध इति** । सम्बन्धपरम्पराश्रयत्वेन प्रतीतिपरम्पराविषय इत्यर्थः ।

कथं च मुख्यार्थबाधं विना लक्षणेत्याह **अत्ता एत्थेति** । स्वयंदूत्या इयमुक्तिः । निमज्जति जरातुरत्वेन निष्पंदं निःशब्दं शेते । अहमित्यावयोरर्थे निपातः । अन्यथा स्वमात्रोट्टङ्कने रहस्यप्रकाशः स्यादिति लोचनकारः । वस्तुतस्तु ममेत्येवार्थः स्यातीव शङ्केति । ममेति विशिष्योक्तिरिति भावः । अत्र गृहे श्वश्रूरहं च । श्वश्रूरिति जरात्वेन निष्पन्दा । जनान्तरसञ्चारो नास्ति । यथेच्छं व्यवहरेति । ध्वनिव्यङ्ग्यपक्षे मा शब्दोऽन्धत्वनिषेधे । अरात्र्यन्ध पथिक ! ममैव शय्यायां पतिष्यसीत्यभिप्रायः ।

न च मुख्यार्थान्वयानुपपत्तिः । ननु तात्पर्यविषयानुपपत्तिरस्त्येवेत्यत आह **लक्षणायामपीति** । प्रतिपादितं लक्षणाग्रन्थे । तत्र प्रयोजनस्यावश्यकत्वात् । तस्य च व्यापारान्तरानवगमत्वात् । **तदर्थं**

व्यञ्जनावश्यकत्वे अन्यत्रापि तस्यौचित्यात् । वस्तुतस्तु, व्यञ्जकवाक्यस्य वाक्यान्तराद्वैलक्षण्यं प्रतीयते । तत्र चाभिधादितोऽर्थोपस्थितौ यावती सामग्री तावती न व्यङ्ग्योपस्थिताविति स्थिते सहकारिविशेषे कल्पनीये अभिधाया एव तत्कल्प्यते चेत् तदा स्वभावभङ्ग इत्यगत्या वृत्त्यन्तरं कल्प्यते । अन्यथा मुख्यार्थबाधादिसहकारेणाभिधयैव लक्ष्यार्थोपस्थितिसंभवे लक्षणापि वृत्त्यन्तरेण न सिद्ध्येदिति भावः ।

नवीनास्तु, पदपदार्थभिन्ना व्यञ्जना नाम काचिद्वृत्तिरङ्गीक्रियत इति न ब्रूमः, किन्तु यो व्यापारः सत्यपि बाधाद्यवतारे विनापि तात्पर्यज्ञानं वक्तृबोद्धव्यादिवैशिष्टयेन बोधयति सैव व्यञ्जना, शक्तिलक्षणयोर्वैधर्म्यादित्याहुः ।

नन्वस्तु, निरूढलक्षणावत् सर्वत्र न तदपेक्षेत्यत आह—**यथा चेति** । समयः सङ्केतः । मुख्यार्थबाधे प्रयोजनप्रतिपत्तये मुख्यार्थसंबन्धो बोद्धव्य इति व्युत्पादनम् । तदाह **समयविशेषेति** । मुख्यार्थबाधादिना विशेषणाद्विशेषः । न चैवं, व्यञ्जनया सामान्यविशेषसङ्केतरहितस्यापि बोधनात् । **पुच्छभूता** पृष्ठलग्ना । शक्यसम्बन्धस्य लक्षणात्वे तन्निरूप्येत्यर्थः । यद्वा, यतो मुख्यार्थानन्तरमेव लक्षणेत्यर्थः ।

काव्यप्रकाशदर्पणः—एवं व्यङ्ग्यस्य वाच्यत्वं तात्पर्यविषयत्वं च निराकृत्य लक्ष्यत्वसंभावनां निराचिकीर्षुराशङ्कते नन्वित्यादिना **प्रतीयमानो** नामेत्यन्तेन ग्रन्थेन ।

रामोऽस्मीत्यादौ राज्यभ्रंशक्लेशसहिष्णुतादयः ।

प्रत्याख्यानरुचेः कृतं समुदितं क्रूरेण यद्रक्षसा
सोढं तच्च तथा त्वया कुलजनो धत्ते यथोच्चैः शिरः ।
व्यर्थं सम्प्रति बिभ्रता धनुरिदं त्वद्व्यापदः साक्षिणा
रामेण प्रियजीवितेन नु कृतं प्रेम्णः प्रिये नोचितम् ॥

इत्यत्र मायासीतादर्शने साहसैकरसिकत्वदुष्कृतफलभोक्तृत्वादयः । रामोऽस्मीत्यादाव लौकिकप्रभावत्वादयो **रामपदेन** लक्ष्यन्त एवेति भवतामपि मतं प्रकरणादिसाचिव्येन उक्तरीत्या नानाविधे प्राधान्यादिना धर्म्या पदेत्यादि व्यपदेश्यबीजं [?] वाच्यस्यार्थान्तरसङ्क्रमणादिनाऽर्थान्तरसङ्क्रमितवाच्यत्वादिव्यपदेहेतुः । अर्थोऽभिधेयः । एवञ्चोक्तस्य सर्वस्य व्यङ्ग्यप्रकारस्य लाक्षणिकेऽप्युपपत्तेः तदतिरिक्तः कोऽयं नूतनः प्राचीनतन्त्राप्रसिद्ध असाम्प्रदायिषु [?] प्रतीयमानो नाम ?

प्रकाश्य सिद्धान्तमाह—नियतत्वं नियतसम्बन्धत्वम् । एतदेवाह **न खल्विति** । वाच्यार्थव्यङ्ग्यार्थयोः-सम्बन्धस्य नियतत्वानियतत्वे एतदुदाहरणव्याख्याने स्फुटीकरिष्यति **न चेति** । न च मुख्यार्थबाध इति सम्बन्धः । किन्तु वाच्यवाचकभावाव्युत्पन्नः स्वयमेव मुख्यार्थस्यान्वयानुपपत्तौ अन्वययोग्यमर्थं लक्षयति । व्यञ्जनायास्तु ज्ञायमानप्रतिनियतानिमित्तसापेक्षविरहात् कथं लक्षणाभावः । सुहृद्भूता सा लक्षणा । तदनुगमेन तस्या लक्षणायाः पश्चाद्व्याप्रियमाणतया अवाचकवर्णानुमित्यादयः ।

आदि शब्दादधोमुखत्वादि भङ्गादि । एवमुक्तं सर्वमेव कारणार्थमुपसंहरति **इतीति** । अतिवर्ती अतिक्रान्तो विषयः । अनपह्नवनीयः अपह्नोतुमशक्यः ।

न च लक्षणात्मकमेव ध्वननम् तदनुगमेन तस्य दर्शनात् । न च तदनुगतमेव, अभिधावलम्बनेनापि तस्य भावात् । न चोभयानुसार्येव, अवाचकवर्णानुसारेणापि तस्य दृष्टेः । न च शब्दानुसार्येव । अशब्दात्मकनेत्रत्रिभागावलोकनादिगतत्वेनापि तस्य प्रसिद्धेः, इति अभिधातात्पर्यलक्षणात्मकव्यापारत्रयातिवर्ती ध्वननादिपर्यायो व्यापारोऽनपह्नवनीय एव ।

तत्र 'अत्ता एत्थ' इत्यादौ नियतसम्बन्धः, 'कस्स व ण होइ रोसो' इत्यादौ, अनियतसम्बन्धः ।

विपरीअरए लच्छी बम्हं दट्ठूण णाहिकमलट्ठं ।
हरिणो दाहिणणअणं रसाउला झत्ति ढक्केइ ॥१३७॥

इत्यादौ सम्बद्धसम्बन्धः । अत्र हि हरिपदेन दक्षिणनयनस्य सूर्यात्मकता व्यज्यते तन्निमीलनेन सूर्यास्तमयः, तेन पद्मस्य सङ्कोचः । ततो ब्रह्मणः स्थगनम् तत्र सति गोप्याङ्गस्यादर्शनेन अनिर्यन्त्रणं निधुवनविलसितमिति ।

'अखण्डबुद्धिनिर्ग्राह्यो वाक्यार्थ एव वाच्यः, वाक्यमेव च वाचकम्' इति येऽप्याहुः तैरप्यविद्यापदपतितैः पदपदार्थकल्पना कर्तव्यैवेति तत्पक्षेऽप्यवश्यमुक्तोदाहरणादौ विध्यादिर्व्यङ्ग्य एव ।

बालचित्तानुरञ्जनी—व्यञ्जना लक्षणैवेति यदुक्तं तद् दूषयति-**न चेति** । व्यञ्जनाया लक्षणात्मकत्वं अनुगममात्रात् साध्यते । नियतानुगमाद्वेति विकल्प्याद्यं दूषयति तदिति । तदनुगमेन लक्षणानुगमनेन तस्या व्यञ्जनाया अनुगममात्रात्तदात्मकत्वे साध्यमाने अतिप्रसङ्ग इति भावः । द्वितीयं दूषयति, **चेति** । विवक्षितान्यपरवाच्ये ध्वनौ अभिधामूलत्वेन ध्वननत्वसंभवात् न लक्षणानुगतमेव ध्वननमित्यर्थः । अस्तु तर्हि ध्वननमभिधालक्षणानुगतमेवेत्याह **न चोभयेति** । ललितपरुषादिवर्णानुप्रासस्य अर्थाभिधानानुपयोगिनोऽपि रसं प्रति व्यञ्जकत्वदर्शनात् न ध्वननमुभयानुगतमेवेत्यर्थः । अस्तु तर्हि वर्णानुसारेण ध्वननम् तत्राह **न च शब्देति** । अशब्दात्मकं यन्नेत्रविभागेन विलोकनादि तद्गतत्वेनापि तस्य ध्वननस्य प्रसिद्धेर्दर्शनात् न ध्वननं वर्णानुगतमेवेत्यर्थः । "मय्यासक्तश्चकितहरिणीहारिनेत्रत्रिभागः" इत्यत्र गुरुजनमवधीर्यापि साभिलाषगर्भमन्थरं विलोकितवतीति स्मरणे विप्रलम्भोद्दीपनम् । आदिशब्देन अधोवक्त्रत्वकुचकम्पनवाष्पावेशादि गृह्यते । व्यञ्जनस्याभिधादिव्यतिरेकसाधनमुपसंहरति **इतीति** । शब्दस्य मुख्यो व्यापारः अभिधा वाच्यार्थव्यापारस्तात्पर्यं, लक्षणीयव्यापारो लक्षणेति त्रिविधात्मकं यद्व्यापारत्रयं तदतिवर्ति **"कस्स व ण होइ"** इत्यादौ सतीत्वप्रकटनादिव्यङ्ग्यं, सपत्नीप्रभृतीनां चान्यदिति अनियतसम्बन्धः । **विपरी अरए इत्यादि** । लच्छी लक्ष्मीः । विपरीअरए विपरीतसुरते उपरिसुरत इत्यर्थः । णाहिकमलट्ठं नाभिकमलस्थं वलं लल्लाणं, बम्हं ब्राह्मणं ? दट्ठूण दृष्ट्वा, रसाउला रसाकुला सती, हरिणो हरेः दाहिणणयणं दक्षिणनयनं, कडिति झडिति छेइ छादयति स्थगयति । दाहिणेति न वा तीर्थदुःखदक्षिणदीर्षे इति [?] सूत्रेण क्षशब्दस्य हत्वे हेदक्षिणेऽस्येति सूत्रेण दीर्घत्वे दक्षिणमिति भवति । पक्षे दक्षिणमिति "छदेर्णुमनुमोवालढंकयख्वासंनुमा" [?] इति सूत्रेण छदेर्ढंकादेशः । वालदलोदशतृष्विति [?] एत्वम् । अत्र

सम्बद्धसम्बन्धत्वं व्यङ्ग्यस्य दर्शयति । अहोति । अत्र सम्बद्धस्य व्यङ्ग्यस्यार्थस्य सूर्यात्मकस्य सम्बन्धोऽपरो व्यङ्ग्योऽर्थः सूर्यास्तमयरूपः । तस्य च पद्मसङ्कोचरूपोऽपरः सम्बन्धः । ततो ब्रह्मणः स्थगनं, तस्मिंश्च सति गोप्याङ्गस्यादर्शनेन निर्लज्जरतप्रवृत्तिरित्यर्थः ।

ननु "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादौ धर्मिधर्मभावाभावात् अखण्डः परब्रह्मात्मको वाक्यार्थ एव वाच्यः, अखण्डवाक्यमेव वाचकमिति ब्रह्मवादिनः उपनिषदः शब्दब्रह्मवादिनो भर्तृहरिप्रभृतयश्च कथयन्ति । अतो विध्यादिव्यङ्ग्यो वाच्य एवेति शङ्कते अखण्डेति । अखण्डया बुद्ध्या नितरां ग्राह्यो वाक्यार्थ एव वाच्यः, अखण्डवाक्यमेव वाचकमित्यर्थः । तैरपि देशकालावच्छेदेन अशेषव्यवहर्तृनिष्ठतया कल्पितपदपदार्थसंश्रयेण वाच्यवाचकल्पना तैरपि क्रियत एवेति तन्मतेऽपि शब्दस्यार्थान्तरप्रतीतौ व्यञ्जकत्वमेवाङ्गीकर्तव्यमिति परिहरति तैरपीति । अविद्यापदं व्यवहारमार्गः । उक्तोदाहरणादौ निःशेषच्युतेत्यादौ विध्यादिः तदन्तिकमेव रन्तुं गतासीत्यादिरूपः ।

सारबोधिनी—लक्षणाव्यञ्जनयोर्भेदमाह **न चेति** । तदनुगमनेन तदुपजीवनेन, लक्ष्यार्थं प्रत्याय्य विरतायां तस्यामित्यर्थः । अभिधाया आलम्बनं नानार्थव्यञ्जनायां सम्बद्धत्वेनाश्रयणात् । **नियतसम्बन्ध इति** । नियतसम्बन्धत्वं वाच्यव्यङ्ग्ययोरेकबोधृविषयत्वम् । वाच्यव्यङ्ग्यप्रतीत्योरेकाधिकरणत्वमिति यावत् । 'अत्ता एत्थे'त्यत्र तस्य सत्त्वं द्वयोः पथिकरूपैकाधिकरणत्वात् । "कस्स व" इत्यादौ तदभावः । सखीकान्तादिगतेत्वनाधिकरणभेदात् । लक्षणायान्तु नियतसम्बन्धत्वम् । यस्यैव वाच्योपस्थितिस्तस्यैव तद्बाधेन लक्ष्योपस्थितिस्वीकारात् ।

विवरीअ इति ।

विपरीतरतौ लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थम् ।
हरेर्दक्षिणनयनञ्च रसाकुलत्वाज्झटिति स्थगयति ॥

सम्बद्धसम्बन्धः । निर्वाह्यनिर्वाहकतया सन्तानीभूय व्यङ्ग्य इत्यर्थः । **हरिपदेनेति** । हरेर्दक्षिणवामनयनयोः सूर्यचन्द्रात्मकत्वेन प्रसिद्धत्वात् । किमत आह **तन्निमीलनेनेति** । निमीलनमाच्छादनम् । अस्तमयोऽप्रकाशः । सङ्कोचो मुद्रणम् । स्थगनं पिधानम् । तत्र स्थगने अदर्शने ब्रह्मणोऽनियन्त्रणमाश्वस्तम् ।

वेदान्तिभिरपि दशाविशेषे व्यञ्जनाङ्गीकरणीयैवेत्याह अथाखण्डबुद्धीत्यादि । अविशिष्टरत्यादिजनितयाखण्डबुद्ध्या निर्ग्राह्यः परब्रह्मात्मको वाक्यार्थ एव वाच्यः अखण्डमेव वाक्यं वाचकं तद्व्यङ्ग्यो वाच्य एवेति पौर्वापर्यनिकशब्दप्रकाशितं एकं वेदान्तनिष्णा "तास्तमखण्डं प्रपेदिरेत्यादि" शब्दं ज्ञानमनन्त"मिति वाक्यमेव वाचकमिति । वाचकं एतादृशबुद्धिनिमित्तम् । यदाहुर्ग्रासपादाः—"अनवयवमेव वाक्यमनाद्यविद्योपदर्शितालीकपदवर्णविभागमस्या निमित्तम् ।" अस्याः बुद्धेः । केचित्तु—अखण्डबुद्धिर्महावाक्यबुद्धिस्तया निर्ग्राह्यो महावाक्यार्थः स एव वाच्यः इत्याहुः । वाक्यमेव वाचकम् एतद्व्यङ्ग्योऽपीति वेदान्तैकदेशिमतं निराकरोति तैरपीति । अविद्यापदं व्यवहारमार्गमाह । अन्यथा व्युत्पन्नाव्युत्पन्नव्यवहारो न स्यात् । तत्तद्विशेषपदार्थोपस्थितिश्च न स्यात् । अविद्यापदे च तेषां सद्भावस्तत्र व्यञ्जना स्थापितेति ।

काव्यप्रकाशदर्पण:–श्वश्रूरत्र निषीदति अत्राहं दिवसं प्रलोकय ।
मा पथिक ! रात्र्यन्ध शय्यायां मम निषीद ।।

दिवसमिति काले कर्म्म । कथमत्र लक्षणा । मुख्यार्थबाधजीवितेत्यर्थः । प्रतिपादितं लक्षणानिरूपणप्रस्तावे । तथेति । समयविशेषः समप्रायो विशेष्यव्यञ्जनातो वैलक्षण्यम् । यद्यपि प्रयोजनलक्षणायां प्रयोजनस्य लाक्षणिकप्रतीतिकार्यत्वात् मुख्यार्थबाधसंबन्धयोरेव प्रथमं परिज्ञानं तथापि रूढिलक्षणाद्युपात्तत्रितयपरिज्ञानस्य पूर्वं संभवात् । लक्षणाजातीयसंभवमात्रेण किमप्यत्र प्रयोजनं भविष्यतीति प्रतीतेर्बुद्धिस्थतया चोक्तं मुख्यार्थबाधत्रितयेति । न खल्वत्र वाचकवन्मुख्यार्थबाधादिना परार्थो ज्ञेय इति संबध्यते । विषयान्तरप्रतिपादनव्यग्रतया पूर्वमदर्शितानि [नि] यतसंबन्धा [दी ?]न्युदाहरणानि दर्शयन् आह तत्रेति । नियताः संबन्धाः, वाच्यव्यङ्ग्ययोरेकविषयत्वात् । "कस्स व न होइ" इत्यादौ तु वाच्यार्थः सखीविषयः व्यङ्ग्यार्थस्तु तत्तत्प्रतिविषय इत्युभयोर्भिन्नविषयसंबन्धादनियतः । यद्वा प्रथमे तत्तद्वाच्यत्वात् तत्तद्व्यङ्ग्यार्थस्य एकरूपेण प्रतीतेः सार्वत्रिकत्वात् संबन्धो नियतः [?] । 'कस्स ण व होइ' इत्यादौ व्यङ्ग्यार्थस्य संभवे त्वसत्यतयावगतिः अन्येषां तु लिख्याहेनैवेत्यनियतः [?] । एवमेव हि संबन्धस्यानियतत्वं सर्वथा संबन्धनियमत्वाभि तोरे व्यञ्जने अतिप्रसङ्गः स्यात् [?] ।

विपरीतरते लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थम् ।
हरेर्दक्षिणनयनं रसाकुला झटिति स्थगयति ।।

अत्र वाच्येन प्रथमव्यङ्ग्यस्य संबन्धः । अयमर्थः । सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतिवाक्येन ब्रह्मणो निर्धर्मकत्वात् सत्यादिभेदेन खण्डशो धर्मप्रतिपत्तिविरहात् अविभक्त एवेत्यर्थः प्रकाश्यते । तन्वीत्या वाक्यान्तरेणापत्तिः [?] । येऽप्याहुः, वेदान्तिन इत्यर्थः । आरिसापादयाता[?]तैर्व्यवहारदशायां पदपदार्थकल्पना कर्तव्यैव । अन्यथा पदपदार्थव्याकोपे व्युत्पन्नाव्युत्पन्नयोर्विशेषः [न] स्यात् । उक्तोदाहरणं निःशेषच्युतेति । व्यङ्ग्य एव भट्टपक्षोक्तयुक्त्येति विशेषः । तेषां हि व्यवहारे भट्टनयः । किञ्चैषां मते सदानन्दस्वरूपब्रह्मणः अभिधाया विषयः शक्यतागोचरत्वात् । नापि लक्षणायाः सामग्रीविरहात् । नहि एतस्य तात्पर्यस्य अपदार्थस्य, सर्गमात्रनैयत्यात् । नाप्यनुमानस्य, व्याप्तिग्रहाभावात् । श्रुतेः प्रामाण्यात् इत्यन्यवृत्त्यादिभाषाव्यपदेश्यं तत्प्रकाशकं यद् व्यापारान्तरमङ्गीकृतं वेदान्तिभिस्तदेव व्यञ्जनादिव्यपदेश्यमस्माकं काव्योपनिषदानामिति [?] निर्विवादम् ।

ननु वाच्यादसम्बद्धं तावन्न प्रतीयते यतः कुतश्चित् यस्य कस्यचिदर्थस्य प्रतीतेः प्रसङ्गात् । एवञ्च सम्बन्धात् व्यङ्ग्यव्यञ्जकभावोऽप्रतिबन्धेऽवश्यं न भवतीति व्याप्तत्वेन नियतधर्मिनिष्ठत्वेन च त्रिरूपाल्लिङ्गाल्लिङ्गिज्ञानमनुमानं यत् तद्रूपः पर्यवस्यति । तथाहि–

"भम धम्मिअ वीसद्धो सो सुणओ अज्ज मारिओ तेण ।
गोलाणइकच्छकुडंगवासिणा दरिअसीहेण ।।१३८।।

अत्र गृहे श्वनिवृत्त्या भ्रमणं विहितं गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयति। यत् यत् भीरुभ्रमणं तत्तद्भयकारणनिवृत्त्युपलब्धिपूर्वकं गोदावरीतीरे च सिंहोपलब्धिरिति व्यापकविरुद्धोपलब्धिः।

अत्रोच्यते—भीरुरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागेण, अन्येन चैवंभूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनैकान्तिको हेतुः शुनो बिभ्यदपि वीरत्वेन सिंहान्न बिभेतीति विरुद्धोऽपि गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा न निश्चितः अपि तु वचनात् न च वचनस्य प्रामाण्यमस्ति, अर्थेनाप्रतिबन्धादित्यसिद्धश्च तत्कथमेवंविधाद्धेतोः साध्यसिद्धिः।

तथा 'निःशेषच्युते'त्यादौ गमकतया यानि चन्दनच्यवनादीन्युपात्तानि तानि कारणान्तरतोऽपि भवन्ति। अतश्चात्रैव स्नानकार्यत्वेनोक्तानीति नोपभोग एव प्रतिबद्धानीत्यनैकान्तिकानि।

व्यक्तिवादिना चाधमपदसहायानामेषां व्यञ्जकत्वमुक्तम्। न चात्राधमत्वं प्रमाणप्रतिपन्नमिति कथमनुमानम्। एवंविधादर्थादेवंविधोऽर्थ उपपत्त्यनपेक्षत्वेऽपि प्रकाशते इति व्यक्तिवादिनः पुनस्तत् अदूषणम्।

इति काव्यप्रकाशे ध्वनिगुणीभूतव्यङ्ग्यसङ्कीर्णभेदनिर्णयो नाम पञ्चम उल्लासः।

बालचित्तानुरञ्जनी—व्यञ्जकत्वं शब्दानां गमकत्वम् वाक्यार्थप्रतीतिपूर्विका व्यङ्ग्यार्थप्रतीतिः, वाच्योऽर्थो लिङ्गरूपः, व्यङ्ग्योऽर्थो लिङ्गिरूप इति व्यङ्ग्यव्यञ्जकभावो लिङ्गिलिङ्गभाव एवेति व्यक्तिविवेककारमतमवलम्ब्य पूर्वपक्षमाह **वाच्यादिति**। वाच्यादर्थादसम्बद्धं वस्तु न प्रतीयते। असम्बद्धमपि यदि प्रतीयते तदा यतः कुतश्चिच्छब्दाद्यस्य कस्यचिदर्थस्य प्रतीतिः स्यादित्यतिप्रसङ्गमाह **यतः कुतश्चिदिति**। वाच्यसम्बद्धस्यैव प्रतीतिरस्तु प्रकृते किमागतं तत्राह **एवञ्चेति**। प्रतिबन्धो व्याप्तिः। अप्रतिबन्धस्तदभावः। व्याप्तत्वेनेत्यनेन सपक्षसत्त्वं, नियतेत्यनेन विपक्षाद्व्यावृत्तिः, धर्मिनिष्ठत्वेनेत्यनेन पक्षधर्मत्वमुक्तम्। अथवा व्याप्तत्वेनेत्यनेनैव पक्षधर्मत्वं सपक्षे सत्त्वञ्च दर्शितम्। तद्रूपः अनुमानरूप एवायं व्यङ्ग्यव्यञ्जकभावः पर्यवस्यतीति भावः। तथा चोक्तम्

'अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम्।
व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम्॥' इति।

तदेतदनुमानं ध्वनिकारोक्ते ध्वनेरुदाहरणे योजयति **तथा हीति**। धम्मिअ धार्मिक। हे धार्मिक वीसद्धो विस्रब्धं यथा तथा भम भ्रम चरेत्यर्थः। कुत इत्याकाङ्क्षायामाह **अद्येति**। यच्छुवा [यः श्वा]

दुःशीलो निवसति सः श्वा मारित इति श्वनिवृत्त्या अत्र गृहे भ्रमेति धार्मिकभ्रमणं विहितं तत् वाच्यं, गोदावरीतीरे मा भ्रमेति प्रतीयमानमनुमानगम्यं, गोदावरीतीरं भीरुभ्रमणयोग्यं न भवति भयानकाक्रान्तत्वात् सम्प्रतिपन्नवदित्यनुमानस्य व्यतिरेकव्याप्तौ भीरुभ्रमणं गोदावरीतीरे श्वभ्रमणमनुमापयतीत्यर्थः। तामेव व्यतिरेकव्याप्तिमाह **यद्यदिति**।

एवं व्यतिरेकव्याप्तिमभिधायान्वयव्याप्तिं दर्शयति **गोदावरीति**। व्यतिरेकव्याप्तौ यद्व्यापकं भयकारणनिवृत्तिरूपं तद्विरुद्धं भयकारणाक्रान्तत्वं, तस्योपलब्धिः। यद्यद्भयकारणाक्रान्तं तत्तद्भीरुभ्रमणयोग्यं न भवति। यथा सम्प्रतिपन्नमित्यन्वयव्याप्तिः। अतोऽन्वयव्यतिरेक्यनुमानेन गोदावरीतीरे मा भ्रमेत्यस्यार्थस्य सिद्धत्वान्न व्यङ्ग्यं पृथक्कल्पनीयमित्यर्थः। सिद्धान्तं प्रतिजानीते **अत्रेति**। गोदावरीतीरं भीरुभ्रमणयोग्यं न भवति भयानकाक्रान्तत्वादित्ययं हेतुः पक्षत्रयवृत्तित्वादनैकान्तिकः। न केवलमनैकान्तिकः विरुद्धोऽपीत्याह **शुन इति**। यथा श्वभीतभ्रमणयोग्यं न भवति सिंहाक्रान्तत्वादिति प्रयोगस्तथा तावत्पक्षे वर्तते श्वभीरुगुरुपभ्रमणर्गाविशिष्टसङ्ग्रामादौ सपक्षे [वर्तते] न च वर्तते विपक्षे पर्वतादौ। श्वभीतोऽपि वीरत्वात्सिंहाद्बिभ्यद् भ्रमतीति पक्षविपक्षयोरेव वर्तमानो हेतुः विरुद्ध इत्यर्थः। किंचासिद्धोऽपीत्याह **गोदावरीति**। सिंहाक्रान्तत्वादिति हेतुरसिद्धः, प्रत्यक्षानुमानाभ्यामनिश्चितत्वात्। न च वचनेन सिद्धिरिति वाच्यम्। वचनस्य कुलटोक्तत्वेनार्थव्यभिचारादिति भावः। उक्तमर्थमुपसंहरति **तदिति**। तत्तस्मात्कारणात् एवंविधात् अनैकान्तिकादिदोषसहितात् कथं साध्यसिद्धिः, न कथञ्चिदपीत्यर्थः।

इदानीं व्यङ्ग्यानामनुमेयत्वं नास्तीति स्थलान्तरेण दर्शयन्नाह **तथेति**। कारणान्तरतः स्नानादिरूपकारणान्तरात्। अस्त्वेवं ततः किं तत्राह **अतश्चेति**। स्नानं कारणम्, तत्कार्यत्वेनोक्तानि चन्दनच्यवनादीनीति उपभोगे प्रतिबद्धानि विनाभूतानि न भवन्तीत्यनैकान्तिकानीत्यर्थः। एवंविधस्थले अनुमा न प्रवर्तत इति वक्तुं व्यञ्जनवादिना उक्तं गमकत्वमाह **व्यक्तीति**। व्यक्तिवादिना व्यञ्जनव्यापारवादिना एषां चन्दनच्यवनादीनां व्यञ्जकत्वं गमकत्वमित्यर्थः। अस्त्वेवं कथमनुमानं नेत्यत आह **न चात्रेति**, प्रत्यक्षादिप्रमाणमनुमानाङ्गं धूमादिवत्। न चात्राधमत्वं प्रमाणसिद्धम् अतो नानुमानमित्यर्थः। ननु प्रमाणाप्रतिपन्नेन वस्तुना व्यञ्जनसिद्धिरपि कथं तत्राह **एवंविधादिति**। एवंविधान्निश्चितादनिश्चिताद्वा अर्थात् एवंविधोऽर्थः निश्चितः अनिश्चितो वार्थः उत्पत्त्यनपेक्षत्वेऽपि युक्तिशून्यत्वेऽपि व्यङ्ग्यस्य प्रतीतिमात्रपर्यवसायित्वात् सत्यासत्यनिरूपणं विनैव प्रकाशते, नानुमानमेवंविधम्, अतः शब्दव्यञ्जनव्यापारः पृथगङ्गीकर्तव्य इति भावः। तत्र प्रमाणाप्रतिपन्नत्वम्।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसरस्वतीतीर्थविरचितायां काव्यप्रकाशटीकायां पञ्चमोल्लासः।

सारबोधिनी—अथानुमानाद् व्यङ्ग्यप्रतीतिरिति महिमभट्टमतमाह **वाच्यादिति**। यद्यप्यनुमितौ नियतसम्बन्धस्यापेक्षणीयत्वम् व्यञ्जनायां तदनैयत्यम् संभावनमात्रादेव तदुपपत्तेः तथापि मया तत्रापि व्याप्तिः साधनीया इति पूर्वपक्षिणोऽभिप्रायः। तावच्छब्देन व्यक्तिवादिनोऽपि नात्र विप्रतिपत्तिरिति दर्शितम्। प्रतिबन्धः प्रतिनियतो बन्धः सम्बन्धः नियतसम्बन्ध इत्यर्थः। अवश्यं नियमेन सहृदयानां तु व्यङ्ग्यप्रतीतिर्नियतैवेत्यर्थः। व्याप्तत्वेनेत्यनेन सपक्षसत्त्वं, नियतेत्यनेन विपक्षव्यावृत्तत्वम्। धर्मिनिष्ठत्वं, धर्मी पक्षस्तन्निष्ठत्वं तेन पक्षवृत्तित्वम्। द्वयोः समासानन्तरं त्वप्रत्यय इति रूपत्रयम्। अबाधितत्वस्य सर्वसाधा

रण्यान्नाभिधानम् । असत्प्रतिपक्षितत्वस्य स्वार्थानुमानेऽनुपयोगान्नाभिधानम् । लिङ्गाद्धेतोः । लिङ्गिनि साध्ये साध्यविषयकं ज्ञानमित्यर्थः । अनुमानमनुमितिस्तद्रूपोऽनुमित्यात्मकः । इदं व्यङ्ग्यव्यञ्जकभाव इत्यस्य विशेषणम् । व्यङ्ग्यव्यञ्जकभावो व्यञ्जनयाऽर्थविषयकशाब्दप्रतीतिरित्यर्थः । तत्र व्यक्तिवादिमूर्द्धाभिषिक्तध्वन्युदाहरणे प्रथममनुमानं योजयति तथाहीत्यादि ।

भ्रम धार्मिक विश्वस्तः स शुनकोऽद्य मारितस्तेन ।
गोदानदीकच्छनिकुञ्जवासिना दृप्तसिंहेन ॥

पुष्पाहरणाय निकुञ्जे यान्तमभिसारविघ्नकारिणं कञ्चन धार्मिकं प्रति भीषयितुं कस्याश्चिदियमुक्तिः । विहितं भ्रमेति विधिविषयीभूतम् । अभ्रमणमनुमापयतीति व्याप्तिग्रहोपयिकत्वेनेति शेषः । तदेव दर्शयति यद्यदिति । व्यापकविरुद्धेति । भीरुभ्रमणस्य व्यापिका भयकारणाभावोपलब्धिस्तद्विरुद्धं भयकारणं तदुपलब्धिरित्यर्थः । तथा च व्यतिरेकव्याप्तिर्दर्शिता । व्यतिरेकिणि तस्या एव तन्त्रत्वात् । ततश्च गोदावरीतीरं भीरुभ्रमणायोग्यं सिंहवत्त्वात् यन्नैवं तन्नैवं यथा गृहमिति भ्रमणाभावानुमितिरिति भावः ।

दूषयति अत्रोच्यत इति । तत्रादौ व्याप्तिविघटकं व्यभिचारमुद्भावयति भीरुरपीत्यादि । अन्येन धनलाभादिना । अनैकान्तिको व्यभिचारी । बिभ्यदिति । स्पर्शेन पापजननात् पापजनके तद्विधे पौरुषानास्पदत्वात् । सिंहादभीतौ हेतुमाह वीरत्वेनेति । धार्मिकस्य भयानास्पदत्वात् । अतः सिंहवत्त्वभीरुभ्रमणाभावयोर्न सामानाधिकरण्यमित्याह विरुद्धोऽपीति । भीरुभ्रमणेन साध्याभावेन व्याप्तत्वात् ।

केचित्तु व्यभिचारितो व्यतिरेकी विरुद्ध इति मतेनेदमिति वदन्ति । पक्षधर्मताविघटनमाह गोदावरीतीरमिति । न चेति । प्रामाण्यं नियतमिति शेषः । अप्रतिबन्धादप्रतीतेः । शब्देषु प्रामाण्यसन्देहादर्थेष्वपि सन्देह इत्यसिद्धिः । सन्दिग्धासिद्धिरित्यर्थः । नन्वस्त्वनुमानाभास इति चेन्न । व्यभिचारज्ञाने तदनुदयात् । न च व्यभिचारास्फूर्तौ तथा । सर्वविज्ञानवताम् सामाजिकानां तदस्फूर्त्त्यभावादित्यत आह तत्कथमित्यादि । स्वप्रदर्शितध्वनिलक्ष्यमपि समर्थयति तथेत्यादि । प्रतिबद्धानि व्याप्तानि । ननु व्यक्तिवादिनेवास्माभिरप्यधमपदसाम्यमङ्गीकरिष्यत इत्यत आह । न चाधमत्वमिति । तथा च पूर्ववत्सन्दिग्धासिद्धिरिति भावः । नन्वस्मिन् व्यक्तिपक्षेऽपि दोष इत्यत आह एवमिति । अत्र व्याप्तेरनङ्गत्वेन संभावनामात्रादेव तत्सिद्धिरिति भावः ।

इति सारबोधिन्यां पञ्चम उल्लासः

काव्यप्रकाशदर्पणः—अधुना ध्वनेरनुमानान्तर्भावं वाच्यादित्यादिना व्यापकविरुद्धोपलब्धिरित्यन्तेन ग्रन्थेन शङ्कते **भ्रमेति** । व्यञ्जनावादिभिर्भवद्भिरपि एतदभ्युपगन्तव्यमिति भावः । तदुभयव्यवच्छेदरूपाव्याप्तिसंबन्धेन [?] नियतः प्रकृतो यो धर्मी आश्रयस्तन्निष्ठत्वेन त्रिरूपात् पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तिनामकरूपत्रयवतो लिङ्गाद् व्याप्यात् लिङ्गव्यापकेना [कानु ?] नुमानमित्युच्यते । तटस्थरूपः पर्यवस्यति । वाच्याद् व्यङ्ग्याच्चावगम इत्यर्थः । हेतुमाह **तथाहीति** ।

भ्रम धार्मिक विश्वस्तः स श्वाऽद्य मारितस्तेन ।
गोदावरीनदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥

इह हि वञ्जुललतागृहे सङ्के[ति ?]तायाः केनापि निमित्तेन धार्मिकेण तद्देशभ्रमणं स्वमनोविप्रकृतं मन्यमानाया वचनम् । अत्र यौ वाच्यव्यङ्ग्यार्थौ तयोः धूमाग्न्योरिव साध्यसाधनभावेनावस्थितिः । तदिह गोदावरीतीरे वने कुञ्जे आश्रयभूते भीरुभ्रमणरूपः साध्यः । तत्र वाच्यरूपो दृप्तसिंहसद्भावः साधनम् । इह च लिङ्गस्य पक्षसत्त्वं निबद्धमेव । सपक्षसत्त्वविपक्षव्यावृत्तत्वे अनिबद्धे अपि सामर्थ्यादवसेये इत्यतो नानुमेयभावो व्यङ्ग्य इति भावः । एतदेवाह अत्रेति । यः खलु भीरुः शुनोऽपि सद्भावस्थाने भ्रमितुमशक्तः स कथं सिंहोपलब्धिस्थाने भ्रमिष्यतीत्यर्थः । यद्भीरुभ्रमणमिति । अयमर्थः । धार्मिकस्य भ्रमणं भयकारणनिवृत्त्युपलब्धिपूर्वकम भीरुभ्रमणत्वात् सम्प्रतिपन्नवत् इत्यन्वय[इत्यनु ?]माने यद् व्यापकं भयकारणं वृत्त्युपलब्धिपूर्वकम् [?]तस्य च विरुद्धं भयकारणनिवृत्त्युपलब्धिपूर्वकम् । तस्योपलब्धिः प्रतीतिः । सा च प्रकृते सिंहोपलब्धिः । तथा चात्र धार्मिकस्याभ्रमणमनुमितमिति भावः । एवं ध्वनिकारोदाहृतैतद्व्यङ्ग्योदाहरणरीत्या सर्वत्रैव विवादाध्यासितस्य व्यङ्ग्यस्यानुमेयत्वमेवेति महिमभट्टसिद्धान्तमाह अत्रोच्यत इति । अन्येन धनादिप्रयोगादिना सत्यपीति व्याप्त्यभावदर्शनम् । अनैकान्तिकः साध्यव्यभिचारी । नास्य पुनर्हेतुत्वमिति भावः । शुन इत्यादि । यः खलु शुनःस्पर्शशङ्कया शुनो बिभेति सिंहसद्भावस्थानं प्रत्युत मृगयादिकुतूहलतया गच्छतीति दर्शनाद्विरुद्धः भ्रमणरूपविरुद्धसाध्यविरुद्धसाधनात् । दूषणान्तरमाह वचनस्येत्यादि । पुंश्चल्यादीनामिति शेषः । अप्रतिबन्धात् प्रतिनियतो निश्चितः । असिद्धः संदिग्धासिद्धः स्वरूपासिद्धो वा । उपसंहरति तथेति । इत्थमेव युक्तिजालमुदाहरणान्तरे दर्शनं दृढयति । गमकतया कामुकसमीपगमनबोधकतया । व्यक्तिवादिनेति । व्यञ्जनव्यापारस्थापनार्थमुद्यतेत्यर्थः । न प्रमाणप्रतिपन्नं संदिग्धासिद्धादसिद्धत्वात् । एवं व्यञ्जनव्यापारसामग्र्या नानुमानसामग्रीत्वमिति । अर्थान्तराभिव्यक्तौ वः सामग्रीष्ठा तवधनं सैवार्थमिति पक्षे नो गमकत्वेन सम्मतेति [?] महिमभट्टोक्तमनुमानत्वं निरस्तमिति भावः । नन्वेवमपि यत्प्रतिबन्धमूलभाव एव व्यङ्ग्यव्यञ्जकभावः स्यादिति चेत् एवमेवेत्याह एवंविधादिति । उपपत्त्यपेक्षत्वेऽपि व्याप्त्यादिप्रतिबन्धनाभावेऽपीति । न चैवमतिप्रसङ्गः । प्रतीतेरन्यथोपपत्तावेकव्यक्तिकल्पना स्यादिति काव्यपुरुषावतारस्य निखिलशास्त्रवेदिनः श्रीमदानन्दवर्धनाचार्यस्य पृथग् व्यञ्जनव्यापारस्थापनमिति सर्वमवदातम् ।

इति महामात्य[पात्र ?]श्रीविश्वनाथकविराजकृतौ काव्यप्रकाशदर्पणे पञ्चमोल्लासः ।

FOOT NOTES

१. अनर्थनिवारकत्वेन A. B. २. चित्यतत्प्रसङ्गाभावात् A. ३ निर्वहणात् A. ४. विषय भूतार्थस्य A. ५ पदार्थानियमिति A. ६. सामान्यविशेषरूप· A. ७ संकेतविषयत्वात् A. ८ निमित्तम् B. ९. ज्ञातकारणत्वनियमात् A. B. १० प्रचरणसञ्चारः A. ११. वहनस्य सिद्धेः A. ।

षष्ठ उल्लासः

शब्दार्थचित्रं यत्पूर्वं काव्यद्वयमुदाहृतम् ।

गुणप्राधान्यतस्तत्र स्थितिश्चित्रार्थशब्दयोः ॥४८॥

न तु शब्दचित्रेऽर्थस्याचित्रत्वम्, अर्थचित्रे वा शब्दस्य ।

बालचित्तानुरञ्जनी—अतिशयिनि व्यङ्ग्ये उत्तमं काव्यं, अनतिशयिनि व्यङ्ग्ये मध्यमं काव्यमिति काव्यद्वयं प्रदर्श्य क्रमप्राप्तं तृतीयमधमकाव्यं प्रकटिष्यन् अल्पप्रमेयतया कारिकां पठति **शब्देति** । शब्दचित्रमर्थचित्रं च यत्पूर्वं काव्यद्वयमुदाहृतं तत्र काव्ये चित्रार्थशब्दयोः गुणप्राधान्यतः स्थितिः अवस्थानम् । शब्दचित्रेऽर्थस्य गुणभावः शब्दस्य प्राधान्यम् तत्र कवेरभिनिवेशात् । अर्थचित्रे शब्दस्य गुणभावः अर्थस्य प्राधान्यम् तत्र कवेरभिनिवेशादित्यर्थः ।

सारबोधिनी—क्रमप्राप्तं चित्रकाव्यं लक्षयति **शब्दार्थचित्रमिति** । तत्र यद्यपि शब्दार्थचित्ररूपभेदद्वयं प्रथम उल्लास एव दर्शितम्, तद्भेदाश्चालङ्कारप्रदर्शनेनैव दर्शिता भविष्यन्तीति न दर्शनीयं किञ्चिदस्ति, तथापि शब्दानां चित्रतायां प्रधानीभूताया अर्थचित्रताया गुणत्वम् एवमर्थानां चित्रतायां शब्दचित्रताया गुणत्वम्, न तूभयोरुभयत्राभाव इति गुणप्राधान्येन स्थितिवशादनयोर्विभाग इति दर्शयितुं शब्दार्थालङ्कारावप्यस्माकमिष्टौ न त्वन्यत इति दर्शयितुमयमारम्भः । उदाहृतं स्वच्छन्देत्यादिना, विनिर्गतमित्यादिना च ।

ननु प्रथमे व्यतिरेकालङ्कारेणार्थस्य चित्रत्वम्, द्वितीये च 'मानदमात्ममन्दिरादि'ति मकारस्य सकृदावृत्त्या वृत्त्यनुप्रासेन शब्दस्य चित्रत्वमस्ति तत्कथमयं विभाग इत्यत आह **गुणप्राधान्यत इति** । यच्चारुत्वस्योत्कटत्वं तस्य प्राधान्यमिति भावः ।

काव्यप्रकाशदर्पणः—इह यद्यपि अलङ्कार्यतया शब्दार्थचित्रयोरलङ्कारवत्त्वाद् विशेषलक्षणं पश्चादुल्लासद्वयेन निरूपयितुमात्मनोऽभिमत इति ध्वनिगुणीभूतव्यङ्ग्यरूपकाव्यविशेषप्रतिपादनानन्तरं तदुल्लासितम् तथापि प्राचीनानुरोधेन काव्यविशेषत्वेन लक्षितयोस्तयोः किञ्चिद् विशेषमाश्रित्य उल्लासान्तरमारभते **शब्देति** । चित्रं शब्दार्थयोः प्रत्येकं सम्बन्धः । उदाहृतं शब्दचित्रं वाच्यचित्रमित्यादिना । प्रतिपादितं **गुणेति** । शब्दचित्रे प्रधाने अर्थचित्रस्य गुणत्वम् अर्थचित्रे प्रधाने शब्दचित्रस्य गुणत्वमिति द्वयोरेकत्र सद्भावेऽपि 'प्रधानेन व्यपदेशा भवन्ती'त्युक्तनयेन यस्य प्राधान्यं तेन व्यपदेश इत्यर्थः । अविचित्रत्वमित्यत्र सर्वथेति शेषः [?] ।

तथा चोक्तम्

"रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनिताननम् ॥

रूपकादिमलङ्कारं बाह्यमाचक्षते परे ।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम् ॥
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः ॥" इति ।

बालचित्तानुरञ्जनी–शब्दालङ्काराणामर्थालङ्काराणां च चमत्कारप्रयोजकत्वे प्रामाणिकसंमतिमाह **तथा चोक्तमित्यादिना** । **उक्तमिति** भामहेनेति शेषः । **रूपकादिरिति** । तस्य काव्य रूपकादिः । रूपकोपमादिरेवालङ्कारः । अन्यैः कैश्चिदालङ्कारिकैः । बाह्यम् आस्वादोत्पत्तिपरवर्तिनम् । सौशब्द्यम् शब्दनिर्माणसौष्ठवम् ।

सारबोधिनी–उपमाद्यलङ्काराणां चमत्कारप्रयोजकत्वे प्रामाणिकसंमतिमाह **तथा चोक्तमित्यादिना** ।

ननु विप्रतिपत्त्यभावात् कथं प्रामाणिकादरणमित्याशङ्क्य वादिविप्रतिपत्तिमुद्भावयति **रूपकादीति** । विभाति विभावतां प्राप्नोति कुण्डलादिमत्त्वेनैव विभावनीयत्वात् । विभावादित्वेन प्राप्तानामर्थानामेव रसत्वमिति तेषां परिष्करणमुचितम् । अर्थं प्रत्याय्योपक्षीणानां शब्दानामलङ्कारस्यानादरणीयत्वात् । बाह्यम् आवर्जितसन्निधिम् । सुपां तिङां तदन्तानाम् विशिष्टोत्पत्तिरनुप्रासादिना निर्माणं, वाञ्छन्ति अत्यन्तोपादेयत्वेनाभिलषन्ति । ईदृशी यथा शब्दव्युत्पत्तिः । सौशब्द्यं शब्दनिर्माणसौष्ठवम् ।

अयमर्थः–शब्दैरभिव्यज्यमानानामास्वादानां विभावादिभिरर्थैरुपचायनम् । ते च माधुर्यादिव्यञ्जकवर्णघटितानुप्रासादिमत्तया रचिता एव तद्व्यञ्जने प्रभवन्ति तेन शब्दालङ्काराणामावश्यकत्वम् पश्चादर्थालङ्काराणामकिञ्चित्करता । तैर्विनापि शब्दालङ्कारैरभिव्यक्तेरिति तदाह **बाह्यमिति** । आस्वादोत्पत्तिदशायां तदनुपलम्भात् । **शब्देत्यादि** । अभिधेयः प्रतिपाद्यः । तेन लक्ष्यव्यङ्ग्ययोरपि ग्रहणम् । नः अस्माकम् द्वयोरपि आस्वादोपकारकत्वस्य सहृदयहृदयैकवेद्यत्वात् कविसंरंभगोचरत्वाच्च ।

काव्यप्रकाशदर्पणः—तत्रैव तथा चोक्तमित्यादिना इष्टं द्वयं तु न इत्यन्तेन प्रामाणिकसङ्गतिं दर्शयति । उक्तं प्राचीनैः, रूपकादिरर्थाश्रयोऽलङ्कारो विभावादिरूपार्थोपस्कारकतया मुख्यस्य रसादेरेवोत्कर्षकत्वात् तस्य काव्यस्य बहुधा बहुप्रकारः । शब्दालङ्काराणां तु विभावाद्युपनयमात्रप्रयोजकशब्दधर्मतया बहिरङ्गत्वान्न मुख्यालङ्कारत्वमिति केचित् । अलङ्कारघटनया उपयोगस्य व्यतिरेकेण दृष्टान्तमाह **न कान्तमिति** । काव्यस्य शब्दविशेषरूपत्वादर्थस्य तद्व्यवच्छेदकमात्रेण।मुख्यत्वाद् अर्थाश्रितानामलङ्काराणां बहिरङ्गतेत्यर्थः । **सुपां तिङामिति** । सुबन्तानां तिङन्तानां पदानां व्युत्पत्ति विशेषेण माधुर्याद्यनुगुणवर्णविशेषार्थकत्वेन उत्पत्तिं वाचां वाक्यानाम् तदेतद् सुप्तिङ् व्युत्पत्तियोगित्वम्, सौशब्द्यं पुशब्दताम्, अर्थव्युत्पत्तिवः मानतादिना [?] योजनं–नेदृशी शब्दकात्यभिप्राया [?] । अतश्च शब्दनेनेषिधिभूतेन [?] काव्यत्वमिति शब्दस्यैव मुख्यत्वमिति **शब्दालङ्काराणामेव प्राधान्यमित्यपरे** । **शब्देति** । अभिधेयोऽर्थः । द्वयं शब्दार्थालङ्कारयुगलम् । नः अस्माकं तु पुनरिष्टमिति मतम् द्वयोरप्यर्थोपस्कारत्वात् रसादिपरिपोषकत्वेन परस्परतो विशेष्यमानत्वादिति भावः ।

शब्दचित्रं यथा

प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-
स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः ।
उदयति ततो ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥१३ ॥

बालचित्तानुरञ्जनी–शब्दचित्रमुदाहरति प्रथमेति । मृगलाञ्छनश्चन्द्रः । क्षणदामुखे रजनीप्रसरारम्भे । अत्र मकारयोस्तकाराणां ककारयोर्धकारयोः क्षकारयोः सकारच्छकारलकाराणामनुप्रासः शब्दालङ्कारः । अत्र रसादेः अविवक्षैव । तथा चोक्तम्—

"रसभावादिविहितविवक्षाविरहे सति ।
अलङ्कारविशेषो यः स चित्रविषयो मतः ॥
वस्त्वादिषु विवक्षा तु स्यात्तात्पर्यवती यदा ।
तदा नास्त्येव तत्काव्यं ध्वनेर्यत्र न गोचरः ॥" इति

सारबोधिनी—प्रथममिति । मृगलाञ्छनः क्षणदामुखे उदयतीति सम्बन्धः । क्रमेण तत्तद्वर्णता स्वभावोक्तिः । अत्र तकाराणां ककारयोर्धकारयोःक्षकारयोश्छकारयोः सकारयोश्च साम्यमित्यनुप्रासप्रकर्षाच्छब्दचित्रता । अर्थालङ्कारस्योपमाया नोद्भटतेति भावः ।

अर्थचित्रं यथा

ते दृष्टिमात्रपतिता अपि कस्य नात्र
क्षोभाय पक्ष्मलदृशामलकाः खलाश्च ।
नीचाः सदैव सविलासमलीकलग्ना
ये कालतां कुटिलतामिव न त्यजन्ति ॥१४०॥

यद्यपि सर्वत्र काव्येऽन्ततः, विभावादिरूपतयैव पर्यवसानं तथापि स्फुटस्य रसस्यानुपलम्भादव्यङ्ग्यमेतत्काव्यद्वयमुक्तम् । अत्र च शब्दार्थालङ्कारभेदाद् बहवो भेदाः, ते चालङ्कारनिर्णये निर्णेष्यन्ते ।

इति काव्यप्रकाशे शब्दार्थचित्रनिरूपणं नाम षष्ठ उल्लासः ॥६॥

बालचित्तानुरञ्जनी—ननूत्तममध्यमयोः काव्ययोर्बहवो भेदाः प्रदर्शिता अधमस्य तु किमिति न प्रदर्श्यन्त इत्याशङ्क्याह अत्र चेति । अत्र शब्दार्थचित्रकाव्ययोः दोषकथनानन्तरं गुणकथनानन्तरमलङ्कारकथनमिति नियमात् । अलङ्कारनिर्णये नवमे दशमे चोल्लासे एतद्भेदा वक्ष्यन्त इति भावः । न च शब्दचित्रं

वाच्यचित्रमिति प्रागेव निरूपितं [पुनः] किमत्र निरूपितमिति वाच्यम् । उक्तस्यैव गुणप्रधानभावस्यात्र निरूपितत्वात् तस्य च केवलार्थालङ्कारत्वम् उत केवलशब्दालङ्कारत्वम् उत निराकरणद्वारेणार्थालङ्कार-शब्दालङ्कारवैशिष्ट्यस्य संमिलितत्वेन प्रदर्शनार्थत्वादित्युल्लाससारं सप्रयोजनं द्रष्टव्यम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसरस्वतीतीर्थविरचितायां काव्यप्रकाशटीकायां षष्ठोल्लासः समाप्तः ॥

सारबोधिनी--अर्थचित्रमाह ते दृष्टीत्यादि । पक्ष्मलेति । भूम्नि लच्प्रत्ययः । क्षोभो धैर्य-विघातः, अस्वच्छता च । नीचाः ह्रस्वाः पापाशयाश्च । अलीकं मिथ्यावचनम् । लग्नाः संबद्धाः । कालता कृष्णता परपीडाकरत्वेन यमता च । कुटिलता वक्रता अनभिव्यक्तपरापचिकीर्षा च । अत्रानुप्राससंभवेऽपि श्लेषसंवलितोऽर्थालङ्कारः समुच्चयः प्रधानमित्यर्थचित्रता । आसमाप्ति कवेस्तत्रैव संरम्भात् । अत्र पूर्वापर-श्लोकद्वये उद्दीपनालम्बनविभावयो रसपर्यवसायित्वमिति तदुपकारकत्वेनालङ्कारता तयोः । किन्तु स्ववैचित्र्येण प्रथमतः स्वस्मिन् चित्तापकर्षणमिति चित्रतेति प्राक् प्रतिपादितमेव । तदाह यद्यपीति । विभावादीत्यादि । तेषामेव रसत्वेन पर्यवसानमित्यर्थः । स्फुटस्यान्यवैचित्र्यतिरोधानेन झटिति प्रतीय-मानस्येत्यर्थः ।

इति सारबोधिन्यां षष्ठ उल्लासः ।

काव्यप्रकाशदर्पणः—**प्रथममित्यादि** । यद्यपि क्रमप्रधानात् स्वभावोक्तरीत्याऽलङ्कारो दृष्टो-पमाश्च सन्ति तथाप्यन्वान [?] सन्धिमन्तरेणाप्यनुप्रासमनुप्रासमहिम्ना कश्चित् [?] प्रकर्षो हृदि निधीयत इत्यनुप्रासस्य प्राधान्याच्छब्दचित्रम् । क्षोभाय धैर्यविघाताय स्वास्थ्यविघाताय वा । नीचा नम्राः हीन-सत्त्वाश्च । अलीकं सभालं अप्रियञ्च । कालतां दारुणताम् कुटिलतां कुञ्चितां अनृजुताञ्च । अत्रानु-प्राससद्भावेऽपि अर्थालङ्कारस्यैव उद्भटप्रतीतिरिष्यत इति तत्प्रधानता, न तु स्वादरूपमेव वाक्यम् आस्वादश्च व्यङ्ग्य एव [?] अनयोश्च द्वयमित्यादि पक्षयोर्व्यङ्ग्यत्वात् । आस्वादरहिततया कथं काव्य-मित्याह यद्यपीति । अत्र महावाक्यार्थव्युत्पत्तेर्विभावादिरूपतया एवंविधस्य समग्रैकवाक्यस्य वर्णितस्य चन्द्रादेरित्यर्थः । रसपर्यवसानं प्रवणत्वं स्फुटस्य रसस्यानुपलम्भात् महाकाव्यपर्यालोचनाहेतुकं व्यङ्ग्य-रहितमेतत् । प्रथममित्यादि यद् द्वयमुक्तं प्राचीनानुरोधादिति भावः । तथाहि, यद्येवमादौ काव्येषूक्त-रीत्या रसपर्यवसानमस्ति तदा आस्वादस्य प्रकर्षाप्रकर्षभावे ध्वनिगुणीभूतयोरेव अनुप्रासवर्णास्वादा-भावे तु काव्याभासतैवेत्युक्तमेव शब्दचित्रमित्यादि कारिकाव्याख्याने । विशेषमस्मत्साहित्यदर्पणेऽलङ्कार-निर्णये अन्तिमोल्लासद्वयव्यवस्थापिते निश्चेष्यन्ते ।

इति श्रीमहामात्य[पात्र ?]श्रीविश्वनाथकविराजकृतौ काव्यप्रकाशदर्पणे षष्ठ उल्लासः ।

सप्तम उल्लासः

काव्यस्वरूपं निरूप्य दोषाणां सामान्यलक्षणमाह

मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद् वाच्यः ।

उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः ॥४९॥

हतिरपकर्षः । शब्दाद्या इत्याद्यग्रहणाद्वर्णरचने ।

बालचित्तानुरञ्जनी—अदोषौ शब्दार्थौ काव्यमित्युक्त्वा अवान्तरभेदसहितं काव्यस्वरूपं निरूप्य दोषस्वरूपपरिगणनाभावे तद्राहित्यस्य ज्ञातुमशक्यत्वात् दोषनिरूपणार्थमुत्तरोल्लास इति सङ्गतिं दर्शयन् उत्तरवाक्यमवतारयति **काव्येति** । मुख्यश्चासावर्थश्च तस्य हतिरपकर्षो दोषः । साक्षात्सङ्केतितस्यार्थस्य लक्ष्याद्यपेक्षया मुखमिव प्रागभवतीति व्युत्पत्त्या मुख्यत्वम् तस्येह ग्रहणं नेत्याह रस इति । मुख्यतयोक्तरूपो रस एव काव्यवाक्यानामर्थः इति स एव मुख्य इत्यर्थः । वस्त्वर्थः तस्य वाच्यार्थे दोषो न स्यादित्यत आह **तदाश्रयादिति** । वाच्यो ह्यर्थः तदाश्रयाद्रसाधारत्वान्मुख्यः । उपचारादित्यर्थः । तर्हि शब्दादिविषयेषु कष्टतादिषु अव्याप्तिरित्यत आह **शब्दाद्या** इति । उभयो रसवाच्यार्थयोरुपयोगिनः व्यञ्जकवाचकत्वादिना उपकारकाः । तेन कारणेन तेषु शब्दादिषु स दोषः, रसस्यैव दोषः उपचारात् वाच्यार्थस्य शब्दादीनाञ्चेति भावः । पद्यगतो हतिशब्दो लाक्षणिको न मुख्य इत्याह **हतिरपकर्ष इति** । विशेषलक्षणं दोषाणामिति शेषः । शब्दस्य पदवाक्यरूपत्वात् वाक्यस्य पदसमूहत्वात्प्रथमतः पदस्य षोडश दोषा उक्ताः । तत्र श्रुतिकटुत्वादौ सर्वत्र दुष्टमिति सम्बन्धः । क्लिष्टाद्यास्त्रयः समासपदेष्वेव दुष्टाः स्युः नान्यत्र इत्यर्थः । न च पदस्य वर्णरचनात्वेन प्रथमतः वर्णदोषो वक्तव्य इति वाच्यम् । पददोषेष्वेव वर्णदोषाणां यथासम्भवमन्तर्भावादिति द्रष्टव्यम् ।

सारबोधिनी—काव्यस्वरूपमिति । काव्यस्वरूपं ध्वन्यादिकम् । तथा च धर्मिणि प्रदर्शित इत्यादि **यदुक्तम्**—अवसरो वृत्त इति ध्वनितम् । काव्यलक्षणे दोषाणां प्रागुपादानाद्दोषाणां गुणालङ्कारात्प्राङ्निरूपणम् । सामान्यतो ज्ञात एव विशेषाकाङ्क्षा भवतीत्यत आह **सामान्येति** । **मुख्यार्थेति** । हत्यपकर्षदोषशब्दाः करणव्युत्पन्ना भावव्युत्पन्ना वा । ते दुष्टलक्षणं दोषलक्षणञ्चेति बोध्यम् ।

अत्र मिश्राः, मुख्यायेदं मुख्यार्थमिति चतुर्थीसमासः । तच्च शब्दार्थयुगलम् तस्य हतिरन्यथात्वम् । यस्य येन रूपेण रसव्यञ्जकत्वं तस्य तद्रूपप्रच्यवः । फलं तु रसस्य सम्यगनवभासः । लोकेऽपि दृष्टो दीपादिव्यञ्जकवैगुण्येन घटादेः सम्यगनवभासः । अर्थशब्दयोर्मुख्यार्थत्वं दर्शयति **तदाश्रयादित्यादि** । इदन्त्वग्रे व्याख्यास्यते । न चात्र शब्दार्थयो रसव्यञ्जकतावच्छेदकरूपविरहो दोष इति पर्यवसितम्, तच्च न चारु, रूपान्तरविरहेण दोषाभावगुणालङ्काराणामेव रसव्यञ्जकतावच्छेदकतया दोषानुप्रवेशादात्माश्रयापत्तिरिति वाच्यम् । यतो दोषाभावस्य रसव्यञ्जकतावच्छेदकरूपस्य रसव्यञ्जकतावच्छेदकत्वरूपेण रूपान्तरेण प्रवेशोऽत्र कृतो न तु दोषाभाववत्त्वेनेति [न] क्वाप्यात्माश्रय इति । यद्वा श्रुतिकटुत्वादिनैव तत्तद्विशेषरूपेण प्रवेशः कर्तव्य इत्याहुः ।

अन्ये तु, मुख्यः इतरेच्छानधीनेच्छाविषयस्तच्च सुखं परमपुरुषार्थत्वात् । एवञ्च मुख्यत्वं सुखान्तरेऽप्यतिप्रसक्तमिति तद्वारणायार्थपदम् । अर्थत्वन्तु शब्दजन्यसाक्षात्कारविषयत्वम् । काव्यादन्यतः शब्दान्न सुखस्य प्रत्यक्षता किन्तु शाब्दत्वमेव । शब्दे तज्जन्यसाक्षात्कारविषयतयातिव्याप्तिवारकं मुख्यपदमुक्तम् । मुख्यत्वस्य सुखादन्यत्वासम्भवात् । एतेनात्र समस्यमानपदार्थतावच्छेदकयोः परस्परव्यभिचाराभावान्न कर्मधारयोऽर्थपदवैयर्थ्यञ्चेति दूषणद्वयं निरस्तम् ।

हतिरपकर्षः । न प्रतिबन्धः, दुष्टेष्वपि रसानुभवात् । अपकर्षस्तु रसनिष्ठो धर्मविशेषस्तद्व्यञ्जकं दोषज्ञानम् । नन्वेवमभिधेयेऽर्थे मुख्यशब्दप्रयोगः शब्दार्थदोषविभागश्च न स्यात्, उक्तमुख्यत्वस्यापकर्षकस्य च रसमात्रवृत्तित्वात् इत्यत आह तदाश्रयादिति । आश्रयणमाश्रयः उपायत्वेनापेक्षणम् । वाच्यो मुख्य इत्यन्वयः । एवञ्च वाच्ये विभावादौ भाक्तो मुख्यपदप्रयोगः । आस्वादोपायत्वञ्च दर्शितम् । रसो वाच्यश्च । उभयं शब्दाद्यास्तदुपयोगिनः विभावादिकं प्रत्याय्य रसप्रत्यायनात् । तेन रसोपायत्वेन तेष्वर्थशब्दादिषु स दोषः न केवलं रसे इत्यनयोरर्थः । गुणवद्दोषोऽपि साक्षात्सम्बन्धेन रसे व्यङ्ग्यव्यञ्जकभावे न त्वर्थशब्दादिष्विति व्याचक्षते ।

विशेषलक्षणमाह

दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थम् ।
निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाऽश्लीलम् ॥५०॥
सन्दिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम् ।
अविमृष्टविधेयाशं विरुद्धमतिकृतसमासगतमेव ॥५१॥

बालचित्तानुरञ्जनी—तत्तत्संशयायाद्विविशेषलक्षणमूहनीयमित्यभिप्रायेणाह **श्रुतीति** । **यश्च** एवं विधकष्टव्यपदेशानन्तरं तद्दत्तिकृदित्यर्थः ।

सारबोधिनी—काव्यलक्षणे शब्दस्य प्राङ्निर्देशे तद्दोषे प्रथमं वक्तव्ये तत्रापि पदांशवाक्ययोः पदनिरूप्यत्वेन प्रथमं पददोषानाह **दुष्टं पदमिति** । श्रुतिकटु पदं दुष्टमिति सम्बन्धः । एवं सर्वत्र बोध्यम् । **परुषवर्णमिति** । तत्त्वञ्च मुख्यार्थापकर्षकत्वे सति ओजोव्यञ्जकवर्णत्वम् । वीरादिष्वदुष्टतया तदतिप्रसङ्गवारणाय सत्यन्तम् । वीरादिषु तु मुख्योत्कर्षकत्वाददोषत्वम् । न च प्रतिकूलवर्णेनास्य सङ्करः । उपाधेयसङ्करेऽप्युपाध्यसङ्करात् । तथाहि अत्र प्रकृतरसव्यञ्जकवर्णाभावाद्रसोद्बोधरूपं कार्यं न जायते । प्रतिकूलवर्णे तु, प्रकृतरसप्रतिबन्धकैर्वर्णैः प्रतिबध्यत इत्यनयोरेकत्र व्यञ्जकाभावात् कारणाभावप्रयुक्तकार्याभाववत्त्वम् । अपरत्र प्रतिकूलवर्णसद्भावात् प्रतिबद्धकार्यकत्वमेव दूषकताबीजम् । इदं मधुररस एव दूषकम् । प्रतिकूलवर्णं तु सर्वत्रेति स्मर्तव्यम् । वर्णानां रसोद्बोधे प्रातिकूल्यं व्यञ्जकत्वञ्च वक्ष्यत इति दिक् ।

श्रुतिकटु परुषवर्णरूपं दुष्टम् । यथा

अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः ।
आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा ॥१४१॥

अत्र कार्तार्थ्यमिति ।

बालचित्तानुरञ्जनी—तन्वङ्ग्या रमण्या कर्त्र्या अनङ्गस्य कामस्य मङ्गलगृहश्चासौ अपाङ्गश्च तस्य भङ्गिभिः तरङ्गितैः सञ्जाततरङ्गैरीक्षणैरित्यध्याहार्यं तत्करोतीति णिजन्तस्तन्निष्ठानां अपाङ्ग-भङ्गीनां तरङ्गीकरणैरिति वा। तरङ्गशब्दादाचारे क्विपि भावे निष्ठायां तरङ्गवदाचरणभूतं रूपलक्षितया तन्वङ्ग्या आलिङ्गितः सन् पुरुषः कार्तार्थ्यं कृतार्थत्वं कदा लभते प्राप्स्यति। अत्र कार्तार्थ्यमिति आदि-वृद्धिप्रयुक्तं कष्टत्वमित्यर्थः। अत्राश्लीलप्रतीतिश्च।

सारबोधिनी—**अनङ्गे**ति। तरंगितं उत्तरोत्तराविच्छेदः। तरङ्गितैरिति करणे तृतीया। **लभत इति**।

च्युतसंस्कृति व्याकरणलक्षणहीनम्। यथा—

एतन्मन्दविपक्वतिन्दुकफलश्यामोदरापाण्डर-
प्रान्तं हन्त पुलिन्दसुन्दरकरस्पर्शक्षमं लभ्यते।
तत् पल्लीपतिपुत्रि कुञ्जरकुलं कुम्भाभयाभ्यर्थना-
दीनं त्वामनुनाथते कुचयुगं पत्रावृत मा कृथाः॥१४२॥

अत्रानुनाथते, इति। 'सर्पिषो नाथत' इत्यादाविवाशिष्येव नाथतेरात्मनेपदं विहितम्। "आशिषि नाथः" इति। अत्र तु याचनमर्थः। तस्मात् 'अनुनाथति स्तनयुगम्' इति पठनीयम्।

बालचित्तानुरञ्जनी—द्वितीयमुदाहरति **च्युतेति**। च्युता गलिता संस्कृतिः व्याकरणलक्षणा यस्मात्, अस्यैव व्याख्यानं **व्याकरणेति**। पल्ल्याः पतिः प्रभुः तस्य पुत्री तस्याः सम्बोधनं हे पल्लीपतिपुत्रि। तव मन्दविपक्वं किञ्चित्पक्वं तिन्दुकफलं स्फूर्जकफलं तद्वत् श्यामोदरं आपाण्डुरप्रान्तञ्च। पुलिन्दा भिल्ला एव सुन्दराः तत्करस्पर्शक्षमं तत्सुरतसंमर्दसहमित्यर्थः। यदेतत्कुचयुग्मं लक्ष्यते तत्पत्रैरावृतमाच्छन्नं मा कृथाः। मा कुरु इति कुचानां चाभयं तदभ्यर्थनया दीनं कुञ्जरकुलं कर्तृ। त्वामनुनाथते याचते। भिल्लास्तव स्तनदर्शनेन सञ्जातरागाः सन्तः त्वां सेवमानाः च्युतवीर्यतया कुञ्जान्न भिन्दन्ति। अतस्त-नावरणं न कर्तव्यमिति याचते गजकुलमित्यर्थः। अत्र व्याकरणलक्षणरहितः असाधुशब्दः क इत्याका-ङ्क्षायामाह **अत्रे**ति। आशिषि नाथ इत्युपसंख्यानादाशिष्येव अभिलषितवस्त्वाशंसिलक्षणायामात्मनेपदस्य नियतत्वात्। याच्ञायामात्मनेपदप्रयोगः व्याकरणलक्षणरहित इत्यर्थः। **सर्पिष इति** "**आशिषि नाथ**" इत्यनेन सूत्रेण षष्ठी। अत्राप्याशिष्येवास्त्वित्याशङ्क्याह **अत्र चेति**। श्लोकस्य समीचीनत्वात्पाठमुपदिशति **तस्मादिति**।

सारबोधिनी—**व्याकरणेति**। लक्षणं सूत्रम् तद्धीनं तदविषयः, व्याकरणव्युत्पत्तिविरहवदित्यर्थः। संज्ञाशब्दानां डित्थादीनां लडहादीनां प्राकृतानाञ्च उणादयो बहुलं, दाढादयो बहुलमिति सामान्यतो व्युत्पादनान्न तत्र दोषः। अन्ये तु, व्याकरणेन लक्ष्यत इति तल्लक्षणं साधुत्वमित्याहुः।

अत्रासाधुत्वज्ञानाभावः साधुत्वज्ञानं वा शाब्दबोधकारणम्, तदभावात् शाब्दबोधस्थगनमेव दूषकताबीजम्। साधुशब्दान्तरस्मरणे शाब्दबोधेऽपि प्रतीतिमान्थर्यं दूषकताबीजमिति।

एतदिति। क्षमं योग्यं करस्य तद्व्यासङ्गेन धनुषस्त्यागादेव प्राणरक्षणमिति। यद्वा यत्रानावरणे अनयोः कतरः कुंभ इति हनने मौढ्यं भविष्यतीति। पल्लीपतिपुत्रीत्यनेन तव भीतत्राणमुचितम्। अत्रेति। न चाशीरर्थःइति वाच्यम् त्वामित्यस्य कर्मत्वानुपपत्तेः। इष्टार्थस्यैवाशंसनविषयत्वात्। तदाह **अत्र तु याचनमर्थं इति।**

अत्र केचित्–आत्मनेपदिगणपाठादेवात्मनेपदित्वे सिद्धे पुनस्तद्विधानं नियमाय। नाथतेराशीरर्थे आत्मनेपदमेव न परस्मैपदम्। अर्थान्तरे त्वनियमस्तथा च याचनेऽप्यात्मनेपदमविरुद्धमिति, ग्रामग्राम इत्युदाहार्यमित्याहुः।

अप्रयुक्त तथा आम्नातमपि कविभिर्नादृतम्। यथा

यथायं दारुणाचारः सर्वदैव विभाव्यते।
तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथ वा ॥१४॥

अत्र दैवतशब्दो "दैवतानि पुंसि वा" इति पुंस्याम्नातोऽपि न केनचित्प्रयुज्यते।

बालचित्तानुरञ्जनी–तृतीयमुदाहरति अप्रयुक्तमिति। तस्यैवार्थमाह तथेति। तथा शास्त्रलक्षणायोगितया पतितमपीत्यर्थम् [?]। यथायं दारुणाचारः सन् सर्वदैव विभाव्यते तथा अस्य दैवतः अधिष्ठाता अधिष्ठात्री देवतेति यावत् पिशाचः अथ वा राक्षस इति मन्ये।

अत्र यथा [तथा] शब्दयोः ज्ञापकभावोऽर्थः [?]। अत्र दैवत इति पुंलिङ्गशब्दः "वृन्दारका दैवतानि पुंसि वे"त्याम्नातोऽपि कविभिर्न प्रयुक्तः।

सारबोधिनी–अप्रयुक्तमित्यादि। कविपदं पण्डितपरम्। तथेति। येन रूपेणाम्नातं अनुशिष्टं तेन रूपेण प्रयोगा भाववत्त्वमप्रयुक्तत्वम्। अन्यथा घटपदादावपि तत्त्वं स्यात् पुंस्त्वादिनानुशासनात्। नपुंसकत्वादिना चाप्रयोगात्। असमर्थस्य हन्तेरुपसन्दानेन उद्धतिपद्धतीत्यादौ प्रयोगसम्भवेन तत्सामान्याभावाभावान्न तत्र प्रसङ्गः। असाधौ नानुशासनम्। तेन न तत्रातिव्याप्तिः।

ननु यत्किञ्चित्कविनाऽप्रयुक्तं यावता वा। नाद्यः, एकस्य कवेः सर्वप्रयोगाक्षमत्वेन प्रयुक्तेष्वपि तत्प्रसङ्गात्। नैवम्, अलङ्कारव्याकरणाद्युक्तप्रयोगनिषेधस्य तन्त्रत्वात्। दैवतादीनां पुंस्त्वादेरलङ्कारेष्वप्रयोगात्। एतेन लडहादीनां देशीयानां संस्कृतकाव्ये निवेशे अप्रयुक्तत्वं दोषः। तदुक्तं रुद्रटेन–

प्रकृतिप्रत्ययमूला व्युत्पत्तिर्नास्ति यस्य देशस्य।
तल्लडहादि कथञ्चिन्निरूढिरिति संस्कृते रचयेत् ॥इति।

घृधातोः घृतघर्मघृणाभ्योऽन्यत्र, तथा वचधातोरन्तितसोः लोटः प्रथमपुरुषैकवचने, जिघातोः घसधातोश्च भाषायां अन्यत्र प्रयोगो व्याकरणे निषिद्धं इत्याद्युदाहरणीयम्। दूषकताबीजन्तु कविसमयोल्लङ्घनप्रयोजनानुसन्धानेन मुख्यार्थप्रतीतिमान्थर्यमिति। दैवतस्तदधिष्ठाता।

असमर्थं यत्तदर्थं पठ्यते न च तत्रास्य शक्तिः। यथा

तीर्थान्तिरेषु स्नानेन समुपार्जितसत्कृतिः ।
सुरस्रोतस्विनीमेष हन्ति सम्प्रति सादरम् ॥१४४॥

अत्र हन्तीति गमनार्थम् ।

बालचित्तानुरञ्जनी—चतुर्थमुदाहरति **असमर्थमिति**। तस्यैवार्थमाह यदिति । सोऽर्थोयस्य तदर्थं पठ्यते धातुपारायणादौ यत् तत्रार्थे अस्य शब्दस्य शक्तिः वाचकत्वरूपा नास्ति। तीर्थान्तिरेषु गङ्गाव्यतिरिक्तेषु समुपार्जिता सत्कृतिः संस्कारो येन स एष पुरुषः सम्प्रति सादरं यथा तथा सुरस्रोतस्विनीं गङ्गां हन्ति गच्छति। अत्र किमसमर्थं तत्राह **अत्रेति**। हन्तीति हनहिंसागत्योरिति हिंसायामेवास्य शक्तिः न गमने, सर्वत्र पद्धतिरित्यादावेव गमनार्थत्वादित्यर्थः।

सारबोधिनी—**तीर्थेति**। असमर्थमिति।उप सन्दानं विनानुशिष्टार्थाबोधकत्वमसामर्थ्यम्। हन्ति गच्छति। **अत्र हन्तीति**। हनहिंसागत्योरिति गमनार्थे परिपठितोऽपि हन्तेस्तत्प्रत्यायने स्वरूपायोग्यः। प्रहतोद्धतपद्धतिजङ्घादिषु उपसन्दानेन गतेः प्रत्यायकत्वेन न तत्पाठवैयर्थ्यम्। एवमध्ययने परिपठितस्यापीङ्धातोरधि विना तत्र प्रयोगेऽसामर्थ्यमेव। गमनबोधं प्रति स्वरूपायोग्यत्वमेव दूषकताबीजम्।

निहतार्थं यदुभयार्थमप्रसिद्धेऽर्थे प्रयुक्तम्। यथा

यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन ।
मुग्धा साध्वसतरला विलोक्य परिचुम्बिता सहसा ॥१४५॥

अत्र शोणितशब्दस्य रुधिरलक्षणेनार्थेनोज्ज्वलीकृतत्वरूपोऽर्थो व्यवधीयते।

बालचित्तानुरञ्जनी—पञ्चममुदाहरति **निहतार्थमिति**। तदेव व्याकरोति **यदिति**। उभयार्थं प्रसिद्धाप्रसिद्धार्थद्वयवत्। असमर्थे दोषे एकस्मिन्नेवार्थे प्रसिद्धिः, अत्र चोभयत्रापि प्रसिद्धिरित्यनयोर्भेदः। यावकरसेन लाक्षारसेन आर्द्रो यः पादः तत्प्रहारेण शोणिताः वर्णान्तरापादनेन उज्ज्वलाः कान्तिमन्तः कचाः केशाः यस्य तेन दयितेन प्रियेण साध्वसेन भयेन तरला चञ्चला मुग्धा प्रिया विलोक्य परिरभ्य आलिङ्ग्य सहसा चुम्बिता। तत्र को वाऽर्थः केनार्थेन निहत इत्याह **अत्रेति**। पादहते शिरसि रुधिरस्यापि संभवात् पादप्रहारात् यच्छोणितं रक्तं तद्युक्ताः कचाः यस्येत्यनेनार्थेन उक्तोऽर्थो निहन्यत इत्यर्थः।

सारबोधिनी—**उभयार्थमिति**। सामग्रीसादृगुण्येन प्रागप्रसिद्धार्थस्य प्रतिपत्तौ नायं दोषः। प्रसिद्धार्थप्रतीतिव्यवधानेनेति विशेषणात्। शक्त्येति [?] विशेषणेनाप्रसिद्धशक्यव्यञ्जके नानार्थे नातिप्रसङ्गः। प्रसिद्धिश्च भूरिप्रयोगाहितपटुतरसंस्कारगोचरत्वम्। तेन तस्य शीघ्रोपस्थित्या तदितरतिरोधानम्। **यावकेत्यादि**। यावकरसे रुधिरभ्रमान्मुग्धा। सहसा तत्क्षणं, विलम्बेन नायिकाया भ्रमोच्छेदसंभावनात्। अत्र स्पष्टमेव प्रकृतार्थप्रतीतिमान्थर्यं दूषकताबीजम्।

अनुचितार्थम् यथा

तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या।
प्रयान्ति तामाशु गतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः ॥१४६॥

अत्र पशुपदं कातरतामभिव्यनक्तीत्यनुचितार्थम्।

बालचित्तानुरञ्जनी—षष्ठमुदाहरति अनुचितेति। तपस्विभिः प्रयत्नतः सुचिरेण या गतिः लभ्यते सत्रिभिः अग्निहोत्रिभिः या गतिः इष्यते प्राप्यते तां गतिं रण एवाश्वमेधे पशुतामुपागताः यशस्विनः प्रयान्ति गच्छन्ति। पशुपदात् कातर्यप्रतीतेः कातर्ये च सति गतेरभावात्। 'रणे वाऽभिमुखो हत' इति वचनात्। अतः पशुपदं प्रत्युत चमत्काराजनकत्वादनुचितार्थमित्याह अत्रेति।

सारबोधिनी—उपश्लोक्यमानतिरस्कारव्यञ्जकार्थत्वमनुचितार्थत्वम्। तपस्विभिरिति। सत्रिभिर्याज्ञिकैः। अत्र पशुपदात्प्रकृष्टकार्याक्षमत्वं प्रतीयते। सैव कातरतेति उपश्लोक्यमानतिरस्कारोपस्थितिर्दूषकताबीजम्।

निरर्थकम्, पादपूरणमात्रप्रयोजनं चादिपदम्। यथा

उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि।
अभिवाञ्छितं प्रसिद्ध्यतु भगवति युष्मत्प्रसादेन ॥१४७॥

अत्र हिशब्दः।

बालचित्तानुरञ्जनी–सप्तममुदाहरति **निरर्थकमिति**। तदेव व्याकरोति **पूरणेति**। चादि, च वा, हि इत्यादिपदमित्यर्थः। उत्फुल्लं विकसितं यत्कमलं तस्य केसराणां परागो धूलिः, तद्वद्गौरा द्युतिः यस्याः सा तस्याः सम्बोधनं हे गौरि भगवति। युष्मत्प्रसादेन मम वाञ्छितं प्रसिद्ध्यतु। लटा निर्देशे हिशब्दस्य अवधारणाद्यर्थत्वं कल्पयितुं शक्यते। अत्र तु लोटा निर्देशः। अतो हिशब्दः पूरणमात्रप्रयोजन इत्याह **अत्रेति**। निपाताः वक्तृगतशोकादिद्योतका द्योतनीयार्थे प्रयोक्तव्या इति भावः। भगवतीत्येकवचनेन सम्बोध्य युष्मत्प्रसादेनेति बहुवचनमनुचितमित्यपि द्रष्टव्यम्।

सारबोधिनी–**उत्फुल्लेति**। 'युष्मदि'ति गौरवाय बहुवचनम्। तेनैकत्वेन सम्बोधनेऽपि नासङ्गतिः। न चाधिकपदता, चादीनां छन्दःपूरणेऽपि पाठेन निष्प्रयोजनत्वविरहात्, तत्त्व एवाधिकपदत्वात्। अत्र तत्पदव्यतिरेकप्रयुक्तान्वयाबोधकत्वाभावान्निराकाङ्क्षत्वमेव दूषकताबीजम्।

अवाचकम्, यथा

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥१४८॥

अत्र जन्तुपदमदातर्यर्थे विवक्षितम् तत्र च नाभिधायकम् ।

बालचित्तानुरञ्जनी—अष्टममुदाहरति **अवाचकमिति** । विद्विषादर इत्यत्र आदरः दर इति द्वयं श्वेतो धावतीतिवत्तन्त्रेणोपात्तम् । देहिनः शत्रुमित्रादयः प्राणिनः अवन्ध्यः अनिष्फलः कोपो यस्य, आपदां विहन्तुः राज्ञः स्वयमेव प्रयत्नं विना वश्या भवन्ति । आपदां विहन्तुरित्यनेन दातृत्वं विवक्षितम्, न हि दातृत्वमन्तरेण आपन्निराकर्तुं शक्यते । क्रोधादिसाफल्यं अन्वयमुखेनाभिधाय व्यतिरेकमुखेनाप्याह । जातं हार्दं स्नेहो यस्य तेन मित्रेण जन्तुना अदात्रा सता जनस्य आदरो न, विद्विषा शत्रुणा अमर्षशून्येन सता दरः भयं न । अवन्ध्यकोपस्येत्यत्र व्यतिरेकः । अमर्षशून्यत्वमापदां विहन्तुरित्यस्य व्यतिरेकः । अदातृत्वप्रतिपादनार्थं जन्तुपदमुपात्तम् । तत्तस्य वाचकं न भवति तत्रासङ्केतितत्वादित्याह **तत्रेति** ।

सारबोधिनी—**अवाचकमिति**, अत्र **मिश्राः**"सङ्केतविरहादबोधकमवाचकम् । असमर्थेनासङ्केतः लाक्षणिकेनावबोधकत्वमिति तयोर्न प्रसङ्ग"इत्याहुः । **अवन्ध्येति** । आपदा दारिद्र्यरूपाणां विहन्तुर्दातुरित्यर्थः । जातहार्देन जातस्नेहेनापि जन्तुना । अत्रानादरः । अमर्षशून्येन विद्विषापि न दरो भयमित्यर्थः । **अत्र जन्तुपदमिति** । पूर्वार्द्धे आपद्विघातकत्वं दातरि प्रयुक्तं, तद्वैपरीत्यप्रदर्शकं जन्तुपदमदातरि प्रयुक्तम् । अदातृत्वे च सङ्केतविरहादवाचकम् । न च तात्पर्यानुपपत्त्या लक्षणया बोधकमिदमस्त्विति वाच्यम् । यदा प्रयोजनप्रतिपिपादयिषाविरहाल्लक्षणाया अनवसरस्तदा सुविभक्तावप्यस्य दूषणत्वात् ।

यथा वा

हा धिक् सा किल तामसी शशिमुखी दृष्टा मया यत्र सा
तद्विच्छेदरुजान्धकारितमिदं दग्धं दिनं कल्पितम् ।
किं कुर्मः कुशले सदैव विधुरो धाता न चेत्तत्कथं
तादृग्यामवतीमयो भवति मे नो जीवलोकोऽधुना ॥१४६॥

अत्र दिनमिति प्रकाशमयमित्यर्थेऽवाचकम् ।

बालचित्तानुरञ्जनी-सङ्केताभासविषयत्वेन किञ्चिद्भेदमाश्रित्यात्रैवोदाहरणमाह **यथा वेति** । यत्र यस्यां रात्रौ सा शशिमुखी मया दृष्टा सा रात्रिः तामसी तमोमयी कल्पिता । यत्र दिने सा न दृष्टा । तस्याः शशिमुख्याः विच्छेदः विरहः तज्जातशोकेन दग्धम् । अत एव अन्धकारितदिन प्रकाशत्वेन कल्पितं किल । हा धिक् किं कुर्मः ? धाता ब्रह्मा कुशले सत्कर्तव्ये सदैव विधुरः विमुखः । अत्र दिनमित्यस्य प्रकाशमयमित्यत्रार्थे सङ्केताभासः । स्वविभावसंभावनया स्वकल्पनामात्रपरिकल्पितत्वात् [?] । न च तमोयोगाद्रात्रेस्तामसीत्ववत् प्रकाशवद्गुणत्वाद्दिनशब्देन प्रकाशो विवक्ष्यत इति वाच्यम् । शब्दशक्त्यभावात् । अतः न शब्दः प्रकाशवाचक इत्याह **अत्रेति** ।

सारबोधिनी—**हा धिक् सेति** । अत्र निपातसमुदायेन निर्वेदातिशयो ध्वन्यते । तत्र हेतुमाह **तामसीति** । यत्र सा शशिमुखी दृष्टा सा किल तामसी तमोयुक्ता । शशिनः समुद्भवे तमसोऽयोग्यत्वादिति भावः । एवं तद्विश्लेषरुजान्धकारितमिदं दग्धं दिनं प्रकाशमयं कल्पितम् । अन्धकारितस्य प्रकाशमयत्वा

योग्यत्वादिति भावः। तस्मात् कुशले इष्टे विधुरो वैरी। न चेदित्यत्र विधुर इत्यस्यानुषङ्गः। अत्रापि दिनपदस्य प्रकाशमयमित्यर्थे सङ्केतविरहान्न वाचकत्वमिति।

यच्चोपसर्गसंसर्गादर्थान्तरगतम्। यथा

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः।
भर्त्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापी-
संभूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः ॥१५०॥

अत्र दधदित्यर्थे विदधदिति।

बालचित्तानुरञ्जनी—अवाचकान्तरमुदाहरति यच्चेति। यच्चोपसर्गयोगादर्थान्तरगतं पूर्वार्थे[?] प्रयुक्तं तदप्यवाचकमित्यर्थः। जङ्घाकाण्ड एवोरुः स्थूलो नालो दण्डो यस्य, नखकिरणा एव लसत्केसराः तेषामाल्या पंक्तया करालः। प्रत्यग्रस्य नूतनस्य अलक्तकस्य लाक्षारसस्याभानां कान्तीनां प्रसरा एव किसलयानि यस्य। मञ्जुः मनोज्ञः मञ्जीरः नूपुर एव भृङ्गो यस्य। भर्तुः शिवस्य नृत्तस्य उद्धतताण्डवस्य अनुकारे अनुकरणे भवान्याः अभिनवः दण्डपादः ऊर्ध्वप्रसारितस्य दण्डसादृश्याद् दण्डपाद इत्युच्यते। निजतनोः स्वशरीरस्य स्वच्छं यल्लावण्यं तदेव वापी तस्याः सम्भूतं यदम्भोजं तस्य शोभां विदधत् बिभ्रत् सन् जयति सर्वोत्कर्षेण वर्तते। अत्र विपूर्वस्य धा दधातेः।

"धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते।
तमेव विशिनष्टयन्यदुपसर्गगतिस्त्रिधा" ॥

इति न्यायात् अत्रोपसर्गस्य बाधकत्वेन करोत्यर्थत्वात् करोत्यर्थत्वे अन्यदीयां शोभां करोति न स्वयं भातीति स्यात्। अतः धारणार्थत्वं वक्तव्यम्। तद्धारणं प्रति विदधत्पदमवाचकमित्याह **अत्रेति**।

सारबोधिनी-जङ्घाकाण्डेति। "[प्रसह्योर्ध्वीकृतः] पादो दण्डपादोऽभिधीयते।" "नृत्यं पदार्थाभिनयं नृत्तं ताललयाश्रितम्"। तदत्र नृत्यानुकारे नृत्तानुकार इति पाठः। जङ्घाकाण्ड एव उरुरतिशयितो नालो यत्र। यद्वा जङ्घाकाण्डश्च ऊरुश्चेत्यर्थः। करालो दन्तुरः। किसलयो नवदलम्। **अत्रेति**। विदधदिति धारणे सङ्केतविरहादवाचकः। उपसर्गेण नियमितशक्तिकत्वात्। अत एवोक्तम् **"यच्चोपसर्गसंसर्गादि"त्यादि**।

अपरे तु, असमर्थे धर्मधर्मिणोर्द्वयोरपि शक्तिविरहः अवाचके तु धर्ममात्रे। तथा च तात्पर्यविषयप्रकारानवच्छिन्नशक्तिमत्त्वमवाचकत्वम्। नन्वेवं विदधदित्यत्रास्याव्यापनं स्यादिति चेदुच्यते असमर्थभेदा एते अवाचकादय इति प्रदर्शनार्थम्। अत एव ग्रन्थकृतैव "यद्यप्यसमर्थस्यैवाप्रयुक्तादयः केचन भेदा" इत्यनेन कण्ठरवेण तथा प्रतिपादितम्। दूषकताबीजन्तु अतात्पर्यविषयीभूतप्रकारकप्रतीत्यजननमेव, न प्रतीत्यभावः, असमर्थेऽपि तस्य सत्त्वादिति वदन्ति।

अश्लीलं त्रिधेति व्रीडाजुगुप्सामङ्गलव्यञ्जकत्वात् । यथा

साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते ।
तस्य धीशालिनः कोऽन्यः सहेताराऽलितां भ्रुवम् ॥१५१॥

लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः
कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः ।
मुग्धा कुड्मलिताननेन ददती वायुं स्थिता तत्र सा
भ्रान्त्या धूर्ततयाऽथ वा नतिमृते तेनानिशं चुम्बिता ॥१५२॥

मृदुपवनविभिन्नो मत्प्रियाया विनाशाद्
घनरुचिरकलापो निःसपत्नोऽद्य जातः ।
रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे कं हरेदेष बर्ही ॥१५३॥

एषु साधनवायुविनाशशब्दा व्रीडादिव्यञ्जकाः ।

बालचित्तानुरञ्जनी—नवमोदाहरणे त्रिधाशब्दार्थमाह त्रिधेति । तत्र व्रीडाव्यञ्जकमश्लीलमुदाहरति यथेति । यस्य पुरुषस्य सुमहत्साधनं विलोक्यते यदन्यस्य न । धीशालिनस्तस्य अरालितां कुटिलितां भ्रुवं अन्यः कः सहेत । अत्र साधनशब्देन सैन्यं विवक्षितं पुंव्यञ्जनं तु प्रतीयते । अतो व्रीडाव्यञ्जकम् ।

जुगुप्साव्यञ्जकमुदाहरति लीलेति । लीलार्थं तामरसेन कमलेन आहतः अन्यवनितया सपत्न्या निःशङ्कं दष्टः अधरो यस्य, कश्चिन्नायकः केसरैर्दूषिते ईक्षणे यस्य स इव नेत्रे व्यामील्य निमील्य स्थितः । मुग्धा च कुड्मलितं मुकुलीकृतं यदाननं तेन तस्य नायकस्य वायुं ददती स्थिता सा मुग्धा च भ्रान्त्या मुग्धत्वेन नतिं नमनं ऋते अन्तरेण तेन नायकेन अनिशं चुम्बिता । अथवा धूर्ततया नायकसम्बन्धिन्या चुम्बिता । मुग्धाया मुग्धत्वं चुम्बनहेतुः नायकस्य धूर्तत्वं वेति न ज्ञायत इत्यर्थः । नतिमृत इति द्वितीया पुरुषाराधनमृत इत्यादिशिष्टप्रयोगाद्द्रष्टव्या । अत्र वायुशब्देन अधोवायुप्रतीत्या जुगुप्साव्यञ्जकमित्यर्थः ।

अमङ्गलव्यञ्जकमश्लीलमुदाहरति मृद्विति । मृदुपवनेन विभिन्नः विकसितः अस्य मयूरस्य घन निबिडश्चासौ रुचिरश्चासौ कलापः बर्हं च । मत्प्रियायाः विनाशात् अभावात् अदर्शनादिति यावत् । निःसपत्नो जातः । सुकेश्याः मत्प्रियायाः रतौ विलुलितः शिथिलितः बन्धो यस्य । कुसुमसनाथे पुष्पयुक्ते केशपाशे सति एष बर्ही मयूरः क हरेत् कं चमत्कारयुक्तं कुर्यात्, न कमपि। मत्प्रियाकेशसपाशसन्निधावयं न

शोभत इति भावः। अत्र विनाशशब्देन मरणप्रतीतेः, अमङ्गलव्यञ्जकम्। एषु व्रीडादिव्यञ्जकं किमित्याकाङ्क्षायामाह एष्विति।

सारबोधिनी—त्रिधेति। त्रिप्रकारकत्वं न वस्तुत्रित्वम्। सम्यग्वशीकरणसंपत्तिः श्रीः, तां लाति गृह्णाति। रश्रुतेर्लश्रुतिरिति, न श्लीलमश्लीलम्। व्यञ्जकत्वादिति कारणलक्षणया व्रीडादिशब्दैस्तद्धेतुकथनम्, उदाहरणेषु व्रीडादिव्यञ्जकत्वासंभवात्। व्यञ्जकत्वादित्यन्यस्य बोधकत्वादित्यर्थः। अन्यथा

पर्दते हदते स्तन्यं वमत्येव स्तनन्धयः।
जृम्भते मुहुरासीना प्राप्तगर्भा पुनर्वधूः॥

इत्यत्राव्याप्तेः। जुगुप्साया हेत्वभिधानेनाव्यञ्जकत्वात्।

साधनमिति। साधनं सैन्यं पुंव्यञ्जनञ्च। अरालितां भ्रुकुटीवशेन कुटिलाम्। **लीलेति**। अन्यस्य वनिता अन्यवनिता न त्वन्या वनिता, तदैव क्रोधातिशयात्। भ्रान्त्या अथवा धूर्ततया वायुं ददती स्थितेत्यन्वयः। **मृदुपवन इति**। कं हरेद् जयेत् अपि तु नैवम्। अर्थान्मिाम्, काक्वा न कमपीत्यर्थः। बर्ही इत्यनेन चन्द्रकलापसाम्येन कुसुमसनाथतोक्तिः। बर्ही मयूरः। बर्हं इत्यपपाठः, "पिच्छबर्हे नपुंसके" इत्यनुशासनात्। दूषकताबीजमनुभवसिद्धरसापकर्षकार्थोपस्थितिरेव। यद्वा तादृशोपस्थित्या श्रोतुर्वैमुख्यम्।

संदिग्धम् यथा

आलिङ्गितस्तत्रभवान् संपराये जयश्रिया।
आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु॥१५४॥

अत्र वन्द्यां किं हठहृतमहिलायां किं वा नमस्यामिति सन्देहः।

बालचित्तानुरञ्जनी—दशममुदाहरति **सन्दिग्धमिति**। तत्र सम्पराये युद्धे जयश्रिया आलिङ्गितः सन् आशीःपरम्परां आशीर्वादपरम्परां कर्णे कृत्वा कृपां कुरु। अत्र वन्द्यामिति बवयोरभेदाद्वन्द्यां नमस्यां आशीःपरम्परां कर्णे कृत्वेति सम्बन्धः, आशीःपरम्परां कर्णे कृत्वा बन्द्यां बलात्कारगृहीतायां राजवनितायां कृपां कुर्विति सम्बन्धो वेति सन्देह इत्याह **अत्रेति**।

सारबोधिनी—सन्दिग्धमिति। तात्पर्यसन्देहास्पदीभूतार्थद्वयोपस्थापकं सन्दिग्धम्। यत्तु, अनिश्चितानुपूर्वीकत्वं सन्दिग्धत्वम्, तदसत्। वाक्यदोषे "सुरालयोल्लासे"त्यादौ मार्गणादिपदे आनुपूर्वीनिश्चयेनापि तदव्याप्तिः। **आलिङ्गित इति**। सम्पराये युद्धे। बन्दी वन्द्या वेत्यर्थानिश्चयादनिश्चयः। न चानुपूर्वीनिश्चयाभावात्तत्कथमर्थद्वयोपस्थितिरिति वाच्यम्। लाघवेनानुपूर्वीज्ञानमात्रस्यैव तन्त्रत्वात्संशयेऽप्युपपत्तेः श्वेतो धावतीत्यादौ तथैवोपगमात्। अत्रार्थानिश्चय एव दूषकताबीजम्।

अप्रतीतं यत्केवले शास्त्रे प्रसिद्धम्। यथा

सम्यग्ज्ञानमहाज्योतिर्दलिताशयताजुषः।
विधीयमानमप्येतन्न भवेत्कर्म बन्धनम्॥१५५॥

अत्राशयशब्दो वासनापर्यायो योगशास्त्रादावेव प्रयुक्तः।

बालचित्तानुरञ्जनी—एकादशमुदाहरति **अप्रतीतमिति**। तस्यैवार्थमाह **यदिति**। सम्यग्ज्ञानमेव महाज्योतिः तेन दलितः आशयः सुखदुःखादिवासना यस्य तस्य भावस्तत्ता तां जुषमाणस्य पुरुषस्य विधीयमानं क्रियमाणमप्येतत्प्रकृतं कर्म बन्धकं न भवेत्। "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथे"ति वचनादित्यर्थः। "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर" इति योगशास्त्रादावेव प्रसिद्धमाशयपदमित्याह **अत्रेति**।

सारबोधिनी—**अप्रतीतमिति**। प्रति प्रतिशास्त्रे इतं ज्ञातं प्रतीतं, न पतीतमप्रतीतम् यत्किञ्चिच्छास्त्रपरिभाषितमित्यर्थः। **सम्यगिति**। सम्यक् ज्ञानं तत्त्वज्ञानम्। बन्धनम् बन्धजनकमित्यर्थः। वासनायां प्रयुक्तस्याशयशब्दस्य योगशास्त्रमात्रपरिभाषितत्वात् विरलप्रयोगेन झटिति न संस्कारोद्बोधकता, किन्तु भावनयैवेति भावनाविलम्बात् प्रतीतिमान्थर्यमेव दूषकताबीजम्।

ग्राम्यम् यत्केवले लोके स्थितम्। यथा

राकाविभावरीकान्तसंक्रान्तद्युति ते मुखम्।
तपनीयशिलाशोभा कटिश्च हरते मनः ॥१५६॥

अत्र कटिरिति।

बालचित्तानुरञ्जनी—द्वादशमुदाहरति **ग्राम्येति**। तस्यार्थमाह **यदिति**। हे प्रिये राकायां पूर्णिमायां यो विभावरीकान्तश्चन्द्रः तत्सङ्क्रान्ता द्युतिरिव द्युतिर्यस्य तत्ते मुखं तपनीयशिला सुवर्णशिला तस्याः शोभेव शोभा यस्याः सा कटिश्च मे मनः हरति। अत्र नितम्बवाचि कटिपदं ग्राम्यम् अव्युत्पन्नत्वादित्याह **अत्र कटिरिति**।

सारबोधिनी—ग्रामे भवो ग्राम्योऽविदग्धो न तु सभ्यस्तत्प्रयुक्तत्वं ग्राम्यत्वम्। **राकेति**। अखण्डचन्द्रपूर्णिमा राका। तपनीयं काञ्चनम्। **कटिरिति**। श्रोणीनितम्बादिकमौपनागरिकं कटिपदन्त्वविदग्धमात्रप्रयोज्यम्। अत्र वक्तुरविदग्धतानुसन्धानं रसापकर्षकमनुभवसिद्धमेव दूषकताबीजम्। अत्र कटिपदेऽश्लीलत्वसंभवेऽपि उपाधेरसङ्करात् दोषपार्थक्यम्।

नेयार्थम्।

"निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्।
क्रियन्ते साम्प्रतं काश्चित् काश्चिन्नैव त्वशक्तितः" ॥

इति यन्निषिद्धं लाक्षणिकम्। यथा

शरत्कालसमुल्लासिपूर्णिमाशर्वरीप्रियम्।
करोति ते मुखं तन्वि चपेटापातनातिथिम् ॥१५७॥

अत्र चपेटापातनेन निर्जितत्वं लक्ष्यते।

बालचित्तानुरञ्जनी—त्रयोदशमुदाहरति **नेयार्थमिति**। तस्यार्थमाह काश्चिदिति। "निरूढा लक्षणाः काश्चित्सामर्थ्यादभिधानवत्। क्रियन्ते साम्प्रतं काश्चित्काश्चिन्नैव त्वशक्तितः"॥ इति भाट्टवार्तिकम्। तत्र काश्चन लक्षणाः नैव क्रियन्ते। अशक्तितः प्रत्यायनसामर्थ्याभावादिति यन्निषिद्धं लाक्षणिकं तन्नेयार्थम्। नेयः बुद्धिबलादाक्षेप्तव्यः। नेतुः स्वारसिकलक्षणासंधुक्षितोऽर्थो यस्येति विग्रहः। हे तन्वि ते मुखं शरत्काले समुल्लासी असौ पूर्णिमायां शर्वरीप्रियश्च तं चपेटस्य हस्तविशेषस्य आपातनमर्प्पणं तस्य अतिथिं संभोक्तारं करोति। त्वन्मुखं शरत्कालपूर्णिमाचन्द्रमधःकरोतीत्यर्थः। अत्र साम्यमाधिक्यञ्चेति सन्देहात् असामर्थ्यान्निषिद्धं लाक्षणिकमित्याह **अत्रेति**।

सारबोधिनी—**काश्चिदिति**।

"निरूढा लक्षणाः काश्चित्सामर्थ्यादभिधानवत्।
क्रियन्ते साम्प्रतं काश्चित्"

इत्यन्यभागो द्रष्टव्यः। क्वचिदाकार एव तादृशः पाठः। **निषिद्धमिति**। रूढिप्रयोजनान्यतरशून्यमिति पर्यवसितोऽर्थः। **अत्रेति**। न्यायमते वृत्त्यभावेन शाब्दबोधाभावेपि गुरुमतेनेदम्। तन्मते वृत्त्यनुपस्थितस्यापि शाब्दबोधविषयत्वात्। न च लक्षणाविरहात् कथं पदार्थोपस्थितिरिति वाच्यम्, शक्यसम्बन्धमात्रेणापि तदुपपत्तेः। दूषकताबीजं कवेरव्युत्पत्तिप्रतिसन्धानेन वैरस्यापादकत्वम्। वस्तुतस्तु अस्य वक्ष्यमाणं वस्त्रवैदूर्यादिकमेवोदाहरणम् न तु शरत्कालेत्यादि। अत्र निर्जितत्वातिशयप्रयोजनस्य संभवात्। केचित्तु, उत्तमं प्रति अधमेन तथात्वे ब्रूते तदभावात्। प्रत्युताधमस्यैवेति अप्रवृत्तेरित्याहुः।

अथ समासगतमेव दुष्टमिति संबन्धः। अन्यत् केवलं समासगतञ्च।

क्लिष्टम् यतः अर्थप्रतिपत्तिर्व्यवहिता। यथा

अत्रिलोचनसम्भूतज्योतिरुद्गमभासिभिः।
सदृशं शोभतेऽत्यर्थं भूपाल तव चेष्टितम्॥१५८॥

अत्रात्रिलोचनसम्भूतस्य चन्द्रस्यज्योतिरुद्गमेन भासिभिः कुमुदैरित्यर्थः।

बालचित्तानुरञ्जनी—अथ भवेत् क्लिष्टम् इत्यत्राथशब्दः क्लिष्टादित्रयस्य समासगतत्वमवस्थापयतीत्याह **अथेति**। क्लिष्टादित्रयमिति शेषः। एवकारार्थमाह **अन्यदिति**। अन्यत् च्युतसंस्कृत्यादि। केवलं असमस्तम् वाक्यगते केवलपदं समासगतञ्च दुष्टम् न तथा क्लिष्टादित्रयं केवले पदे दूषणाभावादित्येवकारार्थः। न पुनरसमासे दोषाभाव इति विवक्षितम्। वाक्येऽपि दोषाः सन्तीति वक्ष्यमाणविरोधप्रसङ्गात्।

चतुर्दशमुदाहरति **क्लिष्टमिति**। तस्यैवार्थमाह **यत इति**। अर्थप्रतीतेर्व्यवधानादृते अन्यस्य क्लेशस्याभावात् व्यवधानमेव क्लेश इत्यर्थः। हे भूपाल तव चेष्टितं चरितं, अत्रिर्मुनिः तस्य लोचनात्संभूतं ज्योतिश्चन्द्रः, तस्य उद्गमेन उदयेन भासन्त इति भासीनि कुमुदानि। तैः सदृशं समानं यथा तथा। अत्यर्थं शोभते। अत्र [र्थ ?] प्रतीतेर्व्यवहितत्वमाह **अत्रेति**। कपदप्रत्याय्यस्य कुमुदस्य अत्रिलोचनेत्याद्यनेकपदार्थपर्यालोचनेन व्यवहितप्रतीतिकत्वे क्लिष्टत्वमित्यर्थः।

सारबोधिनी–अथ समासेति । क्लिष्टादित्रयं समासगतमेव । क्लिष्टत्वादीनां पदान्तरसाहित्येनैव दोषत्वम् । असमासे तु वाक्यदोषत्वमेव । इतरेषां पददोषत्वम् । समासे असमासे चेति भावः । **क्लिष्टं यतोऽर्थप्रतीतिरिति** । यतो विवक्षितस्य वाक्यार्थस्य प्रतीतिर्विलम्बेनेत्यर्थः । निहतार्थादौ पदार्थोपस्थिति-रेव विलम्बितेति ततऽस्य भेदः । विलम्बश्च "धम्मिल्ले"त्यादावनासन्नत्वेन, प्रकृते "अत्रिलोचने"त्यत्र तु सामान्यासन्नात् पदात् प्रकरणाद्यनवतारे झटिति विशेषानुपस्थितिरित्यन्यदेतत् । दूषकताबीजं तु प्रतीतिमान्थर्यम् ।

अविमृष्टविधेयांशम् अविमृष्टः प्राधान्येनानिर्दिष्टो विधेयांशो यत्र तत् । **यथा**

मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा–
धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम् ।
कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां
दोष्णां चैषां किमेतत् फलमिह नगरीरक्षणे यत् प्रयासः ।।१५९।।

अत्र मिथ्यामहिमत्वं नानुवाद्यम् अपि तु विधेयम् ।

बालचित्तानुरञ्जनी–पञ्चदशमुदाहरति । **अविमृष्ट इति** । तस्यार्थमाह **प्राधान्येनेति** । प्राधान्येन साध्यत्वेनेत्यर्थः । अत्र पद्ये एषां उद्धतं यथा तथा कृत्ते छिन्ने अस्या[?]अविरलं अनल्पं अन्योन्यसंसक्तेभ्यः गलेभ्यः कण्ठेभ्यः गलत् स्रवत् यद्रक्तं तस्य संसक्ताभिरविच्छिन्नाभिर्धाराभिः धौतौ ईशस्य शिवस्य अङ्घ्री चरणौ तयोः प्रसादेन उपनतात् प्राप्तात् जयात् जगति जातः मिथ्यामहिमा येषां मूर्ध्नाम् कैलासस्य उल्लासने इच्छा तस्याः व्यतिकरः सम्पर्कः तत्पिशुनश्चासावुत्सर्पी वाऽसौ दर्पो मदश्च तेन उद्धुराणां दोष्णां भुजानां नगरीरक्षणे प्रयासं इति यत् एतत् फलं किम् ? अत्र किं विधेयम् यस्याविमर्शः ? अत्राह **अत्रेति** । मिथ्यामहिमत्वस्यानुवाद्यत्वे लङ्कोपरोधात् पूर्वमपि तत्प्रसङ्गः । अतो लङ्कापरित्राणसामर्थ्यात् मिथ्यामहिमत्वं साध्यं तद्वाक्येनैव प्रतीयते, न समासेन गुणत्वप्रतीतेरविमृष्टविधेयत्वमिति भावः ।

सारबोधिनी––प्राधान्येनेति । प्राधान्यं विधेयता प्रतीतियोग्यत्वम् । तदुक्तम्

"यच्छब्दयोगः प्राथम्यं सिद्धत्वं चाप्यनूद्यता ।
तच्छब्दयोग औत्तर्यं साध्यत्वं च विधेयता" ।।

गलन्ती या रक्तसंसक्तधारा तया धौतौ यौ ईशाङ्घ्री तत्प्रसादोपनतो यो जयस्तेन जगति जातो मिथ्या-महिमा येषां तेषामिति मूर्द्धविशेषणम् । तादृशां दोष्णां च किमेतत्फलं जातम् यदिह नगरीरक्षणेऽपि प्रयासोऽसामर्थ्यमित्यर्थः ।

अत्रेति । यद्यत्र मिथ्यामहिमत्वमनुवाद्यं स्यात्तदा तदनूद्य किञ्चिद्विधेयं स्यात् । **प्रकृते** तु यदि तदेव मिथ्यामहिमत्वं जातं तदेदानीं नगरीरक्षणे प्रयासो नानुचितः । यदि विधेयं स्यात्तदा तादृशेनापि कर्मणा यन्महत्त्वं तदाभूत्तदिदानीं मिथ्या बभूव । यतः स्वनगरीरक्षणेऽप्यसामर्थ्यमिति **प्रतीतिः सिध्यति**, अतो मिथ्यात्वस्यैवाप्राप्तत्वान्मिथ्यामहिमत्वमित्यस्य महिम्नो मिथ्यात्वमित्यर्थ एव करणीयः । **तच्च**

मिथ्यात्वं बहुव्रीहावन्यपदार्थप्रधाने गुणीभूतम् । किञ्च, उद्देश्यं विधेयं च यदि पृथक्पदाभ्यामुपतिष्ठते तदा प्राप्तमुद्दिश्याप्राप्तं विधीयते, पर्वतो वह्निमानितिवत्, न तु समासे, अन्यथा वह्निमत्पर्वत इत्यभिधानापत्तेः ।

यथा वा

स्रस्तां नितम्बादवरोपयन्ती पुनः पुनः केसरदामकाञ्चीम् ।
न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य ॥१६०॥

अत्र द्वितीयत्वमात्रमुत्प्रेक्ष्यम् । मौर्वीं द्वितीयामिति युक्तः पाठः ।

बालचित्तानुरञ्जनी–शिष्यशिक्षार्थमत्रैवान्यान्यप्युदाहरति यथा वेत्यादिना । स्थानविदा स्मरेण न्यासीकृतां निक्षेपीकृतां कार्मुकस्य द्वितीयमौर्वीमिव स्थितां नितम्बस्रस्तां केसरपुष्पैः बकुलपुष्पैर्निर्मितां काञ्चीं पुनः पुनरवलम्बमाना पार्वती अदृश्यत । अत्रविमृष्टविधेयत्वमाह अत्रेति । कार्मुकस्य मौर्वीमात्रे सिद्धे द्वितीयत्वमात्रं विधेयम्, तस्य समासकरणान्न प्रतीयत इति अविमृष्टविधेयत्वमित्यर्थः ।

सारबोधिनी––स्रस्तामित्यादि । स्थानविदा आधारसाद्गुण्येन गुणप्रकर्षविज्ञेन । अत्रेति । स्वीयवस्तुन एव न्यासीकरणं न तत्सदृशस्येति नोपमा । तदाह उत्प्रेक्ष्यमिति । ननु द्वितीयमौर्वीत्वं विशिष्टमेव विधेयम्, अतो न दोष इति चेत् अत्र केचित्, बकुलमालाया मौर्व्याकारत्वेन मौर्वीत्वप्राप्तौ द्वितीयत्वस्यैव विधेयत्वमित्याहुः । ननु तर्हि द्वितीयत्वस्यापि प्राप्तत्वादुत्प्रेक्षाया एवासम्भवः स्यात् ।

यथा वा

वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद् बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने ॥१६१॥

अत्रालक्षिता जनिः इति वाच्यम् ।

बालचित्तानुरञ्जनी–वपुः विरूपाक्षम् । अलक्ष्यं जन्म यस्य तस्य भावस्तत्ता । वसु धनं दिगम्बरत्वेन निवेदितम् । हे बालमृगाक्षि पार्वति ! वरेषु यन्मृग्यते अन्विष्यते कन्यकादिभिः तत्त्रिलोचने व्यस्तमपि किमस्ति ।

"कन्या वरयते रूपं माता वित्तं पिता श्रुतम् ।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥"

इति न्यायेन वरगुणेषु गवेषणीयेषु साकल्यं तावदास्ताम् तदेकदेशोऽप्यत्र नास्तीत्यभिप्रायेणोक्तं **व्यस्तमपीति** । यथा वपुरित्यनूद्य विरूपाक्षत्वं विधेयं, तत्र समासकरणान्न प्रतीयत इत्यविमृष्टविधेयत्वम् । तर्हि एतत्कथं पठनीयमित्याकाङ्क्षायां शिष्यशिक्षार्थमाह **अत्रेति** ।

सारबोधिनी-वस्तुतः पूर्वापरितोषात् उदाहरणान्तरमाह **वपुरिति** । तद्धितप्रत्ययार्थगुणीभूते बहुव्रीहचर्थे गुणीभावाभिप्रायेण लक्ष्यभेद इति केचित् । **मिश्रास्तु** समासगतमेवेत्यत्र समासपदस्य युक्तार्थ-मात्रपरतया तद्धितार्थगुणीभूतत्वदर्शनायेदमुदाहरणमित्याहुः । अत्र जन्मनोऽलक्ष्यत्वं विधेयम्, तच्च गुणीभूतम् । अलक्षिता जनिरिति पददोषोद्धारमात्राभिप्रायेण पाठकल्पनम् । अन्यथा, अलक्षितेत्यस्य प्रागुपादानेन वाक्यगतविधेयाविमर्शतादवस्थ्यात् । वस्तुतस्तु-त्रिलोचने जन्मनोऽप्यसिद्धतया अलक्षितेत्यस्य विशेषणस्य पूर्वोपादानमुचितमिति रचितः पाठः समीचीनः ।

यथा वा

आनन्दसिन्धुरतिचापलशालिचित्तसन्दाननैकसदनं क्षणमप्यमुक्ता ।

या सर्वदैव भवता तदुदन्तचिन्ता तान्तिं तनोति तव सम्प्रति धिग्धिगस्मान् ॥१६२॥

अत्र 'न मुक्ता' इति निषेधो विधेयः ।

बालचित्तानुरञ्जनी—अस्यैवोदाहरणान्तरमाह **यथा वेति** । अन्यस्त्रीविरहविह्वलं नायकं काचिदसूयाशालिनी उपालभते । हे नायक, भवता आनन्दस्य सिन्धुः, अतिचापलेन शालिचित्तस्य सन्दाननं बन्धनं तस्य एकसदनं स्थानभूता या स्त्री वल्लभात्वेन सर्वदा क्षणमपि न परित्यक्ता । सम्प्रति तस्याः वार्ता चिन्ता तव तान्ति खेदं तनोति अस्मात् धिक् धिक् त्वद् [प्रतिषेध] दुःखनिवारणासमर्थत्वादिति भावः । अत्रासमासेन नञ् निषेधो विधातव्यः । न **मुक्तेति** । तदकरणादुपसर्जनत्वान्निषेधस्याविमृष्टविधेयत्वमित्याह **अत्र न मुक्तेति** ।

सारबोधिनी-नञ्समासेऽप्युदाहरति **आनन्देति** । सन्दाननं निगडनम् । उदन्तो वार्ता । तान्तिं ग्लानिम् । निषेधो विधेय इति असमास एव नञः प्रसज्यम्[प्रतिषेध]वाचकत्वन्नात्र तथेति भावः । तथाहि, क्रियासम्बन्धेनैव नञोऽभावप्रतिपादकत्वेन तया सह नञः तत्र एकाधिकरणत्वविरहात् न समासः । ततश्च मुक्ता न भवतीत्यर्थो विवक्षितः । स च न प्रतीयत इति । तदुक्तम्—

अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥ इति

अब्राह्मण इत्यादौ इतरसम्बन्धिनो नञः समासे ब्राह्मणप्रतियोगिकान्योन्याभावाप्रतिपत्तावभावस्य विशेषणत्वेन विधेयत्वाप्रतिपत्तेः[१७] । तथा चोक्तम्—

प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥ इति ।

यथा

नवजलधरः संनद्धोऽयं न दृप्तनिशाचरः
सुरधनुरिदं दूराकृष्टं न तस्य शरासनम् ।
अयमपि पटुर्धारासारो न बाणपरम्परा
कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी ॥१६३॥

इत्यत्र । न त्वमुक्ततानुवादेनान्यदत्र किञ्चिद्विहितम् ।

बालचित्तानुरञ्जनी—समासराहित्येन निषेधो विधातव्य इत्यत्र दृष्टान्तमाह **यथेति** । विरहिणो वचनम् । अयं नवजलधरः संनद्धः दृप्तो निशाचरो नेत्यत्र काकुः । इदं सुरधनुः तस्य निशाचरस्य दूराकृष्टं शरासनं धनुर्नेति काकुः । पटुर्धारासारोऽपि बाणपरम्परा नेति काकुः । कनकनिकषस्निग्धा विद्युन्मम प्रिया उर्वशी नेति काकुः । अत्र विरहित्वाज्जलधरस्य राक्षसत्वमारोपितम्, विद्युतः उर्वशीत्वमारोपितम् । अत्र न दृप्तनिशाचरेत्यादौ समासराहित्येन निषेधस्य प्राधान्यात् न तथा तत्रेति दुष्टत्वमित्यर्थः। नन्वमुक्तेत्यस्यानुवादोऽस्तु को दोषस्तत्राह **न त्विति**। यद्यनुवादस्तर्हि किञ्चिद्विधेयं स्यात् न च तदस्ति, अतो नानुवाद इत्यर्थः ।

सारबोधिनी – निषेधप्राधान्ये समासाभाव दृष्टान्तमाह यथेति । सन्नद्धः कवची दृप्तनिशाचरो न भवतीति गम्यमानम् भवतीति क्रियान्वयिनो नञो न समासः । एवमुत्तरेष्वपि । निकषः प्रस्तरविशेषः । नन्वमुक्तत्वमत्रानुवाद्यं "जुगोपात्मानमत्रस्त" इत्यत्रात्रस्तत्ववदित्याशङ्क्य निराकरोति **न त्विति** ।

यथा

जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत् ।।१६४।।

इत्यत्र, अत्रस्तत्वाद्यनुवादेनात्मनो गोपनादि ।

बालचित्तानुरञ्जनी—अनूद्य किञ्चिद्विधेयमित्यत्र उदाहरणमाह **यथेति** । स दिलीपः भयरहितः सन् आत्मानं जुगोप रोगरहितः सन् धर्मं भेजे, लोभरहितः सन् अर्थान् आददे, आसक्तिरहितः सन् सुखमन्वभूत् । आत्मरक्षादिपुरःसरं त्रिवर्गमन्वभूदित्यर्थः । अत्र किमनूद्यं किं विधेयमित्याकाङ्क्षायामाह **अत्रेति** । अत्रस्तत्वाद्यनुवादपूर्वकं आत्मनो गोपनादि विहितम् । एवममुक्ततानुवादेन न कस्यचिदर्थस्यात्र विधानम्, किन्तु आनन्दसिन्धुत्वाद्यनुवादेनामुक्तत्वं विधेयम् । तत्र निषेधस्य प्राधान्यात् नञः प्रसज्यप्रतिषेधोऽर्थो भवति, समासस्थस्य पर्युदासः । तथा चोक्तम्—

"अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ।।
प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्" ।।इति।

पर्युदासे समासः, यथा अत्रस्त इति । प्रसज्यप्रतिषेधेऽसमासो यथा न दृप्तनिशाचर इत्यादौ । तदुक्तम्—

"नञर्थस्य विधेयत्वे निषेधस्य विपर्यये ।
समासो नेष्यतेऽर्थस्य विपर्यासप्रसङ्गतः" ।।इति ।

तथा चात्रामुक्तेति समासकरणात् विधेयत्वाप्रतीतेर्दुष्टत्वमिति भावः ।

सारबोधिनी–गृध्नु[१२]राकाङ्क्षाशीलः। असक्तः अनासङ्गः। तत्रात्मगोपनादिवदत्र विधेयान्तराभावाद्विधेयत्वमेवेति भावः। ननु क्वचित्समासेऽपि नञर्थस्य प्राधान्यप्रतीतिर्दृश्यते। यथाऽलवणभोजी, अश्राद्धभोजीत्यत्रानयोरलवणाश्राद्धोपपदाद्भुजेर्व्रताभीक्ष्ण्ययोश्चेति विहितेन णिनिना श्राद्धं लवणं च न भुङ्क्ते इति श्राद्धलवणभोजनाभावरूपव्रताभिधानात्। यद्वा श्राद्धलवणपदाभ्यां नञः समासे श्राद्धलवणेतरभोजनस्य रागपरिप्राप्तत्वेन तद्व्रतस्य भोजननिषेधपर्यवसानमित्यभावप्राधान्यम्। एवमसूर्यंपश्या राजदारा इत्यत्र राजदाराणामेव गोपनपदपरिहार्यदर्शनम्, सूर्यमपि न पश्यन्तीत्यभावप्राधान्यम्। सूर्येतरदर्शित्वे च गोपनं न स्यात्। गोपन एव महाकविप्रयोगात्। अत एव दर्शिना सह सम्बद्धस्य नञः सूर्येण सह समासो गमकत्वादित्युक्तम्। गमकत्वादिति। दृशिसम्बन्धेनैव नञो गोपनस्य विधेयत्वादित्यर्थः। अभिधानादत्र समासो गोपनातिशयप्रतीतिरिति तत्त्वमिति चेन्न। तथात्र प्रकृतेऽनुशासनाभावात्। नन्वत्र नञ्भिन्नस्याकारस्य निषेधार्थत्वात् समासाभावेन नात्रायं दोषः इति चेन्न, एवमपि पर्युदाससन्देहानपायात् नञ्भिन्नस्याकारस्यासत्त्वाच्च। अनातुर इत्यस्य समासासमासभेदेन[१९] द्वैविध्यकथनपरत्वात्। दूषकताबीजन्तु विवक्षितविधेयतानुपपत्तिः।

विरुद्धमतिकृत् यथा

> सुधाकरकराकारविशारदविचेष्टितः।
> अकार्यमित्रमेकोऽसौ तस्य किं वर्णयामहे ॥१६५॥

अत्र 'कार्यं विना मित्रम्' इति विवक्षितम् 'अकार्ये मित्रम्' इति तु प्रतीतिः।

बालचित्तानुरञ्जनी–षोडशमुदाहरति **विरुद्धेति**। सुधाकरश्चन्द्रः। तस्य किरणसदृशं विशारदं विचेष्टितं यस्य सोऽसावेकः कार्यं विना मित्रम् तस्य गुणान् किं वर्णयामहे। अत्र किं विवक्षितं का वा विरुद्धप्रतीतिस्तत्राह **अत्रेति**। कार्यं प्रयोजनं विना मित्रम् अकृत्रिमः सुहृदित्यर्थः। अकार्येषु अन्यान्येषु कर्मसु मित्रमिति तु विरुद्धप्रतीतिः।

सारबोधिनी—**विरुद्धेति**। प्रकृतार्थधीप्रतिबन्धकीभूताप्रकृतार्थधीजनकं विरुद्धमतिकृत्। तेन विरुद्धस्य मतिर्विरुद्धा वेति समासे नास्था। विरुद्धत्वञ्च प्रकृतन्यक्कारप्रतीतिकारित्वम्[२०]। अनुचितार्थाश्लीलयोरर्थानां न परस्परप्रतिबन्धकता। अमतपरार्थे तु द्वयोरपि प्रकृतत्वम् निहतार्थे तु विलम्बेन प्रतीतिरिति भेदः।

सुधाकरेति। विशारदं श्रेष्ठम्। **अत्रेति**। कार्यस्याभावोऽकार्यं तेन मित्रमकृत्रिममित्रमित्यस्याव्ययीभावे लक्षणानुसंधाने विलम्बेन तदपेक्षया शक्तिलक्षणयोरन्यतराभावात्कर्मधारये तज्झटिति कुकार्यप्रतीतिरित्याह **अकार्येषु मित्रमिति**। **प्रतीतिरिति**। कुकार्यमित्यत्र तस्य प्रतीतिरित्यर्थः, अत्रोपश्लोकनविरोधिनः समासावयवस्य नञो निन्दार्थत्वात्। यदुक्तम्

> "तत्सादृश्यं तदन्यत्वं तदल्पत्वं विरोधिता।
> अप्राशस्त्यमभावश्च नञर्थाः षट् प्रकीर्तिताः" ॥ इति।

यथा वा

चिरकालपरिप्राप्तलोचनानन्ददायिनः ।
कान्ता कान्तस्य सहसा विदधाति गलग्रहम् ॥१६६॥

अत्र 'कण्ठग्रहम्'इति वाच्यम् ।

बालचित्तानुरञ्जनी–अत्रैव शाब्दं विरोधमाह **यथा वेति**। कान्ता चिरकालाप्राप्त्या लोचनयोः सन्तोषदायिनः पुरुषस्य सहसा गलग्रहमालिङ्गनं करोति। गलग्रहस्य रोगविशेषत्वात् तत्प्रतीतिनिवृत्त्यर्थं कण्ठग्रहमिति वक्तव्यमित्याह **अत्रेति**।

सारबोधिनी--प्रपञ्चयति **यथा वेति**। गलग्रहो रोगविशेषः। तत्र च समुदाये शक्तिरालिङ्गने च योगः तत्र समुदायशक्तेर्बलवत्त्वात् रोगस्यैव प्रतीतिरिति विरुद्धस्य मतिः। न च रूढ्यर्थबाधेऽवयवशक्त्या परिरम्भप्रतीतौ निहतार्थत्वमेव स्यादिति वाच्यम्। विलम्बेनापि गलग्रहपदात्तदप्रतीतेः रूढ्या योगप्रतिबन्धात्। शोणितादौ त्वर्थद्वयस्य रूढिसाम्येऽपि भूरिप्रयोगादप्रकृतार्थस्य प्राक् प्रतीतिरिति।

यथा वा

न त्रस्तं यदि नाम भूतकरुणासन्तानशान्तात्मनः
तेन व्यारुजता धनुर्भगवतो देवाद् भवानीपतेः।
तत्पुत्रस्तु मदान्धतारकवधाद्विश्वस्य दत्तोत्सवः
स्कन्दः स्कन्द इव प्रियोऽहमथ वा शिष्यः कथं विस्मृतः ॥१६७॥

अत्र भवानीपतिशब्दो भवान्याः पत्यन्तरे प्रतीतिं करोति।

बालचित्तानुरञ्जनी--उदाहरणान्तरमाह **यथेति**। धनुर्व्यारुजता भग्नं कुर्वता तेन रामेण भूतेषु करुणा तस्याः सन्तानः तेन शान्त आत्मा यस्य ततो भगवतो भवानीपतेर्देवात् यदि नाम न त्रस्तं मा भूयतां त्रस्तेन [?] मदेन अन्धस्तारकः तस्य वधात् विश्वस्य दत्तोत्सवः ईश्वरपुत्रः स्कन्दस्तु कथं विस्मृतः। अथवा स्कन्द इव प्रियः ईश्वरस्य शिष्यः अहं कथं विस्मृत इति परशुरामवचनम्। "पुंयोगादाख्यायामि"ति ङीषि भवस्य पत्नी भवानी तस्याः पतिरित्युक्ते चैत्रपत्न्याः पतिरित्युक्त इव भवान्याः पत्यन्तरप्रतीतिरिति विरुद्धमतिकृदित्याह **अत्रेति**। न च भवानीपतिरित्यत्र पतिशब्देन भव एवोच्यत इति वाच्यम्। वैयर्थ्यप्रसङ्गात्। न च भवानी गौरीशब्दपर्याय इति वाच्यम्। भवस्य पत्नीति व्युत्पत्त्यभावप्रसङ्गादिति भावः।

सारबोधिनी--**न त्रस्तमिति**। सन्तानं समूहः। व्यारुजता भञ्जता। भवानीपतिशब्द इति योगरूढिन्यायेनावयवार्थप्रतीतौ भवाधिकोपादानस्वरसात्[२१] तथा प्रत्ययात्। अन्यथा भवादित्येव विदध्यात्। यद्वा भवस्य परिचायकतया गुणीभावेन पत्युः प्राधान्येनोपस्थितया द्वयोर्भेदात् भवानीपतिशब्दस्य तथा प्रतीतिकारित्वमित्यर्थः। वस्तुतस्तु नैतरमाधेयः। भवानीशब्देन दुर्गात्वप्रकारक एव बोधो जन्यते, अन्यथा

भवान्यपर्णादुर्गादिशब्दानां पर्यायत्वं न स्यात्, योगस्तु साधुत्वार्थः । एवं पङ्कजादिशब्देष्वपि । आराध्यायाः परमदेवताया एवं प्रतीतिरातङ्काधर्मदायिनीति विरुद्धा ।

यथा वा

गोरपि यद्वाहनतां प्राप्तवतः सोऽपि गिरिसुतासिंहः ।
सविधे निरहङ्कारः पायाद्वः सोऽम्बिकारमणः ॥१६८॥

अत्राम्बिकारमण इति विरुद्धां धियमुत्पादयति ।

श्रुतिकटु समासगतम् यथा

सा दूरे च सुधासान्द्रतरङ्गितविलोचना ।
बर्हिनिर्ह्लादनार्होऽयं कालश्च समुपागतः ॥१६९॥

एवमन्यदपि ज्ञेयम् ।

बालचित्तानुरञ्जनी—अत्रैवोदाहरणान्तरमाह **यथेति** । यः हस्तिमेघादिकमवलोक्य संरंभं करोति सोऽपि दुर्गायाः वाहनभूतः सिंहः यस्य ईश्वरस्य वाहनतां प्राप्तवतः गोरपि वलीवर्दस्यापि सतः निकटे निरहङ्कारः संरम्भरहितः सः अम्बिकायाः पतिर्युष्मान् पायात् रक्षतु । अम्बिकाशब्दस्य मातरि प्रसिद्धत्वात् मातृरमण इति विरुद्धमतिकृदित्याह **अत्रेति** ।

अन्यत्तु केवलं समासगतञ्चेति यदुक्तं तत्र कैवल्येनोदाहृतम् । समासेनोदाहरति **श्रुतीति** । विरहिवचनम् । सुधया सान्द्रे तरङ्गिते विलोचने यस्याः सा स्त्री च दूरे वर्तते । मयूरशब्दयोग्यः समयश्च वर्षाकालः समुपागतः । अत्र मयूरकेकानुकूल इत्यत्रार्थे बर्हिनिर्ह्लादनार्ह इत्युक्तत्वात् समासगतं श्रुतिकटुत्वमित्यर्थः । च्युतसंस्कृत्यादिषु समासगतं दूषणमुदाहर्तव्यमित्याह **एवमिति** । तत्र च्युतसंस्कृति यथा—**अन्यकारकवैयर्थ्यम्** । "अषष्ठचतृतीयास्थस्ये"त्यादिना प्राप्तस्य दूषकः अन्यशब्दस्य कारकशब्दं परतः अकरणात् । एवमन्यदपि समासगतम् अन्यत्राप्येवमेवोह्यमित्यर्थः ।

सारबोधिनी—प्रपञ्चयति **यथा वेति** । **विरुद्धां धियमिति** । अम्बिकाशब्दस्य मातृवाचकत्वादिति शेषः । तदुक्तं नृसिंहपुराणे—"शक्तित्वाल्लोकमातृत्वादम्बिका त्वं भविष्यसीति" । स्पष्टमत्र दूषकताबीजम् ।

अपास्य च्युतसंस्कारमसमर्थं निरर्थकम् ।
वाक्येऽपि दोषाः सन्त्येते पदस्यांशेऽपि केचन ॥५२॥

केचन न पुनः सर्वे ।

बालचित्तानुरञ्जनी—उक्ताः दोषाः च्युतसंस्कारमसमर्थं निरर्थकञ्च परित्यज्य अन्ये वाक्येऽपि भवन्तीत्याह **अपास्येति** । वाक्यस्य च्युतसंस्कारत्वं न दोषः । पदद्वयस्य युगपत् असाधुत्वासंभवात्, संभवे वा पदद्वयस्य दुष्टत्वात् । वाक्यस्यासमर्थत्वं न, विवक्षितार्थासिद्धिप्रसङ्गात् । नापि निरर्थकत्वम् उन्मत्तोक्तित्वप्रसङ्गात् । **केचनेति** । विशेषणकृत्यमाह **केचनेति** ।

सारबोधिनी-पददोषानेव वाक्ये निर्दिशति अपास्येति । साकाङ्क्षनानापदवृत्तिर्दोषो वाक्यदोषः । च्युतसंस्कारादित्रयाणां स्वभावादेवान्वयबोधस्वरूपायोग्यानामन्वयबोधने पदान्तरविरहप्रयुक्तत्वविरहेण साकाङ्क्षत्वाभावान्न वाक्यदोषत्वमिति तेषां वर्जनम् ।

क्रमेणोदाहरणम्

सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनतार्प्सीत्सममंस्त बन्धून् ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च ॥१७०॥

स रातु वो दुश्च्यवनो भावुकानां परम्पराम् ।
अनेडमूकताद्यैश्च द्यतु दोषैरसंमतान् ॥१७१॥

अत्र दुश्च्यवन इन्द्रः, अनेडमूको मूकबधिरः ।

बालचित्तानुरञ्जनी-क्रमेण श्रुतिकटुत्वादिना । सः दशरथः वेदानधीतवान् देवान् पूजितवान् पितॄन् तर्पितवान् बन्धून् सम्मानितवान् कामक्रोधादिषड्वर्गं जितवान् नीतावरंस्त नीत्या व्यवहृतवानित्यर्थः । शत्रून् समूलघातं हतवान् । क्रियाकारकव्याप्तत्वात् श्रुतिकटुत्वं वाक्यदोषः । स दुश्च्यवनः इन्द्रः युष्मभ्यं कल्याणानां सन्ततिं रातु ददातु । अनेडमूकताद्यैः दोषैः शत्रून् द्यतु खण्डयतु । अत्र दुश्च्यवनादिशब्दानामिन्द्रादिपर्यायत्वेऽपि महाकविभिरुपेक्षितत्वात् अप्रयुक्तत्वं वाक्यदोष इत्याह अत्रेति ।

सारबोधिनी-सोऽध्यैष्टेति । कामक्रोधलोभमोहद्वेषमात्सर्याणि[२३] षड्वर्गः । नन्वाख्यातवाक्यानां परस्परनिराकाङ्क्षत्वेन प्रत्येकं श्रुतिकटुत्वे कथं वाक्यदोषतेत्यत्र टीकाकृतः "व्यजेष्ट षड्वर्गमि"त्यत्रैव वाक्यदोषता, एकान्वयबोधकयोरिह सत्त्वात् । तत्प्रसङ्गेन सर्वपद्याभिधानमित्याहुः । वस्तुतस्तु-चकारबलादेकवाक्यत्वमस्त्येव । न चैवं "यस्य मित्राणि मित्राणी"त्यत्र चकारे सत्येकवाक्यत्वे कथं पदप्रकाश्यतेति वाच्यम् । एकवाक्यत्वे सत्यपि पदानां प्रत्येकं व्यञ्जकत्वानपायात् । अत्र वैयाकरणे वक्तरि कष्टत्वं गुण इत्यस्य स्वयं ग्रन्थकृता वक्ष्यमाणत्वेन भट्टिकाव्यस्य व्याकरणार्थनिरूपणैकतात्पर्यस्य पद्यमिदं श्रुतिकटुत्वे कथमुदाहृतमिति न जानीम इति विद्यासागरोक्तं दूषणं चिन्त्यम् । अप्रयुक्तमुदाहरति स रात्विति । रातु ददातु । द्यतु खण्डयतु । दुश्च्यवनपदमिन्द्रे अनेडमूकपदं मूकबधिरे पठितमपि कविभिरप्रयुक्तम् ।

सायकसहायबाहोर्मकरध्वजनियमितक्षमाधिपतेः ।
अब्जरुचिभास्वरस्ते भातितरामवनिप श्लोकः ॥१७२॥

अत्र सायकादयः शब्दाः खङ्गाब्धिभूचन्द्रयशःपर्यायाः शराद्यर्थतया प्रसिद्धाः ।

बालचित्तानुरञ्जनी-हे अवनिप राजन् सायकः खङ्गः सहायो यस्य तादृशो बाहुः यस्य, मकरध्वजेन समुद्रेण नियमितायाः क्षमायाः भूमेः अधिपतेस्ते श्लोको यशः, अब्जस्य चन्द्रस्य रुचिवत् भास्वरः सन् नितरां भाति । अत्र खड्गाद्यर्थाः शर-काम-क्षान्तिपङ्कजार्थैर्निहतार्था इति निहतार्थत्वं वाक्यदोष इत्याह अत्रेति ।

सारबोधिनी—निहतार्थमाह **सायकेति**। सायकः शरः खड्गश्च। मकरध्वजः समुद्रः कामश्च क्षमाधिपतिः क्षमाधारी क्षान्तिश्च। अब्जश्चन्द्रः, अब्जं पद्मम्। श्लोको यशः पद्यञ्च।

कुविन्दस्त्वं तावत्पटयसि गुणग्राममभितो
यशो गायन्त्येते दिशि दिशि च नग्नास्तव विभो।
शरज्ज्योत्स्नागौरस्फुटविकटसर्वाङ्गसुभगा
तथापि त्वत्कीर्तिर्भ्रमति विगताच्छादनमिह ॥१७३॥

अत्र कुविन्दादिशब्दोऽर्थान्तरं प्रतिपादयन्नुपश्लोक्यमानस्य तिरस्कारं व्यनक्तीत्यनुचितार्थः।

बालचित्तानुरञ्जनी—हे प्रभो, त्वं कुं पृथिवीं विन्दति लभत इति कुविन्दः। अभितः गुणानां समूहं पटुं करोषि। एते नग्नाः वन्दिनश्च प्रतिदिशं यशो गायन्ति। वनस्था इति पाठे किन्नराः। वनस्थौ किन्नरधीरावित्यभिधानात्। तथापि एवंविधवैभवे सत्यपि त्वत्कीर्तिस्त्वदङ्गनाभूता शरदि ज्योत्स्नावत् गौराणि स्फुटानि सर्वाङ्गाणि स्वरूपाणि तैः सुभगा सती विगतस्खलनं यथा स्यात् भ्रमति। अत्र कुविन्दपदात् तन्तुवायस्य, गुणग्रामपदात् तन्तुसमूहस्य, पटयसीति पदात् पटं करोषीत्यस्य, नग्नपदात् दिगम्बरत्वस्य, वनस्था इति पाठे कौपीनदानादिशीलत्वस्य, त्वत्कीर्तिर्भ्रमेत्यादिपदात् वराङ्गपर्यन्तमनाच्छादनस्य च प्रतीतेः वर्ण्यमानस्य राज्ञः पराभवप्रतिपादनात् वाक्यपर्यवसायित्वं दोष इत्याह **अत्रेति**।

सारबोधिनी—अनुचितार्थमाह **कुविन्देति**। कुं पृथ्वीं विन्दतीति कुविन्दो राजा, जातिविशेषस्तन्तुवायश्च। पटयसि पटुं पटं च करोषि। गुणग्रामो विद्यादानदामादयः सूत्रसमूहश्च। नग्नास्तव विवसनाश्चाच्छादनमावरणम्, वासश्च। **अत्रेति**। तथापीत्यनेन तन्तुवायत्वारोपात्तिरस्काराभिव्यक्तिः। न चात्र कुविन्दपदात्प्रथमं जातिविशेषोपस्थितौ निहतार्थत्व[24]मिति प्रकरणवशादाशु यौगिकप्रतीतिः योगश्च "वाजिनामिक्षया योगाद्विश्वे देवा हि वाजिनः। प्रकृतांस्तुतान्वदेत्[25] श्रुत्या वाजिशब्दो हि यौगिक इत्यत्र श्रुत्या श्रवणमात्रेण वदेत् बोधयेत्। तन्न। तथा सति शोणितपदे निहतार्थत्वं न स्यात्। प्रकरणेनाशु यौगिकोपस्थितेः। वस्तुतस्तु जलदभुजगेत्यादौ गरलस्येवात्राप्यप्रकृतस्य जातिविशेषस्य व्यङ्ग्यत्वमेव।

प्राभ्रभ्राड्विष्णुधामाप्य विषमाश्वः करोत्ययम्।
निद्रां सहस्रपर्णानां पलायनपरायणाम् ॥१७४॥

अत्र प्राभ्रभ्राड्विष्णुधामविषमाश्वनिद्रापर्णशब्दाः प्रकृष्टजलदगगनसप्ताश्वसकोचदलानामवाचकाः।

बालचित्तानुरञ्जनी—अवाचकमुदाहरति **प्राभ्रेति**। अयं विषमाः सप्त अश्वाः यस्य सः सूर्यः, अभ्रैर्मेघैः भ्राजते शोभत इति प्राभ्राट् विष्णोः धाम पदं आकाशं यस्य एवंविधोऽपि सहस्राणि पाणयः

येषां तेषां कमलानां निद्रां सङ्कोचं पलायनपरां करोति, पद्मानि विकासयतीत्यर्थः। प्राभ्रेत्यादि पयोदरूपार्थस्यावाचकम्। धामपदमपि [विष्णु-] पदावाचकं तथाऽप्रतीतेः। सप्तसङ्कोचशब्दवाच्ययोः विषमनिद्राशब्दौ लाक्षणिकौ नेयार्थत्वात्। पर्णशब्दो जीर्णपत्रे रूढत्वेन वाक्यस्यावाचक इति सर्वेषामवाचकत्वादत्राह अत्रेति। पदकदम्बकस्य वाक्यत्वात् बहूनां पदानां दुष्टत्वे वाक्यदोषः, एकैकपदस्य दुष्टत्वे पददोष इति तत्राह प्राभ्रभ्राडिति। श्रुतिकटुत्वञ्च द्रष्टव्यम्।

सारबोधिनी–अवाचकमाह **प्राभ्रेति**। अत्र प्राभ्रविष्णुधामविषमाश्वनिद्रासहस्रपर्णपदानां सजलनिर्जलमेघसामान्यगगनभूतलपातालस्थानत्रयायुग्मसंख्यावच्छिन्नेन्द्रियवृत्तिनिरोधपत्रसहस्रवद्वाचकानां सजलमेघगगनसप्ताश्वसङ्कोचपद्मपरत्वादवाचकत्वम्। एते शब्दाः एष्वर्थेषु न सङ्केतितायत्ता इति। विषमाश्वः सूर्यः। विष्णुधाम विष्णुस्थानमाकाशं प्राप्य। आङ् पूर्वस्य आप्-धातोः रूपमिदम्। निद्रां मुद्रणं पलायनपरायणां करोति नाशयति। किम्भूतं विष्णुधाम प्राभ्रभ्राट् प्रकृष्टजलदसदृशम्।

भूपतेरुपसर्पन्तो कम्पना वामलोचना।
तत्तत्प्रहरणोत्साहवती मोहनमादधौ ॥१७५॥

अत्रोपसर्पणप्रहरणमोहनशब्दा व्रीडादायित्वादश्लीलाः।

बालचित्तानुरञ्जनी–व्रीडालक्षणमश्लीलमुदाहरति **भूपतेरिति**। उपसर्पन्ती अभिगच्छन्ती शत्रुहननार्थं प्रतिकूलं लोचनं यस्याः तैस्तैः खड्गादिभिः प्रहरणं प्रहारः तदुत्साहवती भूपतेः व्यामोहनं शत्रूणामादधे चकार। अत्र उपसर्पणं रतार्थिन्या गमनं प्रस्थानं संभोगारंभेन एतेन व्यामोहनं पुरत इत्याद्यर्थप्रतीतेरश्लीलत्वमित्याह। एतदुपलक्षणं कम्पना कम्पमानात् [त्वात् ?] वामलोचना कान्ता वा।

सारबोधिनी–अश्लीलमाह **भूपतेरिति**। उपसर्पन्ती समीपमागच्छन्ती रतोद्यता च। कम्पना सेना कम्पयुक्ता च। वामं विरुद्धं शत्रुंप्रति कान्तञ्च, प्रहरणं मारणम् कामप्रसिद्धं स्त्रीपुरुषजघनताडनञ्च। मोहनं विपक्षसंमोहः निधुवनञ्च।

तेऽन्यैर्वान्तं समश्नन्ति परोत्सर्गञ्च भुञ्जते।
इतरार्थग्रहे येषां कवीनां स्यात्प्रवर्तनम् ॥ १७६॥

अत्र वान्तोत्सर्गप्रवर्तनशब्दा जुगुप्सादायिनः।

बालचित्तानुरञ्जनी–जुगुप्सालक्षणमश्लीलमुदाहरति **त इति**। येषां कवीनां इतरैरुक्तस्यार्थस्य स्वीकारे प्रवर्तनं प्रवृतिः स्यात् ते कवयः अन्यैर्वान्तमन्नं अश्नन्ति, परोत्सर्गं पुरीषञ्च भुञ्जते। अत्र प्रवर्तनशब्दः अपानवायुनिर्गमे गूढः अतोऽश्लीलम्। वान्तोत्सर्गशब्दौ तु उच्चारणादेवाश्लीलावित्याह **अत्रेति**।

सारबोधिनी–**तेन्यैरिति**। प्रवर्तनं पूतिः पुरीषोत्सर्गश्च।

पितृवसतिमहं व्रजामि तां सह परिवारजनेन यत्र मे।
भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकम् ॥१७७॥

अत्र पितृगृहमित्यादौ विवक्षिते श्मशानादिप्रतोतावमङ्गलार्थत्वम्।

बालचित्तानुरञ्जनी—अमङ्गललक्षणमश्लीलमुदाहरति । **पितृवसतिमिति** । कस्याश्चन स्नुषाया उक्तिः । अहं परिवारजनेन सह तां पितृवसतिं गृहं गच्छामि । यत्र वसतौ पावकैः शुद्धैरिष्टैरन्वये योगे सति सपदि मे हृदयं, अशेषितं निःशेषीकृतं नाशितं शोकरूपं श्वश्रूपारतन्त्र्यादिरूपं शल्यं यस्य तादृशं भवति । अत्र पितृवसतिं प्रेतभूमिम् पावकान्वये चिताग्निस्पर्शे सति अशेषित निरवशेषीकृतं गृहकर्मादिदुःखग्रन्थिर्यं येत्यमङ्गलार्थत्वमित्याह **अत्रेति** ।

सारबोधिनी–पितृवसतिः पितृगृहं श्मशानञ्च पावकः शुद्धिकारको वह्निश्च । ननु पावकशब्दस्य कथममङ्गलार्थत्वं वह्निशब्दस्येवार्थान्तरेऽपीति चेन्न, यत्रैतदनेन श्मशानकुट्याः तत्सम्बन्धिनो वह्नेश्चितवह्नित्वप्रतीतेः ।

सुरालयोल्लासपरः प्राप्तपर्याप्तकम्पनः ।
मार्गणप्रवणो भास्वद्भूतिरेष विलोक्यताम् ॥१७८॥

अत्र किं सुरादिशब्दाः देवसेनाशरविभूत्यर्थाः किं मदिराद्यर्था इति सन्देहः ।

बालचित्तानुरञ्जनी—सन्दिग्धमुदाहरति **सुरेति** । रणभुवि स्थितो भूपः वर्ण्यते । सुरालयोल्लासपरः स्वर्गोद्भावनतात्पर्यवान् प्राप्तपर्याप्तकम्पनः अधिगतपूर्णसेनः मार्गणप्रवणः शरेष्वनुरक्तः भास्वद्भूतिः उद्धतैश्वर्यः एष राजा विलोक्यताम् । अत्र मदिरागृहोत्साहवान् प्राप्तपर्याप्तचलनः धनान्वेषणपरः उज्ज्वलभस्मेत्याद्यर्थान्तरसंभवात् सन्देहमाह **अत्रेति** ।

सारबोधिनी—सन्दिग्धमाह **सुरेति** । सुरालयो देवगृहं मदिरागृहञ्च । कम्पना सेना कम्पनं कम्पश्च मार्गणो बाणो याचनञ्च, भूतिः सम्पत्तिर्भस्म च । अत्र प्रकरणाद्यभावात् स्तुतिर्निन्दा वेति संशयः ।

तस्याधिमात्रोपायस्य तीव्रसंवेगताजुषः ।
दृढभूमिः प्रियप्राप्तौ यत्नः स फलितः सखे ॥१७९॥

अत्राधिमात्रोपायादयः शब्दा योगशास्त्रमात्रप्रयुक्तत्वादप्रतीताः ।

बालचित्तानुरञ्जनी—अप्रतीतमुदाहरति **तस्येति** । अत्र कस्यचिन्नायकस्य नायिकया सह संयोजने कृतप्रयत्नं मित्रं प्रति मित्रस्योक्तिः । हे सखे अधिमात्रोपायस्याधिकपरिमाणप्रयत्नस्य अधिमात्रोपायस्य दृढः उत्तमो वा उपायो यस्य तीव्रसंवेगताजुषः प्रबलवैराग्यसेविनस्तस्य नायकस्य प्रियप्राप्तौ स्त्रीरूपप्रियप्राप्तौ दृढभूमिः सर्वात्मना निश्चलो यत्नः उत्साहः सफलीकृतः । अत्राधिमात्रतीव्रसंवेगदृढभूमीत्येते शब्दाः योगशास्त्र एव प्रसिद्धा[-द्धत्वा-]दप्रतीता इत्याह **अत्रेति** ।

सारबोधिनी—अप्रतीतमाह **तस्येति** । सखे तस्य स यत्नः फलितः । प्रियप्राप्तौ आत्मसाक्षात्कारे सति । तस्य कीदृशस्य अधिमात्रोपायस्य । योगिनस्तावत् त्रिविधा भवन्ति—मृदूपायो मध्योपायो अधिमात्रोपायश्च । ते च प्रत्येकं मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेगश्चेति त्रिविधाः । एवं नव भेदा भवन्ति । तेष्वधिमात्रोपायस्तीव्रसंवेगः [योगी] सिद्ध इत्युच्यते । अधिमात्रत्वञ्च सन्निहितसमाधिलाभत्वम् । तीव्रत्वं परमत्वं संवेगो वैराग्यं उपायो यमनियमादिः । दृढभूमिर्दृढसंस्कारः । काभिरपि चित्तवृत्तिभिरभिभवितुं न शक्यत इत्यर्थः । दोषबीजमाह **अत्रेति** ।

ताम्बूलभृतगल्लोऽयं भल्लं जल्पति मानुषः ।
करोति खादनं पानं सदैव तु यथा तथा ॥१८०॥

अत्र गल्लादयः शब्दा ग्राम्याः ।

बालचित्तानुरञ्जनी—ग्राम्यमुदाहरति **ताम्बूलेति**। ताम्बूलेन भृतः पूर्णः गल्लः कपोलो यस्य स अयं मानवः भल्लं शोभनं जल्पति । सदैव तु यथा तथा खादनं पानं च करोति । अत्र गल्लादयः शब्दाः केवलं लोकोपलालितत्वाद् ग्राम्या इत्याह **अत्रेति**।

सारबोधिनी--ग्राम्यमाह **ताम्बूलेति**।

वस्त्रवैदूर्यचरणैः क्षतसत्त्वरजःपरा ।
निष्कम्पा रचिता नेत्रयुद्धं वेदय साम्प्रतम् ॥१८१॥

अत्राम्बररत्नपादैः क्षततमा, अचला भूः कृता नेत्रद्वन्द्वं बोधयेति नेयार्थता ।

बालचित्तानुरञ्जनी--नेयार्थमुदाहरति **वस्त्रवैदूर्येति**। कश्चन नायकः नायिकां बोधयति । हे बाले साम्प्रतं निष्कम्पा अचला, भूरित्यर्थः । वस्त्रस्य अम्बरस्य, आकाशस्येत्यर्थः, तस्य वैदूर्यं रत्नविशेषः, आदित्य इत्यर्थः, तस्य चरणाः पादाःकिरणा इत्यर्थ, तैः क्षतं सत्त्वरजसोः गुणयोः परं तमोगुणो यस्याः सा अन्धकाररहिता रचिता कृता । अतः नेत्रयुगं अक्षियुग्मं वेदय बोधय, विसारयेत्यर्थः । रात्रिर्गता उत्तिष्ठतेति भावः । अत्र वस्त्रादिशब्दानां एकार्थवाचकत्वादिसम्बन्धेन आकाशादिबोधकत्वेन नेयार्थता इत्याह **अत्राम्बरेति**।

सारबोधिनी--नेयार्थमाह **वस्त्रेति**। अत्र वस्त्रवैदूर्यादिपदैरेव रत्नादिशब्दा लक्ष्यन्ते । रूढिप्रयोजनाभावाच्च नेयार्थता ।

धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरङ्गशावाक्ष्याः ।
रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम् ॥१८२॥

अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति सम्बन्धे क्लिष्टत्वम् ।

बालचित्तानुरञ्जनी--क्लिष्टमुदाहरति **धम्मिल्लस्येति**। कुरङ्गशावाक्ष्याः हरिणपोतनेत्रनिभनेत्रायाः कस्याश्चित् अपूर्वा अद्भुता बन्ध व्युत्पत्तिः बन्धरचना यत्र तस्य, पूर्वमविद्यमाना बन्धस्य ग्रथनस्य व्युत्पत्तिश्चातुर्यं यत्रेति वा । एवंविधस्य धम्मिल्लस्य केशपाशस्य शोभां कान्तिं प्रेक्ष्य कस्य पुरुषस्य मानसं निकामं अत्यर्थं न रज्यति अनुरक्तं भवति । अपि तु सर्वस्येत्यर्थः । क्लिष्टतां प्रकाशयितुं कविविवक्षितमन्वयमाह **अत्रेति**। यथानिर्दिष्टस्य वाक्यस्य एवं दूरान्वयत्वेन क्लिष्टत्वमित्यर्थः ।

सारबोधिनी--क्लिष्टमाह **धम्मिल्लस्येति**। अत्रासत्तिज्ञानविलम्बादन्वयबोधविलम्बो दूषकताबीजमिति प्रागुक्तमेव ।

न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिग्धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥१८३॥

अत्रायमेव न्यक्कार इति वाच्यम् । उच्छूनत्वमात्रं चानुवाद्यम्, न वृथात्वंविशेषितम् । अत्र च शब्दरचना विपरीता कृतेति वाक्यस्यैव दोषो न वाक्यार्थस्य ।

बालचित्तानुरञ्जनी—अविमृष्टविधेयांशमुदाहरति **न्यक्कार इति** । रावणस्य स्वपत्नीं प्रति वचनम् । अयमेव न्यक्कारः तिरस्कारः यदरय इति । अरयः सन्तीति यत् तत्रापि अरिष्वपि असौ रामः तापसः सोऽपि तापसोऽपि अत्रैव सन्निकट एव राक्षसकुलं निहन्ति । अहो आश्चर्यं, तथापि रावणः जीवति । । शक्रजितं धिक् धिक् ।

तेनापि किं प्रयोजनं प्रबोधितं प्रबोधनं तद्विद्यते यस्य तेन प्रबोधकर्मीकृतेनेत्यर्थः । कुम्भकर्णेन वा किम् ? न किमपि प्रयोजनमित्यर्थः । स्वर्ग एव ग्रामटिका स्वल्पग्रामः तस्य लुण्ठनेन वृथोच्छूनाः तैरेभिर्मम भुजैर्न [किमपि प्रयोजनमित्यर्थः ।] । अरातिसद्भावमनूद्य स्वस्य न्यक्कारता विधेया । अत्र एतद्विपरीतवाक्यवृत्तिरिति अविमृष्टविधेयांशत्वम् । तथा चोक्तम्

अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत् ।
न ह्यलब्धास्पदं किञ्चित्कुत्रचित्प्रतितिष्ठति ॥

इत्याशयेनाह **अत्रेति** । पदेष्वविमृष्टविधेयांशमाह **उच्छूनतामात्रमिति** । अत्रोच्छूनत्वमुद्दिश्य वृथात्वं विधेयम् । तस्यैवोद्देश्यविशेषणत्वेन प्रक्षेपादविमृष्टविधेयत्वम् । ननूद्देश्यविधेयभावस्यार्थदोषत्वान्न वाक्यदोषत्वमित्यत आह **अत्र त्विति** । शब्दरचनावैपरीत्येऽपि अर्थस्य तावदवष्टम्भाद्वाक्यदोष एवेति भावः ।

सारबोधिनी—विधेयाविमर्शमाह **न्यक्कार इति** । **प्रबोधितवतेति** । अत्र णिजन्ताद्भावे क्तः, ततो मतुप् । न तु क्तवतुः । कर्मणि तस्यासाधुत्वात् । ग्रामटिका स्वल्पो ग्रामस्तद्वे दितुं[?]जीवतीति काक्वा न जीवतीत्यर्थः । अयं रिपुसम्बन्धः न्यक्कारो निन्दा अन्येषां तु पराभवादिर्मम तु रिपुसम्बन्ध एव न्यक्कारः । अरय इति नैको द्वौ वा । पूर्वमेकोऽपि नासीत्सम्प्रति युगपदेव बहवो जाताः । तापस इति शस्त्रानभिज्ञत्वं व्यज्यते । तेनातिन्यक्कारः । अत्रैव मत्समीप एव । ततोऽपि न तदाधिवयं कुलं बालवृद्धस्त्रीषु नैकमपि त्यजेत् । धिग्धिगिति वीप्सायां निन्दातिशयः । शत्रोर्भुजद्वयं मम बहवो भुजास्तत्रापि वैपुल्यमित्यादि च व्यज्यते । **अत्रेति** । अयं रिपुसम्बन्धस्तत्र न्यक्कारत्वं विधीयते । तत्रानूद्यविधेययोः पौर्वापर्योपादानेनैव तथा प्रतिपत्तिः । तदुक्तम्

"यच्छब्दयोगः प्राथम्यं सिद्धत्वञ्चाप्यनूद्यता ।
तच्छब्दयोग औत्तर्यं साध्यत्वञ्च विधेयता" ॥ इति । [भट्टवार्तिकम्]

अनूद्यविधेयभावः संसर्गो विशेषणविशेष्य इवापदार्थोऽपि वाक्यार्थप्रतीतौ भासते। **वस्तुतस्तु** विशेषणादिकं स्वरूपतः प्रतीतिविषयो भवति न तु विशेषणविशेष्यत्वादिनेति। **उच्छ्रुनत्वमात्रञ्चेति।** **अयं** तु समासगतत्वेन पददोष एव प्रसङ्गादुक्तो न वाक्यदोषः। मिथ्यामहिमत्ववदिति **टीकाकृतः।** नन्वनूद्यविधेयभावानापत्तिरर्थयोरेवेति कथं वाक्यदोषतेत्यत आह **शब्दरचनेत्यादि।** रचनाया वाक्यधर्मत्वेन तदन्वयव्यतिरेकानुविधानात् दोषतैवेत्यर्थः।

यथा वा

अपाङ्गसंसर्गि तरङ्गितं दृशोर्भ्रुवोररालान्तविलासि वेल्लितम्।
विसारि रोमाञ्चनकञ्चुकं तनोस्तनोति योऽसौ सुभगे तवागतः ॥१८४॥

अत्र योऽसाविति पदद्वयमनुवाद्यमात्रप्रतीतिकृत्।

बालचित्तानुरञ्जनी—अत्रैव व्यक्तिविवेककाररीत्या यत्तच्छब्दयोः स्थितिनिरूपणार्थमुदाहरणान्तरमाह **अपाङ्गेति।** भो सुभगे यस्तव दृशोः अपाङ्गसंसर्गि नेत्रान्तसंस्पर्शतरङ्गितं तरङ्गणं तनोति भ्रुवोः अरालान्तविलासि वक्रान्तशोभि वेल्लनं विलासं तनोति तनोः विसारि प्रसरणशीलं रोमाञ्चनकञ्चुकं रोमाञ्चनमेव कञ्चुकं तनोति असावागत इत्यर्थः। अत्र यच्छब्दः अनुवाद्यार्थः अदःशब्दो विधेयार्थश्च विवक्षितः, तदुभयं न सिद्धयति। **योऽसाविति।** सहोच्चारणेन अनुवाद्यमात्रप्रतीतिजनकत्वाद्विधेयांशप्रतिपादकतदादिशब्दानुपादानेन साकांक्षत्वादविमृष्टविधेयांशत्वमित्याह **अत्रेति।**

सारबोधिनी—सत्यामपि साध्व्यां पदरचनायां क्वचिद्विधेयत्वानुपस्थित्याऽपि तद्दोषत्वम्। तदुदाहरति **यथा वेति।** **कञ्चुकमिति।** सर्वाङ्गव्यापनाद्विसारि। अत्र हि यस्तरङ्गितादिकं तनोति, असौ समागत इत्यनूद्यविधेयभावो विवक्षितः। न च तथा प्रतिपत्तिः। यतो यच्छब्दसमीपोपात्ता अदसादयः प्रसिद्धिमात्रपरामर्शकास्तदाह **अनूद्यमात्रप्रतीतिकृदिति।**

तथाहि—प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते। क्रमेणोदाहरणम्—

कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम्।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ॥१८५॥

द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥१८६॥

उत्कम्पिनी भयपरिस्खलितांशुकान्ता ते लोचने प्रतिदिशं विधुरे क्षिपन्ती।
क्रूरेण दारुणतया सहसैव दग्धा धूमान्धितेन दहनेन न वीक्षितासि ॥१८७॥

यच्छब्दस्तूत्तरवाक्यानुगतत्वेनोपात्तः सामर्थ्यात्पूर्ववाक्यानुगतस्य तच्छब्दस्योपादानं नापेक्षते। यथा

साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके ।
उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः ॥१८८॥

प्रागुपात्तस्तु यच्छब्दस्तच्छब्दोपादानं विना साकाङ्क्षः । यथा अत्रैव श्लोके आद्यपादयोर्व्यत्यासे । द्वयोरुपादाने तु निराकाङ्क्षत्वं प्रसिद्धम् । अनुपादानेऽपि सामर्थ्यात्कुत्रचिद् द्वयमपि गम्यते । यथा

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान् प्रति नैप यत्नः ।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥१८९॥

अत्र य उत्पत्स्यते तं प्रतीति ।

बालचित्तानुरञ्जनी--ननु यत्तच्छब्दयोर्नैरपेक्ष्यस्यापि दर्शनात्कथं तदभावेनाविमृष्टविधेयांशत्वमित्याशङ्क्य नैरपेक्ष्यविपयविशेपो न सर्वत्रेति प्रतिपादयितुमाह **तथा हीति** । प्रक्रान्तार्थः प्रसिद्धार्थो वा अनुभूतार्थो वा वाच्यत्वेन विपयो यस्येति विग्रहः । तत्र प्रक्रान्तार्थमुदाहरति **कातर्यमिति** । केवला शौर्यरहिता नीतिः कातर्यं केवलं नीतिरहितं शौर्यं श्वापदचेष्टितम् । अतः कारणात् सोऽतिथिः समेताभ्यां सिद्धिं कार्यसिद्धिमन्वियेप । अत्रापि अतिथिनाम्नो राज्ञः प्रक्रान्तत्वात्तद्वाचकस्तच्छब्दो यच्छब्दं नापेक्षते ।

प्रसिद्धार्थमुदाहरति **द्वयमिति** । कपालिनः ईश्वरस्य प्रार्थनया याचनया संप्रति इदानीं द्वयं शोचनीयतां शोच्यत्वं गतम् चन्द्रस्य कान्तिमती सा कला अस्य लोकस्य नेत्रकौमुदी त्वं च । अत्र सेति तच्छब्दः शशिकलायाः प्रसिद्धत्वात् यच्छब्दोपादानं नापेक्षते ।

अनुभूतार्थमुदाहरति **उत्कम्पिनीति** । वासवदत्तादाहाद्याकर्णनप्रवृद्धशोकस्य वत्सराजस्योक्तिः । हे वासवदत्ते ! उत्कम्पिनी सकम्पा भयपरिस्खलितांशुकांता भयेन परिस्खलितः अंशुकान्तो यस्याः सा, विधुरे मयि सन्निहिते ते अनुभूते लोचने प्रतिदिशं क्षिपन्ती धूमान्धितेन क्रूरेण दहनेन न दारुणतया सहसैव दग्धासि । अत्र ते अनुभूते इति अनुभूतलोचनविपयस्तच्छब्दो यच्छब्दं नापेक्षते, तच्छब्दस्य यच्छब्दानपेक्षामभिधाय यच्छब्दस्यापि विपयविशेपे तच्छब्दानपेक्षायामाह **यच्छब्दस्त्विति** । **यथेति**। चन्द्रमसि विषये पद्मैरुचितं कृतं इति पूर्वो वाक्यार्थः । अभिरामताधिके शोभाधिके सति यन्मीलितं सङ्कुचितं जयशालिकामिनीमुखे विद्यमाने उद्यता उदयं कुर्वता तेन चन्द्रमसा पुनः साहसमनुष्ठितम्, अत्र यन्मीलितमिति उत्तरवाक्यस्थो यच्छब्दः तच्छब्दं नापेक्षते । कुत इत्यपेक्षायां तस्य हेतुमात्रकथनप्रवृत्तत्वात्तत्सापेक्षस्थलमाह **प्रागिति** । पूर्ववाक्यवर्ती यच्छब्दः तच्छब्दोपादानमन्तरेण साकाङ्क्षः, न वाक्यार्थपर्यवसायीत्यर्थः । उदाहरति **यथात्रैवेति** । प्रथमद्वितीयपादयोः । कविमुखोद्गते पाठे निरपेक्षत्वमाह **द्वयोरिति** । द्वयोर्यत्तच्छब्दयोरित्यर्थः । कुत्रचिदुभयोरनुपादानेऽपि तत्प्रतीतिमाह **अनुपादान इति** । तदुदाहरति **ये नामेति** । प्रारंभे विनयप्रदर्शनमन्ततः कठिनत्वं गर्वोद्धत्यञ्च दर्शयितुमिदं पद्यम् । ये

केचिन्नाम विद्वांसः नः अवज्ञां प्रथयन्ति ते योगिनः मूर्खा द्वन्द्वं किमपि न जानन्ति अद्वयाख्यं वस्तु जानन्ति [इति] सोल्लुण्ठवचनं, तान्प्रति एष यत्नः प्रकरणारम्भलक्षणो न भवति किन्तु मम समानधर्मा कोऽपि उत्पत्स्यते । हि यस्मात् अयं कालः निरवधिः पृथ्वी च विपुला । यत्र साधर्म्यशाली य उद्भविष्यति तं प्रति प्रकरणारम्भ इति सामर्थ्याद् गम्यत इत्याह अत्रेति ।

सारबोधिनी—ननु यत्तदोरेकतरोपादानेऽपि निराकाङ्क्षा प्रतीतिः स्यादेवेत्यत्रापि केवलयत्पदात्तथाऽस्त्विति हृदि कृत्वाऽऽह **तथा हीति**। यत्तदोश्च परस्परनैरपेक्ष्यं प्रतिनियतस्थान एव, न सर्वत्रेति दर्शयन् प्रकृते विधेयतानुपपत्तिं द्रढयति **प्रक्रान्तेति**। प्रक्रान्तः पूर्वप्रतीतिविषयः । प्रक्रान्तमुदाहरति **कातर्यमिति** । केवला नीतिः कातर्यमित्यन्वयः । शौर्येऽपि केवलत्वसंबन्धः । सोऽतिथिर्नाम राजा । प्रसिद्धमुदाहरति **द्वयमिति** । अनुभूतमुदाहरति **उत्कम्पिनीति** । ते मदनुभूतशोभाविशेषे । तथा यच्छब्देऽपि तच्छब्दनैरपेक्ष्यं प्रतिनियतस्थान एव, प्रकृते तु न तथेति दर्शयति **यच्छब्द इति** । उत्तरवाक्यार्थगतत्वेन तदन्वयप्रतियोग्युपस्थापकत्वेन । उत्तरवाक्यगतत्वेनेति सुगमः पाठः । **प्रसिद्धमिति** । ''यदुवाच न तन्मिथ्ये''त्यादौ । **ये नामेति** ते किमपि जानन्ति । अपि तु किमपि न जानन्तीत्यर्थः । उत्पत्स्यत इत्यत्र मानमाह **काल इति** । अस्तीत्यत्र मानमाह **विपुलेति** ।

एवं च तच्छब्दानुपादानेऽत्र साकाङ्क्षत्वम् । न चासाविति तच्छब्दार्थमाह ।

असौ मरुच्चुम्बितचारुकेसरः प्रसन्नताराधिपमण्डलाग्रणीः ।
वियुक्तरामातुरदृष्टिवीक्षितो वसन्तकालो हनुमानिवागतः ॥१९०॥

अत्र हि न तच्छब्दार्थप्रतीतिः ।

बालचित्तानुरञ्जनी—द्दच्छं यच्छब्दविधां [?] कृत्वा 'योऽसौ सुभगे तवागत'इति प्रश्रुतेन तदभावमाह **एवञ्चेत्यादि** । अत्र योऽसौ सुभग इत्यत्र यच्छब्दस्य पूर्ववाच्यत्वात् यच्छब्दसन्निहितस्य अदःशब्दस्य प्रसिद्धार्थत्वात्तच्छब्दानुपादाने साकांक्षत्वादविमृष्टविधेयांशतेत्यर्थः । ननु योऽसावित्यत्र यच्छब्दानन्तरमसाविति योऽयमदःशब्दः संनिहितोऽपि स एव तच्छब्दार्थो भविष्यति को दोष इत्यत आह **न चेति** । असाविति शब्दस्य रूपं तच्छब्दार्थेनाहेति सम्बन्धः । अदःशब्दस्य तच्छब्दार्थत्वाभावे उदाहरणमाह **असाविति** । असौ वसन्तकालः हनुमानिव आगतः । विशेषणद्वारा उभयोः साम्यमाह, मरुता वायुना चुम्बिताः स्पृष्टाः चारवः केसरा बकुलवृक्षा यस्मिन्, पक्षे मरुता हनुमत्पित्रा चुम्बिताः आघ्राताः केसराः सटाः यस्य । प्रसन्नताराधिपमण्डलं चन्द्रबिम्बं यस्मिन्, पक्षे प्रसन्नः बालिवधेन सुमुखः यत्ताराधिपः सुग्रीवः तस्य मण्डले राष्ट्रे अग्रणीः मुख्यः । वियुक्ताः रामाः ताभिः आतुरदृष्ट्या व्याकुलदृष्ट्या वीक्षितः, पक्षे सीतया वियुक्तो यो रामचन्द्रः तेन आतुरदृष्ट्योत्सुकदृष्ट्या वीक्षितः । हनुमानिवासावागत इति प्रत्यक्षेण निर्दिश्यमानत्वात्कथं तच्छब्दार्थप्रतीतिः ? तस्मात् अदसः तदभिधानार्थानुपपत्तिरित्याह **अत्रेति** ।

सारबोधिनी-एवञ्चेति । यच्छब्दस्योत्तरवाक्यगतत्वं विना द्वयोरुपादानमनुपादानं च साकाङ्क्षत्वमेवेत्यर्थः। नन्वत्र तच्छब्दपर्यायस्यादसः प्रयोगान्निराकाङ्क्षत्वमेवेत्याशङ्क्य निराकरोति **न चासाविति** । **असाविति** । मरुद्दक्षिणानिलः हनुमत्पिता च केसरो बकुलः स्कन्धलोमापि, तारा नक्षत्राणि वानराधिप-

महिषी च, अधिपश्चन्द्रः सुग्रीवश्च, रामा स्त्रियो रामो राघवश्च । **अत्र हीति** । तथा च पुरोवर्तित्वमात्र-मदःशब्दार्थं इति भावः ।

प्रतीतौ वा

करवालकरालदोःसहायो युधि योऽसौ विजयार्जुनैकमल्लः ।
यदि भूपतिना स तत्र कार्ये विनियुज्येत ततः कृतं कृतं स्यात् ॥१६१॥

अत्र स इत्यस्यानर्थक्यं स्यात् ।

अथ

योविकल्पमिदमर्थमण्डलं पश्यतीश निखिलं भवद्वपुः ।
आत्मपक्षपरिपूरिते जगत्यस्य नित्यसुखिनः कुतो भयम् ॥१६२॥

इतीदंशब्दवददःशब्दस्तच्छब्दार्थमभिधत्ते, इति उच्यते ।

बालचित्तानुरञ्जनी—यदि च तामपह्नुत्य गतानुगतिकत्वादनयोरेकार्थत्वभ्रमः तदभ्युपगम्यापि ब्रूम इत्याह **प्रतीताविति** । करवालेन खड्गेन करालः भयङ्करो यः दोः बाहुः स एव सहायो यस्य एवंविधो योऽसौ युधि विजयस्य अर्जने सम्पादने एकमल्लः प्राधान्येन समर्थः स तत्र कार्ये भूपतिना यदि नियुज्येत, तदा कार्यं कृतं स्यात्, सम्यक्कृतं स्यात् । अदःशब्दस्य तच्छब्दार्थत्वे स इत्यस्यानर्थक्यं स्यात् । अदःशब्देनैव तत्कार्यसिद्धेः, इत्याह **अत्रेति** । नन्विदंशब्दस्य तच्छब्दसादृश्यात् अभियुक्तसंयोगोऽस्ति तद्वत् अदः शब्दस्यापि भवतु तच्छब्दार्थत्व, नार्थान्तरत्वम्, इदमेतददःसमानयोगक्षेमत्वादिति शङ्कते **अथेति** । भो ईश अविकल्पं निःसंशयं यथा तथा निखिलं अर्थमण्डलं संपूर्णं प्रमेयजातं भवद्वपुस्त्वेन अद्वितीयत्वेन पश्यति । नित्यसुखिनोऽस्य तस्येत्यर्थः । योगिनः आत्मपक्ष ऐक्यं तेन पारितः पूरित जगात कुतो भयम् न कुतोऽपीत्यर्थः । 'द्वितीयाद्वै भयं भवती'ति श्रुतेः । अत्र यथा अस्येति इदंशब्दः तच्छब्दार्थ-मभिधत्ते तथा योऽसावित्यत्रापि अदःशब्दः तच्छब्दार्थमभिधत्तां इत्याह **इतीदमिति** ।

सारबोधिनी—अदःशब्दस्य तच्छब्दपर्यायत्वे बाधकमाह **प्रतीतौ वेति** । **करवालेति** । विजयो-ऽर्जुनः पाण्डवभेदोऽर्जुनः कार्तवीर्यश्च । यद्वा विजय इति सप्तम्यन्तम् । ननु न वयमदःशब्दस्यार्थान्तरं निरस्यामः, किंत्विदंशब्दवत्तच्छब्दार्थताप्यस्तीत्याह **अथेति** । य इदमर्थमण्डलं प्रमेयजातं विकल्पं नानाकल्प-नायोगि भवद्वपुरिति पश्यतीत्यभेदेन सम्बन्धः, यद्वा अविकल्पं भेदशून्यं यद्वा निःसन्देहम् । स्वात्मेति । ऐकात्म्यदर्शन इति भावः ।

तदर्थत्रैव वाक्यान्तरे उपादानमर्हति न तत्रैव । यच्छब्दस्य हि निकटे स्थितः प्रसिद्धिं परामृशति । यथा

यत्तदूर्जितमत्युग्रं क्षात्रं तेजोऽस्य भूपतेः ।
दीव्यताऽक्षैस्तदाऽनेन नूनं तदपि हारितम् ॥१६३॥

इत्यत्र तच्छब्दः ।

बालचित्तानुरञ्जनी—अदःशब्द इत्युपलक्षणम् । एतच्छब्दस्यापि दूषयति **तर्हीति** अत्रैव योऽविकल्पमित्यादाविव, अपाङ्गसंसर्गीत्यादिवाक्यान्तरेऽपि तच्छब्दाद् व्यवधानेनोपादानमर्हत्यदःशब्दः, न तत्रैव यत्र तच्छब्दस्तत्समीपे उपादानं नार्हतीत्यर्थः । ननु तत्समीपे उपादानमस्तु को दोषः, तत्राह **यदिति** । स्थितः अदःशब्द इति शेषः । यच्छब्दनिकटे अदसः उपादाने अनूद्यत्वमेव स्यात्, प्रसिद्धिपरामर्शान्न विधेयत्वमिति न दोष इत्यर्थः । यच्छब्दनिकटे पठितस्य तच्छब्दस्यापि प्रसिद्धार्थत्वं किं पुनरदःशब्दस्येति कैमुतिकन्यायमभिप्रेत्य उदाहरति **यथेति** । अस्य राज्ञः तत्प्रसिद्धं यदूर्जित अत्युग्रं क्षात्रं तेजोऽस्ति तदा अक्षैर्दीव्यता क्रीडां कुर्वता अनेन राज्ञा नूनं राज्यवत् तदपि तेजो हारितम् । अत्र यत्तदिति यच्छब्दनिकटस्तच्छब्दः प्रसिद्धिपरामर्शकः अन्यथा पुनस्तच्छब्दोपादानमनर्थकं स्यादित्यभिप्रेत्याह इत्यत्रेति । न चैवं सति 'यः स पापभाक्' इत्यत्रापि तच्छब्दः प्रसिद्धार्थः स्यादिति वाच्यम् । 'न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभागि'त्यत्र यच्छब्दसंनिधाने पठितस्यापि तच्छब्दस्य पूर्ववाक्यगतयच्छब्दसबन्धित्वेनोपादानात्प्रसिद्धच परपरामर्शकत्वात् ।

सारबोधिनी—**तर्हीति** । अयमभिसन्धिः—न सार्वत्रिकमिदमेतददःशब्दानां तच्छब्दसमानार्थत्वम् किन्तु यच्छब्दनिर्दिष्टवाक्यार्थपरामर्श एव । सोऽपि यच्छब्दस्य विहितनिर्देशे भिन्नविभक्तिनिर्देशे च भवति नान्यत्रेति । अत एव यच्छब्दनिकटवर्तित्वेन तच्छब्दस्य परामर्शकत्वं दर्शयति **यच्छब्दस्येति** । **तच्छब्द इति** । यद्यत्र तच्छब्दः प्रसिद्धिं न परामृशेत् तदा द्वितीयं तच्छब्दोपादानं निरर्थकं स्यादिति भावः । एवमदःशब्दादीनामपि तथात्वे प्रकृते विधेयत्वानुपपत्तिः सिद्धैव । निकटे स्थितिः समानलिङ्गविभक्तिभेदान्न प्रसिद्धिं बोधयति किन्तु विधेयत्वम् । एवं विच्छेदोऽपीति । परदारापहर्ता यः स स्वर्गं नाधिगच्छतीत्यत्र यत्पदविच्छेदात् । किं च एकत्र विधेयत्वबोधकस्य नान्यत्र प्रसिद्धिपरामर्शकता । यथा—

न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक् ।

अत्र हि स इत्यस्य पूर्ववत्पदार्थविधेयत्वावगमकस्य उत्तरत्रापि तथेति न प्रसिद्धिपरामर्शकता । अत एव तच्छब्दान्तरानुपादानेऽपि निराकांक्षा प्रतीतिरिति ।

ननु कथं

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते
धुर्यां लक्ष्मीमथ मयि भृशं धेहि देव प्रसीद ।
यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन् भूयसे मङ्गलाय ॥१६॥

अत्र यद्यदित्युक्त्वा तन्मे, इत्युक्तम् । उच्यते—यद्यदिति येन केनचिद्रूपेण स्थितं सर्वात्मकं वस्त्वाक्षिप्तं तथाभूतमेव तच्छब्देन परामृश्यते । यथा वा

किं लोभेन विलङ्घितः स भरतो येनैतदेवं कृतं
मात्रा स्त्रीलघुतां गता किमथ वा मातैव मे मध्यमा ।
मिथ्यैतन्मम चिन्तितं द्वितयमप्यार्यानुजोऽसौ गुरु–
र्माता तातकलत्रमित्यनुचितं मन्ये विधात्रा कृतम् ।।१६५।।

अत्रार्यस्येति तातस्येति च वाच्यम् न त्वनयोः समासे गुणीभावः कार्यः । एवं समासान्तरेऽप्युदाहार्यम् ।

बालचित्तानुरञ्जनी—ननु यत्तदोर्नित्यसम्बन्ध इति न्यायात् प्रागुपात्तो यच्छब्दः तच्छब्दोपादानं विना साकांक्ष इति यदुक्तं तस्य व्यभिचारं भवभूतिप्रयोग आशङ्कते **नन्विति** । हे भगवन् ईश ! इह लोके त्वं महतां कल्याणानां ईशिषे । "अधीगर्थदयेशां कर्मणी"ति कर्मणि षष्ठी । कल्याणानि त्वदधीनानीत्यर्थः । अत एव त्वं पुण्यां लक्ष्मीं विधत्से ददासि भक्तेभ्यः । अतः प्रथमं नमस्कारानन्तरं हे देव मयि दृशं कृपादृष्टिं देहि प्रसीद । नम्रस्य मे यद्यत्पापमस्ति तत्प्रतिजहि स्फोटय । हे जगन्नाथ ! भूयसे मङ्गलाय भद्रं भद्रं वितर । अत्र यद्यत्पापमिति वीप्सया यच्छब्दस्य द्विरुपादानम् । तन्मे, इति तच्छब्दस्य सकृदुपादानं च, अतोऽन्यतरस्य यच्छब्दस्य संबन्धित्वेन तच्छब्दान्तरानुपादानाद् व्यभिचार इत्याशयेनाह **अत्रेति** । यद्यत्पापमित्यत्र पापजातीयमेकमेव गृह्यते, वीप्सा तु अवान्तरप्रकारविषया, अतस्तन्म इत्यत्र एकस्य तच्छब्दस्योपादानमुचितमिति न व्यभिचार इति परिहरति **उच्यत इति** । यदा तु व्यक्तिविवक्षा तदा तन्म इत्येव भवतीति द्रष्टव्यम् । एवञ्च यत्तदौ विचार्य अविमृष्टविधेयांशस्योदाहरणान्तरमाह **यथेति** । स भरतः लोभेन विलङ्घितः आक्रान्तः किम् ? स इति येन भरतेन कर्त्रा मात्रा करणभूतया एतदेवं एतद्राज्याभिषेकप्रत्यूहरूपं कृतं स प्रख्यातसौशील्यो भरतः लोभेन राज्यश्रद्धया आक्रान्तः किम् ? येन पुत्रलोभरूपेण हेतुना मात्रा कैकेय्या एतत्कृतमिति वा अथवा मध्यमा माता कैकेय्येव स्त्रीलघुतां स्त्रीणां क्रूरं हृदयमिति प्रसिद्धा या लघुता तां गता ? किमेवं कृतवतीति तर्कः । मया विचारितमेव द्वयं मिथ्यैव । आर्यस्य सुगृहीतनाम्नोऽस्य अनुजोऽसौ मद्गुरुर्यो भरत इत्यनेन भरतेन एतत्कृतमित्यसंगतमित्युक्तम् । माता कैकेयी, तातस्य दशरथस्य कलत्रमित्यनेन मात्रा कृतमनुचितमिति दर्शितम् तर्हि कथमेतत्कृतं तत्राह मन्य इति । उभाभ्यामेतन्न कृतम्, किन्तु ब्रह्मणैव कृतमित्यर्थः । अत्रानुजकलत्रयोस्तत्सम्बन्धित्वविधानात्प्राधान्यम्, तद्द्योतनार्थमार्यस्य तातस्येति वक्तव्यम् तदकरणादविमृष्टविधेयांशमित्याह **अत्रेति** । न चायमपि पददोषः पदद्वये वर्तत इत्येतावान्विशेष इति वाच्यम्, प्राधान्यस्य वाक्यपर्यालोचनायत्तत्वेन वाक्यदोषस्यापि विद्यमानत्वात् । न च वाच्यता तयोः विशेषणत्वेनाप्राधान्यमिति वाच्यम् । शब्दतोऽप्राधान्येऽप्यर्थतः प्राधान्यात् । उक्तप्रकारं समासान्तरेऽप्यतिदिशति **एवमिति** । विशेषणविशेष्यभावोचितशरीरत्वं समासानां सामान्यलक्षणम् अन्यथा सामर्थ्यानुपपत्तेः । तत्पुरुषे कर्तुर्यथा । "यस्यावमत्य गुरुदत्तमिदं कुठारं डिंभोऽपि राम इति नाम पदस्य हर्ता" इति । गुरुणा दत्त मिति वाच्यम् । एवं "यथाकामार्चितार्थिनामि"त्यादि । कर्मणो यथा–"प्रदक्षिणक्रियातीतस्तस्याः कोपमजीजनत्" इति । अत्र प्रदक्षिणक्रियामतीत इति वाच्यम् ।

करणस्य यथा "धात्रा स्वहस्तलिखितानि ललाटपट्टे को वाक्षराणि परिमार्जयितुंसमर्थः" इत्यत्र हस्तेनेति वाच्यम् । अपादानस्य यथा

आसमुद्रक्षितीशानामि''ति । अत्र आसमुद्रादिति वक्तव्यम् ।

अधिकरणस्य यथा–

"अन्यसंक्रान्तसौभाग्ये''ति । अन्यसंक्रान्तसौभाग्यमिति वाच्यम् [?]।

बहुब्रीहौ यथा–

"यः स्थलीकृतविन्ध्याद्रिराचान्तापरवारिधिः ।

यश्च तापितवातापिः स मुनिः श्रेयसेऽस्तु वः" ।।इति ।

येन स्थलीकृतो विन्ध्यः, येनाचान्तः पयोनिधिः, वातापिस्तापितो येनेति वाच्यम् । न खल्वत्र किञ्चिदन्तरं प्रतिविपश्याम इति चेत्सत्यम् । कर्त्रीनामेवैष यत्नश्चण्डिकोपाध्यायानाम् । अव्ययीभावे यथा "निष्प्रत्यूहमुपास्महे भगवत" इति । अत्र प्रत्यूहाभावायेति वाच्यम् । द्वन्द्वे यथा "सीताया ऊर्मिलायाश्च सदृशौ रामलक्ष्मणावि''ति । अत्र रामश्च लक्ष्मणश्चेति वाच्यम् । द्विगौ यथा "ब्रह्मा विष्णुश्च रुद्रश्च त्रिलोकीमधिकुर्वत" इति । त्रीन् लोकानिति वाच्यम् । अन्यथा संख्यायाः संख्येयेषु लोकेषु निरवद्यता न प्रकाशेत, इत्यादि द्रष्टव्यमित्यर्थः ।

सारबोधिनी–ननु यत्तदोरन्यतरानुपादाने चेदविमृष्टविधेयांशत्वं तदा कल्याणानामित्यत्र यद्यदुक्त्वा तन्मे इत्युक्तं कथं न तस्य शक्तिः द्वितीययच्छब्दस्य साकांक्षत्वादित्याह **नन्विति । कल्याणानामिति** । भाजनमाश्रयः । धुर्यां भारक्षमाम् । प्रतिजहि बाधस्व । भद्रं भद्रं उचितोचितम् यद्वा भद्रं मत्यन्ताभीष्टम् । वितर देहि । मङ्गलमाशंसनीयरूपम् । तस्मै भूयसे बहुतराय । **तथाभूतमेवेति** । तथा च यत्पदार्थस्तत्पदेन परामृश्यते इत्येव नियमो न तु यावन्तो यच्छब्दास्तावन्तस्तच्छब्दा इति । ननु तथापि यत्पदवीप्सायां तत्पदवीप्सा दृश्यते इत्यत्र किं विनिगमकम् । यथाऽत्रैव पद्ये न दृश्यते । दृश्यते च यथा—

"सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ।

नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः" ।।

इति चेदुच्यते । यत्र प्रकृतक्रियान्वयस्तत्पदार्थे एकदा भवितुमर्हति तत्र प्रायेण न वीप्सा । यत्र च न तथा तत्र वीप्सेति निष्कर्षः । तथाहि । एकदा सकलपापहननान्वयसंभवात् न तत्र वीप्सा प्रायेणेति करणात्तत्रापि क्वचिद्वीप्सेति । यथा—

"यां यां प्रियः प्रैक्षत कातराक्षी सा सा ह्रिया नम्रमुखी बभूव" इत्यत्र ।

स स भूमिपाल इत्यत्र तु नरेन्द्रकन्यया क्रमेण व्यतीतानां क्रमेण वैवर्ण्यप्राप्तिरिति तत्र वीप्सैव । लक्ष्यान्तरमाह **किं लोभेनेति** । लक्ष्मणस्योक्तिरियम् । मात्रा मातृद्वारा । **अत्रार्यस्येति** । सम्बन्धस्योत्कर्षहेतुत्वेन विधित्सितस्य प्राधान्यौचित्यादिति भावः । ननु समासासमासयोरर्थभेदाभावात्कथमेवमिति चेन्न । अर्थभेदाभावेऽपि समासनिबन्धनगुणीभावस्यावश्यकत्वात् अन्यथा मिथ्यामहिमत्वेऽपि गत्यभावात् । समास-

गतत्वेन पददोषतया सिंहगुहावलोकनन्यायेनास्य वाक्यदोषान्तर्निवेश इत्यभिधानमसत्। **वाक्यदोषत्वस्यैव** संभवात्। तथाहि। अनुजे आर्यसंबन्धं विधाय अनौचित्यकारित्वाभावो विधीयते। **यत्रायं संबन्धस्तत्र नानौ**चित्यमिति विहितविधेयत्वं विवक्षितम्। संबन्धस्य गुणीभावेन न तत्प्रतीतिः। तथा च आर्येत्यादिमिथ्येत्याद्यनेकपदावलम्बनाद्वाक्यदोषता। आर्येत्यादितातेत्यादिपदद्वयनिष्ठत्वेन वाक्यदोषतेति कश्चित्, तन्न। अनयोः परस्परमाकाङ्क्षाविरहात्साकांक्षनानापदवृत्तिदोषस्यैव तत्त्वात्। वस्तुतस्तु अनयोरपि **यथाकथ**ञ्चिदाकाङ्क्षाऽस्तीति दिक्।

विरुद्धमतिकृद् यथा

श्रितक्षमा रक्तभुवः शिवालिङ्गितमूर्तयः।
विग्रहक्षपणेनाद्य शेरते ते गतासुखाः ॥१९६॥

अत्र क्षमादिगुणयुक्ताः सुखमासते इति विवक्षिते हता इति विरुद्धा प्रतीतिः।

बालचित्तानुरञ्जनी—विरुद्धमतिकृदुदाहरति **श्रितक्षमा इति**। अत्र केचिदनुरक्तमण्डला राजानो वर्ण्यन्ते। श्रिता क्षमा सहिष्णुता यैः, अनुरक्ताः भुवः भूगतलोका येषाम् शिवैः कल्याणैः आलिङ्गिताः मूर्तयः शरीराणि येषां ते राजानः, अद्य विग्रहो युद्धं तस्य क्षपणं नाशनं तेन गतं असुखं येषां एवंविधाः सन्तः शेरत इति प्रकृतोऽर्थः। अत्र राजानो हता इति विरुद्धा मतिः। श्रितक्षमाः प्राप्तभूमयः रक्तभुवः रक्तधराः, शिवाभिः शृगालीभिः आलिङ्गितमूर्तयः, विग्रहस्य क्षपणेन नाशनेन गतासुखाः गताः असवः प्राणाः खानि च येषामिति। न चायं प्रकाशितविरुद्ध इति वाक्यार्थदेवमिति वाच्यम्। विरुद्धशब्दमहिम्नैव विरोधस्फुरणात्।

सारबोधिनी—विरुद्धमतिकृदुदाहरति **श्रितेति**। क्षमा क्षान्तिः भूमिश्च। रक्ताऽनुरक्ता रुधिरवती च। भूस्तत्स्थजनो भूमिश्च। शिवं कल्याणम् शिवः शृगालः शृगाली च। विग्रहो युद्धं शरीरञ्च। असुखं दुःखं असवः प्राणाः खमिन्द्रियं च। अत्र पृथक्सिद्धयोरागन्तुकः संबन्धः श्रयणम् तस्य क्षान्तौ गुणविशेषे बाधात्। तथा रक्तत्वस्य रुधिरत्वस्य भूस्थजने बाधात्। एवमालिङ्गनकर्तृत्वस्य शिवे शुभदृष्टौ बाधात्। तद्वत् क्षपणस्य नोदनस्य युद्धे बाधात्, लक्षणातः प्रागेव झटिति धरण्याद्युपस्थित्या उपश्लोक्यमानस्यानुचितशुभविरोध्यशुभप्रतिपादनया विरुद्धमतिकारिता। न चामङ्गलप्रतीत्याऽश्लीलत्वमिति वाच्यम् उपाध्योरसङ्करत्वेन दोषद्वयेऽप्यक्षतेः।

पदैकदेशे यथासम्भवं क्रमेणोदाहरणम्

अलमतिचपलत्वात् स्वप्नमायोपमत्वात्
परिणतिविरसत्वात् सङ्गमेनाङ्गनायाः।
इति यदि शतकृत्वस्तत्त्वमालोचयाम-
स्तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा ॥१९७॥

अत्र त्वादिति । यथा वा

तद्गच्छ सिद्धयै कुरु देवकार्यमर्थोऽयमर्थान्तरलभ्य एव ।
अपेक्षते प्रत्ययमङ्गलब्ध्यै बीजाङ्कुरः प्रागुदयादिवाम्भः ॥१९८॥

अत्र द्धयै ब्ध्यै, इति कटु ।

बालचित्तानुरञ्जनी—एवं तावद्वाक्येऽपि दोषाः सन्तीत्येतत्समर्थ्य पदस्यांशेऽपि केचनेत्येतद् व्याचष्टे **पदेति** । कस्यचित् कामुकस्य वचनम् । स्वप्नः चित्तवृत्तिमात्रपरिकल्पिता सृष्टिः । मन्त्रादिना अविद्यमानार्थप्रकाशनं माया । अतिचपलत्वात् स्वप्नमायोपमत्वात् परिणतिविरसत्वादङ्गनायाः सङ्गमेनालम् । यदि यद्यपि शतकृत्वः अनेकधा इति तत्त्वं विचारयामः तदपि तथापि अन्तरात्मा हरिणाक्षीं न विस्मरति । अत्र त्वादिति प्रयोगः श्रुतिकटुः । असकृदावृत्त्या दोषोल्वणत्वमित्याह अत्रेति । अत्रैवोदाहरणान्तरमाह **यथा वेति** । तत्तस्मात् कारणात् । अङ्ग भोः सिद्धयै गच्छ, देवकार्यं कुरु । अर्थान्तरेण पार्वतीपरमेश्वरसंघट्टरूपेणलभ्यः लघुसत्ताक एवायमर्थः देवकार्यकरणलक्षणलब्धरूपलाभाय त्वां प्रत्ययं कारणत्वेनापेक्षते बीजाङ्कुरोदयात् उच्छूनतारूपात् प्राक् अम्भ इव । अत्रापि श्रुतिकटुत्वमित्याह अत्रेति ।

सारबोधिनी—पदैकदेशे श्रुतिकटुत्वमाह **अलमिति** । अङ्गनायाः सङ्गमेनालमिति संबन्धः । अत्र विरोधिनं शान्तमुपक्रम्य स्वविश्रान्तस्य शृङ्गारस्यात्यन्तमधुरत्वेन क्षुद्रापचारस्याप्यसहतया पदैकदेशश्रुतिकटुत्वस्याप्यपकर्षतेत्याह **त्वादिति** । **यथा वेति** । अत्र देवकार्यं शिवे पार्वतीवशतापादानम् । तथा चात्रापि नायकनायिकावृत्तान्तरूपरसस्य सम्भवेन तद्व्यञ्जकवर्णवैधुर्येणास्य दूषकतेति ध्येयम् । तदिति प्रत्ययः करणम् । अङ्गलब्धिरुत्पत्तिः । यद्वा अङ्गेति सम्बोधने लब्धिरुपलब्धिः । उत्तमं त्वामिति क्वचित् पाठः ।

यश्चाप्सरोविभ्रममण्डनानां संपादयित्रीं शिखरैर्बिभर्ति ।
बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्ताम् ॥१९९॥

अत्र मत्ताशब्दः क्षीबार्थे निहतार्थः ।

आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासित-
प्रोत्सर्पद्विरहानलेन च ततः सन्तापितानां दृशाम् ।
सम्प्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो
भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा ॥२००॥

अत्र दृशामिति बहुवचनं निरर्थकम् कुरङ्गेक्षणाया एकस्या एवोपादानात् । न चालसवलितैरित्यादिवत् व्यापारभेदाद् बहुत्वम् व्यापाराणामनुपात्तत्वात् । न च व्यापारेऽत्र दृक्-

शब्दो वर्तते । अत्रैव 'कुरुते' इत्यात्मनेपदमप्यनर्थकम् । प्रधानक्रियाफलस्य कर्त्रसम्बन्धे कर्त्र-भिप्रायक्रियाफलाभावात् ।

बालचित्तानुरञ्जनी—निहतार्थमुदाहरति **यश्चेति** । यश्च पर्वतः देवाङ्गनाविलासालङ्काराणा-मुत्पादयित्रीं मेघखण्डविभिन्नलौहित्यां असमयसन्ध्यावस्थितां धातुमत्तां शिखरैर्बिभर्ति । धातुमतो भावो धातुमत्ता इत्ययमर्थः । क्षीववाचकत्वेन निहतार्थ इत्याह **अत्रेति** ।

निरर्थकमुदाहरति **आदाविति** । लोहकारसमाधिनोक्तिः । हरिणाक्षी प्रथमतः कज्जलसमूहलिप्त-रूपाणां अनन्तरं निश्वासानिलोल्लासितेन अत एव प्रसरद्भिरहाग्निना सन्तापितानां दृशां अश्रुजलेन सेचनं कुरुते । लोहकारः कन्दर्पस्य भल्लानामायुधविशेषाणां लिप्तदग्धानां पातकः । अत्र कुरङ्गेक्षणाया एकत्वेन दृशोरिति द्विवचनेन वक्तव्ये दृशामिति बहुवचनं निरर्थकमित्याह **अत्रेति** । अलसवलितैः प्रेमा-र्द्रार्द्रैरित्यादावीक्षणैरिति यथा वचनं व्यापारभेदात् एवमत्रापीत्यत आह **न चेति** । अलसवलितैरित्यादौ भावाकूतादिव्यापारभेदवत्प्रकृते अभावान्न बहुवचनं सार्थकमिति पूर्ववच्छब्दस्य व्यापारवाचित्वमङ्गी-कृत्य दूषणमुक्तम् । इदानीं तदेव न संभवतीत्याह **न चेति** । वीक्षणशब्दस्य दृग्व्यापारे प्रयोगवत् दृक्शब्दस्य प्रयोगाभावात् अञ्जनाद्यघटनास्वव्यापारवाची न संभवत्येव दृक्शब्द इति भावः । अस्मिन्नेव श्लोके पदान्तरे निरर्थकत्वमाह **अत्रैवेति** । दृङ् निषेधलक्षणायाः दृक्संबन्धमात्रपरत्वात् कुरङ्गेक्षणया संबन्धाभावे कर्त्रभिप्रायक्रियाफलाभावात् "स्वरितञितः कर्त्रभिप्राये क्रियाफल" इत्यत्रोक्तनिमित्ताभावादात्मनेपदं निर-र्थकमित्यर्थः ।

सारबोधिनी—**यश्चेति** । **धातुमत्तामिति** । मतुबुत्तरतल्प्रत्ययेन संबन्धाभिधानं तदपेक्षया क्षीबार्थः प्रसिद्धः । वलाहको मेघः । वलाहकच्छेदेन खण्डखण्डीभावेन विभक्तोऽवच्छेदभेदेनोपस्थितो रागो यस्याः ।

आदाविति । कुरङ्गेक्षणा दृशामश्रुपयसाभिषेकं चेतोभुवो भल्लीनामिव पानकर्म कुरुत इत्युत्प्रेक्षा । नायिका चेयं भविष्यत्प्रोषितपतिका, अञ्जनसत्त्वात् । शस्त्रस्य पङ्कलेपादिपूर्वकं पानकर्म इति दृशः कामशास्त्रत्वेनाध्यवसायादियमुक्तिः । अनर्थकमिति बहुत्वासंभवात् हेतुमाह **एकस्या इति** । ननु दृशेर्भावे क्विपा व्यापाराभिधानम् व्यापाराश्च बहव एवेत्याशङ्क्य निषेधयति **न चेति** । अञ्जनलेपादीनां क्रियायामसंभवादिति शेषः । कर्त्रभिप्रायेति कर्तारमभिप्रैति क्रियाफलमभिसंबध्नातीति कर्त्रभिप्रायं क्रियाफलम् । अथ दृशामितिवत् कुरुत इतिवच्च नाथते इत्यपि पदैकदेशदोषः स्यात् । अथवा नाथत इति-वत् एतावपि पददोषौ स्यातामविशेषादिति चेन्न । प्रकृत्यर्थासंभवाहितप्रत्ययासंभवो यत्र तत्र पददो-षता । नाथते इत्यत्राशीरूपप्रकृत्यर्थस्यासंभववशेनात्मनेपदासंभवात् । इह तु प्रकृत्यर्थाविबाधितावेव । किन्तु प्रत्ययार्थाविति विशेषात् । ननु तथापि बहुषु बहुवचनमित्यनुशासनोल्लङ्घनान्नाथत इतिवदसाध्वेवेति चेदुच्यते । "आशिषि नाथ" इत्यनेनाशिषि आत्मनेपदं नियम्यते, ततो याचने युक्तमसाधुत्वम् । प्रकृते तु कर्त्रभिप्रायक्रियाफलविवक्षायां तन्नियमयता पराभिमतसम्बन्धिक्रियाफलेन तन्निषेधः प्रतिपाद्यते इति तत्रैवासाधुत्वम् । न तु कर्त्रभिप्रायफलाभावे । अत एव कर्त्रभिप्राय इति किं पराभिप्रेते मा भूदित्युक्तं तथा च कर्त्रभिप्रायफलाभावादनर्थकमेवात्मनेपदम् न त्वसाधुत्वम् । एवं बहुषु बहुवचनमिति सूत्रं बहुषु बहुवचनं नियमयत् द्व्येकयोस्तु तन्निषेधयति न तु बहुत्वाविवक्षामात्रेण । न च दृशामित्यत्र द्वित्वैकत्वे विवक्षिते यतोऽसाधुत्वं स्यात् । किन्तु बहुत्वाविवक्षामात्रमित्यन्वितमेवैतदिति ।

चापाचार्यस्त्रिपुरविजयी कार्तिकेयो विजेयः
शस्त्रव्यस्तः सदनमुदधिर्भूरियं हन्तकारः ।
अस्त्येवैतत् किमु कृतवता रेणुकाकण्ठबाधां
बद्धस्पर्धस्तव परशुना लज्जते चन्द्रहासः ॥२०१॥

अत्र विजेय इति कृत्यप्रत्ययः क्तप्रत्ययार्थेऽवाचकः ।

अतिपेलवमतिपरिमितवर्णं लघुतरमुदाहरति शठः ।
परमार्थतः स हृदयं वहति पुनः कालकूटघटितमिव ॥२०२॥

अत्र पेलवशब्दः ।

बालचित्तानुरञ्जनी—अवाचकमुदाहरति **चापेति** । रामचन्द्रस्य परशुरामं प्रति वचनम् । शिवस्तव धनुर्विद्यायां गुरुः षडास्यस्त्वया जितः, बाणविक्षिप्तः समुद्रस्तव गृहम्, इयं भूः हन्तकारकं पूर्णभिक्षा । एतत्तव महत्त्वमस्त्येव । किमु किन्तु मे चन्द्रहासः खड्गो मातृकण्ठच्छेदं कृतवता परशुना आयुधेन [बद्धस्पर्धो] लज्जते । अत्र विजेय इत्यस्य विजित इत्यत्रार्थे सङ्केताभावादवाचकत्वमित्याह **अत्रेति** ।

व्रीडाश्लीलमुदाहरति **अतीति** । शठः खलः अतिसुन्दरं स्वल्पाक्षरं अतिकोमलं वचः कथयति । स दुष्टः परमार्थतः पुनः हृदयं कालकूटघटितमिव वहति । अत्र पेलवशब्दैकदेशशब्दस्य पेलशब्दस्य लाटभाषायां वृषणवाचित्वेन व्रीडाश्लीलमित्याह **अत्रेति** ।

सारबोधिनी—चापाचार्य इति । व्यस्तः क्षिप्तः । उदधिः सदनमित्यन्वयः, हन्तकारोऽतिथिसत्कारः । किमु किन्तु । क्तप्रत्ययार्थेऽतीतत्वेऽवाचक इति, तत्र संकेतविरहात् । **अतीति** । पेलवं कोमलम्, अत्र पेलवशब्दस्याद्यक्षरद्वयं पुंव्यञ्जनबोधकम् ।

यः पूयते सुरसरिन्मुखतीर्थसार्थस्नानेन शास्त्रपरिशीलनकीलनेन ।
सौजन्यमान्यजनिरूर्जितमूर्जितानां सोऽयं दृशोः पतति कस्यचिदेव पुंसः ॥२०३॥

अत्र पूयशब्दः ।

विनयप्रणयैककेतनं सततं योऽभवदङ्ग तादृशः ।
कथमद्य स तद्वदीक्ष्यतां तदभिप्रेतपदं समागतः ॥२०४॥

अत्र प्रेतशब्दः ।

बालचित्तानुरञ्जनी-जुगुप्साश्लीलमुदाहरति **यः पूयत इति** । यः पुरुषः गङ्गादितीर्थसमूहस्नानेन शास्त्राभ्यासदृढीकरणेन च पवित्रो भवति, सौजन्यमानोत्पत्तिस्थानं तेजस्वी सोऽयं पुरुषः कस्यचिदेव भाग्यवतः पुरुषस्य नेत्रग्राह्यो भवति । अत्र पूयशब्दस्य शीर्णरुधिरवाचकत्वेन जुगुप्साव्यञ्जकत्वेनाश्लीलत्वमित्याह **अत्रेति** ।

अमङ्गलाश्लीलमुदाहरति विनयेति। काचित् स्वकान्तमन्यासक्तं दृष्ट्वा सखीं प्रत्याह। **अङ्ग** हे सखि **यो** नाथः सर्वदा विनयप्रीतिस्थानमभवत्, तादृशः स इदानीं सपत्न्यभिलषितस्थानं गतः सन् पूर्व इव कथं विलोक्यतामिति। मयेति शेषः। अत्र प्रेतशब्दस्य शववाचकत्वेनामङ्गलाश्लीलत्वमित्याह **अत्रेति**।

सारबोधिनी—य इति। मुखमादिः। परिशीलनमभ्यासः। कीलनं संस्कारदार्ढ्यम्। **ऊर्जितानां** बलवतां ऊर्जितं बलम्। अत्र पूयशब्दो व्रणच्छेदबोधकः।

विनयेति। अङ्गेदं सम्बोधने। अभिप्रेतमभिलषितम्। अत्र प्रेतशब्दो मृतबोधकः।

कस्मिन् कर्मणि सामर्थ्यमस्य नोत्तपतेतराम्।
अयं साधुचरस्तस्मादञ्जलिर्बध्यतामिह ॥२०५॥

अत्र किं पूर्वं साधुः, उत साधुषु चरतीति सन्देहः।

किमुच्यतेऽस्य भूपालमौलिमालामहामणेः।
सुदुर्लभं वचोवाणैस्तेजो यस्य विभाव्यते ॥२०६॥

अत्र वचःशब्देन गीःशब्दो लक्ष्यते। अत्र खलु न केवलं पूर्वपदम्, यावदुत्तरपदमपि पर्यायपरिवर्तनं न क्षमते। जलध्यादावुत्तरपदमेव वडवानलादौ पूर्वपदमेव।

यद्यप्यसमर्थस्यैवाप्रयुक्तत्वादयः केचन भेदाः, तथाप्यन्यैरालङ्कारिकैर्विभागेन प्रदर्शिता इति भेदप्रदर्शनेनोदाहर्तव्या इति च विभज्योक्ताः।

बालचित्तानुरञ्जनी—संदिग्धमुदाहरति **कस्मिन् इति**। अस्य पुरुषस्य सामर्थ्यं कस्मिन् कर्मणि नोत्तपतेतराम् अतिशयेन प्रभवति। अयं साधुषु चरति, वसति। तस्मात् इह अस्मिन् अञ्जलिर्बध्यताम् स्वकार्यादिसिद्धये अयं प्रार्थ्यतामित्यर्थः। अत्र साधुचर इति भूतपूर्वे चरट् [अ० ५-३-५३] इति पूर्वं साधुरिति वा, "चरेष्ट" [३-२-१५] इति साधुषु चरतीति वेति संदेह इत्याह **अत्रेति**।

नेयार्थमुदाहरति किमिति। भूपालमौलिमालामहामणेः अस्य राज्ञः किं वस्तु उच्यते, वर्ण्यते। **यस्य तेजः** वचोवाणैः गीर्वाणैर्देवैरपि सुदुर्लभं सुदुःप्राप्यत्वेन विभाव्यते ज्ञायते। अत्र वचःशब्दस्य प्रसिद्धिवाचित्वात् संज्ञावयवत्वसम्बन्धेन वचसा गीःशब्दो लक्ष्यते इति वचोवाणत्वं गीर्वाणार्थेन नेयार्थमित्याह **अत्रेति**। प्रसङ्गात्प्रमेयान्तरं शिक्षयति। गीर्वाणशब्दे पूर्वपदं गीःपदं न केवलं वचोरूपं पर्यायपरिवर्तनं न क्षमते न सहते यावत् किन्तु उत्तरपदं बाणपदमपि न सहते। तेन वचोबाणशब्द इव गीःसायकशब्दोऽपि नेयार्थं इत्यर्थः। कुत्रोत्तरपदं तादृक् कुत्र वा पूर्वपदमेव तादृगित्याकाङ्क्षायामाह **जलधीति**। जलधि-दिनकरादीनां जलधरदिनवहेत्याद्युत्तरपदपर्यायपरिवर्तने नेयार्थत्वम्, तद्वाचकत्वाप्रतीतेः। पूर्वपदं उत्तरपदपर्यायपरिवर्तनं सहते। उदधि-दिवसकरशब्दे न तत्प्रतीतिः। वडवानलमलयोद्भवादीनां पूर्वपदपर्यायपरिवर्तने नेयार्थता। न तूत्तरपरिवर्तनमित्यर्थः। नन्वप्रयुक्तत्वात् स्वजनकत्वात् असमर्थप्रपञ्चत्वं निहतार्थ-

स्यापि, प्रसिद्धार्थेनाप्रसिद्धार्थतिरोधानात्, अप्रसिद्धार्थत्वस्य विवक्षितत्वात्, तत्प्रतीतेरभावादसमर्थप्रपञ्चत्वमवाचकत्वस्य । समर्थप्रपञ्चत्वं स्पष्टमेव । **यद्यपीति** । तथापि अन्यैः पृथक्त्वेन वर्णितत्वात् अवान्तरभेदेनोदाहर्तव्यत्वात् न पृथगुपादानमित्यर्थः ।

सारबोधिनी-कस्मिन् इति । उत्तपते उज्ज्वलति । भूतपूर्वार्थश्चरट् प्रत्ययः । चरतीति चर इति वा । प्रकरणाद्यभावात्सन्देहः । नेयार्थमाह **किमुच्यत इति** । गीःशब्दो लक्ष्यत इति । तदैव गीर्वाणस्य देवस्य प्रतीतिः । **यावदुत्तरपदमिति** । गीःशब्देनापि देवतायामप्रतीतेः । **जलध्यादाविति** । जलधरजलपात्रादिना जलधेरप्रत्यायनात् । **वाडवेत्यादि** । अश्वानलेत्यादिना वडवाग्नेरबोधनात् । नन्वसमर्थत्वं विवक्षितार्थप्रतीतिशून्यत्वमेवोच्यताम् तत्कथमप्रयुक्तादीनां पृथङ् निर्देश इत्यत आह **यद्यपीति** । भेदा विशेषाः ।

प्रतिकूलवर्णमुपहतलुप्तविसर्गं विसन्धि हतवृत्तम् ।
न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तम् ॥५३॥

अर्धान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यम् ।
अपदस्थपदसमासं संकीर्णं गर्भितं प्रसिद्धिहतम् ॥५४॥
भग्नप्रक्रममक्रमममतपरार्थं च वाक्यमेव तथा ।

रसानुगुणत्वं वर्णानां वक्ष्यते तद्विपरीतं प्रतिकूलवर्णम् । यथा शृङ्गारे

अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि माम् ।
कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर ॥२०७॥

बालचित्तानुरञ्जनी--इत्थं पदवाक्ययोः पदैकदेशानाञ्च साधारणान् दोषानभिधायेदानीं वाक्यमात्रदोषानुद्दिशति **प्रतिकूलेत्यादि** । एवंविधवाक्यमेव तथा दुष्टमित्यर्थः प्रातिकूल्यं वक्तुं तत्प्रतियोग्यानुकूल्यं लक्षयति **रसेति** । वक्ष्यते उत्तरोल्लास इत्यर्थः । प्रतिकूलत्वमाह **तदिति** । उदाहरति **यथेति** । नायिकासम्बन्धेच्छुः कश्चिद् दूतीं प्रत्याह, हे मधुरस्वरे ! आकण्ठं कण्ठपर्यन्तं अधिकोत्कण्ठया पूर्णं मां क्षणं कम्बुकण्ठ्याः कण्ठे कुरु कण्ठसंसक्तं कुरु, कण्ठार्तिं नाशय । अत्र शृङ्गाररसानुसारेण "अटवर्गा रणौ लघू" इति टवर्गस्य निषेधात् कोमलवर्णोच्चारणे कर्तव्ये तद्विपरीतटवर्गस्यैवोच्चारणात् प्रतिकूलवर्णत्वं वाक्यदोष इत्यर्थः ।

सारबोधिनी--वाक्यमात्रगामिदोषानाह **प्रतिकूलेत्यादि** । वाक्यमेव, न तु पदम् । **तथेति** । दुष्टमित्यर्थः । तद्विपरीतत्वमास्वादोद्बोधप्रतिबन्धकत्वम् । न च श्रुतिकटुत्वेन सहास्य साङ्कर्यमिति वाच्यम् । उपाधेरसाङ्कर्यस्य प्रागेव प्रदर्शितत्वात् । तत्र परुषवर्णमात्रं दुष्टम् इह तु सुकुमारा अपि वर्णा रौद्रादौ द्रुह्यन्तीति ततोऽस्य भेद इति केचित् ।

अकुण्ठेति । अकुण्ठा सातिशया । तया आकण्ठं पूर्णमित्यन्वयः । कलकण्ठीति सखीसंबोधनम् । कोकिलाया वा । अत्र शृङ्गारपरिपन्थिनां ओजोव्यञ्जकवर्णानां शृङ्गारव्यञ्जने प्रतिबन्धकता ।

रौद्रे यथा

देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः
क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः ।
तान्येवाहितहेतिघस्मरगुरूण्यस्त्राणि भास्वन्ति मे
यद्रामेण कृतं तदेव कुरुते द्रोणात्मजः क्रोधनः ॥२०८॥

अत्र हि विकटवर्णत्वं दीर्घसमासत्वं चोचितम् । यथा

प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वेधाविधाविर्भवत्-
क्रोधप्रेरितभीमभार्गवभुजस्तम्भापविद्धः क्षणात् ।
उज्ज्वालः परशुर्भवत्वशिथिलस्त्वत्कण्ठपीठातिथि-
र्येनानेन जगत्सु खण्डपरशुर्देवो हरः ख्याप्यते ॥२०९॥

यत्र तु न क्रोधस्तत्र चतुर्थपादाभिधाने तथैव शब्दप्रयोगः ।

बालचित्तानुरञ्जनी—रौद्रेऽपि प्रातिकूल्यमाह **रौद्रेति** । यस्मिन् देशे सहस्रार्जुनः परशुरामजनकस्य जमदग्नेः केशग्रहणं कृतवान् तस्मिन्नेव देशे द्रोणपुत्रः अश्वत्थामा पाण्डवैः केशेषु गृहीतं स्वं पितरं दृष्ट्वा इदमाह । यस्मिन् देशे परशुरामेण शत्रुरुधिरोदकैः ह्रदाः पूरिताः सोऽयं देशः तवैकक्षत्रादेव सहस्रार्जुनात् जमदग्नेरिव पितुः केशग्रहरूपः परिभवोऽभूत् । अहितैः शत्रुभिः क्षिप्तानि यानि शस्त्राणि तेषां घस्मराणि भक्षकाणि गुरूणि गरिष्ठानि तानि परशुरामात् प्राप्तानि कान्तियुक्तानि अस्त्राणि आयुधानि मम सन्ति । तस्माद्यत्परशुरामेण कृतं क्रोधनः द्रोणात्मजः मल्लक्षणो जनस्तदेव कुरुते । अत्र "टवर्गादिसषौ वृत्तिदैर्घ्यमि"ति वक्ष्यमाणलक्षणमिति रौद्ररसानुसारिविकटवर्णत्वाद्यभावात् प्रातिकूल्यमित्याह **अत्रेति** । उचितं तदभावात्प्रातिकूल्यमिति शेषः । प्रातिकूल्यप्रकटनार्थमेवानुकूलस्थलमुदाहरति **यथेति** । परशुरामस्य श्रीरामचन्द्रं प्रति वचनम् । पूर्वमलब्धः निशुंभः भङ्गो येन एवंविधं यत् ईश्वरधनुः तस्य च द्वेधाविधा द्वेधाकरणम् तया प्रकटीभवन । यः क्रोधस्तेन प्रेरितः भयङ्करो यः परशुरामः तस्य भुजस्तम्भेन अपविद्धो मुक्तः, उद्गता ज्वाला यस्य स दृढः परशुः वेगात् हे राम भवत्कण्ठपीठातिथिर्भवतु, येन परशुना हरो देवः खण्डपरशुः ख्याप्यते ज्ञाप्यते । नन्वत्रापि चतुर्थपादे उक्तलक्षणाभावात् सदोषत्वमित्याह **यत्रेति** । चतुर्थपादे गुरुसम्बन्धेन परशुस्तुतिप्रतिपादनान्न क्रोधस्तत्र तथैव विकटवर्णाव्यतिरेकेणैव शब्दप्रयोगो युक्त इत्यर्थः ।

सारबोधिनी—रौद्रेति । प्रतिकूलवर्णं यथेत्यन्वयः । **देश इत्यादि** । सोऽयं कुरुक्षेत्ररूपः । जलपदं बाहुल्यद्योतकम् । अहिता वैरिणः । घस्मराणि भोक्तॄणि । रामेण भार्गवेण । विकटा ओजोव्यञ्जकाः ।

समुचितरचनानिदर्शनमाह यथेति । निशुंभो नमनं, द्वेधाविधा द्वैधीकरणं अपविद्धश्चालितः उज्ज्वाल उद्गतज्वालः । अतिथेः पीठारोहणमुचितमिति पीठत्वनिरूपणम्। खण्डयतीति खण्डस्तथाकृतः परशुर्यस्य तेन । यद्वनुस्त्वया खण्डितं तत्परशुना त्वमपि खण्डयिष्यसे इति ध्वनिः । ननु चतुर्थपादेऽत्रापि मसृणवर्णा इत्यत आह **यत्र त्विति** । चतुर्थपादे गुरुस्मरणेन भावोद्रेकात् क्रोधस्य तिरस्कृतेरुचितमेव मसृणवर्णरचनमिति भावः ।

उपहत उत्वं प्राप्तो लुप्तो वा विसर्गो यत्र तत् । यथा

धीरो विनोतो निपुणो वराकारो नृपोऽत्र सः ।
यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः ॥२१०॥

विसन्धि सन्धेर्वैरूप्यम् विश्लेषोऽश्लीलत्वं कष्टत्वञ्च । तत्राद्यं यथा

राजन्विभान्ति भवतश्चरितानि तानि इन्दोर्द्युतिं दधति यानि रसातलेऽन्तः ।
धीदोर्बले अतितते उचितानुवृत्ती आतन्वती विजयसंपदमेत्य भातः ॥२११॥

यथा वा

तत उदित उदारहारहारिद्युतिरुच्चैरुदयाचलादिवेन्दुः ।
निजवंश उदात्तकान्तकान्तिर्बत मुक्तामणिवच्चकास्त्यनर्घः ॥२१२॥

संहितां न करोमीति स्वेच्छया सकृदपि दोषः, प्रगृह्यादिहेतुकत्वे त्वसकृत् ।

वेगादुड्डीय गगने चलण्डामरचेष्टितः ।
अयमुत्तपते पत्री ततोऽत्रैव रुचिं कुरु ॥२१३॥

अत्र संधावश्लीलता ।

बालचित्तानुरञ्जनी—उपहतलुप्तविसर्गमुदाहर्तुं शब्दार्थमाह **उपहत उत्वमिति** । उदाहरति **धीर इति** । अत्र सभायामेवंविधाः पत्न्यः [?]यस्य नृपस्य सेवका एवंविधाः । अत्र पूर्वार्धे धीर इत्यादौ संधिवशादोत्वप्राप्त्या उपहतविसर्गत्वम् उत्तरार्धे यत्र भृत्यादौ लुप्तविसर्गत्वं तदुभयं दोषः ।

विसंधिपदं त्रेधा व्याचष्टे **विसंधीत्यादि** । संधिः परः सन्निकर्षः संहिता । उपसर्गार्थत्वं वैरूप्यम् । क्रमेणोदाहरति **आद्यमिति** । हे राजन् तव तानि चरितानि विभान्ति यानि पाताले अन्तः मध्ये चन्द्रस्य कान्ति विदधति उचितार्थवृत्ती योग्यार्थवृत्ती, एषु चरितेषु विजयसंपत्ति वाऽऽतन्वतीति भावः । अत्र तानि इन्दोरित्यत्र संध्यकरणाद् दोषः ।

उदाहरणान्तरमाह **यथा वेति** । स्थूलहारेण मनोहारिणी द्युतिर्यस्य सः महत उदयाद्रेरिन्दुरिव महतस्तस्मात् वंशादुदितः । बत हर्षे । निजवंशे अधिकमनोहारिणी कान्तिर्यस्य । मूल्यरहितः मुक्तामणि-

तुल्यः शोभते। मुक्तामणिरपि निजवंश उदात्तकान्तिरनर्घ्यश्च भवति । अत्र निजवंश उदात्त इत्यत्र सन्ध्यकरणाद्दोषः। प्रसङ्गात्प्रथमश्लोके संन्ध्यसंभावनायामपि दूषणं वक्तु तत्संभवताया दूषणं प्रयुनक्ति **संहितामिति**। प्राप्तिस्थले बुद्धिपूर्वकं सकृदप्यसंधिकरणे दोषः। प्लुतप्रगृह्या अचीत्यादिना निषिद्धस्थलेऽसकृदेव तदुच्चारणे दोषः, सकृत्तु न दोषः। यथा

"समुद्रगारूपविपर्ययेऽपि सहंसपाते इव लक्ष्यमाणे" इति। [कु० सं० ७. ४२.]

अश्लीलविसन्ध्युदाहरति **वेगादिति**। काचिद् दूती नायकाधिष्ठितं सङ्केतस्थलं बोधयन्ती नायिकामाह—हे नायिके! वेगात् उड्डीय डामरचेष्टितः। डामर इति वाद्यविशेषः, भाषया डमरू इति प्रसिद्धः तस्येव चेष्टा यस्य। आकाशे चलन् अयं पक्षी उत्तपते शोभते। तस्मादत्रैव स्थले रुचिं कुरु। अत्र लण्डाचिङ्कुपदयोर्भाषया शिश्नयोन्यङ्कुरवाचकत्वादश्लीलत्वम्। संधिरत्र पदयोर्मिथः संश्लेषमात्रं न तु शास्त्रीया संहितेति द्रष्टव्यम्।

सारबोधिनी—उपहतेत्यादि। धीरेति। अत्र नैरन्तर्येणानेकस्थानस्योपहतविसर्गत्वेनैव दूषकता। एवं लुप्तविसर्गोऽपि। अन्यथा अतिप्रसङ्गात्। प्रतिकूलेत्यादिषु पञ्चसु पतत्प्रकर्षे च बन्धशैथिल्यकारित्वमेव दूषकताबीजम्। बन्धस्य गाढत्वे यथा चमत्कारो न तथा शैथिल्ये इति सहृदयानामनुभवात्। **राजन्नित्यादि**। तानि इन्दोरित्यत्र विवक्षाविरहात्समानलक्षणदीर्घाभावः। नासाधुत्वम् विकल्पानुशासनात्। यदुक्तम्

"संहितैकपदे नित्या नित्या धातूपसर्गयोः।
सूत्रेष्वपि तथा नित्या सैवान्यत्र विभाषया॥" इति

'नित्या समासे वाक्ये तु सा विवक्षामपेक्षते।' इत्यपि पाठः

उचितयोः कर्मणोरनुवृत्ती इत्यातन्वती इत्यस्य कर्मणी। धीदोर्बले इत्यस्य विशेषणत्वे नुमागमः स्यात्। विजयसंपदमेत्य भात इत्यन्वयः। संधिनिषेधात् चरणयोर्विश्लेषः।

प्रपञ्चयति **यथा वेति**। तत उदित इति विसर्गलोपे पुनः संधिनिषेध एव। निजवंश उदात्त इत्यत्र संधिनिषेधाद्विश्लेषणम्। तेनेदं विश्लेषोदाहरणमेव, न तु विलुप्तविसर्गस्य प्रपञ्चोऽयमिति कस्यचिद्वचनमादरणीयमिति। स्वेच्छया, न तु संहितानिषेधकसूत्रपारतन्त्र्येण। **प्रगृह्येत्यादि**। ईदूदेद्द्विवचनं प्रगृह्यमित्यधिकारे प्लुतप्रगृह्या अचीति संधिनिषेधः। आदिशब्दादन्येषां संधिनिषेधकसूत्राणां परिग्रहः। **असकृदिति**। तथैव कविसमयसिद्धत्वात्। तदैव बन्धशैथिल्योदयाच्च। अत एव प्रतिकूलवर्णादीनां बहुव्यापकतयैव दूषकता। वेगादित्यादौ लण्डाचिङ्कुशब्दौ पुंव्यञ्जनस्त्रीवराङ्गबोधकौ। तयोः संधानेनैव निष्पत्तेः। चलन्निति डामरेति रुचिमिति कुर्विति बहुपदावलम्बनाद् वाक्यदोषता।

उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः।
नात्रर्जु युज्यते गन्तुं शिरो नमय तन्मनाक्॥२१४॥

हतं लक्षणानुसरणेऽप्यश्रव्यम् अप्राप्तगुरुभावान्तलघु रसाननुगुणञ्च वृत्तं यत्र तत् हतवृत्तम्। क्रमेणोदाहरणम्

अमृतममृतं कः संदेहो मधून्यपि नान्यथा
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम् ।
सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्जनो
वदतु यदिहान्यत्स्वादु स्यात् प्रियादशनच्छदात् ॥२१५॥

अत्र 'यदिहान्यत् स्वादु स्यात्' इत्यश्रव्यम् । यथा वा

जं परिहरिउं तीरइ मणअं पि ण सुन्दरत्तणगुणेण ।
अह णवरँ जस्स दोसो पडिपक्खेहिं पि पडिवण्णो ॥२१६॥

अत्र द्वितीयतृतीयगणौ सकारभकारौ ।

विकसितसहकारतारहारिपरिमलगुञ्जितपुञ्जितद्विरेफः ।
नवकिसलयचारुचामरश्रीर्हरति मुनेरपि मानसं वसन्तः ॥२१७॥

अत्र हारिशब्दः । हारिप्रमुदितसौरभेति पाठो युक्तः । यथा वा

अन्यास्ता गुणरत्नरोहणभुवो धन्या मृदन्यैव सा
सम्भाराः खलु तेन्य एव विधिना यैरेष सृष्टो युवा ।
श्रीमत्कान्तिजुषां द्विषां करतलात् स्त्रीणां नितम्बस्थलाद्
दृष्टे यत्र पतन्ति मूढमनसामस्त्राणि वस्त्राणि च ॥२१८॥

अत्र 'वस्त्राण्यपि' इति पाठे लघुरपि गुरुतां भजते ।

हा नृप हा बुध हा कविबन्धो विप्रसहस्रसमाश्रय देव ।
मुग्धविदग्धसभान्तररत्न क्वासि गतः क्व वयं च तवैते ॥२१९॥

हास्यरसव्यञ्जकमेतद्वृत्तम् ।

बालचित्तानुरञ्जनी—कष्टविसंधि वाक्यमुदाहरति **उर्वीति** । कश्चित्कञ्चिदुपदिशति। असौ उर्वी मही, अत्र तरूणामाली पङ्क्तिः मरोः मरुस्थलस्य अन्ते चार्वी अवस्थितिर्यस्याश्च अत्र देशे ऋजु सरलं यथा स्यात्तथा गन्तुं न शक्यते । तस्मात् मनाक् शिरो नमय । अत्र उर्व्यसावित्यादौ संधिकरणात् श्रुतिकटुत्वमित्यर्थः ।

हतवृत्तमित्यत्रापि त्रैविध्यं वदन् समासमाह **हतमिति** । हतं वृत्तं यत्रेति संबन्धः । वृत्तं छन्दोलक्षणानुसरणेऽप्यश्रव्यं वृत्तं यत्र तदेकम् अन्तश्चासौ लघुश्चेत्यन्तलघुः अप्राप्तो गुरुभावो गुरुत्वं येन

तादृक् अन्तलघुर्यत्र तद्द्वितीयम् । पादान्तवर्तिनां लघूनां "वा पादान्त" इति नीत्या गुरुत्वं विभाषितम्, तथापि यत्र तेषां गुरुत्वं नास्ति तद्दुष्टं रसाननुगुणं वृत्तं यत्रेति तृतीयम् ।

आद्यमुदाहरति **अमृतमिति** । अमृतं अमृतमेव कः संदेहः, मधून्यपि मधुराण्येव, अन्यथा न । चूतस्यापि प्रसन्नरसं फलम् अधिकं मधुरम् । तथापि रसान्तरविज्जनः मध्यस्थः सन् सकृदपि पुनस्तद्वदतु । इह लोके प्रियादशनच्छदात् अन्यद्यदि स्वादु स्यात् । अत्र वृत्तलक्षणलक्षितत्वेऽपि यदिहान्यदित्यत्र सवर्णदीर्घे कृते यतिभङ्गादश्रव्यत्वमित्याह **अत्रेति** ।

उदाहरणान्तरमाह **यथा वेति** । अस्य कामस्य सुन्दरत्वगुणेन सौन्दर्यगुणेन जं यं मणअंपि मनागपि, परिहरिउं परिहर्तुं, ण तीरइ न शक्यते मया न शक्तमित्यर्थः । अह अथ, णवरं केवलं, जस्स यस्य कामस्य स एव दोषत्वेन पडिपक्खेहिं पि प्रतिपक्षैरपि पडिवण्णो प्रतिपन्नः । कामः परिहर्तुं न शक्यत इति ब्रह्मचारिभिरपि ज्ञायत इत्यर्थः । अत्र हरिउमित्यत्रान्तगुरुत्वात् सगणः । तीरइ इति आदिगुरुत्वात् भगणः । अनयोः शास्त्रसिद्धत्वेऽपि एकतरस्य गुरुत्वापत्तौ श्रव्यत्वसंभवात् तदकरणादश्रव्यत्वमित्याह **अत्रेति** । द्वितीयमुदाहरति **विकसितेति** । विकसिताः ये सहकाराः चूतवृक्षाः तेषां तारः अधिकः हारो मनोहरश्च यः परिमलः तेन गुञ्जिताः पुञ्जिताश्च द्विरेफाः भ्रमराः यत्र । नवानि यानि किसलयानि तान्येव चारुचामराणि तेषां श्रीर्यत्र ईदृशो वसन्तः मुनेरपि मानं संहरति । हारीत्यत्र पादान्तलघोरेकस्य गुरुत्वेन भाव्यम् । तन्नार्हति । हारिप्रमुदितेति पाठे तु "संयोगे गुरुरि"ति गुरुत्वलाभान्न दोष इत्याह **अत्रेति** ।

उदाहरणान्तरमाह **यथा वेति** । विधिना स एष युवा यैः सृष्टः ते संभाराः अन्य एव खलु । के ते संभारा इत्याकाङ्क्षायामाह सा कुमारीति मृत्तिका कैरपि न स्पृष्टेत्यर्थः । सा कन्या मृत् उपादानकारणभूता अन्यैव । ताः गुणरत्नरोहणभुवः अन्याः लोकविलक्षणाः । यत्र यस्मिन् यूनि दृष्टे श्रीमत्कान्तिजुषां विमूढमनसां द्विषां स्त्रीणां च करतलात् अस्त्राणि स्त्रीणां नितम्बस्थलात् वस्त्राणि च पतन्ति । वस्त्राणि चेत्यत्राप्राप्तगुरुत्वात् लघुत्वदोषः । वस्त्राण्यपीति पाठे ण्येति पूर्वाक्षरस्य संयुक्तत्वात्तत्समीपस्थः पिशब्दो लघुरपि गुरुत्वेन प्रतीयत इति न दोष इत्याह **अत्रेति** ।

रसाननुगुणं हतवृत्तमुदाहरति **हा नृपेति** । कस्मिंश्चिन्नृपे मृते सेवकानां विलापवचनम् । हा इति कष्टम् । हे नृप बुधकविबन्धो विप्रसहस्रसमाश्रय देव । सुन्दरचतुरसभामध्यरत्न । क्व गतोऽसि । बतेति खेदे । एते वयं च क्व । करुणरसोचितं वृत्तं परित्यज्य हास्यरसोचितवृत्तकरणाद्दोष इत्याह **हास्येति** ।

सारबोधिनी--उर्वी महती । **आली** पङ्क्तिः । अन्ते समीपे । ऋजु यथा स्यात् । तरुश्रेण्या विशेषणविशेष्यभावेनान्वयाद्वाक्यदोषता । **लक्षणानुसरण** इति । लक्षणं छन्दः । वृत्तं छन्दः । **अप्राप्तेति** । "वा पादान्तेत्यनेन लघोरपि पादान्ते गुरुत्वमतिदिश्यते" तन्न । प्राप्नोति, तत्कार्यकारि न भवतीत्यर्थः ।

अमृतममृतमिति । द्वितीयममृतपदमास्वादातिशयपरम् । मध्यस्थः सर्वत्र समः । रसानामन्तरं तारतम्यम् । अत्र हरिणीवृत्ते प्रतिपादं षष्ठे वर्णे यतिरुचिता । चतुर्थपादे यदिह इत्यत्र परपदसंधानेन यतिभङ्गादश्रव्यत्वम् । मात्रावृत्तेऽप्याह **यथा वेति** । **जमिति** । यः परिहर्तुं न तीर्यते मनागपि न सुन्दरत्वगुणेन अथ केवलं तस्य दोषः । प्रतिपक्षैरपि प्रतिपन्नः । सगणभगणवत् गुर्वादिगुरू तौ चाव्यवधानेन **प्रथमाद्

प्रयुक्तौ, न च तथा छन्दःशास्त्रमिति। पादान्तलब्धगुरुकार्यक्षमत्वमुदाहरति **विकसितेति**। परिमलेन पुञ्जित एकत्र समवेत इत्यर्थः। वा पादान्तेत्यस्य वसन्ततिलकेन्द्रवज्रादिविषयत्वादिति भावः।

लक्ष्यान्तरमाह **यथा वेति**। **अन्या इति**। मृदिति समवायिकारणरूपः पार्थिवो भागः। रोहणो रत्नोत्पत्तिहेतुभूतः पर्वतभेदः। संभारा उपकरणानि। **मूढेति**। मोहःप्रतिपत्तिलोपः, स च भयात्मकाच्च। अत्र चकारस्य लघुप्रयत्नोच्चार्यतया गौरवाभावः। पाठान्तरे ण्यकारस्य संयुक्तस्य गुरुप्रयत्नोच्चार्यमाणतया अनन्तरस्थो लघुरपि गुरुकार्यकारी भवति। वस्तुतो ण्यतोऽपीति पाठे बन्धदार्ढ्यमपीति न दोषः। **हा नृपेति**। असीति त्वमित्यर्थे। **हास्येति**। इदं वृत्तं प्रकृतकरुणरसाननुगुणमिति भावः।

न्यूनपदं यथा

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥२२०॥

अत्रास्माभिरिति "खिन्ने" इत्यस्मात् पूर्वमित्थमिति च।

अधिकं यथा

स्फटिकाकृतिनिर्मलः प्रकामं प्रतिसंक्रान्तनिशातशास्त्रतत्त्वः।
अविरुद्धसमन्वितोक्तियुक्तिः प्रतिमल्लास्तमयोदयः स कोऽपि ॥२२१॥

अत्र आकृतिशब्दः, यथा वा

इदमनुचितमक्रमश्च पुंसां यदिह जरास्वपि मान्मथा विकाराः।
यदपि च न कृतं नितम्बिनीनां स्तनपतनावधि जीवितं रतं वा ॥२२२॥

अत्र कृतमिति। कृतं प्रत्युत प्रक्रमभङ्गमावहति। तथा च 'यदपि च न कुरङ्गलोचनानाम्' इति पाठे निराकाङ्क्षैव प्रतीतिः।

कथितपदं यथा

अधिकरतलतल्पं कल्पितस्वापलीलापरिमिलननिमीलत्पाण्डिमा गण्डपाली।
सुतनु कथय कस्य व्यञ्जयत्यञ्जसैव स्मरनरपतिलीलायौवराज्याभिषेकम् ॥२२३॥

अत्र लीलेति।

पतत्प्रकर्षं यथा

कः कः कुत्र न घुर्घुरायितघुरीघोरो घुरेत्सूकरः
कः कः कं कमलाकरं विकमलं कर्तुं करी नोद्यतः।
के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः
सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्तते ॥२२४॥

बालचित्तानुरञ्जनी—न्यूनाधिककथितपदमित्यत्र न्यूनमुदाहरति **न्यूनेति** । युधिष्ठिरः द्रौपदीं सभायां नग्नां वने वल्कलधरैः व्याधैः समं चिरकालं स्थितं विराटस्यावासे अयोग्यकार्यारम्भेण छन्नं यथा तथा स्थितं च दृष्ट्वा मयि खिन्ने अद्यापि कुरुषु खेदं न भजते कोपं न करोतीत्यर्थः । अत्र उषितं स्थितमित्यत्रास्माभिरिति कर्त्तृपदं खिन्न इत्यत्र इत्थं खिन्न इति वक्तव्यम् । तदकरणान्न्यूनपदत्वमित्याह **अत्रेति** ।

अधिकपदमुदाहरति **अधिकमिति** । स्फटिकाकृतिनिर्मलः । अत्यर्थं शास्त्रज्ञः । अविरुद्धाः परस्परान्वययुक्ताः उक्तयः वचनानि यत्र तस्याम् । शत्रोर्नाशो यस्मात् तादृश उदयो यस्य स कोऽपि प्रसिद्धः कविर्वर्तते । अत्र स्फटिकनिर्मल इत्येतावतैव वाक्ये पूर्णे आकृतिपदमधिकमित्याह **अत्रेति** । अत्रैवोदाहरणान्तरमाह **यथा वेति** । इह यत् पुरुषाणां वृद्धावस्थास्वपि कन्दर्पविकाराः, इदमयुक्तं अक्रमश्च लोकविरुद्धञ्च । यदपि च स्त्रीणां जीवनं रतं वा स्तनपतनपर्यन्तं न कृतं तदप्यनुचितं लोकविरुद्धञ्च । स्तनपतनावधीत्येतावतैव वाक्यपरिपूर्तेः कृतमित्यधिकमित्याह **अत्रेति** । पूर्वार्द्धे कृतपदाभावे उत्तरार्द्धे तत्करणं क्रमभङ्गपरमपि वक्ष्यमाणं दूषणमित्याह **प्रत्युतेति** । एवं दोषे सति किं कर्तव्यमित्याकाङ्क्षायामाह **तथा चेति** । पूर्वत्र तु प्रतीतिः साकाङ्क्षा अत्र तु पाठे न तथेत्यर्थः ।

तृतीयमुदाहरति **कथितमिति** । एकत्र वृत्ते यदेकं पदं द्विः प्रयुज्यते तत्कथितं कथितपदमित्यर्थः । काचित्सखी काञ्चित्प्रत्याह, हे सुतनु ! तव करतलशयने विरचितशयनलीलापरिमिलनेन निमीलत्पाण्डिमा यत्र एतादृशी गण्डपाली कपोलस्थली कस्य नृपस्य कामनृपक्रीडायौवराज्याभिषेकं अञ्जसैव सम्यगेव व्यञ्जयति, कथय । अत्र लीलेतिपदं द्विः प्रयुक्तम् अतो दोषः । "नैकं पदं द्विः प्रयोज्यमिति" वचनात् । स्मरनरपतिलक्ष्मीति पाठे नायं दोष इत्याशयेनाह अत्रेति ।

पतन् पादात्पादमवरोहन् प्रकर्षो बन्धच्छायाकृतो यत्र तत्पतत्प्रकर्षम् । तदुदाहरति **पतदिति** । घुर्घुरायिता घुर्घुरशब्दं कुर्वती या घुरी पोत्रं तया घोरः कः कः सूकरः कुत्र न घुरेत् ? शब्दं कुर्यात् । कःकः करी कं कमलाकरं विकमलं कमलरहितं कर्त्तुं नोद्यतः ? के के अरण्यमहिषाः कानि वनानि नोन्मूलयेयुः ? यतः पञ्चाननः सिंहीस्नेहविलासेन बद्धा वसतिर्येन एवंविधो वर्तते । अत्र सूकराद्यभिधाने विकटवर्णरूपः प्रकर्षः कृतः । सिंहाभिधाने न कृत इति पतत्प्रकर्षत्वमित्यर्थः ।

सारबोधिनी—न्यूनपदमिति । न्यूनपदमधिकपदं कथितपदमिति पदपदस्य प्रत्येकमन्वयः । न्यूनपदमित्यत्र पदपदं वाचकपरम् । तथा च द्योतकन्यूनत्वे अनभिहितमिति वाच्यं बोद्धव्यम् । **अनुपात्तविवक्षितान्वयप्रतियोग्युपस्थापकं न्यूनपदम्** । **अत्रेत्यादि** । वल्कलधरत्वविशेषणस्य विशेष्यसाकाङ्क्षत्व-

मावश्यकमित्याह **अस्माभिरिति** । **इत्थमित्यादि** । तदेव मात्सर्यानौचित्यम् । इत्थं तथाभूतपाञ्चालतनया-दर्शनादिभिः ।

अधिकमन्वयाप्रतियोगिन उपस्थापकम् । **स्फटिकेति** । **प्रतिमल्लेति** । प्रतिमल्लास्तमयस्य उदयो यतस्तन्मय उदयो वा यत्रेत्यर्थः । **अत्राकृतिशब्द** इति । अधिक इति सम्बन्धः । निर्मलतायाः स्फटिकपदेनैव प्राप्तत्वात् ।

इदमिति । अनुचितं लोकविरुद्धम् । अक्रमः शास्त्रविरोधः । शैशवयौवनजरासु विद्यासेवन-विषयोपभोगधर्मा इति हि शास्त्रम् । अवधिः सीमा । **कृतमितीति** । अधिकमित्यनुपज्यते । तेन कृतमधिकं कृतमित्यर्थः । तद्विनापि निराकांक्षप्रतिपत्तेः सम्भवात् । यद्वा कृतमित्यस्य प्रत्युतेत्यादिनान्वयः । दोषान्तरमाह **कृतं प्रत्युतेत्यादि** । पूर्वार्द्धे क्रियापदं त्रिर्नैवारम्भात् । यद्वा स्त्रीपुरुषयोरनौचित्याभिधानं हि प्रस्तुतम्, विधेरनौचित्याभिधाने तद्भङ्गः । तेनास्य विवक्षितान्वयप्रतियोगित्वं नास्तीति ध्वनितम्' अधिकत्वे त्वाकाङ्क्षाविरहः स्फुट एव दूषकताबीजम् ।

कथितपदमाह **अधीत्यादि** । परिमिलनं हठबन्धः । निमीलन् तिरोभवन् । करस्य हठबन्धनेन रक्तिमोदयात् विरहपाण्डिमतिरोधानम् । पाली स्थली । अञ्जसा तत्त्वतः कथयेति संबन्धः । नरपतिलीला नृपतिचातुर्यम् । अवश्यस्य वश्यतापादान तत्र युवराजत्वम् । वृद्धस्मरस्य तत्र कर्मण्यक्षमतया यूना तन्निर्वाहणम् । नृपतिचातुर्ये स्मरकर्तृके यौवराज्याभिषेकं व्यञ्जयतीत्यन्वयः । एतेन स्मरादपि वशी-करणकर्तृत्वावगमः । **अत्रेति** । लीलेति कथितपदमिति संबन्धः । द्विःप्रयुक्तमेकं पदमुद्देश्यप्रतिनिर्देश्य-विधयार्थयोरभेदप्रत्यभिज्ञानजननैयत्येन या स्वापलीला तत्रैव यौवराज्यमिति प्रत्ययमुत्पादयति, प्रकृते तु न तद्विवक्षितमिति । दूषकताबीजं तु सत्यप्यर्थभेदतात्पर्ये पदैकत्वदोषादर्थैक्यप्रतिभासः । केचित्तु, एकस्यैव पदस्य द्वितीयवारोपादानं पिष्टपेषणवदचमत्कारीत्याहुः । तन्न, अनवीकृतत्व-साङ्कर्यापत्तेः ।

पततप्रकर्षमाह**कः क इत्यादि** । कः कः कुत्र न? अपि तु सर्वत्र । **घुर्घुरः शब्दभेदः** । **घुरी घोणा** । अत्रानुप्रासकृतस्य प्रकर्षस्य पतनं व्यक्तमेव । अत्र पूर्वापेक्षयोत्तरत्र बन्धशैथिल्यमेव दूषकताबीजमिति ।

समाप्तपुनरात्तं यथा

क्रेङ्कारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां रवः
झङ्कारो रतिमञ्जरीमधुलिहां लीलाचकोरीध्वनिः ।
तन्व्याः कञ्चुलिकापसारणभुजाक्षेपस्खलत्कङ्कण–
क्वाणः प्रेम तनोतु वो नववयोलास्याय वेणुस्वनः ॥२२५॥

बालचित्तानुरञ्जनी—समाप्तं संपूर्णं वाक्यं भूयः आत्तं स्वीकृतं तद्दूषणम् । तदुदाहरति । कामचापस्य क्रेङ्कारः शब्दविशेषः । सुरतक्रीडा एव कोकिलाः तासां रवः । रतिरेव मञ्जरी तस्यां मधुलिहां झाङ्कारः । लीलैव चकोरी तस्याः ध्वनिः । वयः तारुण्यं तस्य लास्याय वेणुशब्दः । एवंविध-स्तन्व्याः कान्तायाः कञ्चुलिकापसारणे यद्भुजलताचालनं तेन स्खलत्कङ्कणानां शब्दः युष्माकं प्रीतिं करोतु । अत्र तनोतु व इत्यन्ते वाक्ये परिसमाप्ते पुनः नवं वय इत्यादिरूपकान्तरोपादानं दूषणम् । तावतैव श्रोतॄणां चित्तविश्रान्तेः । नवं वय इत्यादेश्चमत्कारकारित्वाभावादित्यर्थः ।

सारबोधिनी—समाप्तपुनरात्तमिति । अत्र केचित्, समाप्तं वाक्यं पुनरात्तमित्यर्थ इति वदन्ति । तन्न । सर्वत्र वाक्यावयवस्यावर्त्तने वाक्यावृत्तेरसंभवात् । अन्ये तु वाक्ये समाप्ते जनितान्वयबोधे तदन्वये शब्दान्तरोपादानं अत्रेत्यर्थः । वस्तुतस्तु—विशेष्यं समाप्तं जनितान्वयबोधमनुत्कर्षकोपादानं विना पुनरात्त यत्रेति बोद्धव्यम् । तेन नववयोलास्याय गीतं तथेत्यनुत्कर्षकपदोपादानेनास्य दोषस्य प्रसङ्गः । तथाहि "विमलं जलं नद्याः कच्छे महिषश्चरती"त्यत्र सत्यपि कच्छान्वयतात्पर्ये तद्ग्राहकस्योपादानानुपादानाभ्यां दोषाभावदोषयोः प्रसर इत्यवधेयम् । तेनोत्थाप्याकाङ्क्षास्थलमस्य विषयः । तथा

अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन् कुपितकपिकपोलक्रोडताम्रस्तमांसि ।।

इत्यत्र विशेषणमर्यादया विशेष्यलाभस्थले अयंपदार्थस्य क्रियान्वयदशायां विनिगमनाभावात् सूर्यमात्रगामियावद्विशेषणसाकाङ्क्षत्वेन न समाप्तता । एवं "अद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिक" इत्यत्र प्रमाणाधिक्येनैव श्वासस्य वेपथुजननात् क्रियान्वयेऽपि न वाक्यसमाप्तिरिति न तत्रास्य दोषस्य प्रसङ्गः । तथाहि—वर्णमयो घटोऽस्ति सुन्दर इत्यत्र घटमात्रस्यावृत्तौ दोषो, न विशिष्टस्य जनितान्वयबोधत्वात् विशिष्टस्यान्वयितावच्छेदकत्वादिति ।

द्वितीयार्धगतैकवाचकशेषप्रथमार्धं यथा

मसृणचरणपातं गम्यतां भूः सदर्भा
विरचय सिचयान्तं मूर्ध्नि घर्मः कठोरः ।
तदिति जनकपुत्री लोचनैरश्रुपूर्णैः
पथि पथिकवधूभिर्वीक्षिता शिक्षिता च ।।२२६।।

बालचित्तानुरञ्जनी—अन्यदर्धम् अर्धान्तरम् तत्र एकं असहायभूतं वाचकशेषं पदं यस्मिन् वाक्ये तत् । तद्धि द्वितीयार्धगतैकवाचकशेषं प्रथमार्धम् । प्रथमार्धगतैकवाचकशेषं द्वितीयार्धमिति । तत्र प्रथममुदाहरति द्वितीयेति । हे सीते । यत् यस्मात् कारणात् भूः सदर्भा, तत् तस्मात् कारणात् लघुचरणपातं यथा तथा गम्यतां यस्मात् घर्मः कठोरः तत् मूर्ध्नि वस्त्रान्तं स्थापय । पथि पथिकवधूभिः

जनकपुत्री इति शिक्षिता । अश्रुपूर्णैर्लोचनैः वीक्षिता च । अत्र तदिति पदं प्रथमार्धशेषम् । तच्च द्वितीयार्धं उपात्तमिति दोष इत्यर्थः ।

"वक्षःस्थलं मुकुन्दस्य कौस्तुभाङ्कं कपर्दिनः ।
चूडालो बालचन्द्रेण जटाजूटश्च पातु वः ॥"

इत्यत्र पूर्वार्धगतैकवाचकमुत्तरार्धमिति द्रष्टव्यम् ।

सारबोधिनी—द्वितीयेति । द्वितीयेऽर्द्धे गतं एकमद्वितीयम्, तेनार्धान्तरेऽप्यनेकपदोपादाने नायं दोषः, यद्वा द्वितीयेऽर्द्धे गतं एकमन्वितं वाचकानां पदानामर्थात् प्रथमार्धसंबन्धिनाम् शेषं यत्किञ्चिदवशिष्टं प्रथमार्धाकाङ्क्षितं यत्र एवम्भूतं प्रथमार्द्धम् । द्वितीयार्धान्वयप्रतियोगिनः पदस्य प्रथमार्द्धगतत्वे प्रागेव तदुपस्थितेरन्वयबोधे विलम्बो न । यथा—

"वक्षःस्थलं मुकुन्दस्य कौस्तुभाङ्कं कपर्दिनः ।
चूडालो बालचन्द्रेण जटाजूटश्च पातु वः" ॥ इति ।

तद्वारणाय प्रथमद्वितीयपादाभ्यामर्धं विशेषितम् । **मसृणेत्यादि** । भूः सदर्भा तन्मसृणचरणपातं गम्यताम् । एवमुत्तरत्रापि । अत्र परार्धपतितस्य तत्पदस्य विलम्बेनोपस्थित्याऽन्वयबोधविलम्ब इति दूषकताबीजम् । अत्र केचित्, भूसदर्भत्वमसृणचरणपातयोः कठोरघर्मत्वमूर्धावगुण्ठनयोश्च हेतुहेतुमद्भावेनान्वयोपपत्तौ किं तच्छब्दापेक्षणेन । तदिति पुनरखण्ड एव निपातः प्रागुक्तपरामर्शकः । तथा च, 'भूः सदर्भे'त्यत्रार्थंहेतुत्वम् तथोत्तरत्रापीति नात्र दोष इति वदन्ति । तन्न । शाब्दी ह्याकांक्षा शब्देनैव पूर्यत इति न्यायाच्छाब्दे हेतुत्वे संभवत्यार्थत्वस्यान्याय्यत्वात्, तदित्यखण्डनिपाते प्रमाणाभावाच्च । वाक्यान्तरान्तःपातविरहान्न सङ्कीर्णसाङ्कर्यम् ।

अभवन् मतः (इष्टः) योगः (सम्बन्धः) यत्र तत् । यथा

येषां तास्त्रिदशेभदानसरितः पीताः प्रतापोष्मभि–
र्लीलापानभुवश्च नन्दनवनच्छायासु यैः कल्पिताः ।
येषां हुंकृतयः कृतामरपतिक्षोभाः क्षपाचारिणां
किं तैस्त्वत्परितोषकारि विहितं किञ्चित्प्रवादोचितम् ॥१२७॥

अत्र "गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यात्" इत्युक्तनयेन यच्छब्दनिर्देश्यानामर्थानां परस्परमसमन्वयेन यैरित्यत्र विशेषस्याप्रतीतिरिति । "क्षपाचारिभिः" इति पाठे युज्यते समन्वयः ।

बालचित्तानुरञ्जनी—अभवन् अविद्यमानः मतः इष्टः संयोगः सम्बन्धो यत्र । तदुदाहरति । येषां क्षपाचारिणां प्रतापोष्मभिः ताः प्रसिद्धाः त्रिदशेभदानसरितः पीताः, यैश्च चन्दनतरुच्छायासु लीलापानभुवः कल्पिताः, येषां हुंकृतयः कृतामरपतिक्षोभाः तैः क्षपाचरैः त्वत्परितोषकारि प्रवादोचितं किञ्चिद्विहितं किम् ? अत्र च, 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्यादि'ति जैमिनीयसूत्रेण "अरुण्या पिङ्गाक्ष्या गवा सोमं क्रीणाती"त्यत्र गुणानामारुण्यादीनां क्रयार्थतया समन्वयः, न त्वन्योन्यम् गुणत्वेन समत्वादिति प्रतिपादितम् । अतस्तन्न्यायेनात्रापि यच्छब्दनिर्दिष्टानां गुणानामन्योन्यान्वयाभावादेव क्षपाचारिणामित्यस्य यैरित्यनेन सम्बन्धाभावाद्विशेष्यत्वाप्रतीतेरिति दूषणमित्याह **अत्रेति**। गुणानां विशेषणानामित्यर्थः । कीदृशे पाठे समन्वय इत्याकाङ्क्षायामाह **क्षपाचारिभिरिति** ।

सारबोधिनी—अभवन्निति । विवक्षितसंबंधबोधं प्रति स्वरूपायोग्यत्वमित्यर्थः । तेन विधेयाविमर्शे नातिव्याप्तिः । तत्र रचनान्यथात्वे विवक्षितसंबंधबोधोपपत्तेः । तत्र वैभक्तिकोऽन्वयबोधो भक्त्यैवात्र तु सोऽपि नेति विशेषाच्च । **येषामित्यादि** । दानं मदजलम् । ऊष्मणो नदीशोषणमुचितम् । तस्य रावणस्य परितोषजनकं प्रवादोचितं सदसि कथनयोग्यम् । **अत्रेति** । गुणत्वमप्रधानत्वम् । विशेषणत्वमिति यावत् । परार्थत्वात् विधेयार्थत्वात् । तथा च परप्रयोजनप्रवृत्तानां तेषां गुणत्वेन समत्वादन्योन्यं विशेषणविशेष्यसम्बन्धाभावे यैरित्यत्र विशेष्यत्वप्रतीतिर्न स्यात् इत्यर्थः । यैरिति क्षपाचारिणामिति पदयोर्विभिन्नविभक्तिकयोरभेदान्वये स्वरूपायोग्यत्वात् । केचित्तु, परस्परसमन्वय इति पाठं स्वीकृत्य परस्परसमन्वये एकविशेष्यसंगतिरूपे, अन्यथा वाक्यभेदप्रसङ्गादित्यर्थमाहुः । ननु तृतीयान्तपाठकल्पनेऽपि षष्ठ्यन्तानन्वयतादवस्थ्यमिति चेन्न । यावदर्थपरामर्शकतत्पदेन सह क्षपाचारिभिरित्यस्य विशेषणविशेष्यभावोपपत्तौ सकलयदर्थ-क्षपाचारिणोरर्थभेदान्वयस्य न्याय्यत्वात् । तदाह **युज्यत इति** ।

यथा वा

त्वमेवंसौन्दर्या स च रुचिरतायाः परिचितः
कलानां सीमानं परमिह युवामेव भजथः ।
अपि द्वन्द्वं दिष्ट्या तदिति सुभगे संवदति वाम्
अतः शेषं यत्स्याज्जितमिह तदानीं गुणितया ॥२२८॥

अत्र यदित्यत्र तदिति तदानीमित्यत्र यदेति वचनं नास्ति । 'चेत्स्यात्' इति युक्तः पाठः ।

बालचित्तानुरञ्जनी—**अत्रे**वोदाहरणान्तरमाह **त्वमेवमिति** । त्वमेवंसौन्दर्य्या अनुपमनीया अभिरूप्या । स च नायकः रुचिरतायाः परिचितः । इह युवामेवं कलानां परं सीमानं परां काष्ठां भजथः । हे सुभगे ! वां इति । एवंविधं तद् द्वन्द्वं दिष्ट्या संवदत्यपि । अतः शेषं अधिकं यत् तत् यदास्यात्तदानीं गुणितया जितं स्यात् तन्नाम्नीत्यर्थः[?] । अत्र यदित्यत्र तदित्यभावात्, तदानीमित्यत्र यदेत्यभावात् इष्टः सम्बन्धो न सिद्धयति । अतः अभवन्मतयोगो दूषणमित्याह **अत्रेति** । अतः शेषं यत् तत् यदा स्यात्तदानीं गुणितया जितमिति सम्बन्धः इष्टः, तदकरणादित्यर्थः । न च न्यूनपदत्वं दूषणमिति अभवन्मतोदाहरणं

न भवतीति वाच्यम् । पदानां संभवेन अभवन्मतयोगस्यैव विवक्षितत्वात् । तर्ह्यत्र कस्मिन् पाठे दोषाभाव इत्याकाङ्क्षायामाह चेदिति । अतः शेषं चेत्स्यादिति पाठे चेच्छब्दस्य यद्यर्थत्वेनाकाङ्क्षाभावादित्यर्थः ।

सारबोधिनी--प्रपञ्चयति **यथा वेति** । **त्वमिति** । एवमनुभवमात्रगोचरं विशिष्य कथयितुमशक्यं सौन्दर्यं यस्याः । रुचिरता मनोहारिता । अपिः संभावने । वां युवयोः । दिष्ट्या भाग्येन । संवदति योग्यं भवति । शेषं सङ्गमरूपम्, प्रेमरूपं वा । गुणिता गुणवत्ता । यदित्यत्रेति । यदिति स्यादिति क्रियाविशेषणम् । यच्छेषभवनं स एव गुणिताया जयः । अत्र तत्पदानुपादाने मतयोगे स्फुटमेव स्वरूपायोग्यत्वम् । न च न्यूनपदत्वम् । तदः प्रकृतेरुपादानात् । प्रकृतिप्रत्यययोर्द्वयोरनुपादान एव तथात्वादिति केचित् । अन्ये तु, न्यूनत्वनिबन्धनमेतदिति दर्शयितुं लक्ष्यान्तरोपादानमिति तर्हि न्यूनपदस्यात्रानुप्रवेशः स्यादिति चेन्न । आक्षेपादिनापि कदाचिदन्वयबोधसंभवात्तत्र स्वरूपायोग्यत्वविरहादिति ।

यथा वा

सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत्समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ॥२२६॥

अत्राकर्णनक्रियाकर्मत्वे कोदण्डं शरान् इत्यादि वाक्यार्थस्य कर्मत्वे कोदण्डः शरा इति प्राप्तम् । न च यच्छब्दार्थस्तद्विशेषणं वा कोदण्डादि । न च केन केनेत्यादि प्रश्नः ।

बालचित्तानुरञ्जनी--अत्रैवोदाहरणान्तरमाह **यथा वेति** । हे देव ! सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते सति येन येन सहसा यद्यत्समासादितं प्राप्तं तत्तदाकर्णय । कोदण्डेन धनुषा शराः सङ्गताः । शरैः अरिशिरः सङ्गतम् । तेनापि शिरसा भूमण्डलं सङ्गतम् । तेन भूमण्डलेन त्वं सङ्गतः । भवता च अतुला कीर्तिः सङ्गता । कीर्त्या च लोकत्रयं व्याप्तम् । अत्र प्रथमार्धे तदाकर्णयेति विधिवाक्यम्, येन येनेत्यादिकमुद्देश्यवाक्यम् । अत्र द्वितीयार्धगतं "कोदण्डेन शरा" इत्यादिवाक्यं किं विधिवाक्यान्तर्भूतम् उद्देश्यवाक्यान्तर्भूतं वा ? केन केन किं किं समासादितमित्याकाङ्क्षायां पृथग्वाक्यं वा ? आद्येऽपि पदार्थमात्रस्य आकर्णनं प्रति कर्मत्वम् उत पदार्थसमुदायभूतस्य वाक्यार्थस्य, आहोस्वित् परस्परान्वितपदार्थसमुदायस्येति विकल्प्याद्यं दूषयति **अत्रेति** । आकर्णनक्रियाकर्मत्वे "कर्मणि द्वितीये"ति द्वितीयैव स्यात्, न तु तृतीयादिरित्यर्थः । द्वितीयं दूषयति **वाक्यार्थस्येति** । समुदायस्य कर्मत्वेऽपि प्रत्येकमकर्मत्वात् द्वितीयानुपात्तावपि प्रातिपदिकार्थमात्रस्य विवक्षितत्वात् सर्वत्र प्रथमैव स्यादित्यर्थः । नापि तृतीयः । कोदण्डेनासादितान् शरान् आकर्णयेत्यादिप्रयोगप्रसङ्गादिति द्रष्टव्यम् । द्वितीयेऽपि, कोदण्डादिर्यच्छब्दार्थो वा यच्छब्दार्थविशेषणं वा ? यच्छब्दार्थविशेष्यं वेति विकल्प्याद्यं दूषयति

न च यच्छब्दार्थं इति । कोदण्डादौ यच्छब्दस्य सङ्केताभावादित्यर्थः । द्वितीयं दूषयति **तदिति** । **न** चेत्यनुषज्यते । कोदण्डादिना येन येन शरादिकं यद्यत्समासादितं तत्तदाकर्णयेत्युक्ते राकर्णनीयान्तराभावेनासङ्गतत्वप्रसङ्गादित्यर्थः । न तृतीयः, उक्तदोषानुषङ्गादिति द्रष्टव्यम् । तृतीयं दूषयति **न चेति**। श्लोके केन केनेति प्रश्नाभावात् उत्तरार्धगतकोदण्डादिपदानामाकाङ्क्षाभावेनानन्वयात् । अतः अभवन्मतयोगत्वमित्यर्थः । ननु येन येन समासादितं तत्तदाकर्णय यद्यत्समासादितं तत्तदाकर्णयेति वक्तुमुपक्रान्तत्वात् निर्विशेषं न सामान्यमिति न्यायेनं प्रश्नं विना विशेषनिष्ठतया कोदण्डादेरवक्तव्यत्वादिति दूषणोदाहरणत्वं चिन्त्यम् ।

सारबोधिनी—वाक्ययोरसंबन्धमाह **सङ्ग्रामेति** । सुखसञ्चारेणाङ्गणत्वम् । **अत्रेति** । आकर्णयेति क्रियायाः कर्मान्तिरानुपादानात्तु पदार्थानां वाक्यार्थस्य वा कर्मत्वं वक्तव्यम् । तत्र क्रमात् बाधकमाह **कोदण्डं शरानिति** । तेषां यत्पदार्थत्वेनाकर्णनीयत्वात् । कोदण्डः शराः इति शुद्धप्रातिपदिकार्थे प्रथमाविभक्ते रनुशासनात् । माहिषं दधि सशर्करं पय इतिवत् । ननु यच्छब्दानां कोदण्डादिशब्दानामपि कोदण्डादय एव अर्थाः । ततश्च येन येन इत्यादिभिः कोदण्डादयो यथा प्रत्यायिताः कोदण्डेत्यादिभिरपि तथैव प्रत्यायितव्या इति कर्तृकर्मत्वप्रतीतये यत्पदेभ्य इव कोदण्डादिपदेभ्योऽपि तृतीयादयो युक्ता इत्याशङ्क्य निराकरोति **न च यच्छब्दार्थं इति** । यदि यच्छब्देभ्यः कोदण्डत्वादिरूपेण कोदण्डादिकर्तृकशरादिकर्मकासादनावगमः तदा कोदण्डेत्यादिवैकल्यप्रसङ्गात् । यथा घटो घट इतिवत् । अथ यो घटस्तमानयेत्यत्र घटपदस्य तात्पर्यग्राहकत्वेन संभेदाद्यथा न वैयर्थ्यं तद्वदत्रापि स्यादित्याशङ्क्य निराकरोति **तद्विशेषणं वेति** । न चेत्यनुषञ्जनीयम् । स एव विशेषणं यत्रेति विग्रहस्तेन यैरित्यत्र विशेष्यस्याप्रतीतिरिति ग्रन्थस्य न विरोधः । विशेषणविशेष्यभावेनैव संभेदः । न च प्रकृते यथा येन शरा यच्छरा इत्यसङ्गतेः, विशेषणविशेष्ययोस्समानविभक्तिकवचनस्यौत्सर्गिकत्वात् । अथ येन यद्यत्समासादितमिति वाक्यार्थे अपर्यवसिते केन केनेत्यादिप्रश्ने कोदण्डाभिधानं भविष्यतीत्याशङ्क्य निषेधयति **न च केन केनेत्यादि** । आदिशब्दात्किं किमित्यस्य परिग्रहः । न च न कथं प्रश्नस्तस्य संवेदकाभावात् । न चोत्तरस्यैव प्रश्नोन्नायकता, कोदण्डेत्यादेः प्रश्नं विनैव स्वार्थपर्यवसानात् । अन्यथा सिद्धस्वार्थापर्यवसान एव तदुन्नायकत्वात् । यथा—

गम्यतामन्यतः पान्थ तवेह वसतिः कुतः ।
दोषाय स्यादलं यस्माद्वसतिः प्रोषितालये ॥

इत्यत्र भो गृहिणि वासं देहीति याचनं विना तवेह वसतिः कुतः इति प्रतिवचनानुपपत्तेः । प्रकृते तु न तथेति न प्रश्नोन्नयनम् । कोदण्डेत्यादेः प्रश्नोन्नायकत्वे येन येनेत्यादिवैयर्थ्याच्च । तस्माद्येनयेनेत्यादिना कादण्डादिव्यतिरिक्ते एव कर्तृकर्मणी प्रतीयेते इति मतयोगाभाव इति टीकाकृतः ।

नवीनास्तु, येन येन यद्यदिति सामान्याभिधानस्य केन केनेत्यादिप्रश्नोत्थापकत्वनैयत्येन प्रश्नस्य पूर्वसिद्धत्वेऽप्येवंरीत्या मतयोगविरहो बोध्यः । तथाहि कोदण्डेत्यादिना कर्तृकर्मणोरेवाभिधानं, न तु क्रियायाः । एतच्च क्रियाविनिर्मुक्तकर्तृकर्मगोचरप्रश्ने सत्येव संभवति न च तथा । क्रियासंवलितपूर्ववाक्योत्थापितप्रश्नस्य क्रियासंवलनावश्यकत्वात् । संवलनं शाब्दमार्थञ्चेति परिग्रहः । निष्क्रियोत्तरेण

च क्रियाकाङ्क्षाया अनिवृत्तेरित्याह न च केन केनेत्यादीति । आदिपदात्तु क्रियां विहाय किं किमित्यस्य परिग्रहः । तथा च समासादनक्रियानुपादानात् कोदण्डादिकर्तृकर्मणोः परस्परमन्वये मतयोगविरहः । न चोपस्थितसमासादनेनान्वयः, तस्य पर्यवसितत्वात् । न च कोदण्डादिकारकपदानां क्रियापदसाकाङ्क्षत्वादावृत्तिः । बहुत्वपुंस्त्वस्त्रीत्वान्वितानां शरादिपदानां नपुंसकत्वैकान्वितसमासादितक्रियापदं प्रति अयोग्यत्वेन निराकाङ्क्षत्वात्, आकाङ्क्षाया एवावृत्तिबीजत्वात् । अतएव नपुंसकानपुंसकयोर्नपुंसकवद्वेति सर्वत्रैकत्वनपुंसकत्वाभ्यामन्वय इति निरस्तम् । आवृत्त्यभावेन पदज्ञानाभावात् पदार्थानुपस्थितावेकरूपेणान्वयविरहात् । अत एवायमेव श्लोकः—संप्राप्ते परिपन्थियोधनिवहे सांमुख्यमासादितमिति द्वितीयपादं कृत्वा मालादीपके उदाहृतः । अत्र पर्यवसितः समासादनत्वस्य नपुंसकत्वेनैकत्वेन च सर्वत्र परत्रान्वय इत्याहुः ।

यथा वा

चापाचार्यस्त्रिपुरविजयी० ।। २३० ।। इत्यादौ भार्गवस्य निन्दायां तात्पर्यम् । कृतवतेति परशौ सा प्रतीयते । कृतवत इति तु पाठे मतयोगो भवति ।

सारबोधिनी—वस्तुतस्तु उक्तापरितोषादुदाहरणान्तरमाह चापाचार्य इति । इयं युयुत्सुं भार्गवं प्रति रावणस्योक्तिः । अत्र रावणस्य भार्गवेण सह युद्धमनभिलषितमिति तदुपेक्षा वाक्यार्थः । सा च न प्रतीयते, परशुनिन्दायां भार्गवस्यानुपेक्षणीयत्वात् । कृतवतेत्यस्य परशुविशेषणत्वेन परशुनैव तदर्थाभिसंबन्धात्तत्रैव निन्दा प्रतीयते । न च तथा सति सङ्गतिरिति भावः । मतयोग इति । भार्गवनिन्दायोगरूप इत्यर्थः । न च परशुनिन्दामुखेनैव भार्गवनिन्दाया अधिकचमत्कारित्वमेवञ्च मतयोग इत्यत्र अमतयोग इति कस्यचिद् व्याख्यानमादरणीयमिति वाच्यम् । अस्त्रनिन्दायामप्यस्त्रिणोऽनिन्दितत्वात् सर्वत्र पाठकल्पनाया दोषोद्धारत्वाच्च ।

यथा वा

चत्वारो वयमृत्विजः स भगवान् कर्मोपदेष्टा हरिः
सङ्ग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता ।
कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलं
राजन्योपनिमन्त्रणाय रसति स्फीतं हतो दुन्दुभिः ।।२३१।।

अत्राध्वरशब्दः समासे गुणीभूत इति न तदर्थः सर्वैः संयुज्यते ।

बालचित्तानुरञ्जनी—उदाहरणान्तरमाह यथेति । भीमस्य वचनम् । चत्वारो वयं भीमादयः ऋत्विजः । स प्रसिद्धः भगवान् हरिः कर्मोपदेष्टा । नरपतिः युधिष्ठिरः सङ्ग्रामाङ्गणाध्वरदीक्षितः । पत्नी गृहीतव्रता । कौरव्याः पशवः । प्रियापरिभवक्लेशोपशान्तिः फलम् । यशोदुन्दुभिः राजन्योपनिमन्त्रणाय स्फीतं यथा स्यात्तथा रसति शब्दं करोति ।

सारबोधिनी—वस्तुतस्तु– परशुनिन्दाया अप्रतीतौ परशुना बद्धस्पर्द्धो लज्जते इत्यसङ्गतं स्यादित्यस्वरसादाह **चत्वार इति**। भीमार्जुननकुलसहदेवाश्चत्वारः। हतो दुन्दुभिः स्फीतं स्निग्धम् रसति। ताडने स्निग्धशब्दोदयात् जयसूचनम्। यशोदुन्दुभिरिति वा पाठः। प्रिया द्रौपदी। कौरव्या दुर्योधनादयः। राजन्यं राजसमूहः। **अत्रेति**। समासप्रविष्टस्यान्येन सहाकाङ्क्षाविरहात् ऋत्विगादीनामध्वरपदार्थेन सहान्वये भवत्येवाभवन्मतयोगः। न चात्र 'प्रिये, रणयज्ञः प्रवर्तत' इत्यनेनान्वय इति वाच्यम्। तथा सति सङ्ग्रामाध्वरशब्दस्य पुनरुक्तत्वं स्यादिति। वस्तुतस्तु—क्रुद्धस्योक्तौ पुनरुक्तत्वं गुण एवेति।

यथा वा

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः।
भर्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापी–
संभूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः ॥२३२॥

अत्र दण्डपादगता निजतनुः प्रतीयते भवान्याः संबन्धिनी तु विवक्षिता।

बालचित्तानुरञ्जनी—उदाहरणान्तरमाह **यथेति**। जङ्घाकाण्डमेव ऊरुनालं यस्य। नखकिरणा एव लसत्केसराः, तेषां आल्यः[ताभिः]करालः प्रत्यग्रं नूतनं यत् अलक्तकं तस्य आभाः कान्तय एव प्रसरन्ति किसलयानि यस्य। मनोहरमञ्जीर एव भ्रमरो यत्र। निजा या तनुः तस्याः स्वच्छं यल्लावण्यं तदेव वापी तस्याः अम्भोजशोभां विदधत्, एवंविधः भर्तुः शम्भोः नृत्तानुकारे भवान्याः सुन्दरः दण्डाकारः पादो जयति। अत्र गुणभूताया अपि भवान्याः निजतनुरिति संबन्धः विवक्षितः कविना। स न प्रतीयते दण्डपादेनैव प्रधानेन संबन्धस्य प्रतिभासनात्। निजतनुशब्दयोः कर्तृपरत्वादित्यभवन्मतयोगत्वमित्याह **अत्रेति**।

सारबोधिनी—**भवानीत्यादि**। निजस्वात्मादिशब्दानां प्रधानक्रियान्वयित्वव्युत्पत्तेः न भवानीगतत्वावगतिः।

अवश्यवक्तव्यमनुक्तं यत्र। यथा

अप्राकृतस्य चरितातिशयैश्च दृष्टैरत्यद्भुतैरपहृतस्य तथापि नास्था।
कोऽप्येष वीरशिशुकाकृतिरप्रमेयसौन्दर्यसारसमुदायमयः पदार्थः ॥२३३॥

अत्र "अपहृतोऽस्मि" इत्यपहृतत्वस्य विधिर्वाच्यः, तथापीत्यस्य द्वितीयवाक्यगतत्वेनैवोपपत्तेः।

बालचित्तानुरञ्जनी—अनभिहितं अवश्यवक्तव्यं सत् अनुक्तं वाच्यं यत्रेति समासमाह **अवश्येति**। तदुदाहरति **यथेति**। अप्राकृतस्य लोकोत्तरस्य रावणस्य दृष्टैः अत्यद्भुतैः चरितातिशयैः कैलासचालना-

दिभिः अपहृतस्य मम तथापि नास्था। अप्रमेयाणां अचिन्तनीयानां महानुभावतासंबन्धिनां उत्कृष्टाशयानां यः समुदायरूपः पदार्थः वीरबालकाकृतिः, कोऽप्येप रामचन्द्राख्यो वर्तते। तत्रैवास्थेत्यश्री[?]। अत्रापहृतोऽस्मीति पृथक् वाक्यं कार्यम्, अन्यथा एकवाक्यतापातात्। तथा च सति तथापीत्यस्यानर्थक्यं स्यादित्यनभिहितवाच्यमेतदित्याह अत्रेति।

सारबोधिनी—अनभिहितवाच्यमिति व्याचष्टे अवश्येति। अनभिहितं वाचकपदातिरिक्तत्वमवश्यं वाच्यं यत्र तदित्यर्थः। वाचकानभिधाने न्यूनपदत्वाभिधानात्। अप्राकृतस्येति। यत्किञ्चित्कौतुकानाकृष्टस्य अपहृतस्य वशीकृतस्य। दृष्टैश्चेति भिन्नक्रमश्चकारः तेन श्रुतैरिति समुच्चीयते। अन्यस्मादन्यचरितश्रवणदर्शनाभ्यां वशीकृतस्यापि ममान्यादृशस्य माहात्म्यस्य दर्शनात् नास्था अनादर इत्यर्थः। अपहृतोऽस्मीति विधिस्वरूपकथनम्। अस्मीत्यहमर्थे। तथापीति। अत्र हि तदः प्रक्रान्तवाचित्वं प्रक्रान्तत्वं पूर्वप्रतीतत्वमित्येकवाक्यतयान्वये तदभावः स्फुट एव। ननु विधेयाविमर्श एवायमिति, चेन्न। विधेयाविमर्शमात्रस्यादोषत्वात्। **तथापीति**। यदा सङ्गतिप्रयुक्तस्य तथात्वात्। तदनुरोधेनैवापहृतत्वस्य विधेयत्वाङ्गीकारत्वात्।

यथा वा

एषोऽहमद्रितनयामुखपद्मजन्मा प्राप्तः सुरासुरमनोरथदूरवर्ती।
स्वप्नेऽनिरुद्धघटनाधिगताभिरूपलक्ष्मीफलामसुरराजसुतां विधाय॥२३४॥

अत्र मनोरथानामपि दूरवर्तीत्यप्यर्थो वाच्यः। यथा वा

त्वयि निबद्धरतेः प्रियवादिनः प्रणयभङ्गपराङ्मुखचेतसः।
कमपराधलवं मम पश्यसि त्यजसि मानिनि दासजनं यतः॥२३५॥

अत्र 'अपराधस्य लवमपि' इति वाच्यम्।

बालचित्तानुरञ्जनी—उदाहरणान्तरमाह **यथा वेति**। उषा नामाप्यचिन्त्यासुता लोके पुराणप्रसिद्ध्या बाणासुरपुत्रीति प्रसिद्धा। तद्वयं वरे प्रसिद्धिं श्रुतवतः समागतस्य पार्वतीमुखोत्पन्नस्य कस्यचित् गौर्याः सुत इति ज्ञानानन्तरं वचनम्[?]। पार्वत्या मुखमेव पद्मं, ततो जन्म यस्य। सुरासुरमनोरथानामपि दूरवर्ती एषोऽहं स्वप्ने अनिरुद्धेन कामसुतेन, या घटना, तया अधिगतं प्राप्तं, आभिरूप्यलक्ष्म्याः सुरूपतासमृद्धेः फलं यया तां उषां असुरराजस्य बाणस्य सुतां विधाय सुतामिति ज्ञात्वा, प्राप्तः आगतः। अत्र मनोरथानामपीत्यपिशब्दार्थो वाच्यः। स च तत्प्रयोगादृते न स्यादित्यनभिहितवाच्यत्वमित्याह **अत्रेति**।

उदाहरणान्तरमाह **यथेति**। हे मानिनि! त्वयि बद्धरतेः प्रियवादिनः प्रणयभङ्गपराङ्मुखं चेतो यस्य तस्य मम कमपराधलवं पश्यसि? यतः दासजनं मां त्यजसि। पूर्ववदत्रापि अप्यर्थस्य वाच्यत्वम्, इतरथा स्थूलो ममापराधो न क्षुद्र इत्यनौचित्यापातात्। नैतत् न्यूनपदम्, प्रधानपदस्यात्र न्यूनत्वाभावात्। अतोऽनभिहितवाच्यत्वमेवेत्याह **अत्रेति**।

सारबोधिनी—ननु तथापि हृतस्येति पदस्य तथापिना सहान्वयबोधाक्षमतयाऽभवन्मतयोगः स्यादित्यस्वरसादुदाहरणान्तरमाह **यथा वेति**। इदं च विधेयाविमर्शसङ्कीर्णमपि न भवतीत्युदाहरणान्तर-दानबीजम्। **एष इति**। अनिरुद्धेन सह धटनया प्राप्तं सौन्दर्यं संपत्तिफलं यया। एवं निर्मायाहं प्राप्त इत्यन्वयः। **अप्यर्थो वाच्य इति**। अप्यर्थः समुच्चयः, न केवलं वहिरिन्द्रियादीनामित्येवंरूपः। स च अपेरनुपादानान्नोपपन्नः। तदाह **मनोरथानामपीति**। अन्यथा अपराधलवं न पश्यसि किन्तु महान्तमपराध-मिति प्रतीयेत्[?]।

अस्थानस्थपदं यथा

प्रियेण संग्रथ्य विपक्षसन्निधावुपाहितां वक्षसि पीवरस्तने।
स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुषु ॥२३६॥

अत्र "काचिन्न विजहौ" इति वाच्यम्।

यथा वा

लग्नः केलिकचग्रहश्लथजटालम्बेन निद्रान्तरे
मुद्राङ्कः शितिकन्धरेन्दुशकलेनान्तःकपोलस्थलम्।
पार्वत्या नखलक्ष्मशङ्कितसखीनर्मस्मितह्रीतया
प्रोन्मृष्टः करपल्लवेन कुटिलाताम्रच्छविः पातु वः ॥२३७॥

अत्र नखलक्ष्मेत्यतः पूर्वं "कुटिलाताम्र०" इति वाच्यम्।

बालचित्तानुरञ्जनी—अपदस्थपदसमासमित्यत्र प्रथमपदशब्दः स्थानवाची। अस्थानपदं अस्थानसमासञ्चेति द्विविधम्। तत्राद्यमुदाहरति **अस्थानेति**। काचित्कामिनी प्रियेण सपत्नीसन्निधौ संग्रथ्य स्थूलस्तने वक्षसि प्रक्षिप्तां जलम्लानामपि स्रजं न परिकल्पितवती। हि यस्मात् कारणात् गुणाः प्रेम्णि वसन्ति, न वस्तुनि। अत्र न काचिदिति निर्देशेन, न काचिद्विजहौ किन्तु सर्वा एव विजहुरिति वाक्यार्थस्यासमञ्जसत्वप्रसङ्गः, नञः पूर्वभावित्वेन विशिष्टे निषेधाप्रतीतेः। काचिन्न विजहावित्युच्यमाने एकैव विजहाविति प्रतीयते, क्रियामात्रस्यैव निषेधात् इत्यस्थानपतितमेतदित्याह **अत्रेति**।

उदाहरणान्तरमाह **यथा वेति**। निद्रान्तरे क्रीडया यः कचग्रहः तेन श्लथा या जटा तस्यां लम्बो लम्बनं यस्य तेन नीलकण्ठशिरःस्थितचन्द्रखण्डेन। अन्तःकपोलस्थलं पार्वत्याः गण्डस्थले लग्नः। नखकृतमेत-दिति शङ्किता या सखी तस्याः यन्नर्मस्मितं क्रीडाहास्यं तेन लज्जितया पार्वत्या करपल्लवेन हेतुना प्रोन्मृष्टा कुटिला ताम्रच्छविः मुद्राङ्कः वः पातु। कदाचित् रात्रौ प्रणयकलहेन शिवस्य जटाग्रहणेन तत्स्थं चन्द्रखण्डं हस्ते समागतं कपोलतले संस्थाप्य निद्रां कृतवती भवानी। ततः प्रातः समये चन्द्रमुद्राङ्कित-

कपोलदर्शनेन नखक्षतमेतदिति शङ्कमाना सखीहासेन लज्जिता अभवदित्यर्थः । अत्र हरशिरश्चन्द्रशकल-मुद्राङ्कं प्रति सख्याः नखलक्ष्मशङ्कायां यत्कारणं कुटिलाताग्रच्छवित्वं तत् नखलक्ष्मेत्यतः प्राक् वक्तव्यम्, कार्योत्पत्त्यनन्तरं कारणोपन्यासस्य वैयर्थ्यात् । अतः अपदस्थपदत्वमित्याह अत्रेति ।

सारबोधिनी—अस्थानस्थपदमिति । अत्र सौत्रपदस्य स्थानार्थत्वम् । तथा चापदस्थपदमपदस्थ-समासञ्चेति बोध्यम् । **अस्थानस्थेति** । अयोग्यस्थानस्थेत्यर्थः । तत्त्वं च यथास्थितिविवक्षितस्वार्थानुभाव-कत्वे सति स्वाकाङ्क्षव्यवहितस्थानप्रयुक्तत्वम् । यथास्थितितयेनानुपूर्व्या, तेन सङ्कीर्णमभिताक्रमेषु न प्रसङ्गः । तेषु तयानुपूर्व्या विवक्षितार्थाननुभावकत्वात् । अत्र तु न तथेति वक्ष्यामः । प्रियेणेति । संग्रथ्य सम्यक् निर्माय । विपक्षसपत्नीवक्षस्यर्पणे हेतुः पीवरस्तनत्वम् । जलाविलामित्यत्रापिर्वाच्यः । प्रेम्णि सति वस्तुनि गुणा उत्कर्षाः, न तु वस्तुमात्रे । **न विजहाविति** । अत्रासमस्तस्य नञः क्रियान्वयित्वतात्पर्यग्रहे क्रियाकाङ्क्षायामन्तरा काचिदित्यर्थोपस्थितौ क्रियाया अलाभेन तस्याः स्थगनम् । अनन्तरञ्च क्रियो-पस्थितावयोग्यकारकपरिहारेण तया सह स्वस्थानस्थितस्य नञो विलम्बेनान्वयः । क्रियासान्निध्ये नैव-मित्याह **काचिन्न विजहाविति** । यथाश्रुतानुपूर्व्यन्तराकल्पनान्न क्लिष्टत्वम् । नञः क्रियया योगविलम्बेना-भावानुभावकत्वविलम्ब इत्यासत्तिवैगुण्यं दूषकताबीजम् । न च 'नवजलधरः' इत्यादावपि नामसान्निध्येऽप्य-समस्तस्य नञोऽभावप्रत्यायनेन विलम्बः स्यादिति वाच्यम् । तत्र गम्यमानभवतिक्रियासान्निध्यात् । अत्र तु क्रियोपादानेनाध्याहाराभावात् क्रियासान्निध्यमात्रेणैव नञोऽभावानुभावकत्वम् न तु पूर्वापरत्व-नियमेनेत्यक्रमाद् भेदः । तत्र तु पौर्वापर्यनियमोल्लङ्घनमिति दूषकताबीजम् । केचित्तु, नञः समभिव्याहृत-निषेधव्युत्पत्तेर्न काचिदित्यत्रानिर्धारितैकविशेषनिषेधप्रसिद्धौ सर्वा विजहुरित्यर्थः प्रतीयते । न चायं विवक्षितः । क्रियापदस्य सन्निधावुपादाने क्रियामात्रनिषेधप्रतीतौ विवक्षितार्थसिद्धिरित्याहुः ।

प्रपञ्चयति **यथा वेति** । शितिकन्धरः शिवः, तदिन्दुशकलेनान्तःकपोलस्थलं लग्नो मुद्राङ्कः पातु वः । अन्यसम्पर्कादन्यत्र समुदितं चिह्नं मुद्राङ्कः । कथं तस्य पार्वतीकपोलसम्बन्ध इति विशेषयति **केलीति** । पार्वत्या कथमुन्मृष्ट इत्यत आह **नखलक्ष्मेति** । नखलक्ष्मशङ्कायां हेतुः **कुटिलेत्यादि** । अत एव नखक्षताकारता । **पूर्वमित्यादि** । तत एव हेतुहेतुमद्भावेन झटित्यन्वयः स्यात्, यथाश्रुते तु पूर्ववदयोग्य-परिहारादिविलम्ब इत्यवधेयम् ।

अस्थानस्थसमासं यथा

अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं वाञ्छति मान एष धिगिति क्रोधादिवालोहितः ।
प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात्
फुल्लत्कैरवकोशनिःसरदलिश्रेणीकृपाणं शशी ॥२३८॥

अत्र क्रुद्धस्योक्तौ समासो न कृतः कवेरुक्तौ तु कृतः ।

बालचित्तानुरञ्जनी—द्वितीयमुदाहरति **अस्थानेति**। एष मानः अद्यापि मय्युदितेऽपि स्तनशैल-दुर्गविषमे सीमन्तिनीनां हृदि स्थातुं वाञ्छति, धिक् इति क्रोधादिव आलोहितः आरक्तः प्रोद्यद्दूरतर-प्रसारितकरः असौ शशी तत्क्षणात् विकसन् कुमुदेश्यनिःसरन्तो[?] ये भ्रमराः, तेषां या श्रेणी पङ्क्तिः, सैव कृपाणः खड्गः, तं कर्षति। शशिनो नायकत्वं मानस्य प्रतिनायकत्वं विवक्षितं कवीनां कामचारात्। अत्र अद्यापीत्येतदादिका इति क्रोधादिवेत्येतदन्ता क्रुद्धस्य चन्द्रस्योक्तिः। अत्र समस्तानि पदानि प्रयोज्यानि, तानि चात्र न कृतानि, फुल्लेत्यादिका कवेरुक्तिः तत्र कृतानीत्यस्थानसमासत्वमित्याह **अत्रेति**।

सारबोधिनी—**अस्थानस्थसमासमिति**। अद्यापि अस्मत्सान्निध्येऽपि स्तनशैलाभ्यां दुर्गविषमे अनाक्रमणीये। कोपः कुडमलं खड्गपिधानञ्च। यत्र ओजोगुणस्य व्यङ्ग्यत्वं तत्रैव दीर्घसमासस्य स्थिति-रुचिता कवेरुक्तौ तु दीर्घसमासव्यङ्ग्यस्य ओजोगुणस्याभाव इति तत्र व्यर्थत्वम्। क्रुद्धस्योक्तौ व्यङ्ग्य-सद्भावाद्दीर्घसमासस्यौचित्यमाह **अत्रेति**। अत्र कवेरुक्तौ तु कृत इति विवृण्वता ग्रन्थकृता स्थानत्यागेना-स्थानगामित्वेनायं दोष इति सूचितम्, तेन शृङ्गाररसप्रधाने पद्ये दीर्घसमासे नायं दोषः। किन्तु प्रति-कूलवर्णत्वमेव, स्थानपरित्यागाभावादिति मिश्राः।

सङ्कीर्णम्, यत्र वाक्यान्तरस्य पदानि वाक्यान्तरमनुप्रविशन्ति। यथा

किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणेमम्।
ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपम्॥२३९॥

अत्र पादगतं बहुगुणं हृदयनाथं किमिति न पश्यसि, इमं कण्ठे गृहाण मनसस्तमोरूपं कोपं मुञ्चेति। एकवाक्यतायां तु क्लिष्टमिति भेदः।

गर्भितम्, यत्र वाक्यस्य मध्ये वाक्यान्तरमनुप्रविशति। यथा

परापकारनिरतैर्दुर्जनैः सह सङ्गतिः।
वदामि भवतस्तत्त्वं न विधेया कदाचन॥२४०॥

अत्र तृतीयपादो वाक्यान्तरमध्ये प्रविष्टः। यथा वा

लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्टचारिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती।
तत्सक्तोऽयं न किञ्चिद् गणयति विदितं तेऽस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद् गदितुमिव गतेत्यम्बुधिं यस्य कीर्तिः॥२४१॥

अत्र 'विदितं तेऽस्तु' इति एतत्कृतम्। प्रत्युत लक्ष्मीस्ततोऽपसरतीति विरुद्ध-मतिकृत्।

बालचित्तानुरञ्जनी—सङ्कीर्णमर्थकथनपुरःसरमुदाहरति **सङ्कीर्णमिति** । मानस्य व्युदासाय सख्या उक्तिः । हे मानिनि पादगतं बहुगुणं हृदयनाथं किमिति न पश्यसि? इमं कण्ठे गृहाण, मनसस्तमोरूपं कोपं [मुञ्च] । विवक्षितमन्वयं दर्शयति **अत्रे**ति । अनेन निर्दिष्टस्यान्वयस्य सङ्कीर्णतया दुष्टत्वमुक्तमिति वेदितव्यम् । ननु क्लिष्टमेवेदं कथं सङ्कीर्णमित्यत आह **एकेति** । अनेकवाक्यतायां सङ्कीर्णत्वं एकवाक्यतायां क्लिष्टत्वमिति विवेकः ।

लक्षणपुरःसरं गर्भितमुदाहरति **गर्भितमिति** । परापकारनिरतैः दुर्जनैः सह सङ्गतिः कदाचन न विधेया । भवतस्तत्त्वं वदामि । अत्र वदामीत्यादिवाक्यान्तरं स्वतन्त्रं भूत्वा मध्ये अनुप्रविष्टं सत् वाक्यार्थ-प्रतीतिप्रकाण्डं खण्डयितुं प्रसिद्धमिति गर्भितमेतदित्याह **अत्रे**ति ।

उदाहरणान्तरमाह **यथेति** । रागो रुधिरं कामश्च । एवं तेन आवृताङ्ग्या यया असियष्ट्या खड्गयष्ट्या सुदृढं यथा स्यात्तथा इह अरिकण्ठे लग्नम्, या च असियष्टिः मातङ्गाः चण्डाला गजाश्च, तेषामुपरि पतन्ती परपुरुषैर्दृष्टा तत्सक्तः अयं नृपः न किञ्चिद् गणयति, हे अम्बुधे ! ते विदितमस्तु । अहं लक्ष्मीः भृत्येभ्यः दत्तास्मि । श्रीनियोगात् गदितुमिव यस्य कीर्तिः अम्बुधिं गता । अत्र विदितमित्यादि वाक्यं महावाक्यमध्ये स्थितं तदर्थप्रतीतिखण्डकमिति गर्भितमित्याह **अत्रे**ति । प्रसङ्गाद्दोषान्तरमप्याह **प्रत्युतेति** । विदितं तेऽस्त्वित्यनेन 'स्वापराधेनाहं नापसरामि किन्तु राजकीयेनैवे'ति प्रतीयते । अतो 'लक्ष्मी-स्ततोऽपसरती'ति श्रु[स्तु]तिविरुद्धप्रतीतिकृदित्यर्थः ।

सारबोधिनी—सङ्कीर्णमिति । वाक्यान्तरं क्रियान्तरान्वितम् । अन्यथा सङ्कीर्णेऽपि अङ्गाङ्गि-भावेनैकवाक्यत्वसंभवाददोषत्वं स्यात् । न वा एकक्रियान्विते घटमानय पटञ्चेत्यत्र पटान्वितानयन-पदसङ्करेऽपि क्रियैक्यात् दोषप्रसङ्गः । स्वमध्यपतितवाक्यान्तरत्वं गर्भितत्वम् । उभयत्रानासत्तिरेव दूषकता-बीजमिति स्पष्टम् । **परापकारेति** । निरतैस्तदेकवृत्तैः । अत्र व्यवधायकस्य स्वार्थानुभावकत्वम् सङ्कीर्णे न तथेतिभेदः । मिश्रास्तु बीजफलसाम्येऽपि सङ्कीर्णाद् गर्भितस्य पृथगुपादानं क्वचिद्गुणत्वा-भिधानायेत्याहुः ।

अवान्तरवाक्यभेदे गर्भितमाह **लग्नमित्यादि** । रागोऽनुरागो रुधिरं रक्तिमा च । मातङ्गा-श्चाण्डाला दन्तिनश्च । परे उदासीनाः उत्कृष्टा वा शत्रवश्च । तस्यामसियष्ट्यां सक्तोऽनुरक्तश्च । गणयति युक्तायुक्तं विचारयति । किञ्चाहं भृत्येभ्यो दत्ता इति विदितं तेऽस्तु, श्रीनियोगादिति गदितुमिवाम्बुधिं गता यस्य कीर्तिरित्यन्वयः । 'विदितं तेऽस्त्वि'त्यनेन गर्भितं कृतमिति योजनम् । यद्वा कृतं 'वाक्यान्त-रमि'ति शेषः । तेनास्मीत्यर्थस्यापि वेदनीयत्वं विवक्षितम् । विदितमित्यादेर्मध्यानुप्रवेशे न तथा प्रतीतिः । अत्राप्यनासत्तिः प्रतीतिविच्छेदो वा दूषकताबीजम् । न केवलं विवक्षितार्थाप्रतीतिः, अपि त्वविवक्षितार्थ-प्रतीतिरपि, तदाह **प्रत्युतेति** । वेदयितव्यानुचितार्थाभिधाने च क्रोधाभिव्यक्तेः । **विरुद्धेति** । प्रकाशित-विरुद्धमित्यर्थः ।

"मञ्जीरादिषु रणितप्रायं पक्षिषु च कूजितप्रभृति ।

स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखम् ॥" इति प्रसिद्धिमतिक्रान्तम् । यथा

महाप्रलयमारुतक्षुभितपुष्करावर्तकप्रचण्डघनगर्जितप्रतिरुतानुकारी मुहुः।
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः ॥२४२॥

अत्र रवो मण्डूकादिषु प्रसिद्धो न तूक्तविशेषे सिंहनादे।

बालचित्तानुरञ्जनी—प्रसिद्धिहतं प्रतिपादयितुं प्रसिद्धिं तावद्दर्शयति **मञ्जीरेति** । मञ्जीरादिषु नूपुरादिषु रणितप्रचुरं शब्दं प्रयुञ्जीत। पक्षिषु च कूजितवासितादि । पक्षिग्रहणमुपलक्षणम्, मण्डूकादीनामपि, सुरते स्तनितमणितादि, मेघसिंहादिषु गर्जितरसितादि । तदुदाहरति **इतीति** । महानयं प्रलयमारुतः तेन क्षुभिता ये पुष्करावर्तका मेघविशेषास्तेषां प्रचण्डं घनं यद्गर्जितं तत्प्रतिशब्दानुकारी कर्णकठोरः आच्छादितद्यावाभूमीकन्दरः कुतः समरोदधेः सङ्ग्रामोदधेः सङ्ग्रामसमुद्रात् अभूतपूर्वः यः रवः सिंहनादः अद्य पुनः मुहुरुत्पद्यते । मण्डूकादौ प्रसिद्धस्य रवशब्दस्य सिंहनादे प्रयोगप्रसिद्धिहतमित्याह **रव इत्यादि**।

सारबोधिनी—प्रसिद्धादन्यत्र प्रयोगः प्रसिद्धिहतः । तत्र किं कुत्र प्रसिद्धमित्याह **मञ्जीरादिष्विति**। **महाप्रलय इति** । महत्पदं मारुतेनान्वितं न तु प्रलयेन। सर्वमुक्तेरेव तथात्वात्। पुष्करावर्तकौ मेघौ। द्यावापृथिव्योरन्तरं रोदसी सैव कन्दरा। **उक्तविशेष इति** । श्रवणभैरवत्वादिविशेषणमर्यादया तल्लाभः। 'विषय' इति पाठे उक्तस्य श्रवणभैरवत्वादेर्विषयोऽधिकरणमित्यर्थः ।

भग्नः प्रक्रमः प्रस्तावः, यत्र । यथा

नाथे निशाया नियतेर्नियोगादस्तं गते हन्त निशापि याता ।
कुलाङ्गनानां हि दशानुरूपं नातः परं भद्रतरं समस्ति ॥२४३।

अत्र 'गता' इति प्रक्रान्ते 'याता' इति प्रकृतेः। 'गता निशापि' इति तु युक्तम् ।

ननु 'नैकं पदं द्विः प्रयोज्यं प्रायेण' इत्यन्यत्र कथितपदं दुष्टमिति चेहैवोक्तम्। तत्कथमेकस्य पदस्य द्विःप्रयोगः । उच्यते । उद्देश्यप्रतिनिर्देश्यव्यतिरिक्तो विषय एकपदप्रयोगनिषेधस्य तद्वति, विषये प्रत्युत तस्यैव पदस्य सर्वनाम्नो वा प्रयोगं विना दोषः। तथा हि

उदेति सविता ताम्रस्ताम्र एवास्तमेति च।
संपत्तौ च विपत्तौ च महतामेकरूपता ॥२४४॥

अत्र रक्त एवास्तमेतीति यदि क्रियेत तदा पदान्तरप्रतिपादितः स एवार्थोऽर्थान्तरस्येव प्रतिभासमानः प्रतीतिं स्थगयति।

बालचित्तानुरञ्जनी—पूर्वमारब्धः पश्चाद्भग्नः उपक्रमो यत्र तदुदाहरति **भग्न इति**। सोऽपि प्रकृतिप्रत्ययभेदादनेकविधः। तत्र प्रकृतेरुदाहरणम्। दैवस्य नियोगात् निशाया नाथे चन्द्रे अस्तंगते सति निशापि अस्तं याता। हि यतः कुलाङ्गनानां दशानुरूपं पत्यवस्थानुरूपम्, अतः परं भद्रतरं नास्ति। अत्र गत इति गच्छतिरूपा प्रकृतिः। तां परित्यज्य धात्वन्तरे निर्देशात् प्रकृतिप्रयुक्तोऽयं क्रमभङ्ग इत्याह **अत्रेति**। प्रकृतेः प्रयोगो दोष इति शेषः। तर्हि कः पाठो युक्त इत्याकाङ्क्षायामाह **गतेति**। ननु गतेति पाठाङ्गीकारे पूर्वाचार्यवचनविरोधं स्वग्रन्थविरोधञ्च शङ्कते **नन्विति**। अन्यत्र वामनालङ्कारे। प्रायेणेत्येतदपि चादिनिपाताभिप्रायमिति चोद्याभिप्रायः। इहैव स्वग्रन्थ एव। उक्तेः उक्तत्वादित्यर्थः। आक्षेपमुपसंहरति **तदिति**। द्विःप्रयोगः कथं साधुरित्यर्थः। विषयभेदेन विरोधो नास्तीति परिहरति **उच्यत इति**। पूर्वानुवादेन प्रस्तूयमानं उद्देश्यं पश्चादन्यविधिनोपयुज्यमानं प्रतिनिर्देश्यं तस्माद्व्यतिरिक्तः द्विपदप्रयोगनिषेधस्य विषयः। तद्वति उद्देश्यप्रतिनिर्देश्यभाववति तु विषये प्रक्रान्तस्यैव पदस्य तत्परामर्शिनः सर्वनाम्नो वा प्रयोगमन्तरेण दोषः, स्वतो न दोष इत्यर्थः।

उक्तमर्थमुदाहरणान्तरेण स्पष्टयति **तथाहीति**। सूर्यस्ताम्रो रक्त एव उदेति। ताम्र एवास्तमेति। महतां सम्पत्तौ विपत्तौ एकरूपत्वमेव। अत्र ताम्ररक्तयोः पर्यायत्वेन भेदाभावभ्रान्त्या रक्त एवास्तमेतीत्युच्यते यदि तदा भावितमर्थमाह **अत्रेति**। आरुण्यलक्षण एवार्थः प्रक्रान्तत्वात्ताम्रपदादन्येन रक्तरूपेण प्रतिपादितः सन् अन्यार्थतयैव प्रतिभासमानः वाक्यार्थविषयां प्रतीतिं तिरोधत्त इत्यर्थः। सवितुः प्रक्रान्तं ताम्रत्वं परित्यज्य रक्तशब्दप्रयोगात् अनयोः सौरभपरिमलादिवत् अवान्तरभेदप्रतिभासनादित्यर्थः।

सारबोधिनी—भग्नप्रक्रम इत्यत्र प्रक्रमशब्दार्थमाह **प्रस्ताव इति**। औचित्यावर्जितमित्यर्थः। **नियतेरिति**। नियतिरदृष्टम्। अर्थान्तरेण समर्थयति **कुलाङ्गनानामिति**। समस्ति सम्भवति। दशानुरूपं वैधव्यदशायोग्यम्। गतेति यातेति पदेन गमनस्योपादानेऽपि नानुगमनत्वेन प्रतीतिर्भवति, स्वाभाव्यात्। तथा च दशानुरूपमिति भज्येत। गतेति कृते चानुगमनस्य स्फुटैव प्रतीतिः। ननु पर्यायशब्दानां शक्यतावच्छेदकैक्यनियमात् कथमन्यत्वेन प्रतीतिरिति चेदुच्यते। यन्मते शाब्दबोधे शब्दोऽपि भासते तन्मतेनेदम्। अन्यत्र वामनोक्तौ उद्देश्यः प्राक् प्रत्यायितः, प्रतिनिर्देश्यः पुनः प्रत्याय्यः। स्थगयति नैकरूपमासादयतीत्यर्थः। तथाहि अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारकशक्तिग्रहविषयत्वाच्छब्दस्य विशेषणादिपदार्थवत्तस्याऽप्युपस्थितिः पदान्तरोपादाने च तदुपस्थित्या प्रतीत्यन्यथात्वं स्फुटमेव। तदुक्तम्—
"न सोऽस्ति प्रत्ययो लोके यत्र शब्दो न भासते" इति।

यथा वा

> यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा।
> निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥२४५॥

अत्र प्रत्ययस्य। 'सुखमीहितुं वा' इति युक्तः पाठः।

ते हिनालयमामन्त्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ।।२४६।।

अत्र सर्वनाम्नः । 'अनेन विसृष्टाः' इति तु वाच्यम् ।

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा ।।२४७।।

अत्र पर्यायस्य । 'महीभृतोऽपत्यवतोऽपि' इति युक्तम् । 'अत्र सत्यपि पुत्रे कन्यारूपेऽप्यपत्ये स्नेहोऽभूत्' इति केचित्समर्थयन्ते ।

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ।।२४८।।

अत्रोपसर्गस्य पर्यायस्य च । 'तदभिभवः कुरुते निरायतिम् । लघुतां भजते निरायतिर्लघुतावान्न पदं नृपश्रियः' इति युक्तम् ।

बालचित्तानुरञ्जनी—प्रत्ययभङ्गमुदाहरति **यश इति** । यशः अधिगन्तुं, सुखस्य लब्धुमिच्छया, मनुष्यसंख्यामतिवर्तितुं वा [अभि-]ग्रहवतां नितरामुत्सुकानां पुरुषाणां समुत्सुकेव सिद्धिः अङ्कमुपैति । अत्राधिगन्तुमिति तुमुन्प्रत्ययः प्रक्रान्तः । अतिवर्तितुमिति निर्व्यूढो मध्येऽपि । तद्वत् 'सुखं लब्धुमि'ति वक्तव्ये 'सुखलिप्सये'ति सनः प्रयोगात् प्रक्रान्तस्य तुमुन्प्रत्ययस्य भङ्ग इत्याह **अत्रेति** । युक्तं पाठमाह **सुखमिति** ।

सर्वनाम्नो भङ्गमुदाहरति **त इति** । ते सप्तऋषयः । हिमालयमामन्त्य पुनः शूलिनं प्रेक्ष्य च अस्मै शूलिने सिद्धमर्थं निवेद्य च तेन ईश्वरेण विसृष्टाः सन्तः खमुद्ययुः । सर्वनाम्नः अस्मै इति प्रक्रान्तस्य इदंशब्दस्य 'तद्विसृष्टा' इत्यत्र तच्छब्दप्रयोगात् भङ्ग इत्याह **अत्रेति** । युक्तं पाठमाह **अनेनेति** ।

पर्यायस्य भङ्गमुदाहरति **महीभृत इति** । पुत्रवतोऽपि महीभृतो दृष्टिः, तस्मिन् अपत्ये तृप्तिं न जगाम । हि यतः अनन्तपुष्पस्य मधोः द्विरेफमाला आम्रे सविशेषसङ्गा भवति । अत्र 'पुत्रवतोऽपी'ति प्रक्रान्तस्य पुत्ररूपस्य पर्यायस्य भङ्गात् 'तस्मिन् अपत्य' इत्युक्तत्वात् भङ्ग इत्याह **अत्रेति** । कन्यायां पुत्रशब्दप्रयोगाभावात्पुत्रवत इत्यत्र अपत्यवत इति वक्तव्यमित्याह **महीभृत इति** । केचिदपत्यस्य अन्यथाकर्तुमशक्यत्वात् प्रकारान्तरेण प्रकृतपाठं समर्थयन्ते । **अत्रेति** । पुत्रो मैनाकः तद्वतोऽपि, तस्मिन् अपत्ये कन्यालक्षणे स्नेहोऽभूदिति केचित् वाक्यविदश्चाहुः । अपत्यशब्दस्य विशेषविवक्षया कन्यायां विश्रान्तेरेवेति भावः ।

उपसर्गपर्याययोर्भङ्गमेकत्रोदाहरति **विपद इति** । आपदः अविक्रमं अभिभवन्ति । आयतिः उत्तरकालः आपदुपेतं त्यजति । आयतिरहितस्य लघुता नियता । अगरीयान् श्रियः पदं न । विपद इति

व्युपसर्गमुपक्रम्य आपदुपेतमिति आङ उपादानादुपसर्गस्य प्रक्रमभङ्गः, लघुतेत्युपक्रम्य अगरीयानिति पर्यायान्तरोपादानात् पर्यायस्य क्रमभङ्गश्चेत्याह अत्रेति । युक्तं पाठमाह तदिति । तदभिभव इत्यनेन उपसर्गभेदः परिहृतः । लघुतां भजत इत्यादिना पर्यायस्य भेदो निराकृतः ।

सारबोधिनी--निरुत्सुकानां निरौत्सुक्यानाम् । अत्र तुमुन्सनोरिच्छायां समानार्थत्वेऽपि पूर्वं तुमा फलत्वप्रतीतिर्न सनेत्येकरूपत्वहानिः ।

ते हिमालयेति । तदिदमोः सर्वनामत्वाविशेषेऽपि पूर्वानुभूतपुरोवर्तिविषयत्वान्नैकरूपता ।

महीभृत इत्यादि । **सविशेषसङ्गेति** । विशेषणासङ्गतावित्यर्थः । पर्यायस्येति । अत्रापत्येषु बहुषु सत्स्वपि तस्मिन् अपत्ये प्रेमातिशयविवक्षणादपत्यशब्दे प्रयोक्तव्ये पुत्रशब्दस्य प्रयोगात् पर्यायक्रमभङ्गः । तथाहि । यत्सामान्यसत्ता तद्विशेषगोचरेच्छेति प्रस्तावः । पुष्पसामान्यसत्तायां तद्विशेषादरबोधकेन दृष्टान्तेन तथैव बोधनात् विरोधार्थकापिशब्दस्वरसाच्च । ततश्चापत्यसामान्यसत्तायामपि अपत्यविशेषे स्नेह इति प्रस्तावः पुत्रपदस्थानेऽपत्यपदानुपादानाद्विघटितः । नन्वारभ्यमाणस्य वर्त्मनोऽन्येन भङ्ग एव प्रक्रमभङ्गो न त्वारम्भकेण पुत्रपदेनेति चेन्न । औचित्यावर्जितप्रस्तावान्यथाभाव एवास्य विषयत्वात् । विघटकपौर्वापर्यस्यानियमात् । अतएव प्रक्रमपदस्य प्रस्तावोऽर्थो विवृतः । अत एव पाठान्तरे पुत्रपदस्थान एवापत्यपदप्रक्षेप इत्याह **अपत्यवतोऽपीत्यादि** । **केचिदिति** । तन्मतं न चारु दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यापातात् । विशेषाविशेषभावविषयत्वेन भिन्नविषयत्वप्रसङ्गात् ।

विपद इत्यादि । रहयति त्यजति । आयतिरुत्तरकालः । विपदापदोरुपसर्गस्य, लघुताऽगरीयानित्यनयोः पर्यायस्य । अत्र पर्यायत्वमेकार्थप्रतिपादकत्वमेव विवक्षितम् । न त्वेकप्रकारकबोधकत्वमस्य वस्तुतः पर्यायत्वस्याभावात् । यद्वा पर्यायस्य लघुत्वबोधकलघुतास्वरूपपदान्तरस्य प्रस्तावोऽगरीयान् पदो न भग्नः[?] । अन्यथा लघुता अगरीयःपदयोः शक्यतावच्छेदकयोः शक्यतावच्छेदकभेदादपर्यायत्वादसङ्गतिः स्यात् । अत एव शोधकपाठे लघुतापदावृत्तिः ।

काचित्कीर्णा रजोभिर्दिवमनुविदधौ मन्दवक्त्रेन्दुलक्ष्मी--
रश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः ।
भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत्कम्पमानाः
प्रस्थाने पार्थिवानामशिवमिति पुरो भावि नार्यःशशंसुः ॥२४९॥

अत्र वचनस्य । "काश्चित्कीर्णा रजोभिर्दिवमनुविदधुर्मन्दवक्त्रेन्दुशोभा निःश्रीकाः" इति 'कम्पमानाः' इत्यत्र 'कम्पमापुः' इति च पठनीयम् ।

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यताम् ।
विश्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले
विश्रान्तिं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥२५०॥

अत्र कारकस्य । 'विश्रब्धा रचयन्तु सूकरवरा मुस्ताक्षतिम्' इत्यदुष्टम् ।

अकलिततपस्तेजोवीर्यप्रथिम्नि यशोनिधा-
ववितथमदाध्माते रोषान्मुनावभिगच्छति ।
अभिनवधनुर्विद्यादर्पक्षमाय च कर्मणे
स्फुरति रभसात्पाणिः पादोपसङ्ग्रहणाय च ।।२५१।।

अत्र क्रमस्य । पादोपसङ्ग्रहणायेति पूर्वं वाच्यम् । एवमन्यदप्यनुसर्तव्यम् ।

बालचित्तानुरञ्जनी—रजोभिः कीर्णा रजस्वला । अत एव मन्दवक्त्रेन्दुलक्ष्मीः काचिन्नारी दिवं आकाशं, अनुविदधौ अनुचकार । आकाशमपि रजोबुद्ध्याकीर्णमित्यर्थः । अश्रीकाः, उद्भ्रान्तं व्याकुलीभूतं सत्त्वं सत्त्वगुणो यासाम् । दिक्पक्षे उद्भ्रान्ताः सत्त्वाः प्राणिनो यासु । काश्चिद्दिश इव अन्तर्दाहं दिग्दाहं दधिरे, दिग्दाहश्च जात इत्यर्थः । अन्याः वात्या इव प्रतिपदं भ्रेमुः । वात्या अपि जाता इत्यर्थः । अपरा भूमिवत् कम्पमानाः । भूकम्पोऽपि जात इत्यर्थः । पार्थिवानां प्रस्थाने नार्यः इति पुरोभावि अशुभं शशंसुरिव । काचिद्दिवमनुविदधावित्येकवचनमुपक्रम्य काश्चिदन्तर्दाहं विदधिर इति बहुवचनप्रयोगाद् वचनभङ्ग इत्याह **अत्रेति** । युक्तं पाठमाह **काश्चिदिति** । कंप्रत्यय-[क्रमात्यय?]प्रतिपत्तिपरिहाराय लक्ष्मी-स्थाने शोभाप्रयोगः । दोषान्तरमपि परिहरति **कम्पमापुरिति** । क्रियाकारकयुगलमेलकेन वाक्यानां प्रक्रान्तत्वात् कम्पमाना इत्युच्यमाने तदभावात् कम्पमापुरिति वक्तव्यमित्यर्थः ।

कारकभङ्गमुदाहरति **गाहन्तामिति** । शृङ्गैर्मुहुस्ताडितं निपानसलिलं महिषाः गाहन्ताम् । छायायां बद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु । विश्रब्धैर्वराहपतिभिः पल्वले मुस्ताक्षतिः क्रियताम् । इदं च शिथिलज्याबन्धमस्मद्धनुः विश्रान्तिं लभताम् । महिषा गाहन्तामिति प्रथमाया उपक्रमात् विश्रब्धैः क्रियतामिति तृतीयायाः प्रयोगात् कारकभङ्ग इत्याह । **अत्रेति** । युक्तं पाठमाह **विश्रब्धा इति** ।

क्रमभङ्गमुदाहरति **अकलितेति** । भार्गववचनानन्तरं रामचन्द्रस्योक्तिः । अकलितः ज्ञातुमशक्यः तपस्तेजोवीर्याणां त्रयाणाम् । एतस्मिन् यशोनिधौ अवितथं मदस्य आध्मातमाध्मातं[?]यस्य तस्मिन् मुनौ भार्गवे रोषात् अभिमुखं धावति सति अभिनवं धनुः, विद्याक्षमाय कर्मणे पादोपसङ्ग्रहणाय च रभसात् मे पाणिश्च स्फुरति । अत्र तपस्तेजोवीर्यप्रशस्तयशोमदयोश्च क्रमादुपन्यासे मुनिं प्रति पादोपसङ्ग्रहः कथनीयः । पश्चादभिनवेत्यादि वक्तव्यम् । तद्विपर्ययात् क्रमभङ्ग इत्याह **अत्रेति** । क्रमभेदो द्विविधः । शाब्दः आर्थश्च । तत्र शाब्दमुदाहृत्यार्थोऽप्युदाहरणीय इत्याह **एवमिति** । यथा "सस्नुः पयः पपुरनेनिजुरम्बराणि जक्षुर्बिसं धृतविकासिबिसप्रसूनाः" इत्यत्र पयः पपुरित्यादिवत् विकासिबिसप्रसूनं दधुरिति वाच्यम् । तदकरणात् आर्थक्रमभङ्ग इत्यर्थः ।

सारबोधिनी—काचिदित्यादि । रजांसि स्त्रीधर्मः पांसवश्च । अनुविदधे, अनुकृतवती । दाह-स्तापो हेतुलक्षणया वह्निश्च । सत्त्वं प्रथमगुणः प्राणी च । पार्थिवानां नायकद्विषाम् । प्रस्थाने यात्रायां

भावि अशिवं नार्यः शशंसुरित्यन्वयः । **अत्रे**ति । क्रमभङ्ग इत्यनुषज्यते । काचिदित्युपक्रम्य काश्चिदित्यभिधानादित्यर्थः । वचनस्य बहुत्वादिप्रतिपादकस्य । आख्यातक्रमभङ्गमपि व्याचष्टे । पाठान्तरेण कम्पमापुरिति ।

गाहन्तामिति । **शृङ्गैरिति** । स्वभावोक्तिः । कदम्बकं समूहः । अत्र सर्वत्र कर्तृविशेष्यत्वप्रस्तावः । विश्रब्धैरित्यादिना कर्मविशेष्यताप्रतिपादकेन तदन्यथाकरणमित्यर्थः । अत्र श्रान्तस्य वचसि प्रक्रमभङ्गो गुण एव । श्रमपरिपोषकत्वात् न दोषः ।

अकलितेति । अकलितं अपरिमितम् । प्रथिमा पृथुता । यशोनिधौ प्रतिष्ठिते तज्जयादुत्कर्षाधिक्यम् । अवितथो यथार्थः । दर्पक्षमं दर्पयोग्यं कर्म युद्धम् । **अत्रे**ति । क्रमस्य प्रक्रमभङ्ग इत्यनुषज्यते । तद्यशःप्रथमोपन्यासेन तदुपयोगिपादग्रहणस्यापि तथौचित्यात् । **एवमिति** । 'शशी दिवसे'त्यादौ शोभनत्वेन प्रतीतस्याशोभनत्वं शक्यमिति क्रमो विवक्षितः । तस्य द्वितीयचतुर्थषष्ठसप्तमवाक्येष्वन्यथात्वेन भङ्गः ।

अविद्यमानः क्रमो यत्र । यथा

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥२५२॥

अत्र त्वंशब्दानन्तरं चकारो युक्तः ।

बालचित्तानुरञ्जनी—अक्रममाह **अविद्यमान इति** । क्रमः पौर्वापर्येणावस्थानम् । कपालिनः ईश्वरस्य प्रार्थनया सम्प्रति द्वयं शोचनीयतां गतम् । किं तद् द्वयं, कलावतश्चन्द्रस्य सा कान्तिमती कला च अस्य लोकस्य नेत्रकौमुदी त्वं पार्वती च । किं तदित्यपेक्षायां कलावतः कला च त्वं चेति समुच्चयौचित्यात्, तद्वैपरीत्यात् काव्यमक्रममेतदित्याह **अत्रेति** ।

सारबोधिनी—**अविद्यमान इति** । यदुत्तरं यत्पदोपादानमुचितं तदन्यत्र तदुपादानमित्यर्थः । **त्वमित्यनन्तरमिति** । तदैव तस्याः समुच्चेयताप्रतीतिः स्यात् । अस्थानस्थपदाच्च भेदस्तत्प्रसङ्गेनैव व्याख्यातः ।

यथा वा

शक्तिर्निस्त्रिंशजेयं तव भुजयुगले नाथ दोषाकरश्री-
र्वक्त्रे पार्श्वे तथैषा प्रतिवसति महाकुट्टनी खड्गयष्टिः ।
आज्ञेयं सर्वगा ते विलसति च पुरः किं मया वृद्धया ते
प्रोच्येवेत्थं प्रकोपाच्छशिकरसितया यस्य कीर्त्या प्रयातम् ॥२५३॥

अत्र 'इत्थं प्रोच्येव' इति न्याय्यम् । तथा 'लग्नं रागावृताङ्ग्या' ॥२५३ (क)॥

इत्यादौ 'इति श्रीनियोगात्' इति वाच्यम् ।

बालचित्तानुरञ्जनी--उदाहरणान्तरमाह **यथा वेति** । हे नाथ ! तव भुजयुगले निस्त्रिंशजा खड्गजा इयं शक्तिः प्रतिवसति । पक्षे निस्त्रिंशः क्रूरः वक्त्रे दोषाकरश्रीः चन्द्रश्रीः, पक्षे दोषाणामाकरस्य श्रीः । तव पार्श्वे कुट्टयति खण्डयतीनि कुट्टनी महती चासौ कुट्टनी च, पक्षे शम्भली । एका खड्गयष्टिः प्रतिवसति । सर्वगा विश्वव्यापिनी पक्षे अशेषपुरुषस्वीकारिणी इयं ते आज्ञा प्रविलसति । वृद्धया परिपूर्णया वर्षीयस्या च मया किं पुनः प्रयोजनं, शशिकरसितया कीर्त्या प्रकोपात् इत्थं प्रोच्येव प्रयातम् । अत्र, इत्थं प्रोच्येवेति तदकरणात् अक्रममित्याह **अत्रे**ति । 'लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्टयारिकण्ठे' इति गर्भितस्योदाहरणत्वेन प्रदर्शिते पद्येऽपि अक्रममाह **तथे**ति ।

सारबोधिनी—**शक्तिरित्यादि** । निस्त्रिंशः खड्गः खलश्च । दोषाकरो मूर्खत्वाश्रयः दोषायां रात्रौ करो यस्य स चन्द्रश्च । कुट्टनी छेदिका गणिका च । सर्वगा सर्वजनग्राह्या सर्वगामिनी च । वृद्धया बहुलया जरत्वाच्च । **इत्थं प्रोच्येति** । इत्थंपदस्याव्यवहितपरामर्शकत्वात् पादत्रयस्यैव परामर्शकत्वात् न तु वचनस्यापीति भावः । **इति श्रीनियोगादिति** । इतिपदस्याव्यवहितपरामर्शकत्वात् इति भावः ।

अमतः प्रकृतविरुद्धः परार्थो यत्र । यथा

रामन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥२५४॥

अत्र प्रकृते रसे विरुद्धस्य शृङ्गारस्य व्यञ्जकोऽपरोऽर्थः ।

बालचित्तानुरञ्जनी—लक्षणपूर्वकमेति [?] । तमुदाहरति **यथेति** । दुःसहेन राम एव मन्मथः तस्य शरेण ताटका अभिसारिका ताडिता । सा निशाचरी गन्धवदिति निन्दायां प्रशंसायामनुगन्धवद्रुधिरचन्दनोक्षिता सती जीवितेशः यमः प्रियतमश्च तस्य वसतिं जगाम । अत्र प्रकृते रसे वीररूपे रामस्य मन्मथेन औपम्यात् जीवितेशेन वल्लभार्थप्रत्यायनमिति शृङ्गाररसस्य तद्विरुद्धस्य कथनादक्रममित्याह **अत्रे**ति ।

सारबोधिनी--**अमत इति** ।

ज्ञेयौ शृङ्गारबीभत्सौ तथा वीरभयानकौ ।
रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ॥

राम इति । रामो मन्मथो मनोमथनहेतुः कामश्च । निशाचरी राक्षसी अभिसारिका च । रुधिरं चन्दनं, रुधिरमेव चन्दनं रक्तचन्दनञ्च । गन्धवत्त्वं पापक्षयात् पूतनाधूमवत् । जीवितेशो यमो नायकश्च । **प्रकृत इति** । बीभत्स इत्यर्थः । दूष्कताबीजन्तु शृङ्गारव्यञ्जकैर्यदि बीभत्सः प्रत्यायनीयः स्यात्तदा कथं तस्य परिपुष्टिरिति ध्येयम् ।

अर्थदोषानाह

अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः ॥५५॥

सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च ।
अनवीकृतः सनियमानियमविशेषाविशेषपरिवृत्ताः ॥५६॥
साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः ।
विध्यनुवादायुक्तस्त्यक्तपुनःस्वीकृतोऽश्लीलः ॥५७॥

दुष्ट इति संबध्यते । क्रमेणोदाहरणम्

अतिविततगगनसरणिप्रसरणपरिमुक्तविश्रमानन्दः ।
मरुदुल्लासितसौरभकमलाकरहासकृद्रविर्जयति ॥२५५॥

अत्रातिविततत्वादयोऽनुपादानेऽपि प्रतिपाद्यमानमर्थं न बाधन्त इत्यपुष्टाः, न त्वसङ्गताः पुनरुक्ता वा ।

बालचित्तानुरञ्जनी—एवं शब्ददोषानभिधायार्थदोषानाहेत्याह अत्रेति । क्वचित् पदस्यार्थं कुत्रचिद्वाक्यस्येति यथायोगमूहनीयम् । **संबध्यत इति** । दुष्टमित्यविचारात् । अर्थात् दुष्ट इति तल्लिङ्गविपरिणामः ।

अपुष्टमुदाहरति । अतिविस्तृते गगनमार्गे प्रसरणेन परिमुक्तविश्रमसुखः । मरुता उल्लासितं सौरभं यस्य एवंविधकमलवतः सरोवरस्य हासकृत् विकासकृत् सूर्यः जयति । गगनस्य विभुतया वैतत्यं विश्रमस्य दुःखाभावत्वादानं कमलविकासात् मरुतां सौरभोल्लासश्च स्वयमेव सिद्ध इति विततत्वादिविशेषणाभावेऽपि तदर्थलाभादपुष्टत्वमित्याह **अत्रेति** । कविप्रतिपत्तिं निराकरोति **न त्विति** । गगनादौ विततत्वादेर्विद्यमानत्वेन न लाक्षणिकत्वमित्यर्थः । प्रसङ्गाद्दूषणं **पुनरुक्ता वेति** । गगनादेर्विततत्वादेश्च भिन्नप्रमेयतया पौनरुक्त्याभावेऽपि सामर्थ्यसिद्धस्य कथनात् पौनरुक्त्यमित्यर्थः ।

सारबोधिनी—सम्प्रति वाक्यार्थप्रतीतिपश्चाद्भावित्वेन वाक्यदोषानन्तरमर्थदोषानाह **दुष्ट इति** । पददोषसूत्रस्थं दुष्टपदं लिङ्गविपरिणामेन संबध्यत इति भावः । तत्रापुष्टः पुष्टभिन्नः । पुष्टत्वं च विवक्षितार्थबोधकानुपादानकत्वम् । तद्विरहश्च [द्विधा] । अप्रयोजकत्वात् प्रयोजकेऽप्यर्थलभ्यत्वाच्च । वृत्तिकृताप्यतिविततत्वादयोऽनुपादानेऽपि प्रतीयमानमर्थं न बाधन्त इत्युक्तम् । न त्वप्रयोजका एवेति । **अतिविततेति** । विततं विस्तीर्णम् । सरणिर्मार्गः । प्रसरणं गमनागमनम् । विश्रमानन्दो विश्रमसुखम् । विततत्वं गगनपदलभ्यम् । वह्निपदेन तद्गतौष्ण्यवत् । अतोऽर्थलभ्यत्वादपुष्टत्वमिति । सरणित्वादिकमप्रयोजकमेवेत्यर्थः । नन्विदमधिकपदं पुनरुक्तत्वं वा स्यात् इत्यत आह **न त्विति** । असङ्गता अधिकाः । तत्त्वं चान्वयाप्रतियोगित्वाद्भवति । प्रकृते तदभावात् शब्दोपस्थिते पुनः शब्दानुपादानान्न पुनरुक्तिरित्यर्थः । अर्थपुनरुक्तिश्चापुष्टार्थत्वमेवेति भावः । केचित्तु पोषणं पुष्टमुपकारः, पश्चान्नञा बहुव्रीहिः । ततश्च प्रकृतवाक्यार्थोत्कर्षहेतुरपुष्टः । **अतिविततेति** । अत्र हि रविर्जयतीति रवेरुत्कर्षः प्रधानवाक्यार्थः । न खलु विस्तीर्णपदसंचरणं श्रमहेतुर्येन तत्सत्त्वेऽपि श्रमत्यागे उत्कर्षहेतुः स्यात् । विततपदेन दीर्घत्वाभिधानेऽपि

रथाख्ययानेन संचरणान्न श्रमत्वप्रतीतिः । एतेनातिविततत्वादय इत्यत्रातद् गुणसंविज्ञानबहुव्रीहिणा तत्परिहृत्य मरुदुल्लासितेत्यादि ग्रहणं केनचिद्यदुक्तं तन्निरस्तम् । तस्यापुष्टार्थत्वस्य दर्शितत्वात् । यत्तु मरुदुल्लासितेत्यादि विरुद्धं हासपूर्वं सौरभायोगादिति तन्न, समकालत्वस्य विवक्षितत्वात् । अत्रान्वयबोधान्तरं पदजीवात्वनुसंधानदशायामेषामनुपकारित्वग्रह इति प्रतीतानुपपत्त्यार्थदोषकता प्रतीत्यनुपपत्तावेव शब्ददोषतेति विभागः ।

सदा मध्ये यासामियममृतनिस्यन्दसुरसा
सरस्वत्युद्दामा वहति बहुमार्गा परिमलम् ।
प्रसादं ता एता घनपरिचिताः केन महतां
महाकाव्यव्योम्नि स्फुरितमधुरा यान्तु रुचयः ॥२५६॥

अत्र यासां कविरुचीनां मध्ये सुकुमारविचित्रमध्यमात्मकत्रिमार्गा भारती चमत्कारं वहति ताः, गम्भीरकाव्यपरिचिताः कथमितरकाव्यवत् प्रसन्ना भवन्तु । यासामादित्यप्रभाणां मध्ये त्रिपथगा वहति ताः, मेघपरिचिताः कथं प्रसन्ना भवन्तीति संक्षेपार्थः ।

बालचित्तानुरञ्जनी—स्वकाव्यस्तुतिः क्रियते । यासां कविरुचीनां काव्याभिलाषाणां मध्ये सदा अमृतस्य निस्यन्दो निष्यन्दः तेन सरसा बहुमार्गा सरस्वती परिमलं चमत्कारं वहति । घनपरिचिताः गम्भीरकाव्यपरिचिताः ता एव रुचयः महतां महाकाव्यव्योम्नि स्फुरितमधुराः सत्यः केन प्रसादयन्तु । न भवन्तीत्यर्थः । यासामादित्यप्रभाणां मध्ये अमृतनिष्यन्दसरसा बहुमार्गा उद्दामा सरस्वती भागीरथी परिमलं वहति । मेघपरिचितास्ता एताः सूर्यप्रभाः व्योम्नि केन प्रसादं यन्तु ? न यान्तीत्यर्थः । सरस्वतीशब्दः नदीमात्रेऽपि च । 'सरस्वती सरिद् भेदे भूवाग्देवतयोरपि । स्त्रीरत्ने चापगायां चे'त्यभिधानात् । कठिनत्वात् श्लोकं व्याकरोति **अत्रेति** । उक्तार्थस्य कष्टत्वमित्यर्थः ।

सारबोधिनी—कष्ट इत्यस्य दुरूह इत्यर्थः । आसत्त्यादि सत्त्वेपि विलम्बितप्रतीतिकत्वं तत्त्वम् । **सदेत्यादि** । अमृतं सुधा जलं च । रसः श्रृङ्गारादिर्माधुर्यं च । सरस्वती नदी वाणी च । मार्गो रीतिः पन्थाश्च । परिमलं चमत्कारं सुखञ्च । प्रसादं सुव्यक्तं स्वच्छकान्तिश्च । घनो निबिडो मेघश्च । परिचिता अत्यन्ताभ्यस्ताः संबद्धाश्च । रुचयः अभिसन्धयः कान्तयश्च । महतां कवीनामादित्यादीनाञ्च, तेषां द्वादशत्वात् ।

जगति जयिनस्तें ते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये ।
मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं जन्मन्येकः स एव महोत्सवः ॥२५७॥

अत्रेन्दुकलादयो यं प्रति पस्पशप्रायाः स एव चन्द्रिकात्वमुत्कर्षार्थमारोपयतीति व्याहतत्वम् ।

बालचित्तानुरञ्जनी—व्याहतमुदाहरति जगतीति । मालतीं प्रति माधववचनम् । ये मनः मदयन्ति । जयिनः प्रकृतिमधुराः । नवेन्दुकलादयः । अन्ये ते ते भावाः पदार्थाः सन्त्येव । लोके विलोचन-चन्द्रिका इयं मालती नयनविषयं यातेति यत् जन्मनि मरुवकः[?] स एव महोत्सवः । यं माधवं प्रति चन्द्र-कलादयः पस्पशप्रायाः असारप्रायाः स एव माधवः मालत्या उत्कर्षार्थं चन्द्रिकात्वमारोपयतीति व्याहतमित्याह **अत्रेति** ।

सारबोधिनी--**जगतीति** । मम जन्मनि स एव महोत्सवो यदि नयनगोचरं यातेत्यन्वयः । झटित्यप्रतीतिः अनुभवसिद्धा निन्दित्वा पुरस्कृत्य वा पुनस्तदन्यथाकरणम् । विशिष्टा हतिर्व्याहतत्वम् । न चात्रानुचितार्थता । तत्र पशुकुविन्दादिपदैः स्वार्थोपस्थितिदशायामेवोपश्लोक्यमानस्य तिरस्कारावगमः । अत्र तु चन्द्रिकापदस्य तदर्थस्यानुसन्धानादेव न तिरस्कारोऽवगम्यते । किन्तु वाक्यार्थबोधानन्तरं नवेन्दुकलादयो यं प्रतीत्यर्थपर्यालोचनेनेति भेदात् । पुरस्कृत्येत्यत्रापि उदाहरणं स्वयमूह्यम् ।

कृतमनुमतमित्यादि ॥२५८॥

अत्रार्जुनार्जुनेति भवद्भिरिति चोक्ते सभीमकिरीटिनामिति किरीटिपदार्थः पुनरुक्तः ।

बालचित्तानुरञ्जनी—पुनरुक्तमुदाहरति ।

"कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥"

इति चतुर्थोल्लासे उदाहृतमिति सर्वं पद्यं नोक्तम् । अस्माभिश्च तत्रैव व्याकृतम् । अत्र अश्वत्थामा वेणीसंहारे अर्जुनार्जुन भवद्भिरिति चोक्त्वा पुनरपि किरीटिशब्दमुच्चारितवान् अतः पौनरुक्त्यमित्यर्थः ।

सारबोधिनी--पुनरुक्तः शब्देनावगतः पुनः शब्देनैवोच्यते, अर्थपुनरुक्तस्यापुष्टार्थत्वात् । अत्र प्रयोजनं विनेत्यपि विशेषणं देयम् । अत एव कर्णावतंसादिषु विनेत्यंशाभावान्न पौनरुक्त्यम् । स चायं द्विविधः पदार्थवाक्यार्थभेदात् । तत्राद्यमुदाहरति **कृतमनुमतमित्यादि** । 'अर्जुनार्जुन सात्यके' इत्युपक्रमेण पितृ-वधामर्षितस्याश्वत्थाम्न इयमुक्तिः । कर्त्रनुमन्तृद्रष्टृणामुत्तरोत्तरापराधस्य लाघवेन क्रमादुपन्यासः । तत्र कर्ता अर्जुनः । सात्यकिरनुमन्ता । अन्ये द्रष्टारः । तत्राद्ययोर्बलवद्द्वेषेण शाब्दसंबुद्धिः अन्येषां बुद्धिस्थैव । अत एव तेषां शास्तिप्रदर्शनाय बुद्धिस्थपरामर्शकयत्पदभवत्पदद्वारानुकर्षः । एतेन सम्बोध्ययोरबहुत्वे यैरित्यादिषु बहुवचनमनुपपन्नमिति निरस्तम् । संबोध्यानां बहुत्वस्य दर्शितत्वात् । **अत्रेत्यादि** । भवद्भि-

रित्यत्र संबोध्योपस्थितिं विना भवत्पदप्रयोगानुपपत्तेः, तस्य संबोध्यात्मवाचित्वात्। किरीटिपदार्थोऽर्जुन एव। अथार्जुनपदाभ्यां सहैवान्वयबोधकत्वे शाब्दबोधसमय एव पौनरुक्त्यावभासान्नार्थदोषतेति चेन्न। पर्यायशब्दोपनीतेष्वर्थेष्वापाततोऽन्यत्वेन भावान्न पुनरुक्ततावभासः। समानशब्दसत्त्व एव एकत्वभानादित्युक्तत्वात्। वस्तुतो नैवं साधीयान् दोषः। क्रुद्धस्योक्तावुक्तविस्मरणद्वारा क्रोधप्रज्वलनया पौनरुक्त्यस्य गुणत्वात्। न च संबोध्यविस्मृतौ भवच्छब्दप्रयोगानुपपत्तिरिति वाच्यम्। भवतेः शतृप्रत्ययेन भवत्पदेन उदायुधैः सद्भिरित्यर्थस्य विवक्षणात्। यद्वा सभीमेत्यादावेव विस्मरणात्।

यथा वा

अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे
सेनानाथे स्थितेऽस्मिन्मम पितरि गुरौ सर्वधन्वीश्वराणाम्।
कर्णालं संभ्रमेण व्रज कृप समरं मुञ्च हार्दिक्य शङ्कां
ताते चापद्वितीये वहति रणधुरं को भयस्यावकाशः ॥२५९॥

अत्र चतुर्थपादवाक्यार्थः पुनरुक्तः।

बालचित्तानुरञ्जनी—अत्रैवोदाहरणान्तरमाह **यथा वेति**। अस्त्राण्येव ज्वालास्ताभिरवलीढः, आलिङ्गितः योऽसौ, प्रतिबलमेव जलधिः तस्य अन्तः मध्ये और्वायमाणो दावाग्निवदाचरिते सेनानाथे सर्वधन्वीश्वराणां गुरौ मम अश्वत्थाम्नः अस्मिन् पितरि द्रोणाचार्ये स्थिते सति हे कर्ण, संभ्रमेणालम्। समरं व्रज. हे कृप हार्दिक्य शङ्कां मुञ्च। चापद्वितीये ताते द्रोणाचार्ये युद्धभारं वहति सति भयस्यावकाशः कः? अत्र ताते चापद्वितीय इत्यादि चतुर्थपादार्थः चतुर्थ[?]पादापेक्षया पुनरुक्त इत्याह **अत्रेति**।

सारबोधिनी—द्वितीयमाह **अस्त्रेत्यादि**। अश्वत्थामोक्तिरियम्। मम पितरि सेनानाथे सत्यलं सम्भ्रमेणेत्यन्वयः। और्वो वाडवाग्निः। अस्त्राण्येव ज्वाला वह्निशिखा प्रतिबलं रिपुसैन्यम् तस्य जलधित्वेन पितुरौर्वत्वेन च निरूपणे वध्यघातकभावोऽवगम्यते। हार्दिक्यः कृतवर्मा नाम यादवः। **अत्रेति**। कर्णालं संभ्रमेणेत्युक्तौ को भयस्यावकाश इति चतुर्थः पादः पुनरुक्तः। अत्रापि पूर्ववद्दोषोद्धारो बोध्यः। अत्रेदं चिन्त्यम्। अत्र न केवलं पदार्थे वाक्यार्थे वा पौनरुक्त्यम्, पदैकदेशार्थेऽपि तत्संभवात्। यथा—'तदीयमातङ्गघटे'त्यादौ युक्तार्थान्तरेण षष्ठ्यर्थेन तद्धितार्थसंबन्धस्य पौनरुक्त्यात्।

भूपालरत्न निर्दैन्यप्रदानप्रथितोत्सव।
विश्राणय तुरङ्गं मे मातङ्गं वा मदालसम् ॥२६०॥

अत्र मातङ्गस्य प्राङ्निर्देशो युक्तः।

स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं किमपैति ते ।

तदयि साम्प्रतमाहर कूर्परं त्वरितमूरुमुदञ्चय कुञ्चितम् ॥२६१॥

एषोऽविदग्धः ।

मात्सर्यमुत्सार्येत्यादि ॥५६२॥

अत्र प्रकरणाद्यभावे सन्देहः शान्तश्रृङ्गार्यन्यतराभिधाने तु निश्चयः ।

बालचित्तानुरञ्जनी--दुष्क्रममुदाहरति भूपालेति । रत्नानां निर्दैन्यं यथा तथा, प्रदाने प्रथित उद्धव उत्सवो यस्य हे भूपाल मे तुरङ्गं विश्राणय मदेन अलस मातङ्गं गजं वा विश्राणयेति[न] वाच्यम् । अन्यथा कवेः पदार्थतारतम्यानभिज्ञत्वप्रसङ्गः । अतो दुष्क्रममित्याह अत्रेति । ग्राम्यमुदाहरति **स्वपितीति** । इदं सूत्रं[?]हृद्यां कोऽपि वेश्यामाह । अयं त्वल्लक्षणो जनः यावन्निकटे स्वपिति तावदहं स्वपिमि । ते किं गच्छति ? तदभिरूपकं दीनारादि सांप्रतमाहर स्वीकुरु । त्वरितं सङ्कुचितमूरुं उदञ्चय विस्तारय । ननु पूर्वश्लोक एव प्रतीतं ग्राम्यमित्युक्तम् । तदत्र नास्ति कथं ग्राम्यत्वमित्याशङ्क्य अवैदग्ध्येनोक्तमेव ग्राम्यमित्याह **एष इति** । सन्दिग्धमुदाहरति **मात्सर्यमिति** ।

मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमिदं वदन्तु ।

सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम् ॥

अत्र शान्तश्रृङ्गारयोः प्रतीयमानत्वात् प्रकरणाद्यभावे सन्देह इत्याह अत्रेति । आदिपदात् बोद्धव्यादिवक्तृभूतयोः शान्तश्रृङ्गारिणोरन्यतरनिश्चयग्रहः तदभिधाने सन्देहाभावमाह शान्तेति ।

सारबोधिनी—दुःक्रमो दुष्टोऽनुचितो लोकविरुद्धः शास्त्रविरुद्धो वा क्रमो यत्रेत्यर्थः । तमुदाहरति **भूपालेति** । विश्राणय देहि । अत्रेति । मातङ्गस्य बहुमूल्यत्वेन तदलाभे तुरङ्गप्रार्थनौचित्यादिति भावः । यत्र हस्तिनामेव सुलभत्वं तत्र नेदमुदाहरणमिति मन्तव्यम् । ग्राम्यो ग्रामसंभवोऽविदग्धोक्तिप्रतिपन्नः स्वरिरंसादिः । यदुक्तम्—

स ग्राम्यः स्वरिरंसादिः पामरैर्यत्र कथ्यते ।

वैदग्ध्यवक्रिमबलं हित्वैव वनितादिषु ॥

स्वपितीति । किमपैति ? ते का क्षतिः कूर्पकं नीवीकूर्परमिति वा पाठः । "स्यात् कफोणिस्तु कूर्पर" इत्यमरः । अत्र रसविच्छेदः सहृदयवैरस्यं वा दूषकताबीजम् । अत्रार्थस्यैव ग्राम्यता न शब्दस्य, प्रकरणाद्यभावात् । सन्दिह्यमानोऽर्थः सन्दिग्धः । **मात्सर्यमित्यादि** । वक्तुः शान्तत्वे श्रृङ्गारित्वे वा निश्चिते निश्चय एव ।

गृहीतं येनासीः परिभवभयान्नोचितमपि
प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः ।
परित्यक्तं तेन त्वमसि सुतशोकान्न तु भया-
द्विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भवते ॥२६३॥

अत्र शस्त्रमोचने हेतुर्नोपात्तः ।

बालचित्तानुरञ्जनी—निर्हेतुमुदाहरति **गृहीतमिति** । अश्वत्थामा द्रोणपुत्रः गजश्च । तत्र गज मृते 'अश्वत्थामा हत' इति युधिष्ठिरेणोक्तमाकर्ण्य द्रोणाचार्यः भ्रान्त्या पुत्रशोकात् शस्त्रसंन्यासं कृतवान् । स मारितश्च शत्रुभिस्तच्छ्रवणादश्वत्थामापि शस्त्रं मुमुक्षुरिदमुक्तवान् । हे शस्त्र ! तन्नोचितं ब्राह्मणस्यानुचितमपि परिभवभयात् त्वं गृहीतमासीः यस्याचार्यस्य प्रभावात्तव कश्चित्पदार्थः विषयो नाभूदिति, न त्वं तेन आचार्येण सुतशोकात् परित्यक्तमसि । न तु भयात् । अतः अहमपि भवतेयः [वतः ?] यत्र स्वस्ति तत्र मोक्ष्ये । यथा द्रोणाचार्यकर्तृकशस्त्रमोचने पुत्रशोकादिति हेतुरुक्तः तथाश्वत्थामकर्तृकशस्त्रमोचने पितृशोकादिर्हेतुर्नोक्तः । अतो निर्हेतुत्वमित्याह **अत्रेति** ।

सारबोधिनी—अनुपात्तहेतुकोऽर्थो निर्हेतुः । **गृहीतमिति** । इयमश्वत्थामोक्तिः । परिभवभयात् ब्राह्मणस्य क्षत्रकर्मकरणे योऽनादरः पराभवो वा तद्भयान्नोचितमिति विषयो लक्ष्यः । यतस्त्वां विमोक्ष्ये ततो भवते स्वस्तीत्यर्थः । स्वस्ति विश्रामसुखमित्यर्थः । न तु हेत्वाकाङ्क्षायां वाक्यार्थपर्यवसाने कथमयमर्थदोष इति चेन्न, पितृकर्तृकशस्त्रत्यागस्यैव हेतुत्वेनान्वयात्, पितृकृतकर्मणः पुत्रेणाचरणीयत्वात् ब्राह्मणानुचितशस्त्रग्रहस्यैव इत्थं पर्यवसिते वाक्यार्थेऽनन्तरं मम शोकेन पित्रा परित्यक्तम् मयापि पितृशोकेन त्यक्तव्यमिति पितृशोकस्यैव हेतुत्वमाकाङ्क्षितं तदनुपादानेन निर्हेतुत्वम् । न च न्यूनपदत्वं, तदनुपादानेऽप्युक्तरीत्यान्वयबोधसंभवात् । तदभाव एव न्यूनपदत्वम् ।

इदं ते केनोक्तं कथय कमलातङ्कवदने
यदेतस्मिन् हेम्नः कटकमिति धत्से खलु धियम् ।
इदं तद् दुःसाधाक्रमणपरमास्त्रं स्मृतिभुवा
तव प्रीत्या चक्रं करकमलमूले विनिहितम् ॥ २६४ ॥

अत्र कामस्य चक्रं लोकेऽप्रसिद्धम् ।

बालचित्तानुरञ्जनी—प्रसिद्धिविरुद्धो विद्याविरुद्धश्च । तत्राद्यमुदाहरति **इदमिति** । कमलस्य विच्छायतापादकं वदनं यस्याः तस्याः संबोधनम् एकस्मिन् वस्तुनि हेम्नः कण्टकं कटकं ते खल्विति धियं धत्स इति । यत् ते इदं केनोक्तं कथय । इदं कण्टकं कटकं न भवतीत्यर्थः । किं तर्हि तदिदं कन्दर्पेण प्रीत्या तव करमूले विनिहितम् ? दुःसाधा ये पुरुषाः तेषां आक्रमणे परमास्त्रभूतं चक्रं लोके भगवतो विष्णोरेव चक्रमिति प्रसिद्धं न कामस्य अतः प्रसिद्धिविरुद्धमित्याह **अत्रेति** ।

सारबोधिनी—इदमिति । केन भ्रान्तप्रतारकेण । कमलस्यातङ्को भयं यस्मादेवंविधं वदनं यस्यास्तेन वदनस्य चन्द्रत्वं व्यङ्ग्यम् । लोकेऽप्रसिद्धमिति । कामस्य पञ्चशरत्वेनैव ख्यातेः । न च कामस्य चक्राभावादयोग्यत्वेन वाक्यदोषता । यतः चक्रनिधानकर्तृत्वमेव स्मरस्योपन्यस्तम् न तु चक्रवत्त्वम्, येन बाधः स्यात् । अन्यदीयशस्त्रस्याप्यन्येन निधानसंभवात् । अन्यदीयास्त्रस्यान्येन निधानमफलमिति प्रतिसन्धानस्य वाक्यार्थप्रतीत्यौत्तरकालिकत्वेनार्थदोषतैव ।

उपपरिसरं गोदावर्याः परित्यजताध्वगाः
सरणिमपरो मार्गस्तावद्भवद्भिरिहेक्ष्यताम् ।
इह हि विहितो रक्ताशोकः कयापि हताशया
चरणनलिनन्यासोदञ्चन्नवाङ्कुरकञ्चुकः ॥२६५॥

अत्र पादाघातेनाशोकस्य पुष्पोद्गमः कविषु प्रसिद्धो न पुनरङ्कुरोद्गमः ।

बालचित्तानुरञ्जनी—अत्रैवोदाहरणान्तरमाह **उपेति** । हे अध्वगाः ! गोदावर्याः निकटे सरणिं त्यजत । भवद्भिः अपरस्तावन्मार्गः इहान्वेष्यताम् । इह हि गोदावरीपरिसरे हताशया यानि [कयापि?] चरणकमलन्यासेन उदञ्चत् नवाङ्कुरं कञ्चुको यस्य ईदृशः रक्ताशोकः विहितोऽस्ति । हताशयेति प्रशंसागर्भ उपालम्भः । कामिनीचरणाघातेन कुसुमोद्गमः कविप्रसिद्धः न त्वङ्कुरोद्गम इति कविप्रसिद्धिविरोध इत्याह **पादेति** ।

सारबोधिनी—कविप्रसिद्धिविरुद्धमाह **उपपरिसरमिति** । अशोककलिकादर्शनमूर्च्छितस्य गृहमागच्छतः पथिकस्य तेनैव पथा व्रजन्तं पथिकान्तरमालोक्यैवमुक्तिः । **अत्रेति** । यद्यपि पुष्पोद्गमेन नवाङ्कुरोद्गमः स्यादेवेति न बाधस्तथापि तथा कविवर्णनाविरहेण तद्विरुद्धः ।

सुसितवसनालङ्कारायां कदाचन कौमुदी-
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः ।
तदनु भवतः कीर्तिः केनाप्यगीयत येन सा
प्रियगृहमगान्मुक्ताशङ्का क्व नासि शुभप्रदः ॥२६६ ॥

अत्रामूर्ताऽपि कीर्तिः ज्योत्स्नावत् प्रकाशरूपा कथितेति लोकविरुद्धमपि कविप्रसिद्धेर्न दुष्टम् ।

बालचित्तानुरञ्जनी—लोकप्रसिद्धिकविमर्यादयोः विप्रतिषेधे पूर्वदौर्बल्यमाह **सुसितेति** । कौमुदीमहसि सति शुभ्रवस्त्रधारिण्यां सुदृशि कामिन्यां स्वैरं यान्त्यां उपपतिसमीपं यान्त्यां सत्यां विधुश्चन्द्रः अस्तङ्गतोऽभूत् । हे नृप ! तदनु भवतः कीर्तिः केनाप्यगीयत येन सा कान्ता मुक्ताशङ्का सती प्रियगृहं

[अगात्] त्वं शुभप्रदः क्व नासि ? अत्र अमूर्ताया अपि कीर्तेः श्वैत्यविशिष्टत्वं लोकविरुद्धमपि कविप्रसिद्धत्वान्न दुष्टमित्याह **अत्रेति** ।

सारबोधिनी—लोकविरुद्धस्य कविप्रसिद्धत्वेन न विरुद्धत्वमित्याह **सुसितेत्यादि** । कदाचन एकदा कौमुदीमहसि चन्द्रे सति स्वैरं यान्त्यामित्यन्वयः ।

सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः ।
नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च ॥२६७॥

ग्रहोपरागादिकं विना रात्रौ स्नानं धर्मशास्त्रेण विरुद्धम् ।

अनन्यसदृशं यस्य बलं बाह्वोः समीक्ष्यते ।
षाड्गुण्यानुसृतिस्तस्य सत्यं सा निष्प्रयोजना ॥२६८॥

एतत् अर्थशास्त्रेण ।

बालचित्तानुरञ्जनी—विद्याविरुद्धमुदाहरति **सदेति** । बुधः सदा रात्रौ स्नात्वा सकलं वासरं नानाविधानि शास्त्राणि व्याचष्टे शृणोति च । अत्र "रात्रौ स्नानं न कुर्वीत राहोरन्यत्र दर्शनादि"ति धर्मशास्त्रविरुद्धं रात्रौ सर्वदा स्नानमित्याह **ग्रहेति** । अत्रैवोदाहरणान्तरमाह **अनन्येति** । यस्य बाह्वोर्बलं अनन्यसदृशं समीक्ष्यते तस्य षाड्गुण्यानुसृतिः षड्गुणा एव षाड्गुण्यम् ते च "सन्धिर्ना विग्रहो यानमासनं द्वैधसमाश्रयः" निःप्रयोजना । सत्यम् । अर्थशास्त्रमान्विक्षिकी दण्डनीतिश्च यत्र । त्रिवर्गस्य परस्परानुरोधेन उपयोगोपदेशः सा आन्वीक्षिकी यस्या भगवान् भार्गवः प्रणेता अन्यत्र पुनः यत्र कामौ प्रधानं लोकानुवृत्तिराश्रयधर्मः स दण्डनीतिः, यस्य भगवान् बृहस्पतिः प्रवक्ता । तत्र दण्डनीतौ द्विषज्जयस्य न वर्त्तुलत्वमुक्तम् । तद्विरुद्धमेतदित्याह **एतदिति** ।

सारबोधिनी—विद्यापदेन शास्त्रमुक्तम् तद्विरुद्धमाह **सदेत्यादि** । **षाड्गुण्येति** । सन्धिविग्रहयानासनद्वैधसंश्रयाश्च षड्गुणाः ।

विधाय दूरे केयूरमनङ्गाङ्गणभङ्गना ।
बभार कान्तेन कृतां करजोल्लेखमालिकाम् ॥२६९॥

अत्र केयूरपदे नखक्षतं न विहितमिति । एतत् कामशास्त्रेण ।

अष्टाङ्गयोगपरिशीलनकीलनेन दुःसाधसिद्धिसविधं विदधद्विदूरे ।
आसादयन्नभिमतामधुना विवेकख्यातिं समाधिधनमौलिमणिर्विमुक्तः ॥२७०॥

अत्र विवेकख्यातिस्ततः संप्रज्ञातसमाधिः पश्चादसंप्रज्ञातस्ततो मुक्तिर्न तु विवेकख्यातौ । एतत् योगशास्त्रेण । एवं विद्यान्तरैरपि विरुद्धमुदाहार्यम् ।

बालचित्तानुरञ्जनी—कामशास्त्रविरुद्धमुदाहरति । अङ्गना कन्दर्पविद्ध [चिह्नं ?] केयूरं दूरे कृत्वा कान्तेन कृतां नखक्षतावलिं दधौ । "कक्षाकरोरुजघनस्तनपृष्ठपार्श्वहृत्कंधरासु नखराः खरवेगयोः स्युः । अप्यन्ययोर्नवरते कलहे च शान्ते पुष्पोद्गमे प्रवसने विरहे च योज्याः ।" इत्यादि कामशास्त्रेण केयूरस्थाने नखक्षतं न विहितमिति तद्विरुद्धमेतदित्याह **केयूरेति** । योगशास्त्रविरुद्धमुदाहरति **अष्टाङ्गेति** । यमनियमासनप्राणायामप्रत्याहारध्यानसमाधयोऽङ्गानि तेषां परिशीलनं अभ्यासः तस्य कीलनं दृढभूमितापादनं तेन दुःसाधसिद्धिर्मोक्षः, तस्याः सविधः प्रत्यासन्नो योगः असंप्रज्ञातलक्षणस्तं विदूरे विदधत् अनपेक्षमाणः विवेकख्यातिं प्रकृत्यादौ पुरुषेश्वरयोगश्च अन्यत्वप्रतिपत्तिं आसादयन् कश्चित् समाधिधनानां मौलिमणिर्योगिश्रेष्ठः अधुना विमुक्तोऽभूत् । योगशास्त्रे पूर्वं विवेकख्यातिः तदनु संप्रज्ञातः, तदनु असंप्रज्ञातः पश्चान्मुक्तिरिति प्रतिपादितम् । तद्वैपरीत्यात्तद्विरुद्धमित्याह **विवेकेति** । वितर्कविचाराविद्यास्मितादिज्ञानानुसारी योगः संप्रज्ञातः परमवैराग्यजः विद्यादिसंस्कारमात्रसहितः निवृत्तान्तःकरणवृत्तियोगस्त्वसंप्रज्ञातः ।

रणद्भिराघट्टनया नभस्वतः पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः ।
स्फुटीभवद्ग्रामविशेषमूर्च्छनामवेक्षमाणं महतीं मुहुर्मुहुः ॥

अत्र नभस्वतः संचारे क्रमेण स्वरा उत्पद्यन्ते न पुनर्व्युत्क्रमेणेति कुतो रागसन्धीनां मूर्च्छनानां स्फुटीभाव इति भरतशास्त्रविरुद्धमित्याद्यन्यदप्यूह्यमित्याह **एवमिति** ।

सारबोधिनी—यमश्च नियमश्चैवमासनं प्राणसंयमः । प्रत्याहारो धारणा च ध्यानञ्चैव समाधियुक् । एतानि कथितान्यष्टौ योगाङ्गानि मनीषिभिः । परिशीलनं पुनः पुनराचरणम् । कीलनमभ्यासदार्ढ्यम् । सिद्धयोऽणिमादयः । तासां सान्निध्यं दूरीकुर्वन्नित्यर्थः । विवेकख्यातिः सत्त्वपुरुषयोर्भेदावभासः । संप्रज्ञातः सविकल्पः समाधिः यत्रात्मा विषयान्तरञ्च भासते । असंप्रज्ञात आत्मातिरिक्तविषयग्राही समाधिः । विद्यान्तरैरागमवैद्यकादिभिः विरुद्धार्थप्रतीत्या सहृदयवैरस्यमेव दूषकताबीजम् ।

प्राप्ताः श्रियः सकलकामदुघास्ततः किं दत्तं पदं शिरसि विद्विषतां ततः किम् ।
संतर्पिताः प्रणयिनो विभवैस्ततः किं कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ॥२७१॥

अत्र ततः किमिति न नवीकृतम् ।

बालचित्तानुरञ्जनी—अनवीकृतमुदाहरति **प्राप्ता इति** । सकलकामदाः संपदः प्राप्ताः ततः किम्, शत्रूणां शिरसि पदं दत्तम् ततः किम्, विभवैः प्रणयिनः संतर्पिताः ततः किम्, शरीरिणां शरीरैः कल्पं कल्पकालं स्थितम्, ततः किम् ? अत्र ततः किमित्यस्य पर्युषितप्रीतिकतया चमत्कारशून्यत्वादनवीकृत[त्व]मित्याह **अत्रेति** ।

सारबोधिनी—अनवीकृतमुदाहरति **प्राप्ता इति** । भङ्ग्यन्तरेण यन्नवत्वं न प्रापितं एकभङ्गिनिर्दिष्टानेकार्थत्वमिति यावत्, तदनवीकृतम् । कामदुघाः सकलकामदा इत्यर्थः । अत्र तत्त्वज्ञानं विना

सर्वमकिञ्चित्करमिति भावः । **अत्रेति** । ततः किमित्यतो भङ्ग्यन्तराभावात् । न चात्र कथितपदत्वमेवेति वाच्यम् । पर्यायान्तरप्रयोगेऽपि भङ्ग्येकरूपतायामसाङ्कर्यात् । न च तथाप्यनेन कथितपदस्यान्यथासिद्धिः स्यादिति वाच्यम् । सत्यप्यर्थभेदतात्पर्ये पदैकत्वदोपादर्थैक्यप्रतिभासस्य कथितपददूषकताबीजस्य भेदादिति ।

तत्तु यथा

यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः ।
लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता ।।२७२।।

यत्रानुल्लिखितार्थमेव निखिलं निर्माणमेतद्विधे-
रुत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा ।
याताः प्राणभृतां मनोरथगतीरुल्लङ्घ्य यत्सम्पद-
स्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितम् ।।२७३।।

अत्र 'छायामात्रमणीकृताश्मसु मणेस्तस्याश्मतैवोचिता' इति सनियमत्वं वाच्यम् ।

बालचित्तानुरञ्जनी—अनवीकृतस्पष्टनार्थं नवीकृतमुदाहरति **यदीति** । अग्निर्यदि दहति अत्र किमद्भुतम् ? किं ततः अद्रिषु च यदि गौरवम् ? किं ततः पयोनिधेः अम्बु सदैव लवणम् । सतां प्रकृतिरेव अविषादिता, दुःखकारिणी न भवति । अत्र किमद्भुतमित्यादीनामेकार्थत्वेऽपि पर्यायोपादानान्नवीकृतत्व-मित्यर्थः । सनियमानियमविशेषाविशेषपरिवृत्ता इत्यत्र सनियमात् अनियमात् विशेषात् अविशेषात् परि-वृत्ता विपर्यस्ताश्चत्वारोऽर्था दुष्टा इत्युक्तम् तत्राद्यमुदाहरति **यत्रेति** । यत्र मणौ सति विधेः ब्रह्मणः एत-न्निर्माणम् अयं लोकसर्गः अनुल्लिखितविषयावगाहनविमुखं अक्षि लोचनं यस्य एव स तिष्ठति उत्कर्षस्य त्रासराहित्याद्याभिजात्यस्वभावस्य प्रतियोगिनः प्रतिसंबन्धिनः कौस्तुभस्य स्यमन्तकादेः सादृश्यकल्पनमपि परा न्यक्कारकोटिः अवज्ञाविश्रान्तिभूमिः यस्य मणेः मङ्गलत्वप्रभावहलत्वा[?]मूल्यत्वादयः संपदः समृद्धयः प्राणभृतां जन्तूनां ये मनोरथास्तेषां गतयः प्रवृत्तयः ताः उल्लङ्घ्य याताः मनोरथगोचरा अपि न भवन्ती-त्यर्थः, एवंविधस्य तस्य मणेः आभासेन स्फुरणेन मणीकृताः अमणयो मणयः कृताः ये अश्मानः तेषु मध्ये अश्मत्वमेव उचितम् । अत्र मणेरुत्कर्षः इतरमणीनां अपकर्षाभिधाने भवति अपकर्षश्च तेषां छायामात्रेण मणीकृताः न वस्तुतः इत्येवकारपर्यायेण मात्रपदेन संभवति तदभावात् सनियमाद्विपर्यस्तत्वमित्याह **अत्रेति** ।

सारबोधिनी—ननु नवीकृतं कीदृगित्याह **तत्तु यथेति** । **यदि दहतीति** । सतामविषादिता प्रकृति-रेवेति नाश्चर्यकरी । अत्र दृष्टान्तमाह । यदि दहतीत्यादित्रयम् । तत्र किं तत इत्यादिना किमद्भुतमित्यादि नवीकृतम् । पिष्टपेषणन्यायेनाशक्तिसूचनेन वा सहृदयोद्वेगो दूषकताबीजम् । नियमादिभिश्चतुर्भिः परिवृत्त-पदान्वयान्नियमपरिवृत्तादिचतुष्टयं लभ्यते । तैश्चतुर्भिः सहितः अनवीकृत इत्यस्य विशेषणम् । **मिश्रभ-**

सहितोऽनियमादिस्ततपरिवृत्त इति । यद्वा नियमानियमाभ्यां सहितौ विशेषाविशेषौ तत्परिवृत्त इति । केचित्तु सनियमपरिवृत्त एव दोषः । तत्र सनियमपरिवृत्तः सनियमत्वेन वाच्यो अनियमत्वेनोच्यत इत्यर्थमाहुः । नियमपरिवृत्तो दुष्ट इति मदनुनियमस्य शब्दादप्रतिपत्तिर्नियमपरिवृत्तः [?] ।

यत्रेत्यादि । अनुल्लिखिताख्यमनिर्दिष्टनामकम् । अनुल्लिखितार्थमिति पाठे यत्र मणौ सति निखिलमेव विधेर्निर्माणमर्थरहितमित्यर्थः । अथवा यत्र निर्माणमनुल्लिखितोऽनिर्वचनीयः अर्थः प्रयोजनं यत्रेत्यर्थः । **याता इत्यादि** । यस्य संपदः प्राणिमनोगोचरा अपि न भवन्तीत्यर्थः । आभासः कान्तिः । साधारणमणिसमानपतितस्य पाषाणत्वमेवोचितं, न मणित्वम् । चिन्तामणेः प्राकृतमणिगणनायां गणनमनुचितमित्यर्थः । **छायामात्रे**ति । तथा कृते गुणान्तरव्यवच्छेदेन निन्दातिशयः प्रतीयते । ननु तदा न्यूनपदत्वं स्यादिति चेन्न । आभासस्यैवान्वयप्रतियोगित्वेन तद्वाचकपदसद्भावान्न न्यूनपदत्वम् । यतः प्रकृष्टगुणान्तरासहकृतत्वस्य परस्परमन्वयितावच्छेदकत्वात् । तथा च तस्यानुपादाने कुतो न्यूनपदत्वम् । अन्वयप्रतियोग्युपस्थापकपदानुपादान एव न्यूनपदत्वात् । नापि मात्रार्थाप्रतीतौ अक्रमत्वमेवोचितं कुत इत्याकाङ्क्षानुवृत्तेः शाब्दबोधवैगुण्याच्छब्ददोषता यत्किञ्चिदेकोत्कृष्टधर्मवतोऽन्वयापादने उत्कृष्टधर्मवता गणनमनुचितमितिरूपेण वाक्यार्थोपपत्तेः । उत्कृष्टधर्माश्च यत्रेत्यादिनोपात्ताः । अनन्तरं च चिन्तामणिवृत्तिगुणव्यवच्छेदाय मात्रार्थोऽपेक्षणीयः ।

> वक्त्राम्भोजं सरस्वत्यधिवसति सदा शोण एवाधरस्ते
>
> बाहुः काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्रः ।
>
> वाहिन्यः पार्श्वमेताः क्षणमपि भवतो नैव मुञ्चन्त्यभीक्ष्णं
>
> स्वच्छेऽन्तर्मानसेऽस्मिन् कथमवनिपते तेऽम्बुपानाभिलाषः ।। २७४ ।।
>
> अत्र शोण एव इति नियमो न वाच्यः ।

बालचित्तानुरञ्जनी—द्वितीयमुदाहरति **वक्त्रेति** । हे अवनिपते ! सरस्वती वाग्देवता नदी च ते मुखारविन्दमधिवसति । ते अधरः शोण एव, शोणः अरुणो नदविशेषश्च । काकुत्स्थवीर्यस्मरणकरणे समर्थः ते दक्षिणो बाहुः समुद्रः मुद्रासहितः पयोधिश्च । एताः वाहिन्यः सेनाः नद्यश्च क्षणमपि भवतः पार्श्वं नैव मुञ्चन्ति । अस्मिन् निर्मले अन्तः मानसे चित्ते सरोवरे च ते अम्बुपानाभिलाषः कथं भवति । अत्र राजावयववर्णने अवधारणं व्यर्थम् । शोण एव न श्वेतः कृष्णो वेति ग्राम्यत्वप्रसङ्गेन श्वेतत्वादिसंभावनाया एवाभावात् । नदीप्रसङ्गेनावधारणं न युक्तम् । पिपासुं प्रति शोण एव न तु नद्यन्तरमिति, नद्यन्तरव्यावृत्तेर्विरुद्धत्वात् । अतः अनियमाद्विपर्यस्तत्वमित्याह **अत्रेति** ।

सारबोधिनी—वक्त्रेति । सरस्वती भारती नदीभेदश्च । शोणो रक्तो नदश्च । सादृश्यात् सेतुदर्शनञ्च । विरोधात् वातेन तद्बन्धनात् काकुस्थवीर्यस्मरणम् । दक्षिणः सव्येतरः दानदक्षो वा दिग्विशेषश्च । समुद्रः मुद्रा अङ्गुलीयकं तत्सहितो जलधिश्च । वाहिन्यः सेनाः नद्यश्च । मानसे मनसि सरसि च । **नियमो न वाच्य इति** । पिपासोर्जलमात्राभिलाषेण नद्यन्तरव्यवच्छेदस्याविवक्षितत्वात् । किञ्च शोण एव नत्वशोण

इति स्वीकारस्तदा शोणव्यतिरिक्तनदनिषेधः स्यात् । तच्चाविवक्षितम् सकलजलाधारत्वमिति विवक्षणात् । न चाधिकपदत्वम् भेदस्य वक्तव्यत्वात् । तथाहि यत्र सोऽर्थस्तत्पदव्यतिरेकेणापि प्राप्यते तदधिकपदम् यत्र तेन न प्राप्यते किन्त्वन्येनाविवक्षितश्च सिध्यति तत्रायम् । तथाहि । यावदुच्यते स्फटिकनिर्मलस्तावदेव स्फटिकाकृतिनिर्मल इति द्वयोः स्पष्टतरो भेदः इति । अत्र तु नियमो न शोणपदार्थे इति । सदैव शोण इति यदि विवक्षा तदा अस्थानपदत्वं स्यादिति ।

श्यामां श्यामलिमानमानयत भोः सान्द्रैर्मषीकूर्चकै—
र्मन्त्रं तन्त्रमथ प्रयुज्य हरत श्वेतोत्पलानां श्रियम् ।
चन्द्रं चूर्णयत क्षणाच्च कणशः कृत्वा शिलापट्टके
येन द्रष्टुमहं क्षमे दश दिशस्तद्वक्त्रमुद्राङ्किताः ।।२७५।।

अत्र 'ज्यौत्स्नीम्' इति श्यामाविशेषो वाच्यः ।

बालचित्तानुरञ्जनी—तृतीयमुदाहरति **श्यामेति** । कस्यचिद्विरहिणः स्वसखीन् प्रति वचनम् । भो सखायः ! श्यामां रात्रिम् निबिडैः मषीकूर्चकैः, श्यामत्वमानयत । अथ मन्त्रं तन्त्रं वा प्रयुज्य श्वेतोत्पलानां कुमुदानां रुचिं हरत । चन्द्रं च शिलापट्टे कृत्वा कणशः क्षणात् चूर्णयत येन कृत्वा अहं तस्याः श्यामायाः कान्तायाः वक्त्रमुद्राङ्किता दश दिशः द्रष्टुं क्षमे समर्थो भवामि । अत्र श्यामकिरणासंभवात् ज्योत्स्नीमिति वक्तव्यम्, तत्र तत्संभवात् । अतो विशेषाद्विपर्यस्तत्वमित्याह **अत्रे**ति ।

सारबोधिनी—**श्यामामिति** । कूर्चकं तूलिका । तन्त्रमौषधम् । **अथेति** विकल्पे । मुद्रा चिह्नम् । श्यामेति पदेनोपादाने कृते श्मामाकृतित्वं योगरूढिन्यायेन प्राप्तमेवेति तत्र श्यामलिमोपादाने वैयर्थ्यमिति हृदि कृत्वाह **अत्रे**ति ।

कल्लोलवेल्लितदृषत्परुषप्रहारैरत्नान्यमूनि मकरालय मावमंस्थाः ।
किं कौस्तुभेन विहितो भवतो न नाम याच्ञाप्रसारितकरः पुरुषोत्तमोऽपि ।।२७६।।

अत्र 'एकेन किं न विहितो भवतः स नाम' इति सामान्यं वाच्यम् ।

बालचित्तानुरञ्जनी—चतुर्थमुदाहरति **कल्लोलेति** । हे समुद्र तरङ्गचलितशिलाकर्कशप्रहारैः अमूनि रत्नानि मावज्ञासीः । कौस्तुभेन नारायणोऽप्रि भवतः याच्ञा ते [?] प्रसारितकरः किं नाम न विहितः ? अत्र कौस्तुभेनेति विशेषकथनेऽन्येषामनुपकारकत्वमागच्छतीति विशेषो न वाच्यः तत्कथनात् अविशेषाद्विपर्यस्तत्वमित्याह **अत्रे**ति ।

सारबोधिनी—**कल्लोलेति** । वेल्लितं चालितम् । मकरालयो जलधिः । पुरुषोत्तमः श्रीकृष्णः पुरुषश्रेष्ठश्च । वस्तुनि सत्येवोपकारः स्यादिति वाक्यार्थोपपत्तावनन्तरं विशेषस्योपकारित्वे सामान्येषु कथमादर इति प्रतोतावनुपपत्तिनिरासाय एकपदमपेक्षणीयम् । तदुपादानेन येषामेकेनोपकृतं तदितरेष्वप्यनादरो

नोचित इति [न] तदनुपपत्तिः । प्रतीत्यनुपपत्तिविरहेण कौस्तुभपदस्याधिक्यं एकपदस्य विरहेण न्यूनपदत्वमपि निरस्तम् । दूषकताबीजं विवक्षितार्थानिर्वाहः ।

अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभोः प्रत्युत
द्रुह्यन् दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया ।
उत्कर्षं च परस्य मानयशसोर्विस्रंसनं चात्मनः
स्त्रीरत्नं च जगत्पतिर्दशमुखो देवः कथं मृष्यते ॥२७७॥

अत्र स्त्रीरत्नम् 'उपेक्षितुम्' इत्याकाङ्क्षति । न हि परस्येत्यनेन संबन्धो योग्यः ।

बालचित्तानुरञ्जनी—साकाङ्क्षमुदाहरति **अर्थित्व** इति । कामुकत्वेन अर्थित्वे प्रकटीकृतेऽपि प्रभोः रावणस्य सभोगरूपफलप्राप्तिर्न जाता । प्रत्युत वैपरीत्येन विरुद्धचरितो दाशरथिर्द्रुह्यन् वर्तते स्वयं च तया कन्यया युक्तः । परस्य उत्कर्षं च मृष्यताम् आत्मनो मानयशसोः विस्रंसनं च मृष्यताम् जगत्पतिर्दशमुखो देवः स्त्रीरत्नं उपेक्षितुं कथं मृष्यते ? अत्र स्त्रीरत्नस्य अमर्षणीयताव्युदासार्थं उपेक्षितुमित्याकाङ्क्षतीति साकाङ्क्षत्वमित्याह **अत्रे ति** । ननु परस्य स्त्रीरत्नमित्यन्वयोऽस्त्वित्यत आह **नहीति** । अन्यत्र व्यवधानान्न तेनान्वय इति भावः । न चैतन्न्यूनपदमिति वाच्यम् । अध्याहारनिरपेक्षमन्विततया वाक्यस्य पूर्णत्वात् ।

सारबोधिनी—अर्थित्व इति । रावणदूतस्यैतद्वचनम् । फलप्राप्तिः सीतालाभः । प्रत्युत विरोधेन केवलं न फलप्राप्तिः प्रत्युत दाशरथिर्विरुद्धचरितो यज्ञादिरक्षकः तया कन्यया युक्तो द्रुह्यन्मारीचादिहिंसकः विस्रंसनमवमाननं कथं मृष्यति कथं न द्वेष्टि ? । मृषधातुरद्वेषार्थः । तथा च स्त्रीरत्नस्य द्वेषायोग्यत्वे कथमित्यादिनान्वय इत्याह **उपेक्षितुमिति** । अथ परस्येत्यनेन सम्बन्धात् नायोग्यतेत्याशङ्क्य निषेधयति **नहीति** । जनितान्वयबोधत्वेन निराकाङ्क्षत्वात् । न चानुषङ्गः, असम्बद्धव्यवाये तु वैषम्यान्नानुषज्यत इत्यभ्युपगमात् । अत्र न्यूनपदत्वशङ्कायां न्यूनपदत्वं पुनरमर्षणक्रियोपादानान्निरस्तम् । स्त्रीरत्नमित्यत्रामर्षणक्रियायामेव तात्पर्यं न तु क्रियान्तरे, येन तदनुपादाने न्यूनपदता स्यात् । केवलं स्त्रीरत्नामर्षणक्रियायोग्यताघटकत्वेनोपेक्षायामपेक्षणीयत्वं न्यूनतायां च न्यूनपदता । अन्यथा घटेन जलमाहरेत्यत्र छिद्रेतरत्वानुपादाने तथा प्रसङ्गात् । तेन विशेषणविशेष्यभावान्वये क्रियाकारकान्वये वामीषां यत्किञ्चिदनुपादाने एव न्यूनतेति नात्र प्रसङ्ग इति । न चैवं तथाभूतामित्यादावित्थंपदन्यूनता न स्यात्, तस्य खिन्ने खेदभजनानौचित्यासंजनयोग्यताया एव निर्वाहकत्वात्, अन्यथा प्रकारान्तरेण खेदौचित्यादिति वाच्यम् । यतः प्राचीनप्रणयानुरोधेनैव ग्रन्थकृता तदंशे न्यूनपदत्वमुक्तम् । वस्तुतोऽस्माभिरित्यनुपादान एव न्यूनपदत्वमिति ध्येयम् ।

आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी ।
उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ॥२७८॥

अत्र 'स्याच्चेदेष न रावणः' इत्यत्र एव समाप्यम् ।

बालचित्तानुरञ्जनी—अपदयुक्तं नाम अस्थानयुक्तम् । तदुदाहरति **आज्ञेति**। आज्ञा इन्द्रचूडामणिप्रणयिनीयं, चक्षुः शास्त्राणि, भूतपतौ पिनाकिनि भक्तिः। लङ्केति दिव्या पुरी स्थानं, ब्रह्मवंशे उत्पत्तिः। तत् तस्मात् कारणात् । अहो आश्चर्यम् । ईदृग्वरो न लभ्यते, यदि एष रावणो न स्यात् । कस्मिन् सर्वत्र सर्वे गुणा वर्तन्ते। अत्र स्याच्चेदेष न रावण इति रावणस्य दुर्जनत्वे प्रतिपाद्ये क्व पुनरित्यादिना न समाधेयम्। तथा च 'एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः' इति रावणस्यापि वरतया वरणीयत्वप्रसङ्ग इत्यपदयुक्तमार्थो दोष इत्याह **अत्रेति**।

सारबोधिनी—**आज्ञेति**। प्रणयित्वेन निरूपणाद्दम्पत्योरविच्छेदसूचनम् । शास्त्राणि चक्षुरिति । बहुवचनैकवचनाभ्यां सर्वशास्त्रविषयैकज्ञानसूचनम् । चक्षुषो नवत्वेन विषयग्रहाधिक्यम्। पदं निवासः। वीरचरिते, सन्त्येव बहवो गुणास्तथापि बलवानेको दोषस्तानपवदतीत्युपक्रमे रावणपुरोहितं प्रति जनकपुरोहितस्योक्तिरियम्। तेन चूर्णकसाचिव्येन रावणं प्रत्युपेक्षा वाक्यार्थः स्याच्चेदेष न रावण इत्यन्तेनैव प्राप्तः समर्थनं नाकाङ्क्षतीत्यस्थानसमाप्तत्वम्। न च तर्हि निराकाङ्क्षाभिधाने च शब्ददोषतेति वाच्यम्, समर्थनसहकृतेनैतद्वाक्येनान्यत्रोक्तसर्वगुणासम्भवेन रावण एवेदृशो रावणादन्य ईदृग्वरो न लभ्यत इत्यपेक्षया वाक्यार्थोपपत्तेरनन्तरं चूर्णकानुसंधानेन दोषावतारात् प्रतीत्यनुपपत्तिविरहात्। न चाधिकपदत्वं, तदर्थस्यान्वयिकत्वात् । केचित्तु प्रकृतार्थे विरुद्धार्थकपदशालित्वमपदयुक्तत्वम् तेनापदयुक्त इत्येव पाठ इति वदन्ति ।

श्रुतेन बुद्धिर्व्यसनेन मूर्खता मदेन नारी सलिलेन निम्नगा ।
निशा शशाङ्केन धृतिः समाधिना नयेन चालङ्क्रियते नरेन्द्रता ॥२७९॥

अत्र श्रुतादिभिरुत्कृष्टैः सहचरितैर्व्यसनमूर्खतयोर्निकृष्टयोर्भिन्नत्वम् ।

लग्नं रागावृताङ्ग्या० ॥२८०॥

इत्यत्र विदितं तेऽस्त्वित्यनेन श्रीस्तस्मादपसरतीति विरुद्धं प्रकाश्यते ।

प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा-
मकेशवमपाण्डवं भुवनमद्य निःसोमकम् ।
इयं परिसमाप्यते रणकथाद्य दोःशालिना-
मपैतु रिपुकाननातिगुरुरद्य भारो भुवः ॥२८१॥

अत्र 'शयितः प्रयत्नेन बोध्यसे' इति विधेयम्।

बालचित्तानुरञ्जनी—सहचरभिन्नमुदाहरति। श्रुतेन बुद्धिरलङ्क्रियते इति सम्बन्धः। व्यसनेन मूर्खता, मदेन नारी, सलिलेन नदी, चन्द्रेण निशा, समाधिना धृतिः, नयेन नरेन्द्रता। उत्कृष्टैरुपादेयतया उपदिष्टैः श्रुतबुद्ध्यादिभिः सह निकृष्टयोः परिहार्यतया प्रतिपाद्ययोर्व्यसनमूर्खतयोर्भिन्नत्वं विजातीयत्वमिति सहचरभेदो दोष इत्याह **अत्रेति**। विनयेन वीरतेति पाठो युक्तः ।

प्रकाशितविरुद्धमुदाहरति लग्नमिति ।

लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्टचारिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती ।
तत्सक्तोऽयं न किञ्चित् गणयति विदितं तेऽस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद् गदितुमिव गतेत्यम्बुधिं यस्य कीर्तिः ॥

इति गर्भितस्योदाहरणत्वेन प्रदर्शिते पद्ये विदितं तेऽस्त्विति लक्ष्मीवाक्येन ततः श्रीरपसरतीति विरुद्ध प्रकाश्यत इति प्रकाशितविरुद्धत्वमित्यर्थः । न चास्य विरुद्धमतिकृतः सकाशान्न भेद इति वाच्यम्, विरुद्धमतिकृति शब्दशक्तिमूला विरुद्धार्थप्रतीतिः, अत्र त्वर्थसामर्थ्यनिबन्धनेति भेदसम्भवात् ।

विध्ययुक्तमुदाहरति **प्रयत्नेति** । दुर्योधनं प्रति कस्यचिद्वचनम् । स्तुतिभिः प्रयत्नपरिबोधितः त्वं अद्य निशां शेषे रात्रौ सुखेन शयनं करोषि । यतः अकेशवं अपाण्डवं निःसोमकं भुवनं करिष्यामि । अद्य दोःशालिनां इयं रणकथा परिसमाप्यते । अद्य रिपुकाननातिगुरुः भुवः भारः अपैतु । अत्र परिबोधनस्यानुवाद्यत्वं शयनस्य विधेयत्वं चोक्तम् तदनुचितम्, शयनमनूद्य परिबोधनस्य विधेयत्वात् । यतः केशवपाण्डवसोमकादिसकलविपक्षप्रतिक्षेपात् उपलब्धनिश्चिन्तनिद्रासुखस्य सूतमागधादिभिः यथा कृच्छ्रेण बोधनीयता तथा करिष्यामीति तात्पर्यम् । अतः 'सुखेन शयितश्चिरादुषसि बोध्यसे मागधैरि'ति युक्तः पाठ इत्याह **अत्रेति** ।

सारबोधिनी--समभिव्याहृतविजातीयार्थत्वं सहचरभिन्नत्वम् । **श्रुतेनेति** । श्रुतं विद्या, व्यसनं द्यूतादि, समाधिर्धर्मचिन्ता । तथा च श्रुतादिसमभिव्याहारेण मूर्खस्य व्यसनं कर्त्तव्यमित्यपि स्यात्, तत्समभिव्याहारेण बुद्धिशालिनः श्रुतमपि त्याज्यं स्यादिति दूषकता । यद्वा उत्कृष्टैरुत्कृष्टस्य भूषणमिति बुद्धेर्विच्छेदको निकृष्टानुप्रवेशः ।

प्रतिपादितविवक्षितार्थविरोधिव्यञ्जकार्थत्वं प्रकाशितविरुद्धत्वम् । **प्रकाश्यत इति** । गर्भितप्रस्तावे व्याख्यातमेव । विध्यनुवादपदाभ्यां अयुक्तपदं प्रत्येकमन्वेति । तेन विध्ययुक्तोऽनुवादायुक्तश्चेति दोषद्वयम् । अयुक्तत्वम् न तु विधेयत्वानवगम इति विधेयाविमर्शतो भेदः । यथा चैतत्तथा लक्ष्येषु वक्ष्यामः । **प्रयत्नेति** । दुर्योधनं प्रत्यश्वत्थामोक्तिरियम् । इयत्कालं चिन्ताभरात् अलब्धनिद्रस्त्वं मयाद्य हतेषु वैरिषु सुखं निद्राणः वैतालिकस्तुतिभिः प्रयत्नेन बोधं लप्स्यस इति वाक्यार्थः प्रकरणगम्यः संक्षेपेण वृत्तिकृता व्याख्यातः । **अत्र शयित इति** । न च विधेयाविमर्शता । इयत्कालमनिद्राणस्य शयनस्यापि विधेयत्वेनाख्यानात्, तस्य तत्त्वावगतौ तदयोगात् । किन्तु विधेयतापर्याप्तेरित्याह । शयितः प्रयत्नेनेति विधेयत्वविश्रान्तिर्न युक्ता किन्तु प्रयत्नप्रबोध एव युक्ता । तत्रैव विधिपर्याप्तेरित्याह[?] **शयितः प्रयत्नेन प्रबोध्यस इति** । विशिष्टविधेर्विशेषणांशेऽपि तदवगमः स्यादेव, तेन न विधेयाविमर्शः किन्तु विध्ययुक्तिर्विधेयत्वविश्रान्त्यनौचित्यमित्यर्थः । तथा शयितो भविष्यसि यथा प्रयत्नेन परिबोध्यस इति प्रबोध एव विधेयत्वविश्रान्तिरिति । न चानुवादायुक्तता विधेयत्वविरोधिनोऽनुवाद एव तथात्वात् ।

यथा वा

वाताहारतया जगद्विषधरैराश्वास्य निःशेषितं
ते ग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः ।
तेऽपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकै-
र्दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते ॥ २८२ ॥

अत्र वाताहारादित्रयं व्युत्क्रमेण वाच्यम् ।

बालचित्तानुरञ्जनी—एवं शब्दविध्यनुवादेऽनौचित्यमुदाहृत्य आर्थमप्युदाहरति **यथा वेति** । सर्पैः पवनाशनतया आश्वस्य फूत्कारं कृत्वा जगद्भक्षितम् । जलधरजलकणतीव्रव्रतैर्मयूरैः पुनस्तेऽपि भक्षिताः । क्रूरचित्रमृगचर्मवसनैर्लुब्धकैः किरातैस्तेऽपि मयूराः क्षयं नीताः इति दम्भस्य स्फुरितं जानन्नपि असमीक्ष्यकारी जनो गुणानीहते । दाम्भिकेष्वेवेति शेषः । अत्र कृष्णाजिनधारिणो दाम्भिकान् अनन्तरमदाक्षस्य[?]ततो वायुभक्षस्य विन्यासो न्याय्यः । उत्तरोत्तरमुत्कृष्टतरत्वात् । तेन च वाताहारस्य मेघतोयकणिकातीव्रव्रतस्य चमूरुचर्मवसनस्य च व्युत्क्रमेण वाच्यत्वम् । वाच्यविवक्षायां शब्दक्रमस्यान्यथाकर्तुमशक्यत्वात् । दाम्भिकतारतम्यचिन्तायां विध्यनुवादभावस्य आर्थिकविध्यनुवादानौचित्यमित्याशयेनाह **अत्रेति** । अथवा जगन्निःशेषयितुं सर्पैर्वाताहारता स्वीकृतेति वाच्यम्, तान् ग्रसितुं अभ्रतोयकणिकातीव्रव्रतं बर्हिभिराश्रितमिति वाच्यम्, तान् क्षयं नेतुं चमूरुचर्मवसनत्वं लुब्धकैराश्रितमिति वाच्यम् । ततश्च जगद्भक्षणादिकमुद्दिश्य व्रतादिकं विधेयं स्यात् तदनभिधानाद्विध्यनुवादायुक्तत्वमित्याह **अत्रेति** ।

सारबोधिनी—ननु सुखस्वापे प्रबोधात् परतोऽपि निद्रासंभवे शयन एव विधेयतापर्याप्तिः संभवति । किंच निशां रात्रीणां शेषेऽन्ते इत्यर्थस्यापि संभवेन नोक्तदोष इत्यस्वरसादाह **वाताहारेति** । शाठ्येन धर्माचरणं दम्भः । स्फुरितं चेष्टितम् । जाल्मोऽसमीक्ष्यकारी । अत्र विषधरैर्जगन्ति निःशेषयितुं···चर्मवसनत्वं कृतमित्यर्थे दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहत इत्यर्थान्तरन्यासस्वरसेन विवक्षणीये विधेयस्य व्युत्क्रमाभिधानं विध्ययुक्ततामावहति । यदत्र चर्मवसनापेक्षया जलाहारस्य, तदपेक्षया च वाताहारस्य तीव्रव्रतत्वेन व्युत्क्रमोपन्यासो युक्तस्तत्परिहारेणायुक्ततेति व्युत्क्रमेत्यादेरर्थं वर्णयन्ति । तदसत्, एवं हि दुष्क्रमत्वं स्यात् ।

अरे रामाहस्ताभरण भसलश्रेणिशरण
स्मरक्रीडाव्रीडाशमन विरहिप्राणदमन ।
सरोहंसोत्तंस प्रचलदल नीलोत्पल सखे
सखेदोऽहं मोहं श्लथय कथय क्वेन्दुवदना ॥ २८३ ॥

अत्र विरहिप्राणदमन इति नानुवाद्यम् ।

बालचित्तानुरञ्जनी—केवलानुवादानौचित्यमुदाहरति **अरे इति**। विरहिणो वचनम्। अरे उत्पल, स्त्रीणां हस्ताभरण, भसलानां भृङ्गाणां श्रेणिशरण, कामक्रीडालज्जाशमन, वियोगिप्राणसन्तापक, सरोवरस्थितहंसशिरोभूषण, कम्पमानपत्र सखे ! अहं सखेदः। मोहं त्यज। चन्द्रमुखी कुत्रास्ते कथय। अस्मत्प्राणान् किमिति गमयसि इत्यादिना प्रकारेण विधिरेव। वितनुविरहिप्राणहननेत्यनुवादः। अतोऽनुवादानौचित्यमित्याह **अत्रेति**।

सारबोधिनी—अनुपयुक्तमाह **अरे इत्यादि**। भसला भ्रमराः। उद्दीपनत्वे स्मरक्रीडाव्रीडोपशमनम्। अत्र विरहिणो मोहश्लथनविधाने विरहिप्राणदमनत्वेनानुवादो नोचितः। विरहिविरोधित्वे तन्मोहश्लथनासंभवात्। विरहिणः पुरूरवस इत्यभिधानात्। प्रकरणानुसन्धानेनानुवादायुक्ततताप्रतीतिरित्यर्थदोषतैव।

लग्नं रागावृताङ्ग्चेत्यादि ।। २८४ ।।

अत्र 'विदितं तेऽस्तु' इत्युपसंहृतोऽपि तेनेत्यादिना पुनरुपात्तः।

बालचित्तानुरञ्जनी—त्यक्तं पुनः स्वीकृतमुदाहरति **लग्नमिति**। विदितं तेऽस्त्वित्यनेन सर्ववाक्यानां प्रयोगेणापि मध्ये गर्भीकृतेन वाक्यार्थत्रयसंहतोऽभूत् पुनस्तेनास्मि दत्तेत्युपात्त इति त्यक्तपुनःस्वीकृत इत्यर्थः। एकवाक्यतायां समाप्तपुनरात्तं भिन्नवाक्यत्वे च वाक्यान्तरस्य वक्तुमयोग्यतया अपदमुक्तम्। विपर्यये वाक्योपसंहारशङ्कामुत्थाप्य पुनरस्योपन्यासे त्यक्तः पुनः स्वीकृत इति विवेकः।

सारबोधिनी—**लग्नमित्यादि**। त्यक्त उपसंहृतैकदेशः। पुनः प्रकाशितैकदेशः। यावतो निवेद्यान् अर्थान् अनिवेद्यैव मध्ये उपसंहाराभिधानात्। समाप्तपुनरात्ते विशेष्यमात्रावृत्तिरत्र तु वाक्यार्थसमुदायस्येति द्वयोर्भेद इति।

हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः।
यथास्य जायते पातो न तथा पुनरुन्नतिः ।।२८५।।

अत्र पुंव्यञ्जनस्यापि प्रतीतिः।

यत्रैको दोषः प्रदर्शितस्तत्र दोषान्तराण्यपि सन्ति तथापि तेषां तत्राप्रकृतत्वात् प्रकाशनं न कृतम्।

बालचित्तानुरञ्जनी—अश्लीलमुदाहरति **हन्तुमिति**। हन्तुं हिंसितुं प्रवृत्तस्य स्तब्धस्य गर्वितस्य रन्ध्रान्वेषिणः सूरस्य यथा शीघ्रं पातो जायते तथा पुनरुन्नतिर्न। अत्र सूरस्य पुंसः श्वापदचेष्टितं समुचितमिति विवक्षितोऽर्थः। अत्र हन्तुं रन्तुं प्रवृत्तस्य स्तब्धस्य उत्थितस्य योनिविवरैषिणः यथा पातो रेतउत्सर्गो जायते तथा पुनरुन्नतिर्न, नष्टरागत्वादिति पुंव्यञ्जनस्यापि प्रतीतेरश्लीलत्वमित्याह **अत्रेति**। एतानि च दोशोदाहरणानि अयोगव्यवच्छेदमात्रेणोक्तानि न पुनरन्ययोगव्यवच्छेदेनापीत्याह

यत्नेति । अनङ्गमङ्गलेत्यादौ कातर्थ्यमिति श्रुतिकटु प्रथमं ग्रन्थकारेणोक्तम् तस्यान्त्यधातुसृष्टिलक्षणत्वात् [?] । अश्लीलमपि, अनङ्गस्य मङ्गलस्य गृहमिति प्रशस्तस्मरमन्दिरप्रतीतेः । अश्लीलश्च [?]सति सर्वत्र दोषान्तरसद्भावेऽपि प्रस्तुतमात्रोपक्षेप इत्यर्थः ।

सारबोधिनी--**हन्तुमित्यादि** । हननं हिंसा जघनताडनम् । स्तब्धत्वम् अक्रियत्वं उन्नतिश्च । विवरं छिद्रं स्त्रीवराङ्गमध्यम् । पातोऽपायः शैथिल्यञ्च । उन्नतिरुपचयो रागश्च । पदपरिवृत्तिसहत्वेनार्थदोषता । **यत्नैक इति** । एतच्च 'लग्नं रागावृताङ्ग्ये'त्यत्र दोषाननेकान् प्रकाशयता ग्रन्थकृतैव प्रकाशितम् । तथा चोपाधिसंकरो दोषाय न तूषधेयसङ्करोऽपीति भावः ।

कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः ।

संनिधानादिबोधार्थम् ।

अवतंसादीनि कर्णाद्याभरणान्येवोच्यन्ते तत्र कर्णादिशब्दाः कर्णादिस्थितिप्रतिपत्तये ।

यथा

अस्याः कर्णावतंसेन जितं सर्वं विभूषणम् ।
तथैव शोभतेऽत्यर्थमस्याः श्रवणकुण्डलम् ।। २८६ ।।
अपूर्वमधुरामोदप्रमोदितदिशस्ततः ।
आययुर्भृङ्गमुखराः शिरःशेखरशालिनः ।। २८७ ।।

अत्र कर्णश्रवणशिरःशब्दा संन्निधानप्रतीत्यर्थाः ।

बालचित्तानुरञ्जनी—उक्तदोषाणामेव विषयविशेषे अदोषत्वं यथासंभवमभिधातुकामः प्रथममपुष्टार्थस्यादोषत्वमाह **कर्णेति** । कर्णावतंसादिपदे कर्णादिशब्दोपादानं सन्निधानादिज्ञानार्थं क्रियत इत्यर्थः । कर्णादिशब्दानां वैयर्थ्यपूर्वकं सार्थकत्वमाह **अवतंसेति** । इक्स्थितेष्ववतंसादिशब्दप्रयोगात् कर्णादाववस्थानप्रतिपत्त्यर्थं कर्णादिशब्दप्रयोग इत्यर्थः । उदाहरति **अस्या इति** । अस्याः कामिन्याः कर्णावतंसेन सर्वंभूषणं जितम् । तथैव अस्याः श्रवणकुण्डले शोभने । अपूर्वो यो मधुरामोदः तेन प्रमोदिता दिशो यैः भृङ्गैः मधराः शिरःशेखरशालिनः पुरुषा आगताः । एतेषु कर्णादिशब्दप्रयोजनमाह **अत्रेति** ।

सारबोधिनी–दोषान्निरूप्य तेषां क्वचिददोषत्वं क्वचित् गुणत्वं क्वचिदनुभयत्वञ्च निरूपयति **कर्णावतंसादीत्यादि** । सान्निध्यादर्थदोषाणां तेष्वपि पौनरुक्त्यस्य स्फुटतया प्रथमं तस्यैव तन्निरूपितवानिति बोध्यम् । ध्वनिः शब्दः । निर्मितिरुपादानम् । **कर्णादिस्थितीति** । एवञ्चावस्थितिप्रतिपत्तिप्रयोजनहेतुत्वान्न पुनरुक्तत्वमिति भावः । पुनरुक्तत्वलक्षणे प्रयोजनं विनेत्यस्य विशेषणस्यादानादिति । तदुदाहरति **अस्या इति** । तत्रावतंसस्य कर्णस्थित्यवस्था कर्णपदेनावगम्यते । ततो वर्णनीयोत्कर्षः स्वतो न भूषणान्तरहेतुत्वम् अपि तु तत्कर्णसंबन्धेनेति पर्यवसानात् । शब्दान्तरेऽप्युदाहरति **अपूर्वेति** । **अत्रेति** । क्रमेणोदाहरणेष्वित्यर्थः । अन्यथा स्वाम्यमात्रप्रतीतेर्न तदलङ्कृतत्वप्रतीतिरिति भावः ।

विदीर्णाभिमुखारातिकराले संगरान्तरे ।
धनुर्ज्याकिणचिह्नेन दोष्णा विस्फुरितं तव ॥२८८ ॥

अत्र धनुःशब्द आरूढत्वावगतये । अन्यत्र तु

ज्याबन्धनिष्पन्दभुजेन यस्य विनिश्वसद्वक्त्रपरम्परेण ।
कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमा प्रसादात् ॥ २८९ ॥

इत्यत्र केवलो ज्याशब्दः ।

बालचित्तानुरञ्जनी—सन्निधानादीत्यादिशब्दार्थं वदन् उदाहरणान्तरमाह **विदीर्णेति** । विक्षताभिमुखविपक्षभयङ्करे युद्धमध्ये हे राजन् ! तव धनुर्ज्याघातचिह्नेन बाहुना विस्फुरिते धनुषि आरोपिता ज्या । ज्यामात्रमिति प्रतिपत्त्यर्थं धनुर्ग्रहणमित्याह **अत्रेति** । आरूढत्वावगतिरहितं स्थलमुदाहरति **अन्यत्रेति** । ज्याबन्धनिश्चलभुजेन विनिःश्वसद्वक्त्रपरम्परेण निर्जितलङ्केश्वरेण [?] यस्य कार्तवीर्यस्य वन्दीगृहे प्रसादपर्यन्तं स्थितम् । अत्र आरूढत्वात् गतिप्रयोजनाभावात् केवलज्याशब्दप्रयोग इत्याह **इतीति** ।

सारबोधिनी—**विदीर्णेति** । किणः प्ररूढव्रणलिङ्गम् । **अत्रेति** । एतदपि किणस्य प्रहारजनितत्वप्रतीतय इत्यर्थः । अथ यत्र तथा प्रतीतिर्नोद्देश्या तत्र न तथेत्याह **ज्याबन्धेति** ।

प्राणेश्वरपरिष्वङ्गविभ्रमप्रतिपत्तिभिः ।
मुक्ताहारेण लसता हसतीव स्तनद्वयम् ॥ २९० ॥

अत्र मुक्तानामन्यरत्नामिश्रितत्वबोधनाय मुक्ताशब्दः ।

बालचित्तानुरञ्जनी—उदाहरणान्तरमाह **प्राणेति** । मतद्वयं कर्तृ प्राणेश्वरालिङ्गनविलासप्रतिपत्तिभिः स्फुरता मुक्ताहारेण हसतीव । अत्र हारेणेत्युच्यमाने अन्यैः पद्मरागादिभिः मिश्रितत्वशङ्का स्यात् ततश्च हसतीव स्तनद्वयमित्यसङ्गतं स्यात् तद्व्यावृत्त्यर्थं मुक्ताशब्द इत्याह **अत्रेति** ।

सारबोधिनी—**प्राणेश्वरेति** । विभ्रमो विलासः । **अत्रेति** । तेन हारपदस्य मुक्तासन्दर्भशक्तत्वेऽपि न पुनरुक्तत्वमिति भावः **अन्येति** । तदप्युत्प्रेक्षायामुपयोगीति द्रष्टव्यम् ।

सौन्दर्यसम्पत् तारुण्यं यस्यास्ते ते च विभ्रमाः ।
षट्पदान् पुष्पमालेव कान् नाकर्षति सा सखे ॥ २९१ ॥

अत्रोत्कृष्टपुष्पविषये पुष्पशब्दः । निरुपपदो हि मालाशब्दः पुष्पस्रजमेवाभिधत्ते ।

बालचित्तानुरञ्जनी—उदाहरणान्तरमाह, **सौन्दर्येति** । हे सखे यस्याः सौन्दर्यसम्पत् तारुण्यं तेनेव विभ्रमाः सा सुन्दरा पुष्पमाला षट्पदान् विकासार्थं कर्षन्ति । अत्र मालेत्युच्यमाने पुष्पमात्रमालाशङ्का स्यात् तदर्थं पुष्पग्रहणमित्याह **अत्रेति** । ननु मालाशब्दोऽन्यत्रापि वर्तते, रत्नमाला शब्दमालेति

प्रयोगदर्शनादित्यत आह **निरुपपदेति** । मालाशब्दः पुष्प एव मुख्यः । अन्यत्र त्वौपचारिक इति भावः । एवं करिकलभशब्दे करिशब्दस्ताद्रूप्यस्य प्रतिपत्तय इति द्रष्टव्यम् ।

सारबोधिनी—**ते ते चेति** । प्रसिद्धा इत्यर्थः । **अत्रेति** । अतो न पुनरुक्तत्वम् । लक्षणया उत्कृष्टप्रतिपादकत्वादिति भावः । ननु मालाशब्दस्य न पुष्पस्रङ्मात्रशक्तत्वं, रत्नमालेति प्रयोगात् । अत आह **निरुपपदो हीति** ।

स्थितेष्वेतत्समर्थनम् ॥५८ ॥

न खलु कर्णावतंसादिवज्जघनकाञ्चीत्यादि क्रियते ।

जगाद मधुरां वाचं विशदाक्षरशालिनीम् ॥ २९२ ॥

इत्यादौ क्रियाविशेषणत्वेऽपि विवक्षितार्थप्रतीतिसिद्धौ "गतार्थस्यापि विशेष्यस्य विशेषणदानार्थं क्वचित् प्रयोगः कार्यः" इति न युक्तम् ।

बालचित्तानुरञ्जनी—चतुर्थपादमुपादाय व्याकरोति **स्थितेष्विति** । महाकविप्रयुक्तेष्वेव एतत् समर्थनं कृतं न सर्वत्र तदेवाह **न खल्विति** । वामनालङ्कारेणोक्तं दूषयति **जगादेति** । जगादेत्यनेन गतार्थस्यापि वाचमिति विशेष्यस्य मधुरां विशदाक्षरशालिनीमित्यादि विशेषणादानार्थं प्रयोगः कर्तव्य इति वामनालङ्कारेणोक्तं तदसङ्गतं विशेष्यपदव्यतिरेकेणापि क्रियाविशेषणत्वे विवक्षितार्थप्रतीतिसिद्धेरित्यर्थः ।

सारबोधिनी—नन्वेवं जघनकाञ्च्यादिप्रयोगप्रसङ्ग इत्यत आह **स्थितेष्विति** । स्थितत्वमनादिप्रयोगविषयत्वम् । वामनेन जगादेत्यत्र प्राप्तस्यापि विशेष्यस्य विशेषणदानार्थमुपादानमुचितमन्यथाऽनन्वयादित्युक्तम् । तदुदाहरणं निराकरोति **जगादेत्यादि** । न युक्तमुक्तमित्यन्तेन तत्र क्रियाविशेषणत्वेनैव विवक्षितार्थप्रतिपत्तेरित्यर्थः ।

युक्तत्वे वा

चरणत्रपरित्राणरहिताभ्यामपि द्रुतम् ।
पादाभ्यां दूरमध्वानं व्रजन्नेष न खिद्यते ॥२९३॥

इत्युदाहार्यम् ।

ख्यातेऽर्थे निर्हेतोरदुष्टता

यथा

चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥२९४॥

अत्र रात्रौ पद्मस्य संकोचः, दिवा चन्द्रमसश्च निष्प्रभत्वं लोकप्रसिद्धमिति 'न भुङ्क्ते' इति हेतुं नापेक्षते ।

बालचित्तानुरञ्जनी—विशेषणार्थं विशेष्यप्रयोगाङ्गीकारेऽपि जगादेत्याद्युदाहरणं न भवति किन्तु उदाहरणान्तरं वाच्यमित्याह **युक्तत्वे वेति** । चरणमात्रेण यत् परित्राणं तद्रहिताभ्यामपि पादाभ्यां दूरमार्गं गच्छन्नपि न खिद्यते खेदं न प्राप्नोति । अत्र पादव्यतिरेकेण वाहनादिनापि मार्गगमनस्य संभावितत्वात् अस्थानं व्रजन्नित्युक्तत्वेऽपि भूयः पद्भ्यामिति वक्तव्यम् । तद्विशेषणार्थं चरणत्रेत्यादि वक्तव्यम् । न च पूर्वत्रदत्रापि क्रियाविशेषणमिति वाच्यम् । वाहनादिना गमनसंभवेन उक्तार्थस्याप्रतीतेः । अत एतदेवोदाहार्यं न तु जगादेत्यर्थः ।

इदानीं निर्हेतोरदुष्टत्वमुदाहरति **ख्यात इति** । चञ्चला लक्ष्मीः चन्द्रं गता सती पद्मगुणान् न भुङ्क्ते । पद्माश्रिता सती चन्द्रसम्बन्धिनीं शोभां न भुङ्क्ते । उमामुखं प्रतिपद्य तु द्विसंश्रयां प्रीतिमवाप । अत्र चन्द्रं गता पद्मगुणान्न भुङ्क्त इत्येतत् रात्रौ पद्मस्य सङ्कोचादित्यादि हेतुं नापेक्षते । पद्माश्रिता चान्द्रमसीमभिख्यां न भुङ्क्ते इत्येतदपि दिवा शशाङ्कस्य निःप्रभत्वादित्यादि हेतुं नापेक्षते, लोकप्रसिद्धत्वात् । अतो न दोष इत्याह **अत्रेति** ।

सारबोधिनी—यत्र विशेषणत्वं न योग्यं, स्वयं तदुदाहरति **चरणेति** । चरणं त्रायत इति चरणत्रं उपानत् । तेन यत् परित्राणं तद्रहिताभ्यामित्यर्थः । अत्र गतेः क्रियायाश्चरणत्रपरित्राणासंभवेन पादपदोपादानमावश्यकमिति पादपदस्य न गतार्थत्वम् । ख्याते प्रसिद्धे । **चन्द्रमिति** । अभिख्यां शोभाम् । अत्र विनापि हेतूपादानं प्रतिपत्तेर्निराकाङ्क्षत्वादिति भावः ।

अनुकरणे तु सर्वेषाम्

सर्वेषां श्रुतिकटुप्रभृतीनां दोषाणाम् । यथा

मृगचक्षुषमद्राक्षमित्यादि कथयत्ययम् ।
पश्यैष च गवित्याह सुत्रामाण यजेति च ॥२८५॥

वक्त्राद्यौचित्यवशाद् दोषोऽपि गुणः क्वचित्क्वचिन्नोभौ ॥ ५९॥

वक्तृप्रतिपाद्यव्यङ्ग्यवाच्यप्रकरणादीनां महिम्ना दोषोऽपि क्वचिद् गुणः, क्वचिन्न दोषो न गुणः । तत्र वैयाकरणादौ वक्तरि प्रतिपाद्ये च रौद्रादौ च रसे व्यङ्ग्ये कष्टत्वं गुणः ।

बालचित्तानुरञ्जनी—इदानीं सर्वेषां दोषाणामदोषत्वनिबन्धनमाह **अनुकरण इति** । सर्वेषाम-दुष्टतेत्यनुषज्यते । अनुकरणं नाम शब्दस्य ताद्रूप्येणाभिधानम् मृगवच्चक्षुर्यस्यास्तां अद्राक्षमित्येव कथयति ।

एष गवित्याह पश्य सुत्रामाणं इत्याह । अत्र अद्राक्षमिति श्रुतिकटुः । गौरिति वक्तव्ये गवित्यविभक्तिक-निर्देशात् च्युतसंस्कृतिः । सुत्रामाणमिति अप्रयुक्तम् आत्मनेपदस्य प्रयोज्यत्वात् । यजेतेत्यत्रापि च्युत-संस्कृतिः । एतेषामनुकरणतया न दोषत्वमित्यर्थः । इदानीं व्यक्तिविशेषनिष्ठतया यथायोगं दोषाणामदो-दोषत्वमाह **वक्त्रादीति** । आदिशब्दार्थं कथयन् पद्यैकदेशं व्याकरोति । वक्तरि दोषस्य गुणत्वं कुत्रेत्याकाङ्क्षायामाह **तत्रेति** ।

सारबोधिनी-सर्वेषामिति । व्यवहितदोषाणामनुवृत्तये । तदाह **श्रुतिकटुप्रभृतीनामिति** । श्रुति-कटुत्वस्य । गविति च्युतसंस्कृतेः । सुत्रामेति वा प्रयुक्तस्यापवादः । ननु श्रुतिकटुप्रभृतीनामनुकार्यानुकरणेऽपि स्वरूपानपायात् कथमदोषतेति चेन्न । अनुकरणे विरोधिगुणव्यञ्जकस्यापि तच्छब्दस्वरूपस्यैव प्रतिपा-द्यत्वेन न दोषत्वम् । तत्र तदौचित्यात् । अन्यथा तस्य वक्तुमशक्यत्वात् । **गुण इति** । गुणत्वञ्च प्रकृत-रसस्य तेन रूपेणोत्कर्षणात् । **नोभाविति** । विवृणोति **क्वचिदिति** । उत्कर्षापकर्षविरहादनुभयरूपता । तेन गुणाभावस्य दोषत्वं दोषाभावस्य वा गुणत्वं निरस्तम्, विनिगमकाभावात् । अभावस्य तारतम्यानुप-पत्तेश्च । वैयाकरणादावित्यादिपदात् क्रुद्धादिपरिग्रहः । रौद्रादावित्यत्रादिपदात् वीरबीभत्सपरिग्रहः । कष्टत्वं विलम्बेनार्थप्रतीतिजनकत्वम् । श्रुतिकटुत्वञ्च ।

क्रमेणोदाहरणम्

दीधीङ्वेवीङ्समः कश्चिद्गुणवृद्ध्योरभाजनम् ।
क्विप्प्रत्ययनिभः कश्चिद्यत्र सन्निहिते न ते ॥२९६॥

यदा त्वामहमद्राक्षं पदविद्याविशारदम् ।
उपाध्यायं तदास्मार्षं समस्प्राक्षं च सम्मदम् ॥२९७॥

बालचित्तानुरञ्जनी—कश्चिन्मन्दभाग्यः दीधीवेव्योर्धातोः समः समानः यतः गुणवृद्ध्योर-भाजनम् । यथा दीधीङ् दीप्तिदेवनयोः, वेवीङ् वेतिनातुल्ये इति पठितौ धातू । अदेङ्लक्षणस्य गुणस्य, आदेच्लक्षणायाः वृद्धेश्च पात्रं न स्तः दीधीवेवीटामिति सूत्रात्, तथा अयमपि गुणस्य औदार्यादेः वृद्धेः संपल्लक्षणायाश्च अभाजनम् । अतस्तत्सदृश इत्यर्थः । कश्चिद्दुर्जनः क्विप्प्रत्ययसदृशः यत्र सन्निहिते सति गुणवृद्धी न स्तः । यथा क्विप्प्रत्ययसन्निधानात् प्रकृतेः गुणवृद्धी न स्तः । क्ङिति चेति प्रतिषेधात्, तथा दुर्जनसंयोगात् अन्यस्यापि गुणवृद्धी न भवत इत्यर्थः । अत्र कष्टत्वं गुणो न दोषः वैयाकरणस्य वक्तृत्वात् । वक्तरि वैयाकरणे उदाहरणमभिधाय प्रतिपाद्ये वैयाकरणे उदाहरणमाह **यदेति** । वैयाकरणं पदविद्या-विशारदं त्वां यदा अद्राक्षं तथा उपाध्यायं अस्मार्षम् । सम्मदं अस्प्राक्षम् । अत्र श्रुतिकटुत्वं गुणो न दोषः वैयाकरणस्य प्रतिपाद्यत्वात् इत्यर्थः ।

सारबोधिनी--दीधीङीत्यादि । गुणः पाण्डित्यादिः, इकारादीनामेत्वादिश्च । वृद्धिः संपत्, इकारादीनामैत्वादिश्च । क्विप्प्रत्ययनिभ इति सर्वाकारेण प्राप्तलोप इत्यर्थः । ते गुणवृद्धी । अत्र वैयाकरणो वक्ता । ततोऽतिशयेन वैयाकरणत्वप्रतीतेर्गुणत्वम् । **यदा त्वामिति** । अत्र वैयाकरणे प्रतिपाद्ये गुणत्वम् । तेन तस्य प्रीत्यतिशयात् । व्यङ्ग्यमहिम्नोऽयं पन्थाः ।

अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण–
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम् ।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्
व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति ॥२६८॥

वाच्यवशाद्यथा

मातङ्गाः किमु वल्गितैः किमफलैराडम्बरैर्जम्बुकाः
सारङ्गा महिषा मदं व्रजथ किं शून्येषु शूरा न के ।
कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः पुरः
सिन्धुध्वानिनि हुङ्कृते स्फुरति यत् तद्गर्जितं गर्जितम् ॥२६६॥

अत्र सिंहे वाच्ये परुषाः शब्दाः ।

बालचित्तानुरञ्जनी––व्यङ्गचवशाद्दोषस्यादोषत्वमुदाहरति **अन्त्रेति** । ताडका अन्त्रैः प्रथितानि कपालानि, तान्येव क्रूरं यथा तथा क्वणत्कङ्कणप्रायाणि भूषणानि, तेषां शब्दैः आकाशं घोषयन्ती पूर्वं पश्चाच्छर्दितं यद्रक्तं तदेव कर्दमः, तेन घनः सान्द्रः प्राग्भारः उत्तरकायः, तत्र घोरं यथा तथा उन्नतं तौ व्यालोलौ यौ, तयोर्भारेण भैरवं वपुर्यस्याः, एतादृशी सती दर्पोद्धतं यथा स्यात्तथा धावति । अत्र श्रुति-कटुत्वादिर्गुणो न दोषः, रौद्ररसस्य व्यङ्गचत्वादित्यर्थः ।

वाच्यवशाददोषत्वमुदाहरति **वाच्येति** । हे मातङ्गाः ! वृद्धिं गतैः किम् ? हे जम्बुकाः अफलैः आडम्बरैः किम् ? हे सारङ्गाः हे महिषाः किं मदं व्रजथ ? शून्ये स्थाने के न शूराः ? अथेति प्रश्ने । सर्वेऽपि शूरा इत्यर्थः । क्रोधसंभ्रमसमुत्थितस्कन्धकेसरपङ्क्तेः सत्वारेः सिंहस्य सिन्धुवत् शब्दं कुर्वति हुङ्कृते स्फुरति सति यत् गर्जितं तदेव गर्जितम्, नान्यत् इत्यर्थः । अत्र वाच्यः सिंहसत्त्वोत्कर्षादुक्तसाहशाली वीररौद्रादिरसोचित इति परुषा अपि शब्दाः प्रयुक्ता इति न दोष इत्याह **अत्रेति** ।

सारबोधिनी––**अन्त्रेति** । प्रोतं ग्रथितं, नलकं जङ्घास्थि तान्येव क्रूरं यथा स्यात्तथा क्वणत्-कङ्कणानि तत्प्रायाणि बहुलानि प्रेङ्खितभूषणानि तेषां रवैः शब्दैः छर्दितं वान्तम् । घनोऽविरलः, प्राग्भारः क्षरणं धारा वा । अत्रोद्भटा वर्णा ओजो व्यञ्जयन्तः प्रकृते रौद्रबीभत्सयोरानुगुण्यमादधते । **मातङ्गा इति** । आडम्बरैः । द्वितीयगर्जितपदं सफलत्वपरम् । अत्र सिंहे ओजस्विनि वर्णनीये तन्निष्ठौजः-प्रकाशकाः, दीर्घसमासो विकटवर्णाश्च गुणः ।

प्रकरणवशाद्यथा

रक्ताशोक कृशोदरी क्व नु गता त्यक्त्वानुरक्त जनं
नो दृष्टेति मुधैव चालयसि किं वातावधूतं शिरः ।
उत्कण्ठाघटमानषट्पदघटासंघट्टदष्टच्छद-
स्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कुतः ॥३००॥

अत्र शिरोधूननेन कुपितस्य वचसि ।

बालचित्तानुरञ्जनी—प्रकरणवशात् अदोषत्वमुदाहरति **प्रकरणेति**। हे रक्ताशोक, सा कृशोदरी अनुरक्त जनं त्यक्त्वा क्व नु गता नो, दृष्टा इति वायुकम्पितं शिरः किं वृथैव चालयसि ? उत्कण्ठा-घटमाना ये भ्रमराः तेषां यः समूहः तत्संघट्टनेन दष्टानि पत्राणि यस्य, एवंविधः भवतः पुष्पोद्गमः तत्पादाहतिमन्तरेण कुतः स्यात् ? अत्र प्रकृतेन रक्ताशोककर्तृकेण शिरोविधूननेन कुसुमितस्य कस्यचिद्रागोन्मत्तस्य वचसि "उत्कण्ठाघटमान" इत्यादौ श्रुतिकटुशब्दप्रयोगो गुणः, न दोष इत्याह **अत्रेति**।

सारबोधिनी—रक्ताशोकेति। रक्तः शोणोऽनुरक्तश्च । अशोको वृक्षविशेषः शोकापनोदकश्च । संघट्टो गाढमेलनम् । अत्र प्रकरणगम्यविप्रलम्भानौचित्येऽपि प्रस्तुतशिरोधूननप्रतिपादितदर्शनापलाप-प्रादुर्भूतक्रोधप्रकर्षकत्वेन दीर्घसमासविकटवर्णयोर्गुणत्वम् तेनोन्मत्तपुरूरवसोऽङ्गस्य क्रोधस्य प्रकर्षकत्वा-दङ्गिनो विप्रलम्भस्यापि प्रकर्षः । नन्वत्र कोपस्य व्यङ्ग्यत्वात् व्यङ्ग्यौचित्यमेवेति चेत् न, वक्त्राद्यौ-चित्याद् व्यतिरिक्तस्थानीयस्य व्यङ्ग्यस्य व्यङ्ग्यपदेन विवक्षणात् गोवृषन्यायात् ।

क्वचिन्नीरसे न गुणो न दोषः । यथा

शीर्णघ्राणाङ्घ्रिपाणीन् व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्
दीर्घाघ्रातानघौघैः पुनरपि घटयत्येक उल्लाघयन् यः ।
घर्मांशोस्तस्य वोऽन्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्ते-
र्दत्तार्घाः सिद्धसंघैर्विदधतु घृणयः शीघ्रमंहोविघातम् ॥३०१॥

अप्रयुक्तनिहतार्थौ श्लेषादावदुष्टौ । यथा

येन ध्वस्तमनोभवेन बलिजित्कायः पुरा स्त्रीकृतो
यश्चोद्‌वृत्तभुजङ्गहारवलयो गङ्गां च योऽधारयत् ।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः ॥३०२॥

अत्र माधवपक्षे शशिमदन्धकक्षयशब्दावप्रयुक्तनिहतार्थौ ।

बालचित्तानुरञ्जनी—दोषोऽपि क्वचिद्‌गुण इत्युदाहृत्य क्वचिन्न दोषो न गुण इत्युदाहरति **क्वचिदिति** । तस्य सूर्यस्य किरणाः वः शीघ्रं दुरितविघातं कुर्वन्तु । तस्येति । कस्य एष, असहायो यः पापसमूहैः विदीर्णान् ग्रस्तान् व्रणयुक्तैः शरीरैः उपलक्षितान् घर्घराप्रकटशब्दान् दीर्घश्वासान् पुरुषान् उल्लाघयन् व्याधिविनिर्मोकं कुर्वन् घटयति, पुनः समीचीनान् करोति । किंविशिष्टस्य तस्यान्तर्मध्ये द्विगुणा [घना या घृणा कृपा] तदायत्ता विघ्नरहिता वृत्तिर्यस्य । कीदृशाः किरणाः, सिद्धसमूहैः दत्तार्घाः । अत्र रसरहितत्वात् शब्दपारुष्यं गुणदोषकक्षामतिक्रम्य ताटस्थ्येन वर्तत इति न गुणो न दोष इत्यर्थः । अप्रयुक्तनिहतार्थयोरदोषत्वमुदाहरति **अप्रयुक्ते**ति । उमायाः धवः पतिरीश्वरः तत्पक्षे [ध्वस्त-]कामेन येन बलिजितो विष्णोः कायः पुरा त्रिपुरविजयसमयेऽस्त्रीकृतः । उद्‌वृत्ताः भुजङ्गाः हारवलया यस्य । गङ्गां चयः अधारयत् । अमराः यस्य शिरः शशिमदाहुः । हर इति स्तुत्यं नाम चाहुः । अन्धकासुर-क्षयकरः ईदृशः उमापतिः त्वां त्रायात् । अथ माधवपक्षे सर्वदा समस्ताभिलाषदायी माधवो मुकुन्दः पायात् । परमार्थतः अभवेन जन्मरहितेन येन माधवेन अनः शकटं ध्वस्तं अग्रपादेन क्षिप्तम्, बलिजित् बलिनो दानवान् जितवान् कायः स्वशरीरं पुरा अमृतमथनवेलायां स्त्रीकृतः नारीकृतः । अमृतापहारिणो दानवान् स्त्रीरूपो भगवान् व्यामोहयामासेति प्रसिद्धिः । यश्च उद्‌वृत्तस्य भुजङ्गस्य कालियरूपस्य हारवः हाहेति दीनः शब्दः स एव लयः कालावच्छेदो यस्य, अगं गोवर्धनं गां भूमिं अम्बुधिमग्नां चाधारयत् । यस्य नाम अमराः शशिनं मथ्नातीति शशिमदाहुः तस्य शिरो हृतवान् शशिमच्छिरोहर इति स्तुत्यमाहुः । अन्धकानां यादवविशेषाणां क्षयकरः । अत्र माधवपक्षे शशिमदिति राहौ अप्रयुक्तः । अन्धकक्षयशब्दो निहतार्थः । अन्धकशब्दस्य यादवेभ्योऽपि दैत्यविशेषे, क्षयशब्दस्य निवासादपि विनाशे प्रसिद्धिबाहुल्यात् । तथापि श्लेषालङ्काराय गृहीतत्वादनयोरदुष्टत्वमित्याह **अत्रे**ति ।

सारबोधिनी—नीरसे शृङ्गारादिरसशून्ये, न तु निरास्वादे, तत्र काव्यताविरहात् । क्वचिन्न दोषत्वं न गुणत्वम् । यत्र न रसः न वा वक्त्राद्यौचित्यम्, तत्र न गुणः, न दोषः । शीर्णघ्राणेत्यादौ विकटा ओजोव्यञ्जकास्ते च शृङ्गारवीरादिरसानामेकस्याप्यभावान्नापकर्षोत्कर्षकाः प्रकृतस्यास्वाद्यस्य भावस्य माधुर्यौजसोरभावादकिंचित्कराः । नन्वत्रापि दयावीरत्वेन सरसत्वम् ओजस्विनि सूर्ये वाच्ये "सिन्धुध्वानिनी"तिवत् वाच्यौचित्यमस्तीति चेन्न । अनुप्रासमात्रलग्नकत्वेन कवेस्तत्र तथा तात्पर्याभावात् दयावीरस्य ग्रन्थकृतानङ्गीकृतत्वाच्च । न चानुप्राससंपादकत्वेनैव गुणत्वम्, "सोध्यैष्ट वेदानि"त्यत्रापि तथा प्रसङ्गात् । **शीर्णेत्यादि** । उल्लाघयन् नीरोगान् कुर्वन् । द्विगुणा अतिशयिता घृणा कृपा तन्निघ्ना तदायत्ता निर्विघ्ना निरपवादा वृत्तिर्यस्य । घर्मांशोः सूर्यस्य घृणयो रश्मयः अघं पापं तद्विघ्नान्तं विदधतु इत्यन्वयः । श्लेषादावित्यादिपदात् यमकादिपरिग्रहः ।

येनेति । स माधवः पायात् येनानः शकटं ध्वस्तम् । अभवेन जन्मरहितेन बलिमसुरभेदं जयतीति बलिजित् कायः पूर्वं स्त्रीकृतो नारीकृतः । असुराणाममृतपाननिरासाय उद्वृत्तो भुजङ्गः कालियस्तं हृतवान् । औद्धत्यस्य विशेषणस्य हननद्वारा । आरवे शब्दब्रह्मणि लयो यस्य, अगं पर्वतं गोवर्द्धनाख्यं, गां पृथिवीं योऽधारयत् । तथा अन्धकादयस्तेषां क्षयं विनाशं कृतवान् । सर्वं ददातीति सर्वदः । पक्षे उमाधवः शिवः, सर्वदा सर्वकालेन । ध्वस्तकामेन बलिजितः श्रीकृष्णस्य कायोऽस्त्रीकृतो बाणत्वमापादितस्त्रिपुरदाहे विष्णुः । भुजङ्ग एव हारो वलयं च यस्य गङ्गा जाह्नवी । यस्य शशिनं मथ्नातीति शशिमद्राहुस्तस्य शिरो हरतीति स्तुत्यं च नाम अमरा आहुः । अन्धकोऽसुरभेदः । क्षयो नाशः । **अत्रेति** । अलङ्कारकृतचारुत्वनिर्वाहकत्वेन प्रतीतिमान्थर्यस्याप्यदूषणत्वात्तौ न दुष्टाविति बोध्यम् । "दधारः हृदये गौरी देवं हिमकरालयम्" इत्यत्र श्लेषनिर्वाहकत्वेन हिकारस्य निरर्थकस्य गुणत्वमिति केचित् । [तन्न युक्तम् श्लेषनिर्वाहप्रयोजनान्तरसत्त्वेन पादपूरणमात्रप्रयोजनकत्वस्वरूपा-भावात् धर्मिसत्तायामेवोत्कर्षकत्वात्]

अश्लीलं क्वचिद् गुणः । यथा सुरतारम्भगोष्ठ्याम् "द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु" इति कामशास्त्रस्थितौ ।

करिहस्तेन संबाधे प्रविश्यान्तर्विलोडिते ।
उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते ॥३०३॥

शमकथासु

उत्तानोच्छूनमण्डूकपाटितोदरसन्निभे ।
क्लेदिनि स्त्रीव्रणे सक्तिरकृमेः कस्य जायते ॥३०४॥

निर्वाणवैरदहनाः प्रशमादरीणां नन्दन्तु पाण्डुतनयाः सह माधवेन ।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥३०५॥

अत्र भाव्यमङ्गलसूचकम् ।

बालचित्तानुरञ्जनी–अश्लीलस्यादुष्टत्वमुदाहरति **अश्लीलमिति** । "तर्जन्यनामिके श्लिष्टे मध्यमा पृष्ठतस्तयोः । करिहस्त इति ख्यातः कामशास्त्रविचक्षणैः" इति लक्षणलक्षितेन करिहस्तेन संबाधे स्मरमन्दिरे विलोडिते सति पुंसो ध्वजः मेहनदण्डः साधनान्तर्विराजत इति सुरतारम्भोचितं वस्तु । तत्र द्व्यर्थैः उभयार्थैः गोपनीयमर्थं सूचयेदिति कामशास्त्रस्थितौ सत्यां 'यस्य ते विध्वजः केतुः संबाधे सैन्यसंमर्दे करिहस्तेन गजशुण्डया क्षोभे सति उपसर्पन् स्वपक्षं प्रत्यावर्तमानः साधनान्तर्बलमध्ये विराजत इत्यनेन वाक्येन क्रीडापरिहारार्थं व्यवधीयते । जुगुप्सादाय्यश्लीलं गुण इत्यर्थः । विरक्तकथायामप्युदाहरति **शमेति** । उत्तानः वैपरीत्येन स्थितः उच्छूनश्चासौ मण्डूकश्च तस्य विदारितं यदुदरं तत्संनिभे क्लेदिनि स्त्रीव्रणे वराङ्गे अकृमेः कृमिव्यतिरिक्तस्य कस्य सक्तिः जायते न कस्यापि । शमकथात्वादश्लीलमपि गुण

एवेत्यर्थः। अमङ्गलस्य गुणत्वमुदाहरति निर्वाणेति। अरीणां प्रशमात् निर्वाणः शान्तः वैरमेव दहनो येषां ते पाण्डुतनयाः माधवेन सह नन्दन्तु। सभृत्याः कुरुराजसुताः दुर्योधनादयः रक्तैरनुरक्तैः प्रकर्षेण साधिता भूर्यैः, अथवा रक्ता अनुरक्ता प्रसाधिता भूर्यैः, निवृत्तकलहाः स्वस्था निर्व्याकुला भवन्तु। अत्र रक्तेन रुधिरेण प्रसाधिता अलङ्कृता भूर्यैः क्षतविग्रहाः शरीराणि येषां स्वस्थाः स्वर्गस्था इत्यमङ्गलं वस्तु। तस्य शत्रुविषये भविष्यदमङ्गलसूचकतया गुणत्वमित्याह अत्रेति।

सारबोधिनी—असमर्थानुचितार्थनिरर्थकावाचकानां नित्यदोषत्वेन तानपहायाश्लीलप्रतिप्रसवमाह **सुरतेत्यादि**। सुरतारम्भाय गोष्ठी सुरतारम्भगोष्ठी। द्व्यर्थैरनेकार्थैः, पिशुनयेत् सूचयेत्। करिहस्तो गजशुण्डा कठिनयोनिशैथिल्यापादको बहिःकृतमध्यमाङ्गुलीकस्तर्जन्यनामिकासंयोगश्च। तदुक्तम्—

तर्जन्यनामिके युक्ते मध्यमा स्याद्बहिष्कृता।
करिहस्तः समुद्दिष्टः कामशास्त्रविशारदैः॥

संबाधे सङ्कटे सङ्कुचिते च विलोडिते चपलिते विकाशिते च, उपसर्पन् समीपे गच्छन् प्रविशंश्च ध्वजः केतुः पुंल्लिगं च। साधनं सैन्यं वराङ्गं च कामशास्त्रमर्यादा च। शाब्ददोषत्वम्, उदासीनवचनया स्वार्थसंवृत्या रसोत्कर्षकतया च गुणत्वम्। जुगुप्सोदाहरणमाह शमेति। शमाय वैराग्याय कथा शमकथा। **उत्तानेति**। पाटितं विदारितं, इह वैराग्यहेतुघृणोत्पादनया गुणत्वम्। अमङ्गलप्रतिप्रसवमाह **निर्वाणेति**। प्रशमो युद्धसंरम्भनिवृत्तिर्मरणं च। रक्तानुरक्ता, रक्तं रुधिरं च। प्रसाधिनाऽलङ्कृता वशीकृता च। विग्रहो युद्धं शरीरं च। स्वस्मिन् आत्मनि प्रकृतौ तिष्ठन्तीति स्वस्थाः स्वर्गगामिनश्च। अवैकल्पिकविसर्गलोपान्न वैरूप्यम्। **अत्रेति**। दुर्योधनामङ्गलस्य नायकमङ्गलत्वेन गुणत्वम्।

संदिग्धमपि वाच्यमहिम्ना क्वचिन्नियतार्थप्रतीतिकृत्त्वेन व्याजस्तुतिपर्यवसायित्वे गुणः। यथा

पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम्॥३०६॥

प्रतिपाद्यप्रतिपादकयोर्ज्ञत्वे सत्यप्रतीतं गुणः। यथा

आत्मारामा विहितरतयो निर्विकल्पे समाधौ
ज्ञानोद्रेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्ता-
त्तं मोहान्धः कथमयममुं वेत्ति देवं पुराणम्॥३०७॥

बालचित्तानुरञ्जनी—सन्दिग्धस्यापि क्वचिद्गुणत्वमुदाहरति सन्दिग्धमिति। वाच्यमहिम्ना अभिधेयप्रभावेन नियतस्य एककोटिकस्यार्थस्य प्रतिपत्तिं कृत्वैव, न कदाचिदकृत्वा तस्य वक्ष्यमाणव्याजस्तुति-

पर्यवसायित्व इत्यर्थः। हे नाथ, आवयोः सदनं सममिति यत् साम्यं तत् किं उभयोरैश्वर्यादाहोस्वित् दारिद्र्यादिति प्रयुक्तः संदेहेऽपि, राजवेश्मनि ऐश्वर्यस्वभावे न दारिद्र्य नाथैश्वर्येण [?] दारिद्र्यस्वभावे ब्राह्मणवेश्मनि नैश्वर्यमिति निष्कर्षः। ततश्चेयं व्याजरूपा स्तुतिः, यत्र निन्दायां तात्पर्यम्। पृथनि स्वर्ण-पात्रानि यत्र, अलङ्कृतः निःशेषः सर्वः परिजनो यत्र, लसन्तः ये करेणवः गजाः तैर्गहनमिति राजमन्दिरे, दरिद्रगृहे च पृथुकानां बालानां अर्थाद् बुभुक्षितानां आर्तस्वरस्य दीनध्वनेः स्थानम्, भुवि उषिताः शय्याद्यभावेन स्थण्डिलशायी निःशेषो मौलिमाल्यविरहितः परिजनो यत्र। वबयोरभेदात् बिले रन्ध्रे सीदन्तीति बिलसदो मूषकादयः, कुत्सायां कप्रत्ययः, तेषां रेणुभिः पांसुभिर्गहनम्। अथवा बिलेषु सत्का विद्यमाना रेणव इति तैः। अत्र सन्दिग्धस्यापि नियतकोटचर्थप्रतिपादनद्वारैव व्याजस्तुतिपर्यवसायित्वात् गुणत्वमेवेत्यर्थः।

अप्रतीतस्य गुणत्वमुदाहरति **यथेति**। अपरिमितानन्दसान्द्रे आत्मन्येव आरमन्ति क्रीडन्त इत्यात्मारामाः। भेदसंसर्गज्ञानं विकल्पः, तत्र ध्येयेन सह एकतापत्तिः समाधिः तत्र, विहितरतयः। ज्ञानस्याधिक्याद्विघटितास्तमसः अशुद्धाद् घना ग्रन्थयो यैः। सत्त्वगुणनिष्ठाः पुरुषाः, तमसां ज्योतिषां वा परस्तात् यंकं वीक्षन्ते, मोहान्धः अयं तममुं पुराणं देवं कथं वेत्ति। अत्र निर्विकल्पसमाधितमःसत्त्वादयः शब्दा योगशास्त्रप्रसिद्धत्वात् अप्रतीता अपि वक्तृबोद्धव्ययोर्व्युत्पन्नत्वाद्गुणा एवेत्यर्थः।

सारबोधिनी—सन्दिग्धमिति। सन्देह आपातत इति शेषः। कुत इत्यत आह **नियतेत्यादि**। नियतः प्रकृतोऽर्थः। प्रतिपत्तिर्निश्चयः। हेतुमाह **वाच्येति**। वाच्यो वर्णनीयो राजा, महिम्ना महिमप्रतिपत्त्या, न कविः, स्ववर्णनमभिप्रेत्य अकिञ्चित्करत्वात्। किन्तु राजवर्णनेन दैन्यनाशहेतुत्वात् इति। तर्हि दोषाभाव एवेत्यत आह **व्याजेति**। सम्प्रति बाहुल्येन राजोत्कर्षप्रतीतेर्गुणत्वमित्यर्थः।

ननु नृपतिविषयकभावस्यारसत्वे "शीर्णघ्राणे"त्यादाविवानुभयत्वप्राप्तौ कथं गुणत्वमिति चेन्मैवम्। भावस्य माधुर्यौजोरूपगुणविरहेण श्रुतिकटुप्रभृतीनां गुणव्यञ्जकानां तथात्वेऽपि व्याजस्तुतेरलङ्कारस्य भावोत्कर्षकत्वेन गुणत्वाविरोधात्। **पृथुकार्तेत**। पृथु विपुलं, कार्तस्वराणां सुवर्णानां पात्रं यत्र, पृथुकानां शिशूनां आर्तस्वराणां क्षुत्कातरध्वनीनामधिकरणं च। भूषिता अलङ्कृताः, भूम्यां धरण्यामुषिताश्च। विलसन्त्यः शोभमानाः करेणवो हस्तिन्यः, बिले छिद्रे सीदन्तीति बिलसत्का मूषकास्तेषां रेणुभिर्गहनं, यद्वा बिले सत्कं जलं रेणुश्च ताभ्यां गहनम्।

प्रतिपाद्येति। प्रतिपाद्यः शब्दप्रयोगोद्देश्यः, प्रतिपादको वक्ता, ज्ञत्वं तच्छास्त्रपटुत्वम्। **आत्मेति**। आत्मनि चिदानन्दे, आरमन्तीत्यारामाः, यद्वा आत्मैव आरामः क्रीडास्थानम्, येषां ते आत्मारामाः, आत्ममात्रावलम्बिनो निर्विकल्पः समाधिः। तमोग्रन्थिः मिथ्याज्ञानजन्यः संस्कारः। सत्त्वं गुणः तन्निष्ठास्तन्मात्रविश्रान्ताः। कमपि वागाद्यगोचरम्। कथं त एव पश्यन्तीत्यत आह **तमसामिति**। तमसां ज्योतिषां वा परस्तात् परतो वर्तमानं, रजस्तमोभिभूतैरलभ्यमित्यर्थः। अयं दुर्योधनः। अत्र प्रतिपाद्यप्रतिपादकौ सदैवाभिमतौ योगशास्त्रविज्ञाविति न प्रतीतिविलम्ब इत्यत्राप्रतीतं न दोषः। नन्वेवं दोषाभावत्वमेव कथं गुणत्वमिति चेन्न। इतराज्ञातशास्त्रत्वेन स्वज्ञानोत्कर्षद्वारा भावोत्कर्षकत्वात्।

स्वयं वा परामर्शे । यथा

षडधिकदशानडीचक्रमध्यस्थितात्मा हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः ।

अविचलितमनोभिः साधकैर्मृग्यमाणः स जयति परिणद्धः शक्तिभिः शक्तिनाथः ।।३०८।।

अधमप्रकृत्युक्तिषु ग्राम्यो गुणः । यथा

फुल्लुक्करं कलमकूरणिहं वहन्ति जे सिन्धुवारविडवा मह वल्लहा दे ।

जे गालिदस्स महिसीदहिणो सरिच्छा दे किं च मुद्धविअइल्लपसूणपुञ्जा ।।३०९।।

अत्र कलमभक्तमहिषीदधिशब्दा ग्राम्या अपि विदूषकोक्तौ ।

बालचित्तानुरञ्जनी—सहृदयविमर्शवेलायां यदप्रतीतं तस्य गुणत्वमाह यथेति । षड्भिरधिकाः याः दश नाड्यः, षोडश नाड्य इत्यर्थः। तासां चक्रं मण्डलं पिण्डरूपं तस्य मध्यं हृदयं तत्र स्थितः अत एवात्मा आत्मभूतश्च । हृदि विशिष्टं निहितं रूपं ज्योतिरादिरूप आकारो येन । तं परमेश्वरं विदन्ति ये तेषां सिद्धिदः, सिद्धिं परापरमुक्तिरूपां ददातीति । निश्चलचित्तैः साधकैः अन्विष्यमाणः इच्छाज्ञानक्रिया-शक्तिभिः परिणद्धो व्याप्तः शक्तीनामिच्छादीनामेव नाथः प्रयोक्ता । "शक्तिश्च शक्तिमांश्चेति पदार्थद्वय-मुच्यते । शक्तयोऽस्य जगत्सर्वं शक्तिमांश्च महेश्वरः" इत्युक्तत्वात् । एवंविधो जयति । नाड्यश्च—

इडा च पिङ्गला चैव सुषुम्ना चापराजिता ।
गान्धारी हस्तिजिह्वा च पूषा चैव तथापरा ।।
अलम्बुसा कुहुश्चैव शङ्खिनी दशमी स्मृता ।
तालुजिह्वेऽभजिह्वा च विजया कामदापरा ।।
अमृता बहुला नाम नाड्यो वायुसमीरिताः ।

अत्र नाडीसिद्ध्यादिपदानामागममात्रप्रसिद्धानामपि स्वयं द्रष्टव्यतायां गुणत्वमित्यर्थः ।

नीचपात्रोक्तिषु ग्राम्यस्य गुणत्वमुदाहरति । जे सिन्धुवारविडवा ये सिन्धुवारविटपाः, कलमकूरणिहं कुसुमकूरं पुष्पोत्करं वहन्ति ते मह मम वल्लहा वल्लभाः । किञ्च जे ये, गालिदस्स गलितस्य, महिसीदहिणो महिषीदघ्नः, सरिच्छा सदृशाः । ते मुद्धविअइल्लपसूणपुञ्जा मुग्धविकसितप्रसूनपुञ्जाः, मम वल्लभाः । अत्र कलमभक्तादिशब्दानां ग्राम्यत्वेऽपि विदूषकेण नीचेन उक्तत्वाद् गुणत्वमेवेत्याह अत्रेति ।

सारबोधिनी—नाड्यः षोडश । तदुक्तम्

इडा च पिङ्गला चैव सुषुम्ना चापराजिता ।
गान्धारी हस्तजिह्वा च पूषा चैव तथापरा ।।
अलम्बुसा कुहुश्चैव शङ्खिनी दशमी स्मृता ।
तालुजिह्वेभजिह्वा च विजया कामदापरा ।।
अमृता बहुला नाम नाड्यो वायुसमीरिताः ।

तासां चक्रं मणिपूराख्यं तन्मध्ये स्थित आत्मा स्वरूपं यस्य तद्वति हृदि विनिहितरूपः। **सिद्धि-**रणिमादिः। **अधमेति**। अधमोक्तिषु हास्यकरीषु ग्राम्योक्त्या हास्यपरिपोषाद्ग्राम्यस्य गुणत्वमित्यर्थः। **फुल्लेति**।

पुष्पोत्करं कलमभक्तनिभं वहन्ति ये सिन्धुवारविटपा मम वल्लभास्ते।
ये गालितस्य महिषीदध्नः सदृक्षास्ते किं च मुग्धविचकिलप्रसूनपुञ्जाः॥

अत्रेति। कलमेत्यादिप्राकृतविवरणम्। **विदूषकोक्ताविति**। गुण इति संबध्यते। हास्यरसपरिपोषकत्वादिति शेषः। "स पुनर्वेषभाषाभिर्हास्यकारी विदूषकः" इति तल्लक्षणात्। नेयार्थादीनां नित्यदोषतैव। अत्र केचित् यदि शीघ्रोपस्थितिस्तदा नेयार्थतापि गुणः। "काञ्चीगुणस्थानमनिन्दितायाः" इत्यादौ ग्राम्यस्य जघनपदस्य परिहारेण प्रयुक्तस्य तत्पदस्य कान्तिपोषकत्वात्। न चास्य यौगिकत्वम्, जघनत्वेन प्रतीतेः। एवं विरुद्धार्थविवक्षायां विरुद्धमतिकृतेऽपि गुणत्वमित्याहुः।

न्यूनपदं क्वचिद् गुणः। यथा

गाढालिङ्गनवामनीकृतकुचप्रोद्भूरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा।
मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम्॥३१०॥

क्वचिन्न गुणो न दोषः। यथा

तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः।
तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः॥३११॥

अत्र पिहितेत्यतोऽनन्तरं "नैतद्यतः" इत्येतैर्न्यूनैः पदैर्विशेषबुद्धेरकरणान्न गुणः। उत्तरा प्रतिपत्तिः पूर्वां प्रतिपत्तिं बाधते, इति न दोषः।

बालचित्तानुरञ्जनी—क्वचिन्न्यूनपदस्य गुणत्वमुदाहरति यथेति। गाढालिङ्गनेन वामनीकृतौ कुचौ यस्याः सा चासौ च प्रोद्भूतः रोमोद्गमो यस्याः सा। सान्द्रो यः स्नेहरसः तस्य अतिरेकेण आधिक्येन विगलत् श्रीमत् नितम्बे अम्बरं यस्याः सा। हे मानद मा मा अति मा अलं मा इति क्षामाक्षरोल्लापिनी प्रियतमा सुप्ता किंनु, मृता किंनु, लीना विलीना नु किम्? शरीरभेदपक्षे आद्यं वितर्कद्वयम्। स्वापो बाह्येन्द्रियव्यापारव्युपरमः सर्वेन्द्रियपरिस्पन्दशून्यता मरणम्। शरीराभेदपक्षे उत्तरं वितर्कद्वयम्। लयः

शरीरैक्यं विलयः आत्मैक्यम्। अत्र मा मेत्यादिनिषेधमात्रवचनेऽवेतेषु 'पीडय' 'आयासये'त्यादि-क्रियोपादानाभावेन न्यूनत्वं गुण इत्यर्थः। अस्यैव क्वचिन्न दोषो न गुण इत्येतदुदाहरति। कस्यचिद्विरहिणः पुरूरवसो वा वचनम्। कोपवशात् प्रभावेन दिव्यया शक्त्या तिरोहिता सतीति यत् सा नायिका मह्यं दीर्घं न कुप्यति। स्वर्गायोत्पतिता भवेत्। अस्याः मनः पुनः भावार्द्रम् मे पुरोवर्तिनीं तां विबुधद्विषोऽपि हर्तुं न शक्ताः। एवंविधं मम त्वं नयनयोः अत्यन्तमगोचरं यातेति कोऽयं विधिः? कः प्रकारः? अत्र गुणाभावमाह अत्रेति। पिहितेतिशब्दादनन्तरं "नैतद्यतः" इति पदानि, तैर्न्यूनैरपि सद्भिर्न गुणः कश्चिदुत्पादितः, विशेषे विलक्षणे प्रमेयांशे बुद्धिप्रतिभानस्याकरणादित्यर्थः। दोषाभावमाह **उत्तरेति**। दीर्घं न कुप्यतीत्येवमादिका उत्तरा प्रतिपत्तिः तिष्ठेत्कोपेत्यादिकां पूर्वप्रतिपत्तिं बाधते। नैतद्यत इति पदं विना चिरकोपाभावकथनेनैव कुपिता सती तिरोभूतेत्येतद्व्याप्यत इति न दोष इति भावः।

सारबोधिनी—गाढेत्यादि। अत्र पीडयेति पदमनुपात्तं वक्त्रया हर्षमोहातिशयं प्रतिपादयत् गुणतामापद्यते। अध्याहारेण वाक्यार्थप्रतीतिविलम्बेऽपि प्रकृतरसपरिपोषकत्वात् प्रयोजनवती लक्षणा वाश्रयणीयेति भावः। उक्तरूपा प्रिया मम मनसि सुप्ता वा, निश्चलत्वेन वर्तमानत्वात्। सुप्तस्य श्वासादिकमनुभूयत इत्यत आह **मृता नु किमिति**। मृतापि बहिरनुभूयत इत्यत आह **विलीना नु किमिति**। क्षीरनीरवदिति शेषः। **तिष्ठेदिति**। प्रभावोऽन्तर्धानकरणिका विद्या। विधिर्दैवम्। **न्यूनैरनुपात्तैः**। **विशेषबुद्धेरित्यादि**। अत्र वितर्काख्यभावस्य न्यूनैः पदैर्गाढालिङ्गनेत्यत्रैव प्रकर्षकत्वाभावात्। तदाह **उत्तरा प्रतिपत्तिरिति**।

अधिकपदं क्वचिद्गुणः। यथा

यद्वञ्चनाहितमतिर्बहु चाटुगर्भं कार्योन्मुखः खलजनः कृतकं ब्रवीति।
तत्साधवो न न विदन्ति विदन्ति किन्तु कर्तुं वृथा प्रणयमस्य न पारयन्ति ॥३१२॥

अत्र 'विदन्ति' इति द्वितीयमन्ययोगव्यवच्छेदपरम्। यथा वा

वद वद जितः स शत्रुर्न हतो जल्पंश्च तव तवास्मीति।
चित्रं चित्रमरोदीद्धा हेति परं मृते पुत्रे॥ ३१३ ॥

इत्येवमादौ हर्षभयादियुक्ते वक्तरि।

कथितपदं क्वचिद् गुणः, लाटानुप्रासे, अर्थान्तरसंक्रमितवाच्ये, विहितस्यानुवाद्यत्वे च।

क्रमेणोदाहरणम्

सितकरकररुचिरविभा विभाकराकार धरणिधर कीर्तिः।
पौरुषकमला कमला सापि तवैवास्ति नान्यस्य ॥३१४॥

ताला जाअंति गुणा जाला दे सहिअएहिँ घेप्पन्ति ।
रइकिरणाणुग्गहिआइँ होन्ति कमलाइँ कमलाइँ ।।३१५।।

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः ।।३१६।।

बालचित्तानुरञ्जनी—क्वचिदधिकपदस्य गुणत्वमुदाहरति **अधिकमिति**। वञ्चनायां विरचितबुद्धिः कार्योन्मुखः सन् दुर्जनः बहु प्रियवाग्गर्भं कृतकं यद्वचनं ब्रवीति साधवः तत्र विदन्तीति न, किन्तु विदन्ति। अस्य खलस्य वृथा स्नेहं कर्तुं न पारयन्ति। उपकारमेव कुर्वन्तीत्यर्थः। अत्र द्वितीयं विदन्तीति पदमधिकमपि अन्ययोगव्यवच्छेदार्थमभिहितमिति गुणः। तदभावे साधूनां खलवाक्यपरिज्ञानादवैदग्ध्यप्रसङ्ग इत्याशयेनाह **अत्रेति**।

उदाहरणान्तरमाह **यथा वेति**। म शत्रुजितः। वद वद। तवास्मि तवास्मीति जल्पन् न हतः। चित्रं चित्रं, पुत्रे मृते सति हा हेति केवलं अरोदीत्। अत्र पादत्रयेण हर्षभयविस्मयशोकानां प्रत्यायकत्वेनाधिकमपि **वदेत्यादिपदं** गुण एवेत्याह **इतीति**।

कथितपदस्य गुणाभावे त्रीनुपाधीनाह **कथितमिति**।

सारबोधिनी—**यद्वच्चनेति**। अस्य प्रणयं वृथा कर्तुं न पारयन्तीत्यन्वयः। **अत्र विदन्तीति**। न विदन्ति एवं नेति नञ्द्वयप्रयोगेणापि वेदनातिशये सिद्धे पुनर्विदन्तीति पदं त एव जानन्तीति विशेषलाभायेत्यर्थः। अत एव गुणत्वमिति वदन्ति। **इत्येवमादाविति**। अधिकपदत्वं गुण इति शेषः। प्रथमे पादे हर्षस्य, द्वितीये भयस्य, चतुर्थे शोकस्य पोषणात्। अधिकपदत्वं गुणः। जतुकाष्ठवदिति शेषः। तदुक्तम् "विषादे विस्मये हर्षे दैन्ये कोपेऽवधारणे। प्रसादनेऽनुकम्पायां द्विस्त्रिरुक्तं न दुष्यति।।" इति।

सितकरेति। सितकरस्य करवत् रुचिरा विभा यस्याः सा। तथा कीर्तिर्विशेषणम्। पौरुषमेवकमलमधिष्ठानं आश्रमः यस्याः सा कमला कमलवती। अर्श आदित्वादच्। तादृशी कीर्तिः, तादृशी च लक्ष्मीस्तवैवास्ति, नान्यस्येत्यन्वयः। अत्र लाटानुप्रासनिर्वाहणाद्गुणत्वम्।

तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि ।।

अत्र द्वितीयकमलपदमाह्लादकत्वलक्ष्मीनिलयत्वादिधर्मान्तरे सङ्क्रमितवाच्यम्। तत्र कथितपदं तन्त्रमिति गुणः।

जितेन्द्रियत्वमिति। गुणाधिके अधिकगुणे गुणैरधिके वेत्यर्थः। अत्र कारणमालायां पूर्वोक्तपदेनैव विनयादिकमुपादेयम् पदान्तरेणोपादाने भिन्नत्वेनावभासप्रसङ्गात्। तथा सत्युत्तरोत्तरं प्रति पूर्वपूर्वस्य हेतुता न प्रतीयेत। तथा च तत्सम्पादकतयाऽस्य गुणत्वम्।

पतत्प्रकर्षमपि क्वचिद्गुणः। यथा, उदाहृते प्रागप्राप्तेत्यादौ ॥३१७॥

समाप्तपुनरात्तं क्वचिन्न गुणो न दोषः। यत्र न विशेषणमात्रदानार्थं पुनर्ग्रहणम् अपि तु वाक्यान्तरमेव क्रियते। यथा, अत्रैव प्रागप्राप्तेत्यादौ ॥३१८॥

अपदस्थसमासं क्वचिद्गुणः। यथा, उदाहृते रक्ताशोकेत्यादौ ॥ १९॥

गर्भितं तथैव। यथा

हुमि अवहत्थिअरेहो णिरंकुसो अह विवेअरहिओ वि।
सिविणे वि तुमम्मि पुणो पत्तिहि भत्तिं ण पसुमरामि ॥३२०॥

अत्र प्रतीहीति मध्ये दृढप्रत्ययोत्पादनाय। एवमन्यदपि लक्ष्याल्लक्ष्यम्।

सारबोधिनी--प्रागप्राप्तेति। अत्र चतुर्थपादे गुरुस्मरणेन क्रोधाभावान्मसृणवर्णत्वमेवोचित-मिति तस्यादोषत्वम्। विनयप्रकाशकत्वाच्च गुणत्वमिति। **यत्र न विशेषणेत्यादि**। विशेषणस्य विशेष्य-साकाङ्क्षतया विशेष्यपदावृत्तिर्नैयत्येन विलम्बेन विलम्बात् वा कथान्तरारम्भे पुनरङ्गाङ्गिभावेनाका-ङ्क्षावैगुण्यविरहात्। अर्थान्तरैकवाचकादीनां नित्यदोषत्वेन तानपहायापदस्थसमासप्रतिप्रसवमाह **रक्ताशोकेति**। नन्वत्रापदस्थमेव कथं क्रोधप्रस्तावादिति चेन्न। यतो नो दृष्टेति क्रोधोक्तिस्तत्स्थानप-रित्यागेन दीर्घसमासस्य तत्राकरणादस्थानगामिता। स्थानौचित्यविवेचनाभावेन क्रोधोन्मादपरिपुष्टि-रितीदमुन्मत्तपुरवसो वाक्यम्। यदुक्तम्—

"अस्थानहास्यस्मितनृत्यगीतवागङ्गविक्षेपणरोदनानि" इति। वस्तुतः "श्रृङ्गारे टवर्गदीर्घसमा-सानौचित्यादस्थानस्थत्वमिति भास्करः।" केचित्तु, अभवन्मतयोगस्यापि क्वचिददुष्टता। यथा "हिरण्यपूर्वं कशिपुं प्रचक्षते" इत्यत्र। तथाहि, कशिपुपदस्य स्वार्थपरत्वे पुंस्त्वान्वयो न स्यात्। "कशिपु त्वन्नमाच्छादनं द्वयमि"ति नपुंसकानुशासनात्। शब्दपरत्वे तु प्रख्यानक्रियान्वयानुपपत्तिः, संज्ञिन एव संज्ञया व्यवह्रियमा-णत्वात्। अदोषत्वं तु लक्षणया झटित्येव धर्मिप्रत्यायनात्। न च प्रयोजनाभावः। शब्दप्रसरस्यैव तत्त्वात् एवं च दशपूर्वरथमित्यादिष्वपीत्याहुः। **गर्भितमिति**। तथैव गुण एव। **भम्मीति**।

भवाम्यपहस्तितरेखो निरङ्कुशोऽथ विवेकरहितोऽपि।
स्वप्नेऽपि त्वयि पुनः प्रतीहि भक्तिं न प्रस्मरामि ॥

तंतिमिति पाठे तांतिं चिन्तां, रेखा मर्यादा। कामं प्रति यौवनस्योक्तिरियम्। **अत्र प्रतीहीतीति**। प्रतीहीति सत्यप्रतीतिपरम्। तेन स्वोक्तेरमिथ्यात्वप्रतिपादनायात्र प्रतीहीत्यनेन शपथसमानशीलेन सुहृद्विष-यदार्ढ्यावगमः। परत उपादाने तु प्राङ्मिथ्यात्वेन प्रतीतौ तस्याकिञ्चित्करत्वात्। प्रतीतत्वमात्रस्य तदाद्ध

मध्य इति । त्वमित्यस्य नियताध्याहारेण वाक्यत्वमक्षतम् । अत्र निराकाङ्क्षतैव । एवं धन्यासीत्यत्र गर्भितस्य गुणत्वमविदग्धगोष्ठ्यां शपथेनैव प्रत्यायनात् । **एवमिति** । यथा—"पंथिअ ण एत्थ सत्थरमत्थि" इत्यादौ स्रस्तरव्याजेन स्रस्तरं संभोगं वा श्लिष्टशब्देन याचते, इति पथिकाभिप्रायसन्देहान्नायिकया तथैवोत्तरितमिति सन्देहस्य विवक्षायां च न दोषः । न च "ताणँ गुणग्गहणाणँ" इत्यादौ वचनप्रक्रमभङ्गस्य गुणत्वेन तत्प्रसवौचित्यमिति वाच्यम् । एकवचनेनैव प्रेमैकरूपत्वस्य व्यञ्जनात् । प्रक्रमभङ्गस्याकिञ्चित्करत्वात् । अन्यथा द्विवचनोपादानेऽपि तत्प्रसङ्गादिति ।

व्यभिचारिरसस्थायिभावानां शब्दवाच्यता ।
कष्टकल्पनया व्यक्तिरनुभावविभावयोः ।। ६०।।
प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः ।
अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः ।।६१।।
अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः ।
अनङ्गस्याभिधानं च रसे दोषाः स्युरीदृशाः ।।६२।।

स्वशब्दोपादानं व्यभिचारिणो यथा

सव्रीडा दयितानने सकरुणा मातङ्गचर्माम्बरे
सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि ।
सेर्ष्या जह्नुसुतावलोकनविधौ दीना कपालोदरे
पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु वः ।।३२१।।

अत्र व्रीडादीनाम् । 'व्यानम्रा दयितानने मुकुलिता मातङ्गचर्माम्बरे सोत्कम्पा भुजगे निमेषरहिता चन्द्रेऽमृतस्यन्दिनि । मीलद्भ्रूः सुरसिन्धुदर्शनविधौ म्लाना कपालोदरे' इत्यादि तु युक्तम् ।

बालचित्तानुरञ्जनी—इदानीं रसस्यैव दोषानुन्मेषयितुमुद्दिशति **व्यभिचारीति** । अत्र व्यभिचार्यादीनां त्रयाणां सामान्यतो विशेषतो वा स्वशब्दवाच्यत्वे त्रयो दोषाः । तत्राद्यमुदाहरति **सव्रीडेति** । कान्तमुखे सलज्जा गजचर्माम्बरे सकृपा सर्पे सभया अमृतस्राविणि चन्द्रे साश्चर्यरसा । विस्मयस्य स्थायित्वेऽपि चमत्कारकारित्वेन उपचारात् रसत्वम् गङ्गावलोकनविधौ सेर्ष्या कपालोदरे दीना नवसङ्गमप्रणयिनी पार्वत्या दृष्टिः वः शिवायास्तु । अत्र व्रीडाकरुणत्रासविस्मयेर्ष्यादीनां व्यभिचारिणां स्वशब्देनाभिधानाद्दोष इत्याह **अत्रेति** । अत्र यद्यपि करुणरसः विस्मयश्च स्थायी, तथापि प्राचुर्यं व्यभिचारिणामिति तदुदा-

हरणत्वव्यञ्जनानुकूलं पाठं परिवर्तयति व्यानम्रेति । अत्र कार्यमुखेन व्रीडादीनां प्रतिपादनमतिचमत्कारकारीति सहृदया एव प्रमाणम् ।

सारबोधिनी—अथ साक्षाद्रसविरोधिनो दोषानाह व्यभिचारीति । व्यभिचारिणां स्वशब्दानुपादाने स्वैः स्वैरनुभावैरभिव्यक्तौ भावध्वनित्वं स्यादिति भावः । अत एवोक्तम् "व्यभिचारी तथाञ्चित" इति । तथा रसपदेन रसस्योपादाने विभावादिभिरभिव्यक्तिं विना न चर्वणीयता निर्वहति । अत एवोक्तम् "व्यञ्जितश्चर्वणीय" इति । तथा स्थायिनोऽभिव्यक्तावेव रसतां प्राप्नुवन्ति न स्वस्वपदोपात्ताः । तदुक्तम्-"व्यक्तः" स तैरिति एतत्सर्वं व्यञ्जानवृत्तिमाहात्म्यम् । प्रमाणं तु सहृदयहृदयमेवेति ध्येयम् ।

सव्रडेत्यादि । नायकप्रथमदर्शनात् व्रीडा । मातङ्गचर्माम्बरदर्शनात् कारुण्यम् । विभवाभावेन शोकोदयात् । अम्बरवासिनः कुतोऽत्र संभव इति चन्द्रदर्शनात् विस्मयः । पत्युरन्यस्त्रीसङ्गदर्शनादीर्ष्या । मणिस्थाने कपालदर्शनाद्दैन्यम् । **अत्र व्रीडादीनामिति** । शब्दवाच्यत्वमिति शेषः । स्वशब्दानुपादाने अनुभावादिभिः प्रत्यायने तु भावध्वनिः स्यात्तदाह **व्यानम्रेति** ।

रसस्य स्वशब्देन श्रृङ्गारादिशब्देन वा वाच्यत्वम् । क्रमेणोदाहरणम्

तामनङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूललोकिताम् ।
नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः ।। ३२२ ।।

आलोक्य कोमलकपोलतलाभिषिक्तव्यक्तानुरागसुभगामभिराममूर्तिम् ।
पश्यैष बाल्यमतिवृत्य विवर्तमानः श्रृङ्गारसीमनि तरङ्गितमातनोति ।। ३२३ ।।

स्थायिनो यथा

संप्रहारे प्रहरणैः प्रहाराणां परस्परम् ।
ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत् ।। ३२४ ।।

अत्रोत्साहस्य ।

कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मण्डले शिशिररोचिषि तस्य यूनः ।
लीलाशिरोंऽशुकनिवेशविशेषक्लृप्तिव्यक्तस्तनोन्नतिरभून्नयनावनौ सा ।।३२५।।

अत्रोद्दीपनालम्बनरूपाः श्रृङ्गारयोग्या विभावा अनुभावपर्यवसायिनः स्थिता इति कष्टकल्पना ।

बालचित्तानुरञ्जनी—द्वितीयमुदाहरति **रसस्येति** । ताम[नङ्ग]जयमङ्गललक्ष्मीं, ईषदुच्चं यद्भुजमूलं तत्र दृष्टां तां नेत्रयोः गोचरे कृते ।

सारबोधिनी—**तामनङ्गेति** । तां नेत्रयो गोचरे कृतवतोऽस्येत्यन्वयः । **उच्चेति** । उच्चभुजमूलेन लोकितामवलोकितामित्यर्थः । **आलोक्येति** । अनुरागस्तत्कार्यं पाण्डुता, अतिवृत्यातिक्रम्य वर्तमानः पुलककटाक्षादिभिश्चेष्टमानस्तरङ्गितमविच्छेदारम्भम् । संप्रहारे युद्धे, प्रहरणैरस्त्रैः, प्रहाराणां ठणत्कारैः **अत्रोत्साहस्येति** । शब्दवाच्यत्वमित्यनुषङ्गः । **कर्पूरेत्यादि** । शिशिररोचिषि चन्द्रे, अभून्नयनावनौ सा दृष्टिपथमवतीर्णेत्यर्थः । **शृङ्गारयोग्या विभावा इति** । उद्दीपनविभावश्चन्द्रः, आलम्बनं नायिका । **अनुभावेति** । अनुभावाप्रतीत्यास्वादापर्यवसायिनः स्थिता इत्यर्थः । 'पर्यवसायिनः' इति पाठे 'कष्टेन' इति शेषः । न झटिति आक्षेपका इत्यर्थः । न च स्तनोन्नतिव्यञ्जनमेवानुभावः, तस्य दर्शनकार्यत्वेनाप्रतीतेः । वस्तुतो नायकनिष्ठ एव शृङ्गारो व्यञ्जनीयः । 'नयनावनौ सा' इत्यनेन तस्या एवालम्बनत्वेनावगतेः । न च नायकनिष्ठः कश्चिदनुभाव उपात्तः, न वा विभावेन झटिति कश्चिदाक्षेपगम्य इति कष्टेन कल्पना ।

परिहरति रतिं मतिं लुनीते स्खलति भृशं परिवर्तते च भूयः ।
इति बत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः ॥३२६॥

अत्र रतिपरिहारादीनामनुभावानां करुणादावपि सम्भवात् कामिनीरूपो विभावो यत्नतः प्रतिपाद्यः ।

प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषं
प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः ।
निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं
न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः ॥३२७॥

अत्र शृङ्गारे प्रतिकूलस्य शान्तस्यानित्यताप्रकाशनरूपो विभावस्तत्प्रकाशितो निर्वेदश्च व्यभिचारी, उपात्तः ।

णिहुअरमणम्मि लोअणपहम्मि पडिए गुरुअणमज्झम्मि ।
सअलपरिहारहिअआ वणगमणं एव्व महइ वहू ॥३२८॥

अत्र सकलपरिहारवनगमने शान्तानुभावौ । इन्धनाद्यानयनव्याजेनोपभोगार्थं वनगमनं चेन्न दोषः ।

सारबोधिनी—विभावे तामुदाहरति परिहरतीति। वस्तुनि स्पृहा रतिः। मतिरर्थावधारणम्। लुनीते छिनत्ति, स्खलति विपर्येति परिवर्तते विशेषदर्शी भवति। अतएव दशा समानं भवति भ्रमविशेषदर्शनाभ्यां सुखदुःखदायित्वात्। अस्य नायकस्य दशा, तन्निष्ठ एव विप्रलम्भो व्यङ्ग्यः। परिहरतीत्यादावपि तस्यैव कर्तृत्वेन दशायामनन्वयात्। अत्र कामिनीरूपो विभावो नास्ति, न च परिहारादिस्तदाक्षेपक इत्यत आह **अत्र रतीति**। करुणादावित्यादिपदाद्भयानकबीभत्सपरिग्रहः। सशयेन कतरस्याप्यनिश्चयेन यत्नप्रतिपाद्यः।

प्रकारणाद्यनुसंधानविलम्बगम्यः। **प्रसाद इति**। प्रसादे वर्तस्व प्रसीदेत्यर्थः।

सिञ्चत्वङ्गानीत्यन्वयः। शुष्यन्त्यङ्गानीत्यस्य विशेषणमुपात्त इति। मनागपि तयोरुपादानं वियोगातिरिक्तं सकलमेव शृङ्गाररसमुच्छिनत्तीति भावः। निभृतरमणः प्रच्छन्नकामुकः। **शान्तानुभावाविति**। तेन प्रतिकूलानुभावग्रहणे न प्रकृतरसस्थगनमिति भावः। तयोरेव शृङ्गारानुभावत्वोपायतामाह **इन्धनेत्यादि**। तथा च निर्व्याजवनगमनस्यैव शान्तानुभावत्वात् नासङ्गतिरिति भावः।

दीप्तिः पुनः पुनर्यथा कुमारसंभवे रतिविलापे।

अकाण्डे प्रथनं यथा वेणीसंहारे द्वितीयेऽङ्केऽनेकवीरक्षये प्रवृत्ते भानुमत्या सह दुर्योधनस्य शृङ्गारवर्णनम्।

सारबोधिनी—**णिहुएति**। निभृतरमणे लोचनपथे पतिते गुरूणां मध्ये।

सकलपरिहारहृदया वनगमनमेवेच्छति वधूः ॥

पुनः पुनर्दीप्तिर्विच्छिद्य विच्छिद्य ग्रहणं वेद्यान्तरसंबन्धेन धाराया विच्छेदात्। प्रबन्ध एवं तथा संभवतीत्याह **रतिविलाप इति**। अत्र स्वसामग्रीलब्धपरिपोषस्यापि करुणरस। अथ सा पुनरेवंविकलेत्यादिनोद्दीपितस्य पुनर्मधुसंदर्शनेन विच्छेदः। पुनोस्तमवेक्ष्य रुरोद सा भृशमित्यादिनोद्दीपितस्य पूर्वापरानुसंधायिनां सामाजिकानां न समग्रहप्रतिभासः। **अकाण्डेति**। अनवसरे प्रथनं विस्तारः। छेदो विच्छेदः। धारारूढे धारावाहिनि। कङ्कणमोचनाय विवाहदशमदिवसीयोत्सवविशेषाय प्रकर्षाधिरूढे वीररसे तदुचितव्यवहारान्वेषणमेवोचितं नायकस्य, न तु तद्विरुद्धाचरणं अकीर्तिपर्यवसायीति भावः।

अकाण्डे छेदो यथा वीरचरिते द्वितीयेऽङ्के राघवभार्गवयोर्धाराधिरूढे वीररसे 'कङ्कणमोचनाय गच्छामि' इति राघवस्योक्तौ।

अङ्गस्याप्रधानस्यातिविस्तरेण वर्णनम्। यथा हयग्रीववधे हयग्रीवस्य।

अङ्गिनोऽननुसन्धानम् । यथा रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमने सागरिकाय विस्मृतिः ।

सारबोधिनी—अङ्गस्याप्रधानस्य प्रतिनायकादेः हयग्रीवस्य जल-केलि-वन-विहाररतोत्सवादे-र्नायिकापेक्षया विस्तरेण वर्णनं हयग्रीवस्य नायकत्वमेव प्रत्याययति न प्रतिनायकत्वमिति दोषः । न च 'वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपी'त्यादिना विशेष इति वाच्यम् । यद्गुणत्वेन रिपोर्वर्णनेन नायकोत्कर्ष-प्रतिपादनं तत्रैवास्य तात्पर्यात् । न तु वनविहारादावपि । अत एवाह–'तज्जयान्नायकोत्कर्षकथनं च धिनोति न' इति । अङ्गिनोऽननुसन्धानमित्यपरश्च रसभङ्गहेतुः । सागरिकाया विस्मृतिरिति । बाभ्रव्यस्य सिंहलेश्वरकञ्चुकिन आगमनकाले विजयवर्मवृत्तान्तश्रवणेनेति शेषः । तेन नायिकाप्रतिपाद्य शृङ्गाररसो विच्छिन्नप्रायः स्यादिति । दिव्याः श्रीकृष्णादयः अदिव्याः युधिष्ठिरादयः । दिव्यादिव्या देवत्वेऽपि आत्मनि अभिमानिनः श्रीरामचन्द्रादयः ।

प्रकृतयो दिव्या अदिव्या दिव्यादिव्यांश्च वीररौद्रशृङ्गारशान्तरसप्रधाना धीरोदात्त-धीरोद्धत-धीरललित-धीरप्रशान्ताः, उत्तममध्यमाधमाश्च । तत्र रतिहासशोकाद्भुतानि अदि-व्योत्तमप्रकृतिवत् दिव्येष्वपि । किं तु रतिः संभोगशृङ्गाररूपा उत्तमदेवताविषया न वर्णनीया । तद्वर्णनं हि पित्रोः संभोगवर्णनमिवात्यन्तमनुचितम् ।

क्रोधं प्रभो संहर संहरेति यावद् गिरः खे मरुतां चरन्ति ।
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥ ३२६ ॥

सारबोधिनी—**वीररौद्रेत्यादि** । धीरोदात्तादिषु यथाक्रममन्वेति **उत्तमेति** । गुणानामुत्कर्षाप-कर्षतदुभयाभावैरुत्तममध्यमाधमत्वानि । उक्तासु प्रकृतिषु विपर्ययाभिधानाय तदौचित्यमनुवदति **तत्रेत्यादि** ।

इत्युक्तवत् भ्रुकुट्यादिविकारवर्जितः क्रोधः सद्यःफलदः स्वर्गपातालगगनसमुद्रोल्ल-ङ्घनाद्युत्साहश्च दिव्येष्वेव । अदिव्येषु तु यावदवदानं प्रसिद्धमुचितं वा तावदेवोपनिबद्धव्यम् । अधिकं तु निबध्यमानमसत्यप्रतिभासेन "नायकवद्वर्तितव्यं न प्रतिनायकवत्" इत्युपदेशे न पर्यवस्येत् । दिव्यादिव्येषु उभयथापि । एवमुक्तस्यौचित्यस्य दिव्यादीनामिव धीरोदात्ता-दीनामप्यन्यथावर्णनं विपर्ययः । तत्रभवन् भगवन् इत्युत्तमेन, न अधमेन मुनिप्रभृतौ न राजादौ भट्टारक इति नोत्तमेन राजादौ प्रकृतिविपर्ययापत्तेर्वाच्यम् । एवं देशकालवयो-जात्यादीनां वेषव्यवहारादिकमुचितमेवोपनिबद्धव्यम् ।

अनङ्गस्य रसानुपकारकस्य वर्णनम्। यथा कर्पूरमञ्जर्यां नायिकया स्वात्मना च कृतं वसन्तवर्णनमनादृत्य बन्दिवर्णितस्य राज्ञा प्रशंसनम्।

बालचित्तानुरञ्जनी—वर्णने दोषमाह अधिकन्त्विति। मनुष्येष्वधिकवर्णने असत्यत्वेन, रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशे पर्यवसानं न स्यादित्यर्थः। दिव्यादिव्येष्वपि नियममाह **दिव्येति**। दिव्यप्रतिबद्धं अदिव्यप्रतिबद्धञ्च। दिव्यादीनामुक्तविपरीतवर्णनं विपर्यय इत्याह **एवमिति**। एवं प्रकृतिं विचार्य तस्या आमन्त्रणविषयं विपर्ययमाह तत्रेति। अत्रायं सम्बन्धः, प्रभृतौ विषये तत्रभवन् भगवन् इति उत्तमेन द्विजातिना वाच्यम्, अधमेन म्लेच्छेन तु न वाच्यम्। उत्तमेनापि भगवन् इति मुनिप्रभृतावेव वाच्यं, न राजादौ। राजादौ भट्टारकेति न वाच्यं अपि तु देवेति। अत्रोत्तमेनेत्यनुपज्यते। अधमेन तु भट्टारकेति राजादिविषये वाच्यमेव। मुनिप्रभृतौ परमेश्वरेति केनापि न वाच्यम् प्रकृतिविपर्ययापत्तेरिति। एवं देशादिष्वपि अनुचितवर्णने विपर्ययप्रसङ्गात् तत्तदुचितमेव वर्णनीयमित्याह एवमिति। अनङ्गस्याभिधानमुदाहरति **अनङ्गस्येति**। अनङ्गस्येत्यस्य व्याख्यानं रसानुपकारकस्येति। वर्णनं प्रशंसनम्। कर्पूरमञ्जर्यां नायिकया स्वात्मना स्वसंबन्धिना च कृतं वसन्तवर्णनमनादृत्य "जह किल णिवेदिदं बन्दीहिं" इत्यारभ्य विदूषकोक्तिपर्यन्तेन ग्रन्थेन राज्ञा कृतं बन्दिवर्णितस्य वसन्तस्य यद्वर्णनं [प्रकृतरसस्यानुपकारकत्वात्] तदनुचितमित्यर्थः।

सारबोधिनी—अवदानं वृत्तं कर्म। इदानीमामन्त्रणौचित्यमाह **तत्रेत्यादि**। तत्रभवन् भगवन् इति उत्तमेन वाच्यं नाधमेनेत्यन्वयः। उत्तमेनापि मुनिप्रभृतौ प्रयोज्यम्, न राजादावित्याह **मुनीति**। भट्टारकपदं राजादावुत्तमेन न वाच्यम्, किन्त्वधमेन। परमेश्वर इत्युत्तमेन न मुनिप्रभृतौ वाच्यम्, किन्तु देवतादावेवेत्याह **भट्टारकेति**। **एवमिति**। दिवि मानुषवाग्वेषादि-वर्णनं देशानुचितम्, वसन्ते मेघादिवर्णनं कालानुचितम्, जरायां संभोगादिवर्णनं वयोऽनुचितमित्यादि।

"ईदृशाः" इति। नायिकापादप्रहारादिना नायककोपादिवर्णनम्। उक्तं हि ध्वनिकृता

> "अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
> औचित्योपनिबन्धस्तु रसस्योपनिषत् परा॥" इति।

इदानीं क्वचिददोषा अप्येते, इत्युच्यन्ते।

न दोषः स्वपदेनोक्तावपि सञ्चारिणः क्वचित्।

यथा

> **औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया**
> **तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः।**
> **दृष्ट्वाग्रे वरमात्तसाध्वससरसा गौरी नवे सङ्गमे**
> **संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः॥ ३३०॥**

अत्रौत्सुक्यशब्द इव तदनुभावो न तथाप्रतीतिकृत् । अत एव 'दूरादुत्सुकम्' इत्यादौ व्रीडाप्रेमाद्यनुभावानां विवलितत्वादीनामिवोत्सुकत्वानुभावस्य सहसाप्रसरणादिरूपस्य तथाप्रतिपत्तिकारित्वाभावादुत्सुकमिति कृतम् ।

बालचित्तानुरञ्जनी—"रसे दोषाः स्युरीदृशा" इत्युक्तं, तत्र ईदृशाः एवंप्रकाराः इत्यनेन संग्राह्य दर्शयति **नायिकेति** । नायिका पादप्रहारं करोति तदा नायककोपादिवर्णनमनुचितमित्यर्थः । आदिपदेन रावणस्य नायिकां प्रति नायकत्वकरणमभिप्रेतम् । तदुक्तम्—

सन्ति सिद्धरसप्रख्या ये च रामायणादयः ।

कथाश्रया न तैर्योज्या स्वेच्छा रसविरोधिनी ॥इति॥

अत्र संमतिमाह **उक्तं हीति** । परा उपनिषत् । परं रहस्यमित्यर्थः । अत्र व्यभिचार्यादीनां त्रयाणां शब्दवाच्यत्वे त्रयो दोषकल्पनया अनुभावविभावयोर्व्यक्तौ द्वाविति यच्च व्यञ्जकमिति वदन्ति[?] क्वचनादोषत्वं वक्तुमुपक्रमते । **दृष्ट्वेति** । क्वचित् 'आत्त' इत्यधिकमिति प्रयोगे अनुभावप्रयोगादपि । यत्र स्वयं शब्दोपादानं उचितम् स चेतोभिरत्र न दोष इत्यर्थः[?] । तदुदाहरति **यथेति** । नवे सङ्गमे औत्सुक्येन कृतत्वरा । सहोत्पन्नया जनितया । तैस्तैर्बन्धुवधूजनस्य वचनैः पुनः आभिमुख्यं नीता । अग्रे वरं शिवं दृष्ट्वा गृहीतभयरसा स रोहद्रोमा आलिङ्गिता गौरी वः शिवाय भूयात् । अत्रौत्सुक्यनाम्नो व्यभिचारिभावस्य स्वशब्देनोपादानं न दोष इत्याह । औत्सुक्यनाम्नो व्यञ्जकेनानुभावेन नयनप्रसारणेन औत्सुक्यं प्रकाश्यतां किमौत्सुक्यशब्दोपादानेनेत्याह **अत्रेति** । तस्यौत्सुक्यनाम्नो व्यभिचारिणः संबन्धी अनुभावः नयनप्रसारणादिः । औत्सुक्यस्य इच्छालौल्यप्रकारत्वात् तत्प्रकाशनक्षमस्यानुभावस्याभाव त् औत्सुक्यशब्दोपादानमुचितमेवेति भावः । उक्तेन योगान्तरेण संबध्यते **अत एवेति** । व्रीडाहर्षकोपासूयाप्रसादानां व्यभिचारिणां संबन्धिनो ये अनुचक्षुषो विवलनस्फारणारुणत्वाञ्चित-भ्रूलतात्वबाष्पाम्बुपूर्णत्वलक्षणाः । तेषां यथा व्रीडादिव्यभिचारिप्रकाशकत्वं न तथा नयनप्रसरणादि-रूपव्यापारस्य औत्सुक्यव्यञ्जकत्वम् सामर्थ्याभावात् । अतः औत्सुक्यमित्येव प्रयुक्तं न पुनर्दूरादुत्थितमित्याद्यनुभावेनाभिव्यञ्जितमित्यर्थः ।

सारबोधिनी—प्रतिप्रसवमाह **इदानीमिति** । **औत्सुक्येति** । सहभुवा सहोत्पन्नया । **अत्रौत्सुक्यशब्द इति** । औत्सुक्यानुभावरूपायास्त्वराया भयेनापि संभवात् । तथा चानुभावमात्रोपादाने भयाद्वोत्कण्ठातो वेति संशये प्रतिपत्त्यप्ररोह एव भवेत् न रसप्रतिपत्तिरिति स्वशब्दोपादनं कृतम् । एतदेव काव्यान्तरप्रयोगेन द्रढयति **अत एवेति** ।

सञ्चार्यादेर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा ॥ ६२ ॥

बाध्यत्वेनोक्तिर्न परमदोषः, यावत् प्रकृतरसपरिपोषकृत् । यथा

'क्वाकार्यं शशलक्ष्मणः क्व च कुलम्' इत्यादौ ॥३३१॥

अत्र वितर्कादिषु, उद्गतेष्वपि चिन्तायामेव विश्रान्तिरिति प्रकृतरसपरिपोषः।

पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ॥३३२॥

इत्यादौ साधारणत्वं पाण्डुतादीनामिति न विरुद्धम् ।

सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः ।
किन्तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम् ॥३३३॥

इत्यत्राद्यमर्धं बाध्यत्वेनैवोक्तम् । जीवितादपि, अधिकमपाङ्गभङ्गस्यास्थिरत्वमिति प्रसिद्धभङ्गुरोपमानतयोपात्तं शान्तमेव पुष्णाति । न पुनः शृङ्गारस्यात्र प्रतीतिस्तदङ्गाप्रतिपत्तेः । न तु विनेयोन्मुखीकरणमत्र परिहारः शान्तशृङ्गारयोर्नैरन्तर्यस्याभावात् । नापि काव्यशोभाकरणम् रसान्तरादनुप्रासमात्राद् वा तथाभावात् ।

बालचित्तानुरञ्जनी—व्यभिचार्यादीनां प्रतिकूलानामपि बाध्यत्वार्थं स्वशब्देनोपादानं न दोषः किंतु गुण एवेत्याह **सञ्चार्यादेरिति** । पद्यं व्याकरोति **बाध्यत्वेनेति** । प्रकृतरसावरुद्धोऽपि व्यभिचार्यनुभावादिर्यदा बाध्यत्वेन निबध्यते तदा प्रकृतरसस्यैव प्राधान्यमिति न दोषः किन्तु गुण एवेत्यर्थः । तदुदाहरति **यथेति** । वीचीतरङ्गन्यायेन उन्मग्ननिमग्ने वितर्कौत्सुक्यादौ न विश्रान्तिरित्येवकारार्थः । प्रकृतस्य रसस्य विप्रलम्भशृङ्गाररसस्य परिपोषः । ननु बाध्यत्वाभावेऽपि विरुद्धयोः क्वचित् समावेशोऽस्तीति ध्वनिकारेणोक्तमित्याशङ्क्याह **पाण्डु क्षाममिति** । हे सखि तव पाण्डु क्षामं कृशं वदन सरसं हृदयं अलसं वपुश्च हृदयमध्ये क्षेत्रे अन्यशरीरे चिकित्स्यः असाध्यो रोगः राजयक्ष्मा उपपतिशरीरेणाऽपि चिकित्स्यः चिन्तादिः तमावेदयति । अत्र पाण्डुतादयो मरणकारणराजयक्ष्मप्रभवा अपि भवन्ति उपपतिचिन्तातोऽपि भवन्तीत्येवं करुणविप्रलम्भसाधारणा इति न विरोधः । असाधारणत्वस्यैव विरोधस्फूर्तिकरणत्वात् । अतो ध्वनिकारोक्तमसङ्गतमिति भावः । ध्वनिकारेणैव स्थलान्तरे वाच्यत्वाभावेऽपि विरोधोऽङ्गीकृतः । स च परिहृतः । तद्दूषयितुमाह **सत्यमिति** । स्त्रियः रम्याः इति सत्यम् विभूतयोऽपि रम्या इति सत्यम्, किंतु जीवितं मत्तकामिनीकटाक्षचञ्चलम् । पूर्वार्द्धे वाविरोधः उत्तरार्द्धे वेति विकल्प्याद्यं दूषयति **अत्रेति** । सत्यमित्यर्थाङ्गीकारात् वाच्यत्वेनैव शृङ्गारविभावादिकमुक्तमित्यर्थः । द्वितीयं दूषयति **जीवितेति** । प्रसिद्धेन तेन गुणेन अधिकत्वलक्षणेन यदुपमानतया उपात्तं अस्थिरत्वं कर्तृ शान्तमेव पुष्णाति । **न पुनरिति** । तस्य शृङ्गाररसस्य यदङ्गं जीवितस्थैर्यादि तस्याप्रतीतेः विरोधलेशोऽपि नास्तीति भावः । एवं विरोधाभावमभिधाय—

विनेयानुन्मुखीकर्तुं काव्यशोभार्थमेव वा । तद्विरुद्धरसस्पर्शस्तदङ्गानां न दुष्यतीति ध्वनिकारोक्तपरिहारद्वयमध्ये आद्यं दूषयति **न त्विति** । गुडजिह्विकान्यायेन विनेयान् शिष्यान् शृङ्गाररसेनोन्मुखीकृत्य शान्तरसोपदेश इति परिहारो न संभवतीत्यर्थः । तत्र हेतुमाह **शान्तेति** । एकस्य प्ररोचनायामन्यस्य तात्पर्ये तयोर्नैरन्तर्यं वाच्यम्, तन्न सम्भवति । विरुद्धत्वेनोभयविनाशप्रसङ्गादिति

भावः। द्वितीयं दूषयति नापीति । रसान्तरात् शृङ्गारव्यतिरिक्तात् रसात् तदभावे अनुप्रासमात्रात् मत्ताङ्गनापाङ्गेतिरूपाद्वा। तथाभावात् काव्यशोभाया अभावात् इत्यर्थः।

सारबोधिनी—सञ्चार्यादेरिति। विरुद्धस्य प्रकृतरसविरोधिरसाङ्गभूतस्य यदि स्वभावत एव बाध्यत्वं न तथा विरोध इत्यन्यथा व्याचष्टे **बाध्यत्वेनेति**। तथा निर्देष्टव्यम् यथा बाध्यतावगमः स्यात्। गुणपदं विवेचयति **न परमित्यादि**। **क्वाकार्यमित्यादि**। अत्र वितर्कमतिशङ्काधृतीनां शान्तसञ्चारिणां शृङ्गारपरिपन्थिनामपि तत्परिपोषकता, तेषां चिन्तायामेव विश्रान्तेः। एवं शृङ्गारस्य परिपुष्टिः। विपक्षजयपूर्वकराज्यलाभस्येव । तदाह **वितर्कादिष्वित्यादि**। प्रकृतरसो भावशवलः । विरुद्धरसाङ्गोपादानं प्रकृतरसपरिपोषकत्वेन गुणायेत्यत्र परोदाहृतमन्यथा समर्थयति **पाण्डु क्षाममिति** । हे सखि ! तव हृन्मानसं अन्तः क्षेत्रियरोगमावेदयतीति सम्बन्धः। शरीरान्तरचिकित्स्यः क्षेत्रियरोगः। अत्र व्याधेः करुणरसोचितस्य शृङ्गाराङ्गत्वेन समारोपोऽदोषत्वे हेतुरिति ध्वनिकारः। तन्न, करुण इव शृङ्गारप्रकर्षेऽपि पाण्डुतादीनामनुभावानामुचितत्वात्। अत एव 'व्याध्युन्मादापस्मारजाड्यप्रसरणादिभिः विप्रलम्भोऽभिनेतव्य' इति भरतः। तेनात्र विरोध एव नास्तीत्यलं तत् समर्थनप्रयासेनेत्याह **इत्यादाविति** । सञ्चार्यादेरित्यत्रादिग्रहणात् विरुद्धस्य विभावस्य बाध्यत्वोक्तौ गुणावहत्वमाह **सत्यमित्यादि**। अत्र पूर्वार्द्धे शृङ्गारस्य अपरार्द्धे शान्तस्य विभावः। अनयोर्विरुद्धत्वेऽपि पूर्वार्द्धस्य बाध्यत्वेनाभिधानान्न दोषत्वम्, अपि तु गुणत्वम्, शान्तपरिपोषकत्वात् । सर्वा रामादयः सत्येव जीविते तदर्थमुपादेयाः। जीवितञ्चातिभङ्गुरमिति किंकृतं तासामुपादेयत्वम्। अतो रम्यत्वेऽपि निष्फला एवेति पर्यवसानम्। ननु मत्ताङ्गनापाङ्गभङ्गस्योपादानत्वावगतौ कथं शान्तस्य प्राधान्यमित्याह **जीवितमित्यादि**। अपिर्भिन्नक्रमे। अधिकमपीत्यर्थः। इतिशब्देनाधिकास्थिरत्वपरामर्शः। इत्यधिकास्थिरत्वेन प्रसिद्धो यो भङ्गुरोऽपाङ्गभङ्गस्तस्य यदुपमानत्वं तेनोपात्तम् तदनुपादानत्वम् "उपमानानि सामान्यवचनैरि"त्यनुशासनात्। **शान्तमेवेत्यादि**। यथा अपाङ्गभङ्गोऽस्थिरस्तथा जीवितमिति जीविते क्षणस्थायित्वप्रत्ययेनेत्यर्थः, तत्प्रत्यये त्वपाङ्गभङ्गादीनां निष्फलत्वावगतिः शान्तमेव रसं पुष्णातीत्यर्थः। ननु शान्तशृङ्गारयोर्द्वयोरपि रसत्वेन [एकेनापरस्य] बाधने किं विनिगमकमित्यपेक्षायामाह **न पुनरिति** । शृङ्गारयोग्यविभावाद्यकरणादित्यर्थः। अथ विनेयानां सुकुमारमतीनां राजपुत्राणां शृङ्गारलम्पटानां प्रवृत्त्यन्यथानुपपत्त्या अनुभूयमानायाः काव्यशोभायाः शृङ्गारैकनिर्वर्त्यत्वेन चावश्यं शृङ्गाराङ्गानामाक्षोभो न वक्तव्य इति ध्वनिकारमतं निराकरोति **न स्थितिः**। रसान्तरेणाव्यवधानेन प्रतीतिनैरन्तर्यम् तेन यस्याङ्गानि प्रतीयन्ते स एव रस इति। शान्त एव रसो न शृङ्गारः। तेन शृङ्गारस्य विनेयोन्मुखीकरणे काव्यशोभायां च हेतुत्वमत्र नास्तीति बोध्यम् । विनेयोन्मुखत्वे काव्यशोभायां चोपपादकमाह **रसान्तरादिति**। एतयोरुपपत्तिरास्वादमात्रादेव, न त्वास्वादविशेषात्तदभावस्थले तयोरभावप्रसङ्गात्। आस्वादमात्रं तु प्रकृते शान्तादेराक्षतमिति समाधानार्थः। अनुप्रासानतिरिक्तरसवादिनां सांप्रदायिकानां मतेऽनुप्रास एवास्वादबीजमिति मधुरानुप्रासेन तदुभयनिष्पत्तिरित्यत आह **अनुप्रासमात्राद्वेति**। मात्रपदेन विभावादिव्यञ्जयरसादिव्यवच्छेदः।

आश्रयैक्ये विरुद्धो यः स कार्यो भिन्नसंश्रयः।
रसान्तरेणान्तरितो नैरन्तर्येण यो रसः ॥६४॥

वीरभयानकयोरेकाश्रयत्वेन विरोध इति प्रतिपक्षगतत्वेन भयानको निवेशयितव्यः। शान्तशृङ्गारयोस्तु नैरन्तर्येण विरोध इति रसान्तरमन्तरे कार्यम् । यथा नागानन्दे शान्तस्य जीमूतवाहनस्य 'अहो गीतम् अहो वादित्रम्' इत्यद्भुतमन्तर्निवेश्य मलयवतीं प्रति शृङ्गारो निबद्धः ।

न परं प्रबन्धे यावदेकस्मिन्नपि वाक्ये रसान्तरव्यवधिना विरोधो निवर्तते। यथा

भूरेणुदिग्धान् नवपारिजातमालारजोवासितबाहुमध्याः ।
गाढं शिवाभिः परिरभ्यमाणान् सुराङ्गनाश्लिष्टभुजान्तरालाः ॥
सशोणितैः क्रव्यभुजां स्फुरद्भिः पक्षैः खगानामुपवीज्यमानान् ।
संवीजिताश्चन्दनवारिसेकैः सुगन्धिभिः कल्पलतादुकूलैः ॥३३४॥

विमानपर्यङ्कतले निषण्णाः कुतूहलाविष्टतया तदानीम् ।
निर्दिश्यमानान् ललनाङ्गुलीभिर्वीराः स्वदेहान् पतितानपश्यन् ॥३३५॥

अत्र बीभत्सशृङ्गारयोरन्तर्वीररसो निवेशितः।

बालचित्तानुरञ्जनी—इदानीं रसविरोधं संक्षिप्य परिहारोपायमाह **आश्रयेति** । द्विधा हि रसविरोधः एकाश्रयत्वमूलो नैरन्तर्यमूलश्च । तत्र पूर्वस्मिन्नाश्रयभेद एव परिहारः ।

यत्तूक्तम्

विरुद्धैकाश्रयो यस्तु विरोधिस्थायिनो भवेत् ।
स हि भिन्नाश्रयः कार्यस्तस्य दोषेऽप्यदोषता ।। इति ।

अत्र रसान्तरेण विरुद्धरसेन अन्तरितो व्यवहितः कार्यः । यच्चोक्तम्

रसान्तरान्तरितयोरेकवाक्यस्थयोरपि ।
निवर्तते हि रसयोः समावेशे विरोधितेति ॥

तत्र वीरभयानक इत्यादिग्रन्थे भयानकग्रहणं करुणस्याप्युपलक्षणम् ।

भूरेण्विति । भूरेण्वित्यादिविशेषणै रतीव दूरापेतत्वमसंभावनास्पदत्वमुक्तम् । स्वदेहान् इत्यनेन चैकत्वाभिमानादेकाश्रयैक्यम् । अन्यथा विभिन्नविषयत्वात् को विरोधः स्यात् ।

ननु वीर एवात्र रसो न शृङ्गारो न बीभत्सः किं तु रतिजुगुप्से वीरं प्रति व्यभिचारीभूते। सत्यम्, तथापि प्रकृतोदाहरणता तावदुपपन्ना, यतस्तदङ्गयो रतिजुगुप्सयोरपि वीररसव्यवहितयोर्न विरोधः। **वीररस इति**। "वीराः स्वदेहान्" इत्यादिना तदीयोत्साहाद्यवगत्या कर्तृकर्मणोः समस्तवाक्यार्थानुयायितया प्रतीतिरिति शृङ्गारबीभत्सयोरन्तरेऽनिवेशितस्यापि सुतरां वीरस्य व्यवधायकता प्रतीयते।

सारबोधिनी—एवं रसाङ्गानां विरोधं समर्थ्य रसयोर्विरोधं समर्थयति **आश्रयैक्य इति**। विरोधो द्विधा, दैशिकः कालिकश्च। **आद्यं समाधत्ते भिन्नसंश्रय इति**। द्वितीयं समाधत्ते **रसान्तरेणेति**। नैरन्तर्ये तु यो रसो विरुद्धः स रसान्तरेणान्तरितः कार्य इति पूर्वेणान्वयः। भयानकस्य प्रतिपक्षगतत्वेनोपन्यासे नायकवीररसपुष्टिः। **एकस्मिन् इति**। एकक्रियासामीप्ये इत्यर्थः। **भूरेण्विति**। पतितान् स्वदेहान् वीरा अपश्यन् इत्यर्थः। बाहुमध्यं वक्षः। शिवाः शृगाल्यः। क्रव्यभुजा मांसाशिनाम्। दुकूलं पट्टवस्त्रम्। **अत्रेति**। बीभत्सशृङ्गारयोः पतितस्वदेहसुराङ्गनालम्बनभेदेन व्यवस्थितयोः अन्तर्मध्ये वीररसो निवेशित इति। ननु कथमत्र वीररसप्रतीतिः? वीरशब्दमात्रेण तदर्थाप्रतीतेः। मैवम्, साहसनिपातजन्यस्वर्गलाभरूपानुभावस्याक्षेपलब्धगर्वादेः सञ्चारिणश्च संभवात्तत्प्रतीतेः। न च प्राकरणिकत्वात् वीरस्य प्राधान्यम्। एतद्वाक्यात् बीभत्सशृङ्गारसामग्र्योरेवोत्कटत्वेन प्रतीयमानत्वात्। वीरसामग्र्याः पुनराक्षिप्यमाणत्वेनानुत्कटत्वात्। अत्र हि शृङ्गारबीभत्ससामग्रीतश्चित्रो रस इति संप्रदायः।

स्मर्यमाणो विरुद्धोऽपि साम्येनाथ विवक्षितः।
अङ्गिन्यङ्गत्वमाप्तौ यौ तौ न दुष्टौ परस्परम्॥६५॥

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥३३६॥

एतद् भूरिश्रवसः समरभुवि पतितं हस्तमालोक्य तद्वधूरभिदधौ। अत्र पूर्वावस्थास्मरणं शृङ्गाराङ्गमपि करुणं परिपोषयति।

दन्तक्षतानि करजैश्च विपाटितानि प्रोद्भिन्नसान्द्रपुलके भवतः शरीरे।
दत्तानि रक्तमनसा मृगराजवध्वा जातस्पृहैर्मुनिभिरप्यवलोकितानि॥३३७॥

अत्र कामुकस्य दन्तक्षतादीनि यथा चमत्कारकारीणि तथा जिनस्य। यथा वा परः शृङ्गारी तदवलोकनात् सस्पृहस्तद्वत् एतद्दृशो मुनय इति साम्यविवक्षा।

बालचित्तानुरञ्जनी—पूर्वावस्थेति। रशनोत्कर्षादिना स्मर्यमाणेन शृङ्गाराङ्गेनापि इदानीं विध्वस्ततया प्रकृष्टां शोकविभावतां प्रतिपद्यमानेन करुण एव पोष्यते।

दन्तक्षतानीति। बोधिसत्त्वस्य सिंहीं स्वकिशोरभक्षणप्रवृत्तां प्रति निजं शरीरं वितीर्णवतः केनचिच्चाटुकं क्रियते। प्रोद्भूतः सान्द्रपुलकः परार्थसंपत्तिजेनानन्दभरेण यत्र। रक्ते रुधिरे मनोऽभिलाषो यस्याः। अनुरक्तं च मनो यस्याः। मुनयश्चोद्बोधितमदनावेशाश्चेति विरोधः। "जातस्पृहैः" इति च "वयमपि यदि कदाचिदेवं कारुणिका भविष्यामस्तदा सत्यतो मुनयः" इति मनोराज्ययुक्तैः। समासोक्तेश्चालङ्कारान्नायिकावृत्तान्तप्रतीतिः। **पर इति**। दन्तक्षतयुक्तकामुकव्यतिरिक्तः तदवलोकनात् कामुकदन्तक्षतादिदर्शनात्। **एतद्दृशेति**। जिनदन्तक्षतादिदर्शनेन। अत्र शृङ्गारतुल्यत्वेन शान्तो विवक्षितः।

सारबोधिनी–अविरोधस्य प्रकारान्तरमाह **स्मर्यमाण इति**। **अत्रेति**। पूर्वावस्था रशनोत्कर्षणादिः। शृङ्गाराङ्गं तदनुभावः। **परिपोषयतीति**। अत्यन्तसुखहेतोर्विच्छेदस्य शोकोपोद्बलकत्वात्। **दन्तक्षतानीत्यादि**। करजा नखाः। विपाटितानि विदारितानि। रक्तं रुधिरमनुरक्तं च। मृगराजः सिंहः मृग इति पुंजातिविशेषो नृपश्च। अपिर्विरोधे, गतस्पृहाणां मुनीनां तदुद्रेकात्। प्रसूय बुभुक्षया निजापत्यमेव भोक्तुमारभमाणायै सिंहिकायै तदपत्यरक्षणाय स्वाङ्गमर्पितवन्तं जिनं प्रति कस्यचिदियमुक्तिः। अत्र जिनदेहे सिंहीदन्तनखक्षतानि बीभत्सप्रतिपादकान्यपि कान्तादत्तदन्तक्षतरूपशृङ्गारानुभावसाम्येनोक्तानि तस्य प्रकर्षातिशयं प्रतिपादयन्ति। अत एव सस्पृहतदवलोकनेन रागिजनतुल्यता मुनीनामपीति साम्यविवक्षेत्याह **अत्र कामुकस्येत्यादि**। ननु दयावीरस्य विस्मयोत्थापकत्वात् जिनविषयकरताबद्भुतस्य। तत्र च दयावीरशृङ्गारयोरङ्गतेति अङ्गत्वं प्राप्तयोरेवोदाहरणत्वेन तृतीयप्रकारासंभव इति चेत्, मैवम्, ब्राह्मणानां सन्ध्यावन्दनमिव बौद्धस्य दयालुत्वं स्वभाव इति दयाया विस्मयानुत्थापकत्वात्। **मिश्रास्तु** उक्तदोषादिदमस्य नोदाहरणम्। किन्तु

"सरागया स्रुतघनघर्मतोयया कराहतिध्वनितपृथूरुपीठया।
मुहुर्मुहुर्दशनविखण्डितोष्ठया रुषा नृपाः प्रियतमयेव भेजिरे॥"

इति शृङ्गाररौद्रयोः साम्यविवक्षणाददोषत्वमित्याहुः। **अङ्गिनीति**। अङ्गिनि विरुद्धयोरङ्गत्वं द्विधा भवति तुल्यकक्षतया परस्याङ्गभावमापाद्य वा।

क्रामन्त्यः क्षतकोमलाङ्गुलिगलद्रक्तैः सदर्भाः स्थलीः
पादैः पातितयावकैरिव गलद्बाष्पाम्बुधौताननाः।
भीता भर्तृकरावलम्बितकरास्त्वच्छत्रुनार्योऽधुना
दावाग्निं परितो भ्रमन्ति पुनरप्युद्यद्विवाहा इव॥३३८॥

अत्र चाटुके राजविषया रतिः प्रतीयते। तत्र करुण इव शृङ्गारोऽप्यङ्गमिति तयोर्न विरोधः। यथा

एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ।।३३९।।

इत्यत्र एहीति क्रीडन्ति गच्छेति क्रीडन्तीति क्रीडनापेक्षयोरागमनगमनयोर्न विरोधः ।

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोप्याददानोऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः ।।३४०।।

इत्यत्र त्रिपुररिपुप्रभावातिशयस्य करुणोऽङ्गम् तस्य तु शृङ्गारः, तथापि न करुणे विश्रान्तिरिति तस्याङ्गतैव । अथवा प्राक् यथा कामुक आचरति स्म तथा शराग्निरिति शृङ्गारपोषितेन करुणेन मुख्य एवार्थ उपोद्बल्यते । उक्तं हि

'गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते ।
प्रधानस्योपकारे हि तथा भूयसि वर्तते' ।।इति।

प्राक् प्रतिपादितस्य रसस्य रसान्तरेण न विरोधः, नाप्यङ्गाङ्गिभावो भवति, इति रसशब्देनात्र स्थायिभाव उपलक्ष्यते ।

इति काव्यप्रकाशे दोषदर्शनो नाम सप्तम उल्लासः ।

बालचित्तानुरञ्जनी--परस्परविरोधिनोरपि रसयोर्भावयोर्वाङ्गिनि भावे रसे वाङ्गभावप्राप्तौ न दोषः । यथा 'क्रामन्त्य' इति । होमाग्निधूमकृतं बाष्पाम्बु, यदि वा बन्धुगृहत्यागदुःखोद्भवम् । भयं कुमारीजनोचितः साध्वसः । अनभ्यस्तगमनतया भयाविसंष्ठुलगतितया च विवाहे त्रिरग्निप्रदक्षिणनिमित्तं च भर्तृकरावलम्बनम् । **करुण इति** । रतेरङ्गिन्याः करुणशृङ्गारौ अङ्गमिति न विरोधः ।

एहि गच्छ इति । आगमनगमनयोर्विरुद्धयोरपि क्रीडाङ्गत्वेनानूद्यमानयोः समावेशे सति न विरोधः । तद्वत्क्रामन्त्य इत्यादावपि करुणशृङ्गारयोरनूद्यत्वम् रतेरेव प्राधान्येन वाक्यार्थत्वात् । विरुद्धानामपि अन्यमुखप्रेक्षित्वेन परतन्त्रीकृतानां स्वात्मपरामर्शेऽपि अविश्रान्तानां का कथाऽन्योन्यरूपचिन्तायां येन विरोधः स्यात् ।

तत्र करुणे विश्रान्त्यभावे हेतुमाह **अथवेति** । अथवेत्यव्ययसमुदायो यस्मादित्यर्थे "अथवा श्रेयसि केन तृप्यत" इत्यत्रेव ।

क्षिप्तो हस्तेति । वह्नेः क्षेपो विधूननं भयहेतुकमिति करुणाङ्गम् । उपलालनाप्रवृत्तस्य तु वल्लभस्य करप्रहरणासहनं क्षेपो नायिकान्तरसंपर्कसमुत्थेर्ष्याकोपनिमित्तो विप्रलम्भसूचकः । **त्रिपुररिपुप्रभावातिशयस्येति** । रतिरूपभावस्य प्रेयोऽलङ्कारविषयस्य वाक्यार्थीभूतस्याङ्गिनः । **करुणोऽङ्गमिति** । विप्रलम्भापेक्षया तस्य निकटत्वं महेश्वरप्रभावं प्रति सोपयोगत्वात् ।

ननु 'गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यात्' इति उक्तन्यायेन करुणशृङ्गारयोः परस्परमत्र नाङ्गाङ्गिभावेन भवितव्यमित्यत आह **उक्तं हीति** । **गुणः कृतात्मेति** । अङ्गभूतान्यपि रसान्तराणि स्वविभावादिसामग्र्या स्वावस्थायां यद्यपि लब्धपरिपोषाणि चमत्कुर्वन्ति, तथापि स चमत्कारस्तावत्येव न परितुष्य विश्राम्यति, किं तु चमत्कारान्तरमनुधावति । सर्वत्र चाङ्गाङ्गिभावेऽयमेवोदन्त इति भावः ।

उपसंहरन्नाह **प्राक् प्रतीति** । **रसशब्देनेति** । रसानां स्थायिनो भावा उपचारात् रसशब्देनोक्ताः । सूत्रे रसीकरणयोग्यत्वात् । तेषामङ्गत्वे निर्विरोधत्वमेव, ततो रसानां स्थायिसंचारिभावेनाङ्गाङ्गिताऽपि युक्तैवेति भावः । एतेन "बहूनां समवेतानां रूपं यस्य भवेद् बहु । स मन्तव्यो रसः स्थायी शेषाः संचारिणो मताः ॥" इति मतं स्वीकृतम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसरस्वतीतीर्थविरचितायां बालचित्तानुरञ्जिन्यां दोषदर्शनो नाम सप्तम उल्लासः ।

सारबोधिनी—क्रामन्त्य इति । स्थलीरिति कर्मपदम् । सदर्भत्वम् तदास्तरणेन, तद्वत्त्वे नवधूमेन भयेन च बाष्पपतनम् । **उद्यद्विवाहा इवेति** । तत्कालेऽपि भर्तृकरावलम्बनादिसंभवात् । **अग्निमिति** । परितःशब्दयोगे द्वितीया । **न विरोध इति** । परस्परविरुद्धयोरपि सामन्तयोर्नृपतिकार्यसंपादनमिवेत्यर्थः । नन्वन्यपरयोर्विरुद्धैकस्वभावयोः कथं स्वभावत्याग इति दृष्टान्तेन परिहरति **एहीति** । अत्र क्रीडाङ्गत्वेनोपात्तानां विरुद्धस्वभावानामपि आगमनगमनादीनां यथा न विरोधस्तथेहापीत्याह **इत्यत्रेति** । द्वितीयभेदमुदाहरति **क्षिप्त इति** । हस्तावलग्नः क्षिप्त इति योज्यम् । एवमुत्तरत्रापि व्युत्क्रमेण संबन्धः । अवधूतो निराकृतः । **तस्य तु शृङ्गार इति** । अङ्गमिति शेषः । नन्वेवमपि शृङ्गारेण परिपुष्टं करुणं प्रधानमेव, न तु प्रभावातिशयेऽङ्गमत आह **तथापीति** । शृङ्गारापेक्षया प्रधानत्वेऽपि प्रभावातिशयेऽङ्गत्वमिति भावः । **अथवेति** । प्रथमपक्षे एकस्य द्वयं, परपक्षे विशिष्टवैशिष्टचमिति पक्षयोर्भेदः । **गुणो** विशेषणम् । **संस्कारोऽन्येन** परिपुष्टिः । तथा स्वसंस्कारेण । ननु विगलितवेद्यान्तरत्वं रसस्वरूपमत एकदा द्वितीयाभावात् कथं विरोधः, कथं वाङ्गिभावादिकमित्यत आह **प्रागिति** ।

इति सारबोधिन्यां सप्तम उल्लासः ।

FOOT NOTES

१–मुखायेदम् A. २–अत्र साधुत्वज्ञानाभावः A. B. ३–C reads अत्रसाधुत्वज्ञानाभावः । ४–तत्सामान्यभावाभावान्न A. ५–A and B read अप्रयुक्तत्वम् । ६–B reads additionally "नापरः। एतत्पद्यकर्तुरेव प्रयोगेण देवत्तादेरपि पुंस्त्वादौ प्रयुक्तत्वसम्भवात् । ७–A reads यथायमिति additionally. ८–A and B has this additional reading" निरर्थकमिति । निरर्थकं छन्दः, पूरणमात्रफलकम् । अत्र तत्पदव्यतिरेकप्रयुक्तान्वयाबोधकत्वाभावान्निराकांक्षत्वमेव दूषकताबीजम् । ९–प्रसिद्धार्थस्य शाब्दबोधकं निहतार्थं सामग्रीसाद्गुण्येन प्रागप्रसिद्धस्य प्रतिपत्तौ नायं दोषः A. १०–अपि चात्रानादरः A. B. ११–धर्मधर्मिणोः A. १२–स्यादेव इदंत्वसमर्थोदाहरणमेव तर्हि कथमवाचक प्रसंगेऽसमर्थोदाहरणमिति चेत् B. १३–नतु वस्तुनि त्रित्वम्, A, B. १४–तदव्याप्तेः A. १५–Bonits this lines १६–ग्राम्यम् A. १७–अथ भवेदिति A. १८–महिमत्वं A. १९–वा प्रप्तत्वा A. २०–न तु तत्सदृशस्येति A. २१–तल्प्रत्ययार्थः A. २२–तान्तिं ग्लानिं निषेधो A. २३–विधेयत्वाप्रतिपत्तिः।

———

अथ अष्टम उल्लासः

एवं दोषानुक्त्वा गुणालङ्कारविवेकमाह

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥६६॥

आत्मन एव हि यथा शौर्यादयो नाकारस्य तथा रसस्यैव माधुर्यादयो गुणाः, न वर्णानाम् । क्वचित्तु शौर्यादिसमुचितस्याकारमहत्त्वादेर्दर्शनात् 'आकार एवास्य शूरः' इत्यादेर्व्यवहारादन्यत्राशूरेऽपि विततकृतित्वमात्रेण 'शूरः' इति क्वापि शूरेऽपि मूर्तिलाघवमात्रेण 'अशूरः' इति, अविश्रान्तप्रतीतयो यथा व्यवहरन्ति तद्वन्मधुरादिव्यञ्जकसुकुमारादिवर्णानां मधुरादिव्यवहारप्रवृत्तेरमधुरादिरसाङ्गानां वर्णानां सौकुमार्यादिमात्रेण माधुर्यादि, मधुरादिरसोपकरणानां तेषामसौकुमार्यादेरमाधुर्यादि रसपर्यन्तविश्रान्तप्रतीतिवन्ध्या व्यवहरन्ति । अत एव माधुर्यादयो रसधर्माः समुचितैर्वर्णैर्व्यज्यन्ते न तु वर्णमात्राश्रयाः । यथैषां व्यञ्जकत्वं तथोदाहरिष्यते ।

बालचित्तानुरञ्जनी—एवं दोषविवेकं विधाय गुणविवेकं निरूपयिष्यन् गुणलक्षणमाह **य इति** । अङ्गिनः शरीरिणः आत्मभूतस्योत्कर्षहेतवो ये धर्मास्ते गुणाः । यदाह "तद[म]र्थमवलम्बन्ते येऽङ्गिनं ते गुणा" इति । अवलम्बितः समवायवृत्त्या वर्त्तमानः । अत्रात्मदृष्टान्तेन शब्दार्थयुगलक्षणं काव्यं शरीरमिव, श्रुतिकटुत्वादयो ये दोषाः श्वित्रादय इव, माधुर्यादयो गुणाः शौर्यादय इव, अनुप्रासोपमालङ्काराः कङ्कणहारादय इव रसादिध्वनिरीत्यैवेति प्रदर्शितमिति द्रष्टव्यम् । ननु रसस्य माधुर्यादयो गुणा इत्यसङ्गतम्, वामनादिभिर्वर्णगुणत्वेन प्रतिपादितत्वाच्च 'मधुरा वर्णा' इति प्रयोगदर्शनादित्यत आह **आत्मन एवेति** । शवशरीरे शौर्याद्यभावाद्यथा आत्मन एव शौर्यादयः तथा रसस्यैव माधुर्यादयो न त्ववयवस्थानीयानां वर्णानामित्यर्थः । तर्हि कथं मधुरा वर्णा इत्यत आह **क्वचिदिति** । अविश्रान्तप्रतीतयः अविचक्षणाः भ्रान्तिवशात् अशूरं शूरं, शूरं वाऽशूरं व्यवहरन्ति यथा तथा रसपर्यन्तविश्रान्तप्रतीतिवन्ध्या वामनादयोऽपि अमधुरान् वर्णान् मधुरान् वर्णयन्तीत्यर्थः । यदि माधुर्यादयो रसधर्माः किमन्तर्गडुभिर्वर्णैरित्यत आह **समुचितैरिति** । यतः शौर्यादिरात्मधर्मत्वनियमः, अतः समुचितैराकारैः शौर्यादयो व्यज्यन्ते तथा वर्णैरपि माधुर्यादयः । यथा शौर्यादय आकारमात्राश्रया न भवन्ति तथा माधुर्यादयोऽपि वर्णाश्रया न भवन्तीत्यर्थः । माधुर्यादीनां व्यञ्जकत्वं कथमित्यत आह **यथैषामिति** । एषां वर्णानाम् । तथैवोदाहरिष्यते ।

सारबोधिनी—दोषानुक्त्वेत्यवसरसङ्गतिसूचनम् । अत्र केचित्—गुणालङ्कारयोर्नास्ति भेदः, काव्योत्कर्षकत्वाविशेषादित्याहुः । तान् निराचष्टे **गुणालङ्कारविवेकमिति** । विवेकश्च परस्परवैधर्म्यज्ञाना-

धीन इति तदाह **ये रसस्येति**। अत्र शरीरे आत्मवत् काव्ये प्राधान्येन स्थितस्य रसस्य ये धर्माः साक्षात् तदाश्रिता इत्यर्थः। ननु वामनादयो वर्णादीनामेव धर्मा गुणा इति वदन्ति, तेन तद्धर्मा एव ते कथं रसस्येत्युच्यते, इत्यत आह **अचलेति**। अचलस्थितयः अपृथक्स्थितयः, नियतस्थितय इति यावत्। नैयत्यं च रसेन तदुपकारेण च, ये रसं विना नावतिष्ठन्ते, अवस्थिताश्चावश्यं रसमुपकुर्वन्तीत्यर्थः। अत एवानयोर्व्यतिरेकमलङ्कारे वक्ष्यति, एवं च रसोत्कर्षहेतुत्वे सति रसधर्मत्वं गुणलक्षणमित्याहुः। अपरे तु रसस्य धर्मा गुणास्ते चोत्कर्षरूपाः, स्वव्यञ्जकस्य काव्यस्योत्कर्षकाश्च। तदाह **उत्कर्षहेतव इति**। तेन दोषव्यवच्छेदः। उत्कर्षहेतुष्वलङ्कारेष्वतिप्रसङ्गवारणार्थं **अचलस्थितय इति**। अचला नियता स्थितिर्येषां ते तथा रसविशेषनियतविशेषा इत्यर्थः। शृङ्गारादौ वीरादौ च माधुर्यस्य ओजसश्च नियतत्वादलङ्काराणां च सर्वेषां सर्वरसोत्कर्षकत्वात्। नन्वयं स रशनेत्यादावङ्गतां प्राप्तवति शृङ्गारे माधुर्यस्य व्यञ्जकवर्णविरहेण माधुर्यस्य चलस्थितावव्याप्तिरित्यत आह **अङ्गिन इति**। अङ्गिन्येव स्थितिनियमो नत्वङ्ग इति वदन्ति। वामनादिभिर्वर्ण[धर्म]त्वेन गुणानां निरूपणेऽपि अचलस्थितित्वेन रसधर्मत्वं साधितम्। तत्र योग्यं दृष्टान्तमाह **आत्मन एवेति**। अस्य व्यवहारकर्तुः विश्रान्ता विषयादन्यत्राप्रसारिणी तदन्याविश्रान्ता एवं प्रतीतिर्येषाम्, भ्रान्ता इत्यर्थः। अमधुरादिरसाङ्गानां तद्व्यञ्जकत्वेनोपात्तानां उपकरणानामित्यस्याप्ययमेवार्थः। तेषां वर्णानां माधुर्याद्यमाधुर्यादि च व्यवहरन्तीत्यन्वयः।

रसपर्यन्तेति। रसस्य पर्यन्ते सीमायां विश्रान्ता तदन्यत्राप्रसारिणी रसमर्यादाग्राहिणी या प्रतीतिस्तया वन्ध्यास्तद्धीनाः। **अत एवेति**। रसनैयत्यादेवेत्यर्थः। **न तु वर्णेति**। अत्रानैयत्यादिति भावः। ननु यद्येवं तदा कथं वर्णादीनां समुचितत्वं कथं वा व्यञ्जकत्वमत आह **यथैषामिति**।

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।

हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥६७॥

ये वाचकवाच्यलक्षणाङ्गातिशयमुखेन मुख्यं रसं संभविनमुपकुर्वन्ति ते कण्ठाद्यङ्गानामुत्कर्षाधानद्वारेण शरीरिणोऽपि, उपकारका हारादय इवालङ्काराः। यत्र तु नास्ति रसस्तत्रोक्तिवैचित्र्यमात्रपर्यवसायिनः। क्वचित्तु सन्तमपि नोपकुर्वन्ति।

बालचित्तानुरञ्जनी—गुणालङ्कारविवेकस्य वक्तव्यत्वात् तस्य तदुभयस्वरूपपरिज्ञानपूर्वकत्वादकाण्डेऽपि अलङ्कारलक्षणमुपक्षिपति **उपकुर्वन्तीति**। तं अङ्गिरसं सन्तं, न पुनरविद्यमानम्, उपकारापेक्षाया अभावात्, जातुचित् न सर्वदा, 'क्वचित्तु सन्तमपि नोपकुर्वन्ती'ति वक्ष्यमाणत्वात्, संयोगवृत्त्योपकुर्वन्त्यलङ्काराः, न तु गुणवत्समवायवृत्त्या। यदाहुः 'अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवदि'ति श्लोकं व्याकरोति **य इति**। वाचकः शब्दो वाच्योऽर्थः तत्स्वरूपे रसाङ्गे तयोरतिशयनमुखेनोपकुर्वन्ति तेऽलङ्कारा इति संबन्धः। शौर्यादिभिरात्मैवालङ्कार्यः, न त्वचेतनम्। शवशरीरं पतितशरीरं वा कटकादिवत् हास्यावहम्, अनौचित्यात्। इत्थमलङ्कारैरलङ्कार्यो रस एवेत्यर्थः। ननु यत्र रसो नास्ति तत्र किमलङ्काराणां कृत्यमित्याह **यत्र त्विति**। यत्र चित्रकाव्ये स्फुटप्रतीतिको रसो नास्ति तत्र उक्तिवैचित्र्यमात्रविश्रान्ता इत्यर्थः। रसस्य सत्त्वेऽपि कदाचिदलङ्काराणामुपयोगो नास्तीत्याह **क्वचित्त्विति**।

सारबोधिनी—अलङ्कारेषूक्तगुणधर्मराहित्यं दर्शयितुमलङ्कारस्वरूपमाह **उपकुर्वन्तीति** । तं रसं जातुचित् कदाचित्, तेनालङ्कारा रसं विना अवतिष्ठन्ते, अवश्यं च नोपकुर्वन्ति । न वा रसं साक्षादिति, द्वारेण । गुणेभ्यो विलक्षणा एवेति ध्येयम् । अतिशय उत्कर्षणम् । 'तत्'पदेन अङ्गि-परामर्शः । तदाह **मुख्यमिति** । स तु प्रकृते रस इत्याह **रसमिति** । सन्तमित्यस्यार्थः संभविनमिति । **यत्र त्विति** । वैचित्र्यं शब्दानां सुश्रवत्वबन्धकौशलादि, अर्थानामीपन्मनोहारिता । जातुचिदिति विवृणोति **सन्तमपीत्यादि** । अत्राप्युक्तिवैचित्र्यपर्यवसिताः ।

यथाक्रममुदाहरणानि

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला ॥ ३४१ ॥

इत्यादौ वाचकमुखेन

मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं
प्रमाथी निर्धूमं ज्वलति विधुतः पावक इव ।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो
न मां त्रातुं तातः प्रभवति न चाम्बा न भवती ॥३४२ ॥

इत्यादौ वाच्यमुखेनालङ्कारौ रसमुपकुरुतः ।

बालचित्तानुरञ्जनी—रसस्य सतः उपकारकस्थानमुदाहरति **अपसारयेत्यादि** । हे सखे! कर्पूरं दूरीकुरु! हारं दूरत एव कुरु । कमलैः किम्, मृणालैरलमलम् । बाला दिवानिशमिति वदति । अत्र कोमलानुप्रासरूपोऽलङ्कारो वाचकमुखेन शब्दालङ्कारतया विप्रलम्भशृङ्गारात्मनो रसस्योपकारी-त्याह **इत्यादाविति** । वाच्यालङ्कारस्य उपकारकत्वमुदाहरति **मनोराग इति** । मनोरागस्तीव्रं विषमिव सततं प्रसरति । प्रमाथी मनोरागकम्पितोऽग्निश्च निर्धूमं ज्वलति । बलीयान् ज्वर इव इतः प्रत्यङ्गं हिनस्ति । तातो मां त्रातुं न प्रभवति अम्बा च न, भवती च न । अत्र विषमिवेत्यार्थं उपमालङ्कारः ।

सारबोधिनी—**यथेति** । उपकारकत्वानुमकारकत्वलक्ष्यप्रदर्शनाय उपक्रमः । तत्र प्रथमं कल्प-माह **अपसारयेति** । घनसारः कर्पूरः । अत्र कोमलया वृत्त्या, अनुप्रासेन शब्दानामलङ्करणं विधाय विप्रलम्भ उत्कृष्यते ।

अर्थोपकारद्वारतामाह **मनोराग इति** । विसर्पति सर्वतः प्रसरति । विधुत उत्तेजितः । न तातः, नन्दनाय मत्प्रतिप्रसवात् । न चाम्बा, सापि तदनुगामिनी । न भवती, पित्रोः संमतेऽर्थे सख्या अकिञ्चित्करत्वात् । माधवानुरक्ताया मालत्या लवङ्गिकां प्रतीयमुक्तिः । अत्र मालोपमया तीव्र-विषादिधर्मं मनोरागे प्रत्याय्य तद्द्वारा विप्रलम्भ उत्कृष्यत इत्यर्थः । नीरसे उक्तिवैचित्र्यं 'शीर्ण-घ्राणाङ्घ्री'त्यादौ सुप्रसिद्धमिति नोदाहृतम् ।

चित्ते विहट्टदि ण टुट्टदि सा गुणेसु सेज्जासु लोट्टदि विसट्टदि दिम्मुहेसु ।
बोल्लम्मि वट्टदि पवट्टदि कव्वबन्धे झाणे ण टुट्टदि चिरं तरुणी तरट्टी ।।३४३।।

इत्यादौ वाचकमेव ।

मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति
क्रन्दत्सु भ्रमरेषु वीक्ष्य दयितासन्नं पुरः सारसम् ।
चक्राह्वेन वियोगिना बिसलता नास्वादिता नोज्झिता
कण्ठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः ।।३४४।।

इत्यादौ वाच्यमेव न तु रसम् । अत्र बिसलता न जीवं रोद्धुं क्षमेति प्रकृताननुगुणोपमा ।

बालचित्तानुरञ्जनी—अर्थालङ्कारैरनुपकारमुदाहरति **चित्ते इति** । चित्ते विहट्टदि दुरुत्पाटा भवति । गुणेसु गुणेषु सा न टुट्टदि, पर्यवसानं न प्राप्नोति । सेज्जाइ शय्यायां, लुट्टदि लुठति । दिम्मुहेसु दिङ्मुखेषु विसप्पदि विसर्पति । बोल्लम्मि वचने, वट्टदि वर्त्तते । कव्वबन्धे काव्यबन्धे पवट्टदि प्रवर्तते । झाणे ध्याने ण टुट्टदि न त्रुट्यति । चिरं तरुणी तरट्टी प्रगल्भा । अत्र शब्दालङ्कारेण प्रवर्त्तितेन न श्रृङ्गारस्योपकारः, कथितवर्णानुप्रासत्वात् इत्याह **इत्यादौ वाचकमेवेति** । वाच्यालङ्कारस्यानुपकारकत्वमुदाहरति **मित्र इति** । सूर्ये क्वापि गते सति, मुकुलिते कमलकानने ताम्यति सति, भ्रमरेषु क्रन्दत्सु सत्सु, कान्तसङ्गतां सारसीं अग्रे दृष्ट्वा विरहिणा चक्रवाकेन मृणाललता नास्वादिता, न त्यक्ता । केवलं निर्गच्छतो जीवस्य अर्गलेव वक्त्रे विनिहिता । अत्रोपमालङ्कारोऽर्थालङ्कारः । स च न रसोपकारीत्याह **इत्यादावि**ति । [कथं ?] वाच्यं नोपकारकमित्याशङ्क्याह **अत्रेति** । न क्षमा, नोचिता । विप्रलम्भश्रृङ्गारे प्राणनिर्गमस्यापि वर्णनीयत्वात् । अत्र प्रकृतस्य रसस्याननुगुणोऽयमुपमालङ्कार इत्यर्थः ।

सारबोधिनी—चित्त इति । चिहुट्टदि नखोत्कृतं चर्म चिहुट्टदि इति प्रसिद्धिः । तद्वदाचरति चमत्करोतीति वा । ण खुट्टदि, न हसति शय्यायां लुठति । विकसति दिङ्मुखेषु प्रकाशिता भवति । वचने प्रवर्तते । नैव वचनविषयीभवति प्रवर्तते, काव्यबन्धस्यैव विषयीभवति । ध्याने न त्रुट्यति ध्यानेऽपि सैव विषयीभवति । तरट्टी प्रगल्भा जाता । अत्र सा मम सर्वत्रानुषज्यते इति तात्पर्यम् । इदं विरहिणो नायकस्य वचनम् । वाचकमेवेत्यनेन रसव्यवच्छेदः । अत्रौजोव्यञ्जकस्य परुषानुप्रासस्यातिमधुरे विप्रलम्भेऽनुपकारकत्वात्, प्राकृतस्यौजोगुणप्रधानत्वात् तद्व्यञ्जकत्वेनादोषत्वाच्च ।

मित्रेति । मित्रे सूर्य एव मित्रे सुहृदि । बद्धानने मुद्रितपद्म एव मौनिनि । भ्रमरेष्वेव क्रन्दत्सु । अत्र प्रकृते रसे मित्रादिशब्दश्लेषादिमूलातिशयोक्तिसमर्पितः कश्चिदतिशयो न स्फुरेत् । यदि वा स्फुरेत् यतो मित्रस्य सुहृदः प्रतिकर्तुरभावे विरहोद्रेकः समुचित इत्याद्यतिशयः सम्भवतीति तथापि जीवरोध-

कत्वस्य साधर्म्यस्य प्रकृते उपमेये सम्भवाभावेन असम्भवन्त्युपमा अननुगुणा नानुकूल्यमाधत्त इत्यर्थः। अपि च विप्रलम्भे प्राणापगमस्यापि वर्णनीयत्वात् प्रतिबन्धवर्णने तदपकर्षः स्फुट एवेत्यतो नानुगुण्यम्, उक्तिवैचित्र्यं तु करोत्येवेति दिक्।

एष एव च गुणालङ्कारप्रविभागः। एवं च "समवायवृत्त्या शौर्यादयः संयोगवृत्त्या तु हारादय इत्यस्तु गुणालङ्काराणां भेदः, ओजःप्रभृतीनामनुप्रासोपमादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेणैवेषां भेदः" इत्यभिधानमसत्।

बालचित्तानुरञ्जनी—अनेनैव प्रकारेण भेदो न प्रकारान्तरेणेति प्रतिपादयितुं निगमयति **एष इति**। समवायवृत्त्यैव गुणालङ्काराणां स्थितिरिति मतं दूषयितुमाह **एवञ्चेति**। दृष्टान्तीकृतानां गुणानां वृत्तिभेदमभ्युपगच्छामः। दार्ष्टान्तिकानां प्रभेदो गतानुगतिकतामात्रप्रयुक्त इति परकीयं मतमसदित्यर्थः। अस्त्विति कामचारे लोट्। उभयेषामलङ्काराणां गुणानाञ्च। गड्डरिका मेषी। प्रयोजनमनतिसन्धाय यस्मिन् मार्गे लगति इतरा अपि मेष्यस्तमेव प्रधानमनुसरन्ति। अयं गड्डरिकाप्रवाह आसीदित्यत्रोक्तिरुक्तैव द्रष्टव्या।

सारबोधिनी—आचार्यान्तरोक्तं गुणालङ्कारयोर्भेदकाभिधानं दूषयितुमुपन्यस्यति **एवञ्चेति**। एवं मदुक्तरीत्या भेदे व्यवस्थिते यत्तु उक्तं समवायसंयोगाभ्यां गुणालङ्कारयोर्भेद इति लौकिकी स्थितिस्तद्वदत्रापि समवायसंयोगकृत एव भेदो भविष्यति गुणालङ्कारयोरिति। तद् दूषयति **ओजः प्रभृतीनामिति**। काव्ये गुणालङ्काराणां शब्दार्थाभ्यां पृथक्सिद्धिराहित्येन संयोगाभावादपृथक्सिद्धत्वेन समवाये सिद्धे दृष्टान्तवैषम्येन न तथात्वमित्यर्थः। इति हेतोः हेतुशून्यवचसां भेदाभिधानं तदसदित्यन्वयः। **गड्डरिकाप्रवाह इति**। भेदकं विना भेदवादात् इदमित्थमिति हेतुशून्यं वचो गड्डरिका, तस्य गुरुगौरवेणानुमोदनं प्रवाहः। यद्वा गड्डरिका मेषी, अविच्छेदेन तदनुगमनं प्रवाहः।

यदप्युक्तं "काव्यशोभायाः कर्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलङ्काराः" इति तदपि न युक्तम्। यतः किं समस्तैर्गुणैः काव्यव्यवहारः, उत कतिपयैः। यदि समस्तैः, तत् कथमसमस्तगुणा गौडी पाञ्चाली च रीतिः काव्यस्यात्मा। अथ कतिपयैः, ततः

अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूमः ॥३४५॥

इत्यादावोजःप्रभृतिषु गुणेषु सत्सु काव्यव्यवहारप्राप्तिः।

बालचित्तानुरञ्जनी—इदानीं वामनालङ्कारनिरूपितं गुणविभागं दूषयितुमनुवदति **यदपीति**। समस्तगुणानां काव्यशोभाहेतुत्वे अव्याप्तिमाह **यदीति**। ओजःप्रभृतिकतिपयगुणा गौडी माधुर्यादिकतिपयगुणा पाञ्चालीति तयोः काव्यत्वं न स्यादिति अव्याप्तिरित्यर्थः। द्वितीयमतिव्याप्त्या दूषयति **अथेति**। इत्यादावपि कतिपयगुणसद्भाववर्णन्येव [?]।

सारबोधिनी—इदानीं वामनाद्युदीरितं भेदलक्षणं दूषयितुमुपन्यस्यति **यदप्युक्तमिति** । तद्दूषयति तदपि न युक्तमिति । तथा च यदि समस्तैर्गुणैस्तदा अव्याप्तिरुतासमस्तैस्तदाऽतिव्याप्तिरित्याह किं समस्तैरित्यादि ।

स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनो ।
अस्या रदच्छदरसो न्यक्करोतितरां सुधाम् ॥ ९४ ॥

इत्यादौ विशेषोक्तिव्यतिरेकौ गुणनिरपेक्षो काव्यव्यवहारस्य प्रवर्तकौ ।

इदानीं गुणानां भेदमाह

माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश ।

एषां क्रमेण लक्षणमाह

आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् ॥६८॥

शृङ्गारे अर्थात् सम्भोगे । द्रुतिर्गलितत्वमिव । श्रव्यत्वं पुनरोजःप्रसादयोरपि ।

बालचित्तानुरञ्जनी—अस्या अधररसः सुधामवधीरयतितराम् । अत्र पूर्वार्धे स्वर्गप्राप्तिर्वरवर्णिनीति सामानाधिकरण्योक्तिर्विशेषोक्तिरलङ्कारः । एकगुणहानिकल्पनायां गुणसाम्यदार्ढ्यं विशेषोक्तिरिति वामनेनोक्तत्वात् । द्वितीयार्धे व्यतिरेकालङ्कारः । गुणनिरपेक्षौ वैदर्भीनिर्दिष्टसमस्तगुणनिरपेक्षौ स्फुटप्रकाशमानगुणस्पर्शशून्यावित्युक्तत्वात् । तावपि काव्यस्य शोभातिशयहेतू इत्यर्थः । इदानीं वामनादिभिरुक्तं भेदप्रकारं दूषयितुं स्वमतानुमतं गुणविभागमाह **इदानीमिति** । ते त्रय एव गुणा न पुनर्दशेति वामनादिमतनिराकरणम् । आह्लादकत्वं चित्तस्येति शेषः । द्रुतिर्द्रवः । तत्कारणम्, विप्रलम्भेऽतिशयान्वितं माधुर्यमिति वक्ष्यमाणत्वात् । अत्र शृङ्गारशब्देन संभोग एव गृह्यत इत्याह **अर्थादिति** । ननु अन्तःकरणस्य द्रवहेतुत्वं कथमित्यत आह **द्रुतिरिति** । औपचारिकः प्रयोग इति यावत् । श्रव्यत्वमेव माधुर्यमिति भामहेनोक्तम्, तदसङ्गतम्, अतिव्याप्तेरित्याह **श्रव्यत्वमिति** । न केवलं सम्भोग एव माधुर्यं द्रुतिकारणम् ।

सारबोधिनी—एवं गुणलक्षणं दूषयित्वा अलङ्कारलक्षणं दूषयति **स्वर्गप्राप्तिरिति** । अनेन मानुषदेहेन न तु दिव्येन । एतद्देहः स्वर्गप्राप्त्यभावे कारणम्, तस्मिन् सति तदभावात् विशेषोक्तिः, व्यतिरेकश्च स्फुट एव । **गुणनिरपेक्षाविति** । तथा चात्रालङ्कारलक्षणाव्याप्तिः स्यात्तथतोऽत्र प्रसादादेरभावात् गुणाहितशोभाया अभावात् तदतिशयाभावः । 'गुणाहितशोभाया अतिशयकर्त्तारो धर्मा अलङ्काराः' इति तन्मते तल्लक्षणात् । ननु प्रसादादेरभावेऽप्यन्यगुणसत्त्वान्नैवमिति चेन्न । गुणसाकल्यस्य विवक्षितत्वात् । वामनमते वैदर्भ्या रीतेरेव काव्यत्वात् । अत्र च काव्यव्यवहारः सकलसहृदयसंवेद्य एव । किं च तत्सत्त्वेऽप्यलङ्कारः तन्नापेक्षते । तन्नैरपेक्ष्येणैवालङ्कारतश्चमत्कारादिति । **माधुर्येत्यादि** । आख्यापदं परमतेन सह संज्ञामात्रेणाभेदसूचकम् । संज्ञायामभेदेऽपि संज्ञिषु परं भेद एवेत्यर्थः । दशेति परोक्ताः । तदुक्तम्—

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ।।
इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ।

नन्वाह्लादो यद्यानन्दस्तदा रसानतिरेकः सर्वरससाधारण्यं च स्यात् तस्य च तद्रूपत्वादित्यत आह **द्रुतिरिति** । इह हि सामाजिकानां चित्तेषु नवरसीजन्यास्तिस्रोऽवस्थाः द्रुतिर्विस्तारो विकासश्चेति । तत्र शृङ्गारकरुणशान्तेभ्यो द्रुतिः, वीरबीभत्सरौद्रेभ्यो विस्तारः, हास्याद्भुतभयानकेभ्यश्च विकास इति । येन हास्ये वदनविकासः, अद्भुते नयनविकासः, भयानके द्रुतापसरणमिति त्रिष्वेव वदननयनगमनेषु प्रसारिता विकास इति । **अर्थादिति** । विप्रलम्भे अतिशयस्य वक्ष्यमाणत्वात् । **श्रव्यत्वमिति** । तेन 'श्रव्यं नातिसमस्तार्थशब्दं मधुरमिष्यत' इति यन्मधुरलक्षणं तदुपेक्षितम् । किं शृङ्गाराश्रितत्वमेवास्य ? नेत्याह **करुण इति** । तन्माधुर्यम् । आतिरेक्ये हेतुमाह **अत्यन्तेति** । अश्रुपातादिहेतुत्वात् ।

करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ।

अत्यन्तद्रुतिहेतुत्वात् ।

दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थिति ।।६९।।

चित्तस्य विस्ताररूपदीप्तत्वजनकमोजः ।

बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च ।

वीराद् बीभत्से ततो रौद्रे सातिशयमोजः ।

शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः ।।७०।।

व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः ।

अन्यदिति । व्याप्यमिह चित्तम् । सर्वत्रेति । सर्वेषु रसेषु सर्वासु रचनासु च ।

बालचित्तानुरञ्जनी—करुणादावपीत्याह **करुण इति** । तन्माधुर्यं संभोगात् करुणे ततोऽपि विप्रलम्भे ततोऽपि शान्ते अतिशयान्वितमित्यर्थः । ओजो लक्षयति **दीप्तीति** । दीप्त्यात्म यच्चित्तं तस्य विस्तृतिर्विस्तारः तस्या हेतुः । वीरे रसे स्थितिर्यस्य । प्रसादं व्याकरोति । चित्तं तदिह व्याप्यम् अन्यदित्यभिधीयते । सर्वत्र सर्वेषु रसेषु सर्वासु च रचनासु विहिता स्थितिर्यस्य । यदा वीररौद्रादिषु चित्तं व्याप्नोति तदा शुष्केन्धनस्याग्निवत् । अनेन, प्रसादेन ओजसा सह संबन्ध उक्तः । यदा तु शृङ्गार-करुणादिषु, तदा स्वच्छजलवत् इत्यनेन माधुर्येण संप्लव इत्युक्तम् ।

सारबोधिनी—**दीप्तीति** । दीप्तिरूपा ज्वलद्रूपा या आत्मनश्चित्तस्य विस्तृतिः तस्या हेतुरित्यर्थः । इदमत्र विधातव्यम् । हास्ये शृङ्गाराङ्गतया माधुर्यं प्रकृष्टम्, विकासधर्मतया ओजोऽपि ।

प्रकृष्टे भयानके भग्नचित्तवृत्तिस्वभावत्वेऽपि विभावस्य दीप्तरसतया ओजः प्रकृष्टं माधुर्यमल्पमिति तयोर्माधुर्यमोजोऽपि वर्तत इति । एवमद्भुतेऽपीति प्राञ्चः । तेन हास्यादित्रये द्वौ द्वौ गुणाविति बोध्यम् । **शुष्केन्धनाग्निवदिति** । प्रसादः स्वच्छता । यदा वीररौद्रादिषु चित्तं व्याप्नोति तदा **शुष्केन्धनाग्निवदिति** । यदा शृङ्गारकरुणादिषु तदा **स्वच्छजलवदिति** । **सर्वेष्वति** । झटिति प्रतीयमानत्वं रसेषु, झटिति प्रत्यायकत्वं रचनासु च । तदुक्तम्--"समर्पकत्वं काव्यस्य यत्तु सर्वरसान् प्रति । स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः ॥इति।

गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता ॥७१॥

गुणवृत्त्या, उपचारेण । तेषां गुणानाम् । आकारे शौर्यस्येव । कुतस्त्रय एव न दश इत्याह

केचिदन्तर्भवन्त्येषु दोषत्यागात्परे श्रिताः ।
अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ॥७२॥

बहूनामपि पदानामेकपदवद्भासनात्मा यः श्लेषः, यश्चारोहावरोहक्रमरूपः समाधिः, या च विकटत्वलक्षणा उदारता, यश्चौजोमिश्रितशैथिल्यात्मा प्रसादः, तेषामोजस्यन्तर्भावः ।

बालचित्तानुरञ्जनी--ननु माधुर्यादिव्यवहारः शब्दार्थयोरेव दृश्यते तत्कथं रसादिविषयमित्यत आह **गुणवृत्त्येति** । अत्राप्युक्तस्यैव दृष्टान्तस्यानुषङ्ग इत्याह **आकार इति** । आत्मगुणोऽपि शौर्यादिः यथोपचारेण शरीरे प्रतीयते तद्वदित्यर्थः । 'न पुनर्दशे'त्युक्तम्, तत्समर्थनार्थं पद्यमवतारयति **कुत इति** । केचिदत्रोक्ता गुणाः केषुचित् उक्तेषु गुणेषु अन्तर्भवन्ति । उपलक्षणं चैतत्, अलङ्कारेऽप्यन्तर्भावस्य वक्ष्यमाणत्वात् । केचिदौचित्यमात्रपर्यवसिता इत्याद्यनुसंधेयम् । परे इतरगुणा दोषाणां लिखितपठितानां परित्यागात् पारिशेष्येण पर्यवसितदोषाभावरूपत्वेनैव स्वीकृताः । अन्ये गुणतया अभिमन्यमानाश्च । केचित्तु दोषत्वं भजन्ते । कुत्रचिदुदाहरणविशेषे । अतो न दश, अपि तु त्रय एवेत्यर्थः । वामनादिभिरुक्ताः,'श्लेषः प्रसादः समता माधुर्यं सुकुमारता अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः'॥ इत्यादिना । **ते त्रिधा भवन्ति । केचित् त्रिष्वेवान्तर्भूताः । केचित् दोषाभावरूपत्वेनाश्रिताः । केचित् दोषरूपा इति । तत्रान्तर्भावं तावत् दर्शयति बहूनामिति ।**

यत्रैकपदवद् भान्ति पदानि सुबहून्यपि ।
अनपेक्षितसन्धीनि स श्लेषः परमो गुणः ॥
आरोहन्त्यवरोहन्ति क्रमेण पदानि यत्र सः ।
समाधिर्नाम स गुणः पूता येन सरस्वती ॥

विकटत्वञ्च बन्धस्य कथयन्ति उदारताम्।
शैथिल्यमोजसा मिश्रं प्रसादं च प्रवक्ष्यति ॥

इत्यादि लक्षणलक्षितानां श्लेषादीनामोजस्यन्तर्भावः दीप्त्यात्मविस्तृतिहेतुत्वादित्यर्थः।

सारबोधिनी--ननु यदि ते न शब्दार्थयोस्तत्कथं काव्यलक्षणे सगुणावित्युक्तवानसीत्यत आह **गुणवृत्त्येति** । तद्व्यञ्जकत्वेन तद्वत्त्वमुपचर्यत इति भावः । **केचिदिति** । अन्तर्भवन्ति एतल्लक्षणे क्रोडीकृतत्वादिति शेषः। ये शब्दगुणा दश ते त्रिधा व्यवतिष्ठन्ते । केचित् त्रिष्वेवान्तर्भूताः । केचित् दोषाभावरूपेणाश्रिताः । केचित् दोषरूपा इति । तत्रान्तर्भावं दर्शयति **तथाहीत्यादि** । एकवद्भासनं संधिसौष्ठवादेकस्थानीयवर्णविन्यासात् । यथा—

उन्मज्जज्जलकुञ्जरेन्द्रबहलास्फालानुबन्धोद्धतः
सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः ।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायं तथा
मन्ये प्रेङ्खदसंख्यशङ्खधवला वेलेयमुज्जृम्भते ॥

इत्यत्र गाढबन्धतया व्यक्तमेवौजो वर्णनीयम्। अत एवोक्तम्-"श्लिष्टमस्पष्टशैथिल्यमि"ति । आरोहो गाढता, अवरोहः शैथिल्यम्, तयोः क्रमः । क्रमेणातन्निबन्धः, आरोहपूर्वकोऽवरोहस्तत्पूर्वक आरोहो वा। यथा--

चञ्चद्भुजभ्रमितचण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः ॥

इत्यत्र सञ्चूर्णितान्ते आरोहः, सुयोधनान्ते अवरोहः पुनस्तवान्ते पूर्वः, भीमेत्यन्ते परः। अत्रापि गाढबन्धत्वं व्यक्तमेव। तत्सम्बन्धेनैव शैथिल्यस्यापि गाढत्वात् गुणत्वम् । विकटत्वं विच्छेदात् पदानां नृत्यत्प्रायत्वम्। यथा—

"स्वचरणविनिविष्टैर्नूपुरैर्नर्तकीनां झटिति रणितमासीत् तत्र चित्रं कलं च।" इति

ओजोमिश्रितेत्यादि। क्रमनियमाभावात् समाधितो भेदः। यथा—

यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।
यो यस्तत्कर्मसाक्षी चलति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमपि जगतामन्तकस्यान्तकोऽहम् ॥

अत्र यो य इत्यत्र शैथिल्यम्। शस्त्रमित्योजः, पुनर्बिभर्तीत्यत्र पूर्वम् । अन्यवर्णद्वये परम्। एवमुत्तरत्रापि। **तेषामिति** । तेषां गाढबन्धतया दीप्त्यात्मविस्तृतिहेतुत्वात् । ओजसि ओजःप्रतिपाद्ये व्यञ्जकशब्दार्थविशेषेऽन्तर्भाव इति। एवञ्च तेषु भाक्त ओजोव्यवहार इति भावः।

पृथक्पदत्वरूपं माधुर्यं भङ्ग्या साक्षादुपात्तम् । प्रसादेनार्थव्यक्तिर्गृहीता । मार्गाभेदरूपा समता क्वचिद्दोषः । तथाहि 'मातङ्गाः किमु वल्गितैः' इत्यादौ सिंहाभिधाने मसृणमार्गत्यागो गुणः । कष्टत्वग्राम्यत्वयोर्दुष्टताभिधानात्तन्निराकरणेनापारुष्यरूपं सौकुमार्यम् औज्ज्वल्यरूपा कान्तिश्च स्वीकृता । एवं न दश शब्दगुणाः ।

बालचित्तानुरञ्जनी—'बंधे पृथक्पदत्वं च माधुर्यमुदितं बुधैः' इत्यादिना माधुर्यमङ्गीकृतमित्याह **पृथगिति** । साक्षादुपात्तं कण्ठेनोक्तमित्यर्थः । न त्वाह्लादकत्वं माधुर्यमिति यौष्माकीणं लक्षणीयम् । वामनीयं तु पृथक्पदत्वमिति । कथं तेन तस्य साक्षादुपादानत्वमित्यत आह **भङ्ग्येति** । पर्यायत्वेनेत्यर्थः । पृथक्पदत्वनिबन्धनेऽपि कश्चिदाह्लादोऽस्तीति मतान्तरं माधुर्यानुप्रवेशीति भावः । "यत्रार्थव्यक्तिहेतुत्वात् सोऽर्थव्यक्तिः स्मृतो गुण" इति लक्षिता अर्थव्यक्तिः प्रसादेऽन्तर्भूतेत्याह **प्रसादेनेति** । गृहीता सङ्गृहीता । द्वितीयमाह **मार्गेति** । "प्रतिपादं प्रतिश्लोकमेकमार्गपरिग्रहः । दुर्बन्धो दुर्विभावश्च समतेति गुणो मतः ।" इत्यादिलक्षणलक्षिता समता क्वचिद्दोषः, तत्त्यागो गुण इत्यर्थः । तदुदाहरति **तथाहीति** । अत्र मार्गाभेदस्यैव रसावहत्वात् । मसृणस्यारब्धस्य यस्त्यागः स प्रत्युत गुण एव । साहसत्वस्य सिंहस्य वाच्यत्वादिति भावः । तृतीयमाह **कष्टत्वेति** । "बन्धस्याजरठत्वञ्च सौकुमार्यमिति स्मृतम् । औज्ज्वल्यं कान्तिरित्याहुः" इत्यादि लक्षणलक्षिते सौकुमार्यकान्ती कटुत्वग्राम्यत्वयोः निराकरणात् स्वीकृते इत्यर्थः । निगमयति **एवमिति** । उक्तप्रकारेण शब्दगुणा न दश । किन्तु त्रय एवेत्यर्थः ।

सारबोधिनी—**पृथक्पदत्वमिति** । पृथक् पदानि यस्य स पृथक्पदस्तस्य भावस्तत्त्वम् । तदुक्तं साहित्यदर्पणे "माधुर्यव्यञ्जकत्वं यदसमासस्य वर्णितम् । पृथक्पदत्वं माधुर्यं तेनैवाङ्गीकृतं पुनः ॥" इति [८।१२] अथवा भङ्ग्या पर्यायेणेत्यर्थः, तथा च माधुर्यव्यञ्जके औपचारिको माधुर्यव्यवहार इति । प्रसादाख्यगुणेन तद्व्यञ्जकेन यत्र झटित्यर्थप्रतीतिहेतुत्वं स गुणोऽर्थव्यक्तिस्तस्य प्रसादेऽन्तर्भाव इत्यर्थः, तद्रूपत्वात् तस्येत्याह **प्रसादेनेत्यादि** । तद्व्यञ्जकवर्णेन तद्व्यवहार इत्यर्थः । गुणस्य दोषत्वं वैचित्र्यावहमिति विदितचरमपि पूर्वं व्याचष्टे **मार्गाभेद इति** । यया रीत्योपक्रमस्तया रीत्या समापनं मार्गाभेदः । तस्य दोषत्वं दर्शयति **मातङ्गा इति** । अत्र मसृणवर्णैरुपक्रमः । सिंहाभिधानेऽपि यदि तथैव स्यात् तदावक्तृवाच्यप्रबन्धानामौचित्येन यद्रचनादीनामौचित्यं तद् भज्येत । प्रत्युत तत्र मार्गभेदे गुणत्वम् तद्दर्शयति **सिंहाभिधान इति** । कोपाटोपेत्यादौ मसृणवर्णत्यागो गुणः । मसृणाः कोमलाः । सिंहापेक्षया मृदुत्वेन मातङ्गादीनां मृदुभिरेव वर्णैरुपक्रमः । सिंहे तु कोपसंबन्धात् त्यागः समुचित इति । अभिन्नाया रीतेरुपयोगस्तु वृत्त्यनुप्रासालङ्कारान्तर्भाविनेत्यवधेयम् । दोषाभावत्वेन सङ्ग्रहणमाह **कष्टत्वेत्यादि** । श्रुतिकटुत्वं कष्टत्वम् । अपारुष्यं परुषवर्णाभावः । हालिकादिसाधारणपदविन्यासवैपरीत्येनालौकिकशोभाशालित्वमौज्ज्वल्यम् ।

'पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधा ।
प्रौढिर्व्यासिसमासौ च साभिप्रायत्वमस्य च ॥'

इति या प्रौढिः, ओज इत्युक्तं तद् वैचित्र्यमात्रम् न गुणः। तदभावेऽपि काव्यव्यवहारप्रवृत्तेः। अपुष्टार्थत्वाधिकपदत्वानवीकृतत्वामङ्गलरूपाश्लीलग्राम्याणां निराकरणेन च साभिप्रायत्वरूपमोजः, अर्थवैमल्यात्मा प्रसादः, उक्तिवैचित्र्यरूपं माधुर्यम्, अपारुष्यरूपं सौकुमार्यम्, अग्राम्यत्वरूपा उदारता च स्वीकृतानि । अभिधास्यमानस्वभावोक्त्यलङ्कारेण रसध्वनिगुणीभूतव्यङ्ग्याभ्यां च वस्तुस्वभावस्फुटत्वरूपा अर्थव्यक्तिः, दीप्तरसत्वरूपा कान्तिश्च स्वीकृता। क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्मा श्लेषोऽपि विचित्रत्वमात्रम् । अवैषम्यस्वरूपा समता दोषाभावमात्रं न पुनर्गुणः । कः खल्वनुन्मत्तोऽन्यस्य प्रस्तावेऽन्यदभिदध्यात् । अर्थस्यायोनेरन्यच्छायायोनेर्वा यदि न भवति दर्शनं तत् कथं काव्यमित्यर्थदृष्टिरूपः समाधिरपि न गुणः ।

बालचित्तानुरञ्जनी—एवं शब्दगुणानन्तर्भाव्यार्थगुणानप्यन्तर्भावयति पदार्थ इति । साभिप्रायत्वमस्य चेति पद्यशेषः । पदार्थे वाक्यरचनं यथा—

लोचनेनैव जानन्ति लोके ये केचन ध्वनिम् ।
भुजङ्गा एव ते किं तन्मुग्धे द्वारि भृशन्तु ते ॥
प्रष्टव्योऽयं प्रणयकलहे स्पष्टमर्थः सुधांशु-
रित्यालापो रहसि शिवयोः पेशलत्वायतां नः ॥

अत्र कपोलस्थलेन तमोलग्नचन्द्रलेखामुद्रा नखक्षतशङ्कया क्षीयत इति वाक्यार्थज्ञानमिति पदमभिहितम् [?] । एवमन्यत्राप्युदाहर्तव्या । प्रौढेर्गुणत्वं दूषयति या प्रौढिरिति । वैचित्र्यमात्रत्वमेवोपपादयति तदभावेऽपीति । यदभावे काव्यव्यवहारस्यैव विसंवादः । स गुण इत्यङ्गीकारादिति भावः । आद्यदोषपञ्चमनिरासेन प्रौढिदोषस्य[?] । इत्याह अपुष्टेति । विशेषणानां यत् साभिप्रायरूपं पुष्टार्थत्वं [तत्-] परिहारादाक्षिप्यते । एवं सर्वत्र द्रष्टव्यम् । अर्थव्यक्तिकान्तिरूपगुणद्वयस्वीकारमाह अभिधेति ।

मन्दाकिन्याः पयसि भगवान् क्लृप्तनित्याभिषेको
बिभ्रद् दोल्लातटभुवि जटाः शीकरानुद्वमन्तीः ।
रेखामिन्दोर्भुजगवलयं तस्य शार्दूलकान्तिं
महामस्यामपि परिजनान् श्रद्दधानान् पुनातु [?] ॥

इत्यत्र या अर्थव्यक्तिः सा स्वभावोक्त्यलङ्कारेण विषयापद्वारा[?] स्वीकृतप्राया, उभयोरेकविषयत्वात् ।

मानैरन्तः शबलितभुवः स्पष्टदृष्टैः प्रसत्त्या
हंसद्वन्द्वः सविधपुलिनादादरेणाजगाम ।
मन्दोल्लासे महति ललितानुद्वमन्तस्तरङ्गा–
नाश्लिष्यन्ते कथमपि मया नर्मदायाः प्रवाहाः[?] ॥

इत्यत्र दीप्तरसाकारा कान्ती रसध्वनिना सूचिता ।

क्रीडावल्ये कुसुमपरिकरे चामराणां च पार्श्वे
वैलक्षण्याकारशाली विवलितनृपनः स्मेरवक्त्रोविचित्रा ।
चूडालङ्कारमिह हस्तिविगलितं निह्नुतं हैमवत्या
नृत्यान्ते दत्त पुनरपि शिरसि स्थापयित्वा पुनातु[?] ॥

अत्र दीप्तरसाकारा कान्तिर्गुणीभूतव्यङ्ग्येन सङ्गृहीतेत्यर्थः । स्वरूपवर्णनपूर्वकं तस्य गुणत्वमेव नास्तीत्याह **क्रमेति** । क्रमस्य कौटिल्यं अतिक्रमः । तस्यानुल्वणत्वमस्पष्टत्वं, तत्रोपपत्तिर्युक्तिः तस्या योगः सद्भावः तद्रूपा या घटना तदात्मा श्लेष इत्यर्थः । अस्योदाहरणं दृष्ट्वैकासनेत्यादि **पूर्वमुक्तम्** । अत्र क्रमकौटिल्यरूपोऽतिक्रमोऽस्ति । पिहितनयनामतिक्रम्यान्यस्याश्चुम्बनादतिक्रमः । अतिक्रमस्यास्पष्टत्वमप्यस्ति । पिहितनयनया अज्ञानात् । एवं कृतेऽनया न ज्ञास्यत इत्युपपत्तिरप्यस्ति । अथवा क्रमस्य कौटिल्यञ्च अनुल्बणत्वं च तेषां चतुर्णां घटनात्मा श्लेष इति । अत्रापि इदमेवोदाहरणम् । एवंविधं श्लेषं विनापि काव्यव्यवहारदर्शनात् । श्लेषो वैचित्र्यमात्रं न गुण इत्यर्थः । समताया दोषाभावरूपत्वमाह **अवैषम्येति** । वर्णनीयत्वेन प्रस्तुतस्य यावत् समाप्तिः तावत् तथैव वर्णनमवैषम्यम् ।

यत्सत्यं वद बुद्बुदेन किमयं वज्रोपलः स्पर्धते
पिच्छास्य प्रतिगर्जितुं सुरधनुर्लेखा न किं लज्जते ।
खद्योतेन नखम्पचस्य खदिरांगारासकोमत्सरा
धिवक्षदृश्यमिमामिमरकवयता पापीयसी प्रेयसी[?]॥

इत्यत्र यदवैषम्यलक्षणं साम्यं तस्य दोषाभावरूपत्वम् । न गुणत्वमित्यर्थः । समाधेरपि गुणत्वाभावमाह **अर्थेति** । अर्थदृष्टिः समाधिरिति वामनसूत्रम् । तत्रायोनिरन्यच्छायायोनिरित्यर्थो द्विविधः । तत्राद्यो यथा "आमेखलं सञ्चरतां घनानामि"त्यादि हिमवद्वर्णना । द्वितीयो यथा

यत्र प्रियाणामभिसारहेतो **रथ्याः** प्रकाशघाते [हानेरिव ?] साम्यसूयाः ।
उद्यत्पयोहीनसुमेरुसानून् सिद्धाङ्गनाः सस्पृहमाश्रयन्ते [?] ॥

इति मेरुवर्णनम् । उभयदर्शनाभावे काव्यमेव न प्रवर्त्तत इति । समाधिर्न गुणः ।

सारबोधिनी—अर्थगुणानपि दूषयति **पदार्थ इत्यादि** । एकपदार्थस्य बहुभिः पदैर्बहूनां च पदार्थानामेकेनाभिधानं पदार्थे वाक्यरचनम् वाक्यार्थे च पदाभिधा । क्रमेणोदाह्रियते । चन्द्र इत्येकपदार्थे 'अथ

नयनसमुत्थं ज्योतिरि'ति । द्वितीयं यथा, 'कान्तार्थिनी तु या याति सङ्केतं साभिसारिके'त बहुषु पदार्थेषु अभिसारिकारूपपदाभिधानम् । एकवाक्यार्थस्य अनेकवाक्येन प्रतिपादनं व्यासः । तथा अनेकवाक्यार्थस्य एकेन प्रत्यायनं समासः । क्रमेण यथा

अयं नानाकारो भवति सुखदुःखव्यतिकरः
सुखं वा दुःखं वा भवति न भवत्येव च ततः ।
पुनस्तस्मादूर्ध्वं भवति सुखदुःखं किमपि त-
त्पुनस्तस्मादूर्ध्वं भवति न च दुखं न च सुखम् ॥

अत्रादृष्टवैचित्र्यात् सुखदुःखवैचित्र्यमित्येकवाक्यार्थोऽनेकवाक्येन प्रपञ्चित इति व्यासः । तथा "ते हिमालये"त्यादौ एकवाक्ये बहुवाक्यार्थनिबन्धात् समासः । प्रौढिः प्रतिपादनवैचित्र्यम् तदेवौज इत्युक्तं वामनादिभिः । उक्तिवैचित्र्यं सौष्ठवम् । गुणत्वाभावे हेतुमाह **तदभावेऽपीति** । **अपुष्टेत्यादि** । साभिप्रायत्वादीनामपुष्टार्थत्वविरहाद्यात्मकत्वेन तेषामपुष्टार्थत्वादीनां त्यागात् साभिप्रायत्वादीनामाश्रयणमित्यर्थः । अर्थवैमल्यं यावदर्थपदता । यथा काञ्चीपदम् न तु 'काञ्चीगुणस्थानमि'ति । एकस्यैवार्थस्य भङ्ग्यन्तरेण पुनः कथनमुक्तिवैचित्र्यम् । यथा "यदि दहत्यनल' इत्यादौ ।

अकाण्डे शोकदायिताभावोऽपारुष्यम् । यथा मृते 'यशःशेष' इति । अग्राम्यत्वं वाचि वैदग्धी । यथा 'कामं कन्दर्पचण्डालो मयि वामाक्षि निर्दयः । त्वयि निर्मत्सरो दिष्टचे'त्यत्र स्वीकृतानीति । तेषां तदनन्यत्वात् । वस्तुनो वर्णनीयस्य डिम्भादेः स्वभावोऽसाधारणं रूपं, तस्य स्फुटत्वं वर्णनीयव्यक्तीकरणम्— यथा 'पारावतः परिभ्रम्य रिरंसुश्चुम्बति प्रियामि'त्यत्र । **दीप्तेति** । दीप्तरसत्वं झटिति प्रतीयमानरसकत्वम् । ध्वनिगुणीभूतव्यङ्ग्याभ्यां रसपदस्य प्रत्येकमन्वयः । गुणाश्रयस्य न गुणत्वमिति भावः ।

क्रमेत्यादि । क्रमः क्रियापरम्परा । कौटिल्यं विदग्धचेष्टितम् । अनुल्बणत्वमस्फुटत्वम् । उपपत्तिः उपपादकयुक्तिविन्यास एषां योगः संवलनम्, स एव रूपं यस्या घटनायास्तद्रूपः श्लेषः । यथा—

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा—
देकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसा—
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥

इत्यत्र दर्शनादयः क्रियाः । पश्चादागत्य नयनपिधानं विदग्धचेष्टितम् । अस्य चेष्टितस्य लोकस्थाने दर्शनात् अस्फुटत्वं तस्य एकासनसंस्थितिरित्युपपादकयुक्तिः । विचित्रत्वमात्रमिति कवेर्वैदग्ध्यप्रतिपादनादिति शेषः । अनन्यसाधारणरसोपकारित्वविरहात्तथाप्रतिसन्धानेनास्वादव्यवधानानुगुणत्वम् । अवैषम्यं प्रक्रमाभेदः । यथा 'उदेति सविता ताम्र' इत्यादौ । प्रस्तावभङ्गेन न परं रसो हीयते कविरप्यपराध्यतीत्याह **अनुन्मत्त इति** । **अर्थस्येति** । तदेकप्रतिभातोऽर्थोऽयोनिः अन्यवर्णनमुपजीव्य वर्णितोऽन्यच्छायायोनिः । क्रमेण यथा, "सद्यो मुण्डितमत्तहूणचिबुकप्रस्पर्धि नारङ्गकम् ।" इत्यादौ । द्वितीयो यथा—

निजनयनप्रतिबिम्बैरम्बुनि बहुशः प्रतारिता कापि।
नीलोत्पलेऽपि विमृशति करमर्पयितुं कुसुमलावी ॥

इति च। हूणो म्लेच्छविशेषः। स्वभावादति गौरो मदरक्तः। सद्यः श्मश्रुपाटेन व्यक्तरोमकूपस्तच्चिबुक-तुल्यत्वेन नारङ्गस्य वर्णनं नान्येन कृतमित्ययोनिः। परत्र नयननीलोत्पलयोः साद्दश्यमन्येनापि वर्णितमित्य-न्यच्छायायोनिः। **यदीति**। तेन काव्यनिर्वाहहेतोरर्थदृष्टेर्न गुणत्वमिति भावः।

तेन नार्थगुणा वाच्याः

वाच्याः वक्तव्याः।

प्रोक्ताः शब्दगुणाश्च ये।
वर्णाः समासो रचना तेषां व्यञ्जकतामिताः ॥ ७३ ॥

के कस्य इत्याह

मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू।
अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा ॥ ७४ ॥

टठडढवर्जिताः कादयो मान्ताः शिरसि निजवर्गान्त्ययुक्ताः, तथा रेफणकारौ ह्रस्वान्तरिताविति वर्णाः समासाभावो मध्यमः समासो वेति समासः, तथा माधुर्यवती पदान्तरयोगेन रचना माधुर्यस्य व्यञ्जिका।

बालचित्तानुरञ्जनी—उक्तमर्थमर्थगुणानभिधाय लक्षणमुपसंहरति **तेनेति**।

राजा भोजो गुणानाह विंशतिं चतुरश्च यान्।
वामनो दश तान् वाग्मी तत्र त्रीनेव भामहः ॥

इत्युक्तरीत्या अर्थगुणा न वाच्याः। उक्तप्रकारेण शब्दगुणत्रयेणैव गुणान्तराणामुत्पत्तिसंभवादिति भावः। उक्तानां माधुर्यादिशब्दगुणानामभिव्यञ्जकाः क इत्याकाङ्क्षायामाह **प्रोक्ता इति**। माधुर्यौजः-प्रसादाख्या ये गुणा उक्ताः तेषां वर्णाः समासाः व्यञ्जकत्वं प्राप्ता इत्यर्थः। कस्य गुणस्य के वर्णादयोऽभि-व्यञ्जकाः, इत्याकाङ्क्षोत्तरेण पद्यमवतारयति **क इति**। वृत्तिः समासस्तस्याभावः। **अवृत्तिः** दीर्घसमासं विहाय मध्यमवर्त्तिनी वृत्तिर्वा। घटना रचना। **तथेति**। माधुर्यानुगुणपदान्तरयोग इति शेषः। पद्यं व्याकरोति **रणाविति**। णकारस्याङ्गीकाराद्वर्णचतुष्टयनिषेधः। स्पर्शा इत्यस्य व्याख्यानं कादय इति। रचना माधुर्यवती संधिसौष्ठववतीत्यर्थः।

सारबोधिनी—न वक्तव्या न वक्तुं योग्या इत्यर्थः। तर्हि कथं माधुर्यादीनां शब्दगुणत्वव्यवहार इत्यत्र आह **प्रोक्ता इति**। उपचारेणेति शेषः। न तु व्यञ्जकत्वेन तद्रूपत्वमुक्तम्। तत्र के व्यञ्जकाः कथं वा

व्यञ्जकत्वमित्याह **वर्णा इति**। इता गता इत्यर्थः। **मूर्ध्नीति**। स्पर्शा वर्गाः। **समासाभाव इति**। अत्राभावपदं ईषदर्थकम्। तथा चाल्पः समास इति बोध्यम्। तेन वर्णाः समासो रचनेत्यनेन त्वविरोधः। तथेत्यस्यार्थमाह **माधुर्यवतीति**। पदान्तरयोग इति। यथा अलङ्कुर्वित्यत्र पदयोः संधौ मधुरवर्णोत्पत्तिः।

उदाहरणम्

अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि ॥३४७॥

बालचित्तानुरञ्जनी—उदाहरति **अनङ्गेति**। अनङ्गरङ्गप्रतिमं आनताङ्ग्याः तदङ्गम् भङ्गीभिः वलिभिः तथाऽङ्गीकृतं यथा एताः भङ्ग्यः यूनां मनांसि शान्तापरचिन्तनानि सहसा कुर्वन्ति। अत्र गकारतकारौ स्पर्शविशेषौ, स्वशिरसि ङकारनकारौ धारयत इति तयोर्माधुर्यव्यञ्जकत्वमित्यर्थः।

सारबोधिनी—अङ्गेति। तदनुभवैकगोचरं अङ्गीकृतं स्वयमादरेण गृहीतम्, यथाऽङ्गीकारप्रकारेणैता भङ्ग्यः।

योग आद्यतृतीयाभ्यामन्त्ययो रेण तुल्ययोः।
टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि ॥७५॥

वर्गप्रथमतृतीयाभ्यामन्त्ययोः, द्वितीयचतुर्थयोः, रेफेण, अध उपरि उभयत्र वा यस्य कस्यचित् तुल्ययोः, तेन तस्यैव संबन्धः टवर्गोऽर्थात् णकारवर्जः शकारषकारौ दीर्घसमासः, विकटा संघटना, ओजसः।

उदाहरणम्—मूर्ध्नामुद्वृत्तकृत्तेत्यादि ॥३४८॥

बालचित्तानुरञ्जनी—ओजोगुणव्यञ्जकत्वमाह **योग इति**। वर्गेषु आद्यः प्रथमो वर्णः ककारादिः, पश्चात् तृतीयो गकारादिः, अन्त्ययोर्योगो नैरन्तर्यम्। अत्यन्तञ्च स्वस्वापेक्षायां प्रथमः स्यात्। श्वकारादिद्वितीयः स्यात् न बकारादिः[?] किञ्च रेफेण योगः स्यात् निर्देशाभावात् वर्णस्य अधः उपरि उत यस्य कस्यचिदक्षरस्य रेफेण योगः न पुनर्नियतस्य। किं च तुल्ययोगः नेह स्यात्। प्रयत्नसादृश्यं तुल्यत्वम्। किं तर्हि तदाकारेण केनचिद् योग इत्याशङ्क्य व्याकरोति **वर्गेति**। माधुर्ये लघोर्णकारस्योपयोगात्तद्वर्गष्टवर्गः स्वीकर्तव्यः इत्याह **टवर्ग इति**। शकारषकारौ तालव्यमूर्धन्यौ ऊष्माणौ। उदाहरति **मूर्ध्नामिति**। अत्र तवर्गस्य तृतीयेण दकारेण तच्चतुर्थस्य धकारस्य योगः। मिथ्येत्यशतवर्गप्रथमेन[?] तकारेण द्वितीयस्य थकारस्य मूर्ध्नामिति रेफेणादौ योगः। अन्धीत्युपदि(?) उद्धरेति तकारस्य तकारेणैव योगः। ह्रासपिशुनशब्दयोः शकारः, द्रोण्णामिति षकारः, "पट्टुरटत्क्रूरधारः कुठार" इत्यत्र टवर्गः। समासदैर्घ्ये सङ्घटनोद्धत्यम्।

सारबोधिनी—वर्गप्रथमेत्यादि । वर्गस्यैव प्रकृतत्वात् । तुल्यपदस्याभेदाभिधानतात्पर्यमाह तेन तस्येति ।

श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत् ।

साधारणः समग्राणां स प्रसादो गुणो मतः ॥७६॥

समग्राणां रसानां सङ्घटनानाञ्च । उदाहरणम्

परिम्लानं पीनस्तनजघनसङ्गादुभयतस्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम् ।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम् ॥३४९॥

बालचित्तानुरञ्जनी—प्रसादस्याभिव्यञ्जकमाह **श्रुतीति** । श्रुतमात्रवर्णाः अर्थप्रतीतिहेतवः प्रसादस्य व्यञ्जका इत्यर्थः । उदाहरति **परीति** । पीनस्तनजघनसङ्गात् उभयतः परिम्लानम् । कृशस्य मध्यस्य । अतः परिमिलनं अप्राप्य हरितम् । श्लथभुजलताक्षेपवलनैः व्यस्तन्यासमिदं नलिनीपत्रशयनं कृशाङ्ग्याः सन्तापं वदति । अत्र शब्दानामहमहमिकया अर्थ घन्यांघनौत्सुक्यात् [ध्वननौ०?] प्रसादः । 'सङ्गात् कृशाङ्ग्या' इत्यादौ माधुर्योचिता वर्णाः, मध्यमः समासः, सङ्घटना चानुद्धता ।

सारबोधिनी—प्रसादाभिव्यञ्जकमाह **श्रुतिमात्रेणेति** । श्रुतिमात्रेण वर्णादयोऽर्थप्रतीतिहेतवः सन्तः प्रसादव्यञ्जका इत्यर्थः । **परिम्लानमिति** । उभयतः स्तनजघनस्थानयोः शयनाय दत्तः शयनमध्यभागः । तनोः क्षीणस्य । परिम्लानमामर्दनम् । न्यासो रचना । व्यस्तं विपरीतम् । आक्षेपोऽभिघातः, स च श्लथः शिथिलः अवलप्रयोज्यत्वात् तेन जातानि वलनानि उद्वर्तनानि ।

यद्यपि गुणपरतन्त्राः सङ्घटनादयस्तथापि

वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित् क्वचित् ।

रचनावृत्तिवर्णानामन्यथात्वमपीष्यते ॥७७॥

क्वचिद्वाच्यप्रबन्धानपेक्षया वक्त्रौचित्यादेव रचनादयः । यथा

मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसङ्घट्टचण्डः ।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽसौ ॥३५०॥

अत्र हि न वाच्यं क्रोधादिव्यञ्जकम् । अभिनेयार्थं च काव्यमिति तत्प्रतिकूला उद्धता रचनादयः । वक्ता चात्र भीमसेनः ।

बालचित्तानुरञ्जनी—ननु सङ्घटनानां गुणव्यञ्जकत्वेन तदधीनत्वं युज्यते क्वचित्तु स्वातन्त्र्यमपि दृश्यते तत्कथं घटत इत्यत आह **यद्यपीति**। उपाधिवशात् क्वचित् एतेषां अन्यथात्वं गुणपरतन्त्रत्वाभाव उचितमित्यर्थः। वक्त्रौचित्यादन्यथात्वमुदाहरति **क्वचिदिति**। मन्थेन आयस्तं यदर्णवाम्भः तस्य प्लुत्या कुहरेषु रन्ध्रेषु चलन् यो मन्दरः तस्य शब्दवत् धीरः गम्भीरः। कोणैः सह ये आघाताः तेषु सत्सु गर्जन्तः प्रलयकाले घनाः मेघाः तेषां घटाः समूहाः। अन्योन्यसंघट्ट इव चण्डः। कृष्णायाः द्रौपद्याः, क्रोधस्याग्रदूतः, कुरुकुलस्य निधने उत्पातनिर्घातवातः। अस्मत्सिंहनादस्य प्रतिध्वनेः सखा अयं दुन्दुभिः केन ताडितः। अत्र वाच्यनिरपेक्षत्वं दर्शयति **अत्रेति**। प्रश्नरूपं वाच्यं क्रोधादिव्यञ्जकं यतो न भवति, अतः सङ्घटनादीनां स्वातन्त्र्यमित्यर्थः। प्रबन्धानपेक्षित्वं च दर्शयति **अभिनेयार्थमिति**। अभिनेयार्थे हि नाटकादौ उद्धतरचनादयो नेष्यन्ते किन्तु तत्प्रतिकूला उद्धता रचनादयः वक्त्रौचित्यादेव संभवन्तीत्यर्थः। कथं तर्हि तेषामौचित्यमत्रेत्यत आह **वक्त्रेति**। भीमसेनस्य उद्धतवक्तृत्वात्तत्रोचिता इति भावः।

सारबोधिनी—प्रतिप्रसवमाह **यद्यपीत्यादि**। गुणपरतन्त्राः तद्व्यञ्जनायैव निर्मातव्याः। **क्वचित् क्वचिदिति**। तेनामीषां गुणव्यञ्जकत्वनियमे वक्त्राद्यौचित्यवाधकायोग एवौत्सर्गिकः, न तु व्यभिचारेण तद्व्यञ्जकत्वमिति भावः। वक्ता कविस्तन्निबन्धश्च तयोश्च रसादिवृत्त्यादिधीरोदात्तत्वादिभेदाद् बहुविधमौचित्यम्। वाच्यं वर्णनीयम्। प्रबन्धो नाटकादिः। **मन्थायस्तेति**। मन्थो मन्थनं आयस्तमान्दोलितम्, प्लुतं व्याप्तं, कुहरं यस्येति बहुव्रीहिः। पुनश्चलन्मन्दरपदेन सह कर्मधारयः। कोणो वादनदण्डः। आघातस्ताडनम्।

भेरीशतसहस्राणि ढक्काशतशतानि च।
एकदा यत्र ताड्यन्ते कोणाघातः स उच्यते ॥

सङ्घट्टः आमर्दः। कृष्णा द्रौपदी। क्रोधस्तत्फलं कुरुकुलविनाशः अग्रदूतो भविष्यदर्थस्य प्रथममावेदकः। उत्पातोऽमङ्गलहेतुः। निर्घातवातः वातजन्यो निर्घातः। मेघानां वातानाश्चान्योन्यसङ्घट्टश्चण्डध्वनिर्निघातः। अयं शब्दायमानः। तेन मन्दरध्वानसिंहनादाभ्यामुपमितिरित्युपपत्तिः।

अत्र हीति। वाच्यस्य प्रश्नात्मकत्वात् न क्रोधव्यञ्जकत्वमित्यर्थः। **अभिनेयार्थमिति**। अङ्गादिक्रियया नायकाद्यारम्भानुकरणमभिनयः। काव्यं नाटकम्। दीर्घसमासेऽर्थप्रतिपत्तौ विलम्बेनाभिनयेन झटिति प्रत्याययितुमशक्यत्वात्, तन्नोचितमित्याह **तत्प्रतिकूला चेति**। रसानौचित्यमाह **भीमसेन इति**। रौद्ररसप्रधानस्य धीरोद्धतस्य तस्येत्थमुद्धताभिधानस्वभावत्वात्। एवञ्च कृते तदालम्बनकं रसादिकमभिव्यक्तं भवतीति भावः।

क्वचिद्वक्तृप्रबन्धानपेक्षया वाच्यौचित्यादेव रचनादयः। यथा

प्रौढच्छेदानुरूपोच्छलनरयभवत्सैंहिकेयोपघात—
त्रासाकृष्टाश्वतिर्यग्वलितरविरथेनारुणेनेक्ष्यमाणम्।
कुर्वत् काकुत्स्थवीर्यस्तुतिमिव मरुतां कन्धरारन्ध्रभाजां
झाङ्कारैर्भीममेतन्निपतति वियतः कुम्भकर्णोत्तमाङ्गम् ॥३५१॥

क्वचिद्वक्तृवाच्यानपेक्षाः प्रबन्धोचिता एव ते । तथाहि, आख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादयः, कथायां रौद्रेऽपि नात्यन्तमुद्धताः, नाटकादौ रौद्रेऽपि न दीर्घसमासादयः, एवमन्यदप्यौचित्यमनुसर्तव्यम् ।

इति काव्यप्रकाशे गुणालङ्कारभेदनियतगुणनिर्णयो नाम अष्टम उल्लासः ॥८॥

बालचित्तानुरञ्जनी—वाच्यौचित्यादन्यथात्वमुदाहरति **क्वचिदिति** । प्रौढो यः छेदः छेदनं तदनुरूपः उज्ज्वलनरयः प्रज्वलितमनोवेगः तस्मात् भवः नवः सैंहिकेयोपघातत्रासः तस्मात् आकृष्टाः अश्वास्तैस्तिर्यग्विवलितो रविरथो यस्य एवंविधेन अरुणेन ईक्षमाणम् । काकुत्स्थवीर्यस्तुतिं कुर्वद् दशकन्धररारन्ध्रस्थितानां वायूनां झाङ्कारैः भीमं भयङ्करं कुम्भकर्णशिरः आकाशात् पतति । अत्र वक्ता मध्यम एव नोद्धतः । अतो वाक्यौचित्यादेव उचिता इति भावः । क्वचित् प्रबन्धौचित्यादन्यथात्वमुदाहरति **क्वचिदिति** । आख्यायिका हर्षचरित्रादि । कथा बृहत्कथादि । नाटकादावित्यादिशब्दात् प्रकरणादिपरिग्रहः । कपटयान् [?] प्रवेशादौ प्रातीतिकत्वत्रानुगुण्येन[?] वर्णसङ्घटनादिकमूहनीयम् । यथा रत्नावल्यामित्याह **एवमिति** ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसरस्वतीतीर्थविरचितायां काव्यप्रकाशटीकायां गुणालङ्कारभेदनियतगुणनिर्णयो नामाष्टम उल्लासः ।

सारबोधिनी—प्रौढेति । इदं वृत्या[?]रावणस्य पद्यम् । वक्ता चात्र वैतालिकः । प्रौढो बलवता प्रयुक्तः । तदनुरूपमुच्छलनं ऊर्ध्वप्रसरणं, तत्र यो रयस्तेन भवदिति त्रासविशेषणम् । आकृष्टा गमनात् प्रतिषिद्धा अश्वा यत्र तथा तिर्यग्वलितो रविरथो येनारुणेन तिर्यग्विवलन वक्रतया संस्थापनम् । भयानुभावोऽयम् । अत्र वाच्यस्य कुम्भकर्णोत्तमाङ्गस्य भीमत्वेनोजस्वित्वादुचिता समुद्धता रचना । **प्रबन्धोचिता एव ते इति** । ते रचनादयः । **नाटकादाविति** । अभिनेयप्रत्यनीकत्वान्न दीर्घसमासादयः । इदं प्रतिकूलं वर्णव्याख्यानप्रस्तावे वेणीसंहारस्थं 'देशः सोऽयमि'त्युदाहार्यात्र विकटवर्णत्वं दीर्घसमासत्वं वोचितमिति स्वोक्तविरुद्धमिति ध्येयम् ।

इति सारबोधिन्यामष्टम उल्लासः ।

अथ नवम उल्लासः

गुणविवेचने कृतेऽलङ्कारा: प्राप्तावसरा इति संप्रति शब्दालङ्कारानाह—

यदुक्तमन्यथा वाक्यमन्यथान्येन योज्यते ।

श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा ।।७८।।

तथेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च । तत्र पदभङ्गश्लेषेण यथा

नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो
वामानां प्रियमादधाति हितकृन्नैवाबलानां भवान् ।
युक्तं किं हितकर्तनं ननु बलाभावप्रसिद्धात्मनः
सामर्थ्यं भवतः पुरन्दरमतच्छेदं विधातुं कुतः ।।३५२।।

बालचित्तानुरञ्जनी—अथ सप्तमोल्लासव्याख्या [नवमोल्लासव्याख्या]

गुणविवेकानन्तरमलङ्काराणां कः प्रस्ताव इत्यत आह **गुणेति** । तददोषौ शब्दार्थौ—इत्यादि-निर्देशक्रमेणालङ्कारनिरूपणस्यायमेवावसर इत्यर्थः ।

पठन्ति शब्दालङ्कारान् बहूनन्यान्मनीषिणः
परिवृत्तिसहिष्णुत्वान्न ते शब्दैकभागिन ।। इति
ते च वक्रोक्त्यनुप्रासौ यमकं श्लेष इत्यपि ।
चित्रञ्च पञ्चमं षष्ठोऽप्यभ्यासः पुनरुक्तिवत् ।। इति

यदुक्तं तदन्येनान्यथोक्तम्, अन्येनान्यथा योज्यते इति आवृत्या योज्यम् । श्लेषो वक्ष्यते । काकुरुक्ता । अन्येन जनेन अन्यथोक्तं यद्वाक्यं अन्येन श्लेषेण काक्वा वान्यथा योज्यते सा वक्रोक्तिरित्यर्थः । तथा द्विधेत्येतद् व्याकरोति **तथेति** । श्लेषो द्विविधः । भग्नपदोऽभग्नपदश्च । तत्र भग्नपदश्लेषेण वक्रोक्तिमुदाहरति **तत्रेति** । नारीणामङ्गनानाम् । अनुकूलमाचरसि चेत् जानासि ज्ञातेति लोके व्यवह्रियसे । अरीणामनुकूलं नाचरसि चेत् तर्हि जानासि इत्यन्यथा कुर्वाणो द्वितीय आह **कश्चेतन इति** । चेतनः कः वामानां प्रतिकूलानां प्रियमादधाति, न कोऽपीत्यर्थः । एवं च नारीणामित्यस्य पदस्य न वैरिणामिति पदभङ्गे अन्यथा योजना । प्रतिकूलार्थं वामानामिति पदं अङ्गनार्थत्वेनान्यथा कुर्वन् आद्य आह **हितकृदिति** । भवान् अबलानां स्त्रीणां नैव हितकृत्, न हितकारी भवतीत्यर्थः । हितकारिवाचकं हितकृदिति पदं हितं कृन्तति छिनत्ति इत्यर्थपरतया अङ्गनावाचकम् ।

अवलापदं वलाभावपरतया चान्यथा कुर्वन् द्वितीय आह **युक्तमिति**। वलस्य सामर्थ्यस्य अभावेन प्रसिद्ध आत्मा यस्य तस्य दुर्वलस्य हितकर्तनं हितच्छेदनं किं युक्तम्? न युक्तमित्यर्थः। सामर्थ्यवाचकवलपदं वलासुरवाचकतया अन्यथा कुर्वन् आद्य आह **सामर्थ्यमिति**। भवतः इन्द्रमतविच्छेदं विधातुं कुतः सामर्थ्यमित्यर्थः।

सारबोधिनी—**प्राप्तावसरा इति**। तेनालङ्कारनिरुक्तावसर एव सङ्गतिरिति व्यक्तमुक्तं **शब्दालङ्कारानिति**। काव्यलक्षणे शब्दस्य प्रागुपादानादिति शेषः। शब्दचित्रमर्थचित्रमिति यच्चित्रभेदद्वयमुक्तं तस्य भेदा उल्लासाभ्यां वक्तव्या इत्यपि ध्वनितम्। **यदुक्तमिति** वक्तृश्रोतृनिर्वाह्योऽयमलङ्कारः। अन्यथा अन्याभिप्रायेण वक्तुरन्याभिप्रायकं वाक्यमन्येन श्रोत्राऽन्यथा समर्थितमित्यर्थः। **अन्येनेति**। तेन स्वोक्ते स्वयमन्यथाकरणेनापह्नुतौ नातिव्याप्तिः। यथा—

> काले पयोधराणामपतितया नैव शक्यते स्थातुम्।
> उत्कण्ठिताऽसि तरले नहि नहि सखि पिच्छिलः पन्थाः॥

अत्र पत्यभिप्रायकं स्ववचनं पतनाभावे स्वेनैव समर्थनात्। श्लेषेण वक्तुरविवक्षितेन शब्दस्य प्रतिपाद्यान्तरेण। तथा ताभ्यामुपाधिभ्यामित्यर्थः। तदाह **श्लेषेत्यादि**।

नारीणामित्यादि। नारीणां स्त्रीणां अनुकूलमाचरसि चेत् यदि जानासि विज्ञोऽसि। विज्ञ एव स्त्रीणामनुकूल इत्यर्थः। यद्वा जानासीत्यादि उत्तरदातुरेव वचनम्। तेन नार्यभिप्रायकमिदं वचनं विपक्षाभिप्रायेण अवलानामित्यनेन तत्पुनरोजोऽभावतात्पर्यकेण वलाभावेत्यनेन तदपि वलपदस्यासुरपरेण पुरन्दर इत्यनेन पदेनान्यथा योजितम्। नारीणामिति स्त्रीणां पदभङ्गेन वैरिणामभावस्य वोधनात् श्लेषः। वामाः स्त्रियो विपक्षाश्च। हितकृदिति करोतिकृन्तत्योः रूपम्। अवलाः स्त्रियो वलशून्याश्च। वलमोजो वलोऽसुरभेदश्च। अत्र नारीणामिति पदभङ्गमुपजीव्य प्रवृत्तानां श्लेषान्तराणां स एव मूलमिति तेनैव व्यवहारः।

अभङ्गश्लेषेण यथा

> **अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता।**
> **त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्॥ ३५३॥**

बालचित्तानुरञ्जनी—अपदभङ्गश्लेषेण वक्रोक्तिमुदाहरति **अभङ्गेति**। ईदृशी दारुणा क्रूरा बुद्धिः तव केन निर्मिता दत्ता? क्रूरार्थं दारुणेति पदं काष्ठार्थपरतया अन्यथा कुर्वन् द्वितीय आह **त्रिगुणेति**। सत्त्वरजस्तमोमयी बुद्धिः श्रूयते न क्वचिद् दारुमयी काष्ठमयी श्रूयत इत्यर्थः।

सारबोधिनी—**अहो इति**। दारुणा हिंस्रा काष्ठेन च। त्रिगुणा सत्त्वरजस्तमोमयी। अत्र दारुणपदस्य दारुणेत्यस्य दारुमयत्वेनान्यथायोजनम्।

काक्वा यथा

गुरुजनपरतन्त्रतया दूरतरं देशमुद्यतो गन्तुम् ।
अलिकुलकोकिलललिते नैष्यति सखि सुरभिसमयेऽसौ ।। ३५४ ।।

वर्णसाम्यमनुप्रासः

स्वरवैसादृश्येऽपि व्यञ्जनसदृशत्वं वर्णसाम्यम् । रसाद्यनुगतः प्रकृष्टो न्यासोऽनुप्रासः ।

बालचित्तानुरञ्जनी--वक्रोक्तिमुदाहरति काक्वेति । हे सखि ! गुरुपरतन्त्रतया दूरतरं देशं गन्तुमुद्यतः असौ प्रियः नैवैष्यति नागमिष्यति इति नायिकोक्तौ तत्सखी काक्वा अन्यथयति । मधुकरकुलेन कोकिलैश्च मनोहरे वसन्तसमये नैवैष्यति । नकारशिरसि काकुप्रयोगात् सर्वप्रकारमेष्यत्येवेत्यर्थः ।

एवं वक्रोक्तिमभिधाय अनुप्रासं लक्षयति **वर्णेति** । व्याकरोति **स्वरेति** । स्वराणामचां वैसादृश्ये वैलक्षण्येऽपि यद् व्यञ्जनानां हलां हलां सादृश्यं तदिह वर्णसादृश्यं विवक्षितम् स्वरसाम्ये वैचित्र्याभावादित्यर्थः । अनुप्रासशब्दं निर्वक्ति **रसेति** ।

सारबोधिनी--काकुवक्रोक्तिमुदाहरति **गुरुजनेति** । नायिकया नैष्यतीति निषिद्धे तत्सखी काक्वाऽन्यथा योजयति नैष्यतीति, एष्यत्येव । अनुप्रासं लक्षयति **वर्णसाम्यमिति** । यमकेऽतिव्याप्तिरित्यत आह **स्वरवैसादृश्येऽपीति** । अत्र स्वरसादृश्यं न प्रयोजकम्, कुलालकलत्रमित्यादिष्वपि दर्शनात् । यमके तु समानानुपूर्वीकत्वनियमः । अत एव यमके वक्ष्यति "वर्णानां सा पुनः श्रुतिरि"ति । **साम्यमिति** । तत्त्वं तु समानश्रुतिमत्त्वमित्यर्थः । संभवत्स्वरसादृश्यं तु तत्प्रकर्षकम् । अत एव व्यञ्जनसाम्यमित्यपहाय वर्णसाम्यमित्युक्तम् । **रसादीति** । अनुशब्दोऽनुगमार्थः । प्रशब्दः प्रकर्षार्थः । प्रासशब्दो न्यासार्थः । अनुगमनं रसादेः, प्रकर्षश्च सहृदयहृदयावर्जकत्वेनेति ।

छेकवृत्तिगतो द्विधा ।

छेका विदग्धाः । वृत्तिर्नियतवर्णगतो रसविषयो व्यापारः । गत इति छेकानुप्रासो वृत्त्यनुप्रासश्च ।

किं तयोः स्वरूपम् इत्याह

सोऽनेकस्य सकृत् पूर्वः

अनेकस्य अर्थात् व्यञ्जनस्य सकृदेकवारं सादृश्यं छेकानुप्रासः ।

बालचित्तानुरञ्जनी--अस्य द्वैविध्यप्रतिपादकं सूत्रमुपादाय व्याकरोति **छेकेति** । छेकाश्च वृत्तयः ताः गतः प्राप्त इति समासः । छेकगतानुप्रासः वृत्तिगतानुप्रासश्चेति अनुप्रासो **द्विविध इत्यर्थः** । उभयोः

स्वरूपं किमित्याशङ्कायां आद्यस्वरूपप्रतिपादकं सूत्रमुपादाय व्याकरोति **किं तयोरित्यादिना**। **पूर्वः** आद्यः छेकानुप्रास इत्यर्थः। अर्थात् सामर्थ्यात्।

सारबोधिनी—नियतरसविशेषव्यञ्जकत्वेन परिगणिता वर्णाः तद्गतस्तन्निष्ठो व्यापारः सहकारी, आनुपूर्वीविशेषः स एव वृत्तिः। गतो ज्ञातः। अर्थात् आभ्यामुपाधिभ्याम्। तदाह **छेकानुप्रास इत्यादि**। उदाहरणम्

ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी।
दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम्॥ ३५५॥

एकस्याप्यसकृत्परः॥ ७९॥

एकस्य, अपिशब्दादनेकस्य व्यञ्जनस्य द्विर्बहुकृत्वो वा सादृश्यं वृत्त्यनुप्रासः।

तत्र

माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते।

ओजः प्रकाशकैस्तैस्तु परुषा

उभयत्रापि प्रागुदाहृतम्।

बालचित्तानुरञ्जनी—उदाहरति **तत इति**। अरुणस्य यः परिस्पन्दः चलनं तेन मन्दीकृतं वपुर्यस्य एवंविधश्चन्द्रः स्मरक्षीणकान्ताकपोलपाण्डुतां दध्रे। अत्र परिस्पन्दमन्दीत्यत्र नकारदकारात्मकस्य व्यञ्जनसमुदायस्य सकृत् सादृश्यं कामक्षामेति ककारमकाररूपस्य गण्डपाण्डिवति णकारडकाररूपस्य सादृश्यमिति मन्तव्यम्। द्वितीयस्वरूपप्रतिपादकं सूत्रमुपादाय व्याकरोति **एकस्येति**। उक्तसमुच्चयार्थः **अपिशब्दादिति**। अशक्तत्वं निश्चिनोति अपि शब्द इत्याह **द्विरिति**। ननु कीदृशी वृत्तिः कतिविधेत्यत आह **तत्रेति**। माधुर्यव्यञ्जकैः 'मूर्ध्नि वर्गान्त्यगा' इत्यादिप्रतिपादितैर्वर्णैः युक्ता उपनागरिकावृत्तिः। **तथा चोक्तम्**—

स्वरूपसंयोगयुतां मूर्ध्नि वर्गान्त्ययोगिभिः।
स्पर्शैर्युतां च मन्यन्ते उपनागरिकां बुधाः॥ इति।

ओजप्रकाशकैः 'योग आद्य तृतीयाभ्यामि'त्यादिनिर्णीतैः वर्णैर्युक्ता परुषा वृत्तिरित्यर्थः। उभयत्रापि किमुदाहरणमित्याकाङ्क्षायामाह **उभयत्रेति**। नागरिका वैदर्भी। तस्या उदाहरणम्—

अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तितानि॥ इति

परुषा गौडी। तस्या उदाहरणम्

मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा
धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम्।
कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां
दोष्णां चैषां किमेतत् फलमिह नगरीरक्षणे यत् प्रयासः॥

इत्युदाहृतमित्यर्थः।

सारबोधिनी—ततोऽरुणेति । स्पन्दमन्दीत्यत्र कामकामिनीत्यत्र नकारदकारयोः ककारमकारयोरप्यनेकस्य सकृत् साम्यम् ।

एकस्येति । अत्रैकस्य सकृत् साम्येऽपि वृत्तित्वमिच्छन्ति । यथा 'व्याधूतचूताङ्कुरेत्यादौ । वृत्तिं विभजते **माधुर्येति** ।

कोमला परैः ॥ ८० ॥

परैः शेषैः । तामेव केचित् ग्राम्येति वदन्ति । उदाहरणम्

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।

अलमलमालि मृणालैरिति वदति दिवानिशं बाला ॥ ३५६ ॥

केषाञ्चिदेता वैदर्भीप्रमुखा रीतयो मताः ।

एतास्तिस्रो वृत्तयः, वामनादीनां मते वैदर्भीगौडीपाञ्चाल्याख्या रीतयो मताः ।

बालचित्तानुरञ्जनी—वृत्यन्तरप्रतिपादकं सूत्रमुपादाय व्याकरोति **कोमलेति** । परैर्माधुर्यौजोव्यतिरिक्तैः प्रत्यायकैर्वर्णैः युक्ता कोमला नाम वृत्तिः । अस्या एव संज्ञान्तरं केचिदाहुरित्याह **तामिति** ।

शेषैर्वर्णैर्यथायोगं ग्रथितां कोमलाख्यया ।
ग्राम्यां वृत्तिं प्रशंसन्ति काव्येष्वादृतबुद्धयः ॥ इति

उद्भटादयः कोमलामेव ग्राम्येति वदन्तीत्यर्थः । कोमला पाञ्चाली । तामुदाहरति **अपसारयेति** । अत्र रेफस्य लकारस्य बहुलकृत्वः सादृश्यात् वृत्त्यनुप्रासः । उपनागरिकापरुषाकोमला वृत्तयोऽनुअनुप्रासस्याङ्गभूताः । एतासां काव्यात्मभूताभिः वैदर्भ्यादिभिरेकत्वमुक्तवान् तदुपसङ्ग्रहार्थं यत्सूत्रं तदुपादाय व्याकरोति **केषामिति** ।

शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः ॥ ८१ ॥

शब्दगतोऽनुप्रासः शब्दार्थयोरभेदेऽप्यन्वयमात्रभेदात् लाटजनवल्लभत्वाच्चं लाटानुप्रासः । एष पदानुप्रास इत्यन्ये ।

पदानां सः

स इति लाटानुप्रासः ।

बालचित्तानुरञ्जनी--एवं वार्णमनुप्रासमभिधाय शाब्दमनुप्रासमाह **शाब्दस्त्विति**। व्याकरोति। तात्पर्यमात्रस्य भेदे सति शब्दार्थपौनरुक्त्यं लाटानुप्रास इति लक्षणम्। मात्रशब्देन शब्दार्थयोरभेदस्वीकारात् यमकव्यावृत्तिः। तात्पर्यार्थस्य भिन्नत्वात् पौनरुक्त्यनिवृत्तिरिति द्रष्टव्यम्। अस्यैव संज्ञान्तरमाह **एष इति**। यदाह उद्भटः

स्वरूपार्थाविशेषेऽपि पुनरुक्तिफलान्तरम्।
शब्दानां वा पदानां वा लाटानुप्रास इत्यपि॥

कथं पदानुप्रासत्वमस्येत्यत आह **पदानामिति**। तच्छब्दार्थमाह **स इति**।

सारबोधिनी—एवं वर्णानुप्रासं लक्षयित्वा शब्दानुप्रासं लक्षयति **शाब्दस्त्विति**। शब्द्यते प्रकाश्यते अनेनेति शब्दः। पदं प्रातिपदिकम्। तुर्भिन्नक्रमः। लाटानुप्रासः पुनः शाब्दः शब्दगतो न वर्णनिष्ठः। ततश्छेकवृत्तिभ्यामस्य भेद इति। **तात्पर्यमात्रत इति**। मात्रशब्देन शब्दार्थयोरभेदस्वीकारात् न यमकेऽतिप्रसक्तिः। तत्र भिन्नार्थकत्वस्वीकारात्तु अर्थे सतीति स्मर्तव्यम्।

उदाहरणम्

यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य॥३५७॥

पदस्यापि

अपिशब्देन स इति समुच्चीयते। उदाहरणम्

वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः।
सुधाकरः क्व नु पुनः कलङ्कविकलो भवेत्॥३५८॥

वृत्तावन्यत्र तत्र वा।

नाम्नः स वृत्त्यवृत्त्योश्च।

एकस्मिन् समासे भिन्ने वा समासे समासासमासयोर्वा नाम्नः प्रातिपदिकस्य न तु पदस्य सारूप्यम्। उदाहरणम

सितकरकररुचिरविभा विभाकराकार धरणिधरकीर्तिः।
पौरुषकमला कमला साऽपि तवैवास्ति नान्यस्य॥३५९॥

तदेवं पञ्चधा मतः॥८६॥

बालचित्तानुरञ्जनी—कदाचित् पदानामपि लाटानुप्रासः संभवतीत्यर्थः । उदाहरति **यस्येति ।** यस्य पुरुषस्य सविधे निकटे, दयिता नास्ति तस्य तुहिनदीधितिश्चन्द्रः दवदहनः दावाग्निर्भवति । **यस्य** सविधे निकटे दयिता अस्ति तस्य पुनर्दवदहनः तुहिनदीधितिर्भवति । अत्र अन्वयमात्रभेदादयमनुप्रासः । न केवलं बहूनामेव पदानाम् अपितु एकस्यापीत्याह **पदस्यापीति ।** **स इति ।** लाटानुप्रासः । तदुदाहरति **वदनमिति ।** तस्याः वरवर्णिन्याः सुन्दर्याः वदनं सुधाकरः । सत्यं निश्चितम् । निष्कलङ्कः सुधाकरः क्वान्यत्र भवेत् इति । तात्पर्यार्थभेदात् सुधाकरपदस्य एकस्यानुप्रासः । एवं प्रसङ्गादस्य पदानुप्रासतां प्रदर्श्य शब्दानुप्रासतापक्षं शिक्षयितुमाह **वृत्ताविति ।** वृत्तिः समासः । वृत्ताविल्येकस्य विवक्षितत्वात् एकस्मिन् समास इत्यर्थः । तत्रेति वृत्तिपरामर्शः **अन्यत्र तत्रेति ।** भिन्ने समास इत्यर्थः । वृत्त्यवृत्त्योः समासासमासयोरित्यर्थः । सूत्रं व्याकरोति **एकस्मिन्निति ।** प्रातिपदिकस्येत्यनेन लुप्तविभक्तिकं पदं गृह्यते । केवलस्य प्रातिपदिकस्य प्रयोगाभावात् । **पदस्येति ।** श्रूयमाणविभक्तिकस्येत्यर्थः । उदाहरति **सितेति ।** विभाकरस्य सूर्यस्य आकार इवाकारो यस्य तस्य संबोधनम् । धरणिधर भूपते ! तव चण्ड-किरणवत् रुचिरा कान्तिर्यस्याः सा कीर्तिः । पौरुषकारसंपत् सापि कमला छत्रचामरादिचिह्ना प्रसिद्धा लक्ष्मीश्चास्ति नान्यस्य । अत्र कर-करशब्दयोः एकत्र समासे सादृश्यम् । विभाविभाकरेत्यत्र विभा-शब्दयोर्भिन्ने समासे सारूप्यम् । पौरुषकमला कमलेत्यत्र कमलाशब्दयोः समासासमासयोः । आद्यस्य समासे द्वितीयस्यासमासे त्रैविध्यम् । पदविषयस्य लाटानुप्रासस्य द्वैविध्यस्य उक्तत्वात् । छेकानुप्रासः वृत्त्यनुप्रासश्च । अनेन सह पञ्चविधत्वमित्युपसंहरति **तदेवमिति ।**

सारबोधिनी—**यस्येत्यादि ।** दवदहनतुहिनदीधित्योरुद्देश्यविधेयभावविपर्यासेन तात्पर्यादन्वय-भेदः । अत एव न पुनरुक्तता । **पदस्यापीति ।** तेन बहुपदारब्धत्वेऽप्ययं भवतीति दर्शितम् । **यथा वदन-मिति ।** अत्र प्रथमसुधाकरपदस्य विधेयपरत्वं द्वितीयस्यानुवाद्यपरत्वम् ।

सूत्रे पाश्चात्यमपि तत्रेति पदं प्रथमं व्याचष्टे **एकस्मिन्निति ।** ननु स्वाद्यन्तस्य नामत्वे पदादस्य न भेद इत्यत आह **नाम्नः प्रातिपदिकस्येति ।** प्रत्ययरहितस्य प्रकृतिभागस्य प्रातिपदिक-त्वात् । तदाह **न तु पदस्येति ।** **पौरुषकमलेति ।** नन्वत्र द्वितीयकमलभागस्य पदत्वे नामानुप्रासता न स्यात्, न च प्रकृत्यंशमादाय तथा । तदा पदानुप्राससुधाकरपदयोरपि तत्त्वप्रसङ्गादिति चेन्न । पौरुषं कमलं यस्याः सा तथा । कमला कमलवतीत्यर्थः । मत्वर्थीयाच्प्रत्ययात्, तथा च स्त्रीप्रत्ययतद्धितप्रत्ययप्रकृत्योः कमलभागयोरनुप्रासः । अत्रैकत्र समासे करयोर्भिन्ने समासे विभेति भागयोः, समासासमासयोस्तु कमलयोः साम्यम् । **तदेवमिति ।** अयं लाटानुप्रासः ।

अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः ।

यमकम्

सनरसमरसोऽयमित्यादावेकेषामर्थवत्त्वे, अन्येषामनर्थकत्वे भिन्नार्थानामिति न युज्यते वक्तुम् इति, अर्थे सतीत्युक्तम् । सेति सरो रस इत्यादिवैलक्षण्येन तेनैव क्रमेण स्थिता ।

बालचित्तानुरञ्जनी—इदानीं यमकं लक्षयति **अर्थे सतीति**। भिन्ना अर्था येषां ते। वाहिताग्न्यादित्वात् परनिपातः। तत्तु लाटानुप्रासव्यावृत्त्यर्थम्। तत्र भिन्नार्थत्वाभावात्। सात्येऽपि क्रमव्यत्ययान्न यमकम्। येनैव क्रमेण पूर्वं श्रुतिः तेनैव क्रमेण पुनः श्रुतिर्यमकमिति।

सारबोधिनी—**पुनः श्रुतिरिति**। अत्र श्रुतिसाम्यं प्रयोजकम्। तेन वर्णभेदे श्रुत्येकत्वेऽपि यमकं यथा-भुजलतां जडतामबला जनः इति लकारडकारयोः। तदुक्तम्-लोर्डसोरलोस्तथेति [?] तथेति श्रुतिसाम्यमित्यर्थः। **अर्थभिन्नानामिति**। एकार्थकभिन्नानामित्यर्थः। तेन लाटानुप्रासे न प्रसङ्गः। उभयोरेकस्य वा निरर्थकत्वे सङ्ग्रहश्च। तेनैव क्रमेण स्थिता पूर्वानुपूर्वी सजातीयानुपूर्विविषयिका।

पादतद्भागवृत्ति तद्यात्यनेकताम् ॥८३॥

प्रथमो द्वितीयादौ द्वितीयस्तृतीयादौ तृतोयश्चतुर्थे प्रथमस्त्रिष्वपीति सप्त। प्रथमो द्वितीये तृतीयश्चतुर्थे प्रथमश्चतुर्थे द्वितीयस्तृतीये, इति द्वे। तदेवं पादजं नवभेदम्। अर्धावृत्तिः श्लोकावृत्तिश्चेति द्वे।

द्विधा विभक्ते पादे प्रथमादिपादादिभागः पूर्ववत् द्वितीयादिपादादिभागेषु, अन्तभागोऽन्तभागेष्विति विंशतिर्भेदाः। श्लोकान्तरे हि नासौ भागावृत्तिः। त्रिखण्डे त्रिंशत् चतुःखण्डे चत्वारिंशत्।

बालचित्तानुरञ्जनी—यमकविभागप्रतिपादनपरं सूत्रमुपादत्ते **पादेति**। तत् यमकं पादवृत्ति पादभागवृत्ति चेति द्विविधम्। तच्च प्रत्येकमनेकरूपतां यातीत्यर्थः। तत्र पादवृत्तेर्नव भेदानाह **प्रथम इति**।

प्रथमद्वितीयपादयोरैक्ये मुखाख्यं यमकम् (१)
प्रथमतृतीययोरैक्ये संदंशाख्यं यमकम् (२)
प्रथमचतुर्थयोरैक्ये आवृत्त्याख्यं यमकम् (३)
द्वितीयतृतीययोरैक्ये गर्भाख्यं यमकम् (४)
द्वितीयचतुर्थयोरैक्ये संदष्टकाख्यं यमकम् (५)
तृतीयचतुर्थयोरैक्ये पुच्छाख्यं यमकम् (६)
चतुर्णामैक्ये पङ्क्त्याख्यं यमकम् (७)
प्रथमचतुर्थयोर्द्वितीयतृतीययोश्चैक्ये परिवृत्ताख्यं यमकम् (८)
प्रथमद्वितीययोस्तृतीयचतुर्थयोश्चैक्ये युग्माख्यं यमकम् (९)
एवं नव।

अत्रैव भेदद्वयमाह **अर्द्धेति**। पादानां परस्परं वैलक्षण्ये सत्यपि एकाक्षरत्वेन पूर्वापरार्द्धयोरैक्ये अर्द्धविवृत्याख्यं यमकम् (१०), समानवर्णत्वेन श्लोकद्वयोरैक्ये श्लोकावृत्याख्यं यमकम् (११)

एवं एकादशपादवृत्तिभेदान् प्रदर्श्य पादभागवृत्तिभेदान् प्रदर्शयति **द्विधा विभक्तेति**। श्लोके प्रथमादयस्ते पादाश्च। द्वेधा विभक्तानां तेषां आदिभागः पूर्ववत् पादयमकन्यायेन, द्वितीयादयश्च ते पादाश्च तेषामादिभागेषु अन्तभागः प्रथमादिपादान्तभागः द्वितीयादिपादान्तभागेषु च यम्यते। एवं चत्वारः, आद्यन्तभेदात्। आद्यन्तयोः संबन्धाच्च दश आवृत्तिद्वयं चेति विंशतिः। पादानां द्विधा विभागे एकस्मिन्नर्द्धे चत्वारो भागा भवन्ति। तत्र प्रथमपादादिभागद्वितीयपादादिभागयोरैक्ये एकं यमकम्। प्रथमपादान्त्यभागद्वितीयपादान्त्यभागयोरैक्ये द्वितीयम्। प्रथमपादान्त्यभागयोरैक्ये चतुर्थम्। प्रथमपादादिभागस्य अन्त्यभागत्रयेणैक्ये पञ्चमम्। प्रथमपादद्वितीयपादादिभागापेक्षया आदित्वेन तस्येतरापेक्षया अन्त्यत्वेनेतरयोरैक्ये षष्ठम्। द्वितीयपादादिभागस्य द्वितीयपादान्त्यभागेनैक्ये सप्तमम्। प्रथमभागस्य चतुर्थभागेन द्वितीयभागस्य तृतीयेन ऐक्ये अष्टमम्। प्रथमभागस्य द्वितीयभागेन तृतीयभागस्य चतुर्थभागेनैक्ये नवमम्। प्रथमद्वितीयभागयोरेकाक्षरत्वे ऐक्ये अर्द्धवृत्याख्यं दशमम्। एवमुत्तरार्द्धेऽपि दशेति विंशतिः। ननु श्लोकावृत्तौ भागनिबन्धनो भेदः किमिति नोच्यत इत्यत आह **श्लोकान्तर इति**। श्लोकान्तरे आवर्त्यमानस्य भागस्य अप्रतीयमानत्वेन चमत्कारकारित्वादिति भावः। पादानां त्रिधा विभागे उक्तक्रमेणासंबंधे त्रिंशद्भेदा भवन्तीत्याह **त्रिखण्ड इति**। चतुर्द्धा विभागे चत्वारिंशद्भेदा भवन्तीत्याह **चतुःखण्ड इति**। एवं शुद्धभेदानभिधाय भागनिबन्धनान् यमकभेदानाह **विभजते पाद तद्भागेति**। पादः पद्यचतुर्थांशः।

सारबोधिनी—तत्र विकल्पेन यमनमाह **प्रथमो द्वितीयादावित्यादि**। प्रथमद्वितीयादिभिः पादैः पादाभिधानं प्रथमो द्वितीयादौ नियम्यत इत्यन्वयः। समुच्चयेन यमनमाह **त्रिष्वपीति**। **प्रथमेति**। प्रथम पादस्य विकल्पेनावृत्तौ त्रीणि, द्वितीयस्य द्वे, तृतीयस्य चैकं, प्रथमस्य त्रिपु समुच्चयेऽप्येवमिति सप्तता। पादानां पादयमकानां अर्धावृत्ति श्लोकवृत्तिभ्यामेकादशभेदता। अत्रेदं बोध्यम्। यमकं तावत् समस्तपादावृत्तिरूपं तद्भागावृत्तिरूपञ्चेति प्रथमं द्विधाभूय बहुप्रकारम्। तदेतदाह **प्रथम इत्यादिना**। तत्र पादावृत्तौ **यत्र प्रथमपादो द्वितीयपादेन तुल्यरूपस्तदा मुखं नाम यमकम्। यदा तृतीयेन तदा संदंशः, यदा चतुर्थेन तदावृत्तिः, एव यदा द्वितीयस्तृतीयेन तदा गर्भः, यदा चतुर्थेन तदा सन्दष्टकम्, तृतीयस्तु यदा चतुर्थेन तदा पुच्छम्, यदा तु प्रथमः सर्वत्र तदा पङ्क्तिरिति पादावृत्तिरूपाः शुद्धभेदाः। समेत्य तत्र मुखपुच्छयोः संयोगे युग्मकम्, गर्भावृत्योर्योगे परिवृत्तिरिति। तदेवं पादानां नवभेदत्वम्। अर्द्धावृत्तिः समुद्गमकम्। श्लोकावृत्तिर्महायमकमिति पादद्वयमर्द्धं पादचतुष्टयं श्लोक इत्यनयोः पादरूपता।**

प्रथमपादादिगतान्त्यार्धादिभागो द्वितीयपादादिगते आद्यार्धादिभागें यम्यते इत्याद्यन्वर्थतानुसरणेनानेकभेदम्। अन्तादिकम् आद्यन्तिकम् तत्समुच्चयः, मध्यादिकम् आदिमध्यम् अन्तमध्यम् मध्यान्तिकम् तेषां समुच्चयः। तथा तस्मिन्नेव पादे आद्यादिभागानां मध्यादिभागेषु, अनियते च स्थाने आवृत्तिरिति प्रभूततमभेदम्। तदेतत् काव्यान्तर्गडुभूतम् इति नास्य भेदलक्षणं कृतम्। दिङ्मात्रमुदाह्रियते।

बालचित्तानुरञ्जनी प्रथमादीति। प्रथमश्चासौ पादश्च प्रथमपादः आदौ येषां ते प्रथमपादादयः तेषु गतानि च तानि अन्तार्द्धानि तेषामादिः भागः द्वितीयः पाद । आदौ येषां तेषु गतानि यान्यपरार्द्धानि तेषामादिभागो यम्यते इत्यन्वर्थाश्रयणात् अन्तादिकं नाम यमकम् । एवं प्रथमपादगतोऽन्त्यभागः द्वितीयपादगतादिभागः उत्तरपादान्तभागेन यम्यते तदा आद्यन्तकं नाम यमकमित्याद्यनेकप्रकारमित्यर्थः । **तत्समुच्चय इति**। पूर्वपादान्तभागस्य उत्तरपादादिभागे पूर्वपादादिभागस्य उत्तरपादान्ते च यमनात् तयोः अन्तादिकाद्यन्तयोः समुच्चयो भवति । एवं पादविभागस्य पादान्तरादिभागे यमनात् पादमध्यादिकं नाम यमकम् । आदिभागस्य मध्यभागे यमनादादिमध्यं नाम यमकम् । तयोरेकः समुच्चयः । अन्तभागस्य मध्यभागे यमनादन्तमध्यम् । मध्यभागस्य अन्त्यभागे यमने मध्यान्तिकम् । एतयोरेकः समुच्चयः । सर्वेषामेकः समुच्चय इति चत्वारः समुच्चया इत्यर्थः । इत्थं पादान्तरभागापेक्षया पादभागभेदाः प्रदर्शिताः । इदानीमेकस्मिन्नेव पादे भागभेदानाह **तथेति**। अस्य भेदः किमिति न लक्ष्यत इत्यत आह **तदेतदिति** । गडुग्रन्थिः । उक्तप्रकारेण भेदानामानन्त्येन उदाहरणाशक्तेः यथाशक्ति उदाह्रियत इत्याह **दिगिति** ।

सारबोधिनी—श्लोकावृत्तिप्रकारो भागावृत्तौ न संभवति, यतो व्यवधानेन द्विचतुरक्षरावृत्तौ न चमत्कार इति । त्रिखण्डे चरणस्य भागत्रये । चतुःखण्डे चरणभागचतुष्टये कृते प्रथमादिपादादिभाग इत्यादि पूर्वतनमत्र योज्यम् । अन्वर्थता अनुगतार्थतायोग इत्यर्थः । त्रिखण्डचतुःखण्डादिकं यमनमाह **अन्तादिकमित्यादि** । **गडुग्रन्थिः** ।

सन्नारीभरणोमायमाराध्य विधुशेखरम् ।
सन्नारीभरणोऽमायस्ततस्त्व पृथिवीं जय ॥३६०॥

विनायमेनो नयतासुखादिना विना यमेनोनयता सुखादिना ।
महाजनोऽदीयत मानसादरं महाजनोदी यतमानसादरम् ॥३६१॥

स त्वारम्भरतोऽवश्यमबलं विततारवम् ।
सर्वदा रणमानैषीदवानलसमस्थितः ॥३६२॥

सत्वारम्भरतोऽवश्यमवलम्बिततारवम् ।
सर्वदारणमानैषी दवानलसमस्थितः ॥३६३॥

बालचित्तानुरञ्जनी—प्रथमतृतीययोरैक्ये यमकमुदाहरति **सदिति** । हे राजन् । सतीः नारीः बिभर्ति या उमा पार्वती तां पाति सम्बध्नाति यः तं पार्वतीविशिष्टमित्यर्थः । विधुश्चन्द्रः शेखरे यस्य तं आराध्य शक्ताः । अरीणामिभाः गजाः यस्मिन् तादृशे रणे यस्य अमायो दंभरहितः सन् ततः त्वं पृथिवीं जय । प्रथमद्वितीययोः, तृतीयचतुर्थयोश्चैको यमकमुदाहरति **विनेति** । विः पक्षी गरुडसंज्ञकः तेन

तत्सदृशेनेत्यर्थः । ऊनयता, ऊनं हीनं कुर्वता । असून् प्राणान् खादति भक्षयति । तेन एनः अपराधं विना स्वस्थानं अप्रापयता सुखानि अत्ति विनाशयति । तेन यमेन अयं योगे महान्तं अजं नुदति हिनस्ति महान् उत्सवान् अजन्ति लुम्पन्ति ये दुर्जनाः तान् नुदति क्षिपतीति वा महाजनोदी महाजनः उत्तमश्लोकः मानसात् चित्तात् अरं शीघ्रं यतमानानां सादमवसादं राति ददाति । यथा तथा अदीयत । अखण्डायतन यमेन महाजनश्चलचित्तः कृत इत्यर्थः । श्लोकावृत्तिमुदाहरति सत्त्वेति । सत्त्वप्रधानेषु आरम्भेषु कार्येषु रतः निरतः अवश्यं सर्वदा अबल गजतुरगादिशून्यं वितनारवं विस्तृताक्रोशं यथा सर्वेषां दारणः विनाशकः यः गर्वः तमेषितु शीलवान् दावानलेन समं सदृशं स्थितं स्थितिर्यस्या इत्येकः श्लोकः । अन्यस्तु स वर्णनीयो नेता तु अलसं आलस्यं विशिष्टं यथा तथा अवान् अगच्छन् । अस्थीनि स्यति खण्डयति । असन्तवेऽपि धातुत्वादुपधादीर्घभावः । एवंविधः सन् भरतः आरम्भात् सन्नाहात् अवश्यं अविधेयं सत् अवलम्बितानि वस्त्रतया स्वीकृतानि रवाणि वल्कलानि येन तत् अरीणां समूहः आरं सर्वदा नित्यं रणं युद्धं अनैषीत् आनीतवानिति ।

सारबोधिनी – सन्नारीति । विधुशेखरमाराध्य ततः आराधनतः पृथिवीं जयेत्यर्थः । सतीं नारीं बिभर्ति पुष्णातीति या उमा तमयते प्राप्नोति । सन्ना अवसन्ना । अरीणां इभा हस्तिनो यत्र तथाभूतो, विधुविशेखरमाराध्य, तत आराधनतः पृथिवीं जयेत्यन्वय. । सती नारी बिभर्ति उमा तां पातीति रणो यस्येति युष्मदर्थविशेषणम् । अमायमकैतवं यथा स्यात्तथा आराध्येति सम्बन्धः । विनायमिति । अयं महाजनो महापुरुषो यमेन मानसं चित्तं तदेव मानसं सरः तस्मादरं शीघ्रम् । अदीयत अखण्डयत । मनः संयोगध्वंसो मरणम् । तत्कृतमिति पर्यवसितोऽर्थः । एनो विना अपराधादृते नयता स्थानं प्रापयता, असुखादिना प्राणभक्षकेन । विना पक्षिणेति । ऊनयता हानिं कुर्वता, असुखादिना सुखभक्षकेन । महमुत्सवम् अतिक्षिपति । खलः तन्नोदयितुं शीलमस्येति । महाजनोदीयत मानानां रक्षितुं प्रयत्नवतां सादमवसादं राति ददाति । खण्डनक्रियाविशेषणम् ।

सत्त्वेति – स तु प्रकृतो राजा, आरं अरिसमूहम् । सर्वदा सर्वकालम् । रणं समरमनैषीदित्यन्वयः । भरतो गौरवातिशयः । अवश्यं निश्चयेन आरं विशेषयति । **अवलम्बेति** । अवलम्बितमाश्रितम् । तारवं तरुसमूहो येन तथा अलसं यथा स्यात्तथा अवान् अगच्छन् । त्यतस्यति उत्क्षिपतीसुयस्थितः । "तउपक्ष यउ" इति धात्वनुसारात् । धातुनिषेधादुपधादीर्घभावः । पक्षे सत्त्वेन प्रथमगुणेन य आरम्भस्तत्र रतः सत्त्वगुणेनैव सर्वेषां क्रियामारभते । अवश्यं पश्यतामनापन्नं अबलं सैन्यशून्यं विततो विस्तृत आरवः शब्दो यस्य तं सर्वं दारयति यो मानस्तमिच्छुः दवानलेन दावाग्निना समस्तुल्यः स्थितःस्थिरः । अघोषपरे सकारे वा विसर्जनीयस्य लोपः । यद्वा समं स्थितं यस्येति समासः ।

अनन्तमहिमव्याप्तविश्वां वेधा न वेद याम् ।
या च मातेव भजते प्रणते मानवे दयाम् ॥३६४॥
यदानतोऽयदानतो नयात्ययं न यात्ययम् ।
शिवेहितां शिवे हितां स्मरामितां स्मरामि ताम् ॥ ६५॥

सरस्वति प्रसादं मे स्थितिं चित्तसरस्वति ।
सर स्वति कुरु क्षेत्रकुरुक्षेत्रसरस्वति ॥३६६॥

बालचित्तानुरञ्जनी—अथ खण्डयमकेषु द्वितीयपादान्तभागस्य तुरीयपादान्तभागे यमकमुदाहरति **अनन्तेति** वेधाः ब्रह्मा अनन्तेन महिम्ना व्याप्तं विश्वं यया तां न वेद । या च मातेव प्रणते नम्रे मनुष्ये दयां कृपां भजते कुरुते ।

अथ सर्वपादेषु भागानामन्त्यभागेषु यमकमुदाहरति **यदानत इति** । यस्यै आननः प्रणतः अयं श्लोकः अयस्य शुभावहस्य विधेः अभितः वितरणात् नयात्ययं नीतिव्याख्या तां न याति न प्राप्नोति । शिवं ईहितं यस्याः सा शिवे हरे हितां अनुकूलां स्मरामि । ता स्मरेण कामेन अभितां अपरिच्छिन्नां अलौकिकशृङ्गारामित्यर्थः । तां गौरीं स्मरामि चिन्तयामि ।

अथ सत्रगर्भभेदमुदाहरति **सरस्वतीति** हे सरस्वति । क्षेत्रं शरीरं तदेव कुरुक्षेत्रं तस्य सरस्वति नदीविशेषभूते मे चित्तमेव सरस्वान् समुद्रः । तत्र स्थितां "सरस्वती सरिद्भेदे भूवाग्देवतयोरपि । स्त्रीरत्ने चापगायाञ्चे"त्यभिधानात् । हे सरस्वति स्त्रीरत्नभूते इत्यर्थः । अस्मिन् पक्षे स्थितिं कुरु प्रसादं कुर्वित्यर्थः । अत्र प्रथमतृतीययोरादिभाग तृतीयचतुर्थयोर्यम्यत इति साङ्कर्यम् ।

सारबोधिनी--**अनन्तेति** । यां दुर्गां वेधा ब्रह्मा न वेद स्वरूपतो न जानाति । या च प्रणते मानवे दयां भजते । सन्दष्टकमिदम् । **यदानत इति** । यस्यां दुर्गायां मानतोऽयं जनो न यस्य नीतेरत्ययं विनाशं न याति । तां स्मरामि । अयं शुभावहो विधिस्तस्य दानात् । नित्यविनाशे हेतुरयं शिवेन शङ्करेण ईहितां अर्थितां, पक्षे शिवे कल्याणे हितां शिवदात्री स्मरेण कामेन मिताम् । आद्यन्तयमकमिदम् । **सरस्वतीति** । हे सरस्वति ! वाग्देवि ! प्रसादं स्वति सर । सुष्ठु अतिशयेन सर गच्छ । मे मम चित्तसरस्वति चित्तसमुद्रे स्थितिं कुरु । क्षेत्रं शरीरं तदेव कुरुक्षेत्रम् । तत्र सरस्वती नदीविशेषः ।

ससार साकं दर्पेण कन्दर्पेण ससारसा ।
शरन्नवाना बिभ्राणा नाबिभ्राणा शरन्नवा ॥३६७॥

मधुपराजिपराजितमानिनीजनमनःसुमनःसुरभि श्रियम् ।
अभृत वारितवारिजविप्लवं स्फुटिततामततामवणं जगत् ॥३६८॥

बालचित्तानुरञ्जनी—अथार्थद्वयेऽपि प्रथमादिभागे द्वितीयान्तभागे द्वितीयप्रथमान्तभागे द्वितीयादिभागे च यम्यत इत्येतदुदाहरति **ससारेति** । सारसैः पक्षिविशेषैः सह वर्तत इति सारसा । शरं काशं बिभ्राणा नवं कर्दमाभावान्नूतन अनः शकट यस्यां सा, वीनां पक्षिणां भ्राण शब्दः स न विद्यते यत्र सा अविभ्राणा सा न भवतीति । नाविभ्राणा नवा नतना शरद् ऋतुः दर्पेण साकं ससार आजगाम ।

एवं द्विखण्ड उदाहरणान्यभिधाय चतुःखण्ड उदाहर्तुमाह मधुवित्ति । वारितः निवारितः वारिजानां कमलानां विप्लवो यत्र, स्फुटितानि विकसितानि ताम्राणि ततानि विस्तृतानि आम्रवणानि चूतवनानि यस्य तत् जगत् । मधुपानां भ्रमराणां राज्या पङ्क्त्या पराजितो मानिनीजनस्य मानो याभिस्तासां सुमनसां सुरभिश्रियं सौरभ्यलक्ष्मीं अभृत दध्रे । अत्र खण्डचतुष्टयेषु द्वितीयखण्डः तृतीयखण्डे यम्यते ।

विविधधववना नागगर्धागतनाना-[?]

विविततगगनानामसज्जज्जनाना ।

शशरुरुवलना नावबन्धुं धुनाना

मम हिततनानाननस्वस्वनाना ॥

बलभद्रं प्रति श्रीकृष्णेन समुद्रपरिसरभूर्वर्ण्यते । विविधानि धवानां वृक्षविशेषाणां वनानि यस्यां सा, नागेषु गर्धेन सर्पभक्षणाभिलाषेण आगतैः वृद्धैः समृद्धैः[?] नानाविधैः विभिः पक्षिभिः विततं व्याप्तं गगनं यस्याः सा, अनामेन अनमनेन मज्जन्तः जना यस्यां सा । अविद्यमाना नरः यस्यां सा अना, समासान्तविधेरनित्यत्वात् नघृतश्चेति कबभावः । यद्वा अविद्यमानः अः विष्णुः, यस्यां सा अना । शशानां रुरूणां वलनं विलासो यस्यां सा । नौ आवयोः अबन्धुं शत्रुं धुनीते धुनाना मम हितं तनोतीति हिततना अनाननः अमुखः स्वस्य स्वन एव अनः प्राणो यस्यां सा । इत्याद्यन्यदप्युदाहार्यमित्याह एवमिति ।

सारबोधिनी—ससार सेति । शरत्ससार प्रससार । साकं कन्दर्पेण दर्पेण च, कं ब्राह्मणं दर्पितवान् यस्तेन । सारसाः पक्षिभेदाः तैः सहिताम् । नवमनः शकटम् यत्र । शरं काण्डं बिभ्राणा । न विद्यते वीनां पक्षिणां भ्राणः शब्दो यत्र । पश्चान्नत्रा योगः । नवा नूतना । एतानि द्विखण्डोदाहरणानि । चतुःखण्डे उदाहरति **मधुपराजीति** । जगत् कर्तृ । सुरभिश्रियं वसन्तलक्ष्मीमभृत दधार । मधुपानां राज्या श्रेण्या पराजित मानिनीजनमनो याभिस्तथाभूताः सुमनसः पुष्पाणि यत्र सुरभौ, यद्वा तथाभूतानां सुमनसां पुष्पाणां सुरभिश्रियं सौरभ्यलक्ष्मीमित्यर्थः । किंभूतं जगत् । वारि जलम् तस्माज्जायते उत्पद्यते यस्तादृशो वारिजानां कमलानां विप्लवो नाशो यत्र । स्फुटितं विकसितम् ताम्रं रक्तवर्णम् ततं विस्तृतं आम्रवणं यत्र ।

एवं वैचित्र्यसहस्रैः स्थितमन्यदुन्नेयम् ।

वाच्यभेदेन भिन्ना यद् युगपद्भाषणस्पृशः ।

श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा ॥८४॥

'अर्थभेदेन शब्दभेदः' इति दर्शने 'काव्यमार्गे स्वरो न गण्यते' इति च नये वाच्यभेदेन भिन्ना अपि शब्दा यत् युगपदुच्चारणेन श्लिष्यन्ति भिन्नं स्वरूपमपह्नुवते स

श्लेषः। स च वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानां भेदादष्टधा । क्रमेणोदाहरणम्

अलङ्कारः शङ्काकरनरकपालं परिजनो
विशीर्णाङ्गो भृङ्गी वसु च वृष एको बहुवयाः ।
अवस्थेयं स्थाणोरपि भवति सर्वामरगुरो-
र्विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी ।।३६९।।

बालचित्तानुरञ्जनी—नन्वेकरूपाणामपि शब्दानामनेकार्थाभिधानसामर्थ्याङ्गीकारात् श्लेषशब्दार्थस्य शब्दद्वयनिष्ठत्वनियमः कथमित्याशङ्क्याह **अर्थेति**। अर्थभेदेन हेतुना शब्दानामपि भेद इति दर्शने श्लेषोपमालङ्कारो नान्यत्रेत्यर्थः। नन्विन्द्रशत्रुप्रभृतौ वाक्ये उच्चारणविनायां कदाचिदुदात्तः कदाचिदन्य इति स्वरस्य भेदकत्वाङ्गीकारात् कथमेकशब्दत्वमित्याशङ्क्याह **काव्यमार्ग इति**। अक्षरादिभिरित्यादिशब्दार्थं कथयन् व्याकरोति **स चेति**। वर्णभेदात् श्लेषालङ्कारभेदमुदाहरति **अलङ्कार इति**। शङ्काकरं भयङ्करं यन्मनुष्यकपालं स एवालङ्कारः। विशीर्णाङ्गो भृङ्गी परिजनः। वृद्ध एको वृषभो धनम्। वक्रे विधौ बालचन्द्रे मूर्ध्नि स्थितवति सकलदेवानामिन्द्रादीनां गुरोरपि स्थाणोरीश्वरस्येयमवस्था, वक्रे विधौ प्रतिकूले दैवे मूर्ध्नि स्थितवति वयं के पुनः ? अत्र विधुर्विधिरिति द्वयोरुकारेकारयोः श्लेषः, विधाविति यौगपद्येनोक्तत्वात्।

सारबोधिनी—श्लेषं लक्षयति **वाच्येति**। शब्दा यत् श्लिष्यन्ति स श्लेषः। अगृहीतभिन्नस्वरूपत्वं श्लेषणम्। दोषाद्भेदाग्रहेऽयमलङ्कारः। तत्र को दोष इत्याह **युगपदिति**। युगपद्भाषणं एकोच्चारणम् तस्य स्पर्शि तद्विषयत्वम्। तथा च स एव दोष इत्यर्थः। तथा च शब्दानां भिदा भेदस्तन्त्रोच्चारणेन दोषेण न गृह्यत इति शेषः। अर्थभेदप्रतीत्यनन्तरं गृह्यमाणस्तु भेदो न किञ्चित् कुरुते। **वाच्यभेदेनेति**। त्रिधा शब्दा भिद्यन्ते स्वरूपतः स्वरतोऽर्थतश्चेति वैयाकरणाः। वाच्यः शब्दोच्चारणानन्तरं प्रत्येयो न त्वभिधेयः। तेन श्वेतो धावतीत्यत्र नाव्याप्तिः। अन्यथा श्वेतगुणवत्समीपदेशस्थकुक्कुरयोरेकस्यापि वाच्यताविरहेण श्लेषो न स्यात् गुणवति श्वेतशब्दस्य लाक्षणिकत्वात्। अत्राभिधाया अनियन्त्रणेन न व्यञ्जनावसरः। तस्मान्नानार्थेषु श्लिष्टेषु यत्रानेकत्र युगपत् प्रकरणादिकमवतरति नावतरति वा तत्र श्लेषः। यत्र क्रमेण तत्रावृत्तिः, यत्रैकदैव तत्र व्यञ्जनेति व्यवस्थितिः। नन्वेवं स्वरभेदेनोच्चारितानां कथं भेदाग्रह इत्यत आह **काव्यमार्ग इति**। न गण्यते स्वरमनादृत्यैवोच्चार्यते। अन्यथा श्लेषभङ्गप्रसङ्गात्। श्लेषस्य चमत्कारितायाः सर्वजनसिद्धत्वेनापलपितुमशक्यत्वादिति। **स चेति** अक्षरपदार्थस्तु वर्णः। आदिशब्दार्थमाह **पदेत्यादि**। लिङ्गं पुंस्त्वादि। भाषा संस्कृतप्राकृतादि। यद्यपि प्रत्ययग्रहणादेव विभक्तेरपि ग्रहणम् तथापि तत्राधिकं चारुत्वं प्रतिभासत इति पृथगुपात्तम्। प्रत्ययो विभक्तिः सुप्तिङ् वचनं त्रिकविभक्तीनामेकैको भागः। अत्र सभङ्गश्लेषे इमेऽष्टौ प्रकाराः। अभङ्गश्लेषे पुनः प्रकारान्तरं तद्वक्ष्यति **भेदाभावात् प्रकृत्यादेरिति**। **अलङ्कार इत्यादि**। विधौ चन्द्रे अथ च

दैवे । मूर्ध्नि मस्तके अथ च सर्वं परिभूय स्थिते । वक्रे कुटिले अथ विरुद्धफलप्रदे । अत्रौकारतां प्राप्तवतो-रिकारोकारयोः श्लेषणम् ।

पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम् ॥३७०॥
भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी
ध्यानालम्बनतां समाधिनिरतैर्नीतेहितप्राप्तये ।
लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती
युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः ॥३७१॥

एष वचनश्लेषोऽपि ।

बालचित्तानुरञ्जनी–पदश्लेषमुदाहरति **पृथुकेति** । दरिद्रस्य वचनम् । देव हे राजन् ! आवयोर्गृहं सदृशम् । पृथुकानां बालकानां दुःखितस्वराणाम् पात्रं स्थानम् । पृथूनि स्थूलानि, कार्तस्वरस्य सुवर्णस्य पात्राणि भाजनानि यत्र । भुवि उषितः भूषितः अलङ्कृतश्च । बिलसदो मूषकाः, तेषां कुट्टितैः रेणुभिर्व्याप्तं, विलसन्तीभिः करेणुभिः गहनम् । पृथुकविशिष्टस्यार्तपदस्य पृथुविशिष्टकार्तस्वरपदस्य च श्लेषः । एवमितरत्रापि द्रष्टव्यम् । लिङ्गश्लेषमुदाहरति **भक्तीति** । हरेः नेत्रे तनुर्वो युष्माकं संसारार्त्तिशमनं कुरुताम् । कीदृशी नेत्रे भक्तिप्रह्वकर्मकविलोकनप्रणयिनी, कीदृशी तनुश्च, भक्तिप्रह्वकर्तृकविलोकन-प्रणयिनी । नीलोत्पलस्पर्द्धित्वं नेत्रपक्षे संनिवेशवैशिष्ट्येन तनुपक्षे श्यामत्वादिमात्रेण । नेत्रपक्षे हित-प्राप्तये अनुकूलार्थसिद्धये नीते । तनुपक्षे नीता ईहितप्राप्तये । नेत्रपक्षे महानिधी इति द्विवचनम् । पक्षे महानिधिः । ढ्रलोप इति दीर्घः । लक्ष्मीदृशोः रसिकतां तन्वती । नेत्रपक्षे कुरुतामिति लोट् परस्मैपद-द्विवचनम् । तनुपक्षे आत्मनेपदैकवचनम् । अत्र नपुंसकस्त्रीलिङ्गयोः श्लेषः । एकवचनद्विवचनयोश्च श्लेष इत्याद्यूह्य इति ।

सारबोधिनी–**पृथुकार्तेति** । व्याख्यातं सप्तमे । **भक्तीति** । वाकारः समुच्चये । भक्तिप्रह्वो विलोकनस्य कर्म कर्ता च । **नीलोत्पलेति** । तनुपक्षे ताच्छील्ये णिनिः । नीते नीता च । हितं ईहितम् च । निधी निधिश्च । **तन्वतीति** । नेत्रपक्षे औकारस्य ईकारताप्राप्तिः । तनुपक्षे ङीप् च । **कुरुतामिति** । नेत्रपक्षे परस्मैपदद्विवचनम् । तनुपक्षे आत्मनेपदैकवचनम् । अत्र रूपसामान्येन नपुंसकस्त्रीलिङ्गयोः श्लेषः । आनुपूर्व्या एकत्वेऽपि स्त्रीनपुंसकाभ्यामर्थद्वयावगम इति तन्मूलको व्यवहार इति । **एष इति** । द्विवचनैकवचनयोः सारूप्यादिति शेषः ।

महदेसुरसंधम्मे तमवसमासंगमागमाहरणे ।
हरबहुसरणं तं चित्तमोहमवसरउमे सहसा ॥३७२॥

बालचित्तानुरञ्जनी—संस्कृतप्राकृतवचनभाषाश्लेषमुदाहरति **महद इति**। हे महदे उत्सवदे, उमे गौरि, मे मम सुराणां देवानां संधा संधानं सम्यग्ज्ञानं यत्र तं आगमानां वेदशास्त्रादीनाम्, आहरणे स्वीकारे समासंग संसक्ति, अव रक्ष। किं च बहुसरणं अधिकप्रसारं तादृशं चित्तमोहम्, अवसरे उचितकाले, सहसा शीघ्रं, हर क्षपय इति संस्कृतभाषा। हरबहु वारं वारं रितं त्व सरणं शरणं, मह मम धर्मे रतिं प्रीतिं देसु दिश्यतु अस्माकम्। तमवसं तमोवशां तमोगुणयुक्तां असं आसां इच्छां। गमागमा गमागमात् संसारान् हर अपनय। मे मम चित्तमोहं चित्तमोहः मोहशब्दस्य गुणवादित्वात् क्लीबे गुणगा इति सूत्रेण पक्षे नपुंसकत्वम्। सहसा बलेन। अवसरउ अपसरतु इति प्राकृतभाषा। द्वयोः श्लेषः।

सारबोधिनी—**महदे इति**। मम देहि रसं धर्मे तमोवशाम् आशां गमागमात् हर नः। हरवधु शरणं त्वं चित्तमोहोऽपसरतु मे सहसा॥ एतत् प्राकृते। संस्कृते तु, महदे उत्सवदात्रि सुराणाम् संधा संधानं ज्ञानं यत्र तं मे अव रक्ष। समासङ्गम् समासक्तिम्। आगमाहरणे वेदविद्योपादाने हर अपनय। बहुधा सरणं यस्य तं प्रसिद्धम्। चित्तमोहम् अवसरे यथा शब्दावधानम्। उमे दुर्गे सहसा शीघ्रम्। अत्र प्राकृतसंस्कृतभाषयोः श्लेषः।

अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति।
सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः॥३७३॥

बालचित्तानुरञ्जनी—प्रकृतिश्लेषमुदाहरति **अयमिति**। अमित्राणां शत्रूणां सुहृदां च। सामर्थ्यं कृन्तति करोतीति च कृत् नृपात्मजः। सर्वाणि शास्त्राणि हृदि हृदये ज्ञेषु विद्वत्सु च वक्ष्यति धारयिष्यति [कथयिष्यति च]। अत्र वक्ष्यतीति लृटि वहतेः वक्तेश्च प्रकृत्योः श्लेषः। सामर्थ्यकृदित्यत्र क्विपि करोतेः कृन्ततेश्च प्रकृत्योः श्लेषः।

सारबोधिनी—**अयमिति**। अत्र वक्ष्यतीत्यत्र वहिवच्योः, सामर्थ्यकृदित्यत्र कृन्ततिकरोत्योः प्रकृत्योः श्लेषः।

रजनिरमणमौलेः पादपद्मावलोकक्षणसमयपराप्तापूर्वसंपत्सहस्रम्।
प्रमथनिवहमध्ये जातुचित्त्वत्प्रसादादहमुचितरुचिः स्यान्नन्दिता सा तथा मे॥३७४॥

सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः।
नयोपकारसांमुख्यमायासि तनुवर्तनम्॥३७५॥

बालचित्तानुरञ्जनी—प्रत्ययश्लेषमुदाहरति **रजनीति**। रजनिरमणश्चन्द्रः मौलौ यस्य तस्य पादपद्मावलोकने यः क्षणसमयः उत्सवकालः, तेन पराप्तं प्राप्तं अपूर्वं संपत्सहस्रं यस्मिन् कर्मणि, जातुचित् कदाचित्, प्रमथनिवहमध्ये प्रमथगणमध्ये उचितरुचिः अहं नन्दिता स्याम्। तथा च तत्प्रसादान्मे नन्दिनो भावः नन्दिता स्यात्। अत्रोत्तमपुरुषप्रथमपुरुषप्रत्यययोः तृच्तल्प्रत्यययोश्च श्लेषः।

विभक्तिश्लेषमुदाहरति सर्वेति । हे हर, त्वं सर्वस्य सर्वस्वम् संसारच्छेदतत्परश्च । नयस्य नीतेः उपकारस्य च सांमुख्यं आयासि आगच्छसि । तनुवर्त्तनं शरीरवृत्तिं च आयासि । अपरोऽर्थः-सर्वस्य सर्वस्वं पश्वादिकं हर अपहर । त्वं छेदतत्परो भव, उपकारसांमुख्यं नय, आयासोऽस्यास्तीत्यायासि वर्त्तनम् तनु विस्तारय । 'यस्यानुग्रहमिच्छामि तस्य वित्तं हराम्यहमि'ति न्यायेन सर्वस्वापहारादिना अनुग्रहं कुर्वित्यर्थः । अत्र सर्वत्र सुप्तिङ्विभक्त्योः श्लेषः ।

सारबोधिनी—प्रत्ययश्लेषमुदाहरति रजनीत्यादि । अवलोकनमेव क्षण उत्सवः । तत्समये तत्काले । प्राप्तापूर्वसंपत्सहस्रं यथा स्यात्तथा । प्रमथो गणभेदस्तन्मध्येऽहं स्यां सैव मम नन्दिता नन्दित्वम् गणाधिपत्वं स्यात् । जातुचित् कदाचित् । उचिते उचिता वा रुचिः प्रीतिर्दीप्तिश्च । अत्रैकत्र तिङि उत्तमपुरुषप्रथमपुरुषैकवचनयोः प्रत्यययोः श्लेषः । केचित्तु स्यामित्युत्तमपुरुषः स्यादिति प्रथमपुरुषः । नन्दितेति तृजन्तः, नन्दिनो गणविशेषस्य भावः, तलन्तश्च । तथा च त्वत्प्रसादात् कदाचिदपि मे नन्दिनो भावः स्यात्तथा । एवं सति अहमुचितरुचिः स्याम् तया रुच्या नन्दिता नन्दनः स्यामिति योजना । यत्र च सुपां तिङां च सारूप्यं स विभक्तिश्लेषः तमुदाहरति सर्वस्वमिति । हे हर महादेव । त्वं सर्वस्य सर्वस्वम् । भवस्य संसारस्य छेदो विनाशः । नयो नीतिः । दुःखार्तानामुपकारस्तद्विषयं सांमुख्यं उत्साहम् । आयासि आगच्छसि । तनोः शरीरस्य वर्तनं स्थितिर्यस्मात् सांमुख्यात् । पक्षे दस्युं संबोध्येयमुक्तिः । त्वं सर्वस्य सर्वस्वं हर चोरय । छेदतत्परो भव । उपकारविषयकं सांमुख्यमिच्छां नय अपसारय । वर्तनं तनु विस्तारय । आयासि आयासयुक्तं वर्तनविशेषणम् । सुप्तिङ्विभक्त्योः श्लेषः ।

भेदाभावात् प्रकृत्यादेर्भेदोऽपि नवमो भवेत् ।

नवमोऽपीत्यपिर्भिन्नक्रमः । उदाहरणम्

योऽसकृत्परगोत्राणां पक्षच्छेदक्षणक्षमः ।
शतकोटिदतां बिभ्रद्विबुधेन्द्रः स राजते ।।३७६।।

अत्र प्रकरणादिनियमाभावात् द्वावप्यर्थौ वाच्यौ ।

बालचित्तानुरञ्जनी—एवं रुद्रटाद्युक्तानष्टौ भेदानुदाहृत्य तदधिकोऽपि भेदः कश्चिदुत्प्रेक्षितुं शक्यत इत्याह भेदाभावादिति । प्रकृतिप्रत्ययश्लेषादेर्मध्ये एकस्य भेदस्याभावात् मेलकरूपः । अयं नवमोऽपि स्यादित्यर्थः । उदाहरति य इति । स विबुधेन्द्रः राजते । विबुधाः देवाः विद्वांसश्च । स इति कः ? यः असकृत् परेषामुत्कृष्टानां पर्वतानां पक्षाणां गरुतां छेद एव क्षणः उत्सवः तत्र क्षमः, पक्षे शत्रुकुलानां पक्षाः स्ववर्गाः तेषां छेदक्षणक्षमः, शतकोटिं वज्रं ददाति असुरेषु क्षिपतीति शतकोटिदः, तस्य भावस्तत्ता तां बिभ्रत् । नन्वत्र कस्यचिदर्थस्य वाच्यत्वं अस्तु किमनेन श्लेषोक्तिक्लेशेनेत्यत आह अत्रेति । अत्र द्वयोरपि प्राकरणिकत्वात् एकत्राभिधाया नियन्त्रणाभावात् अर्थद्वयस्यापि वाच्यत्वेन श्लेष एवाङ्गीकर्तव्य इति भावः ।

सारबोधिनी—भेदाभावादिति । पूर्वोक्तभेदकाभावे यत्रार्थद्वये तात्पर्यमवगम्यते स नवमोऽपि प्रकारः श्लेषस्येत्यर्थः । **योऽसकृदिति** । विबुधानां देवानां पण्डितानाञ्च इन्द्रः प्रभुः श्रेष्ठश्च । पर-

गोत्राणां श्रेष्ठगिरीणाम् शत्रुसन्ततीनाञ्च, पक्षः पतत्रमनुकूलश्च पक्षच्छेदे क्षणेन अल्पकालेन क्षमः समर्थः। शतकोटिर्वज्रं कोटिशतञ्च, शतकोटिना द्यति खण्डयति, कोटिशतं ददाति च। एष चाभङ्ग-श्लेषः। अर्थान्तरस्य व्यङ्ग्यताशङ्कां निराचष्टे **प्रकरणादिनियमाभावादिति।**

ननु स्वरितादिगुणभेदाद् भिन्नप्रयत्नोच्चार्याणां तदभावादभिन्नप्रयत्नोच्चार्याणाञ्च शब्दानां बन्धेऽलङ्कारान्तरप्रतिभोत्पत्तिहेतुः शब्दश्लेषोऽर्थश्लेषश्चेति द्विविधोऽप्यर्थालङ्कार-मध्ये परिगणितोऽन्यैरिति कथमयं शब्दालङ्कारः।

बालचित्तानुरञ्जनी—ननु स्वरितोदात्तादिगुणवैलक्षण्यात् केचिद् भिन्नप्रयत्नोच्चार्याः अन्ये तस्य स्वरितादेरभेदात् अभिन्नप्रयत्नोच्चार्याश्च, तत्र पूर्वत्र शब्दश्लेषस्य यत्र प्रायो पदभङ्गः, उत्तरत्र आर्थत्वं यत्र न पदभङ्गः, उभयविधोऽपि अयमुपमादेरलङ्कारान्तरस्य प्रतिभामुत्थापयति। अतश्चास्यार्थालङ्कारत्वमपि युक्तम् न शब्दालङ्कारत्वमेवेति उद्भटमतमाशङ्कते **नन्विति।**

सारबोधिनी—**नन्विति**। स्वरितः समाहारः स्वरः। आदिपदादुदात्तानुदात्तौ। आश्रयस्य विजातिभ्यो व्यवच्छेदकत्वेन गुणत्वम्। स्वरभेदात् प्रयत्नभेदः। उच्चार्याणां उच्चारणयोग्यानाम्। श्लेषभङ्गभयेन प्रकृतेऽनादृतानामिति। यथा 'पृथुकार्त्तस्वरे'त्यादौ समासभेदेन स्वरभेदात् विजाती-योच्चारणयोग्यत्वेन भिन्नयोः शब्दयोर्जतुकाष्ठन्यायेन यः श्लेषः स शब्दश्लेषस्य विषयः। यत्र स्वरा-भेदादभिन्नप्रयत्नोच्चार्ये 'योऽसकृदि'त्यादौ शब्दाभेदादेकवृन्तगतफलद्वयन्यायेन श्लेषः सोऽर्थश्लेषस्य विषयः। किञ्चास्यालङ्कारान्तरविविक्तविषयतयाऽसंभवाद्विद्यमानेष्वलङ्कारान्तरेषु अपवादत्वेन तद्बाधते इत्यलङ्कारान्तरप्रतिभोत्पत्तिहेतुत्वमिति कथमयं शब्दालङ्कार एव। अन्यथा अर्थालङ्कारत्वाभावे सामानाधिकरण्याभावात् बाध्यबाधकता न स्यादिति पूर्वपक्षार्थः।

उच्यते—इह दोषगुणालङ्काराणां शब्दार्थगतत्वेन यो विभागः सोऽन्वयव्यतिरेका-भ्यामेव व्यवतिष्ठते। तथाहि—कष्टत्वादिगाढत्वाद्यनुप्रासादयो व्यर्थत्वादिप्रौढ्याद्युपमाद-यस्तद्भावतदभावानुविधायित्वादेव शब्दार्थगतत्वेन व्यवस्थाप्यन्ते।

बालचित्तानुरञ्जनी-परिहरति **उच्यत इति**। सामान्येन काव्यव्यवहारे शाब्दत्वार्थत्व-निबन्धनं निश्चेतव्यम् यदनुगुणोऽयमत्रत्यो विभाग इत्याशयेनाह **इहेति**। न केवलमलङ्कार एवायं नियमः यावद्गुणदोषयोरपीत्याह **दोषेति**। उद्देशानुगुण्याद्दोषगुणालङ्काराणामित्युक्तिः। आश्रयाश्रयिभावनिबन्धनतायामपि अन्वयव्यतिरेकयोरवर्जनीयत्वस्य वक्ष्यमाणत्वादन्वयव्यतिरेकाभ्या-मित्युक्तम्। कष्टत्वादीनां यथान्वयव्यतिरेकाभ्यामेव शब्दार्थगतत्वेन व्यवस्था तथा श्लेषस्यापीति प्रतिपादयितुमाह **तथाहीति**। कष्टत्वं शाब्दो दोषः। गाढत्वं गुणः। उपमालङ्कार इति, तन्सजातीयपरिग्रहार्थं सर्वत्रादिपदम्। प्रौढिगाढत्वयोर्गुणत्वं पराभ्युपगमेन, स्वमते तयोरोजस्यन्तर्भावात्।

सारबोधिनी—अलङ्कारान्तरप्रतिभा आभानमात्रम्, न तु स्वस्मिन् विश्रान्ततया **चमत्कारित्वम्**। न तु स्वस्मिन् विश्राम इति। कष्टत्वं श्रुतिकटुता। गाढत्वमोजः। वर्णसाम्यमनुप्रासः। एते शब्दस्य दोष-

गुणालङ्कारा:। व्यर्थत्वमपुष्टार्थता। प्रौढिर्व्याससमासरूपा। साधर्म्यमुपमा। एते अर्थस्य दोषगुणालङ्कारा:। तत्पदेन शब्दार्थानुत्कर्ष:। भावोऽन्वय:। अभावो व्यतिरेक:। श्लेषस्य क्वैतद्दृष्टमित्याह **तथाहीति**।

स्वयं च पल्लवाताम्रभास्वत्करविराजिता। इत्यभङ्ग:।

प्रभातसन्ध्येवास्वापफललुब्धेहितप्रदा ॥३७७॥ इति सभङ्ग:।

इति द्वावपि शब्दैकसमाश्रयाविति द्वयोरपि शब्दश्लेषत्वमुपपन्नम् न त्वाद्यस्यार्थश्लेषत्वम्। अर्थश्लेषस्य तु स विषय:; यत्र शब्दपरिवर्तनेऽपि न श्लेषत्वखण्डना।

बालचित्तानुरञ्जनी—उद्भटीयमेवोदाहरणद्वयमेकत्र पद्येनोपादत्ते **स्वयं चेति**। अत्र पार्वतीवर्णने प्रकरणात् प्रात:संध्याश्लेष:। गौरीपक्षे पल्लवताम्राभ्यां भास्वद्भ्यां कराभ्यां विराजिता। संध्या तु पल्लववदाताम्रै र्भास्वत: सूर्यस्य करै: किरणैर्विराजिता। गौरीपक्षे सुखेन आप्तुं लब्धुं योग्यमस्वापं, एवंविधं यत्फलं मोक्षलक्षणम् तत्र लुब्धानामभिलाषवतां प्राणिनामीहितं प्रददातीति। अन्यत्रास्वापफले मोहालस्यादौ अलुब्धस्तस्य हितप्रदा। अत्र पूर्वार्द्धेऽभङ्गश्लेष:। उत्तरार्द्धे सभङ्गश्लेष:। अत्र द्वयोरपि शब्दैकसमाश्रयत्वेन शाब्दत्वमुपपन्नमित्याह **द्वावपीति**। नन्वत्रास्वापेत्यादौ स्वापेत्यत्र यद्येकपद्यं तदा थाथघञ्क्ताजबित्रकाणाम् [अष्टाध्यायी ६-२-१४४] इति सूत्रेणान्तोदात्तत्वं लघुप्रयत्नत्वं असु आप इति भिन्नपदत्वे तु "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या:" [अ॰ ६-२-२] पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं गुरुप्रयत्नत्वं च शब्दभेदात् शाब्दत्वमुत्तरार्द्धे। पूर्वार्द्धे तु तदभावादार्थमित्यत आह **न त्विति**। भास्वत्करशब्दयो: सूर्यकिरणादिपरिवर्त्तने श्लेषाभाव इत्यभिप्राय:। तर्हि अर्थश्लेषस्य को विषयस्तत्राह **अर्थेति**।

सारबोधिनी—**स्वयं चेति**। न केवलं तस्या: स्वामिन एष प्रभाव: स्वयमप्येवमित्यर्थ:। भास्वान् दीप्तिमान् सूर्यश्च। करौ हस्तौ रश्मिश्च, अस्वापोऽनिद्रा दुरापश्च। फलमलक्ष्मीविगम: स्वर्गमोक्षादिकञ्च। फललुब्धे जने हितप्रदा। फलं लुब्धस्य ईहितस्य वाञ्छितस्य च। **शब्दैकेति**। अन्वयव्यतिरेकाभ्यामिति शेष:। ननु भवन्मते तर्ह्यर्थश्लेषो निर्विषय: स्यादित्यत आह। **अर्थेति**।

यथा

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्।

अहो सुसदृशी वृत्तिस्तुलाकोटे: खलस्य च ॥३७८॥

न चायमुपमाप्रतिभोत्पत्तिहेतु: श्लेष:, अपि तु श्लेषप्रतिभोत्पत्तिहेतुरुपमा। तथाहि—

यथा 'कमलमिव मुखं मनोज्ञमेतत्कचतितराम्' इत्यादौ गुणसाम्ये क्रियासाम्ये, उभयसाम्ये वा, उपमा, तथा 'सकलकलं पुरमेतज्जातं सम्प्रति सुधांशुबिम्बमिव' इत्यादौ शब्दमात्रसाम्येऽपि सा युक्तैव। तथा ह्युक्तं रुद्रटेन

"स्फुटमर्थालङ्कारावेतावुपमासमुच्चयौ किन्तु ।
आश्रित्य शब्दमात्रं सामान्यमिहापि सम्भवतः ।।" इति ।

न च 'कमलमिव मुखम्' इत्यादिः साधारणधर्मप्रयोगशून्य उपमाविषय इति वक्तुं युक्तम् पूर्णोपमाया निर्विषयत्वापत्तेः ।

देव त्वमेव पातालमाशानां त्वं निबन्धनम् ।
त्वं चामरमरुद्भूमिरेको लोकत्रयात्मकः ।।३७६।।

बालचित्तानुरञ्जनी—उदाहरति **यथेति** । स्तोकेनोन्नतिमायाति स्तोकेन अधोगतिमायाति । अहो आश्चर्यम् । तुलायाः कोटिरग्रं तस्य खलस्य च समाना वृत्तिः । अत्र स्तोकादिस्थाने अल्पादिपदप्रयोगेऽपि न श्लेषस्योपमाप्रतिभोत्पत्तिहानिः । तथा च "स्वयं च पल्लवाताम्र" इत्यादौ शब्दालङ्कारत्वेऽपि श्लेषोपमालङ्कारयोः प्रतीतत्वात् साङ्कर्यमिति भावः । नन्वत्र श्लेषस्योपमाप्रतिभोत्पत्तिहेतुत्वात् श्लेष एव नोपमा, श्लेषस्य सर्वालङ्कारापवादकत्वादित्याशङ्क्याह **न चेति** । देव त्वमेव पातालमित्यादौ केवलश्लेषस्य सावकाशत्वस्य दर्शनात् श्लेषस्य सर्वालङ्कारापवादकत्वाभावेन साङ्कर्यमेवेति भावः । केवलं श्लेषः उपमाप्रतिभोत्पत्तिहेतुर्न किन्तु उपमापि श्लेषप्रतिभोत्पत्तिहेतुरित्यपिपदपदार्थः । ननु स्वयं च पल्लवाताम्रेत्यादौ शब्दालङ्कारसमर्थनादुपमायाश्चार्थालङ्कारत्वेन शब्दालङ्कारत्वाभावान्न साङ्कर्यमित्याशङ्क्य उपमायाः शब्दालङ्कारत्वं समर्थयितुमाह **तथाहीत्यादिना** । मनोज्ञमिति गुणसाम्यम् । कचतीति क्रियासाम्यम् । कच दीप्तौ । यद्यप्यत्रार्थालङ्कारत्वं तथाप्यत्र शब्दालङ्कारत्वमप्यङ्गीकर्तव्यमित्याह **तथेति** । कलकलेन कोलाहलेन सह वर्त्तत इति सकलकलं पुरं जातं संप्रति सितांशुबिम्बमिव । तदपि सकलाः कला यत्र । अत्र पुरस्य चन्द्रबिम्बस्य च शब्दसाम्यं न त्वर्थसाम्यमिति शब्दालङ्कारत्वमप्यङ्गीकर्तव्यमिति भावः । स्वकपोलकल्पितमित्याशङ्क्य संमतिमाह **तथेति** । प्राचुर्यादर्थालङ्कारावुपमासमुच्चयौ क्वचित्तु शब्दसाम्ये तौ शब्दालङ्कारावपि भवतः । पुरं सुधांशुबिंबमिति पाठे समुच्चयालङ्कारो द्रष्टव्यः । ननु मनोज्ञत्वादिसाधर्म्यरहितस्तु उपमाया विषयोऽस्त्वित्याशङ्क्याह **न चेति** । कमलमिव मुखमित्यादिसाधारणप्रयोगस्य श्लेषविषयत्वे दशमोल्लासे उपमाभेदकत्वेन प्रतिपादयिष्यमाणस्य पूर्णोपमालङ्कारस्य निर्विषयत्वं स्यादित्यर्थः । ननूक्त उपमाविषयत्वे श्लेषस्य निर्विषयत्वं स्यादित्याशङ्क्य श्लेषस्य विषयान्तरं दर्शयति **देवेति** । राज्ञः ईश्वरस्य च श्लेषः । हे देव त्वमेव अलं पाता रक्षिता पातालं रसातलं च आशानां मनोरथानां निबन्धनं कारणम् । आशानां दिशां निबन्धनं अन्तरिक्षम् । त्वमेव च अमराणां देवानां मरुतां च भूमिः स्वर्गश्च । एवं एकोऽपि लोकत्रयात्मकः । अत्र नोपमालङ्कारः । इवशब्दादिप्रयोगाभावात् । नापि तुल्ययोगितादीपके प्रस्तुतभिन्नत्वेनाप्रतीतेः । नापि रूपकमापाततः पातालाद्यप्रतीतेः अर्थान्तरप्रतीत्या तत्प्रतीतेर्बाधितत्वादिति विविक्तोऽयं विषयः श्लेषस्येति भावः । एवमुपमाश्लेषयोर्भिन्नविषयत्वेन अनयोरेकत्र समावेशे सङ्कर एव वक्ष्यमाणलक्षणोऽलङ्कारः । न पुनरेक एव उपमाश्लेषः । शब्दालङ्कारत्वं युक्तेति भावः ।

सारबोधिनी—स्तोकेनेति । उन्नतिमूर्ध्वप्रगरणमहङ्कारञ्च । अधोगतिम् अधःपातं पादपतनादि च । तुला घटः कोटिरग्रञ्च । अत्राल्पेनोद्रेकमायातीति पाठेऽपि स्यादेव श्लेष इत्यर्थं-श्लेषोऽत्र । उपमाप्रतिभेति पूर्ववद्बहुव्रीहिः । ननु श्लेषस्य नोपमासाधकत्वम् प्रभातसन्ध्येवेत्यादौ श्लेषोपस्थितयोरर्थयोः सजातीयधर्मत्वविरहादित्यपेक्षायामाह **तथा हीति । कमलमिवेति ।** मनोज्ञत्वं गुणः । कचति बध्नाति वशीकरोतीति क्रिया । उभययोगे चोभयसाम्यम् । **सकलेति ।** कलकलशब्दयुक्तं सकलाः सर्वाः कला यत्र तच्च । **शब्दमात्रेति ।** तेनोपमायाः शब्दालङ्कारत्वे सिद्धे सामानाधिकरण्येन श्लेषनिर्वाहृत्वं सिद्धमित्यभिप्रायः । सकलकलकलकलत्वयोरेकशब्दवाच्यत्वेन धर्मेण साजात्यमित्यर्थः ।

इहापीति । इह शब्दालङ्कारमध्ये । यद्युपमाप्रतिभोत्पत्तिहेतुत्वं श्लेषस्य तदोपमा निर्विषया स्यात् इत्यत्रालङ्कारसर्वस्वकारेण यत्समाहितं, साधारणधर्मशून्यं तद्विषयत्वस्य संभव इति तद्दूषयति **न चेति ।** नन्वत्रापि साधारणधर्मस्य मनोज्ञस्यार्थत्वमस्त्येवेत्यत आह **प्रयोगेति ।** मनोज्ञादिपदसत्त्व एवार्थभेदेन शब्दभेदात् शब्दश्लेषत्वम् । अन्यथा त्वर्थश्लेषत्वसंभवादित्यभिप्रायः । तर्हि पूर्णोपमाया निर्विषयत्वापत्तिरित्याह **पूर्णोपमाया इति ।** नन्वेवं तर्हि श्लेषस्यापि निर्विषयत्वप्रसङ्गः स्यादित्यत आह **देवेति ।** देव हरे नृपते च । पातालमधोभुवनम्, अलमत्यर्थं पाता रक्षिता च । आशानां दिशाम् निबन्धनं नियमस्थानं भूलोकः तत्रैव दिङ्नियमनात् । पक्षे, आशानां धनादिलिप्सानाम् निबन्धनं कारणम् । चकारो भिन्नक्रमः । अमरमरुद्भूमिश्चेत्यन्वयः । अमराणां देवानाम् मरुतां मरुद्गणानां या भूमिः स्थितिहेतुः । स्थिरवायोरुपर्य्येव देवानां स्थितेः । पक्षे चामराणां मरुत् वातः, तस्य भूमिर्विषयः । लोको भुवनं जनश्च । विष्णोर्भुवनमयत्वं वेदादिगम्यम् । राजा च कश्चन रक्षिता कश्चन दाता कोऽपि सुखी । अस्य तु नृपते- स्त्रैरूप्येण जनत्रयात्मकत्वमिति ।

इत्यादिः श्लेषस्य चोपमाद्यलंकारविविक्तोऽस्ति विषय इति । द्वयोर्योगे संकर एव । उपपत्तिपर्यालोचने तु, उपमाया एवायं युक्तो विषयः । अन्यथा विषयापहार एव पूर्णोपमायाः स्यात् ।

न च 'अबिन्दुसुन्दरी नित्यं गलल्लावण्यबिन्दुका' इत्यादौ विरोधप्रतिभोत्पत्तिहेतुः श्लेषः, अपि तु श्लेषप्रतिभोत्पत्तिहेतुर्विरोधः । न ह्यत्रार्थद्वयप्रतिपादकः शब्दश्लेषः, द्वितीयार्थस्य प्रतिभातमात्रस्य प्ररोहाभावात् । न च विरोधाभास इव विरोधः श्लेषाभासः श्लेषः । तदेवमादिषु वाक्येषु श्लेषप्रतिभोत्पत्तिहेतुरलंकारान्तरमेव ।

बालचित्तानुरञ्जनी—एवं च 'स्वयं च पल्लवाताम्रे'त्यादि सङ्करालङ्कारस्य विषय इति प्रौढि प्रतिपादितम्, विचार्यमाणे उपमाया एवायं विषय इति प्रतिपादयितुमाह **उपपत्तीति**। उपपत्तिर्युक्तिः। विपक्षे बाधक उक्त एवेत्याह **अन्यथेति**। न केवलमुपमालङ्कारेण श्लेषस्य बाधः, अपि तु विरोधालङ्कारेणापीति प्रतिपादयितुमाह **न चेति**। इयं स्त्री नित्यं गलन्तः लावण्यबिन्दवो यस्याः। अविन्दुसुन्दरी बिन्दुरहितसुन्दरीति विरोधः। परिहारस्तु अप्सु प्रतिविम्बित इन्दुः अबिन्दुस्तद्वत् सुन्दरी। चकचकायमानलावण्यत्वं साधर्म्यं बिन्दुराहित्यं च व्यङ्ग्यम्। अत्र श्लेपस्य प्रतिभोत्पत्तिहेतुत्वात् विरोधालङ्कारेण श्लेषो बाध्यत इत्यर्थः। अत्र हेतुमाह **नहीति**। अत्र पद्ये अविन्दुशब्दश्लेपः अभिधया अर्थद्वयं न प्रतिपादयति। तत्र हेतुः **द्वितीयेति**। द्वितीयार्थबिन्दुराहित्यरूपस्य प्रतिभातमात्रस्य व्यञ्जनव्यापारमात्रलभ्यस्य प्ररोहाभावेनाभासस्यापि श्लेषत्वमस्तु विरोधाभासस्य विरोधत्ववदित्याशङ्क्याह **न चेति**। आभासताव्यतिरेकेण विरोधालंकाराभावात् तदाभासस्य तथात्वेऽपि श्लेषाभासस्य श्लेषत्वम् उभयार्थारोहे सत्येव श्लेषत्वाङ्गीकारादिति भावः। एवमेव रूपकादिनापि श्लेषो बाध्यत इत्युपसंहारव्याजेनाह **तस्मादिति**।

सारबोधिनी—**उपमाद्यलङ्कारविविक्त इति**। अत्रेवादिशब्दाभावात् प्रकरणादिनियामकाभावात् द्वयोर्वाच्यत्वेन श्लेष एव नोपमेत्यर्थः। परस्परं विविक्त इति विषयत्वेन द्वयोरवस्थितिः सिद्धा। ततो यत्र क्वचिदेकत्रावस्थानं तत्र संकर एवेत्याह **द्वयोरिति**। ननु न युक्तमुक्तं यत् द्वयोर्योगे संकर इति, शब्दार्थालङ्कारविषयेऽङ्गाङ्गीभावालंकारस्यानङ्गीकारादिति चेन्न। अर्थानुसंधानविरहिण्यनुप्रासादावेव तथानङ्गीकारात्। निष्कृष्टमाह **उपपत्तिरिति**। श्लेषस्यैव साम्यनिर्वाहकता, न तु साम्यस्य श्लेषनिर्वाहकत्वम्। श्लेषबन्धतः प्रथमं साम्यस्यासंभवादुपमाया अङ्गित्वेन व्यपदेशो ज्यायान् 'प्राधान्येन व्यपदेशा भवन्ती'ति न्यायात् दूषणान्तरमाह **अन्यथेति**। न केवलमुपमायाः श्लेषबाधकता किंतु विरोधस्यापीत्याह **न चाबिन्दुसुन्दरीत्यादि**। गलल्लावण्यबिन्दुका बिन्दुरहिता वेति विरोधः। तत्परिहारस्तु अप्सु प्रतिबिम्बितो य इन्दुस्तद्वत्सुन्दरीत्यर्थः। **विरोधेति**। अत्रापि पूर्ववद् बहुव्रीहिः। **अपि त्विति**। विरोधनिर्वाह्यो न श्लेषः, किन्तु श्लेषसाध्यो विरोध इत्यर्थः। विनिगमकमाह **नहीति**। प्रतिपादकः अन्वयबोधक इत्यर्थः। यत्र ह्यर्थद्वयस्य समकक्षत्वं स श्लेषस्य विषय इति भावः। द्वितीयस्य बिन्दुरहितस्याभासमात्रस्योपस्थितमात्रस्य प्ररोहोऽन्वयबोधः नत्वर्थद्वयोपस्थितावेव श्लेषोऽस्त्वित्यत आह **न चेति**। विरोधाभासो विरोध इत्यन्वयः। श्लेषप्रतिभेति भिन्नपदम्। बहुव्रीहौ हि अलंकारान्तरविशेषणत्वे हेतुरिति पुल्लिगप्रयोगो न स्यात्। उत्पत्तिहेतुरर्थालङ्कारान्तरस्यालंकारान्तरमेव साधीयः, कुतः सा यस्मात् श्लेषप्रतिभा तदुत्पत्तिरिति योजनमिति टीकाकृतः।

तथा च

सद्वंशमुक्तामणिः ॥३८०॥

नाल्पः कविरिव स्वल्पश्लोको देव महान् भवान् ॥३८१॥

अनुरागवती संध्या दिवसस्तत्पुरःसरः।

अहो दैवगतिश्चित्रा तथापि न समागमः ॥३८२॥

आदाय चापमचलं कृत्वाहीनं गुणं विषमदृष्टिः ।
यश्चित्रमच्युतशरो लक्ष्यमभाङ्क्षीन्नमस्तस्मै ॥३८३॥

इत्यादावेकदेशविवर्तिरूपकश्लेषव्यतिरेकसमासोक्तिविरोधत्वमुचितम् । न तु श्लेषत्वम् ।

बालचित्तानुरञ्जनी—यदुक्तं तद्दर्शयितुमाह **तथा चेति**। स शुद्धः वंशः अन्वय एव वेणुः तस्य मुक्तामणिः। अत्र वंशशब्दे श्लेषः मुक्तामणिरूपकस्याङ्गम् , अतः एकदेशविवर्तिरूपकेण श्लेषो बाध्यत इत्यर्थः। व्यतिरेकेण बाधमाह **नाल्प इति**। हे देव! महान् भवान् स्वल्पः कविरिव अल्पश्लोको न भवति। श्लोकः पद्यं यशश्च। अत्र श्लेषो व्यतिरेकस्योपकारक इति व्यतिरेकेण श्लेषो बाध्यत इत्यर्थः। समासोक्त्या बाधमाह **अनुरागेति**। संध्या अनुरागवती। अनुरागो लौहित्यम् तद्वती संध्या दिवसश्च तत्पुरःसरः संध्याभिमुखः, तथापि संध्यादिवसयोः समागमो न। दैवगतिश्चित्रा। अहो आश्चर्यम्। चित्रा विचित्रा। अत्र पूर्वप्रवृत्तिनायिका[?] सा अनुरागवती स्नेहवती तदभिमुखश्च नायक इति प्रस्तुतार्थस्य गम्यमानत्वेन द्वयोरर्थयोर्वाच्यत्वाभावात् श्लेषः समासोक्त्यलङ्कारेण बाध्यत इत्यर्थः। विरोधाभासेन बाधमाह **आदायेति**। यः विषमदृष्टिस्त्रिलोचनः अचलं पर्वतं चापमादाय अहीनां भुजगानां इनं स्वामिनं गुणं कृत्वा अच्युतः श्रीकृष्ण एव शरो यस्य एवंविधः सन् लक्ष्यमभाङ्क्षीत् तस्मै नमः। अचलं निश्चलं, हीनं विकलं, विषमा लक्ष्यविमुखी दृष्टिर्यस्य, अच्युतः शरः, अगलितशरः इत्याद्यर्थान्तिरस्य प्रतिभानमात्रसिद्धत्वेन वाच्यत्वाभावात् श्लेषो विरोधाभासेन बाध्यत इत्यर्थः। निगमयति **इत्यादाविति**।

सारबोधिनी—एवमादिष्विति यदुक्तं तद्दर्शयति **तथा च सद्वंशेति**। वंशोऽन्वयो वेणुश्च। अत्र वंशशब्दस्य श्लेषो मणित्वारोपरूपकस्याङ्गम्। श्लिष्टपरंपरितरूपकस्य एकदेशविवर्तीति व्यवहारो भामहादीनाम्। सद्वंश एव सद्वंश इत्यारोपपूर्वको मणेरारोपः। **नाल्प इति**। श्लोकः पद्यं यशश्च। अत्रापि श्लेषो व्यतिरेकोपकारकः। **अनुरागेति**। अनुरागः सन्ध्यारुणिमा च अभिष्वंगश्च। अत्रापि समासोक्तेरुपकारकः श्लेषः! द्वितीयार्थे प्रकरणाद्यभावान्न श्लेष इति। अचलं पर्वतं निष्क्रियं च। अकारप्रश्लेषादहीनां इनं प्रभुं तदभावपक्षे हीनं निकृष्टं च। विषमा अयुग्मा। स्थिरीत्यलक्ष्येन समर्पिता च [?]। **अच्युतो** विष्णुः चापादनिर्गतश्च। लक्ष्यं शरव्यं शतसाहस्री च। अर्थान्तरस्य प्रतिभातमात्रस्य प्ररोहाभावात् विरोधाभास एव न श्लेषः। **न तु श्लेषत्वमिति**। श्लेषेण तेषां निर्वाहान्न तु तैः श्लेषो निर्वाह्यत इति।

शब्दश्लेष इति चोच्यते, अर्थालङ्कारमध्ये च लक्ष्यते, इति कोऽयं नयः। किं च वैचित्र्यमलङ्कार इति य एव कविप्रतिभासंरम्भगोचरस्तत्रैव विचित्रता, इति सैवालङ्कारभूमिः। अर्थमुखप्रेक्षित्वमेतेषां शब्दानामिति चेत् अनुप्रासादीनामपि तथैवेति तेऽप्यर्था-

लङ्कारा: किं नोच्यन्ते । रसादिव्यञ्जकस्वरूपवाच्यविशेषसव्यपक्षत्वेऽपि ह्यनुप्रासादीनामलङ्कारता शब्दगुणदोषाणामप्यर्थापेक्षयैव गुणदोषता । अर्थगुणदोषालङ्काराणां शब्दापेक्षयैव व्यवस्थितिरिति तेऽपि शब्दगतत्वेनोच्यन्ताम् । 'विधौ वक्रे मूर्ध्नि' इत्यादौ च वर्णादिश्लेषे, एकप्रयत्नोच्चार्यत्वेऽर्थश्लेषत्वं शब्दभेदेऽपि प्रसज्यतामित्येवमादि स्वयं विचार्यम् ।

बालचित्तानुरञ्जनी—'स्वयं च पल्लवे'त्यादौ शब्दश्लेषः अर्थालङ्कार एव [न] शब्दालङ्कार इति कस्यचिन्मतं दूषयति **शब्दश्लेष इति** । शब्दश्लेषस्यार्थालङ्कारकथनं व्याहतमित्यर्थः । ननु न व्याहतं, शब्दश्लेषस्यालङ्कारत्वासम्भवेनान्यत्रोक्तत्वात् इत्याशङ्क्याह **किं चेति** । वैचित्र्यरूपस्यालङ्कारस्य कविविवक्षया शब्दस्यार्थस्य वा संभवात् । 'स्वयं च पल्लवे'त्यादौ शब्द एव कविप्रतिभासंरंभगोचर इति शब्दालङ्कारतैव युक्तेति भावः । नन्वनुप्रासगोचराणां शब्दानामर्थमुखप्रेक्षित्वं कथमित्यत आह **रसेति** । रसादिव्यञ्जकत्वं स्वरूपं यस्य स चासौ वाच्यविशेषश्चेति विग्रहः । उक्तामुपपत्तिं अलंकार इव गुणदोषयोः सञ्चारयति **शब्देति** । शब्दस्य गुणदोषालङ्काराः शब्दापेक्षयैव प्रवृत्ताः इति शब्दगतत्वेनोच्यन्तामित्यतिप्रसङ्ग इति भावः । अतिप्रसङ्गान्तरमाह **विधाविति** । शब्दभेदेऽपि, विधिर्विधुरिति शब्दयोर्भेदे सत्यपीत्यर्थः ।

सारबोधिनी—ननु भवतु शब्दश्लेषः अलङ्कारत्वं पुनरर्थयोरेव, तदप्रतीतौ शब्दमात्राच्चमत्कारानुदयादित्यत आह **शब्दश्लेष इति** । **कोऽयमिति** । अर्थालङ्कारत्वे शब्दस्याकिंचित्करत्वम् । अर्थश्लेषस्यैव वक्तुमुचितत्वात् तस्य च निराकृतत्वादिति शब्दवैचित्र्येण शब्दश्लेषत्ववचनम् । अलङ्कारत्वं पुनरर्थस्यैवेत्यतो दोषान्तरमाह **किं चेति** । वैचित्र्यं श्लेषणरूपं कविप्रतिभासंरंभः स्फूर्तिः तद्गोचरस्तेनेत्यादितः । **स च** शब्दश्लेषरूपः अलङ्कारः । **शब्दगुणदोषेति** । शब्दस्योजःप्रभृतीनामर्थस्योजस्वित्वेन गुणता एवं श्रुतिकटुत्वादिर्दोषस्याप्यर्थसुकुमारत्वादेव दोषत्वमित्येषामर्थमुखप्रेक्षित्वम् । **अर्थगुणेति** । शब्दार्थयोः काव्यत्वादिति भावः । यद्वा अपुष्टार्थत्वादीनां शब्दादुपस्थितानामर्थानां मुख्यानुपकारित्वादिना दोषत्वम् न तु प्रमाणान्तरादुपस्थितानां माधुर्यादीनां गुणानामपि सुकुमारशब्दापेक्षित्वमित्यर्थगुणदोषाणामपि शब्दमुखनिरीक्षकत्वम् । **तेऽपीति** । अर्थश्च शब्दश्चेति समासः । अभिन्नप्रयत्नोच्चार्यत्वेऽर्थश्लेषत्वमित्यत्र दूषणान्तरमाह **विधौ वक्रे इत्यादि** । **शब्दभेद इति** । विधिविधुरूपत्वादिति शेषः । स्वयं विचार्यम्, न त्वस्मत्पक्षे द्वेषः कार्यः इति ।

तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ॥८५॥

संनिवेशविशेषेण यत्र न्यस्ता वर्णाः खड्गमुरजपद्माद्याकारमुल्लासयन्ति तच्चित्रं काव्यम् । कष्टं काव्यमेतदिति दिङ्मात्रं प्रदर्श्यते । उदाहरणम्

मारारिशक्ररामेभमुखैरासाररंहसा ।
सारारब्धस्तवा नित्यं तदार्तिहरणक्षमा ॥३८४॥

माता नतानां संघट्टः श्रियां बाधितसंभ्रमा ।
मान्याथ सीमा रामाणां शं मे दिश्यादुमादिमा ।।३८५।। (खड्गबन्धः)

सरला बहुलारम्भतरलालिबलारवा ।
वारलाबहुलामन्दकरलाबहुलामला ।।३८६।। (मुरजबन्धः)

भासते प्रतिभासार रसाभाताहताविभा ।
भावितात्मा शुभा वादे देवाभा बत ते सभा ।।३८७।। (पद्मबन्धः)

रसासार रसा सारसायताक्ष क्षतायसा ।
सातावात तवातासा रक्षतस्त्वस्त्वतक्षर ।।३८८।। (सर्वतोभद्रम्)

संभविनोऽप्यन्ये प्रभेदाः शक्तिमात्रप्रकाशका न तु काव्यरूपतां दधतीति न प्रदर्श्यन्ते ।

बालचित्तानुरञ्जनी—अथ चित्रालंकारं लक्षयति **तच्चित्रमिति** । यस्मिन् पद्ये वर्णानां संनिवेशविशेषेण खड्गाद्याकृतिहेतुता तत् चित्रमिति योजना । वर्णानां खड्गाद्याकृतिहेतुता न घटते इत्याशङ्क्योक्तं **संनिवेशविशेषेणेति** । संनिवेशितलिप्यक्षररचनाविशेषेणेत्यर्थः । पद्यं व्याकरोति **यत्रेति** । उल्लासयन्ति सम्पादयन्ति । अस्य कष्टकाव्यत्वादिमात्रमेवोदाह्रियत इत्याह **कष्टेति** । खड्गबन्धमुदाहरति **मारेति** । मारस्य कामस्यारिः हरः, शक्रः इन्द्रः, रामो बलभद्रः, इभमुखो विनायकः, एतैः आसारस्य रंहसा वेगेन । सारमुत्कृष्टं यथा स्यात्तथा आरब्धः स्तवः स्तोत्रं यस्याः सा । नित्यं तेषामार्तिः पीडा तन्निराकरणसमर्था । नतानां जनानां माता । संघट्टो लोकोपरोधः, तेन श्रीः संपत् येषां तेषां महिषाद्यसुराणां बाधितः संरंभो यया सा । मान्या, रामाणां ससीमा अवधिसहिता, आदिमा पुरातना, उमा गौरी मे शं सुखं दिश्यात् दद्यात् । मुरजबन्धमुदाहरति **सरलेति** । अत्र शरत् वर्ण्यते । सरला अवक्रा, बहुलारम्भतरलानां प्रचुरसंरंभचञ्चलानां, अलिबलानां भ्रमरसैन्यानां, आरवः आसमन्तात् भङ्कारः यस्यां सा, वारलाभिः हंसीभिः बहुला करं बलिं लाति आदत्त इति करलाः राजानः अमन्दा उद्युक्ता राजानो यस्यां सा । अबहुले शुक्लपक्षे, अमला निर्मला, एवंविधा शरत् संक्रान्तेत्यर्थः ।

पद्मबन्धमुदाहरति **भासत इति** । हे प्रतिभासार प्रज्ञया श्रेष्ठ ! राजन् तव रसेन प्रीतिरूपेण आभाता शोभिता अहता अप्रतिहता, अविभा अदीप्तिर्यस्याः सा, भावितः एकाग्रीकृतः आत्मा हृदयं यया सा, भावितः, वादे तत्त्वकथायां ... भासते । सर्वतोभद्रमुदाहरति **रसेति** । हे रसासार उत्कृष्टः यो रसः शृङ्गारः, तस्य आसारः वेगवद्वर्षः आयताक्ष विस्तीर्णनेत्र । सात सुखमास्स्व । अवात अचल अतक्षर अतक्षं बुद्धिं राति ददाति तस्य [सम्बुद्धौ] हे राजन् ! रक्षतस्तव तु सा प्रकृतरसा भूः क्षतायसा क्षतः आयः अर्था-

वगमो यैः शत्रुभिस्तान् स्यति नाशयति या सा। सातावात सातं नाशितं अवात अज्ञानं येन तादृश। न विद्यते तास उपक्षयो यस्याः सा। अस्तु भवतु। तक्ष् त्वक्ष् तनूकरणे। तम् उपक्षये। अरक्षतः अशोभनास्तु रक्षतस्तत्र तु एवंविधास्तु इति तु शब्दार्थः। रसे आसां आशिकां[?] ददाति रसा[?] अक्षिणी यस्य तस्य संबोधनम्। सारसायताक्ष, सातं नाशितं अवातमज्ञानं येन तस्य संबोधनम्। सातावात सातेन सुखेन आवातः प्राप्त इति वा। ननु अर्थभ्रमादयोऽन्येऽपि भेदाः सन्ति ते किमिति न प्रदर्श्यन्त इत्यत आह संभविन इति।

सारबोधिनी—तच्चित्रमिति। ननु वर्णानां कथं खड्गाद्याकारतेत्याह **सन्निवेशविशेषेणेति**। लिखिताक्षराणां तथाभावात्तेन सहाभेदोपचारेण खड्गादिबन्धानां वर्णाश्रयता। यत्रालंकारे। **कष्टेति**। कष्टेन निर्वाह्यं काव्यं कष्टकाव्यम्। **मारारीति**। उमा पार्वती, मे मम शं शुभं दिश्यादित्यन्वयः। मारारिः शिवः, शक्रः इन्द्रः, इभमुखो गणेशः, एतैः सारं यथा स्यात्तथा आरब्धस्तवा, आसारो धारासंपातः, तद्वद्वेगेनाविच्छेदप्रसारेण श्रियां संपदां संघट्टः सर्वासां सहवागात् संकीर्णस्थानम्। **आदिमेति**। आदिरित्यर्थः। अनेन पद्यद्वयेन खड्गप्रस्तारः। यथा पट्टिकांनर्माशब्दं विन्यस्य तिर्यगूर्ध्वं क्रमेण राशब्दादिक्षकारान्तं चतुर्दशवर्णकं विलिखेदित्येका। धारातः शिखायां सेति श्लिष्टं तन्मस्तिर्यगधः क्रमेण राशब्दादिक्षकारांतं चतुर्दशवर्णकं विलिख्यापरां धारां कुर्यादिति पट्टिका। माशब्दस्तु माशब्दे प्रविष्टः। एवमपरमपि माशब्दं तत्र प्रविष्टं कल्पयित्वा तस्य दक्षिणपार्श्वे ता इत्यारभ्य ट्ट इत्यन्तं वर्णसप्तकं विलिख्य वामपार्श्वे तिर्यग्विलोमेन श्रिकारादिभ्रकारान्तं वर्णसप्तकं लिखेत्। माशब्दस्तु पूर्ववदेवेत्येका नाडिका, ततोऽपरं तत्र माकारं कल्पयित्वा तदुपरि न्याइत्यादि मीकारान्तं गंडिकायां लिखेत्। ततस्तत्सरुमध्ये माशब्दं लिखित्वा ततस्तत्पार्श्वे नाकारादिशमित्यन्तं वर्णचतुष्टयं विलिख्य दक्षिणेनानुलोमेन वामतो विलोमेन मे दिश्यात् इति लिखेत्। मा शब्दस्तु पूर्ववदेवेति त्सरुः। दिशब्देन गंजनं माशब्दस्तु तिष्ठ इति[?] खड्गनिष्पत्तिः।

सरलेति। शरदत्र वर्ण्यते। सरला अवक्रा। यद्वा सरं लातीति सरला। बहुलारंभाणां तरलानां चालिवलानामारवो यत्र। वारलाभिः हंसीभिर्बहुला बहुलवारलेत्यर्थः। मंदा अनुद्धता अमन्दे करला जना यत्र, करो राजस्वं तं लान्तीति गृह्णन्ति, बहुले कृष्णपक्षेऽप्यमत्ता ताराभिः प्रकाशनात्। अत्र पादचतुष्टयेऽधः क्रमेण पंक्तिचतुष्टये कृते प्रथमद्वितीयतृतीयपादानां यथाक्रमं प्रथमद्वितीयतृतीयवर्णानां, चतुर्थपादस्य चतुर्थपंचमयोः तृतीयद्वितीयप्रथमपादानां षष्ठसप्तमाष्टमानां ग्रहणे प्रथमः पादः। द्वितीयात् प्रथमं, प्रथमात् द्वितीयतृतीयौ। द्वितीयतृतीयाभ्यां पंचमौ। चतुर्थात् षष्ठसप्तमौ। तृतीयादष्टमं गृहीत्वा तृतीयः पादः। चतुर्थद्वितीयतृतीयेभ्यः प्रथमद्वितीयतृतीयान्, प्रथमाच्चतुर्थपंचमौ, द्वितीयतृतीयचतुर्थेभ्यः षष्ठसप्तमाष्टमानि चाक्षराणि गृहीत्वा चतुर्थः पाद इति मुरजबन्धः (सिद्धः।)

भासत इति। हे प्रतिभासार ते तव सभा भासते रसेनाभाता रसिका इत्यर्थः। हता अविभा अदीप्तिर्यस्याः, भावितो वशीकृत आत्मा यया। वादे शुभा देवाभा वा देवतुल्या। बत हर्षे विस्मये वा। अत्र कर्णिकायां भाशब्द विलिख्य तदुपरिदिग्दले सते इति। दक्षिणपार्श्वतः तत्र सारेति। अधश्च तत्र

तावीति वामपार्श्वतोऽपि, तत्र वादे इति द्वौ द्वौ क्रमशो लिखेत् । प्रथमदिग्दलदक्षिणकोण-दलादारभ्य चतुर्षु कोणेषु प्रतीति (?) तमाशु इति वत इति वर्णान् प्रदक्षिणक्रमेण लिखेत् । दिग्दलेष्वनुलोमप्रतिलोमाभ्यां कर्णिकाक्षराद्विनिर्गमः पुनस्तस्मिन् क्रमेण प्रवेशश्च । कोणदलेषु कचित्प्रवेशः क्वचिन्निर्गमो वा । प्रथमादन्यो भाशब्दस्तु भाशब्द एव प्रविष्टः । सप्तदशवर्णै-स्त्रिंशतो निर्वाह इति वैचित्र्यम् । स एव पद्मबन्धः । रसासारेति संबोधनम् । हे पृथ्वीश्रेष्ठ रक्षतस्तव रसा अस्तु । सारसः पक्षिभेदः । जलजमिति वा । तद्वद्दीर्घनेत्रक्षतः अयं शुभावहो विधिः यस्य तं स्यतीति रसाविशेषणम् । यद्वा धनागमः आयः; यद्वा क्षतायसा क्षतलौहयुद्धाभावात् । अतासा न विद्यते तास उपक्षयो यस्याः । सातं नष्टं अवातं अज्ञानं यस्य । वागतील्यादिवात्वनुसारात् सर्वे-गत्यर्था ज्ञानार्था इति । तनूकरणं तक्षणं राति प्राप्नोति । तदितरस्तु पुनरर्थे । अत्र प्रतिपादं प्रतिलोमे स एव पाठः । तथाच क्रमेण पंक्तिचतुष्टये कृते उपर्यधो वा क्रमेण पठितैश्चतुर्णां पादानां चतुर्भिः प्रथमैर्वर्ण-रष्टमैश्च प्रथमः पादः, द्वितीयैः सप्तमैश्च द्वितीयः, तथा तृतीयैः षष्ठश्च तृतीयः, चतुर्थैः पञ्चमैश्च चतुर्थ इति सर्वतोभद्रसिद्धिः ।

संभविनोऽन्येऽपीति । तदुक्तमग्निपुराणे—

"बाणबाणासनव्योमखड्गमुद्गरशक्तयः ।
मृदङ्गसप्तशृङ्गाटदम्भोलिमुशलांकुशाः ॥" इत्यादि ।

पुनरुक्तवदाभासो विभिन्नाकारशब्दगा ।

एकार्थतेव

भिन्नरूपसार्थकानर्थकशब्दनिष्ठमेकार्थत्वेन मुखे भासनं पुनरुक्तवदाभासः । स च

शब्दस्य

सभङ्गाभंङ्गरूपकेवलशब्दनिष्ठः । उदाहरणम्

अरिवधदेहशरीरः सहसा रथिसूततुरगपादातः ।
भाति सदानत्यागः स्थिरतायामवनितलतिलकः ॥ ३८९ ॥

चकासत्यङ्गनारामाः कौतुकानन्दहेतवः ।
तस्य राज्ञः सुमनसो विबुधाः पार्श्ववर्तिनः ॥ ३९० ॥

तथा शब्दार्थयोरयम् ॥ ८६ ॥

उदाहरणम

तनुवपुरजघन्योऽसौ करिकुञ्जररुधिररक्तखरनखरः ।
तेजोधाम महःपृथुमनसामिन्द्रो हरिर्जिष्णुः ॥ ३९१ ॥

अत्रैकस्मिन् पदे परिवर्तिते नालङ्कार इति शब्दाश्रयः, अपरस्मिंस्तु परिवर्तितेऽपि स न हीयते, इत्यर्थनिष्ठ इत्युभयालङ्कारोऽयम् ।

इति काव्यप्रकाशे शब्दालङ्कारनिर्णयो नाम नवम उल्लासः ।

बालचित्तानुरञ्जनी––एवं विभजते स चेति । स पुनरुक्तवदाभासः सभङ्गशब्दनिष्ठः अभङ्गशब्दनिष्ठश्चेति द्विविधः । तत्राद्यमुदाहरति **अरीति** । अरीणां शत्रूणां वधं ददाति इति तादृशी ईहा इष्टं येषां ते तादृशाः ये शरिणः शरवन्तो धानुष्काः तान् ईरयति प्रेरयति । सहसा शीघ्रं रथिभिः रथारूढैः सूतं प्रेरितं तुरङ्गपादातं येन । सतां महापुरुषाणां आनत्या प्रणामेन उपलक्षितः । स्थिरतायां अगः पर्वतः अवनितलतिलकः राजा भाति । अत्र देहशरीरयोः सारथिसूतयोः दानत्यागयोः शब्दयोः निरर्थकयोः पुनरुक्तवदाभासः । द्वितीयमुदाहरति **चकासतीति** । शोभनं मनो यस्य राज्ञः पार्श्ववर्तिनः अङ्गनारामाः अङ्गणेषु अजिरेषु आरामः क्रीडावनानि येषाम् । कौतुकं उत्सवविशेषः तद्रूपानन्ददायिनः विबुधाः विद्वांसः चकासति शोभन्ते । अत्राङ्गनारामयोः निरर्थकयोः कौतुकानन्दयोः निरर्थकसार्थकश्चन्द्रमुखे[?] पौनरुक्त्यम् इदानीं प्रसङ्गादुभयालङ्कारत्वमप्याह **तथा चेति** । यथा केवलस्य शब्दस्यालङ्काराः तथा शब्दार्थयोरुभयोरपीत्यर्थः । तदुदाहरति **तन्विति** । तनु कृशं वपुर्यस्य । अजघन्यः श्रेष्ठः । करिकुञ्जराः गजश्रेष्ठाः तेषां रुधिरं तेन रक्ताः खरा नखरा यस्य सः । तेजसो धाम स्थानभूतः । महसा पृथुमनसां सत्त्वोद्रिक्तानां इन्द्रः श्रेष्ठः हरिः सिंहः जिष्णुः जयशीलः । अत्र तनुवपुषोः करिकुञ्जरयोः तेजोधाममहसां इन्द्रहरिजिष्णूनां च पौनरुक्त्यम् । अत्र शब्दालङ्कारत्वं कथमित्याशङ्क्याह **अत्रेति** । **एकस्मिन् पद इति** । तनुकुञ्जररुधिरादावित्यर्थः । **अपरस्मिन् इति** । वपुःकरितेजःप्रभृतावित्यर्थः ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीसरस्वतीतीर्थविरचितायां शब्दालङ्कारनिर्णयो नाम **नवम उल्लासः** ।

सारबोधिनी–पुनरुक्तवदाभासं लक्षयति **पुनरुक्तवदित्यादि** । अर्थान्तरसंक्रमितवाच्ये यस्य मित्राणि मित्राणीत्यादावतिप्रसंगात् तद्वारणाय **विभिन्नेति** । विभिन्न आकारो विजातीयानुपूर्वीक इत्यर्थः । तत्र च नानुपूर्वीभेदः । **सार्थकानर्थकेति** । वक्ष्यमाणलक्ष्यसमन्वयसूचनम् । मुखे आपातत इत्यर्थः । पुनरुक्तस्येव पुनरुक्तवत् । आभासो ज्ञानम् । विभजते **शब्दस्येति, तथा शब्दार्थयोरिति** च । केवलेनेत्यनेनार्थव्यावर्तनम् । **अरिवधेति** । अवनितलतिलकः स्थिरतायां सदा भाति । अरिवधदा ईहा चेष्टा येषां तादृशा ये शरिणस्तान् ईरयति । अपसारयेति नृपविशेषणम् [?] । सहसा बलेन विशिष्टः सदा सहसा झटिति, रथिभिः सुष्ठु ऊताः संबद्धा तुरंगा अत्र पदभंगेन सिद्धानां देहादिशब्दानामापाततः पौनरुक्त्यभानम् ।

अभङ्गपदनिष्ठमुदाहरति **चकासतीति** । अङ्गनासु रमन्त्यङ्गनारामाः विरहशून्याः, कौतुकेन विवाहसूत्रेण य आनन्दः । विबुधाः पण्डिताः, सुमनसः सुष्ठुविषयेषु मनांसि येषाम् । अत्राङ्गनादिपदान्यखण्डान्येव । **तनुवपुरिति** । तनुः शरीरं कृशश्च अजघन्यः अप्रमेयबलः, करिणो गजाः, प्रशस्तशुण्डाश्च । रक्तं रुधिरं,

रक्तो वर्णविशेषः विशिष्टश्च। तेजो बलविशेषः परोत्कर्षाक्षमता च। धाम तेजः, स्थानं च। हरिरिन्द्रः सिंहश्च। जिष्णुरिन्द्रो जयशीलश्च । तनुवपुः कृशशरीरः । करिणां प्रशस्तशुंडानां कुंजराणां रुधिरैः शोणितैः रक्ताः शोणिताः शरास्तीक्ष्णा नखा यस्य । तेजसः परोत्कर्षाक्षमतया धाम स्थानं, महो बलविशेषस्तेन पृथु प्रशस्तं मनो येषां तेषामिन्द्रः श्रेष्ठः । एकस्मिन्निति। तनुकुञ्जररक्तेत्यादिरूपे । अन्यस्मिन् वपुः करिरुधिरादिरूपे ।

इति काव्यप्रकाशटीकायां सारबोधिन्यां नवम उल्लासः ।

अथ दशम उल्लासः

अर्थालङ्कारानाह

साधर्म्यमुपमा भेदे

उपमानोपमेययोरेव न तु कार्यकारणादिकयोः साधर्म्यं भवतीति तयोरेव समानेन धर्मेण सम्बन्ध उपमा । भेदग्रहणमनन्वयव्यवच्छेदाय ।

पूर्णा लुप्ता च

उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानामुपादाने पूर्णा, एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता ।

साग्रिमा ।

श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा ।।८७।।

अग्रिमा पूर्णा ।

बालचित्तानुरञ्जनी—अथ शाब्दानलङ्कारानुक्त्वा आर्थान् वक्तुमुपक्रमत इति उल्लासयोः सङ्गतिमाह **अर्थेति** । तत्रापि अनेकालङ्कारबीजभूतत्वात् पूर्वमुपमालक्षणमिति भावः । ननु किंसंबन्धि किमेतत् साधर्म्यमुपमेत्यर्थः । साधर्म्यस्यानेकानेकविषयत्वात् भेदग्रहणमतिरिच्यत इत्याशङ्क्याह **भेद इति** । विभागमाह **पूर्णेति** । उपमानमुपमेयं साधारणो धर्मः उपमाप्रतिपादका इवादयश्च, तेषां चतुर्णां कण्ठोक्तौ पूर्णोपमा । तेषामेकद्वयादेः शास्त्रीये स्वारसिके वा लोपे लुप्तोपमेत्यर्थः । पूर्णायाः पुनरपि द्वैविध्यमाह **साग्रिमेति** ।

सारबोधिनी—अवसरतोऽर्थालङ्कारे लक्षयितव्ये चारुत्वोत्कर्षात् प्रथममुपमां लक्षयति **साधर्म्यमिति** । समानो धर्मो ययोरर्थादुपमानोपमेययोस्तौ सधर्माणौ तयोर्भावः साधर्म्यम् । समानधर्मनिरूपितः संबन्धः स एवोपमा । समासोत्तरभाववाचितद्धितप्रत्ययस्य सम्बन्धाभिधायकत्वात् । तद्वक्ष्यति, **समानेन धर्मेण सम्बन्ध इति** । सामर्थ्यलब्धसंबन्धिद्वयमाह **उपमानोपमेययोरिति** । समानेन धर्मेणेति समासे बहुभिर्धर्मैरिति बोध्यम् । अन्यथा यत्किञ्चिद्धर्मसाजात्यस्य सर्वत्र सत्त्वादतिप्रसङ्गः स्यात् । अत्र चन्द्र इव मुखमित्यत्र यज्जातीयधर्माश्रयश्चन्द्रः तज्जातीयधर्माश्रयो मुखमित्युभयविशेष्यकैव प्रतीतिर्न तु चन्द्रनिष्ठधर्मसजातीयधर्माश्रयो मुखमिति प्रकृतिविशेष्यक एव प्रत्ययः । तथा सति 'हंसीव धवलश्चन्द्र' इत्यादौ प्रतीतिमान्थर्यविरहेण दोषो न स्यात् । हंसीनिष्ठधवलत्वसजातीयधवलत्वव त्ततया चन्द्रप्रतीता-

वनुभवसिद्धं प्रतीतिमान्थर्यं न स्यात्। उभयविशेष्यकत्वे तु पुंस्त्वान्वितधवलपदार्थस्य हंस्यामनन्वयेन चन्द्रमात्रान्वये विवक्षितप्रतीत्यनुपपत्तेर्दोषः सम्भवतीति ध्येयम्। चन्द्र इव मुखमाह्लादकमित्यत्र तु आह्लादकपदस्योभयगामित्वेऽपि नपुंसकस्य मुखपदस्य लिङ्गग्रहणम् 'नपुंसकमनपुंसकेने'त्याद्यनुशासनात्। ननु उपमानोपमेययोरेव साधर्म्यसम्भवे भेदग्रहणमनर्थकमित्यत आह भेदग्रहणमिति। 'नितम्बिनी सैव नितम्बिनीवे'त्यादावनन्वये पारमार्थिकभेदविरहात् तद्व्यवच्छेदः। न च तत्राप्युपमैवेति वाच्यम्, तत्र साधर्म्यस्य चमत्कारित्वाभावात्, उपमानान्तरव्यवच्छेदस्यैव चमत्कारित्वात्। न च तत्र धर्मस्यैकत्वे सजातीयताविरहेण नोपमाप्रसङ्ग इति वाच्यम्। धर्मिभेदस्येव धर्मभेदस्यापि काल्पनिकत्वेन सजातीयतानपायात्। पाणिरिवास्याः पाणिरित्यत्र दक्षिणवामतात्पर्यकत्वे तात्त्विकभेदादुपमैव। एवं 'रामरावणयोर्युद्धं रामरावणयोरिवे'त्यत्रापि युगभेदविवक्षायामुपमा, अन्यथा अनन्वय एव। अत्र केचित्-रूपके साधर्म्यस्य व्यङ्ग्यत्वं व्यतिरेके वैधर्म्यस्याप्युक्तिरिति तयोर्व्यवच्छेदाय वाच्यमवैधर्म्यं चेति साधर्म्यस्य विशेषणद्वयं देयमित्याहुः। विभजते पूर्णेत्यादि। लोपेऽनुपादाने सेति वाक्यमेकपद्यानापन्नमाकाङ्क्षादिमदनेकं पदम्।

यथेववादिशब्दा यत्परास्तस्यैवोपमानताप्रतीतिरिति यद्यप्युपमानविशेषणान्येते तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत् संबन्धं प्रतिपादयन्तीति तत्सद्भावे श्रौती उपमा। तथैव "तत्र तस्येव" इत्यनेनेवार्थे विहितस्य वतेरुपादाने।

'तेन तुल्यं मुखम्' इत्यादावुपमेये एव, 'तत्तुल्यमस्य' इत्यादौ चोपमाने एव, 'इदं च तच्च तुल्यम्' इत्युभयत्रापि तुल्यादिशब्दानां विश्रान्तिरिति साम्यपर्यालोचनया तुल्यताप्रतीतिरिति साधर्म्यस्यार्थत्वात् तुल्यादिशब्दोपादाने आर्थी, तद्वत् 'तेन तुल्यं क्रिया चेद्वतिः' इत्यनेन विहितस्य वतेः स्थितौ।

बालचित्तानुरञ्जनी—ननु यथेववादिशब्दाना तुल्यादिशब्दानां चोपमानविशेषणत्वस्य अविशिष्टत्वादियं श्रौती इयमार्थीति व्यवस्था कथमित्याशङ्क्याह **यथेति**। यथेववादिशब्दानां उभयैकसंबन्धप्रत्यायकत्वे दृष्टान्तमाह **षष्ठीवदिति**। यथा राज्ञः पुरुष इति राज्ञि तिष्ठन्ती षष्ठी पुरुषमप्याक्षिपन्ती तदुभयनिष्ठं संबन्धं समर्पयति, एवं यथेवादयोऽपि। यथा च तत्र शब्दशक्तेर्महिमा न पर्यनुयोगमर्हति, एवमत्रापीत्यर्थः। श्रौतीमभिधाय तद्धितेऽपि तां योजयति **यथेवेति**। यथा इवप्रयोगे वाक्ये श्रौती उपमा तथैव वाक्यार्थे 'तत्र तस्येवे'त्यनेन सूत्रेण विहितस्य वतिप्रत्ययस्य तद्धितस्योपादानेन विशेषात् श्रौती उपमेत्यर्थः। तुल्यादिशब्दोपादाने आर्थीं प्रतिपादयितुमाह **तेनेति**। तुल्यादिशब्दानां 'तेन तुल्य'मित्यादौ उपमेय एव विश्रान्तिः। तत्तुल्यमस्येत्यादौ उपमान एव। इदं च तच्च तुल्यमित्युभयत्रापि विश्रान्तिरिति संबन्धः। यथेवादीनामेकत्र श्रूयमाणत्वेऽपि न तत्रैव विश्रान्तिः, किन्तु प्रतियोगिगतसम्बन्धाभिधाने, तुल्यादीनां तु न तथा। किन्तु तुल्यत्वनिर्वाहाय साम्यमपेक्षणीयमिति आर्थी उपमेत्यर्थः। एवं तद्धितेऽप्यार्थीमाह **तद्वदिति**। स्थितावित्यत्र आर्थीत्यनुषज्यते।

सारबोधिनी–नन्विवादिशब्दा उपमानविशेषणानि तद्गतमेवातिशयं वक्तुमर्हन्ति विशेपणान्तरवत् न च पुनरुपमेयगतं साधर्म्यमसम्बन्धादिति शङ्कते **यथेववादीति**। समाधत्ते **तथापीति**। शब्दशक्तिस्वाभाव्यादित्यर्थः। तत्र दृष्टान्तमाह **षष्ठीवदिति**। यथा राज्ञः पुरुष इत्यत्र राजनि श्रूयमाणा षष्ठी तमेव विशेषयन्ती स्वस्वामिभावादिसम्बन्धं पुरुषगतमपि प्रतिपादयति उभयवृत्तिसम्बन्धस्यैकत्वात् तथेदमपि लुप्तविभक्तिकमव्ययपदमेकत्र विश्रान्तमप्युभयाश्रयं सम्बन्धमभिव्यनक्तीत्यर्थः। सम्बन्धः साधर्म्यम्। श्रौतीत्वं व्युत्पादयति **श्रुत्यैवेति**। न तु कथं सदृशमित्याकाङ्क्षतधर्मापेक्षयापि। तत्सद्भावे यथेववादिसद्भावे।

ननु इवादीनां प्रयोगे श्रौती, तुल्यादीनां चार्थीति कथं नियमः, द्वयोः सादृश्यवाचकत्वेन तुल्यत्वात् इति। उच्यते–इवादिप्रयोगे प्रतियोग्यनुयोगिसमानधर्मबोधकानां समानविभक्तिकत्वेन परस्परशब्दान्वये नानुपपत्तिः। यथा—'कमलमिव मुखमाह्लादकमि'त्यादौ कमले मुखे च द्रागेवाह्लादकत्वान्वयात्। चन्द्रेण तुल्यं मुखमाह्लादकमित्यादौ तु चन्द्रेण सह नाह्लादकत्वान्वयः शाब्दः, विभक्तिभेदात्। किन्तु कथं तुल्यमित्याकाङ्क्षायामार्थ एवेति श्रौत्यार्थीविवेकः। कमलं मुखं च तुल्यं सुरभि इत्यत्र विभक्तिसाम्येऽपि उपमानोपमेयभावो न शब्दश्रवणादवगम्यते किन्तु प्रकृतत्वाप्रकृतत्वपर्यालोचनयैवेति नेयं श्रौतीति भावः। उपमानोपमेययोर्विशेष्यकत्वेऽपि प्रतियोग्यनुयोगिभावः उपमानोपमेययोर्गुणप्रधानभावात्, प्रकृतत्वेनोपमेयस्य प्राधान्यादिति। इवादीनां सादृश्याभिधाने चन्द्रादौ मुखादौ च कथं भेदेन तद्विशिष्टचान्वयः। भेदार्थकविभक्त्या अर्थान्तर्भावं विना नार्थयोस्तदव्युत्पत्तेः। मैवम्। अव्ययादन्यत्रैव तन्नियमात्। अन्यथा घटः पटो नेत्यत्र घटान्योन्याभावयोर्भेदान्वयो न स्यात्। तद्धितमात्रेण श्रौतीत्वमित्याह **तत्रेत्यादि**। तत्रेति सप्तम्यन्तात्, तस्येति षष्ठ्यन्तादिवार्थे वतीत्यर्थः। सारूप्यं आर्थीं व्युत्पादयति **तेन तुल्यमिति**। तुल्यादिशब्दानां विश्रान्तिरिति सर्वत्रानुषञ्जनीयम्। आदिशब्दात् समसदृशादिपरिग्रहः। विश्रान्तिः सामानाधिकरण्येनान्वयबोधजनकत्वेऽन्यनिराकाङ्क्षता। साम्यमुपमानोपमेयभावपर्यालोचनया प्रकृताप्रकृतत्वप्रतिसन्धानम्। तुल्यता समानधर्मसम्बन्धे प्रतियोग्यनुयोगिभावः। अत्र साधर्म्यस्यार्थीत्वं व्याख्यातमेव।

"इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वञ्च" इति नित्यसमासे, इवशब्दयोगे समासगा। क्रमेणोदाहरणम्

स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा ॥३९२॥

चकितहरिणलोललोचनायाः क्रुधि तरुणारुणतारहारिकान्ति।
सरसिजमिदमाननं च तस्याः सममिति चेतसि सम्मदं विधत्ते ॥३९३॥

अत्यायतैर्नियमकारिभिरुद्धतानां दिव्यैः प्रभाभिरनपायमयैरुपायैः।
शौरिर्भुजैरिव चतुर्भिरदः सदा यो लक्ष्मीविलासभवनैर्भुवनं बभार ॥ ९४॥

बालचित्तानुरञ्जनी—समासे श्रौतीमाह **इवेनेति** । अत्र आर्थी प्रसिद्धा, तथा च वाक्यगा समासगा तद्धितगा चेति श्रौती त्रिधा । एवमार्थ्यपि त्रिविधेति पूर्णा षड्विधा भवति । तत्र वाक्ये श्रौतीमुदाहरति **स्वप्नेऽपीति** । स्वाधीनपतिका प्रभावप्रभवं कान्तं यथा, समरेषु विजयश्रीः हे राजन् स्वप्नेऽपि त्वां न मुञ्चति । अत्र यथापदप्रयोगात् वाक्ये श्रौती पूर्णोपमा । वाक्य एव आर्थीमुदाहरति **चकितेति** । चकितहरिणलोचनायाः तस्या नायिकायाः क्रुधि कोपे सति तरुणारुणवत् तारा निर्मला हारिणी कान्तिर्यस्य तत् इदमाननं सरोजं सममिति नायकः सम्मदं विधत्ते । अत्र समशब्दप्रयोगात् वाक्ये एव आर्थी उपमा । समासे श्रौतीमुदाहरति **अत्यायतैरिति** । शौरिः कृष्णः, चतुर्भिर्भुजैरिव यो राजा अत्यायतैरुद्धतानां नियमकारिभिर्दिव्यैः प्रभाभिः, अनपायमयैः लक्ष्मी-विलासस्थानैः चतुर्भिरुपायैः सामादिभिः, सदा भुवनं बभार । अत्र भुजैरिवेति समासे श्रौती उपमा । विभक्त्यलोप इत्यनेन विशेषणविशेष्यभावादिसंबन्धक्षयत्वस्य ज्ञापितत्वात् ।

सारबोधिनी—समासगामाह **इवेनेत्यादि** । अनेन सूत्रेण समासव्युत्पादनम् । अन्यथा अग्निरिव राज इति समासान्तविधिर्न स्यात् । **स्वप्नेऽपीत्यादि** । उत्पत्तिहेतुः प्रभवः । न मुञ्चतीत्यपरित्यागः साधारणो धर्मः । इयं वाक्यगा श्रौती । **चकितेति** । **क्रुधीति** । क्रुधि सत्यामित्यर्थः । इयं समशब्दप्रयोगादार्थी वाक्यगा । **अत्यायतैरिति** । उपायैः सामादिभिः । अद इति भुवनविशेषणम् । भुजैरिवेति समासगा श्रौती ।

अवितथमनोरथपथप्रथनेषु प्रगुणगरिमगीतश्रीः ।

सुरतरुसदृशः स भवानभिलषणीयः क्षितीश्वर न कस्य ।।३९५।।

गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत् ।

दुरालोकः स समरे निदाघाम्बररत्नवत् ।।३९६।।

बालचित्तानुरञ्जनी—समासे आर्थीमुदाहरति **अवितथेति** । हे क्षितीश्वर ! सफलमनोरथमार्ग-प्रसिद्धिषु गुणगरिम्णा गीता श्रीर्यस्य कल्पवृक्षसदृशः स प्रसिद्धो भवान् कस्य नाभिलषणीयः ? अपितु सर्वस्य । अत्र सुरतरुसदृश इति समासे आर्थी उपमा । तद्धिते श्रौतीमार्थीं चोदाहरति **गांभीर्येति** । तस्य राज्ञो गाम्भीर्यगरिमा गङ्गाभुजङ्गवत् समुद्रवत् । स सङ्ग्रामे निदाघाम्बररत्नवत् ग्रीष्मकालतरणिवत् दुरालोकः । अत्र गङ्गाभुजङ्गवदिति श्रौती तद्धितगा । अम्बररत्नवदित्यार्थी तद्धितगा ।

सारबोधिनी—**अवितथेति** । अव्यर्थमनोरथनिष्पादनेषु प्रकृष्टगुणगरिम्णा गीता श्रीर्यस्य । सुर-तरुसदृश इति समासगा आर्थी । **गाम्भीर्येति** । गङ्गाभुजङ्गस्येवेतीवार्थे वतिः । भुजङ्गः कामुकः । इयं तद्धितगा श्रौती ।

स्वाधीनपतिका कान्तं भजमाना यथा लोकोत्तरचमत्कारभूः, तथा जयश्रीस्त्वदासेवनेनेत्यादिना प्रतीयमानेन विना यद्यपि नोक्तेर्वैचित्र्यम्, वैचित्र्यं चालंकारः, तथापि न ध्वनिगुणीभूतव्यङ्ग्यव्यवहारः। न खलु व्यङ्ग्यसंस्पर्शपरामर्शादत्र चारुताप्रतीतिः, अपि तु वाच्यवैचित्र्यप्रतिभासादेव। रसादिस्तु व्यङ्ग्योऽर्थोऽलङ्कारान्तरं च सर्वत्राव्यभिचारीत्यगणयित्वैव तदलङ्कारा उदाहृताः। तद्रहितत्वेन तु, उदाह्रियमाणा विरसतामावहन्तीति पूर्वापरविरुद्धाभिधानमिति न चोदनीयम्।

बालचित्तानुरञ्जनी– नन्वेतत् पूर्वापरग्रन्थविरुद्धं यदुत पञ्चमादौ व्यङ्ग्यस्योदाहृतमेव। इदानीमलङ्कारस्योदाह्रियते, येन व्यञ्जनाभिधयोरलङ्कार्यालङ्कारयोर्व्यापार्यव्यापारयोर्ध्वनिवाच्यालङ्कारयोश्च स्पष्टो विरोधः। चमत्कारश्चात्र ध्वनिना गुणीभूतव्यङ्ग्येन वा प्रयुज्यते, तदधीनत्वादुक्तिवैचित्र्यस्य तल्लक्षणत्वाच्चालङ्काराणामित्याशङ्क्याह **स्वाधीनेति**। **वैचित्र्यं चेति**। उक्तिवैचित्र्यमलङ्कार इति निश्चयात्। तदुक्तम्—

रसस्याङ्गं विभावाद्याः साक्षान्निष्पादकत्वतः।
तद्वैचित्र्योक्तिवपुषोऽलङ्कारास्तु तदाश्रयाः॥ इति।

ध्वनीति शृङ्गारादिरसापेक्षया, **गुणीभूतव्यङ्ग्येति** अवान्तरवस्तुध्वन्यपेक्षया। **न खल्विति**। निरलङ्कारे व्यङ्ग्ये तस्य व्यङ्ग्यत्वादेव चारुता। निर्व्यङ्ग्ये चालङ्कारे चारुत्वं नास्ति।

रसध्वनिर्न यत्रास्ति तत्र वाच्यं विभूषणम्।
मृतायामेणशावाक्ष्यां किं फलं हारसम्पदा॥

इत्युक्तत्वात्। अत्र तु व्यङ्ग्यालङ्कारयुगलमेलकालङ्कारे व्यङ्ग्योल्लेखात् न चारुत्वप्रतीक्षा। यावदुक्तिद्वारा वाच्यवैचित्र्यरूपस्यालङ्कारस्य स्फुरणात्। नन्वत्र रसादिलक्षणो व्यङ्ग्यः किमन्यत्कल्पनयेत्याह **रसेति**। सर्वत्राव्यभिचारि सर्वकाव्यार्थानुवृत्तं अलङ्कारान्तरं चेत्यनेन दृष्टान्त उत्थाप्यते। यथा बह्वलङ्कारे काव्ये कस्यचिदलङ्कारस्योद्रेकः, एवं व्यङ्ग्यालङ्कारोभयशालिनि अलङ्कारस्योद्रेक इत्यर्थः। तस्मान्न केवलमेतद् व्यङ्ग्ये यावदलङ्कारे समानजातीयेऽपि क्वचित् कस्यचिदुद्रिक्ततया विवक्षायामन्यस्मिन्नन्यस्यानौल्बण्यात् तर्हि तादृग् व्यङ्ग्ये प्रयुक्तोऽप्यस्तु चमत्कार इत्यत्राह **अगणयित्वेति**। अगणनमुपेक्षा, न त्वनवधानम्। व्यङ्ग्यस्याप्यत्र सद्भावात्। उदाहृता इति सामान्ये तु उल्लासार्थः सिद्धप्राय इत्याशयेनोक्तम्। ननु व्यङ्ग्यरहिता उदाह्रियन्तामलङ्काराः, येन विषयविवेक इत्यत आह **तद्रहितत्वेनेति**। विषयविभागमात्रलोभात् उदाह्रियमाणं न चमत्काराय। यथा गौरिव गवय इत्युपमा, खलेचालीयूप[?] इति रूपकम्। स्थाणुः पुरुषो वेति संदेहः। नेदं रजतमित्यपह्नुतिः। पीनो (देवदत्तः) दिवा न भुङ्क्ते इति पर्यायोक्तिः। समुद्रः कुण्डिकेत्यतिशयोक्तिः। अद्रिरग्निमानित्यनुमानम्। आद्यन्तौ टित्कताविति यथासंख्यं, पुत्रेण सहागतः पितेति सहोक्तिः। श्वेतो धावतीति श्लेषः। इत्यादावित्यर्थः। यद्यपि पञ्चमादावव्यङ्ग्यं चित्रमित्युक्तम्। तथापि स्वाधीनभर्तृ-

केत्यादौ विद्यमानमपि व्यङ्ग्यं उपेक्ष्योदाहृतमिति न पूर्वोत्तरविरोध इति पूर्वापरविरुद्धाभिधानमिति न शङ्कनीयमित्युपसंहरति इतीति ।

सारबोधिनी—ननु गुणालङ्कारवदव्यङ्ग्यं चित्रत्वमिति प्रागुक्तम् । अलङ्कारस्थले सत्यपि तद्-वैचित्र्ये व्यङ्ग्यस्यानुभवसिद्धतया ध्वनिगुणीभूतान्यतरत्वसम्भवे कथं चित्रत्वमित्याशङ्क्ते **स्वाधीनेत्यादि** । चमत्कारभूश्चमत्कारविषयः । प्रतीयमानेन व्यङ्ग्येन वैचित्र्यं चमत्कारानुगुण्यं परिहरति **तथापीति** । सत्यपि व्यङ्ग्ये समुत्कटया अलङ्कारकृतचारुतया प्रथमतश्चित्ताकर्षणमिति चित्रता । न खलु वाच्यादेव वैचित्र्यम् । व्यङ्ग्यसत्त्वविरोधीति सिद्धान्तपर्यवसानम् । न खल्वित्यादि । उक्तालङ्कारवति काव्ये वाच्यमुपमादिरूपम् । नन्वेवं सति रसादौ व्यङ्ग्येऽलङ्कारान्तरे च कथं न तेन व्यवहार इत्यत आह **तद्रहितत्वेनेति** ।

तद्वद्धर्मस्य लोपे स्यान्न श्रौती तद्धिते पुनः ।

धर्मः साधारणः । तद्धिते कल्पबादौ त्वार्थ्येव । तेन पञ्च । उदाहरणम्

धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः ।
करणीयं वचश्चेतः सत्यं तस्यामृतं यथा ॥३९७॥

आकृष्टकरवालोऽसौ संपराये परिभ्रमन् ।
प्रत्यर्थिसेनया दृष्टः कृतान्तेन समः प्रभुः ॥३९८॥

बालचित्तानुरञ्जनी—एवं पूर्णोपमामभिधाय लुप्तोपमां विभजते **तद्वदिति** । तद्वत् पूर्णोपमावत् । वाक्यगा समासगा तद्धितगा । तत्र श्रौतार्थभेदेन द्वैविध्यम् । तद्धिते आर्थी न संभवतीति पञ्चप्रकारेत्याह **तद्धित इति** । आदिशब्देन देश्यदेशीयर्बहुच्प्रत्ययौ ग्राह्यौ । वाक्ये श्रौतीमुदाहरति **धन्यस्येति** । हे चेतः धन्यस्य अनन्यसामान्यः यः सौजन्योत्कर्षः तेन शालते तस्य राज्ञः अमृतं यथा अमृतवन्मधुरं सत्यं वचः करणीयं यत्र माधुर्यस्य साधारणधर्मस्य लोपे च श्रुत्या श्रौतत्वम् । वाक्ये आर्थी । तद्धिते चार्थीमुदाहरति **आकृष्टेति** । असौ प्रभुः संपराये युद्धे आकृष्टकरवालः भ्रमन् शत्रुसेनया दृष्टः सन् कृतान्तेन यमेन समः । अत्र कृतान्तेन यमेन सम इत्यत्र क्रौर्यादिः साधारणधर्मस्याप्रयोगे आर्थी । न च करवालाकृष्टिः समानधर्म इति वाच्यम् । यमस्य दण्डायुधत्वेन करवालायुधत्वाभावात् ।

सारबोधिनी—लुप्तामाह **तद्वदिति** । पूर्णावत् । लोपे अनुपादाने । ननु चन्द्रत्वादिमुखत्वादिप्रतीतेर्न धर्मलोप इत्यत आह **धर्मः साधारण इति** । ननु चन्द्रस्येव चन्द्रवदिति श्रौतीत्वसंभवे कथं तद्धितवर्जनमिति चेत् न । धर्मानुपादाने चन्द्रस्येवेति वाक्येन वतेः प्रसङ्गः । सापेक्षत्वात् प्रतियोगिनोऽनुयोगिसाकाङ्क्षत्वादिति । **धन्यस्येति** । चेत इति इदं सम्बोधनपदम् । **अमृतं यथेति** । इयं वाक्यगा श्रौती लुप्ता । अत्र

तृप्तिजनकत्वस्य समानधर्मस्यातिप्रसिद्धत्वादनुपादानम् । एमन्यत्रापि । आकृष्टेति । कृतान्तेन सम इति वाक्यगा आर्थी लुप्ता ।

करवाल इवाचारस्तस्य वागमृतोपमा ।
विषकल्पं मनो वेत्सि यदि जीवसि तत्सखे ।। ३९९ ।।

उपमानानुपादाने वाक्यगाथ समासगा ।। ८८ ।।

सअलकरणपरवीसामसिरिविअरणं ण सरसकव्वस्स ।
दीसइ अहव णिसम्मइ सरिसं अंसंसमेत्तेण ।। ४०० ।।

कव्वस्सेत्यत्र कव्वसममिति सरिसमित्यत्र च णूणमिति पाठे एषैव समासगा ।

बालचित्तानुरञ्जनी—समासे श्रौतीमुदाहरति **करवाल इति** । हे सखे ! तस्य प्रकृतस्य आचारः करवालः वाक् अमृतोपमा मनो विषकल्पं तदेतत् वेत्सि यदि जीवसि तत्समीपावस्थाने तव जीवनमेव दुर्लभमेवेति भावः । अत्र करवाल इवाचार इत्यत्र इवशब्दयोगे नित्यसमासे इवश्रुत्या श्रौतत्वम् । अमृतोपमेति समासे आर्थी । विषकल्पमिति तद्धिते आर्थी । वाक्ये समासे उपमितिकरणस्यानुपादाने श्रौती नास्तीत्याह **उपमानेति** । यथेववादिशब्दानां तदर्थे विहितस्य वतेश्चोपमानोपादानमन्तरेण प्रयोगाभावात् श्रौती न संभवतीत्यार्थ्येवेतिभावः । वाक्यगामुदाहरति **सअलेति** । सरसकव्वस्स सरसकाव्यस्य सअलकरणपरवीसामसिरिविअरणं सकलकरणपरविश्रामश्रीवितरणं, सरिसं सदृशं वस्तु, अंसंसमेत्तेण अंशांशमात्रेण, ण दीसइ न दृश्यते, अहव अथवा, णिसम्मइ न श्रूयते, सरसकाव्यमेवंविधं नान्यदित्यर्थः । अत्रोपमानस्य कस्यचिद्विशिष्टस्यानुपादानात् वाक्ये आर्थी उपमा । एतदेव समासगोदाहरणत्वेनोदाहार्यमित्याह **कव्वस्सेति** । सरिसमित्यत्र च णूणमितिपदप्रयोगान्नायं दोष इत्यर्थः ।

सारबोधिनी—**करवाल इवेति** । लुप्ता समासगा श्रौती । अमृतोपमेत्यार्थी लुप्ता, विषकल्पेति तद्धितगा लुप्ता आर्थी । **उपमानेति** । वतेः कल्पबादेश्युपमानपरत्वनियमात् तदनुपादानात् न तत्परत्वसंभव इति । तद्धितानुपन्यास इति बोध्यम् । न च वतेरुपमानपरत्वनियमो नास्तीति वाच्यम् । तेन तुल्यं क्रिया चेदित्यनुशासनात् । तेनेत्यस्योपमानत्वेनेत्यर्थत्वात् । **सअलेति** ।

सकलकरणपरिविश्रामश्रीवितरणं न सरसकाव्यस्य ।
दृश्यते अथ वा निशम्यते सदृशमंशांशमात्रेण ।।

असंभवविवक्षया तदुपमानानुपादानम् । यद्वा, परब्रह्मादिकमुपमानं नोपात्तमिति । कव्वंव इति पाठे यद्यपि श्रौत्यपि संभवति तथापि प्राचीनैरनादृतत्वात् तथा नोक्तमित्याहुस्तन्न इवादेरुपमानपरतानियमेन तदनुपादाने तदसंभवस्योक्तत्वात् । अत्रोपमा व्यतिरेकस्याङ्गमिति केचित् । अश्रुतादृष्टत्वेनोपमानासंविवक्षायां तत आधिक्यासंभवात् ।

वादेर्लोपे समासे सा कर्माधारक्यचि क्यङि ।

कर्मकर्त्रोर्णमुलि

वाशब्द उपमाद्योतक इति वादेरुपमाप्रतिपादकस्य लोपे षट् समासेन कर्मणोऽधिकरणाच्चोत्पन्नेन क्यचा कर्तुः क्यङा कर्मकर्त्रोरुपपदयोर्णमुला च भवेत् ।

बालचित्तानुरञ्जनी—अपरान्यत्प्रकारानाह वादेरिति। वा इवेत्यादेरुपमाद्योतकस्य लोपे आर्थी उपमा समासे 'उपमानादाचारे', 'अधिकरणाच्चे'ति कर्माधिकरणयोर्विहिते क्यचि, 'कर्तुः क्यङ् सलोपश्चे'ति कर्तरि विहिते क्यङि, उपमाने कर्मणि च' इत्यत्र चकारात् कर्तरि चेति, कर्मकर्त्रोर्विहिते णमुलि चेति षट् प्रकारा भवन्तीति श्लोकं व्याचष्टे वाशब्द इति।

सारबोधिनी--वादेरिति । वाशब्द उपमाद्योतक इति । तथा चामरः, 'उपमायां विकल्पे वे'ति । ननु समासक्यच्क्यङ्णमुल् इति चतुर्भिरुपाधिभिश्चतुर्विधत्वमेव कथं षड्विधत्वमित्यत आह, कर्मण इति । एवं कर्माधिकरणोत्तरत्वेन क्यचो द्वैविध्यं, णमुलोऽप्युपपदभेदात् द्वैविध्यमिति षट् प्रकाराः ।

उदाहरणम्

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता ।।४०१।।

तथा

असितभुजगभीषणासिपत्रो रुहरुहिकाहितचित्ततूर्णचारः ।
पुलकिततनुरुत्कपोलकान्तिः प्रतिभटविक्रमदर्शनेऽयमासीत् ।।४०२ ।।

बालचित्तानुरञ्जनी—समास उदाहरति तत इति । ततः कुमुदानां नाथेन कामिनीकपोलवत् पाण्डुवर्णेन नेत्रानन्दकरेण चन्द्रेण ऐन्द्री दिक् अलङ्कृता । अत्र कामिनीगण्डपाण्डुनेत्यत्र उपमाद्योतकेवशब्दलोपात् समासे आर्थी उपमा । तत्र वोदाहरणान्तरमाह असितेति । प्रतिभटदर्शनेऽयं एवंविध आसीत् । कृष्णसर्पवत् भीषणखड्गपत्रः । रुहरुहिकया उत्कण्ठया आहितं स्थापितं चित्तं तेन तूर्णचारः शीघ्रगमनं यस्य सः । अत्र असितभुजगभीषणासिपत्र इत्यत्र इवशब्दलोपात् समासगा आर्थी उपमा ।

सारबोधिनी– तत इति । कामिनीगण्ड इव पाण्डुरि"त्युपमानानि सामान्यवचनैरि"ति समासः । समासेन साम्यप्रतिपत्ताविवाद्यप्रयोगः । इयं समासगा । तथेति । समासे आर्थीत्यर्थः । असितभुजगेति । असितभुजगतुल्यं भीषणमसिपत्रं यस्येति शाकपार्थिवादित्वात् मध्यमपदलोपिसमासः । तथा च समासे आर्थीति पूर्वोदाहरणाद् भेदः । रुहरुहिका मानसोत्कण्ठा ।

पौरं सुतीयति जनं समरान्तरेऽसावन्तःपुरीयति विचित्रचरित्रचुञ्चुः ।
नारीयते समरसीम्नि कृपाणपाणेरालोक्य तस्य चरितानि सपत्नसेना ॥४०३॥

मृधे निदाघघर्मांशुदर्शं पश्यन्ति तं परे ।
स पुनः पार्थसञ्चारं सञ्चरत्यवनीपतिः ॥४०४॥

बालचित्तानुरञ्जनी—कर्माधिकरणयोः क्यचि कर्त्तरि क्यङि आर्थीमुदाहरति **पौरमिति** । अयं पौरजनं सुतीयति सुतमिवाचरति । कर्मणि क्यच् । विचित्रचरित्रेण प्रसिद्धः असौ सङ्ग्रामे **अन्तःपुरीयति** अन्तःपुर इवाचरति । अधिकरणे क्यच् । सपत्नसेना सङ्ग्रामे खड्गहस्तस्य तस्य चरितानि विलोक्य नारीयते नारीवाचरति । कर्त्तरि क्यङ् । कर्मणि कर्तरि च णमुलि आर्थीमुदाहरति **मृध इति** । परे शत्रवः राजानं युद्धे ग्रीष्मर्तुसूर्यमिव पश्यन्ति । दर्शमिति कर्मणि णमुल् । स राजा पुनः पार्थः अर्जुन इव सञ्चरति । अत्र कर्त्तरि णमुल् । उभयत्र 'कषादिषु यथाविध्यनुप्रयोग' इत्यनुप्रयोगः ।

सारबोधिनी—कर्मणि [वादिलुप्तामुदाहरति] **पौरमिति** । पौरं सुतमिवाचरति, कर्मणि क्यच् । अन्तःपुर इवाचरतीत्यधिकरणात् क्यच् । नारीयत इति क्यङ् । मृधे युद्धे । निदाघेति । निदाघधर्मांशुमिव पश्यन्तीति उपमाने कर्मण्युपपदे णमुल् । **पार्थसञ्चारमिति** । पार्थ इव सञ्चरतीति कर्त्र्युपपदे णमुल् । इयं श्रौती, इवादीनामिव क्यजादीनामपि सत्त्वे तत्त्वानपायात् । वस्तुतस्तु इवादिसत्त्वे एव श्रौत्यादिचिन्तेति सारम् । इवादीनां द्योतकत्वमिति तत्सत्त्व एव तन्त्रम् क्यजादीनां तु वाचकत्वात् । अत्र केचित् । क्यजादीनामप्यौपम्यार्थकत्वेन तत्सत्त्वे यद्यपि न वादिलोपस्तथापि प्राचीनप्रणयानुरोधादिदमुक्तमिति । न च क्यजादीनां नौपम्यार्थकत्वमिति वाच्यम् । तथा सति सुतीयतीत्यादौ इवाद्यप्रयोगानुपपत्तेः ।

एतद्द्विलोपे क्विप्समासगा ॥ ८९ ॥

एतयोर्धर्मवाद्योः । उदाहरणम्

सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः ।
यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि ॥४०५॥

बालचित्तानुरञ्जनी—पुनरपि द्वैविध्यं पद्यांशमुपादाय व्याकरोति **एतदिति** । क्विब्गा समासगा चेति आर्थी द्विविधेत्यर्थः । तत्र धर्मलोपे क्विब्गामुदाहरति **सवितेति** । सूर्यः विधवति चन्द्र इवाचरति । कस्मिन् सति मनसि सुखदुःखवशीकृतेसति । अत्र 'सर्वत्र सर्वप्रातिपदिकेभ्यः क्विप् वा वक्तव्य' इति आचारे क्विप् । ननु आचारे क्विपो विधानात् आचाररूपस्य समानधर्मस्य सद्भावात् कथं धर्मलोप इति चेत्, सत्यम् । लुप्तप्रत्यया प्रकृतिः प्रत्ययार्थमपि यद्यपि ब्रूते तथापि वाचकप्रत्ययलोपात् वाच्यलोप इत्युच्यते । यद्वा प्रकृति[व्यति]रिक्तस्य धर्मवाचकस्याप्रयोगात् धर्मलोप इत्युच्यत इत्यदोषः ।

सारबोधिनी—एवमेकैकलोपमुदाहृत्य द्वयोर्लोप उदाहरति **एतदिति** । **सवितेति** । विधवति विधुरिवाचरति ।

परिपन्थिमनोराज्यशतैरपि दुराक्रमः ।
संपरायप्रवृत्तोऽसौ राजते राजकुञ्जरः ॥४०६॥

धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते ।

ढुण्ढुण्णन्तो मरिहसि कण्टअकलिआइँ केअइवणाइँ ।
मालइकुसुमसरिच्छं भमर भमन्तो ण पाविहिसि ॥४०७॥

कुसुमेण सममिति पाठे वाक्यगा ।

बालचित्तानुरञ्जनी--वादिलोपे समासगामुदाहरति **परिपन्थीति** । परिपन्थिनां शत्रूणां मनोराज्यशतैरपि दुरतिक्रमः युद्धप्रवृत्तः असौ राजश्रेष्ठः राजते । अत्र राजा कुञ्जर इव राजत इति 'उपमितं व्याघ्रादिभिरि'ति समासः । अत्र इवलोपे समासगा उपमा, साहसत्वादिसाधर्म्यात् । पुनरपि द्वैविध्यं प्रतिपादयति **धर्मेति** । वृत्तौ समासे दृश्यते । आर्थीति शेषः । धर्मलोपवती उपमानलोपवती चेति द्विविधा एवेत्यर्थः । धर्मलोपे उपमानलोपे च समासे उदाहरणमाह **ढुण्ढुण्णंतेति** । पुष्पोपचये भ्रमरमालोक्य कस्यचिदुक्तिः । भ्रमन् मरिष्यसि कण्टककलितानि, केतकीवनानि मालतीकुसुमसदृशं भ्रमर ! भ्रमन्न प्राप्स्यसि । अत्र मालतीत्यादिसमासे सौरभादिधर्मस्य तदुपमानस्य चादर्शने आर्थी उपमा समासोदाहरणमेव । पाठान्तरे वाक्योदाहरणं स्यादित्याह **कुसुमेन सममितीति** ।

सारबोधिनी—समासगामाह **परिपन्थीति** । मनोराज्यं मनोरथः । राजा कुञ्जर इवे"त्युपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति समासः । **धर्मेति** । **ढुं ढुं इति** ।

ढुं ढुं कृत्वा मरिष्यसि कण्टककलितानि केतकीवनानि ।
मालतीकुसुमसदृशं भ्रमर भ्रमन्नपि न प्राप्स्यसि ॥

ढुं ढुं इत्यव्यक्तानुकारः । केतकीवनानि भ्रमन्नित्यन्वयः । प्रकृतमालतीकुसुमस्य सदृशं पुष्पान्तरं नास्तीति विवक्षायामुपमानानुपादाने ।

क्वचि वाद्युपमेयासे

आसे निरासे ।

अरातिविक्रमालोकविकस्वरविलोचनः ।

कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति ।।४०८ ।।

अत्रात्मा उपमेयः ।

बालचित्तानुरञ्जनी— क्यचीति । प्रकारान्तरेण प्रतिपादकं पद्यांशमुपादाय अप्रसिद्धं व्याकरोति **निरास** इति । वादेः द्योतकस्योपमेयस्य च लोपे आर्थी उपमेत्यर्थः । तामुदाहरति **अरातीति** । शत्रुपराक्रमदर्शनेन विकसनशीले लोचने यस्य । कृपाणेन उदग्रो दोर्दण्डो यस्य स राजा सहस्रायुधीयति । सहस्रायुधं कार्त्तवीर्यमिवात्मानं आचरति । उपमानादाचार इति वा क्यच् । वादयो न सन्ति उपमेय आत्मापि नास्ति । आचारो नाम साधारणधर्मोऽस्ति इति आर्थी उपमेत्याह **अत्रेति** ।

सारबोधिनी—क्यचीति । **निरास इति** । अनुपादान इत्यर्थः । **अरातीति** । **सहस्रायुधीयतीति** सहस्रमायुधानि यस्य स तथा तमिवाचरतीति कर्मणः क्यच् । तर्हि क उपमेय इत्याह **अत्रात्मेति** । सहस्रायुधमिवात्मानमाचरतीति । आचारश्च दुर्जयमानिता । यथा तं दुर्जयं मन्यते तथात्मानमपीत्यर्थः । अभिमानफलं च निःशङ्करणप्रवेशात् प्रतिपक्षोत्सारणम् । आयुधसहस्रनिर्वाह्यस्य प्रतिपक्षोत्सारणस्यैकेन कृपाणेन निर्वहणात् नृपतौ वीरप्रकर्षः । कृपाणेत्यादिविशेषणवशादेव आचरितुरुपमेयत्वलाभः । अन्यस्य तथात्वे तदुपमानत्वे तदुपमानवैयर्थ्यम्, अत एवौपादानिकत्वेनोपमेयानुपादानमिति ध्येयम्[?] । केचित्तु सहस्रायुधेन सह वर्तत इति ससहस्रायुधः स इवाचरतीति वाक्यात् ससहस्रायुधीयतीति पदसिद्धौ विशेष्यस्य शब्दानुपात्तत्वादिहोपमेयलोप इत्याहुः ।

त्रिलोपे च संमासगा ।।९०।।

त्रयाणां वादिधर्मोपमानानाम् । उदाहरणम्

तरुणिमनि कृतावलोकना ललितविलासवितीर्णविग्रहा ।

स्मरशरविसराचितान्तरा मृगनयना हरते मुनेर्मनः ।।४०९।।

अत्र सप्तम्युपमानेत्यादिना यदा समासलोपौ भवतः, तदेदमुदाहरणम् ।

बालचित्तानुरञ्जनी—उपमानसाधारणधर्मवादीनां लोपे समासगा आर्थीति प्रकारान्तरमाह **त्रिलोपे चेति** । तामुदाहरति **तरुणिमनीति** । तरुणत्वविषये कृतं अवलोकनं यस्याः । ललितविलासैः स्वीकृतः विग्रहो यस्याः । कामशरैः दूरीकृतं तारतम्यं यस्याः । मृगनयना कान्ता मुनेर्मनः हरति । ननु 'मृगनयना' इत्यत्रा[वयवा]वयविनोरभेदविवक्षया यदा मृग एव नयनतया उपचर्यते तदा रूपकानुगुणं समासान्तरमिति कथमियं त्रिलोपेत्याशङ्क्याह **अत्रेति** । सप्तम्यन्तोपमानवाचिनि पूर्वपदे यस्य तस्य

बहुव्रीहिः उत्तरपदस्य च लोप इति येषां पक्षः तेषां मते मृगस्य नयने इव नयने यस्या इति विग्रहः। तत्र नयने इव विशाले इति उपमान-इवशब्द-विशालशब्दानां लोप इति त्रिलोपा उपमेत्यर्थः।

सारबोधिनी—त्रिलोप इति। तरुणीति। तरुणिमनि सति मृगनयना मुनेर्मनो हरतीति सम्बन्धः। वस्तुतस्तु तरुणिमनि विषये कृतावलोकनेत्यर्थः। [विलब्धविग्रहा इति पाठे] विलब्धो दत्तः। विसरः समूहः। अत्र मृगनयने इव मनोज्ञे नयने यस्या इति समासः। अत्रेवाद्युपमानसमानधर्माणां त्रयाणां लोपः। ननु मृगशब्दो यदा मृगनयनवृत्तिर्लक्षयति तदा मृगनयने एव नयने यस्या इति रूपकम्, समासविषये नोपमेति कथमिदमुदाहरणं सङ्गच्छत इत्यत आह अत्रेति। सप्तम्युपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्चेति पाणिनिसम्मतम्। अस्यार्थः सप्तम्यन्तमुपमानं पूर्वपदं यस्येवादिसमानधर्मबोधकपदस्य तस्य पदान्तरेणोपमेयबोधकेन बहुव्रीहिरुत्तराणीवादिसमानधर्मोपमानबोधकानि तेषां लोप इत्यनेन यदैषां लोपस्तदेत्यर्थः। अत एव यदेति पदं मूले सङ्गच्छते।

क्रूरस्याचारस्यायःशूलतयाध्यवसायाद् अयःशूलेनान्विच्छति "आयःशूलिकः" इत्यतिशयोक्तिर्न तु क्रूराचारोपमेयतैक्ष्ण्यधर्मवादीनां लोपे त्रिलोपेयमुपमा।

एवमेकोनविंशतिर्लुप्ताः पूर्णाभिः सह पञ्चविंशतिः।

बालचित्तानुरञ्जनी—अन्येषां मते त्रिलोपा मा भूदिति तात्पर्ये केचिदायःशूलिक इति उपमेयसाधारणधर्मवाचकलोपे त्रिलोपवतीमुपमामुदाहरन्ति, तन्मतं दूषयितुमाह **क्रूरस्येति**। अयःशूलेनान्विच्छतीत्यत्रार्थे 'अयःशूलदण्डाजिनाभ्यां ठक्ठञावि'ति ठक्। अर्थार्जनोपायरूपक्रूराचारस्योपमेयस्य अयःशूललक्षणेनोपमानेन निगीर्याध्यवसानादतिशयोक्तिः अलङ्कारः, न तु क्रूराचाररूपस्योपमेयस्य तैक्ष्ण्यलक्षणस्य धर्मस्य इवादेश्च लोप इति चिरन्तनविवक्षिता त्रिलोपवती उपमेत्यर्थः। उक्तमुपमाप्रपञ्चं सङ्कलय्य दर्शयति **एवमिति**। धर्मलोपे पञ्च। उपमानानुपादाने वाक्यगा समासगा चेति द्वे इति सप्त। वादेर्लोपस्य समासे कर्मक्यचि आधारक्यचि क्यङि कर्तृणमुलि कर्मणमुलि चेति षट् इति त्रयोदश। धर्मवाद्योर्लोपे क्विप्गा समासगा चेति द्वे इति पञ्चदश। धर्मोपमानयोर्लोपे समासगा वाक्यगा चेति सप्तदश। क्यचि वाद्युपमेयलोपे एकेत्यष्टादश। त्रिलोपे समासगा एकेति एकोनविंशतिलुप्ताभेदाः। पूर्णभेदाः षडिति पञ्चविंशतिरुपमाभेदा इत्यर्थः।

सारबोधिनी—परसंमतं त्रिलोपोदाहरणं दूषयति **क्रूरस्याचारस्येति**। अन्विच्छति व्यवहरति। **न तु क्रूराचारेत्यादि**। क्रूराचारश्चासावुपमेयश्चेति कर्मधारयः। तथा चात्र क्रूराचारस्यायःशूलाध्यवसाय एव नोपमा, एतेषां त्रयाणां लोपेऽनुशासनाभावात्। **एकोनेति**। धर्मलोपे पञ्च। उपमानलोपे द्वे। वादिलोपे षट्। धर्मवादिलोपे द्वे। वाद्युपमेययोर्लोपे एकः। त्रिलोप एक इति।

अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विता।

मम्लौ साथ विषादेन पद्मिनीव हिमाम्भसा॥४१०॥

इत्यभिन्ने साधारणे धर्मे,

ज्योत्स्नेव नयनानन्दः सुरेव मदकारणम् ।

प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी ॥४११॥

इति भिन्ने च तस्मिन् एकस्यैव बहूपमानोपादाने मालोपमा ।

बालचित्तानुरञ्जनी—मालोपमां दर्शयति **अनयेनेति**। अनीत्या राज्यश्रीरिव, दैन्येन मनस्वितेव, हिमाम्भसा पद्मिनीव सा कामिनी विषादेन मम्लौ। अत्र सर्वम्लानिलक्षणो धर्मो न भिद्यत इत्याह **इत्यभिन्न इति**। धर्मभेदे मालोपमामुदाहरति **ज्योत्स्नेति**। नितम्बिनी नारी चन्द्रिकेव नयनानन्दभूता। सुरेव मदकारणम्। प्रभुतेव समाकृष्टः सर्वलोको यया। अत्र नयनानन्दकरत्वमदकरणत्वादिधर्मः प्रत्येकं भिद्यत इत्याह **भिन्ने च तस्मिन्निति**। साधारणधर्मे। मालोपमाया लक्षणमाह **एकस्येति**। एकस्यैवोपमेयस्य बहूपमानोपादाने सा मालोपमेत्यर्थः।

सारबोधिनी—ननु मालाद्यन्यभेदसंभवे कथमेतावन्त एवेत्यत आह **अनयेनेत्यादि**। **अभिन्न इति**। एकशब्दबोध्यत्वेन सर्वोपमानगत इत्यर्थः। **ज्योत्स्नेति**। यथा माला काचिदेकजातीयैः कुसुमैः काचिद् विजातीयैर्ग्रथिता तथा सजातीयैर्विजातीयैर्बहुभिरुपमानैर्घटितेयमित्यर्थः।

यथोत्तरमुपमेयस्योपमानत्वे पूर्ववदभिन्नभिन्नधर्मत्वे,

अनवरतकनकवितरणजललवभृतकरतरङ्गितार्थिततेः।

भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्तिरतिविमला॥४१२॥

मतिरिव मूर्तिर्मधुरा मूर्तिरिव सभा प्रभावचिता।

तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न परेषाम्॥४१३॥

इत्यादिका रशनोपमा च न लक्षिता, एवंविधवैचित्र्यसहस्रसंभवात् उक्तभेदानतिक्रमाच्च।

बालचित्तानुरञ्जनी—धर्मभेदे रशनोपमाया लक्षणमाह **यथोत्तरमिति**। पूर्वपूर्वपर्वणि उपमेयभूतस्योत्तरोत्तरकक्षायामुपमानतया।

सारबोधिनी—उत्तरमुत्तरं यथोत्तरम्। पूर्ववत् मालोपमावत्। तरङ्गिता श्रेणीभूय पूर्वपश्चाद्भावेन सततं मिलिता। **मतिरिवेति**। चिता युक्ता। **रशनोपमेति**। शृङ्खलान्यायेन पश्चाद्वलनयेत्यर्थः। यथा रशनायां पूर्वत्वं प्राप्तायाः क्षुद्रघण्टिकायाः परग्रथनायां परत्वं तद्वदत्र पूर्वपूर्वस्योपमेयस्योपमानत्वे परपरत्वप्राप्तिरिति रशनात्वमिति। ननु वैचित्र्यसहस्रसंभवनमनुक्तावप्रयोजकमित्यत आह **उक्तेति**। तथा चात्र न पश्चाद्वलनया चमत्कारोऽपि तूपमानत्वे उपमायामेवान्तर्भाव इत्यर्थः। यथा 'चन्द्रस्पर्द्धि मुखं' 'शुकमुखद्युति किंशुकमि'त्यादेः लुप्तायामन्तर्भावः।

उपमानोपमेयत्वे एकस्यैवैकवाक्यगे ।

अनन्वयः

उपमानान्तरसंबन्धाभावोऽनन्वयः । उदाहरणम्

न केवलं भाति नितान्तकान्तिर्नितम्बिनी सैव नितम्बिनीव ।
यावद्विलासायुधलास्यवासास्ते तद्विलासा इव तद्विलासाः ॥४१४॥

विपर्यास उपमेयोपमा तयोः ॥९१॥

तयोः, उपमानोपमेययोः । परिवृत्तिः, अर्थात् वाक्यद्वये । इतरोपमान-व्यवच्छेदपरा, उपमेयेनोपमा, इति उपमेयोपमा । उदाहरणम्

कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः ।
धरणीव धृतिर्धृ तिरिव धरणी सततं विभाति बत यस्य ॥४१५॥

बालचित्तानुरञ्जनी—सैव नितम्बिनी केवलं नितम्बिनीव न भाति । यावत् विलासायुधः कामः तस्य लास्यं नृत्यम् तस्य वासाः निवासभूताः ते प्रसिद्धाः तस्य विलासाः तद्विलासा इव भान्ति । नितम्बिनी नितम्बिनीव विलासाः तद्विलासा इवेति । एकस्यैव द्वितीयसदृशवस्तु-निराकरणलक्षणं चमत्कारातिशयमवबोधयितुमुभयथा विवक्षा । यतो न विरुद्धधर्मशङ्का । श्रौतश्चायमनन्वयः 'गगनं गगनाकारं सागरः सागरोपम' इत्यादौ द्रष्टव्यः ।

उपमेयोपमां लक्षयति **विपर्यास इति** । तयोरित्यस्य व्याख्यानमुपमानेति । विपर्यास इत्यस्य व्याख्यानं **परिवृत्तिरिति** । अनन्वयव्यावृत्त्यर्थमाह **अर्थादिति** । महत्याः संज्ञायाः फलमाह **इतरेति** । यथाहुः—

अन्योन्यमेव यत्र स्यादुपमानोपमेयता ।
उपमेयोपमामाहुस्तां पक्षान्तरहानिगाम् ॥

साधारणधर्मोपादाने वस्तुप्रतिवस्तुनिर्देशे च द्विप्रकारेयम् । तत्राद्यामुदाहरति **कमलेति** । हे राजन्, यस्य तव मतिः कमला लक्ष्मीरिव भाति कमला मतिरिव भाति । विभा कान्तिस्तनुरिव तनुर्विभेव भाति । धृतिर्धरणीव धरणी धृतिरिव सततं विभाति । बत । द्वितीयोदाहरणं यथा—

सच्छायाम्भोजवदनः सच्छायवदनाम्बुजाः ।
वाप्योऽङ्गना इवाभान्ति यत्र वाप्य इवाङ्गनाः । ।इति ।

सारबोधिनी––उपमानोपमेयत्वे इति । उपमानत्वमुपमेयत्वञ्चेत्यर्थः । उपमाव्यावर्तनायैवपदम्, तस्या भेदघटितत्वात् । उपमेयोपमावारणायैकवाक्यवगे इति । **एकवाक्यगे इति** । एकवाक्यगे एकौपम्यस्य प्रतिपादकशब्दप्रतिपाद्ये इत्यर्थः । एवकारेण भिन्नशब्दबोध्यत्वव्यवच्छेदः । अतोऽस्या वदनमिवास्या वक्त्रमित्यत्र न प्रसङ्गः । उपमातो भेदबीजमाह **उपमानान्तरेत्यादि** । अत्रोपमानान्तरव्यवच्छेदेन चमत्कारः, [उपमायां तु साम्यप्रतीत्या चमत्कार इति] फलवैजात्यादन्योन्यभेदनिरूपणौचित्यमिति भावः । उपमानान्तरसम्बन्धस्याभावो यत्रेति अनन्वयपदार्थनिरुक्तिरियम् । तदाह **अनन्वय इति** । अन्वयः सम्बन्धः । **न केवलमिति** । यावदिति चार्थे विलासायुधः कामस्तस्य लास्यवासाः क्रीडागृहाणि । लस श्लेषणक्रीडनयोरिति धात्वनुसारात् । उपमेयोपमामाह **विपर्यास इति** । विपर्यासपदविवरणं परिवृत्तिरिति । वाक्यद्वय इत्यनन्वयव्यवच्छेदः । उपमाभेदबीजमाह **इतरेति** । **पूर्ववत्** । **कमलेति** । कमलाया उपमानत्वे सर्वजनोपास्यत्वं, मत्यास्तथात्वे कमलायाः स्थिरत्वं, तथा अनयोः परस्परोपमानोपमेयभावः । एतदन्यत्र नैवं धर्म इति प्रतीयते । एवमुत्तरत्रापि यथायोग्यं बोध्यम् ।

संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।

समेन, उपमानेन । उदाहरणम्

उन्मेष यो मम न सहते जातिवैरी निशाया-
मिन्दोरिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः ।
नीतः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षा–
ल्लग्ना मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः ।।४१६।।

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ।।४१७।।

इत्यादौ व्यापनादि लेपनादिरूपतया सम्भावितम् ।

बालचित्तानुरञ्जनी–उत्प्रेक्षां लक्षयति **संभावनमित्यादि** । संभावनमनध्यवसायः अध्याहारः तर्कः ऊहः उत्प्रेक्षेति नार्थान्तरम्। प्रकृतस्योपमेयस्य। उदाहरति **उन्मेषमिति**। हे ललिततनु सुन्दरि कान्त्या शोभया, इति हर्षात् ते पादयोः लग्नेति मन्ये । **इतीति** । किं जातिवैरी यथेन्दुः रात्रौ मम उन्मेषं न सहते। तस्य इन्दोः सौन्दर्यं च गुणः । तत्र हर्षादित्युक्तो गुण एव निमित्तम् । क्रियामुदाहरति **लिम्पतीति** । अत्र तमोविषयतया लेपनं नभोवर्षणं च उत्प्रेक्षत इत्याह **व्यापनादीति** । आद्यस्य श्लक्ष्णता द्वितीयस्य नीलिमाधिक्यं च गुणो निमित्ताम् । एवं जात्युत्प्रेक्षादिकमुदाहर्तव्यम् ।

सारबोधिनी--वाच्यसादृश्यालङ्कारं निरूप्य व्यङ्ग्यसादृश्येषु निरूपयितव्येषु प्रथममुत्प्रेक्षामाह **संभावनमिति**। अथेत्यनेन वाच्यसादृश्यानां सगोत्रत्वसूचनम्। उत्कटकोटिक सन्देहः संभावनम्। उत्कटा प्रकृष्टस्योपमानस्येक्षा ज्ञानमुत्प्रेक्षा, अयं चन्द्र एव भविष्यतीत्युपकारिका। समेनेत्यनन्तरं ऐकरूप्येणेति शेष इति टीकाकृतः। **समेनेति**। न प्रकृतमात्रेण। समं करोतीति समपदेनोपमानमुच्यते। तथा चैकरूप्येणोत्कटोपमानकोटिकं प्रकृतोपमेयविषयकं संभावनमुत्प्रेक्षेत्यर्थः। **उन्मेषमिति**। उन्मेषं प्रकाशं उद्रेकञ्च। जातिवैरी सहजशत्रुः। मन्ये हर्षादित्यन्वयः। तथा च पादे लग्नस्य हेतुर्हर्ष इत्युत्प्रेक्ष्यते। लिम्पतीत्यादाविवश्रुत्योपमात्वं ये मन्यन्ते, तन्निराचष्टे **लिम्पतीत्यादि**। अत्र तमोव्यापनाधःप्रसरणे स्वतः प्रतीयेते लेपेन वर्षणरूपतयाऽध्यवसिते। तत्र तमोनभसी कर्तृणी, इत्यत्रेवशब्दस्य संभावनमेवार्थो नौपम्यमिति भावः, उपमायामिवेन नित्यसमासानुशासनात्। आख्यातस्य नामताविरहात् नाम्नो युक्तार्थस्य समासत्वात्। वस्तुतस्तु यत्र प्रौढोक्तिनिष्पन्नोऽर्थस्तत्रेवार्थः संभावनेति बोध्यम्।

ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः ॥९२॥

भेदोक्तौ यथा

अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम्।
कृतान्तः किं साक्षान्महिषवहनोऽसाविति चिरं
समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः ॥४१८॥

भेदोक्तावित्यनेन न केवलमयं निश्चयगर्भो यावन्निश्चयान्तोऽपि संदेहः स्वीकृतः। यथा

इन्दुः किं क्व कलङ्कः सरसिजमेतत् किमम्बु कुत्र गतम्।
ललितसविलासवचनैर्मुखमिति हरिणाक्षि निश्चितं परतः ॥४१९॥

बालचित्तानुरञ्जनी--ससंदेहालङ्कारं लक्षयति **ससंदेहस्त्विति**। भेदो व्यावर्तको धर्मस्तत्सहितस्तद्रहितश्चेति द्विविध इत्यर्थः। आद्यमुदाहरति **अयमिति**। अयं सूर्यः किम्? सूर्यः खलु सप्तभिस्तुरगैरितः। एकेनाश्वेन युक्तत्वात् सूर्यो न भवतीत्यर्थः। तर्हि साक्षात् यमः किम्? असौ यमः महिषवाहनः। महिषवाहनत्वाभावात् अयं यमोऽपि न भवति, इति प्रतिभटाः युद्धे त्वां चिरं समालोक्य इति विकल्पान् संशयान् कुर्वन्ति। अत्र वर्णनीयस्य मार्तण्डादीनां च संशये सति सप्ताश्वसंपन्नत्वादिभेद उत्कृष्यते। कविप्रतिभोत्थापितसंशय-[स्यैवालङ्कारत्वात्]। **इन्दुरिति**। कलङ्काभावात् चन्द्रोऽपि न भवतीत्यर्थः। सरसिजं किम्? उदकं कुत्र गतम्? उदकाभावान्न सरसिजम्। ललितानि मनोहराणि सविलासानि वचनानि तैः परितः पश्चात् मुखमिति निश्चितम्। अत्र कलङ्कादिको भेदको धर्मः। पर्यन्ते मुखमिति निश्चितमित्युक्तत्वात्। निश्चयान्तत्वञ्च।

सारबोधिनी-ससंदेह इति । भेदो वैधर्म्यम् । अत्र यत्पदाभावात् संदेहनामालङ्कार इति कश्चित् । तन्न । अत्र हि पूर्वसूत्रात् प्रकृतस्य यस्तु संशयः स एव ससंदेहनामालङ्कारः । उपमेयस्या तिशयार्थं कवि-प्रतिभया यः प्रादुर्भवति संशयः स एव संदेहनामालङ्कारः, न तु स्वारसिकः, स्थाणुर्वा पुरुषो वेत्यादिकः ।

भेदोक्ताविति । अयमर्थः । भेदो वैधर्म्यम् । वैधर्म्यस्योपमाननिष्ठस्योपमेयनिष्ठस्य चोक्तिरिति द्विधा । तत्र चोपमाननिष्ठस्योक्तौ प्रकृते मार्तण्डाद्यभावनिश्चयस्य संशयान्तरयोग्यतापादकत्वा, मध्यवर्तित्वाच्च गर्भिता, असति तस्मिन् निश्चये पूर्वसंशये विद्यमाने संशयान्तरानुत्पत्तेः । उपमेयनिष्ठस्य वचनादिरूपस्योक्तौ तु विशेषदर्शनत्वेन मुखत्वनिश्चये सति संशयान्तरानवतारात् निश्चयगर्भता । केचित्तु-"यत्र धर्मनिश्चयः प्रतीयमानो भवति स निश्चयगर्भः अत एव तस्य निश्चयस्य वाच्यतादशायामेव स्फुटप्रकाशाभावेन गर्भस्थतुल्यता निश्चयगर्भ इत्युच्यते । यत्र निश्चयो वाच्यश्च भवति स निश्चयान्तः' इत्याहुः ।

किन्तु निश्चयगर्भ इव नात्र निश्चयः प्रतीयमान इति, उपेक्षितो भट्टोद्भटेन ।

तदनुक्तौ यथा

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥४२०॥

बालचित्तानुरञ्जनी—रुद्रटेनोक्तोऽयं विभागः कस्मादुद्भटेनोपेक्षित इत्यत्राह **किन्त्विति** । व्यज्यमानव्यतिरेकादुच्यमाने निश्चये कश्चमत्कारातिशय इत्युद्भटाभिप्राय इति यावत् । भेदक-धर्मानुक्तावुदाहरति **तदिति** । अस्याः सृष्टिविधौ कान्तिप्रदः चन्द्रो नु अभूत् ? शृङ्गारैकरसः स्वयं मदनो नु ? पुष्पाकरो मासो नु ? वेदाभ्यासजडः विषयव्यावृत्तकौतूहलः पुराणो मुनिः इदं मनोहरं रूपं कथं नु निर्मातुं प्रभवेत् ? न प्रभवेदित्यर्थः । अत्र नायिकारूपसृष्टौ ब्रह्मत्वं चन्द्रस्य मन्मथस्य मधुमासस्य वेति सन्देहे भेदको न कश्चिदुक्तः । वेदाभ्यासजाडचन्तु चन्द्रमदनमधुमासेभ्यः प्रसिद्धब्रह्मणो वैलक्षण्यं न पुनरेतेषामन्योन्यमिति भ्रमितव्यम् । अतश्च संशयावस्थैवात्र चारुतामुत्थापयति । इतरथा नायिका-रूपवर्णने कान्तप्रभा-[कान्तिप्रदत्वा ?] द्येकतमविपर्यासापत्तेः ।

सारबोधिनी-किन्त्विति । अत्र निश्चयान्ते । **न प्रतीयमान इति** । व्यङ्ग्यो नेत्यर्थः । 'निश्चित'-मित्यनेन निश्चयस्याभिधानादित्युत्प्रेक्षाबीजम् । **अस्या इति** । चन्द्रः प्रजापतिरभूदित्यन्वयः । हेतुमाह **कान्तिप्रद इति** । एवं कान्तेश्चन्द्र एव संभवात् । अत्र नु शब्दः किमर्थः ।

तद्रूपकमभेदो य उपमानोपमेययोः ।

अतिसाम्याद् अनपह्नुतभेदयोः, अभेदः ।

समस्तवस्तुविषयं श्रौता आरोपिता यदा ॥९३॥

आरोपविषया इव आरोप्यमाणा यदा शब्दोपात्तास्तदा समस्तानि वस्तूनि विषयोऽस्येति समस्तवस्तुविषयम् । आरोपिता इति बहुवचनमविवक्षितम् । यथा

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी-
न्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम् ।
द्वीपाद् द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन ॥४२१॥

अत्र पादत्रये, अन्तर्धानव्यसनरसिकत्वमारोपितधर्म एवेति रूपकपरिग्रहे साधकमस्तीति तत्सङ्कराशङ्का न कार्या ।

बालचित्तानुरञ्जनी–रूपकालङ्कारं लक्षयति **तद्रूपकमिति**। नन्वपह्नुत्यलङ्कारेऽतिव्याप्तिरित्यत आह **अतीति** । मुखं चन्द्र इति सहप्रयुज्यमानयोः अनपह्नुतभेदयोः साम्योत्कर्षादभेदो रूपकमिति विवक्षितत्वात् नातिव्याप्तिरित्यर्थः । एतत् निरवयवं, सावयवं, परम्परितञ्चेति त्रिधा । आद्यं केवलं मालाकारञ्चेति द्विधा । द्वितीयं समस्तवस्तुविषयं एकदेशविवर्तीति द्विधैव । तृतीयं च श्लिष्टाश्लिष्टशब्दनिबन्धनत्वेन द्विविधं सत्प्रत्येकं केवलं मालाकारञ्चेति चतुर्विधम् । तदेवमष्टावेतद्भेदाः । तत्र द्वितीये आद्यभेदप्रतिपादकं भेदमुपादाय व्याकरोति **समस्तेति** । समस्तवस्तुविषयं रूपकमिति शेषः । द्विवचनस्याप्यङ्गीकार्यत्वाद् बहुवचनमविवक्षितम् । तेन आरोपितौ आरोपित इत्यपि द्रष्टव्यमित्याह **आरोपिता इति** । उदाहरति **यथेति** । ज्योत्स्नैव भस्म तच्छुरणधवला, तारका एवास्थीनि बिभ्रती, अन्तर्द्धानव्यसनानुषक्ता । मुद्राशब्दः प्रशंसार्थः । चन्द्रमुद्रैव कपालम् तस्मिन्, लाञ्छनव्याजेन न्यस्तम् । परिमलशब्दः प्रशंसार्थः । सिद्धाञ्जनपरिमलं दधती इयं रात्रिरेव कापालिकी योगिनी द्वीपात् द्वीपान्तरं भ्रमति । अत्रारोप्यमाणा भस्मादयः । आरोपविषया ज्योत्स्नादयः । लाञ्छनच्छलेनेत्यत्रापह्नुतेर्विद्यमानत्वात् पादत्रय एव श्लोकः उदाहरणमित्याह **अत्रेति** । ननु ज्योत्स्नाभस्मेवेत्युपमीयते उत ज्योत्स्नैव भस्मेति निरूप्यते व्याघ्रादित्वेन मयूरव्यंसकादित्वेन वा समासः, उभयोरप्याकृतिगणत्वादिति संदेहसङ्करः न शुद्धं रूपकमित्यत आह **अन्तर्द्धानेति** । अन्तर्द्धानरसिकत्वं चेतनधर्मत्वात् कापालिक्यामेव ।

सारबोधिनी—रूपकमाह **तदिति** । ननूपमानोपमेययोरभेदज्ञानस्य भ्रमत्वेन भ्रान्तिमदविशेषापात इति चेन्मैवम् । अस्याहार्यत्वेन ततोऽन्यत्वात्, भ्रान्तिमतोऽनाहार्यत्वात् । अभेदारोपे हेतुमाह [**अतीति** ।] अनपह्नुतोऽगृहीतो भेदोऽन्योन्याभावो ययोरिति केचित् । अन्ये तु अनपह्नुतभेदयोरिति साम्यादभेदो रूपकम्, तेन नापह्नुत्यतिव्याप्तिस्तत्रैकस्यापह्नवादिति वदन्ति । अस्मिन् सनञ्पाठे भेदपदेन वैधर्म्यमुक्तमिति बोध्यम् । विभजते **समस्तेति** । आरोपिता इत्यत्र क्तप्रत्ययस्यातीतत्वाविवक्षायां कर्ममात्रतात्पर्येण

क्तप्रत्ययाभिधानमित्याह **आरोपविषया इति** । आरोप्यमाणा इति च । समस्तानि आरोप्यमाणानि विषयरूपाणि वस्तूनि वर्णनीयानि बहुत्वमविवक्षितमिति । तेनैकस्मिन् आरोप्यमाणे रूपकं प्रसज्यते ।

ज्योत्स्नेति । छुरणमङ्गलेपनम् । कापालिकी योगिनी । मुद्रेति । दीक्षाकालगृहीतोपकरणेषु मुद्रोपपदनाम्ना पाषण्डकानां व्यवहारः । परिमलं क्षोदम् । नन्विदं लक्ष्यमुपमासङ्कीर्णम्, असङ्कीर्णोदाहरणमेव दर्शयितुमुचितमिति शङ्कायामाह **अत्र पादत्रय इति** । अत्र पादत्रये यद्रूपकं तत्परिग्रहेऽन्तर्धानव्यसनरसिकात्वमेव साधकमिति संबन्धः । तथाहि अन्तर्धानव्यसनरसिकात्वं प्राणिधर्मः । तत्कापालिक्या एव संभवति, न तु तत्सदृश्या रात्रेस्तदाह **आरोपितधर्म एवेति** । कापालिकीत्वारोप एव तदुपपत्तेरित्यर्थः । एवं च तदनुरोधेन ज्योत्स्नाभस्मेत्यादिष्वपि रूपकमेव, न तूपमा । पादत्रयमिति पाठे पादत्रयं व्याप्येत्यर्थः ।

श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तत् ।

केचिदारोप्यमाणाः शब्दोपात्ताः केचिदर्थसामर्थ्यादवसेयाः, इत्येकदेशविवर्तनात् एकदेशविवर्ति । यथा

जस्स रणन्तेउरए करे कुणंतस्स मण्डलग्गलअं ।
रससंमुही वि सहसा परंमुही होइ रिउसेणा ॥४२२॥

अत्र रणस्यान्तःपुरत्वमारोप्यमाणं शब्दोपात्तम् मण्डलाग्रलताया नायिकात्वं रिपुसेनायाश्च प्रतिनायिकात्वमर्थसामर्थ्यादवसीयते, इत्येकदेशे विशेषेण वर्तनादेकदेशविवर्ति ।

साङ्गमेतत्

उक्तद्विभेदं सावयवम् ।

बालचित्तानुरञ्जनी—उदाहरति **जस्सेति** । रिउसेणा रिपुसेना । रणंतेउरे रणान्तःपुरे । मण्डलग्गलअं मण्डलाग्रलताम् । करे कुणंतस्सं करे कुर्वतः । जस्स यस्य । रससंमुहीवि रससंमुख्यपि । सहसा, परंमुही पराङ्मुखी । होई भवति । अत्र सर्वविषयत्वप्रतीतेरेकदेशवर्तित्वं कथमित्याह **अत्रेति** । सङ्ग्रामान्तःपुररूपेण नायिकाप्रतिनायिकात्वप्रतीतेः एकदेशविवर्तित्वमित्यर्थः । इतोऽपि विभागं वक्तुकाम उक्तमेकत्र सङ्कलयति **साङ्गमिति** । व्याकरोति उक्त[द्विभेद]मिति । द्विभेदं समस्तवस्तुविषयैकदेशवर्त्तिरूपम् ।

सारबोधिनी—भेदान्तरमाह **श्रौता इति** । **जस्सेति** ।

यस्य रणान्तःपुरे करे कुर्वतो मण्डलाग्रलताम् ।
रससंमुख्यपि सहसा पराङ्मुखी भवति रिपुसेना ॥

मण्डलाग्रः खड्गः। करे करणं युद्धार्थं रतार्थञ्च। रसो वीरः शृङ्गारश्च। सामुख्यं युयुत्सा रतेच्छा च। पराङ्मुखता युद्धात् प्रियसङ्गताच्च निवर्तनम्। ननु परम्परितरूपके 'विद्वन्मानसे'त्यादौ राज्ञो हंसत्वारोपो मनसि सरस्त्वारोपं यथापेक्षते तथात्रापि नायिकाप्रतिनायिकात्वारोपं रणस्यान्तःपुरत्वारोपोऽपेक्षत इति परम्परितत्वमस्य स्यादिति चेन्न। हेतुफलयोः शाब्दत्व एव परम्परितत्वादिति। अत्र प्राञ्चः, उपमायामपि एकदेशविवर्तितत्वमिच्छन्ति। यथा—

नेत्रैरिवोत्पलैः पद्मैर्मुखैरिव सरःश्रियः।
पदे पदे विभान्ति स्म चक्रवाकैः स्तनैरिव॥

इत्यत्रोत्पलादिषु नेत्रसाम्यस्य शाब्दत्वात् सरःश्रीषु धर्मस्यार्थत्वाच्च स्तनादिधर्मनिर्देशात्। न चेयं समासोक्तिः श्लिष्टविशेषणासंभवात्। यत्र तु श्लिष्टविशेषणं संभवति तत्र समासोक्तिसङ्कीर्णमेव। यथा—

ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्दधानार्द्रनखक्षताभम्।
प्रसादयन्ती सकलङ्कमिन्दुं तापं रवेरभ्यधिकं चकार॥

साङ्गमिति। अनन्तरोक्तं व्युदस्यति द्विभेदमिति।

निरङ्गं तु शुद्धम्

यथा

कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्
सखीं कान्तोदन्तं श्रुतमपि पुनः प्रश्नयति यत्।
अनिद्रं यच्चान्तः स्वपिति तदहो वेद्म्यभिनवां
प्रवृत्तोऽस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकाम्॥४२३॥

बालचित्तानुरञ्जनी—निरवयवमाह निरङ्गन्त्विति। अङ्गविकल्पाभावे शुद्धम्। तदुदाहरति कुरङ्गीति। अहो सखि यत् इयं गीतध्वनिषु कुरङ्गीव अङ्गानि स्तिमितयति यच्च सखीश्रुतमपि कान्तोदन्तं सखीं पुनः प्रश्नयति, प्रश्नवन्तं करोति। 'विन्मतो लुगि'ति [अ० ५।३।६५] मतुपो लुक्। कृतपूर्वी-कटमिति न्यायेन द्वितीया। यच्च, अनिद्रं यथा भवति तथा अन्तः स्वपिति तत् तस्मात् कारणात् तस्याः हृदि अभिनवां, प्रेमैव लतिका तां प्रेमलतिकां सेक्तुं मनसिजः प्रवृत्त इति वेद्मि। अत्र लतिकालक्षणः अवयवी निरूपितो न त्वन्यत् किमपि विशेषणमुक्तमिति निरवयवमिदं रूपकम्।

सारबोधिनी—अङ्गं आरोपकारणम्। निरङ्गं अवयविमात्रनिरूपणम्। अत एव शुद्धमिति। रूपकान्तरामिश्रणात्। कुरङ्गीति। स्तिमितयति निष्क्रियं करोति। प्रश्नयति प्रश्नविषयं करोति। अंतः स्वपिति। नयनमुद्रणेऽपि विषयं न गृह्णाति। अभिनवामिति। तस्यामेव सेकोचित्यात्। अत्र प्रेम्णि लतिकात्वमात्रारोपो न तु तदुपपादकोऽन्यः कोऽपीति निरङ्गता।

माला तु पूर्ववत् ॥९४॥

मालोपमायामिवैकस्मिन् बहव आरोपिताः । यथा

सौन्दर्यस्य तरङ्गिणो तरुणिमोत्कर्षस्य हर्षोद्गमः
कान्तेः कार्मणकर्म नर्मरहसामुल्लासनावासभूः ।
विद्या वक्रगिरां विधेरनवधिप्रावीण्यसाक्षात्क्रिया
बाणाः पञ्चशिलीमुखस्य ललनाचूडामणिः सा प्रिया ॥४२४॥

बालचित्तानुरञ्जनी—आद्यस्य द्वितीयं भेदमाह **मालेति** । यद्यपि कारिकाकारेण मालोपमा पृथक् नोक्ता तथापि कारिकावृत्त्योरेककर्तृकतया अभेदविवक्षया उक्तं पूर्ववदिति । उदाहरति **सौन्दर्यस्येति**। सौन्दर्यस्य तरङ्गिणी नदी, तरुणिमोत्कर्षस्य हर्षोद्गमः, कान्तेः कार्मणकर्म, नर्मरहसामुल्लासनावासभूः, विद्या वक्रगिरां, विधेः अनवधिप्रावीण्यसाक्षात्क्रिया, पञ्चशिलीमुखस्य प्राणाः, ललनाचूडामणिः सा प्रिया अवर्तत, इत्यर्थः । अत्रैकस्यां प्रियायां तरङ्गिणी त्वादयो बहव आरोप्यन्ते ।

सारबोधिनी—**माला तु पूर्ववदिति** । पूर्वपदेनोपमानुकर्षणम् । अत्रेदं बोध्यम् । मालोपमा वृत्तौ लक्षिता कारिकायां सा दृष्टान्तीकृतेति वृत्तिकृत्कारिकाकृतोरैक्यमिति । **सौन्दर्यस्येति** । **तरङ्गिणीति** तरङ्गपदेनोत्तरोत्तरादविच्छेदः सूचितस्तत्त्वलाभेन हर्षः, वशीकरणोपायः कार्मणम् । प्रियायामारोपविषये तरङ्गिणीत्वादयो बहव आरोप्या इति माला ।

नियतारोपणोपायः स्यादारोपः परस्य यः ।
तत्परम्परितं श्लिष्टे वाचके भेदभाजि वा ॥९५॥

यथा

विद्वन्मानसहंस वैरिकमलासङ्कोचदीप्तद्युते
दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर ।
सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो
साम्राज्यं वरवीर वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ॥४२५॥

अत्र मानसमेव मानसम् कमलायाः सङ्कोच एव कमलानामसङ्कोचः दुर्गाणाममार्गणमेव दुर्गायाः मार्गणम् समितां स्वीकार एव समिधां स्वीकारः, सत्ये प्रीतिरेव सत्यामप्रीतिः, विजयः परपराभव एव विजयोऽर्जुनः, एवमारोपणनिमित्तो हंसादेरारोपः ।

यद्यपि शब्दार्थालङ्कारोऽयमित्युक्तम् वक्ष्यते च तथापि प्रसिद्ध्यनुरोधादत्रोक्तः, एकदेशविवर्ति हीदमन्यैरभिधीयते ।

बालचित्तानुरञ्जनी—तृतीयस्य लक्षणमाह **नियतेति** । नियतं व्यवस्थितमारोपणमुपायो यस्यारोपस्य एवंविधः परस्य उत्तरस्य आरोपः तत्परम्परितम् । तद् द्विविधम् वाचके श्लिष्टे, वाचके भेदभाजि च । तत्राद्यमुदाहरति **विद्वन्मानसहंसेति** । प्राग्भावः पूर्वभावः । अत्र मानसमेव मानसं, चित्तमेव सरोविशेषः इत्यारोपो हंसारोपे निमित्तम् । एवमुत्तरत्रापि । वैरिणां कमलायाः लक्ष्म्याः सङ्कोच एव पद्मानां असङ्कोचः । तत्र सूर्यः । दुर्गाणां नगराणां अमार्गणं सिद्धत्वमेव [?] दुर्गायाः देव्याः अन्वेषणं तत्र महेश । समितां युद्धानां स्वीकार एव समिधामिन्धनानां स्वीकारः । तत्र वह्निः । सत्ये वचने प्रीतिरेव सत्यां गौर्यां अप्रीतिः तद्विधाने दक्षप्रजापते । विजयस्य युद्धोत्कर्षस्य प्राग्भावः प्राथमिकत्वमेव विजयात् अर्जुनात् पूर्वजत्वं तादृशम् ।

ननूभयालङ्कारोऽयं श्लिष्टपरम्परितं नाम कथमयमर्थालङ्कारेषु गण्यत इत्यत आह **यद्यपीति** । मानसशब्दस्य पर्याये निक्षिप्ते न भवत्येव रूपकप्रतीतिरिति शब्दालङ्कारता । हंसशब्दस्य पर्याये क्षिप्ते भवति रूपकमित्यर्थालङ्कारता । अतः शब्दालङ्काररूपमिदं रूपकं स्यान्न त्वर्थालङ्कार इत्यत्र कथनमुचितं न भवति यद्यपि तथापि प्रसिद्ध्यनुरोधादत्रोक्तमिति भावः । अथ न केनचिदेतत् परम्परितसंज्ञमुक्तमित्यत आह **एकदेशेति** । अन्यैरुद्भटादिभिः एकदेशविवर्तीत्युच्यते ।

सारबोधिनी—**नियतेति** । नियते वर्णनीयत्वेन आवश्यके प्रकृते य आरोपः । अन्यत् तादात्म्यस्याहार्यप्रत्ययः । तस्योपाय उपपादकः । परस्याप्रकृतस्यारोपः । परम्परा निरूप्यते । परम्परितम् इतच्-प्रत्ययः । **वाचक इति** । वाचके बोधके, पदस्येत्यनुषज्यते । अभिधायाः नियन्त्रणेन । सरस्यभिधायकमेव मानसपदम् । न त्वेकत्राभिधानियन्त्रणात् व्यञ्जकमिति । भेदभाजि भिन्ने इत्यर्थः । हंसः पक्षिभेदः । दीप्तद्युतिः सूर्यः । नीललोहितः शिवः । स्वीकारः अनुपलक्षणम् । वैश्वानरो वह्निः । दक्षः क्षिप्रकार-प्रजापतिभेदः । विजयोऽर्जुनः पाण्डवभेदश्च । परम्पराभावश्च प्राग्भावः । प्रथमत एवोत्पत्तिः । न तु पराभवानन्तरं अग्रजत्वञ्च । भीमो भीषणो भीमसेनश्च । क्रिया इत्याख्यातपदम् । मानसं मनः मानसञ्च । दुर्गाणां अलङ्घनोपायानां दुर्गायाः पार्वत्याः समितां युद्धानां समिधामिन्धनानाञ्च । सत्ये अमृतभाषणे, सत्यां दक्षकन्यायाम् । एवमारोपो मनःप्रभृतीनां सरोवरतादात्म्यारोपः स एव निमित्तं यस्य हंसादेरारोपस्येत्यर्थः ।

यद्यपीत्यादि । मानसादिशब्दानां परिवृत्त्यसहिष्णुत्वेन हंसादिपदानाञ्च तत्सहत्वेन च उभयालङ्कारतेत्यर्थः ।

भेदभाजि यथा

आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः
पूर्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः ।
सङ्ग्रामामृतसागरप्रमंथनक्रीडाविधौ मन्दरो
राजन् राजति वीरवैरिवनितावैधव्यदस्ते भुजः ॥४२६॥

अत्र जयादेर्भिन्नशब्दवाच्यस्य कुञ्जरत्वाद्यारोपे भुजस्य, आलानत्वाद्यारोपो युज्यते ।

बालचित्तानुरञ्जनी—द्वितीयं प्रकारमुदाहरति भेदभाजीति । हे राजन् जय एव कुञ्जरः तस्य आलानं गजबन्धनस्थानम् । विपदेव वारिधिः तस्य दृषदां सेतुः करवाल एव चण्डमहाः सूर्यः तस्य पूर्वाद्रिः । श्रियः लीलोपधानम् । सङ्ग्राम एवामृतसागरः तस्य प्रमथनमेव क्रीडाविधिः तस्मिन् मन्दरः । वीरवैरिवनितावैधव्यदः ते भुजः राजति । जय एव कुञ्जरः । ननु मानसशब्दवत् एकशब्दोऽत्रोभयार्थोऽस्तीति भेदभाक्तं लीलोपधानमित्यत्र उपधानपदे श्लिष्टो वाचकः इत्यनन्तरोक्तमेव रूपकमत्र न तु यदिदं प्रस्तुतश्रियो वनितात्वमपि निरूप्यत इत्यत्राह[?] अत्रेति ।

सारबोधिनी—आलानमिति । आलानं गजबन्धनस्तम्भः । करवालः खड्गः । चण्डमहाः रविः । सुखस्वापो लीला । उपधानं शिरोनिधानं तूलपटः ।

अलौकिकमहालोकप्रकाशितजगत्त्रयः ।
स्तूयते देव सद्वंशमुक्तारत्नं न कैर्भवान् ॥४२७॥

निरवधि च निराश्रयं च यस्य स्थितमनिवर्तितकौतुकप्रपञ्चम् ।
प्रथम इह भवान् स कूर्ममूर्तिर्जयति चतुर्दशलोकवल्लिकन्दः ॥४२८॥

इति च, अमालारूपकमपि परम्परितं द्रष्टव्यम् ।

किसलयकरैर्लतानां करकमलैः कामिनां मनो जयति ।
नलिनीनां कमलमुखैः मुखेन्दुभिर्योषितां मदनः ॥४२९॥

इत्यादि रशनारूपकं न वैचित्र्यवदिति न लक्षितम् ।

बालचित्तानुरञ्जनी—श्लिष्टं मालारूपकमुदाहरति अलौकिकेति । हे देव अलौकिकश्चासौ महांश्चासावालोकश्च ज्ञानं तेन प्रकाशितं जगत्त्रयं येन । सद्वंशस्य मुक्तारत्नं भवान् कैर्न स्तूयते ? सर्वैः स्तूयत

इत्यर्थः । अत्र वंशोऽन्वय एव वेणुः तस्य मुक्तारत्नमिति श्लेषः । श्लिष्टस्य वेणुत्वारोपः वर्णनीयस्य मुक्तामणित्वारोपे निमित्तम् । अश्लिष्टं मालारूपकमुदाहरति **निरवधीति** । अनिर्वर्तितः कौतुकप्रपञ्चो येन एवंविधं यस्य स्थितं स्थितिः निरवधि निराश्रयं च । इह प्रथमा कूर्ममूर्तिः । चतुर्दश लोका एव वल्लयस्तासां कन्दः स भवान् जयति । आदिकमठस्य कन्दत्वे लोकानां वल्लित्वं हेतुः । वाचकश्चात्र न श्लिष्टः । मालाप्रस्तावात् रशनामुदाहरति **किसलयेति** । मदनः लतानां किसलयकरैः कामिनां करकमलैः कमलिनीनां कमलमुखैः योषितां मुखेन्दुभिः जगतां सम्बन्धि मनो जयति । किसलयान्येव कराः, करा एव कमलानि, कमलान्येव मुखानि, मुखान्येव इन्दव इति सर्वेषां परस्परघटनात् रशना । कारिकायामेवंविधस्य लक्षणं किमिति नोक्तमित्यत आह **नेति** । उद्रिक्तस्य वैचित्र्यस्याभावादेवंविधं न लक्षितमित्यर्थः ।

सारबोधिनी—क्रमेणामालापरम्परितद्वयमाह **अलौकिकेत्यादि** । अलौकिकस्य यस्य उत्सवस्य आलोको दर्शनं स एव महत्त्वाश्रयो दीप्तिः । सद्वंशो महाकुलम् स एवोत्कर्षाश्रयो वेणुमुक्तारत्नं श्रेष्ठमुक्तारत्नमपि रत्नोत्पत्तेः स्थानं, सा मुक्ता तु बहुमूल्या तेन रत्नत्वाभिधानम् । अत्रैकत्र राजनि मुक्तात्वारोपे महादीप्तित्ववेणुत्वारोपौ निमित्ते इति माला । **निरवधीत्यादि** । निरवध्यनवच्छिन्नकालं स्थितं स्थितिः । कौतुकमुत्सवः तद्धेतवो विवाहभृत्यादयः तस्य प्रपञ्चो नानाप्रकारता । पक्षे अनिवर्तितः कौतुकेन प्रपञ्चः संसारो येन । कूर्ममूर्तिः कमठाकृतिः । प्रथमोऽनाधुनिकः । कन्दो मूलम् । राज्ञि कूर्मत्वारोपे कन्दत्वारोपो वल्लित्वारोपश्च हेतुरिति माला । **किसलयेति** । लतानां नलिनीनां च स्त्रीत्वमार्थम् । करकमलैरिति योषिद्भिरन्वेति । मुखेन्दुभिरित्यपि पूर्वपूर्वारोप्यमाणानां परपरत्वारोपविषयत्वात् पश्चाद्वलनया रशनारूपता ।

प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः ।

उपमेयमसत्यं कृत्वोपमानं सत्यतया यत् स्थाप्यते सा तु, अपह्नुतिः ।

उदाहरणम्

अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि ।
अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे
रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ॥४३०॥

बालचित्तानुरञ्जनी—प्रकृतस्योपमेयतायाः । निषेधशब्दार्थमाह **उपमेयमसत्यं कृत्वेति** । अपह्नुतिस्त्रिधा । अपह्नवपूर्व आरोपः, आरोपपूर्वोऽपह्नवश्च, छलादिशब्दप्रयोगश्चेति । तत्राद्यमुदाहरति **अवाप्त इति** । हे शैलतनये पार्वति, परिणतकान्तेश्चन्द्रस्य वपुषि प्रागल्भ्यमवाप्तः अयं कलङ्को न विलसति । विगलदमृतस्यन्दशिशिरे अमुष्य उरसि गाढं रतिश्रान्ता यामिनीकामिनी शेते इति मन्ये । अत्र वाक्यद्वयेन चान्द्रमसं कलङ्कं मुख्यया निषेधवृत्त्या मिथ्यात्वेनावस्थाप्य तत्प्रतिवस्तुभूता हृदयाधिशायिनी निशीथिनीनितम्बिनी सत्यतया अवस्थाप्यते । अयं चापह्नवपूर्वक आरोपः । आरोपपूर्वोऽपह्नवो यथा—

विकसदमरनारीनेत्रनीलाब्जखण्डा-

न्यधिवसति सदा यः संयमाधःकृतानि॥

सारबोधिनी—ननु निषिध्येत्यस्य निषेधाभिधाने 'शिखा धूमस्येयं परिणमति रोमावलिवपुरित्यादावपह्नुतिर्न स्यात् निषेधाभिधानाभावात् इत्यत आह **उपमेयमसत्यं कृत्वेति**। असत्यतां प्रतिपाद्य, तच्च शब्देनार्थतो वेति न कश्चिद्विशेषः। **अवाप्त इति**। प्रागल्भ्यं प्रकटत्वम्। **शिशिर इति**। श्रान्तानां शीतलस्थाने सुखस्वापो भवत्येव। 'नैवायमि'त्यनेन कलङ्कस्यासत्यतायाः शब्देन बोधनम्।

इत्थं वा

बत सखि कियदेतत् पश्य वैरं स्मरस्य

प्रियविरहकृशेऽस्मिन् रागिलोके तथा हि।

उपवनसहकारोद्भासिभृङ्गच्छलेन

प्रतिविशिखमनेनोट्टङ्कितं कालकूटम् ॥४३१॥

अत्र हि न सभृङ्गाणि सहकाराणि अपि तु सकालकूटाः शरा इति प्रतीतिः।

बालचित्तानुरञ्जनी–[छल]प्रयोगमुदाहरति **बतेति**। हे सखि, प्रियविरहकृशे अस्मिन् रागिलोके स्मरस्य कियदेतत् वैरम् पश्य। बतेति दुःखे। तथाहि। उपवनेषु ये रसालाः तेषु उद्भासिनो ये मधुकराः तद्व्याजेन अनेन कामेन प्रतिवाणं कालकूटं उट्टङ्कितम्। अत्र छलप्रयोगस्य निषेधपर्यवसायितामाह **न सभृङ्गाणीति**। एकवाक्यं च स्पष्टम्। **प्रतीतिरिति**। नाभिधेति यावत्।

सारबोधिनी—**इत्थं वेति**। असत्यताबोधकभङ्गीभेदेन लक्ष्यभेदसूचनम्। **बतेति**। **कियत् इति** कीदृक्। **उट्टङ्कितं** प्रकाशितम्। अत्र छलपदेन भृङ्गानामसत्यत्वप्रतिपादनम्, सत्यत्वे व्याजताविरहादित्याक्षेपलभ्यो निषेधः। एवमुत्तरत्रापि।

एवं वा

अमुष्मिँल्लावण्यामृतसरसि नूनं मृगदृशः

स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः।

यदङ्गाङ्गाराणां प्रथमपिशुना नाभिकुहरे

शिखा धूमस्येयं परिणमति रोमावलिवपुः ॥४३२॥

अत्र न रोमावलिः, धूमशिखेयमिति प्रतिपत्तिः। एवमियं भङ्ग्यन्तरैरप्यूह्या।

बालचित्तानुरञ्जनी—वैचित्र्यान्तरप्रदर्शनाय पुनरुदाहरति **अमुष्मिन्निति** । शिवदग्धः कामः कुरङ्गाक्ष्याः पृथुजघनभागे अमुष्मिन् लावण्यामृतसरसि नूनं पतितः । यस्य कामस्याङ्गाङ्गारकाणां पिशुना मध्ये रोमावलिवपुः इयं धूमस्य शिखा परिणमति । अत्र प्रकृतवस्त्वन्तररूपाभिधायिशब्द-निबन्धनोऽपह्नव इति पूर्वस्माद्विशेषः । उभयोर्वाच्यत्वमुचितमिति भावः ।

सारबोधिनी–अमुष्मिन्निति । शर्वः शिवः । प्लुष्टो दग्धः । प्रशमो निर्वाणता । पिशुना सूचिका । रोमावलिवपुस्तदाकारा । 'गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन । यदि श्लेषेणान्यथा वान्यथयेत्साप्यपह्नुतिः' ॥

श्लेषः स वाक्य एकस्मिन् यत्रानेकार्थता भवेत् ॥९६॥

एकार्थप्रतिपादकानामेव शब्दानां यत्रानेकोऽर्थः स श्लेषः ।

उदाहरणम्

उदयमयते दिङ्मालिन्यं निराकुरुतेतरां
नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः ।
रचयतितरां स्वैराचारप्रवर्तनकर्तनं
बत बत लसत्तेजःपुञ्जो विभाति विभाकरः ॥४३३॥

अत्राभिधाया अनियन्त्रणात् द्वावप्यर्कभूपौ वाच्यौ ।

बालचित्तानुरञ्जनी--अथ श्लेषं लक्षयति **श्लेष इति** । एकस्यार्थस्योक्तौ सामान्यसिद्धायां संयोगादिव्यवस्थापकाभावात् उक्तेरनियन्त्रणात् अनेकस्यार्थस्याभिधानम् । अभिधेयमर्थमार्थोपश्लेष इति व्याकरोति **एकार्थेति** । प्रत्यर्थं शब्दनिवेश इति मतमाश्रित्योच्यत इति भेदः । उदाहरति **उदयमिति** । विभानां कान्तीनां, अधिपो राजा उदयं समृद्धिं अयते प्राप्नोति । दिक् अन्यायमार्गस्तस्य मालिन्यम् निराकुरुतेतरम्, निद्रामुद्रां आलस्यप्रकर्षं निधनम् नाशम् प्राप्नोति । क्रियाः धर्मक्रियाः प्रवर्त्तयति । स्वैराः अनीतिकारिणः, तेषामाचारप्रवृत्तेः कर्त्तनं छेदनम् रचयति । लसत्तेजः-पुञ्जो विभाति । विभाकरः सूर्यः । अयं पक्षः स्पष्टः । नन्वेकस्य शब्दस्य अर्थद्वयवाचकत्वं कथमित्या-शङ्क्याह **अत्रेति** । प्रकरणादेर्नियामकस्यात्राभावात् उभयोर्वाच्यत्वमुदाहार्यमिति भावः ।

सारबोधिनी--श्लेष इति । यत्र शक्यभेदेन शब्दभेदस्तत्र शब्दश्लेषः । यथा दर्शिते नानार्थ-श्लेषे । यत्रैकार्थः शक्योऽपरार्थो निरूढलक्षणाप्रतिपाद्यस्तत्रार्थश्लेषः । वाच्यभेदेन शब्दभेदाभावात् । शब्दश्लेषवत् स्वरूपापह्नवरूपस्य श्लेषस्येहासम्भवात् । किन्त्वर्थयोः श्लेषणादेकप्रतीत्याश्रयणात् श्लेषः । तदाह **एकस्मिन्निति** । एकस्मिन् वाक्ये वाच्यैकत्वेनाभिन्नस्वरूपे अनेकार्थता । शक्त्या निरूढ-लक्षणया च अनेकवैशिष्टचबोधकता । ननु तर्हि पूर्वोक्तं श्वेतो धावति इत्यत्र शब्दश्लेषत्वं विरुध्यत इति

चेन्न । तत्प्राचीनप्रणयादुक्तम् । वस्तुतस्तु तत्राप्यर्थश्लेषत्वमेव । **उदयमिति**। उदयं पूर्वाचलाधिरोहणम्। यद्वा उदयम् पूर्वाचलम् सम्पदम् च। दिशो मालिन्यमन्धकारम् सम्बन्धात् दिश्यानां जनानां दारिद्र्येण कुवेषता च। निद्रा मनःसंमीलनम् निरुत्साहता च । क्रियां गमनादिकां सदाचारश्च । स्वैराचारोऽभिसारादि वेदानुल्लङ्घ्य स्वेच्छयाऽऽचरणं च। तेजसां रश्मीनां पुञ्जः, मनागपि स्वावमानताक्षमता च । विभाकरः सूर्यः, राज्याभिषेककाले पुरोहितादिभिस्तत्तुल्यत्वेन प्रतापरुद्रादिवत् सङ्केतितो नृपतिविशेषश्च। न च तत्र शक्तिरेव, तत्कल्पने मानाभावात्। अत्र सूर्यानुकूला अर्था वाच्याः, नृपानुकूलाश्च लक्ष्या इत्यर्थः। अर्थान्तरस्य व्यङ्ग्यतां निरस्यति अभिधाया इति । **वाच्याविति** । **शक्ति**तुल्यत्वात् समकाले प्रतीयमानावित्यर्थः। अयं पारिभाषिकोऽर्थश्लेषः। श्लेषनिरूपणन्तु वाच्यभेदेन भिन्ना यदित्यनेन शब्दार्थभेदेन कृतमेव ।

परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः ॥

प्रकृतार्थप्रतिपादकवाक्येन श्लिष्टविशेषणमाहात्म्यात् न तु विशेष्यस्य सामर्थ्यादपि यत् अप्रकृतस्यार्थस्याभिधानम् सा समासेन सङ्क्षेपेणार्थद्वयकथनात् समासोक्तिः ।

उदाहरणम्

लहिऊण तुज्झ बाहुप्फंसं जीए स को वि उल्लासो ।
जअलच्छी तुह विरहे ण हूज्जला दुब्बला णं सा ॥४३४॥

अत्र जयलक्ष्मीशब्दस्य केवलं कान्तावाचकत्वं नास्ति ।

निदर्शना ।

अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः ॥९७॥

निदर्शनं दृष्टान्तकरणम् ।

बालचित्तानुरञ्जनी—समासोक्तिं लक्षयति **परोक्तिरिति** । श्लिष्टैः समानैर्भेदकैर्विशेषणैः परस्याप्रस्तुतस्य उक्तिः प्रतिपादनम् समासोक्तिरित्यर्थः । व्याकरोति **प्रकृतेति**। विशेष्यस्योपमेयस्य। उदाहरति **लहीति**। हे राजन् ! तुह तव। बाहुप्फंसम् बाहुस्पर्शम्। लहिऊण लब्ध्वा जीए यस्याः। स कोवि उल्लासो स कोऽप्युल्लासः। सा जयलच्छी जयलक्ष्मीः। तुह तव विरहे। ण होतु न भवेत्। सा दुर्बला। ननु बाहुस्पर्शन पाणिपीडनेन वा दुर्बला निष्प्रभा कृशा च इत्येतानि विशेषणानि कान्तया सहमानानि जयलक्ष्मीरिति विशेष्यं तु न सममित्याह **अत्रेति** । निदर्शनालङ्कारलक्षणं सूत्रमुपादाय व्याकरोति **निदर्शनेति**।

सारबोधिनी--समासोक्ति लक्षयति **परोक्तिरि**ति। परोऽप्रकृतः। **भेदकै**र्विशेषणैः। **श्लिष्टैः** प्रकृताप्रकृतसाधारणैः। विशेषणं तद्बोधकं पदम्। माहात्म्यबोधकत्वेसामर्थ्यम्। **न तु विशेष्ये**ति। तेनोपमाध्वनौ नातिव्याप्तिः। तत्र विशेष्यद्वयस्य तद्वाचकशब्देनैव प्रतिपादनात्। अप्रकृतस्य जयलक्ष्म्यादिगततया प्रतीयमानस्य नायिकाव्यवहारस्याभिधानं व्यञ्जनम्। अभिधाया अभावात्।

लब्ध्वा तव बाहुस्पर्शं यस्याः स कोऽप्युल्लासः।

जयलक्ष्मीस्तव विरहे न खलूज्ज्वला दुर्बला ननु सा॥

अत्रेति। केवलपदमेवार्थे। जयलक्ष्मीशब्दस्यैव कान्तावबोधकत्वं नास्ति, तस्य तत्राशक्तेः। विशेषणानां तु लहिऊणेत्यादिपदानां उभयगतबाहुस्पर्शप्राप्त्यादिबोधकत्वमस्त्येवेत्यर्थः। अत्र कान्ताव्यवहारस्य जयलक्ष्मीव्यवहारे आरोप्यमाणस्य चमत्कारकतेति, "यदुक्तं समासोक्तिसमैर्यत्र काव्यलिङ्गविशेषणैः व्यवहारसमारोपः। प्रकृतेऽन्वयवस्तुना" इति। लिङ्गं स्त्रीपुंलिंगादि। यथा—"स्पृशति तिग्मरुचौ ककुभःकरैरि"त्यादावन्वयस्य कथमेकदेशविवर्तिरूपकाद् भेद इति चेत्, अत्रास्मद्गुरुचरणाः, अनयोरेकतरस्य संसर्गारोपरूपत्वादन्यतरस्य तादात्म्यारोपरूपत्वात् भेद इत्याहुः।

उदाहरणम्

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।

तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥४३५॥

अत्र उडुपेन सागरतरणमिव मन्मत्या सूर्यवंशवर्णनमित्युपमायां पर्यवस्यति। यथा वा

उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्।

वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्॥४३६॥

अत्र कथमन्यस्य लीलामन्यो वहतीति तत्सदृशोऽयमित्युपमायां पर्यवसानम्।

बालचित्तानुरञ्जनी--उपमायां पर्यवसितः सन् स्वार्थनिर्वाहकः। **अभवन्निति**ः। दश दाडिमाः षडपूपाः इत्येतद्वत् इदमुभयार्थकं स्यादित्यत आह **उपमापरिकल्पक इति**। उपमानोपमेयभावे पर्यवस्यतीत्यर्थः। तस्या वाक्यार्थपदार्थवृत्तिभेदाद्द्वैरूप्यम्। असंभवद्वस्तुसंबन्धः निदर्शनालङ्कारः। उदाहरति **क्व सूर्ये**ति। अत्र वाक्ययोरनुपपद्यमान एव सम्बन्धः। उपमायां पर्यवसितत्वात् उडुपेन सागरतरणमिवेत्यर्थो लभ्यत इत्यादि। **अत्रे**ति। उदाहरणान्तरमाह **यथे**ति। **विततोर्ध्वरश्मिरज्जौ**

अहिमरुचावुदयति सति हिमधाम्नि चास्तं याति सति अयं गिरिः विलम्बिघण्टाद्वयपरिवारित-वारणेन्द्रलीलां वहति । अत्र वारणेन्द्रलीलां पर्वतः कथं वहतीत्यनुपपद्यमान एव संबंध इति उपमापर्यवसानमाह अत्रेति ।

सारबोधिनी—तत्राद्यमुदाहरति **क्व सूर्येति** । अत्राल्पविषयमत्या रघुवंशवर्णनं न स्यादित्येको वाक्यार्थः । अपरस्तु—उडुपेन सागरतरणम् । न चोपमानोपमेयभावं विना अनयोः परस्परसंवन्ध इति व्यङ्ग्योपमया स्थिरीकरणम् तदाह **उडुपेनेत्यादि** । द्वितीयामुदाहरति **उदयतीति** । लक्ष्ये लक्षणं सङ्गमयति **कथमित्यादि** ।

दोर्भ्यां तितीर्षति तरङ्गवतीभुजङ्गमादातुमिच्छति करे हरिणाङ्कविम्वम् ।
मेरुं लिलङ्घयिषति ध्रुवमेष देव यस्ते गुणान् गदितुमुद्यममादधाति ॥४३७॥

इत्यादौ मालारूपाप्येषा द्रष्टव्या ।

स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च सापरा ।

क्रिययैव स्वस्वरूपस्वकारणयोः संवन्धो यदवगम्यते सा अपरा निदर्शना । यथा

उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् ।
शैलशेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः ॥४३८॥

अत्र पातक्रियया पतनस्य लाघवे सति उन्नतपदप्राप्तिरूपस्य च सम्बन्धः ख्याप्यते ।

बालचित्तानुरञ्जनी—मालारूपां निदर्शनामुदाहरति **दोर्भ्यामिति** । भो देव यस्तव गुणानादातुमुद्यममादधाति एष पुरुषः दोर्भ्यां तरङ्गवतीभुजङ्गं तितीर्षति करे, हरिणाङ्कबिम्बमादातुमिच्छति । भो देव यस्तव गुणानादातुमुद्यममादधाति मेरुं लिलङ्घयिषति । अत्रापि अनुपपद्यमान एव संबन्ध इति उपमानपर्यवसितत्वात् निदर्शनम्, मालायोगात् मालानिदर्शनालङ्कारः इत्यर्थः । संभवद्वस्तुसंबन्धान्निदर्शनामाह **स्वेति** । व्याकरोति **क्रिययैवेति** । **अवगम्यत इति** । यत् सा निदर्शनेति सम्बन्धः । उदाहरति **उन्नतमिति** । यो लघुः पुरुषः स उन्नतं पदमवाप्य हेलयैव पतेदिति ब्रुवन् पर्वताग्रगतः पाषाणकणः वायुना कम्पितः सन् चारु अधः पतति । पततीति या पतनक्रिया सा च तस्या हेतुः लाघवे सति उन्नतपदप्राप्तिः तयोः अन्वयः उन्नतं पदमवाप्य यो लघुः पतेदिति विधिक्रियैव शुद्धया ख्याप्यत इत्याह **अत्रेति** । ब्रुवन्निति तत् ख्यापनप्रयोगादस्ति वस्तुसम्बन्धः । दृषत्कणः इति सर्वो लोकः पततीति उपमाविश्रान्तिश्च । उक्तञ्च

अभवन् वस्तुसम्बन्धो भवन् वा यत्र कल्पयेत् ।
उपमानोपमेयत्वं कथ्यते सा निदर्शना ।।

इति ।

सारबोधिनी—दोर्भ्यामिति । अत्रैकस्य गुणगणनोद्यमस्य समुद्रतितीर्षादीनि वस्तूपमानीति माला । अपरां निदर्शनां लक्षयति स्वस्येति । क्रिययेति । तेनेयं सम्भवद्वस्तुमूलेति ध्वनितम् । अपरा न त्वन्योऽलङ्कारः, वाक्यार्थयोरुपपाद्योपपादकभावेन सामान्येन धर्मेण क्रोडीकृतत्वात् । उपपादकत्वन्तूपमया सम्बन्धान्तरेणेत्यन्यदेतत् । अपरेत्यस्यालङ्कारान्तरनामताशङ्काव्युदासाय विवृणोति निदर्शनेति ।

उन्नतं पदं उत्कृष्टां संपदम्, वृद्धिस्थानञ्च । लघुरल्पबुद्धिरगुपरिमाणयोगश्च । पतनं संपत्तिभ्रंशोऽधःसंयोगश्च । चारुर्मृदुः अन्यथोर्ध्वप्रसरणमपि स्यात् । यो लघुः स उन्नतं पदं प्राप्य पतेदित्यन्वयः । पततीति क्रियया पतेदिति क्रियाया लघोरुन्नतपदप्राप्तिरूपतद्धेतोश्च संबन्धः ख्याप्यते । स चान्यस्यापि लघोरुन्नतपदप्राप्तिस्तद्वत् पतनायेति दृष्टान्ते पर्यवस्यतीति निदर्शनेत्युच्यते ।

अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ।।६८।।

अप्राकरणिकस्याभिधानेन प्राकरणिकस्याक्षेपोऽप्रस्तुतप्रशंसा ।

कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा ।।६९।।

तदन्यस्य कारणादेः । क्रमेणोदाहरणम्

याताः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ।।४३९।।

अत्र प्रस्थानात् किमिति निवृत्तोऽसीति कार्ये पृष्टे कारणमभिहितम् ।

बालचित्तानुरञ्जनी—अप्रस्तुतप्रशंसालङ्कारं लक्षयति अप्रस्तुतेति । व्याकरोति **अप्राकरणिकस्येति** । अस्याः प्रथमं पञ्चधा विभागमाह **कार्ये इति** । कार्ये प्रस्तुते तदन्यस्य कारणस्य वचः । **निमित्ते** प्रस्तुते तदन्यस्य कार्यस्य वचः । सामान्ये प्रस्तुते तदन्यस्य विशेषस्य वचः । तुल्ये प्रस्तुते तदन्यस्य तत्तुल्यस्य वचः । इति पञ्चधा विभाग इत्यर्थः । आद्यमुदाहरति **याता इति** । हे सुन्दरि देशान्तरगताः पुरुषाः पुनः किं न मिलन्ति । अतः मत्कृते त्वय चिन्ता नो कार्या । सुतरां कृशासि स्वभावत एव त्वं कृशा चिंतया तु सुतरां कृशा भविष्यसि । अतो मुञ्च चिन्तामित्यर्थः । एवं सबाष्पे मयि कथयति सति

लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा मन्दंमन्दं तया नायिकया हसितेन भाविमरणोत्साहः सूचितः। यदि मां त्यक्त्वा क्वचिद् यास्यसि तदाहं मरिष्ये इति सूचित इत्यर्थः। प्रस्थानद्वारा कार्यप्रस्तावे प्रस्थानस्य निर्णीतत्वात् कारणं मरणोपक्रमसूचनारूपमभिहितमित्यर्थः।

सारबोधिनी—अप्रस्तुतेत्यादि । अप्रस्तुतस्य अप्रकृतस्य प्रशंसा वर्णना । अर्थान्तरतां वारयति **प्रस्तुताश्रयेति** । प्रस्तुतोत्कर्षपर्यवसायिका प्रस्तुताक्षेपकत्वेन नार्थान्तरतेत्यर्थः । आक्षेपो व्यञ्जनम्। तद्भेदानाह **कार्य इत्यादि**। वचोऽभिधानम् । **कारणादेरिति** । यथासम्भवं प्रतियोगिनो ग्राह्याः । क्रमेणाह **याता इति** । अतिकार्श्यदर्शनादनिष्टाशङ्कया बाष्योद्गमः । गमनानिच्छाज्ञानेन लज्जा। विगलदेव पीतं संवृत्तं अश्रु येन, अमाङ्गल्यभिया हसितेन सकाकुनेति पूरणीयम्। एवमस्याभिप्रायः पदस्य । विरहे न प्राणान् धारयिष्यामीति प्रहासरूपेण । **अत्रेत्यादि** । किं विस्मये । प्रस्थानात् निवृत्तोऽसीत्यत्र यत् कार्यं निवर्तनं तत्रेत्यन्वयः । अत्र मरणसूचनरूपकारणेनाक्षिप्तस्य गमननिवृत्ति-रूपकार्यस्यानुरागोत्कर्षकत्वात् अस्यालङ्कारत्वमिति । एवं सर्वमूह्यम्।

राजन् राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुब्जे भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते।
इत्थं नाथ शुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरात्
चित्रस्थानवलोक्य शून्यवलभावेकैकमाभापते ।।४४०।।

अत्र प्रस्थानोद्यतं भवन्तं ज्ञात्वा सहसैव त्वदरयः पलाय्य गताः इति कारणे प्रस्तुते कार्यमुक्तम्।

बालचित्तानुरञ्जनी—द्वितीयमुदाहरति राजन्निति। हे राजन् राजसुता मां न पाठयति। देव्योऽपि तूष्णीं स्थिताः। हे कुब्जे मां भोजय। कुमारसचिवैः अद्यापि किमर्थं न भुज्यते इत्थं तवारि-भवने पञ्जरादध्वगैर्मुक्तः राजशुकः शून्यवलभौ चित्रस्थान् अवलोक्य एकैकं भापते। शत्रुपलायन-रूपकारणे प्रस्तुते पञ्जरशुकवृत्तान्तलक्षणं कार्यमुक्तमित्याह **अत्रेति**।

सारबोधिनी—राजन् इति। अत्र प्रस्थानोद्यमः कारणम् । अरिपलायनाध्वगवसतिशुकमोच-नादि कार्यम्।

एतत्तस्य मुखात् कियत् कमलिनीपत्रे कणं वारिणो
यन्मुक्तामणिरित्यमंस्त स जडः शृण्वन्यदस्मादपि ।
अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैः
कुत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तःशुचा ।।४४१।।

अत्रास्थाने जडानां ममत्वसंभावना भवतीति सामान्ये प्रस्तुते विशेषः कथितः।

सुहृद्वधूबाष्पजलप्रमार्जनं करोति वैरप्रतियातनेन यः ।
स एव पूज्यः स पुमान् स नीतिमान् सुजीवितं तस्य स भाजनं श्रियः ॥४४२॥

अत्र 'कृष्ण' निहत्य नरकासुरवधूनां यदि दुःखं प्रशमयसि तत् त्वमेव श्लाघ्यः' इति विशेषे प्रकृते सामान्यमभिहितम् ।

तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः । श्लेषः समासोक्तिः सादृश्यमात्रं वा तुल्यात् तुल्यस्य ह्याक्षेपे हेतुः ।

बालचित्तानुरञ्जनी—तृतीयमुदाहरति एतदिति । तस्य पुरुषस्य एतत् कियत् जाड्यं यत् स जडः मुखात् वाङ्मात्रेणैव कमलिनीपत्रे वारिणः कणं मुक्तामणिरित्यमंस्त । अस्मादन्यदपि श्रृणु । शनैः आदीयमाने तत्र अङ्गुल्यग्रलघुक्रियया विलयिनि सति अयं मणिः उड्डीय गत इति अन्तःशुचा अनुदिनं न निद्राति । अत्र जडानां स्वल्पेऽपि महत्त्वसम्भावना भवतीति सामान्ये प्रस्तुते मुक्ताफलभ्रान्तिमल्लक्षणे विशेष उक्त इत्याह **अत्रे**ति । चतुर्थमुदाहरति **सुहृदि**ति । विष्णुना नरकासुरे हते कोऽपि तन्मन्त्री कञ्चन नरकासुरसुहृदं प्रतीदमाह । यः वैरप्रतियातनेन सुहृद्वधूबाष्पजलप्रमार्जनं करोति स एव पूज्यः स पुमान् स नीतिमान् तस्य सुजीवितं स श्रियो भाजनम् । विशेषे वक्तव्ये सामान्यमुक्तमित्याह **अत्रे**ति । पञ्चमस्य त्रैविध्यमाह तुल्य इति ।

सारबोधिनी—एतदिति । मुखादित्यपाये पञ्चमी । तन्मुखादपगतमेतत्कियदिति सम्बन्धः । तत्किमित्याह । कमलिनीपत्रस्थितं वारिकणं मुक्तामणिरित्यमंस्त । यत् अस्मादन्यदपि श्रृणु । आदीयमाने गृह्यमाणे प्रविलयिन्यङ्गुलावेव लीयमाने सति । शनैरित्यादानविशेषणम् । अत्रेत्यादि । वारिकणे मुक्ताधीरित्यर्थः । सुहृदीति । वैरप्रतियातनेन । श्लेषसमासोक्ती तदाभासरूपे, अप्रकृतात् प्रकृताक्षेपे तयोरविषयत्वात् । अप्रकृतयोः प्रकृतयोर्वार्थयोः श्लेषविषयत्वात्, तथा प्रकृते वस्तुनि अप्रकृतव्यवहारारोपस्य समासोक्तित्वात् ।

क्रमेणोदाहरणम्

पुंस्त्वादपि प्रविचलेत् यदि यद्यधोऽपि
यायाद् यदि प्रणयने न महानपि स्यात् ।
अभ्युद्धरेत्तदपि विश्वमितीदृशीयं
केनापि दिक् प्रकटिता पुरुषोत्तमेन ॥४४३॥

बालचित्तानुरञ्जनी—पुंस्त्वादिति । अयं पुरुषः यदि पुंस्त्वादपि प्रविचलेत् यदि अधोऽपि यायात् यदि प्रणयने याचने सति महानपि न स्यात् । लघुरपि स्यादित्यर्थः । तदपि तथापि विश्वमुद्धरेत् ।

केनापि पुरुषश्रेष्ठेन इति ईदृशी इयं दिक् प्रकटिता । कृष्णपक्षे, पुंस्त्वात् प्रचलनं, असुरैरमृतापहारे स्त्रैणावलम्बात् । आदिकमठाद्याकारेण अधोयानं बलियन्त्रणोपक्रमे वामनेन विश्वाभ्युद्धरणं वराहादिना पृथिव्याद्यभ्युज्जीवनम् । अत्र कस्मिंश्चित् पुरुषे प्रस्तुते तत्तुल्यस्वभावस्य भगवतः [अभिधानम्] ।

सारबोधिनी—पुंस्त्वादिति । पुंस्त्वं पुरुषाकारः शौर्यादिः पुंलिङ्गञ्च । अधोगमनमप्रकृष्ट-प्राप्तिः पातालगमनञ्च । प्रणयने याचने । न महान् महानपि न स्यात् । महत्त्वरहितः स्वल्पतनुश्च । उद्धरणं विपद्विनाशनम् । दिक् प्रकारः । पुरुषोत्तमेन पुरुषश्रेष्ठेन विष्णुना च । अत्र विष्णुपक्षे स्त्रीत्वप्राप्त्या दैत्य-मोहनेन तेभ्योऽमृतादानात् विश्वस्य रक्षा, वराहमूर्त्या पातालप्रवेशादधोगमनेन च पृथिव्युद्धरणं बलितः प्रार्थनेन वामनत्वप्राप्त्या जगद्रक्षणम् । अत्र पुरुषश्रेष्ठे प्रकृते तदुपमानीभूतः श्रीविष्णुरुक्तः । पुरुषोत्तमादि-शब्दानामुभयार्थकत्वात् । श्लेषच्छायाप्रसिद्धिवशादप्रकृतस्यापि श्रीविष्णोः प्रथममभिधानम् ।

येनास्यभ्युदितेन चन्द्र गमितः क्लान्तिं रवौ तत्र ते
युज्येत प्रतिकर्तुमेव न पुनस्तस्यैव पादग्रहः ।
क्षीणेनैतदनुष्ठितं यदि ततः किं लज्जसे नो मनाग्
अस्त्वेवं जडधामता तु भवतो यद् व्योम्नि विस्फूर्जसे ॥४४४॥

बालचित्तानुरञ्जनी—हे चन्द्र, अभ्युदितेन येन क्लान्तिं गतोऽसि, तत्र रवौ ते त्वया प्रतिकर्तुमेव युज्यते । तस्यैव पादग्रहः पुनर्न युज्यते । पादग्रहः चरणोपमङ्ग्रहः किरणसङ्ग्रहणं च । यदि क्षीणेनैत-दनुष्ठितं तन्निमित्तकमात्मनो गोपनं मनागपि किं न लक्ष्यत इत्यर्थः । एवमस्तु । यद्यस्मात् कारणात् भवतो जडधामता व्योम्नि विस्फूर्जसे । जडधामता शिशिरकिरणता मन्दतेजस्त्वं च । अत्र पादग्रहादाविव चन्द्रसूर्ययोर्विशेष्यभूतयोरपि श्लेषाभावात् समासोक्तिः । विशेष्यपदे तु श्लिष्टे श्लेषो भवति । यथा पूर्वोदाहरणे पुरुषोत्तमपदे ।

सारबोधिनी—येनासीति । क्लान्तिः तेजःशून्यत्वं दारिद्र्यम् । पादः पदं रश्मिश्च । जडधामता शीतलप्रभत्वं मूर्खत्वास्पदत्वञ्च । विस्फूर्जसे सगर्वमुदेषि । अत्र विपक्षेण पराभूते तमुपजीव्य धन्यंमन्ये क्वचन पुंसि अप्रकृतचन्द्रव्यवहारः प्रतीयते । तेनाप्रकृतात् प्रकृताक्षेपे समासोक्तिच्छाया । न तु सा । तत्र प्रकृतेऽप्रकृतव्यवहारारोपात् ।

आदाय वारि परितः सरितां मुखेभ्यः
किं तावदर्जितमनेन दुरर्णवेन ।
क्षारीकृतं च वडवादहने हुतं च
पातालकुक्षिकुहरे विनिवेशितं च ॥४४५॥

इयं च काचित् वाच्ये प्रतीयमानार्थानध्यारोपेणैव भवति । यथा

अब्धेरम्भः स्थगितभुवनाभोगपातालकुक्षः
पोतोपाया इह हि बहवो लङ्घनेऽपि क्षमन्ते ।
आहो रिक्तः कथमपि भवेदेष दैवात् तदानीं
को नाम स्यादवटकुहरालोकनेऽप्यस्य कल्पः ॥४४६॥

बालचित्तानुरञ्जनी—तृतीयमुदाहरति आदायेति। सरितां मुखेभ्यः परितः वारि आदाय अनेन दुरर्णवेन किर्मजितं तावत्, वारि क्षारीकृतम् बडवानले हुतं च पातालकुक्षिमध्ये विनिवेशितं च। अत्रापव्ययकारिणि पुरुषे प्रस्तुते तत्सदृशः समुद्रो वर्ण्यते। एवं सादृश्यमात्ररूपामुपमामुदाहृत्य वाच्यस्य सम्भवासम्भवावुदाहरिष्यन् सम्भवं तावदाह **इयं चेति**। वाच्ये सम्भवति प्रतीयमानस्यार्थस्यानध्यारोपेण अध्यारोपाक्षमतयेत्यर्थः। जलाच्छादितभुवनविस्तारपातालमध्यस्थसमुद्रस्य लङ्घनेऽपि इह लोके पोतसाधना बहवः पुरुषाः क्रमन्ते प्रवर्तन्ते। आहो उत दैवात् एष कथमपि रिक्तो भवेत् तदानीमस्यावट-कुहरालोकनेऽपि को नाम समर्थः स्यात्। अघृप्या सङ्गच्छते[?]।

सारबोधिनी—आदायेति। मुखं वदनं नदीसङ्गमस्थानञ्च। स्पष्टमन्यत्। अत्र ग्रासकल्पं परेभ्यो धनमाकृष्य विफलं व्ययितवति पुंसि प्रकृतेऽप्रकृतस्याब्धेः कथनम्। इयं चेति अध्यारोपः अतस्मिन् तत्त्वारोपः। अत्र प्रभोः पूर्णत्वमेव वरम् न रिक्तत्वमित्यत्र तात्पर्यात्। अत्र दुर्लभस्य कस्यचित् प्रकृत-स्याध्यारोपं विनापि कार्यस्योत्पत्तेर्नाध्यारोपः। अब्धेरिति। अर्णो जलम्। अवटः खातः। कुहरं तस्यैव गम्भीरो भागः।

क्वचिदध्यारोपेणैव। यथा

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते
न च्छायापि परोपकारकरणे मार्गस्थितस्यापि मे ॥४४७॥

क्वचिदंशेष्वध्यारोपेण। यथा

सोऽपूर्वो रसनाविपर्ययविधिः तत् कर्णयोश्चापलं
दृष्टिः सा मदविस्मृतस्वपरदिक् किं भूयसोक्तेन वा।
सर्वं विस्मृतवानसि भ्रमर हे यद्वारणोऽद्याप्यसा-
वन्तःशून्यकरो निषेव्यत इति भ्रातः क एष ग्रहः ॥४४८॥

अत्र रसनाविपर्यास: शून्यकरत्वं च भ्रमरस्यासेवने न हेतुः कर्णचापलं तु हेतुः, मदः प्रत्युत सेवने निमित्तम् ।

बालचित्तानुरञ्जनी—वाच्यस्यासम्भवस्थानमुदाहरति **क्वचिदिति** । भोः कस्त्वम् ? कथयामि, दैवहतकं मां शाखोटकं विद्धि । वैराग्यादिव वदसि । साधु ज्ञातम् । इदं कस्मात् कथ्यते ? अत्र वामेन वटोऽस्ति । अध्वगजनः सर्वात्मना तं सेवते । मार्गस्थितस्यापि मे परोपकारकरणे छायापि न । अत्राचेतनेन सह प्रश्नोत्तरयोरसम्भवात् वाच्यस्यासम्भवात् वाच्यस्यासम्भवः । सम्भवासम्भवमुदाहरति **क्वचिदिति** । अपूर्वः रसनाविपर्ययो जिह्वापरिवृत्तिः तस्य विधिः प्रकारः । तच्च गजस्य कर्णयोश्चापलं चपलता । सा दृष्टिः विस्मृता स्वपरयोः दिक् यया । अथवा भूयसा उक्तेन किम् ? हे भ्रातः भ्रमर ! विस्मृतवानसि । अन्तःशून्यकरः सरन्ध्रशुण्डाकः वारणो गजः अद्यापि त्वया निषेव्यत इति यत् एष ग्रहः आग्रहः कः ? अन्यत्र रसनाविपर्ययः पैशुन्यं, कर्णचापलं कर्णजापोपजापशुश्रूषा, मदः दर्पः वारयतीति निषेधकः । अन्तःशून्यकरः रिक्तहस्तः । अत्रासम्भवन्तमंशमाह[?]**कर्णेति** । कर्णचापल्यरूपो हेतुरध्यारोपितः तत्र वाच्यं सम्भवतीति यावत् । प्रसङ्गात् सम्भवतीत्यंशे अनौचित्यलेशमुल्लिङ्गयति **मद इति**। मदविस्मृतेत्यादिविरुद्धमित्याकूतम् । उक्तवैपरीत्येन भ्रमरासेवने तस्य निमित्तत्वात् ।

सारबोधिनी—**कस्त्वमिति** । शाखोटको भूतावासो वृक्षभेदः । **कस्मादिदमिति** । इदं वैराग्यम् । **सर्वात्मना** छायोपसेवनादिना । **न च्छायेति** । भूतावासत्वेन छायानाश्रयणम् । अत्राचेतनस्य वृक्षस्य प्रकृतनिर्विण्णस्य पुरुषत्वारोपेणैव वचनानुवचनसम्भवादध्यारोप एव । न चेदं रूपकम् । प्रकृते तदन्यानारोपात् । अत्राप्रकृत एव प्रकृतारोपात् । **क्वचिदिति** । अंशे क्वचनावच्छेदे । **सोऽपूर्व इति** । रसनाविपर्ययो रसनास्थैर्यम् विपरीताग्रत्वञ्च । वारणरसनया उपकण्ठमग्रं[?]कर्णचापलं परवचनप्रतार्यत्वम् । अनवरतकर्णचापलनं मदोन्मत्तता गर्वश्च । स्वपरमत्यामत्यविभागः[?] । वारणो गजो निवारकश्च । अन्तःशून्यकरो निर्धनोऽस्थिमांसादिशून्यमध्यशुण्डश्च । **न हेतुरिति** । तथा च यस्यासेवनेहेतुस्तत्त्वं समारोप्यते नाप्रकृते भ्रमरे । निवारितप्रयत्नसेवकत्वारोपः । **कर्णचापलं त्विति** । ततोऽत्र नारोपः । **मदः प्रत्युतेति**। अत्रांशे आरोप्यारोपः ।

निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् ।

प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ॥१००॥

कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः ।

विज्ञेयातिशयोक्तिः सा

बालचित्तानुरञ्जनी—इदानीमतिशयोक्त्यलङ्कारं लक्षयति **निगीर्येति** । अत्र पञ्चधा बन्धच्छाया । भेदे अभेदः । अभेदे भेदः । संबन्धे असम्बन्धः । असम्बन्धे सम्बन्धः । कार्यकारणपौर्वापर्यविपर्ययश्चेति । तत्र निगीर्येत्यादिना प्रथमो लक्ष्यते प्रस्तुतस्येत्यादिना द्वितीयः । तृतीयो बहिरूहनीयः ।

यद्यर्थोक्तावित्यनेन चतुर्थो लक्ष्यते । कार्यकारणयोरित्यादिना पञ्चमः । तत्राद्यं प्रकारं व्याकरोति **उपमानेति** ।

सारबोधिनी—निगीर्येत्यादि । अस्याः सामान्यलक्षणं अतिशयप्रतिपत्तये अन्यस्यान्यतादात्म्य-प्रतिपादकोक्तिरूपम् । निगरणं प्रकृतनिष्ठासाधारणधर्मस्य विषयीकरणम् । तच्च चन्द्र इत्यत्र, चन्द्र-एवायमित्यत्र च सम्भवति तदुक्तम्—"विषयस्यानुपादानेऽपि सूरयः अन्तःकरणमात्रेण निगीर्णत्वं प्रचक्षते । उपादाने सामान्यधर्मेणेति शेषः । अधःकरणं रवौ सादृश्येनाच्छादनम् । विषयनिष्ठसाधारण-धर्माभानमिति यावत् । अध्यवसानमप्रकृततादात्म्यारोपः । तेन रूपकस्य सन्देहोत्प्रेक्षयोश्च व्यवच्छेदः । रूपकस्य भेदाभेदरूपत्वात् । भेदो वैधर्म्यम् । अन्ययोश्च संशयत्वात् आहार्यत्वेन भ्रान्तिमत्यतिप्रसङ्गः । उपमानेनेत्युपमेयस्येति च परेणेत्यस्य च प्रकृतस्य विवरणम् ।

उपमानेनान्तर्निगीर्णस्योपमेयस्य यदध्यवसानं सैका । यथा

कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥४४९॥

अत्र मुखादि कमलादिरूपतयाध्यवसितम् । यच्च तदेवान्यत्वेनाध्यवसीयते सा अपरा । यथा

अण्णं लडहत्तणअं अण्णा विअ का वि वत्तणच्छाआ ।
सामा सामण्णपआवइणो रेह च्चिअ ण होइ ॥४५०॥

'यद्यर्थस्य' यदिशब्देन चेच्छब्देन वा उक्तौ यत् कल्पनम् (अर्थात् असम्भविनोऽर्थस्य) सा तृतीया । यथा

राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः ।
तस्या मुखं तदा साम्यपराभवमवाप्नुयात् ॥४५१॥

बालचित्तानुरञ्जनी—प्रकृतस्य तदन्येनोपमानेन विषयिणा कवलितस्य विषयिरूपतया अध्यव-सानमेकः अतिशयोक्तिरित्यर्थः । तामुदाहरति **कमलमिति** । स्त्री वर्ण्यते । अनम्भसि कमलं, कमले कुवलये नीलोत्पले, तानि कमलकुवलयानि कनकलतियाम् । सा च मृदुसुभगा इतीयमुत्पातपरम्परा का? अत्र कमलादिभिर्मुखादीनां भेदेऽपि अध्यवसाय इत्याह **अत्रेति** । द्वितीयमाह **यच्चेति** । तच्छब्देन प्रस्तुतमुच्यते । साऽपरा, अभेदे भेदरूपा अतिशयोक्तिरित्यर्थः । तामुदाहरति **अण्णमिति** । सामा श्यामा सामण्णपआवइणो सामान्यप्रजापतेः रेह च्चिअ रेखैव । ण होइ न भवति । यतः अस्याः अण्णं अन्यत्, लडहत्तणअं लटभत्वं

विलासः । अण्णा विअ अन्येव । वत्तणच्छाया वर्तनच्छायः । अत्र लटभत्वादीनामभेदेऽपि अन्यत्वेनाध्यवसानात् भेद इत्यर्थः । सम्बन्धेऽप्यसम्बन्धो बहिरूहनीयः । यथा

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः स्वयं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥

अत्र पुराणब्रह्मनिर्माणसंबन्धेऽप्यसंबन्ध उक्त इति चिरन्तनाः । अस्य तदप्यभेद एवान्तर्भूतमित्याशयः । असंबन्धेऽपि संबन्धमाह यदीति । अर्थात् सामर्थ्यात् । असम्भविनो यत् कल्पनमिति संबन्धः, उदाहरति राकेति । राकायां पूर्णिमायाम् । अमृतांशोश्चन्द्रस्य वपुरकलङ्कञ्चेत् तदा तस्याः मुखं साम्यपराभवमाप्नुयात् । अत्र वास्तवेऽप्यसंबन्धे सम्भावनया संबन्धः ।

सारबोधिनी—कमलमिति । अत्र प्रकरणलभ्यानां नायिकामुखादीनां अध्यवसानान्मुखादेरेवातिशयः प्रतीयते । **तदेवेति** । एवकारेण धर्मिभेदाभावसूचनम् । तेनास्य पूर्वतो भेदः । **अण्णं इति** ।

अन्यल्लडहत्वं अन्यैव कापि वर्तनच्छाया ।
श्यामा सामान्यप्रजापतेरेखैव न भवति ॥

सौकुमार्ये लडहो देशभाषा वर्तते । जीवनाश्रयो भवतीति वर्तनं शरीरम् । छाया कान्तिः । सामान्यः सर्वसाधारणः । रेखा निर्मितिः । अस्याः सौकुमार्यमन्यदेवेत्युक्तौ अस्य सौकुमार्यस्य सौकुमार्योत्तरादतिशयः प्रतीयते । **यद्यर्थेति** । अत्र चन्द्रेण सह मुखस्य साम्यं तर्कितमेव, न वस्तुतस्तदित्यर्थस्तेन मुखस्यातिशयः प्रतीयते । राकायामिति साम्यमेव पराभवम् ।

कारणस्य शीघ्रकारितां वक्तुं कार्यस्य पूर्वमुक्तौ चतुर्थी । यथा

हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन ।
चरमं रमणीवल्लभ लोचनविषयं त्वया भजता ॥४५२॥

बालचित्तानुरञ्जनी—अन्तिमं भेदमाह कारणस्येति । उदाहरति हृदयमिति । आदौ प्रथमं मालत्या हृदयं कुसुमचापबाणेनाधिष्ठितम् । भो रमणीवल्लभ ! चरमं पश्चाल्लोचनविषयं भजता त्वया अधिष्ठितम् । कारणस्य कान्तेनाधिष्ठितत्वस्य ।

सारबोधिनी—कार्यकारणयोरिति । कार्यस्य पूर्वभावित्वम् कारणस्य परभावित्वम् यत्राभिधीयते इत्यर्थः । अस्यालङ्कारतावीजमाह **कारणस्येत्यादि** । शीघ्रकारिताप्रतिपादनमित्यर्थः । **हृदयमिति** । अत्र नृपतेर्दर्शनस्य झटिति हारकता प्रतीयते । अत्र सर्वत्रैवातिशयप्रतिपत्तयेऽन्यस्यान्यतादा-

त्म्यप्रतिपादनमिति सामान्यलक्षणसमन्वयोऽनुसन्धेयः। अत्र कार्यकारणयोः समकालनिर्देशेऽप्यभेदान्तरं यथा

सममेव समाक्रान्तं द्वयं द्विरदगामिना।
तेन सिंहासनं पित्र्यमखिलं चारिमण्डलम्॥ इति।

तथा सम्बन्धेऽसम्बन्धप्रतिपादकरूपस्य भेदान्तरं यथा

"अस्याः सर्गविधौ प्रजापतिरभू"दित्यत्र सत्यपि पुराणप्रजापतिनिर्माणसम्बन्धे तदसम्बन्धप्रतिपादनात्।

प्रतिवस्तूपमा तु सा॥१०१॥

सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः।

साधारणो धर्मः उपमेयवाक्ये उपमानवाक्ये च कथितपदस्य दुष्टतयाभिहितत्वात् शब्दभेदेन यत् उपादीयते सा वस्तुनो वाक्यार्थस्योपमानत्वात् प्रतिवस्तूपमा यथा—

देवीभावं गमिता परिवारपदं कथं भजत्येषा।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम्॥४५३॥

यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः।
लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता॥४५४॥

इत्यादिका मालाप्रतिवस्तूपमा द्रष्टव्या। एवमन्यत्रानुसर्तव्यम्।

बालचित्तानुरञ्जनी—[कथितपदस्य] दुष्टतयाभिहितत्वात् शब्दाभेदेन साधारणो धर्मः उपमेयवाक्ये यदुपादीयते वस्तुनो वाक्यार्थस्य उपमानत्वात् सा प्रतिवस्तूपमेत्यन्वयः। उदाहरति **यथेति**। देवीभावं गमिता देवतात्वं प्रापिता एषा परिवारपदं कुटम्बकत्वं कथं भजति? खलु यतः देवतारूपाङ्कितं रत्नं परिभोगयोग्यं न भवति। **देवीभावमिति**। देवी कृताभिषेका परिवारः साधारणकलत्रम्। पदं स्थानम्। शब्दो वा परिभोगो भूषाद्यर्थमुपादानम्। **दैवतेति** सुवर्णादिघटितप्रतिमेत्यर्थः। अत्र कथमित्यनेन परिवारपदभजनस्यानौचित्यं प्रत्याय्यते। न खल्वित्यनेन च परिभोगस्येति एवमस्यैवानौचित्यरूपसामान्यस्य शब्दभेदेन द्विरुपादानम्। **यदीति**। स्वाभाविकत्वान्नाद्भुतम्। एवं किमित्यादिष्वपि। विवादशून्यत्वं सन्तोषप्रकृतिः स्वभावः।

सारबोधिनी—**प्रतिवस्तूपमेति**। दृष्टान्तं व्यावर्तयति **सामान्यरूपस्येति**। तत्र समानधर्मस्य बिम्बप्रतिबिम्बभावेन निर्देशेनैकत्वविरहात्। अर्थान्तरन्यासे तु समर्थ्यसमर्थकत्वं विवक्षितम्। अत्र तु उपमानोपमेयभाव इति ततोऽस्य भेदः। अत एवोपमाघटितेयम्।

दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् ।।१०२।।

एतेषां साधारणधर्मादीनां दृष्टोऽन्तो निश्चयो यत्र स दृष्टान्तः ।

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम् ।
आलोके हि हिमांशोर्विकसति कुसुमं कुमुद्वत्याः ।।४५५।।

एष साधर्म्येण । वैधर्म्येण तु

तवाहवे साहसकर्मशर्मणः करं कृपाणान्तिकमानिनीषतः ।
भटाः परेषां विशरारुतामगुर्दधत्यवाते स्थिरतां हि पांसवः ।।४५६।।

बालचित्तानुरञ्जनी--दृष्टान्तालङ्कारं लक्षयति **दृष्टान्त इति** । साधारणधर्मादीनामित्यत्रादिशब्देनोपमानोपमेययोर्ग्रहणम् । उदाहरति त्वयीति । मनोभवज्वलितं तस्य मनः त्वयि दृष्ट एव निर्वाति निर्वृतं भवति । हि यतः कुमुद्वत्याः कुमुदं हिमांशोरालोके विकसति । अत्र निर्वाणनिर्वाणस्य विकाशात्मना प्रतिबिम्बनम् । न केवलमेष साधर्म्येणैव यावद्वैधर्म्येणापीत्याह वैधर्म्येणेति । उदाहरति **तवाहव इति** । साहसकर्मशर्मणः साहसकर्मणि शर्म सुखं यस्य स तस्य, करं कृपाणान्तिकमानिनीषतः आनेतुमिच्छतः तव आहवे परेषां शत्रूणां भटा योद्धारः विशरारुतां अहिंसकत्वमगुः । हि यतः, पांसवः अवाते स्थिरतां दधति । उक्तदार्ष्टान्तिकवैलक्षण्ये दृष्टान्ताभिधानात् ।

सारबोधिनी--**दृष्टान्त इति** । पुनरित्यस्य ग्रहणम् । पूर्वतो भेदप्रतिपादनाय एतेषामुपमानोपमेयसाधारणधर्माणां प्रतिबिम्बनं बिम्बप्रतिबिम्बभावः । स च विशेषणयोर्विशेष्ययोश्च सादृश्यनिर्देशे भवति न त्वेकस्य । यथा

पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन ।
आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ।।

सर्वेषामित्यत्र विकल्पपरिहारेण समुच्चयसूत्रणम् । दृष्टान्तपदप्रयोगमाह **दृष्ट इति** । दृष्टः गृहीतप्रामाण्यकः । यत्र दृष्टान्तवाक्येन दार्ष्टान्तिकवाक्यार्थनिश्चयस्य प्रामाण्यग्रहो भवतीत्यर्थः । त्वयीति । दृष्ट एव दृष्टमात्रेणेत्यर्थः । वैधर्म्येण विपर्यये साधर्म्ये पर्यवसायिना । तवेति । विशरारुतां झटिति नश्वरताम् । अवाते स्थिरतां वान्ते तु न तथेति विपर्यये साधर्म्यपर्यवसानम् ।

सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ।।१०३।।

प्राकरणिकाप्राकरणिकानाम् अर्थात् उपमानोपमेयानां धर्मः क्रियादिः एकवारमेव यत् उपादीयते तत् एकस्थस्यैव समस्तवाक्यदीपनात् दीपकम् । यथा

किवणाणँ धणं णाआणं फणमणी केशराइँ सीहाणं ।
कुलबालिआणँ त्थणआ कुत्तो छिप्पन्ति अमुआणं ।।४५७।।

कारकस्य च वह्वीषु क्रियासु सकृद्वृत्तिर्दीपकम् । यथा

स्विद्यति कूणति वेल्लति विचलति निमिषति विलोकयति तिर्यक् ।
अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणया वधूः शयने ।।४५८।।

बालचित्तानुरञ्जनी—दीपकालङ्कारं लक्षयति सकृदिति । प्रकृताप्रकृतात्मनामुपमानोपमेयात्मनां धर्मस्य क्रियादेः बहुषु कारकेषु सत्ता वृत्तिः क्रियादिदीपकम् ।

सारबोधिनी—सकृदिति । वृत्तिरुपादानम् । सैव सकृद्वृत्तिरेव । बह्वीषु क्रियासु सतीष्वित्यर्थः । **अर्थादिति** । प्रकृताप्रकृतयोः सजातीयधर्मसम्बन्धस्योपमाया पर्यवसानात् । क्रियादिभिरिति । आदिशब्दाद् गुणपरिग्रहः । **तदिति** । तद्धर्मस्य सकृदुपादानादित्यर्थः ।

किवणाणेति ।

कृपणानां धनं नागानां फणमणयः । सिंहानाम् ।
केसराः कुलपालिकानां च स्तनाः कुतः स्पृश्यन्तेऽमृतानाम् ।।

अत्र कुलपालिकानां प्रकृतत्वेनोपमेयत्वमन्येषामप्रकृतत्वेनोपमानत्वमिति । स्पृश्यन्त इति क्रिया सकृदुपात्ता । सा च स्पर्शे गुणेऽपीति गुणक्रियोदाहरणम् । **स्विद्यतीति** । कूणति सङ्कोचमालम्बते । विचलति परिवृत्य शेते । निमिषति आहार्यनिद्रया नेत्रे मुद्रयति । अन्तर्नन्दति न वोढात्वेन बाह्यतो न प्रकाशः । अत एव चुम्बितुमिच्छति न तु चुम्बति । अत्र बह्वीषु क्रियासु एकस्याः कर्त्र्याः सकृदुपादानाद्दीपकम् ।

मालादीपकमाद्यं चेद्यथोत्तरगुणावहम् ।

पूर्वेण पूर्वेण वस्तुना, उत्तरमुत्तरं चेदुपक्रियते तत् मालादीपकम् । यथा

संग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत्समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ।।४५९।।

सारबोधिनी—मालेति । उत्तरोत्तरस्य पूर्वपूर्वोत्कर्षकत्वे एत्वेकावलीति ततोऽस्य भेदः । **पूर्वेण पूर्वेणेति** । उत्तरस्य वीप्सितत्वेन पूर्वस्मिन्नपि वीप्सा । बहुगुणत्वं विवृणोति **उपक्रियत इति**। उपक्रियते प्रकृतोत्कर्षायोन्मुखीक्रियते । तथा च संग्रामे कोदण्डेत्यादिभिः पूर्वपूर्वैरुत्तरोत्तरैरामासादनक्रिया-कर्मीकरणरूपोपकारात् निःसपत्नलोकत्रयव्यापिकीर्तिलाभान्नृपोत्कर्षः प्रत्याय्यते इति । यथा मालायां पूर्व-पूर्वग्रथितपुष्पाणामुत्तरोत्तरधारणादुपकारकत्वं, तद्वदत्रापि मालारूपता । एकस्या आसादनक्रियायाः सर्वत्र सम्बद्धाद्दीपकता ।

नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता ॥१०४॥

नियतानां प्राकरणिकानामेव अप्राकरणिकानामेव वा । क्रमेणोदाहरणम् ।

पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ॥४६०॥

कुमुदकमलनीलनीरजालिर्ललितविलासजुषोर्दृशोः पुरः का ।
अमृतममृतरश्मिरम्बुजन्म प्रतिहतमेकपदे तवाननस्य ॥४६१॥

बालचित्तानुरञ्जनी—नियतानामिति । सकृदेकवारं वृत्तिरित्यनुवर्तते । अर्थवशात् विभक्ति-विपरिणामः । तथा च वर्त्यते उपादीयते इत्यर्थः ।

सारबोधिनी—पाण्डिवति । अत्र विरहानुभावतया प्रकृतानां पाण्डुतादीनां सकृदुपात्तवेदन-क्रिययाऽन्वयः । हृदन्तः अन्तर्हृदयम् । **कुमुदेति** । एकपदे एकस्थाने । तवाननस्येति षष्ठी विरोधिता-सम्बन्धेन । अत्र पूर्वार्धे का इति गम्या आक्षेपक्रिया । अपरार्द्धे तु प्रतिहतिक्रिया समानो धर्मः ।

उपमानाद्यदन्यस्य व्यतिरेकः स एव सः ।

अन्यस्योपमेयस्य व्यतिरेक आधिक्यम ।

क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते सत्यम् ।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु ॥४६२॥

इत्यादावुपमानस्योपमेयादाधिक्यमिति केनचिदुक्तम् तदयुक्तम् अत्र यौवनगता-स्थैर्याधिक्यं हि विवक्षितम् ।

बालचित्तानुरञ्जनी—[रूय्यकः] उपमानादुपमेयस्याधिक्ये विपर्यये वा व्यतिरेकालङ्कारम-सूत्रयत् । आधिक्यमधिकगुणत्वलक्षणं यथायोगमुदाहृत्य न्यूनगुणत्वरूपं विपर्यये **क्षीण इति** । हे सुन्दरि ! क्षीणः क्षीणः चन्द्रः भूयो भूयो विवर्द्धत इति । यातं यौवनमनिवर्ति तु । अतो विरम, कोपं मुञ्च । प्रसादकेन

विदग्धजनिमीलितशालिनेत्यर्थः । वाक्यार्थस्य यावत् तात्पर्यपर्यालोचितत्वादित्याह **तदयुक्तमिति** । यतोऽत्रापि उपमानात् उपमेयस्याधिक्यं विपर्यय इत्याह **यौवनेति** । चन्द्रापेक्षया तारुण्ये यदस्थैर्यं तस्याधिक्यम् । अन्यथा वाक्यार्थशक्तिव्याकोपः स्यादिति भावः ।

सारबोधिनी--उपमानादिति । स एव व्यतिरेक एव । सः व्यतिरेकः । विशेषणातिरेक आधिक्यम् **क्षीण इति** । विरम मानादिति शेषः । केचित्तूपमानादुपमेयस्याधिक्ये न्यूनतायां च व्यतिरेकः तत्र न्यूनतायामिदमुदाहरणमिति वदन्ति । तद्दूषयति विवक्षितमिति । अत्रायमाशयः । प्रकृतवाक्यार्थानुगुण प्रकृष्टगुणाश्रयत्वे नैवाधिक्यम् विनिगमकान्तराभावात् । प्रकृते च मानप्रसादनोपायतयोपस्थितस्य यौवनगतास्थैर्यस्य बाधकान्तराबाध्यत्वेनोत्कर्षः । चन्द्रक्षयस्य तु वृद्धिबाध्यत्वेनैव निकृष्टतेत्युपमेयाधिक्य एव व्यतिरेक इति । वस्तुतस्तूपमेयस्य न्यूनतायामपि व्यतिरेकः । यथा—

"हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूत्यपथ सितीकृत" इति नलमहीपतौ स्वनिन्दनान्निकृष्टत्वेन प्रतीयमाने उपमेये व्यतिरेकदर्शनात् । तथा "मयाप्तं रामत्व"मित्यत्र च कवयितरि न्यूनतायाञ्च व्यतिरेकदर्शनात् ।

हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते ॥१०५॥

शब्दार्थाभ्यामथाक्षिप्ते श्लिष्टे तद्वत्त्रिरष्ट तत् ।

व्यतिरेकस्य हेतुः, उपमेयगतमुत्कर्षनिमित्तम् उपमानगतमपकर्षकारणम् तयोर्द्वयोरुक्तिः, एकतरस्य द्वयोर्वा अनुक्तिरित्यनुक्तित्रयम् एतद् भेदचतुष्टयमुपमानोपमेयभावे शब्देन प्रतिपादिते आर्थेन च क्रमेणोक्ताश्चत्वार एव भेदाः, आक्षिप्ते चौपम्ये तावन्त एव, एव द्वादश । एते श्लेषेऽपि भवन्तीति चतुर्विंशतिर्भेदाः ।

बालचित्तानुरञ्जनी- इत्थं विप्रतिपत्तिं निराकृत्य विभागमाह **हेत्वोरिति** । **त्रिरष्टेति** । चतुर्विंशतिः । उपमेयविषयं उत्कर्षनिमित्तं न विपर्ययः । उपमानविषयं तु निकर्षकारणम् , न विपर्ययः । **एकतरस्येति** । हेत्वोरनुक्ती द्वे । हेतुद्वयस्य निरुक्तिरेकेति अनुक्तिरेकेति अनुक्तित्रयम् । एतदुक्तं भवति । आधिक्यस्य हेतुरुपमेयगतमुत्कर्षनिमित्तं उपमानगतं निकर्षकारणम् । अनयोर्हेत्वोरुक्तावेको भेदः । द्वयोर्हेत्वोरनुक्तावेकः, उत्कर्षहेतोरुक्तौ अपकर्षहेतोरनुक्तावपरः उत्कर्षहेतोरनुक्तावपकर्षहेतोरुक्तावेकः । एवं चत्वारो भेदाः । अत एव शब्देन इवादिना अर्थेन तुल्यादिना आक्षेपेण च साम्यप्रतिपादने द्वादशभेदाः । श्लेषेणापि भवन्तीति चतुर्विंशतिर्भेदाइति ।

सारबोधिनी—हेत्वोरिति । इवादेः प्रयोगे शब्देन साम्यनिवेदनं तुल्यादेश्चार्थेन जयत्यादेश्चाक्षेपेणेति । लक्ष्ये विवेचयिष्यामः । **क्रमेणेति** । शब्दार्थाभ्यामिति साहित्यशङ्काव्युदासाय तथा सति

चतुर्विंशतित्वानुपपत्तेः। आक्षिप्ते व्यञ्जिते। मुखमिन्दुं जयति स्पर्द्धते इत्यादौ सादृश्यव्यङ्ग्यत्वात्। प्रायशः सदृश एव जयादिव्यवहारात्।

क्रमेणोदाहरणम्

असिमात्रसहायस्य प्रभूतारिपराभवे।
अन्यतुच्छजनस्येव न स्मयोऽस्य महाधृतेः ॥४६३॥

अत्रैव तुच्छेति महाधृतेरित्यनयोः पर्यायेण युगपद्वानुपादानेऽन्यत् भेदत्रयम्। एवमन्येष्वपि द्रष्टव्यम्। अत्र इवशब्दस्य सद्भावाच्छाब्दमौपम्यम्।

असिमात्रसहायोऽपि प्रभूतारिपराभवे।
नैवान्यतुच्छजनवत्सगर्वोऽयं महाधृतिः ॥४६४॥

अत्र तुल्यार्थे वतिरित्यार्थमौपम्यम्।

बालचित्तानुरञ्जनी—आद्यमुदाहरति **असीति**। बहूनां शत्रूणां निवारणे खड्गमात्रसहायस्य महाधृतेः अस्य राज्ञः अन्यतुच्छजनस्येव विस्मयो न। अत्रोपमाने तुच्छत्वमपकर्षनिमित्तम्। उपमेये महाधृतित्वमुत्कर्षहेतुः। अतो हेत्वोरुक्तिः। अन्यदप्यत्रोदाहर्तुं शक्यमित्याह **अत्र चेति**। पर्यायेण व्यत्ययेन कदाचिदेकस्यानुक्तिः, कदाचिदपरस्येत्यर्थः। "नूनमन्यजनस्येव न स्मयोऽस्य महीपतेः" इति पाठे उपमापकर्षहेतोरनुक्तिः। उत्तरत्राप्येषा रीतिरनुसरणीयेत्याह **एवमिति**। उक्तसाम्यस्य शाब्दत्वमाह **अत्रेति**। एवं शब्देन चतुरो भेदानभिधाय पाठभेदेन आर्थेनापि चतुरो भेदानाह **असीति**। तेन तुल्यं क्रियाचेद्वतिरिति तुल्यार्थे वतेर्विधानादार्थमौपम्यमित्याह **तुल्येति**।

सारबोधिनी—**असीति**। स्मयो गर्वः। अरिपराभवः समानो धर्मः। महाधृतित्वम् तुच्छत्वञ्चोत्कर्षापकर्षहेतू। एवं सर्वत्र बोद्धव्यम्।

इयं सुनयना दासीकृततामरसश्रिया।
आननेनाकलङ्केन जयतीन्दुं कलङ्किनम् ॥४६५॥

अत्रेवादितुल्यादिपदविरहेण आक्षिप्तैवोपमा।

जितेन्द्रियतया सम्यग्विद्यावृद्धनिषेविणः।
अतिगाढगुणस्यास्य नाब्जवद्भङ्गुरा गुणाः ॥४६६॥

अत्रेवार्थे वतिः, गुणशब्दः श्लिष्टः शाब्दमौपम्यम्।

अखण्डमण्डलः श्रीमान् पश्यैष पृथिवीपतिः ।
न निशाकरवज्जातु कलावैकल्यमागतः ॥४६७॥

अत्र तुल्यार्थे वतिः कलाशब्दः श्लिष्टः ।

बालचित्तानुरञ्जनी—वतिप्रयोगे हेत्वोरुक्तिरेकः तुच्छपदानुपादाने अपरः, वतिपदानुपादाने अन्त्यः, उभयानुपादाने अन्त्यः उभयानुपादाने एक इति चत्वारो भेदाः इत्यर्थः[?] । आक्षेपे अपरान् चतुरो भेदानुदाहरति **इयमिति** । सुनयना इयं दासीकृततामरसश्रिया अकलङ्केनाननेन कलङ्कितमिन्दुं जयति । अकलङ्केनेति उत्कर्षहेतुः । कलङ्किमित्यपकर्षहेतुः । उभयोरुक्तौ एकः । "आननेन मनोज्ञेन जयतीन्दुं कलङ्कितमि"ति पाठे अपकर्षहेतूक्तौ द्वितीयः । "आननेन मनोज्ञेन जयत्यमृतदीधितिमि"ति पाठे अपकर्षहेत्वनुक्तौ तृतीयः । आननेन मनोज्ञेन जयत्यमृतदीधितिमिति उभयानुक्तौ चतुर्थः । एवं द्वादश-भेदानुदाहृत्य शाब्देन श्लिष्टानपरान् चतुरो भेदानुदाहरति **जितेति** । जितेन्द्रियतया सम्यक् विद्यावृद्ध-निवेषिणः । अतिगाढगुणस्य गुणा अब्जवत् भङ्गुरा न भवन्ति । अत्र तत्र तस्यैवेति इवार्थे वतिविधानात् शाब्दमौपम्यम् । गुणाः सौजन्यादयः मृणालसूत्राणि चेति गुणशब्दः श्लिष्टः । विद्यावृद्धनिषेवणं गाढगुणोत्कर्षे हेतुः । भङ्गुरगुणनिःकर्षहेतुर्नोपात्त इति उपमानगतनिकर्षहेतूपादाने शाब्दौपम्ये व्यतिरेकस्य तृतीयो भेदो दर्शितः । अवशिष्टत्रयं स्वयमूह्यम् । तुल्यादिना अर्थेनापि चतुरो भेदानुदाहरति **अखण्डेति** । यस्य श्रीमानखण्डमण्डल एष पृथिवीपतिः जातु कदाचित्, निशाकरवत् कलावैकल्यं नागतः । अत्र तुल्यार्थे वतिः तेन तुल्यं क्रियाचेद्वतिरित्यनेन । **कलेति** । कला विद्यादिभागश्च । अत्र उपमेये अखण्डमण्डलत्वे श्रीमत्त्वं हेतुः कलावैकल्यहेतुर्नोक्त इति उपमानगतनिकर्षकारणानुपादाने अर्थोपदाने अर्थौपम्ये श्लेष-व्यतिरेकस्य तृतीयो भेदो दर्शितः ।

सारबोधिनी—**इयमिति** । दासीकृता निर्जिता । श्लेषेणाह **जितेन्द्रियेत्यादि** । अब्जस्येति षष्ठ्यन्ताद्वतिः । श्लिष्ट इति गुणः । पाण्डित्यादिसूत्रं च गाढत्वभङ्गुरत्वे उत्कर्षनिकर्षहेतू । **अखण्डेति** । मण्डलं राजचक्रम् बिम्बश्च । श्रीः सम्पत् शोभा च । कला चित्रादिकौशलं चन्द्रषोडशभागश्च । अखण्ड-मण्डलत्वकलावैकल्ये उत्कर्षनिकर्षहेतू ।

मालाप्रतिवस्तूपमावत् मालाव्यतिरेकोऽपि संभवति । तस्यापि भेदा एवमूह्याः । दिङ्मात्रमुदाह्रियते । यथा

हरवन्न विषमदृष्टिर्हरिवन्न विभो विधूतविततवृषः ।
रविवन्न चातिदुःसहकरतापितभूः कदाचिदसि ॥४६८॥

अत्र तुल्यार्थे वतिः । विषमादयश्च शब्दाः श्लिष्टाः ।

बालचित्तानुरञ्जनी—उभयानुक्तावुदाहरणमाह **हरवदिति** । भो विभो त्वं कदाचित् हरवत् विषमदृष्टिर्नासि । हरिवद्विधूतविततवृषश्च नासि । रविरिव दुःसहकरज्वरतापितभूश्चापि नासि । हरेण

तुल्यं वर्त्तत इत्यादि तुल्येऽर्थे वतेर्विधानात् । अर्थौपम्ये श्लेषव्यतिरेकस्य चतुर्थो भेदो दर्शितः । उत्कर्षा-पकर्षहेत्वोरन्यतरस्यानुक्तौ उदाहरणद्वयं स्वयमूहनीयम् ।

सारबोधिनी--यथा वेति । विषमदृष्टिस्त्रिलोचनः सर्वाननुकम्पकश्च । वृषो धर्मो गवाकृतिरसुरविशेषश्च । करो राजस्वं रश्मिश्च । तापितः उद्वेजितो दाहं प्रापितश्च । भूर्लोकविशेषो धरणिस्थजनश्च । अत्र विषमदृष्टित्वाभावेन समदृष्टित्वमाक्षिप्यते इति निकर्षोत्कर्षहेतूपादानम् । एतदप्युदाहरणभेदप्रदर्शनायां बीजमित्यवधेयम् ।

नित्योदितप्रतापेन त्रियामामीलितप्रभः ।
भास्वतानेन भूपेन भास्वानेष विनिर्जितः ॥४६९॥

अत्र ह्याक्षिप्तैवोपमा भास्वतेति श्लिष्टः । यथा वा

स्वच्छात्मतागुणसमुल्लसितेन्दुबिम्बं
बिम्बप्रभाधरमकृत्तिमहृद्यगन्धम् ।
यूनामतीव पिबतां रजनीषु यत्र
तृष्णां जहार मधु नाननमङ्गनानाम् ॥४७०॥

अत्रेवादीनां तुल्यादीनां च पदानामभावेऽपि श्लिष्टविशेषणैराक्षिप्तैवोपमा प्रतीयते। एवंजातीयकाः श्लिष्टोक्तियोग्यस्य पदस्य पृथगुपादानेऽन्येऽपि भेदाः सम्भवन्ति । तेऽपि अनयैव दिशा द्रष्ठव्याः ।

बालचित्तानुरञ्जनी--श्लेषव्यतिरेकस्याक्षेपे उभयोपादानरूपं प्रथमं भेदमाह **नित्योदितेति**। नित्योदितप्रतापेन भास्वता तेन भूपेन त्रियामामीलितप्रभः एष भास्वान् विनिर्जितः । अत्र वर्णनीये भास्वत्त्वं परिभवासहत्वं अन्यत्र सूर्यत्वमिति श्लिष्ट इति उपमेयोपमानगतोत्कर्षनिकर्षहेत्वोरुपादाने आक्षेपौपम्ये श्लेषव्यतिरेकस्य प्रथमो भेदो दर्शितः । द्वितीयतृतीयौ स्वयमूहनीयौ । एवं श्लिष्टभेदेषु द्वादशसु श्लिष्टोक्तियोग्यस्य पदस्य पृथगुपादानेऽन्ये द्वादशभेदाः सम्भवन्ति । तेऽप्युदाहार्या इत्याह **इत्येवमिति** ।

या शैशिरी श्रीस्तपसा मासेनैकेन विश्रुता ।
तपसा तां सुदीर्घेण दूराद्विदधतीमधः ॥

एकत्र तपो माघमासः । अन्यत्र कृछ्रादि अभ्युदयहेतुः । इवादयश्चानुपात्ता अपि सामर्थ्यगम्याः । अत्र नय इति श्लिष्टोक्तियोग्यं पदं पृथगुपात्तम् । अतोऽयमपि श्लेषव्यतिरेक आक्षिप्ते औपम्ये उभयोपादानमिति । एवमन्येऽप्येकादशोहनीयाः ।

सारबोधिनी--नित्योदितेति । प्रतापः पराक्रमः प्रकृष्टतापश्च । एवमन्यदप्याक्षेपकभेदेनाक्षिप्तौपम्यस्य विषयबाहुल्यप्रदर्शनमाह स्वच्छेति । स्वच्छात्मता नातिक्रूरता सैव गुणः । उत्कर्षकत्वेन समुल्लसितं इन्दुप्रतिबिम्बितं पूर्णमिन्दुबिम्बमिति रूपकम् । मधुपक्षे स्वच्छात्मता निर्मलता, समुल्लसितं बिम्बं यत्र न तथा बिम्बप्रभोऽधरो यत्र बिम्बप्रभां बिभर्ति च, जीर्णमधुनो रक्तत्वात् ।

निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ॥१०६॥

वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ।

विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीकार्यस्य अशक्यवक्तव्यत्वमतिप्रसिद्धत्वं वा विशेषं वक्तुं निषेधो निषेध इव यः स वक्ष्यमाणविषय उक्तविषयश्चेति द्विधा आक्षेपः । क्रमेणोदाहरणम्

ए एहि किंपि कीएवि कएण णिक्किव भणामि अलमह वा ।
अविआरिअकज्जारम्भआरिणी मरउ ण भणिस्सम् ॥४७१॥

ज्योत्स्ना मौक्तिकदाम चन्दनरसः शीतांशुकान्तद्रवः
कर्पूरं कदली मृणालवलयान्यम्भोजिनीपल्लवाः ।
अन्तर्मानिसमास्त्वया प्रभवता तस्याः स्फुलिङ्गोत्कर-
व्यापाराय भवन्ति हन्त किमनेनोक्तेन न ब्रूमहे ॥४७२॥

बालचित्तानुरञ्जनी—आक्षेपालङ्कारं लक्षयति **निषेध इति** । व्याकरोति **विवक्षितस्येति** । वक्ष्यमाणविषयमुदाहरति **एवं हीति** । अयि सखि गच्छावः । कीएवि कस्या अपि । कएण कृते । कंपि किमपि । णिक्किव निःकृप । ण भणामि न भणामि अथवा अलम् । अविआरिअकज्जारंभणी अविचारितकार्यारम्भणी । अत्र म्रियताम् । ण भणिस्सम् न भणिष्यामि । अतः निःकृप न भणामीत्युक्ते अर्थात् सम्यक् भणामीति प्रतिज्ञा । न भणिष्यामीति निषेधात् वक्ष्यमाणविषयोऽयमाक्षेपः । उक्तविषयमुदाहरति **ज्योत्स्नेति** । भो विभो ! आः खेदे । तस्याः अन्तर्मानिसं प्रभवता त्वया ज्योत्स्ना मौक्तिकदाम चन्दनरसः शीतांशुकान्तद्रवः कर्पूरम् कदली मृणालवलयानि अंभोजिनीपल्लवाः स्फुलिङ्गोत्करव्यापाराय भवन्ति । हन्त इति खेदे । अनेनोक्तेन किं न ब्रूमहे । अत्र ज्योत्स्नादयस्तस्यास्तापाय भवन्ति इति सामान्येनोक्तस्य क्वचिदंशे निषेध इति उक्तविषयोऽयमाक्षेपः ।

सारबोधिनी–निषेध इति । वक्तुमिष्टस्य निषेध इति सामान्यलक्षणम् । वक्ष्यमाणेत्यादि विशेषद्वयम् अनुपसर्जनीयस्य कार्यस्योद्देश्यत्वेनाभावप्रतियोगितयोच्चारयितुमयोग्यस्याशक्यवक्तव्यत्वमिति ।

दुःखातिशयहेतुत्वेन यत् कथयितुं न शक्यत इत्यर्थः । ननु वक्तुमिष्टस्य कथं निषेध इत्यत आह **निषेध इवेति** । द्वन्द्वात् परं श्रूयमाणस्य विपयपदस्य प्रत्येकं संवन्धं दर्शयति **वक्ष्यमाणविषय उक्तविषयश्चेति** । **प्रसिद्धत्वं वेति** । व्यवस्थितविकल्पोऽयम् । वक्ष्यमाणविपयेऽशक्यवक्तव्यत्वं विशेषः । परत्र तु परः ।

ए एहीति । इदानीमपि तस्या अपि कृते निष्कृप अहं भणामि । अलमथवा अविचारितकार्यारम्भकारिणी म्रियताम् । पुनर्भणिष्यामीति । कएणेति कृते इत्यर्थः । ए एहि किंपि कीएवि इति पाठे अरे एहि किमपि कस्या अपि कृते इत्यर्थः । **अविचारितेत्यादि** । प्रेम्णः स्थैर्यास्थैर्ये अपरीक्ष्यैव प्रवृत्ता अथ वेति पूर्वाक्षेपेऽलं न भणिष्यामीत्यर्थः । न भणिष्यामीति पौनरुक्त्यं खेदातिशयपोषकम् । अत्रोद्देश्यस्य नायिकादुरवस्थानिवेदनस्य मर्मपीडकत्वम् । वक्ष्यमाणाया मरणावस्थाया अभिधानस्यालमित्यादिना निषेधोऽवश्यवक्तव्यत्वं व्यञ्जयति । **ज्योत्स्नेति** । अन्तर्मानिसे मानसाभ्यन्तरे । न ब्रूमहे इत्युक्तनिषेधो विरहे विरहे शीतलानां दाहकत्वस्य प्रसिद्धत्वं व्यञ्जयति ।

क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना ॥१०७॥

हेतुरूपक्रियायाः, निषेधेऽपि तत्फलप्रकाशनं विभावना । यथा

कुसुमितलताभिरहताप्यधत्त रुजमलिकुलैरदष्टापि ।
परिवर्तते स्म नलिनीलहरीभिरलोलिताप्यघूर्णत सा ॥४७३॥

बालचित्तानुरञ्जनी--विभावनालङ्कारं लक्षयति **क्रियाया इति** । व्याकरोति **हेत्विति** । उदाहरति **यथेति** । सा नलिनी कुसुमितलताभिरहतापि रुजमधत्त । अलिकुलैरदष्टापि परिवर्त्तते स्म लहरीभिरलोलिताप्यघूर्णत । अत्र लताहननादिरूपहेतुक्रियानिषेधेऽपि रुगादिकार्यस्य विशेषेणाभिव्यक्तिर्विभावना ।

सारबोधिनी--**क्रियाया इति** । क्रिया कारकव्यापारः । प्रसिद्धसामग्रीनिषेधेऽपि तत्कार्यरूपफलस्याभिव्यक्तिर्विभावना । अप्रसिद्धं कारणमाक्षिप्येति निर्विरोधः । **हेतुरूपेति** । वैयाकरणाः क्रियाया एव हेतुतां स्वीकुर्वंति तन्मतेन व्याकरोति **हेतुरूपेति** । अन्यथा धात्वर्थरूपक्रियानिषेधस्याकिञ्चित्करत्वेन असङ्गतिः स्यादिति । **कुसुमेति** । लतायाः पीडोत्पादकत्वं हतिद्वारैव तदभावे सति फलमिति विभावना । एवमलिकुलस्य दंशनक्रिययैव परिवर्तकता तथा लहरीणां तरङ्गाणामालोलनद्वारेण आघूर्णकता । नलिनीयुक्ता लहरी नलिनीलहरी नलिनीपरम्परा ।

विशेषोक्तिरखण्डेषु कारणेषु फलावचः ।

मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिः । अनुक्तनिमित्ता उक्तनिमित्ता अचिन्त्यनिमित्ता च । क्रमेणोदाहरणम्

निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते ।
श्लथीकृताश्लेषरसे भुजङ्गे चचाल नालिङ्गनतोऽङ्गना सा ॥४७४॥

विशेषोक्तिं लक्षयति **विशेषोक्तिरिति** । व्याकरोति **मिलितेष्विति** । अनुक्तोक्ताचिन्त्यनिमित्त-भेदात् सा त्रिविधेत्याह **अनुक्तेति** । आद्यामुदाहरति **निद्रेति** । निद्रानिवृत्तौ द्युरत्ने उदिते सति सखीजने द्वारपदं प्राप्ते भुजङ्गे श्लथीकृताश्लेषरसे सति असावङ्गना आलिङ्गनात् न चचाल । अत्र निशानाशादि-कारणसामग्र्यां सत्यामपि आलिङ्गनपरित्यागलक्षणं कार्यं न लक्ष्यत इति विशेषोक्तिः । अत्र संभोगौत्सुक्यलक्षणनिमित्तं नोक्तमित्यर्थः ।

सारबोधिनी-विशेषोक्तिरिति । अत्राप्यप्रसिद्धं कारणं सिद्ध्यतीति न विरोध इति । फलावचः कार्यानभिधानम् । तच्च निमित्तमपेक्षते । तथा च निमित्तस्य त्रैविध्यात् त्रिधा विशेषोक्तिरित्याह **अनुक्तनि-मित्तेत्यादि** । अनुक्तनिमित्तायाश्चिन्त्याचिन्त्यनिमित्तत्वेन द्वैविध्यमिति मिलित्वा त्रैविध्यम् । **निद्रेति** । **श्लथीकृताश्लेषरस इति**, तेन सर्वाङ्गसंपन्नः संभोगो जातस्तथा चात्र रतश्रमादक्षमत्वं निमित्तमनुक्तं-चिन्तनीयमिति ।

कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने ।
नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे ॥४७५॥

स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरतापि तनुं यस्य शम्भुना न बलं हृतम् ॥४७६॥

बालचित्तानुरञ्जनी--उक्तनिमित्तामुदाहरति **कर्पूर इवेति** । कर्पूर इव दग्धोऽपि यः कामः जने जने शक्तिमान् अवार्यवीर्याय तस्मै मकरकेतवे नमोऽस्तु । दाहलक्षणे कारणे सत्यपि अशक्तिमत्त्वस्य कार्यस्याभावः । अवार्यवीर्यत्वं च निमित्तमुक्तम् । अचिन्त्यनिमित्तामुदाहरति **स एक इति** । एकः कुसुमायुधः सन् त्रीणि जगन्ति जयति । यस्य तनुं हरतापि शंभुना बलं न हृतम् । अत्र तनुहरणे सत्यपि बलहरणस्य कार्यस्यानुक्तिः । तत्र च निमित्तमचिन्त्यं पारमेश्वरस्य प्रभावस्य पर्यनुयोगानर्हत्वात् ।

सारबोधिनी-कर्पूर इत्यादि । शक्तिर्घ्राणस्य मनसश्चाकर्षकता । अत्र दाहः शक्तिध्वंसकारणम् । सति च तत्र तदकथनम् । अवार्यवीर्यत्वं निमित्तम्, तदुक्तमेव । **स एक इति** । एकोऽसहायः अथवा एकोऽवधारणे । स एव नान्यः । तनुहरणं बलहरणे कारणम् । सति च तत्र तदकथनं तत्र निमित्तस्य चिन्तयितुमशक्यतयाऽचिन्त्यनिमित्तता ।

यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः ॥१०८॥

यथा

एकस्त्रिधा वससि चेतसि चित्रमत्र देव द्विषां च विदुषां च मृगीदृशां च ।
तापं च संमदरसं च रतिं च पुष्णन् शौर्योष्मणा च विनयेन च लीलया च ॥४७७॥

बालचित्तानुरञ्जनी—यथासंख्यालङ्कारं लक्षयति **यथासंख्यमिति** । प्रथमनिर्दिष्टाः पश्चान्निर्दिष्टाश्चेति द्विविधाः । तेषां मध्ये आद्यः पश्चान्निर्दिष्टानां क्रमेण व्यत्ययो यथासंख्यालङ्कार इत्यर्थः । तमुदाहरति एक इति । हे देव ! एकस्त्वं द्विषां विदुषां मृगीदृशां चेतसि क्रमेण शौर्योष्मणा विनयेन लीलया तापं च संमदरसं च रतिं च पुष्णन् त्रिधा वससि चित्रम् ।

सारबोधिनी—यथासंख्यमिति । यथासंख्यं नामालङ्कार इत्यर्थः । यद्यपि 'अकलिततपस्तेजोवीर्ये'त्यादौ अक्रमस्य दोषताभिधानात् तदभावरूपो नायमलङ्कारो भवितुमर्हति तथाप्येकत्रानेकेषां तथात्वे वैचित्र्यानुभवादलङ्कारतेत्ययं गणितः ।

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।
यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ।। १०९।।

साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण यत् समर्थ्यते, विशेषो वा सामान्येन सोऽर्थान्तरन्यासः । कमेणोदाहरणम्

निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतम् ।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् ।।४७८।।

सुसितवसनालङ्कारायां कदाचन कौमुदी-
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः ।
तदनु भवतः कीर्तिः केनाप्यगीयत येन सा
प्रियगृहमगान्मुक्ताशङ्का क्व नासि शुभप्रदः ।।४७९।।

गुणानामेव दौरात्म्याद् धुरि धुर्यो नियुज्यते ।
असंजातकिणस्कन्धः सुखं स्वपिति गौर्गलिः ।।४८०।।

अहो हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशम् ।
त एव धन्याः सुहृदः पराभवं जगत्यदृष्ट्वैव हि ये क्षयं गताः ।।४८१।।

बालचित्तानुरञ्जनी— अर्थान्तरन्यासालङ्कारं लक्षयति **सामान्यमिति** । यत्र सामान्यं विशेषेण समर्थ्यते विशेषो वा सामान्येनेति भेदद्वयम् तदपि साधर्म्यवैधर्म्याभ्यां द्विविधमिति चत्वारो भेदाः इत्याह **साधर्म्येणेति** । साधर्म्यद्वारा समर्थ्यते । वैधर्म्येणाद्यमुदाहरति **गुणानामिति** । धुर्यः पुरुषः गुणानामेव दौरात्म्यात् धुरि नियुज्यते । असंयातक्रिणस्कन्धो गली कुत्सितो गलोऽस्यास्तीति गली यो बलीवर्दः गले बलादासंजितं युगं पातयति स गली गौः सुखं स्वपिति । अत्र गुणानामिति

सामान्यं गलतिविशेषेण मुखमिति वैधर्म्यद्वारा समर्थ्यते। वैधर्म्येण द्वितीयमुदाहरति **अहो हि मे इति**। कश्चिदप्रियदैवोन्नतविवक्षन्नाह[?]। मे आयुषा बह्वपराद्धं अहो यद्यस्मान्मया ईदृशमप्रियं वक्तव्यम्! विशेषरूपः धन्या इति सामान्येन अहमधन्य इति वैधर्म्येण समर्थ्यते। साधर्म्येणाद्यमुदाहरति **निजेति**। निजदोषेणाच्छादितचेतसां पुरुषाणां सुन्दरमेव वस्तु विपरीतं भाति। पित्तोपहतः पुरुषः शशिशुभ्रमपि शङ्खं पीतं पश्यति। अत्र दुष्टचित्तत्वलक्षणसामान्यं पित्तोपहतत्वेन विशेषेण समर्थ्यते। **सुसितेति**। कौमुदीमहसि धवलवसनालङ्कारायां स्वैरं यान्त्यां सुदृशि चन्द्रः अस्तंगतोऽभूत् तदनु भवतः कीर्तिः केनापि गीता [ततः] सा मुक्ताशंका सती गृहं गता। अतस्त्वं क्व शुभप्रदो नासि? अपि तु सर्वत्र। अत्राभिसारिकाकारो विशेषः क्वाति सर्वाक्षेपेण सामान्येन समर्थ्यते।

सारबोधिनी—अनुपपद्यमानतया संभाव्यमानस्यार्थस्य उपपादनार्थं यदर्थान्तरस्य न्यसनमुपपादकत्वेनोपन्यासः सोऽर्थान्तरन्यासः। तत्र सामान्यस्य विशेषो विशेषस्य सामान्यं समर्थकमिति द्वौ। तत्रापि प्रत्येकं साधर्म्यवैधर्म्याभ्यां भेदद्वयमिति चत्वारो भेदाः। **निजेति**। अतिसुन्दरमेवातिसुन्दरमपीत्यर्थः। **सुसितेति**। व्याख्यातम्। **गुणानामिति**। किणः प्ररूढव्रणग्रन्थिः। **अहो इति**। ईदृशं मित्रव्यसनरूपम्।

विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः।

वस्तुवृत्तेनाविरोधेऽपि विरुद्धयोरिव यदभिधानं स विरोधः।

जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद् गुणस्त्रिभिः ॥११०॥

क्रिया द्वाभ्यामपि द्रव्यं द्रव्येणैवेति ते दश।

क्रमेणोदाहरणम्

अभिनवनलिनीकिसलयमृणालवलयादि दवदहनराशिः।
सुभग कुरङ्गदृशोऽस्या विधिवशतस्त्वद्वियोगपविपाते ॥४८२॥

बालचित्तानुरञ्जनी—विरोधालङ्कारं लक्षयति **विरोध इति**। जातेर्जात्यादिभिः सह चत्वारो विरोधाः। गुणस्य गुणादिभिस्त्रयः। क्रियाया क्रियाभ्यां द्वौ। द्रव्यस्य द्रव्येणैक इति दश भेदा इत्याह **जातिरिति**। जात्या विरुद्धां जातिमुदाहरति **अभिनवेति**। हे सुभग विधिवशतः तद्विरहाशनिपाते अस्याः अमृतदृशः नूतनकमलिनीपल्लवमृणालवलयादिकं दावानलराशिः।

सारबोधिनी—**वस्तुवृत्तेनेति**। अन्यथा विरोध एव स्यान्न तु विरोधाभासः। **अभिनवेति**। पविपाते वज्रपाते। अत्रापाततो नलिनीकिसलयत्वादि दवदहनत्वजात्योर्विरोधः स वियोगसन्तापोत्कर्षकत्वेन परिह्रीयत इति विरोधाभासः।

गिरयोप्यनुन्नतियुजो मरुदप्यबलोऽब्धयोऽप्यगम्भीराः ।
विश्वंभराप्यतिलघुर्नरनाथ तवान्तिके नियतम् ॥४८३॥

येषां कण्ठपरिग्रहप्रणयितां संप्राप्य धाराधर-
स्तीक्ष्णः सोऽप्यनुरज्यते च कमपि स्नेहं पराप्नोति च ।
तेषां सङ्गरसङ्गसक्तमनसां राज्ञां त्वया भूपते
पांसूनां पटलैः प्रसाधनविधिर्निर्वर्त्यते कौतुकम् ॥४८४॥

बालचित्तानुरञ्जनी—जात्या विरुद्धं गुणमुदाहरति **गिरय इति** । हे नरनाथ तव समीपे गिरयोऽपि नियतं अनुन्नतियुक्ताः । मरुदपि बिलरहितः । अब्धयोऽप्यगंभीराः । भूमिरप्यतिलघुः । अनौन्नत्यादिगुणोऽपि गिर्यादि जात्या विरुध्यते । सः वर्णनीयस्य महाप्रभावतया परिह्रियते । जात्या विरुद्धां क्रियामुदाहरति **येषामिति** । हे राजन् तीक्ष्णः सुप्रसिद्धः खड्गोऽपि येषां राज्ञां कण्ठपरिग्रह-प्रणयितां प्राप्य अनुरज्यते अनुरक्तो भवति । सङ्गरसक्तमनसां तेषां पांसूनां पटलैस्त्वया प्रसाधनविधि-र्निष्पाद्यते कौतुकम् । अत्र तीक्ष्णया खड्गजात्या समनुरञ्जनक्रिया विरुध्यते । पांसुत्वजात्या मण्डनक्रिया विरुध्यते । सा वैरिविजयेन समाधीयते । श्लेषच्छाया चास्य सहकारिणी ।

सारबोधिनी—**गिरय इति** । अत्र विश्वम्भराप्यतिलघुरित्यनेन साहचर्यादनुन्नत्यचलागम्भीर-पदेषु नञ् अल्पार्थो न स्वभावार्थः, अन्यथा गुणविरोधोदाहरणविरोधापत्तेः । अत्र गिरित्वादिजात्या अल्पौन्नत्यादिगुणानामापाततो विरोधत्वमापन्नोऽपि वर्णनीयौन्नत्यप्रकर्षविवक्षया समर्थनादाभासत्वम् । **येषामिति** । तीक्ष्णो दारुणोऽत्र तीक्ष्णत्वजात्या रञ्जनस्नेहावाप्तिक्रियोरापाततो विरोधेऽपि लौहित्यमज्ज-धातुप्राप्तरूपार्थप्रतीतावाभासता ।

सृजति च जगदिदमवति च संहरति च हेलयैव यो नियतम् ।
अवसरवशतः शफरो जनार्दनः सोऽपि चित्रमिदम् ॥४८५॥

सततं मुसलासक्ता बहुतरगृहकर्मघटनया नृपते ।
द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः ॥४८६॥

पेशलमपि खलवचनं दहतितरां मानसं सतत्त्वविदाम् ।
परुषमपि सुजनवाक्यं मलयजरसवत् प्रमोदयति ॥४८७॥

बालचित्तानुरञ्जनी—जात्या विरुद्धं द्रव्यमुदाहरति **सृजतीति** । यदिदं जगद्धेलयैव सृजति अवति संहरति च सोऽपि जनार्दनः अवसरवशतः इदं चित्रम् । अत्र शफरत्वजातेर्भगवता जनार्दनद्रव्येण

सह विरोधः।""स राजौदार्यात् समाधीयते। गुणेन विरुद्धां क्रियामुदाहरति **पेशलमिति** । कोमलमपि दुर्जनवचनं सुतत्त्वविदां तत्वज्ञानां पुरुषाणां मानसं दहतितराम्। कर्कशमपि सुजनवाक्यं चन्दनरसवत् प्रमोदयति। अत्र पेशलत्वस्य गुणस्य दाहलक्षणलक्षितक्रियायाः पारुष्यस्य मोदरूपायाश्च विरोधः, खलवचनस्य दुःसहत्वात्। सुजनवाक्यस्य हृद्यत्वाच्च परिहार्यते।

सारबोधिनी--सृजतीति । अत्र शफरत्वजात्यापाततो जनार्दनरूपस्य द्रव्यस्य विरोधो मीनशरीरपरिग्रहस्यागमगतत्वादाभासः। **सततमिति**। अत्र काठिन्यसौकुमार्ययोरापाततो विरोधो भवद्दानवशात् स्वयं गृहव्यापारनिवृत्या समाधीयते।

क्रौञ्चाद्रिरुद्दामदृपद्दृढोऽसौ यन्मार्गणानर्गलशानपाते।

अभून्नवाम्भोजदलाभिजातः स भार्गवः सत्यमपूर्वसर्गः ॥४८८॥

परिच्छेदातीतः सकलवचनानामविषयः

पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान्।

विवेकप्रध्वंसादुपचितमहामोहगहनो

विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥४८९॥

अयं वारामेको निलय इति रत्नाकर इति

श्रितोऽस्माभिस्तृष्णानरलितमनोभिर्जलनिधिः।

क एवं जानीते निजकरपुटोकोटरगतं

क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ॥४९०॥

समदमतङ्गजमदजलनिस्यन्दतरङ्गिणीपरिष्वङ्गात्।

क्षितितिलक त्वयि तटजुषि शङ्करचूडापगापि कालिन्दी ॥४९१॥

बालचित्तानुरञ्जनी--गुणेन विरुद्धं द्रव्यमुदाहरति **क्रौञ्चेति**। यन्मार्गणानर्गलशातपाते सति उद्दामदृदृपदृढः असौ क्रौञ्चाद्रिः नवाम्भोजदलाभिजातः अभूत् स भार्गवः अपूर्वसृष्टिः सत्यम्। शातो वज्रम्। अत्र कमलदलवत् सौकुमार्यस्य गुणस्य पर्वतविशेषरूपद्रव्येण विरोधः। स च भार्गवस्य गाढप्रहारितया समाधीयते। क्रियाया विरुद्धां क्रियामुदाहरति **परिच्छेदेति**। परिच्छेदरहितः सकलवचनानामगोचरः पुनः अन्यस्मिन् जन्मनि यः अनुभवपथं न गतवान् विवेकनाशात् उपचितमहामोहगहनः कोऽपि विकारः अन्तर्जडयति तापं च कुरुते। अत्र जडीकरणतापकरणयोः क्रिययोर्विरोधः। स औत्सुक्योत्कर्षात्

परिहीयते। क्रियाविरुद्धं द्रव्यमुदाहरति **अयमिति**। तृष्णातरलितमनोभिः अस्माभिरयमेको जलनिधिः वारामुदकानां निलयः रत्नाकर इति च श्रितः निजकरपुटीकोटरगतं ताम्यन्तस्तिमयो मत्स्याः मकराश्च यस्मिन् एनं समुद्रं मुनिः अगस्त्यः आपास्यतीति क एवं जानीते। अत्र जलनिधिपानक्रियाया अगस्त्यरूपद्रव्येण सह विरोधः स अगस्त्यमहिम्ना परिहीयते। द्रव्येण विरुद्धं द्रव्यमुदाहरति **समदेति**। हे क्षिति तिलक राजन् त्वयि तटजुषि सति शङ्करजूटापगापि समदमतङ्गजगमदजलनिःस्यन्दतरङ्गणीपरिष्वङ्गात् कालिन्दी भवति। अत्र गङ्गाकालिन्दीद्रव्ययोर्विरोधः। मदजलकृतनीलिमत्वेन **परिह्रियते**।

सारबोधिनी—कौञ्चेति। अत्र क्रौञ्चाद्रेर्द्रव्यस्य मृदुत्वाख्यगुणेन विरोधो भार्गवमहिम्ना समाधीयते। **परिच्छेद इति**। अत्र जडीकरणतापक्रिययोर्विरोधो विरहमहिम्ना समाधीयते। **अयमिति**। अत्र समुद्राख्यस्य द्रव्यस्य पानक्रियाविरोधोऽगस्त्यतपःप्रभावातिशयेन समाधीयते। **समदेति**। अत्र गङ्गायमुनयोर्द्रव्ययोः स्वरूपतो विरोधोऽपि कालिन्दीपदस्य कृष्णजलपरत्वात्परिह्रियते।

स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्॥१११॥

स्वयोस्तदेकाश्रययोः। रूपं वर्णः संस्थानं च। उदाहरणम्

पश्चादङ्घ्री प्रसार्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चै-
रासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय।
घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण॥४९२॥

बालचित्तानुरञ्जनी—स्वभावोक्त्यलङ्कारं लक्षयति **स्वभावोक्तिरिति**। [डिम्भादेः] क्रियारूपयोर्वर्णनं स्वभावोक्तिः। रूपं च द्विधा, वर्णः संस्थानञ्चेति तेन डिम्भा देरितिषष्ठ्यैव क्रियारूपयोस्तत्संबन्धित्वावगमात् किं स्वशब्दोपादानेनेत्याशङ्क्याह **स्वयोरिति**। उदाहरति **पश्चादिति**। शयनादुत्थितः अश्वः पश्चादङ्घ्री प्रसार्य त्रिकनतिविततं अङ्गं उच्चैः द्राघयित्वा दीर्घीकृत्य आभुग्नकण्ठः सन् उरसि मुखमासज्य धूम्राः सटा विधूय साभिलाषादनवरतचलत्प्रोथतुण्डो मन्दं शब्दायमानःखुरेण क्ष्मां लिखति। अत्राङ्घ्रिप्रसरणसुदीर्घकीरणमुखवक्षोलगनानि संस्थानोक्तयः, धूलिधूम्रा इति वर्णस्योक्तिः। चलत्प्रोथतुण्ड इति संस्थानोक्तिः। शब्दायमानो विलिखति च पदद्वयेन क्रियाया उक्तिः।

सारबोधिनी—स्वभावोक्तिरिति। रूपशब्देन वर्णावयवसंनिवेशश्चोभयं गृह्यत इत्याह **रूपमिति**। याद्दशस्वाभाविकधर्माभिधाने चमत्कारस्तादृश एवालङ्कारस्तेन "गोरपत्यं बलीवर्दो घासमत्ति मुखे न स" इत्यादेर्निरासः।

व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा ।

व्याजरूपा व्याजेन वा स्तुतिः । क्रमेणोदाहरणम्

हित्वा त्वामुपरोधवन्ध्यमनसां मन्ये न मौलिः परो
लज्जावर्जनमन्तरेण न रमामन्यत्र संदृश्यते ।
यस्त्यागं तनुतेतरां मुखशतैरेत्याश्रितायाः श्रियः
प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः ॥४९३॥

हे हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तोयधे
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः ।
तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो-
भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः ॥४९४॥

बालचित्तानुरञ्जनी--व्याजस्तुत्यलङ्कारं लक्षयति व्याजस्तुतिरिति । मुखे प्रारंभे निंदा श्रूयमाणनिन्देत्यर्थः । रूढिः अन्यथा स्तुतिर्वेति तात्पर्यम् । आरंभे स्तुतिः श्रूयमाणा स्तुतिरूढिः । अन्यथा निन्दायामेव तात्पर्यमित्यर्थः । यत्र स्तुतिरभिधीयमाना प्रमाणान्तरात् बाधितस्वरूपा निन्दायां पर्यवस्यति तत्र व्याजरूपा स्तुतिः । यत्र तु निन्दा अभिधीयमाना पूर्ववत् बाधितस्वरूपा स्तुतौ पर्यवस्यति तत्र व्याजनिन्दा । तत्र व्याजनिन्दामुदाहरति हित्वेति । उपरोधेन दाक्षिण्येनावसंबद्धं मानो येषां तेषां मौलिः अग्रणीः त्वां हित्वा अपरः अन्यः राजन् त्वद्विधः कोऽपि निर्दाक्षिण्यो नास्तीत्यर्थः । लज्जावर्ज्जनमन्तरेणात्र न दृश्यते । लक्ष्मीसदृशं निर्लज्जं किमपि नास्तीत्यर्थः । यो भवान् मुखशतैरेत्या श्रितायाः श्रियः त्यागं तनुते त्यागकृतावमाननं प्राप्यापि यस्या रमायाः स्थितिरस्त्येव । व्याजस्तुतिमुदाहरति । हे हेलाजितबोधिसत्व हे तोयधे वचसां विस्तारैः किं परहिताधाने गृहीतव्रतः त्वत्सदृशः परो नास्ति यत् यस्मात् कारणात् तृष्यतः पान्थस्य जनस्य सलिलप्रदानरूपोपकारघटना तत्र वैमुख्यमनादरः तेन जनस्य दुःकीर्तिपुञ्जस्य मरुस्थलस्य प्रोद्बृंहतः साहायकं करोषि क्षारोदकत्वात् ।

क्षारबोधिनी-मुखे प्रथमतः । रूढिः पर्यवसानम् । यत्र मुखे निन्दा तत्र स्तुतौ पर्यवसानं यत्र मुखे स्तुतिस्तत्र निन्दायां पर्यवसानमित्यर्थः । ह्रित्वेति । निर्लज्जत्वं च रमामन्तरेण नान्यत्र दृश्यत इत्यन्वयः । हे इति । बोधिसत्त्वात् बौद्धाः ते अतिकारुणिकास्तेऽपि त्वया जिता इत्यर्थः ।

सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम् ॥११२॥

एकार्थाभिधायकमपि सहार्थबलात् यत् उभयस्याप्यवगमकं सा सहोक्तिः

यथा

सह दिअहणिसाहिं दोहरा सासदण्डा
सह मणिवलयेहिं वाप्पधारा गलन्ति ।
तुह सुहअ विओए तोअ उव्विग्गिरीए
सह अ तणुलदाए दुब्बला जीविदासा ॥४६५॥

श्वासदण्डादिगतं दीर्घत्वादि शाब्दम् । दिवसनिशादिगतन्तु सहार्थसामर्थ्यात् प्रतिपद्यते ।

बालचित्तानुरञ्जनी—सहोक्त्यलङ्कारं लक्षयति सा सहोक्तिरित्यादि । अर्थग्रहणं पर्याय-स्वीकाराय । बलादित्यनुच्यमाने कस्यचिदेव वाचकत्वाद्द्विवाचकत्वासिद्धेर्वाचकत्वं च विविच्यमानं क्वचिदभिधायकत्वं क्वचिदवबोधकत्वमित्याह उभयस्येति । उदाहरति सहेति । हे सुहअ हे सुभगं तुह तव व्विओए वियोगे, उग्गिरीए उद्वेजनशीलाया, तीअ तस्याः, सासदण्डा श्वासदण्डाः, दिअसणिसाहिं दिवसनिशाभिः सह, दोहराः दीर्घाः । वाहधारा बाप्पधारा, मणिवलएहिं मणिवलयैः सह गलन्ति तणुलदाए असहतनुलतया च सह जीविताशा दुब्बला दुर्बला । अत्र श्वासदण्डादिविषयस्य दैर्घ्यादिशाब्दत्वं यत्र सहयुक्तेऽप्रधाने इति तृतीया तत्र नियमेन गुणभावादार्थत्वमित्याह श्वासेति । यस्य विवक्षाव्यतिरेकेण सहोक्तिमात्रं नालङ्कारः । यथा अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेष्विति । अस्या मालावैचित्र्यं यथा–

उत्क्षिप्तं सह कौशिकस्य पुलकैः सार्धं मुखैर्नामितं
भूपानां जनकस्य संशयधिया साकं समास्फालितम् ।
वैदेह्या मनसा समं तदधुना कृष्टं ततो भार्गव-
प्रौढाहंकृतिकन्दलेन च समं भग्नं तदैशं धनुः ॥ इति

अत्र कार्मुकसाहित्यात्सहोक्तिः पूर्वत्र कर्तृसाहित्यादित्यपि भेद उन्नेयः ।

सारबोधिनी—सेति । सहार्थस्येत्यनेन समं सार्द्धमित्यादेरपि परिग्रहः । **एकार्थेति** । अर्थोऽन्वयः । एकप्रतियोगिकान्वयके कमपीत्यर्थः । **उभयस्येति** । विशेषणपदानां विशेष्यान्वितस्वार्थ-बोधकत्वस्यौत्सर्गिकत्वम्, प्रकृते तु सहाद्यव्ययसमभिव्याहारविशेषसहकारेणापरार्थप्रतिपादनमित्युभय-प्रतियोगिकस्वार्थान्वयबोधकत्वमित्यर्थः । यत्रैकस्य प्राधान्येनापरस्य गुणत्वेनैकक्रियान्वयित्वं तत्रायमलङ्कार इति निर्गलितार्थस्तत्र चैत्रमैत्रौ सह पठत इत्यत्र न प्रसङ्गः। समुच्चये उभयोः प्राधान्येनान्वयो न त्वेकस्येति विशेषात् । **सहेति** ।

सह दिवसनिशाभिर्दीर्घनिःश्वासदण्डाः
सह मणिवलयाद्यैर्बाष्पधारा गलन्ति ।
तव सुभग वियोगे तस्या उद्विग्नायाः
सह च तनुलतया दुर्बला जीविताशा ॥

विनोक्तिः सा विनान्येन यत्रान्यः सन्न नेतरः ।

क्वचिदशोभनः क्वचिच्छोभनः । क्रमेणोदाहरणम्

अरुचिर्निशया विना शशी शशिना सापि विना महत्तमः ।
उभयेन विना मनोभवस्फुरितं नैव चकास्ति कामिनोः ॥४९६॥

मृगलोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः ।
अमृतद्युतिसुन्दराशयोऽयं सुहृदा तेन विना नरेन्द्रसूनुः ॥४९७॥

बालचित्तानुरञ्जनी—विनोक्तलङ्कारं लक्षयति **विनोक्तिरिति** । यत्रान्येन विना अन्यः सन् न भवति न शोभत इत्यर्थः । इतरः अशोभनादित्यर्थः । आद्यमुदाहरति **अरुचिरिति** । शशी निशया विना अरुचिः रुचिरहितः अशोभन इत्यर्थः । महत्तम इति रूपकम् । तमोरूपा सा निशा । सापि शशिना । विचित्रव्यवहारप्रभाप्रगल्भः पूर्वं स्त्रीमोहितो हितो व्यवहारज्ञो नासीत् इदानीं तया विना व्यवहारज्ञः शोभन इत्यर्थः । अयं तेन दुष्टेन सुहृदा विना अमृतद्युतिसुन्दराशयः पूर्वं दुष्टसुहृदा दुष्टबुद्धिः । इदानीं त्वद्विरहितः शोभनचित्तः ।

सारबोधिनी—**विनोक्तिरिति** । अन्येन विना अन्यः सन् न भवति । असन् वा यत्र न भवति स विनोक्तिनामालाङ्कारः इत्यर्थः । नञः प्रसज्यार्थकत्वभ्रमं निरस्यति **अशोभन इति** । **अरुचिरिति** । मनोभवस्फुरितं । कामचेष्टा **मृगेति** । अमृतद्युतिश्चन्द्रः ।

परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः ॥११३॥

परिवृत्तिरलङ्कारः । उदाहरणम्

लतानामेतासामुदितकुसुमानां मरुदयं
मतं लास्यं दत्वा श्रयति भृशमामोदमसमम् ।
लतास्त्वध्वन्यानामहह दृशमादाय सहसा
ददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम् ॥४९८॥

अत्र प्रथमेऽर्धे समेन समस्य, द्वितीय उत्तमेन न्यूनस्य ।

नानाविधप्रहरणैर्नृप संप्रहारे स्वीकृत्य दारुणनिनादवतः प्रहारान् ।
दृप्तारिवीरविसरेण वसुन्धरेयं निर्विप्रलम्भपरिरम्भविधिर्वितीर्णा ।।४९९।।
अत्र न्यूनेनोत्तमस्य ।

बालचित्तानुरञ्जनी—परिवृत्त्यलङ्कारं लक्षयति **परिवृत्तिरिति** । अर्थानां समैरसमैश्च वस्तुभिर्विनिमयः परिवृत्तिः । न्यूनाविभावे[?] द्विविधमसमम् । एवं त्रिधा परिवृत्तिः । अत्र किं लक्ष्यं किं लक्षणमिति संदेहे निर्णयार्थमाह **परिवृत्तिरिति** । आद्य प्रकारद्वयमुदाहरति । अयं मरुत् उदितः कुसुमानां मतमभिमतं लास्यं नृत्यंदत्वा, असममधिकं आमोदमाश्रयति आश्रयते । लतास्तु अधन्यानां पान्थानां दृशं, सहसा आदाय आधिव्याधिभ्रमिमुदितमोहव्यतिकरं ददति । अहह । अत्र प्रकारद्वयं कथमुक्तमित्यत आह **अत्रेति** । समेन समस्य परिमलस्यादानं परिवृत्तिः । उत्तमेन दृगुपादानव्याध्यादेः न्यूनस्य परिवृत्तिः । तृतीयमुदाहरति **नानेति** । हे नृप संप्रहारे युद्धे दृप्तशत्रुसमूहेन कर्त्रा नानाविधैः शस्त्रैः कृतान् प्रहारान् स्वीकृत्यापि इयं भूः निवर्तितविप्रलम्भः विगतविरहः परिभवविधिर्यस्याः तया वितीर्णा दत्ता यथा भूमिस्त्वां न मुञ्चति तथा दत्तेत्यर्थः । अत्र न्यूनेन प्रहाररूपेण उत्तमभूताया वसुन्धरायाः परिवृत्तिरित्याह **अत्रेति** ।

सारबोधिनी—**परिवृत्तिरिति** । योऽर्थानां विनिमयः स परिवृत्तिर्नामालङ्कारः इत्यर्थः **लतानामिति** । व्यतिकरं योगं । **नानेत्यादि** । **बिसरः** समूहः । विप्रलम्भो विप्रयोगस्तच्छून्यः । परिरम्भविधिः स्वीकारो यस्यामित्यर्थः ।

प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः ।
तद्भाविकम् ।

भूताश्च भाविनश्चेति द्वन्द्वः । भावः कवेरभिप्रायोऽत्रास्तीति भाविकम् ।
उदाहरणम्

आसीदञ्जनमत्रेति पश्यामि तव लोचने ।
भाविभूषणसंभारां साक्षात्कुर्वे तवाकृतिम् ।।५००।।
आद्ये भूतस्य द्वितीये भाविनो दर्शनम् ।

बालचित्तानुरञ्जनी—भाविकालङ्कारं लक्षयति **प्रत्यक्षा इति** । लोकोत्तरतया अत्यद्भुतत्वात् भावसंबंधव्यतिरेकेण शब्दसंबन्धसमर्पितत्वाच्च प्रत्यक्षा इवेत्युक्तम् । समासान्तरव्यावृत्त्यर्थमाह । **द्वन्द्व इति** । प्रतिध्वंसाक्रान्तभूताः प्रागभावाक्रान्ताश्च भाविनः । कवेराशयः । श्रोतरिति प्रतिबिम्बितत्वे नास्तीत्याह[?] **भाव इति** । भावश्च भावना पुनः पुनश्चेतसि निवेशनम् । उदाहरति **आसीदिति** ।

कोऽपि पुरुषः स्वनायिकां प्रति कथयति । हे कामिनि, अत्र ते लोचने अञ्जनमासीदिति पश्यामि । स्वभावेनैव नीलयोस्तव लोचनयोः किं मण्डनेन क्षिप्ताञ्जने तव लोचने प्रतिभासेते इत्यर्थः । तवाकृतिंभाविभूषणसंभारां साक्षात्कुर्वे, तवाकृतिरपि भूषणाभावेऽपि रामणीयकं पुष्णाति, अतो भूषणमपि न धारणीयमिति भावः । अत्र पूर्वार्धे भूतस्य लोचनाञ्जनस्य प्रत्यक्षतया प्रतिभासः । उत्तरत्र भविष्यतो भूषणसंभारस्येत्याह अत्रेति ।

सारबोधिनी—प्रत्यक्षा इवेति । स्फुटं प्रतीयमाना इत्यर्थः । न चेयं भ्रान्तिः । भूतभाविनां भूतभावित्वेनैव प्रकाशनात् । परन्तु कविना भूतभाविनावपि प्रत्यक्षतुल्यतत्प्रतीतिविषयतया प्रत्यक्षत्वेन विवक्षितत्वात् तथा निर्दिश्यते । अत एवालङ्कारत्वं विवक्षारूपम् । भावमूलकत्वात् भाविकमिति संज्ञा । ननु भूतभाविन इत्यत्रे तरेतरसमाहारद्वन्द्वयोर्भूतभाविनौ भूतभावीति रूपं स्यादिति आह **भूताश्चेति** । **आसीदिति** । अतीताञ्जनयुक्ते लोचने पश्यामीत्यर्थः । भाव्यलङ्कारसंबद्धात् तवाकृतिं साक्षात्कुर्वे इत्यन्वयः । **यदाह** । उभयत्रापि विशेष्यस्यावर्तमानतया साक्षात्कारविषयतया न वैचित्र्यं तथापि विशेषणयोरञ्जनालङ्कारयोरप्यसाक्षात्कारविषयत्वेन विवक्षणात् वैचित्र्यमिति ।

काव्यलिङ्गं हेतोर्वाक्यपदार्थता ॥११४॥

वाक्यार्थता यथा

वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे न प्रायः क्वचिदपि भवन्तं प्रणतवान् ।
नमन् मुक्तः संप्रत्यतनुरहमग्रेऽप्यनतिभाङ्
महेश क्षन्तव्यं तदिदमपराधद्वयमपि ॥५०१॥

बालचित्तानुरञ्जनी—काव्यलिङ्गालङ्कारं लक्षयति **काव्येति** । अत्र काव्यरूपो हेतुः वाक्यार्थस्थित्या विशेषणद्वारेण पदार्थस्थित्या वा लिङ्गत्वेन निबध्यते तत् काव्यलिङ्गमित्यर्थः । वाक्यार्थता, अनेकपदार्थता, एकपदार्थता चेति त्रैविध्यम् तत्राद्यमुदाहरति **वपुरिति** ! हे पुरारे । पूर्वस्मिन् जन्मनि भवन्तं क्षणमपि न प्रणतवानस्मि इतीदं वपुःप्रादुर्भावात् मया अनुमितम् । अन्यथा शरीरोत्पत्तिर्न स्यादित्यर्थः । संप्रति न मुक्तः अतनुरहं अग्रे न नमामि । हे महान् महेश तदिदमपराधद्वयमपि क्षन्तव्यम् ।

सारबोधिनी—काव्यलिङ्गमिति । **वपुरिति** । प्रादुर्भावादुत्पत्तेः । **प्रणतेति** । **यद्वपुर्भस्मेति** । विभुना शम्भुना । **अपराधद्वयमिति** । अत्र यद्यपराधद्वयेऽनमनद्वयात्मकेऽनमनद्वयं न हेतुस्तथापि अपराधद्वये अपराधवृत्तिद्वित्वे अहेतुरित्यर्थःकरणीयः । तथाऽनमनवृत्तिद्वित्वेऽनमनयोः स्वगोचरापेक्षाबुद्धिद्वारा प्रयोजकत्वात् । प्रकृते च प्रयोजकसाधारणस्यैव हेतुत्वस्य विवक्षणादिति तन्न । द्वित्वस्य द्वीतरावृत्तित्वात् तस्य

पदार्थान्तरत्वस्वीकृन्मतेऽपि द्वित्वस्यापेक्षाबुद्धिव्यङ्ग्यत्वम्। न तु तद्धेतुत्वमिति, तस्य नित्यत्वात्। यतो वस्तुनो नमनद्वयादपराधद्वयं प्रत्यवादिरूपमन्यदेवेति नासङ्गतिरिति । यद्यप्यनेकपदार्थतायां वाक्यार्थत्वेनैव पार्थक्यं तथापि वाक्यार्थपदेन महावाक्यार्थस्याभिमतत्वात्। अवान्तरवाक्ये नानापदार्थताभिधानमिति।

अनेकपदार्थता यथा

प्रणयसखीसलीलपरिहासरसाधिगतैर् ललितशिरीषपुष्पहननैरपि ताम्यति यत्।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥५०२॥

एकपदार्थता यथा

भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभं
हा सोपानपरंपरां गिरिसुताकान्तालयालङ्कृतिम्।
अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखा-
लोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे ॥५०३॥

एषु अपराधद्वये पूर्वापरजन्मनोरनमनम् भुजपाते शस्त्रोपक्षेपः, महामोहे सुखालोकोच्छेदित्वं च यथाक्रममुक्तरूपो हेतुः।

बालचित्तानुरञ्जनी—द्वितीयमुदाहरति **प्रणय इति**। अघोरघण्टः मालतीं घ्नन् माधवेन संबोधितः। हे दुरात्मन् प्रिया सखीसलीलपरिहासरसाधिगतैः ललितशिरीषपुष्पहननैरपि ताम्यति। तत्र वपुषि शस्त्रं उपक्षिपतः तव शिरसि अकाण्डयमदण्ड इव मदीयः एष भुजः पतति। तृतीयमुदाहरति **भस्मेति**। समुत्पन्नशिवप्रसादस्य कस्यचिन्महापुरुषस्य वचनम्। हे भस्मोद्धूलन ! भवते स भद्रमस्तु। हे रुद्राक्षमाले ते शुभमस्तु। महेशगृहालङ्कारभूतां सोपानपरंपरां हा कष्टम्। "अभितः" इत्यादिना हायोगे द्वितीया। हे सोपानपरम्परे त्वमपि त्यक्ष्यस इति कष्टम्। अद्य आराधनतोषितेन विभुना महेशेन युष्मत्सपर्यासुखालोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे। वपुःप्रादुर्भावादिति प्रथमश्लोके पूर्वस्मिन् नये च जन्मनि यदनमनलक्षणमपराधद्वयकारणं तदेवापराधतया परिणतं तत्र वाक्यार्थो जातः। अतो नमनलक्षणो अपराधहेतुरेव वाक्यार्थः। **प्रणय** इत्यादिद्वितीयश्लोके शस्त्रोपक्षेपलक्षणो हेतुः। पतिभुज इत्येतत्पदद्वयार्थः लक्षणाकारतया परिणतः। भस्मोद्धूलनेत्यादितृतीयश्लोके सुखालोकोच्छेदित्वलक्षणो हेतुर्महामोहलक्षणैकपदार्थतया परिणत इत्याह **एष्विति**। कारकोऽत्र हेतुः ज्ञापको हेतुः पुनरनुमानालङ्कारे। अस्य हेतुत्वेनोपनिबद्धस्य हेतुत्वं कर्त्तव्यम्। अन्यथा अर्थान्तरन्यासापत्तेरिति द्रष्टव्यम्।

पर्यायोक्तं विना वाच्यवाचकत्वेन यद्वचः ।

वाच्यवाचकभावव्यतिरिक्तेनावगमनव्यापारेण यत् प्रतिपादनं तत् पर्यायेण भङ्ग्यन्तरेण कथनात् पर्यायोक्तम् । उदाहरणम्

यं प्रेक्ष्य चिररूढापि निवासप्रीतिरुज्झिता ।
मदेनैरावणमुखे मानेन हृदये हरेः ॥५०४॥

अत्र ऐरावणशक्रौ मदमानमुक्तौ जाताविति व्यङ्ग्यमपि शब्देनोच्यते तेन यदेवोच्यते तदेव व्यङ्ग्यम् । यथा तु व्यङ्ग्यं न तथोच्यते । यथा गवि शुक्ले चलति दृष्टे गौः शुक्लश्चलति इति विकल्पः यदेव दृष्टं तदेव विकल्पयति न तु यथा दृष्टं तथा । यतोऽभिन्ना-संसृष्टत्वेन दृष्टम्, भेदसंसर्गाभ्यां विकल्पयति ।

बालचित्तानुरञ्जनी--पर्यायोक्तं लक्षयति **पर्यायेति** । अभिधायकाभिधेयभावव्यतिरेकादवगमनव्यापारेण यत् प्रतिपादनमभिधानरूपं तत् पर्यायोक्तमित्याह **वाच्येति** । निर्वक्ति **तदिति** । उदाहरति **यमिति** । यं रावणं प्रेक्ष्य मदेन ऐरावणमुखे चिररूढापि निवासप्रीतिरुज्झिता । मानेन हरेः इन्द्रस्य हृदये प्रीतिरुज्झिता । अत्र कार्यमुखिनो रावणस्य स्वर्गजयलक्षणः प्रभावो वर्णितः । अत्र भङ्ग्यन्तरेण कथनं कथमित्यत आह **अत्रेति** । ननु व्यङ्ग्यमपि शब्देनोच्यत इति व्याहतमित्यत आह **तेनेति** । व्यङ्ग्यापेक्षया प्रकारान्तरेणाभिधानसंभवात् निहितस्यैव तदेव तयैव विच्छित्या गम्यत्वं वाच्यत्वं चेत्याचक्ष्महे । किं तर्हि कायादिद्वारेण वाच्यत्वं स्वसामग्र्या व्यङ्ग्यत्वमित्यभिधानान्न व्याहतिरिति भावः । एतद् दृष्टान्तेन प्रतिपादयति **यथेति** । **दृष्ट इति** । विकल्पकतयेति शेषः । अविलपकतया पदे गवादिकं दृष्टं तदेव चैत्रादिप्रमाता विकल्पयति । न पुनर्यथा दृष्टं तथैव विकल्प्यमानत्वाच्च कथमेकस्येत्यत आह **अभिन्नेति** । अविकल्प्यावस्थायां श्रुत्यादिना यदभिन्नमसंसृष्टं विकल्पानुल्लेखाद्भिन्नं च तस्मादेव तद्विकल्पवेलायामभेदेन संसर्गेण च विकल्पयतीति प्रकारभेदात् तत्रापि न व्याहतिरित्यर्थः

सारबोधिनी--**पर्यायेति** । वस्तुतः पर्यायत्वं नास्तीत्यन्यथा व्याचष्टे **भङ्ग्यन्तरेणेति** । **यमिति** । **ऐरावणं** । ननु व्यङ्ग्यत्वमेवास्य न कथमित्यत आह **अत्रेति** ।

शब्देनेति । अतो न व्यङ्ग्यत्वमेवेत्यर्थः । तथाहि । अन्यत् वाच्यमन्यत् व्यङ्ग्यम् । भ्रम धम्मिअ इत्यादौ तथा दर्शनात् । अत्र शक्रैरावणौ मदमानमुक्तौ जातावित्ययमेक एवार्थः शब्दतः प्रतिपाद्यते । ननु वाच्यं व्यङ्ग्यं चेति विरुद्धमित्यत आह **यथा त्विति** । येन प्रकारेण शब्देन प्रतिपाद्यमानं व्यङ्ग्यं भवति न तेन प्रकारेणोच्यत इत्यर्थः । ननु प्रभेदप्रभेदाभावादभिधया यादृशोऽर्थः प्रतीयते कथं तादृश एव व्यञ्जनया प्रत्येतव्य इत्याशङ्क्य दृष्टान्तमुखेन साधयितुमाह **यथेति** । **अभिन्नेति** ।

भिन्नत्वेन संसृष्टत्वेन वा दृष्टं वस्तु भेदसंसर्गाभ्यां विकल्पयतीत्यर्थः। अतद्व्यावृत्तिरेव विशेषणत्वेन भासते इति मते भेदेति तदन्यमते संसर्गेति। तेनेदं पर्यवसितम्। अत्र शक्यार्थ एव प्रकारान्तरेण व्यञ्जनया प्रतिपाद्यते तत्पर्यायोक्तम्।

उदात्तं वस्तुनः सम्पत्

संपत् समृद्धियोगः। यथा

मुक्ताः केलिविसूत्रहारगलिताः संमार्जनीभिर्हृताः
प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः।
दूराद्दाडिमबीजशङ्कितधियः कर्षन्ति केलीशुकाः
यद्विद्वद्भवनेषु भोजनृपतेस्तत् त्यागलीलायितम्॥५०५॥

महतां चोपलक्षणम्॥११५॥

उपलक्षणमङ्गभावः, अर्थादुपलक्षणीयेऽर्थे। उदाहरणम्

तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी।
निवसन् बाहुसहायश्चकार रक्षःक्षयं रामः॥५०६॥

न चात्र वीरो रसः, तस्येहाङ्गत्वात्।

बालचित्तानुरञ्जनी—उदात्तालङ्कारं लक्षयति **उदात्तमिति**। कथञ्चिद्वर्णनोद्रेचिता समृद्धिरस्य लक्षणमित्याह **संपदिति**। उदाहरति **मुक्ता इति**। केलिविसूत्रहारगलिताः सम्मार्जनीभिर्हृताः प्राङ्गणसीम्नि मंथरचलत्कान्ताचरणलाक्षारुणाः मुक्ताः दूराद् दाडिमबीजशंकितधियः केलीशुकाः यत् कर्षन्ति तत् भोजनृपतेः त्यागलीलायितम्। अत्रासंभाव्यमानविभूतियुक्तस्य वस्तुनो वर्णनं कविप्रतिभोत्थापितमनुभूयते। उदात्तस्यैव लक्षणान्तरमाह **महतामिति**। उपलक्षणपदं व्याकरोति। किं-विषयमेतदुपलक्षणमित्यत आह **अर्थादिति**। अर्थप्राप्तौ अनर्थपरिहारे च प्रवृत्ताः पुरुषाः महान्तः तेषां रामादीनां वर्णनीयेऽर्थे अङ्गभावः उदात्तालङ्कार इत्यर्थः। उदाहरति **तदिदमिति**। इदं तत् दण्डकारण्यम्। अस्मिन् दशरथवचनानुपालनव्यसनी रामः, बाहुसहायः एकाकी निवसन् सन् रक्षःक्षयं चकार। अत्रारण्ये वर्णनीये राघवचरितं अङ्गत्वेन वर्णितम्। नन्वत्र वीररसप्रयुक्तश्चमत्कारोऽस्तीत्यत आह **न चेति**। अत्र वीररसाश्रयस्य रामस्याङ्गत्वं किं पुना रसःस्यात्? न चमत्कार इति भावः। न चास्याङ्गत्वेऽपि रसवदलङ्कारत्वमस्योपात्तस्य तदपवादत्वात्।

सारबोधिनी—मुक्ता इति । दूरात् कर्षन्तीत्यन्वयः । उदात्तस्यैव लक्षणान्तरमाह **महतामिति** । **तदिदमिति** । अत्र दण्डकारण्यस्याङ्गित्वं दाशरथेरङ्गत्वं परिचायकत्वमिति यावत् । **न चेति** । अङ्गत्वाद-प्रधानत्वात् । तथा च प्राधान्येन व्यपदेश इति । चित्रव्यवहारो न ध्वन्यादिव्यवहारः इति भावः ।

तत्सिद्धिहेतावेकस्मिन् यत्रान्यत्तत्करं भवेत् ।

समुच्चयोऽसौ

तस्य प्रस्तुतस्य कार्यस्य एकस्मिन् साधके स्थिते साधकान्तराणि यत्र सभवन्ति स समुच्चयः । उदाहरणम्

दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकं
गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम् ।
स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत् कालः कृतान्तोऽक्षमो
नो सख्यश्चतुराः कथं नु विरहः सोढव्य इत्थं शठः ।।५०७।।

अत्र विरहासहत्वं स्मरमार्गणा एव कुर्वन्ति तदुपरि प्रियतमदूरस्थित्यादि उपात्तम् ।

बालचित्तानुरञ्जनी—समुच्चयालङ्कारं लक्षयति **तत्सिद्धिहेताविति** । व्याकरोति **तस्येति** । उदाहरति **दुर्वारा इति** । दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे, मनः अत्युत्सुकम्, गाढं प्रेम नवं वयः, अतिकठिनाः प्राणाः, निर्मलं कुलम्, धैर्यविरोधि स्त्रीत्वं, मन्मथसुहृत् कालो वसन्तः, कृतान्तो यमः अक्षमः, मारणेऽसमर्थः, सख्यः न चतुरा भवन्ति । इत्थं एवं सति शठः विरहः कथं नु सोढव्यः । अत्र भ्रमोपात्ताः स्मरमार्गणा एव विरहवैक्लव्यमुद्भावयितुं प्रगल्भन्ते, तदुपरि वल्लभप्रवासादयः समुच्चीयन्त इत्याह **अत्रेति** । अत्रान्यैः समुच्चयस्यैव सद्योगे, असद्योगे, सदसद्योगे च अन्यदन्यल्लक्षणं कृतं तदसङ्गतम् ।

सारबोधिनी—तत्सिद्धिहेताविति । **दुर्वारा इति** । शठः कठिनः । काव्यलिङ्गे हेतुहेतुमद्भावमात्रं विवक्षितम् । न पुनर्हेतूनां गुणप्रधानभावमात्रचिन्ता । अत्र त्वेकस्यैवैतत्कार्यकारित्वेऽन्ये त्वेतत्साहाय्यकं कुर्वन्ति ततो भेदस्तदिदमुक्तं स्मरमार्गणा एवं कुर्वन्तीत्यादिनाप्यसौ समाधेस्तत्र कारणान्तरस्य[?] काकतालीयन्यायेन योये तात्पर्यादत्र तु न तथेति भेदः ।

एष एव समुच्चयः सद्योगेऽसद्योगे सदसद्योगे च पर्यस्यतीति न पृथक् लक्ष्यते ।

तथाहि

कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतिशालिनी
भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम् ।
प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो
व्रजति सुतरां दर्पं राजन् त एव तवाङ्कुशाः ॥५०८॥

अत्र सतां योगः । उक्तोदाहरणे त्वसतां योगः ।

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥५०९॥

अत्र शशिनि धूसरे शल्ये शल्यान्तराणीति शोभनाशोभनयोगः ।

बालचित्तानुरञ्जनी—एतदुपजीवनेनैव तत्सङ्ग्रहस्य कर्तुं सुकरत्वात् इत्याह **एष एवेति** । सद्योगे उदाहरति **कुलमिति** । अमलिनं कुलं भद्रा मूर्तिः श्रुतशालिनी मतिः अलं भुजबलम्, स्फीता लक्ष्मीः, अखण्डितं प्रभुत्वम् । एते उक्ता भावाः प्रकृतिसुभगाः स्वभावसुन्दराः । अयं भवल्लक्षणो जनः अमीभिरेव भावैः सुतरां दर्पं भजति हे राजन् तव एते अङ्कुशाः अपथप्रवृत्तिं न कारयन्तीत्यर्थः । अत्र निःकलङ्कत्वेन शोभनस्य कुलस्य भद्रमूर्त्यादिभिः शोभनान्तरैर्योगः सद्योग इत्याह । असद्योगस्य दुर्वारा इत्युक्तमेवोदाहरणमित्याह **उक्तेति** । तत्र दुःसहत्वादशोभनानां अशोभनांतरैः प्रियवासादिभिर्योगः असद्योग इत्यर्थः । सदसद्योग उदाहरति **शशीति** । शशी दिवसधूसरः गलितयौवना कामिनी सरो विगतवारिजं स्वाकृतेर्मुखमनल्पसुन्दरं प्रभुर्धनपरायणः सज्जनः सततदुर्गतः नृपाङ्गणतः खलः **मे** मनसि सप्त शल्यानि । अत्र शोभनस्य शशिनः अशोभनेन दिवसधूसरत्वेन योगः, । एवं पदां, पदान्तराणां शोभनानां पदान्तरेणाशोभनेन योगो द्रष्टव्यः । न च दुर्वारा इत्यादावपि सदसद्योगत्वप्रसङ्ग इति वाच्यम् शशिदिवसमार्गणादीनां स्वतः शोभनत्वस्य प्रसिद्ध्यभावात् ।

सारबोधिनी—कुलमिति । कुलमेवातिसुन्दरं तदुपरि मूर्त्यादयोऽपि इत्यर्थः । **शशीति** । **स्वाकृतेः** सुन्दरस्याशोभनाशोभनयोग इति । शोभनाशोभनात्मनामनेकेषां योग इत्यर्थः । शब्दादीनां सहजकाम्यत्वात् । तद्युक्तानां च तेषां शोभनाशोभनात्मकता । तदुक्तम्—शशिनि धूसरे शल्ये शल्यन्तराणि इति ।

स त्वन्यो युगपद् या गुणक्रिया: ॥११६॥

गुणौ च क्रिये च गुणक्रिये च गुणक्रियाः । क्रमेणोदाहरणम्

विदलितसकलारिकुलं तव बलमिदमभवदाशु विमलं च ।
प्रखलमुखानि नराधिप मलिनानि च तानि जातानि ॥५१०॥

अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः ॥५११॥

कलुषं च तवाहितेष्वकस्मात् सितपङ्केरुहसोदरश्रि चक्षुः ।
पतितं च महीपतीन्द्र तेषां वपुषि प्रस्फुटमापदां कटाक्षैः ॥५१२॥

बालचित्तानुरञ्जनी—समुच्चयस्यैव लक्षणान्तरमाह **स त्वन्य इति** । अत्र गुणाश्च क्रियाश्चेति द्वन्द्वे गुणयोः क्रियाणां च समुच्चयो न स्यादिति कृतैकशेषाणां द्वन्द्व इत्याह **गुणौ च क्रिये च गुणक्रिया इति** । तन्त्रेणोक्तमिति यावत् । गुणयोर्यौगपद्यमुदाहरति **विदलितेति** । भो राजन् विदलितं च इदं बलं आशु विमलं चाभवत् । तानि प्रखलानां मुखानि मलिनानि च जातानि । अत्र वैमल्यमालिन्ययोर्गुणयोर्यौगपद्यम् । क्रिययोर्यौगपद्यमुदाहरति **अयमिति** । मे एकपदे तया प्रियया सुदुःसहः अयं वियोगश्चोपनतः नववारिधरोदयात् अहोभिश्च निरातपत्वरम्यैर्भवितव्यम् । अत्र वियोगोपनतिक्रियायाः विशेषणतया भवनक्रियायाश्च योगः । गुणक्रियायोगमुदाहरति **कलुषमिति** । भो महीपतीन्द्र सितपङ्केरुहसोदरश्रि तव चक्षुः अहितेष्वकस्मात् कलुषं च तेषां वपुषि आपदां कटाक्षैः पतितं च । अत्र कलुषगुणस्य आपत्कटाक्षपातक्रियायाश्च यौगपद्यम् ।

सारबोधिनी—समुच्चयस्यैव लक्षणान्तरमाह **स त्वन्य इति** । गुणाश्च क्रियाश्चेति समाहारद्वन्द्वे बहूनां गुणानां, बहूनां क्रियाणां च समुच्चयः[न] प्रतीयेतेत्यन्यथा व्याचष्टे **एवमन्ययोरपीति**[?] । **विदलितेति** । प्रखला रिपवः । **अयमिति** । एकपदे एकस्मिन् काले । भवितव्यमिति भूतमित्यर्थः । **अवाचकमिति** । चिन्त्यम् कलुषमिति क्रोधितमित्यर्थः ।

'धुनोति चासिं तनुते च कीर्तिम्' इत्यादेः 'कृपाणपाणिश्च भवान् रणक्षितौ ससाधुवादाश्च सुराः सुरालये' इत्यादेश्च दर्शनात् 'व्यधिकरणे' इति 'एकस्मिन् देशे' इति च न वाच्यम् ।

एकं क्रमेणानेकस्मिन् पर्यायः ॥

एकं वस्तु क्रमेणानेकस्मिन् भवति क्रियते वा स पर्यायः । क्रमेणोदाहरणम्

नन्वाश्रयस्थितिरियं तव कालकूट केनोत्तरोत्तरविशिष्टपदोपदिष्टा ।

प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ कण्ठेऽधुना वससि वाचि पुनः खलानाम् ॥५१ ॥

बालचित्तानुरञ्जनी—अत्र वैयधिकरण्येनैव एकस्मिन्नेव देशे समुच्चययोगः नान्यत्रेति कश्चित्, तदसङ्गतमित्याह **धुनोतीति** । अत्र क्रिययोरेकाधिकरणयोः समुच्चयदर्शनादसङ्गतमित्यर्थः । पर्यायालङ्कारं लक्षयति **एकमिति** । व्याकरोति **एकं वस्त्विति** । स्वतःसिद्धिरिति भावः । अन्येन प्रयोजकेनेत्याह करणमेव वयदेक [?]तद्भवति क्रियते चेति द्विधा । तत्राद्यमुदाहरति **श्रोणीति** । श्रोणीबन्धस्तनुतां त्यजति, मध्यभागः सेवते । पद्भ्यां तरलगतयः मुक्ताः लोचनाभ्यां संश्रिताः, वक्षः कुचसविधतां धत्ते वक्त्रं तु अद्वितीयम् । यौवनेन तद्गात्राणां गुणविनिमयः कल्पितः । अत्रैकैकस्य तनुतादेरन्यत्र भवनम् । एकस्य बहुषु भवनमुदाहरति **नन्विति** । अत्र एकस्य कालकूटस्य हृदादिष्वनेकेषु भवनं एकस्य पूर्वाश्रयमत्यजत एव । ननु भो कालकूट उत्तरोत्तरविशिष्टपदादयं स्थितिस्तव केनोपदिष्टा ? प्राक् अर्णवस्य हृदये, अथ अनन्तरं वृषलक्ष्मणो हरस्य कण्ठे, अधुना पुनः खलानां वचसि वससि ।

सारबोधिनी-एकमिति । भवति स्वत एव निष्पद्यते क्रियते, कविप्रतिभोत्पादितेन कर्त्रा निष्पाद्यते । **नन्विति** ।

यथा वा

बिम्बोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत ।
अधुना हृदयेऽप्येष मृगशावाक्षि लक्ष्यते ॥५१४॥

रागस्य वस्तुतो भेदेऽप्येकतयाध्यवसितत्वादेकत्वमविरुद्धम् ।

तं ताए सिरिसहोअररअणाहरणम्मि हिअमेक्करसं ।
बिम्बाहरे पिआणं णिवेसिअं कुसुमबाणेण ॥५१५॥

अन्यस्ततोऽन्यथा ।

अनेकमेकस्मिन् क्रमेण भवति क्रियते वा सोऽन्यः ।

बालचित्तानुरञ्जनी—अनेकत्र भवनमुदाहरति **बिम्बोष्ठेति** । हे तन्वि ! पूर्वं बिम्ब एवौष्ठरागः अदृश्यत । हे मृगशावाक्षि अधुना एष रागः हृदयेऽपि लक्ष्ते, अत एकस्य रागस्य पूर्वमाश्रयं बिम्बोष्ठमत्यजत एव हृदये भवनं प्रदर्शितम् । ननु रागे, एकत्रारुण्यमन्यत्र भावविशेष इति कथमेकत्वमित्यत आह **रागस्येति** । एवंलक्षणस्वान्तरभेदमाश्रित्य एकस्यानेकत्र भवने उदाहरणत्रयमुक्तमिदानीं

द्वितीयमुदाहरति । तत्तेषां सुराणां तत् हिअअं हृदयं, सिरिसहोअररअणाहरणम्मि श्रीसहोदर-रत्नाभरणे श्रीकृष्णे एक्करसं एकरसंकुसुमबाणेन पिआणं प्रियाणां, बिम्बाधरे णिवेसिअं निवेशितम् । अत्र एकस्य हृदयस्य यथोक्तरत्नाभरणबिंबाधरयोः असन्तयोर्वितिः कुसुमबाणेन त्यक्तत्वात् करणरूपत्वम् [?] ।

सारबोधिनी—बिम्बेति । रागो लौहित्यमनुरागश्च ।

तत्तेषां श्रीसहोदररत्नाभरणे हृदयमेकरसम् ।
बिम्बाधरे प्रियाणां निवेशितं कुसुमबाणेन ॥

तेषां दैत्यानाम् । श्रीसहोदररत्नं कौस्तुभः । पर्यायान्तरमाह अन्य इति । अत्रापि स्वतः-सम्भवित्वम् कविप्रतिभोत्थापितकर्तृनिष्पाद्यत्वं चेति भेदद्वयमवगन्तव्यम् ।

क्रमेणोदाहरणम्

मधुरिमरुचिरं वचः खलानाममृतमहो प्रथमं पृथु व्यनक्ति ।
अथ कथयति मोहहेतुमन्तर्गतमिव हालहलं विषं तदेव ॥५१६॥

तद्गेहं नतभित्ति मन्दिरमिदं लब्धावकाशं दिवः
सा धेनुर्जरती नदन्ति करिणामेता घनाभा घटाः ।
स क्षुद्रो मुसलध्वनिः कलमिदं सङ्गीतकं योषिताम्
आश्चर्यं दिवसैर्द्विजोऽयमियतीं भूमिं समारोपितः ॥५१७॥

अत्र एकस्यैव हानोपादानयोरविवक्षितत्वात् न परिवृत्तिः ।

बालचित्तानुरञ्जनी—पर्यायस्यैव लक्षणान्तरमाह **अन्य इति** । व्याकरोति **अनेकमिति** । तत्राद्यमुदाहरति **मधुरिमेति** । अहो आश्चर्यम् । खलानां मधुरिमरुचिरं वचः प्रथमं अमृतं व्यनक्ति । अथ मोहहेतुः, तदेवान्तर्गतं हालाहलं विषमिव कथयति ।

अत्रानेकममृतं विषं च एकस्मिन्नाधारभूते खलवचसि भवति । द्वितीयमुदाहरति **तद्गेहमिति** । नतभित्ति तद्गेहं दिवः हेतोर्लब्धावकाशं इदं मन्दिरं, जरती सा धेनुः, एताः घनाभाः करिणां घटाश्चरन्ति । क्षुद्रः मुसलध्वनिः । इदं योषितां कुलं सङ्गीतकम् आश्चर्यं द्विजः दिवसैः इयन्तीं परां भूमिं प्रापितः । अत्र एकस्मिन् द्विजे दिवसैः अनेकगेहादिकं कृतम् । अस्य परिवृत्त्यलङ्कारशङ्कां निरस्यति **अत्रेति** । एकस्यैव कर्तुरिति यावत् ।

सारबोधिनी—मधुरिमेति । अमृतव्यञ्जकत्वं हालहलकथकत्वं च स्वतः संभवि । **तद्गेहमित्यादौ** कविप्रौढोक्तिनिष्पन्ना दिवसाः कर्तारः ।

अनुमानं तदुक्तं यत् साध्यसाधनयोर्वचः ।।११७।।

पक्षधर्मान्वयव्यतिरेकित्वेन त्रिरूपो हेतुः साधनम् । धर्मिणि, अयोगव्यवच्छेदो व्यापकस्य साध्यत्वम् । यथा

यत्रैता लहरीचलाचलदृशो व्यापारयन्ति भ्रुवं
यत् तत्रैव पतन्ति संततममी मर्मस्पृशो मार्गणाः ।
तच्चक्रीकृतचापमञ्चितशरप्रेङ्खत्करः क्रोधनो
धावत्यग्रत एव शासनधरः सत्यं सदासां स्मरः ।।५१८।।

साध्यसाधनयोः पौर्वापर्यविकल्पे न किञ्चिद् वैचित्र्यमिति न तथा दर्शितम् ।

विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः ।

अर्थाद्विशेष्यस्य ।

बालचित्तानुरञ्जनी–अनुमानालङ्कारं लक्षयति **अनुमानमिति** । व्याकरोति **पक्षेति** । पक्षे सपक्षे धर्मत्वम् । विपक्षे व्यावृत्तिः न्वयः सपक्षे सत्त्वं, व्यतिरेको विपक्षाद्व्यावृत्तिः अवाधितविषयत्वादेः पक्षधर्माद्यन्तर्भावात् त्रैरूप्यमुक्तम् । **अयोगव्यवच्छेद इति** । अन्ययोगव्यवच्छेदे पक्षादपि व्यावृत्त्यापत्तेरुक्तमुदाहरति **यत्रेति** । यत् लहरीचलाचलदृशः एताः यत्र भ्रुवं व्यापारयन्ति तत्रैव मर्मस्पृशः अमी मार्गणाः सन्तः पतन्ति तत् तस्मात् कारणात् चक्रीकृतचापं यथा स्यात् तथा अञ्चितशरप्रेङ्खत्करः क्रोधनः आसां शासनधरः स्मरः सत्यं सदा अग्रत एव धावति । अत्र मार्गणपातः साधनं स्मरस्य शासनधरत्वं साध्यं साध्यसाधनभूतव्यापारो वा साधनम् । स्मरशासनधरत्वं साध्यम् । एतदुभयमेकत्रैव धर्मिणि लक्षणे वर्तते । अत्र निर्देशादेवालङ्कारत्वम् । ननु क्रमोच्चारणे व्यक्तधारणे वा वैचित्र्याभावादित्याह **साध्येति** । परिकरालङ्कारं लक्षयति **विशेषणैरिति** । व्याकरोति **अर्थादिति** ।

सारबोधिनी–**अनुमानमिति** । ननु पक्षसाध्यहेतुदृष्टान्ताद्यनुमानमत्र तु साध्यसाधनयोर्वचनमात्रम् तदित्युच्यते । अत आह **पक्षधर्मेति** । तथा च साध्यसाधनग्रहणादेव सर्वं गृहीतमित्यर्थः । **त्रिरूप इति** । पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तानीति त्रीणि रूपाणि । धर्मिणि हेतुमतीत्यर्थः । **अयोगव्यवच्छेद इति** । हेतुमद्वृत्त्यत्यन्ताभावाप्रतियोगित्वमित्यर्थः । **यत्रैता इति** । अत्र यत्र-तत्रेति पदाभ्यां यद्योगप्राथम्याभ्यां भ्रूव्यापारमदनशरपातयोर्व्याप्तिः प्रतीयते । एवं द्वितीयचरणप्रथमस्थितयत्पद-तृतीयस्थिततत्पदाभ्यां मार्गणपाताग्रतोवर्त्तिमदनयोर्व्याप्तिः प्रतीयते । तदयं प्रयोगः 'एताः पुरोगामिमदनाः मार्गणपातनियत-भ्रूव्यापारवत्त्वादि'ति । अत्र च वस्तुगत्या व्याप्यसत्त्वेऽपि कविप्रौढोक्त्यैव तथाभिधानं इत्यलङ्कारत्वम् अन्यथा वह्निमान् धूमादित्यत्रापि तथात्वापत्तेः । ननु कार्यकारणयोः पौर्वापर्यविपर्ययवत् साध्यसाधनयोः

पौर्वपर्यविपर्ययोऽपि किं न स्यादित्यत आह साध्येति। अत्र झटिति कारणस्य कार्यकारित्वं विपर्यय-निर्देशसामर्थ्यात् प्रतीयते । अत्र तु न तादृक् किञ्चिदित्यर्थः । विशेषणैरिति। साकूतैरिति। रसाभिप्रायैरित्यर्थः । उक्तिः परिपुष्टिः। अर्थादिति विशेषणानां परस्परनिराकाङ्क्षत्वादिति भावः।

उदाहरणम्

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः।
न संहतास्तस्य न भेदवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥५९॥

यद्यप्यपुष्टार्थस्य दोषताभिधानात्तन्निराकरणेन पुष्टार्थस्वीकारः कृतः तथाप्येक-निष्ठत्वेन बहूनां विशेषणानामेवमुपन्यासे वैचित्र्यमित्यलङ्कारमध्ये गणितः।

व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ॥११२॥

निगूढमपि वस्तुनो रूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन यदपह्नूयते सा व्याजोक्तिः। न चैषापह्नुतिः प्रकृताप्रकृतोभयनिष्ठस्य साम्यस्येहासम्भवात्।

बालचित्तानुरञ्जनी---साभिप्रायानेकविशेषणद्वारा यत्र विशेष्यातिशयप्रतीतिः स परिकर इत्यर्थः। उदाहरति **महौजस इति**। महौजसः मानधनाः धनार्चिताः संयति लब्धकीर्तयः न संहताः न भिन्नवृत्तयः धनुर्भृतः असुभिः तस्य प्रियाणि समीहितुं वाञ्छन्ति। धनार्चिताः संयति लब्धकीर्तयः। प्राणैरपि प्रभोः वाञ्छितं पूरयितुं शक्यमिति आकूतमस्य विशेषणस्य। एवमन्य-विशेषणेष्वपि साकूतत्वं विचार्यम् विशेष्यपदं त्वत्र धनुर्भृत इति। नन्वपुष्टार्थपदं न प्रयोक्तव्यमिति वचनात् अत्र पुष्टार्थानि विशेषणानि उपात्तानि, अतो दोषत्यागमात्रमेतत् कथमलङ्करणमित्याशङ्क्य परिहरति। **न चैषेति**। अपह्नुतौ हि उभयनिष्ठत्वम् न तथात्रेति भेद इति भावः।

सारबोधिनी—महौजस इति। तस्य सुयोधनस्य प्रियाणि प्राणैरपि कर्तुं वाञ्छन्तीत्यन्वयः। महौजःशालित्वेनानाक्रमणीयत्वम् मानधनत्वेन लज्जातो न युद्धादितः पलायलम्। धनामर्चतत्वेनोपकृता इति। धनुर्भृत इत्यनेनास्त्रान्तरापेक्षया वैलक्षण्यम्। संयतीत्यादिना व्यवसायः। न संहता इत्यनेन पृथगेव तत्कार्यकरणे क्षमत्वमन्यानपेक्षत्वमिति यावत्। अभेदवृत्तित्वेन तदेव प्रयोजनव्यग्रत्वं व्यज्यते। तेनायं संप्रति कृतकृत्यो रूढमूल इति प्रतीयते। वैचित्र्यमिति। अनुभवसिद्धमिति शेषः। व्याजोक्तिरिति। गोपनीयं वस्तु केनापि हेतुना प्रतीतं, तस्य च केनापि व्याजेन निगूढनं व्याजोक्तिः। प्रकृताप्रकृतेत्युपलक्षणम्। तत्रोपमेय-निषेधपूर्वमुपमानव्यवस्थापनम्। अत्र तु किञ्चिदनिषिध्यैव निमित्तान्तरोत्पन्नवस्तुनो निमित्तान्तरप्रयु-क्तत्वव्यवस्थापनमित्यपि भेदकं बोद्धव्यम्।

उदाहरणम्

शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्-
रोमाञ्चादिविसंष्ठुलाखिलविधिव्यासङ्गभङ्गाकुलः ।
हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान् सस्मितं
शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद्वः शिवः ॥५२०॥

अत्र पुलकवेपथू सात्त्विकरूपतया प्रसृतौ शैत्यकारणतया प्रकाशितत्वादपलपितस्वरूपौ व्याजोक्तिं प्रयोजयतः ।

बालचित्तानुरञ्जी–उदाहरति **शैलेन्द्रेति** । शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्रोमाञ्चादिविसंष्ठुलाखिलविधिव्यासङ्गभङ्गाकुलः हा । तुहिनाचलस्य करयोः शैत्यं इत्यूचिवान् । शैलान्तःपुरमातृमण्डलगणैः सस्मितं हृष्टः शिवः । अत्र नृपस्य व्याजोक्तिं प्रकटयति **अत्रेति** ।

किञ्चित् पृष्टमपृष्टं वा कथितं यत् प्रकल्पते ।
तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता ॥१९९॥

प्रमाणान्तरावगतमपि वस्तु शब्देन प्रतिपादितं प्रयोजनान्तराभावात् सदृशवस्त्वन्तरव्यवच्छेदाय यत् पर्यवस्यति सा भवेत् परिसंख्या । अत्र च कथनं प्रश्नपूर्वकं तदन्यथा च परिदृष्टम् । तथा उभयत्र व्यपोह्यमानस्य प्रतीयमानता वाच्यत्वं चेति चत्वारो भेदाः । क्रमेणोदाहरणम्

किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः
किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः ।
किमाराध्यं पुण्यं किमभिलषणीयं च करुणा
यदासक्त्या चेतो निरवधि विमुक्त्यै प्रभवति ॥५२१॥

बालचित्तानुरञ्जनी–परिसंख्यां लक्षयति **किञ्चिदिति** । चतुर्द्धा परिसंख्या । प्रश्नस्य वाच्यत्वमुन्नीयमानत्वञ्च, अपोह्यस्य वाच्यत्वमुन्नीयमानत्वञ्चेति । ननु शब्दानां स्वार्थाभिधानमात्रव्याप्ततायां कथमन्यव्यपोहे तात्पर्यमित्यत आह **प्रमाणान्तरेति** । प्रयोजनान्तराभावात् इत्यर्थः । अस्याश्चातुर्विध्यमाह **अत्र चेति** । प्रश्नपूर्वकथनं अप्रश्नपूर्वकथनञ्चेति द्वौ भेदावुभयत्र वर्जनीयस्य प्रतीयमानता वाच्यता चेति द्वे इति चत्वारो भेदाः । तत्र प्रश्नपूर्वकत्वे वर्जनीयस्य प्रतीयमानतामुदाहरति **किमिति** । पुंसामासेव्यं

किम् ? इति पृष्टे उत्तरं आपगाया श्रेष्ठं तटम् । एकान्ते किं ध्येयम् ? विष्णोश्चरणयुगलम् । आराध्यं किम् ? पुण्यम् । अभिलषणीयं किम् ? करुणा । तेषु सरित्तटादिषु आसक्त्या चेतो निरवधि यथा तथा मुक्त्यै प्रभवति । अत्र न त्वङ्गनेति पुण्यमिति पापमिति प्रतीयते । करुणेति न हिंसेति प्रतीयते ।

सारबोधिनी—किञ्चिदिति । किञ्चित् वस्तु कथितं तादृगन्यवस्तु व्यावृत्तये यत् कल्पते सा परिसंख्या स्मृतेत्यन्वयः । **प्रमाणान्तरेति** । प्रकरणान्तरावगतं प्रतिपादकं शब्दस्यानुवादरूपतया सप्रयोजनत्वेन परिपोषादन्यव्यावृत्तिरेव प्रयोजनमित्यर्थः । **किमिति** । यदासक्त्या प्रीत्या ।

किं भूषणं सुदृढमत्र यशो न रत्नं किं कार्यमार्यचरितं सुकृतं न दोषः ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं जानाति कस्त्वदपरः सदसद्विवेकम् ।।५२२।।

कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते ।
काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति ।।५२३।।

भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे ।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् ।।५२४।।

बालचित्रानुरञ्जनी—प्रश्नपूर्वकत्वे वर्जनीयस्य वाच्यतामुदाहरति किं भूषणमिति । अत्र सुदृढं विभूषणं किम् ? यशः । निरन्तरङ्कार्यं किम् ? आर्यचरितं सुकृतम् । न दोषः । अप्रतिहतं चक्षुः किं बुद्धिः ? न नेत्रम् । हे राजन् त्वदपरः कः सदसद्विवेकं जानाति ? अत्र न रत्नमित्यादि निषेध्यम् । प्रश्नव्यतिरेके वर्जनीयप्रतीयमानतामुदाहरति **कौटिल्यमिति** । कचनिचये कौटिल्यं वसति । करचरणाधरपल्लवेषु रागः । स्तनयुगले काठिन्यम् । चापलत्वं च नयनयोर्वसति । अत्र कचनिचय इति न तु वाचि हृदये वा कौटिल्यमिति प्रतीयते । करचरणाधरपल्लवेष्विति न तु परपुरुषे, कुचयुगले इति नावयवांतरे मानसे च । नयनयोरिति न तु भाव इति वर्जनीयस्य प्रतीयमानत्वम् । प्रश्नव्यतिरेके वर्जनीयस्य वाच्यतामुदाहरति **भक्तिरिति** । भक्तिर्भवे न विभवे, व्यसनं शास्त्रेषु, युवतिरेव कामास्त्रं तस्मिन्, चिन्ता यशसि न वपुषि महतां प्रायः परिदृश्यते । अत्र अपोह्यमानस्य वाच्यत्वम् न विभव इत्याद्युक्तत्वात् ।

सारबोधिनी—किंभूषणमिति । धिषणा ज्ञानम् । **कौटिल्यमिति** । तरलत्वं चञ्चलत्वम् । **भक्तिरिति** । युवतिरेव कामास्त्रम् ।

यथोत्तरं चेत् पूर्वस्य पूर्वस्यार्थस्य हेतुता ।
तदा कारणमाला स्यात्

उत्तरमुत्तरं प्रति यथोत्तरम् । उदाहरणम्

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि संपदः ।।५२५।।

"हेतुमता सह हेतोरभिधानमभेदतो हेतुः" इति हेत्वलङ्कारो न लक्षितः। आयुर्घृतमित्यादिरूपो ह्येष न भूषणतां कदाचिदर्हति वैचित्र्याभावात्।

बालचित्तानुरञ्जनी—कारणमालालङ्कारं लक्षयति **यथोत्तरमिति**। उत्तरोत्तरस्य **हेतुमतः** पूर्वपूर्वहेतुश्चेत् तदा कारणमाला स्यादित्याह **उत्तरमिति**। उदाहरति **जितेति**। जितेन्द्रियत्वं विनयस्य-कारणम् विनयात् गुणप्रकर्षः अवाप्यते। गुणप्रकर्षेण जनः अनुरज्यते। संपदः जनानुरागप्रभवा हि। अत्र इन्द्रियजयाहितया [विनयः]। विनयाद् गुणोत्कर्षः। तस्मात् जनानुरागः। तस्मात् संपदः भवन्तीति हेतुमाला। हेतुमतोः अभेदाभिधाने हेत्वलङ्कार इति रुद्रटादिभिरुक्तं किमिति त्वया न लक्षितमित्यत आह **हेतुमतेति**। कार्येण सह कारणस्याभेदाभिधानं हेतुः। स चायुर्घृतमित्यादिवत् उपचारव्यतिरेके वैचित्र्याय न कल्पते। अतो नालङ्कारतया लक्षित इति भावः।

सारबोधिनी—**जितेन्द्रियत्वमिति**। विहितस्यैवानुवाद्यत्वात् न कथितपदत्वं दोषः। **गौण**-सारोपसाध्यवसानयो रूपकप्रथमातिशयोक्तिप्रयोजकत्वात् कार्यकारणभावसंबन्धनिबन्धनशुद्धसारोपा साध्यवसानयोर्हेत्वलङ्कारप्रयोजकत्वमित्युद्भटादिमतमवस्कन्दति **हेतुमतेत्यादि**। **वैचित्र्याभावादिति**।

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः।
रम्योऽयमेति संप्रति लोकोत्कण्ठाकरः कालः ॥५२६॥

इत्यत्र काव्यरूपतां कोमलानुप्रासमहिम्नैव समाम्नासिषुर्न पुनर्हेत्वलङ्कारकल्पनयेति पूर्वोक्तं काव्यलिङ्गमेव हेतुः।

क्रियया तु परस्परम् ॥१२०॥

वस्तुनोर्जननेऽन्योन्यम्

अर्थयोरेकक्रियामुखेन परस्परं कारणत्वे सति अन्योन्यनामा अलङ्कारः।

बालचित्तानुरञ्जनी—ननु हेतोरनलङ्कारत्वे अविरलेत्यादौ कथं काव्यरूपत्वमित्यत **आह अविरलेति**। अविरलः कमलविकासो यत्र। सकला ये अलयः तेषां महो यज्ञश्च कोकिलानन्दकरः लोकोत्कण्ठाकरः रम्योऽयं कालः संप्रति एति। समाम्नासिषुः प्रत्यपादयन् आचार्या इति शेषः। केवलानुप्रासादत्र काव्यत्वं न त्वलङ्कारादिति भावः। नन्वेवं तर्हि हेतुः कुत्र। अथालङ्कार एव न स्यादिति यत आह **पूर्वोक्तमिति**। अन्योन्यालङ्कारं लक्षयति **क्रिययेति**। क्रिययेत्येकवचनमविवक्षितमित्य-भिप्रेत्य व्याकरोति **अर्थयोरिति**।

सारबोधिनी—अविरलकमलेत्यादिषु वैचित्र्यमनुभवसिद्धमेवेत्युद्भटादिमतं समीचीनम्, इति नवीनाः। **समाम्नासिषुरिति**। समाम्नातवन्त इत्यर्थः। **एकक्रियेति**। एकजातीयक्रियामुखेनेत्यर्थः।

उदाहरणम्

हंसाणं सरेहिँ सिरी सारिज्जइ अह सराण हंसेहिँ ।
अण्णोण्णं ब्विअ एए अप्पाणं णवर गरुअन्ति ॥५२७॥

अत्रोभयेषामपि परस्परजनकता मिथः श्रीसारतासंपादनद्वारेण ।

उत्तरश्रुतिमात्रतः
प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा सति ॥१२१॥
असकृद् यदसंभाव्यमुत्तरं स्यात् तदुत्तरम् ।

प्रतिवचनोपलम्भादेव पूर्ववाक्यं यत्र कल्प्यते तदेकं तावदुत्तरम् ।

उदाहरणम्

वाणिअअ हत्थिदन्ता कुत्तो अम्हाण वग्घकित्ती अ ।
जाव लुलिआलअमुही घरम्मि परिसक्कए सोण्हा ॥५२८॥

हस्तिदन्तव्याघ्रकृत्तीनामहमर्थी ताः, मूल्येन प्रयच्छेति क्रेतुर्वचनम् अमुना वाक्येन समुन्नीयते ।

बालचित्तानुरञ्जनी—उदाहरति **हंसेति** । सरेहिँ सरोभिः । हंसाणं हंसानाम् । सिरी श्रीः । सारिज्जइ सार्यते क्रियते । अह अथ । सरणं शरणम् । हंसेहिं हंसः । अण्णोण्णं विअअन्योन्यमेव । एए एते । णवर केवलम् । अप्पाणं आत्मानम् । गरुअंति गुरूकुर्वते । नन्वत्र हंससरसोर्मिथो जन्यजनकभावात् कथमन्योन्यालङ्कार इत्यत आह **अत्रेति** । हंसाः श्रीमन्तः सरोभिः क्रियन्ते । तैश्च सरांसीत्यन्योन्य-मलङ्कारो भवतीति भावः । उत्तरालङ्कारं लक्षयति **उत्तरेति** । व्याकरोति **प्रतीति** । अत्र प्रश्ने असति उत्तरश्रुतिमात्रेण प्रतिवचनोपलम्भेनैव यत्र प्रश्नोन्नयनं पूर्ववाक्यपरिकल्पनं तदेकमुत्तरम् । एक उत्तरालङ्कारः प्रथमार्द्धे उक्तः । तमुदाहरति **वाणिअेति** । हे वाणिअ अहो वाणिजक हत्थिदंता । हस्तिदन्ताः । वग्घकित्तीअ व्याघ्रकृत्तयश्च । अम्हाण अस्माकम् । कुत्तो कुतः । जावि यावत् । लुलि-आलअमुही लुलितालकमुखा सुए स्नुषा अस्मिन् गृहे परिसक्कए परिष्वक्कति । जरद्व्याधस्योक्तिरेषा । जरद्व्याधपुत्रः स्वकान्तायामतिसक्ततया क्षीणत्वेन हस्तिव्याघ्रहनने शक्त्यभावात् स्वगृहे दत्तकृत्यभाव[?] इति भावः । अत्र हस्तिदन्तादेरसंपत्त्यभिधानेन तदर्थिनो वणिजः तत्सद्भावप्रश्नः परिकल्प्यत इत्याह **हस्तीति** ।

सारबोधिनी—**हंसाणेति** । हंसानां सरोभिः श्रीः सारीक्रियते । अपि च सरसां हंसैः । अन्योन्यमेवेति । आत्मानं केवलं गुरूकुर्वन्ति । ननु पूर्वसतोर्हंससरसोर्न मिथो जन्यजनकभाव इत्यत

आह । अत्रेति । तथा च पूर्वोत्पन्नयोरेवान्योन्योपकारापकारेणान्योन्यजनकत्वाभिधानमेव लक्षणार्थमिति भावः । तत्र वा सतीति प्रश्ने सतीत्यर्थः । एतदप्यसकृत् इत्यादावन्वेति ।

वाणिजक हस्तिदन्ता कुतोऽस्माकं व्याघ्रकृत्तयश्च ।
यावल्लुलितालकमुखी गृहे परिष्वक्कते स्नुषा ॥

तस्यामसक्तो मे सुतः संप्रति मृगयां न करोतीति व्यङ्ग्यताद्रूप्यानुपपत्तेरिति कारणत्वानुपपत्तेरित्यर्थः ।

न चैतत् काव्यलिङ्गम् उत्तरस्य ताद्रूप्यानुपपत्तेः । न हि प्रश्नस्य प्रतिवचनं जनको हेतुः । नापीदमनुमानम् एकधर्मिनिष्ठतया साध्यसाधनयोरनिर्देशादित्यलङ्कारान्तरमेवोत्तरं साधीयः ।

प्रश्नादनन्तरं लोकातिक्रान्तगोचरतया यत् असंभाव्यरूपं प्रतिवचनं स्यात् तत् अपरमुत्तरम् । अनयोश्च सकृदुपादाने न चारुताप्रतीतिरित्यसकृदित्युक्तम् । उदाहरणम्

का विसमा देव्वगई किं लद्धं जं जणो गुणग्गाही ।
किं सोक्खं सुकलत्तं किं दुक्खं जं खलो लोओ ॥५२६॥

प्रश्नपरिसंख्यायामन्यव्यपोहे एव तात्पर्यम्, इह तु वाच्ये एव विश्रान्तिरित्यनयोर्विवेकः ॥

कुतोऽपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते ॥१२२॥
धर्मेण केनचिद् यत्र तत् सूक्ष्मं परिचक्षते ॥

बालचित्तानुरञ्जनी—न त्वेतत्काव्यलिङ्गमस्त्वित्यत आह **न चेति** । ताद्रूप्यं प्रश्नरूपत्वम् । प्रश्नोन्नायकस्य ताद्रूप्यम् । काव्यलिङ्गलक्षणं नैतत् तादृशमिति भेद इति भावः । सन्देहान्तरमाह **नहीति** । जनको हि हेतुः काव्यलिङ्गम् । नैवमुत्तरालङ्कारः, ज्ञापकत्वादिति भावः । तर्ह्यनुमानालङ्कारोऽस्त्वत आह **नापीति** । अनुमानलक्षणाभावादिति भावः । उपसंहरति **इतीति** । उत्तरालङ्कारभेदमन्यमन्यं प्रतिवचनं तद्द्वितीयमित्यर्थः[?] । असकृद्ग्रहणस्य प्रयोजनमाह **अनयोश्चेति** । उदाहरति **केति** । का विषमा दैवगतिः । किं लभ्यं यत् जणो जनः गुणग्गाही गुणग्राही । किं सोक्खम् ? किं सौख्यम् सुकलत्तं सुकलत्रम् । किं दुःखम् ? खलो खलः लोओ लोकः । अत्र प्रश्नपरिसंख्याया अभेदमाशङ्क्याह **प्रश्नेति** । अत्र संभाव्योत्तरे वाच्य एव तात्पर्यम् नान्यव्यपोह इति सिद्धोऽस्य भेद इति भावः ।

सारबोधिनी--प्रतिवचनं जनको हेतुरिति हेतुर्द्विधा भवति जनको ज्ञापकश्च । तत्रायं न जनको हेतुरपि तु । ज्ञापक एव हेतुः । अत एव पूर्वमुक्तम् । निमित्तत्वं कारकत्वं ज्ञापकत्वञ्चेति । **प्रश्नादिति** । एतत्तत्र वा सतीति प्रतीकार्थः । अनयोश्चेति प्रश्नोत्तरयोरित्यर्थः ।

का विषमा दैवगतिः किं लब्धव्यं यत् जनो गुणग्राही ।
किं सौख्यं सुकलत्रं किं दुःखं यत् खलो लोकः ।।

विश्रान्तिरिति । दैवगत्यादीनां विषमत्वातिशयप्रतिपादन एव तात्पर्यादिति भावः । तदिदमुक्तम् **संभाव्यमिति** ।

कुत इति । धर्मेण स्मारकेणेति शेषः । आकारः संस्थानविशेषः । इङ्गितं नेत्रभङ्ग्यादिरूपक्रियाविशेषः ।

कुतोऽपि आकारादिङ्गिताद्वा सूक्ष्मस्तीक्ष्णमतिसंवेद्यः । उदाहरणम्

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे ।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख।।५३०।।

अत्र आकृतिमवलोक्य कयापि वितर्कितं पुरुषायितम् असिलतालेखनेन वैदग्ध्यादभिव्यक्तिमुपनीतम्, पुंसामेव कृपाणपाणिता योग्यत्वात् ।

यथा वा

सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।
ईषन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ।।५३१।।

अत्र जिज्ञासितः सङ्केतकालः कयाचिदिङ्गितमात्रेण विदितो निशासमयशंसिना कमलनिमीलनेन लीलया प्रतिपादितः ।

बालचित्तानुरञ्जनी--सूक्ष्मालङ्कारं लक्षयति **कुतोऽपीति** । कुतोऽपीत्यस्यार्थमाह **आकारादिति** । सूक्ष्मशब्दार्थमाह **तीक्ष्णेति** । तीक्ष्णमतिभिः कुशाग्रमतिभिः संलक्ष्यः स्थूलबुद्धिभिरसंलक्ष्यश्च । उदाहरति **वक्त्रेति** । कापि वयस्या तन्व्याः वक्त्रात्स्यन्दिभिः स्वेदबिन्दुप्रबन्धैः भिन्नं कुङ्कुमं दृष्ट्वा तस्याः पुंस्त्वं व्यञ्जयन्ती सती स्मित्वा पाणौ खड्गलेखां लिलेख । उपरिसुरतमनया कृतमिति ज्ञात्वा तत् ज्ञापनार्थं पुरुषयोग्यां खड्गलेखां लिलेखेत्यभिप्रायः । अत्र वदनस्वेदप्रवृत्तकण्ठकुङ्कुमभेदलक्षणामाकृतिमवलोक्य सख्या परिज्ञातं पुरुषायितं पाणौ पुरुषैकयोग्यं खड्गलेखनलक्षणेन धर्मेण प्रकाशितमित्याह **अत्रेति** । अत्रैवोदाहरणान्तरमाह **सङ्केतेति** । विदग्धया कयाचित् सङ्केतकाले

ज्ञातव्ये मनो यस्य विकसद्भ्यां नेत्राभ्यामर्पितं आकूतं येन तादृशं विटं ज्ञात्वा लीलापद्मं निमीलितम्। अत्र विटस्य कस्यचित् संकेतजिज्ञासायां तदीयभ्रूभङ्गादिना इङ्गितोपलक्ष्यप्रगल्भया कयाचित् सायं समयोचितेन लीलाकमलनिमीलनेन सङ्केतसमयोऽभिव्यज्यत इत्याह **अत्रेति** ।

सारबोधिनी—तत्राकारमुदाहरति **वक्त्रेति** । वक्त्रस्यन्दिस्वेदात् कण्ठस्थकुङ्कुमे भेदः पुरुषायितपरं भवति। अत्र स्वेदभिन्नं कुङ्कुमे पुरुषायितमुन्नीतम्। पाणिखड्गाकारेण प्रकाशितमित्याह **अत्रेति**। इङ्गितमुदाहरति **सङ्केतेति**। ईषदित्यर्पणक्रियाविशेषणम्। ईषन्नेत्रार्पिताकूतमिति विटमित्यस्य विशेषणम्।

उत्तरोत्तरमुत्कर्षो भवेत्सारः परावधिः ॥१२३॥

परः पर्यन्तभागः, अवधिर्यस्य धाराधिरोहितया तत्रैवोत्कर्षस्य विश्रान्तेः।

उदाहरणम्

राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधम्।
सौधे तल्पं तल्पे वराङ्गनानङ्गसर्वस्वम् ॥५३२॥

भिन्नदेशतयात्यन्तं कार्यकारणभूतयोः।
युगपद्धर्मयोर्यत्र ख्यातिः सा स्यादसङ्गतिः ॥१२४॥

इह यद्देशं करणं तद्देशमेव कार्यमुत्पद्यमानं दृष्टम् यथा धूमादि। यत्र तु हेतुफलरूपयोरपि धर्मयोः केनाप्यतिशयेन नानादेशतया युगपदवभासनं सा तयोः स्वभावोत्पन्नपरस्परसङ्गतित्यागात् असङ्गतिः।

बालचित्तानुरञ्जनी—**अत्रेति**। सारालङ्कारं लक्षयपि **उत्तरेति**। पूर्वपूर्वापेक्षया उत्तरोत्तरस्य प्रकर्षकल्पनं सार इत्यर्थः। उदाहरति **राज्य इति**। राज्ये भूमिः सारा, भूमौ पुरं, पुरे सौधं, सौधे तल्पं, तल्पे अनङ्गसर्वस्वं वराङ्गना। अत्र राज्यापेक्षया भूमेः साधुत्वं तदपेक्षया पुरस्येत्यादिपरिपाट्या वराङ्गनायामुत्कर्षो विश्राम्यति। असङ्गत्यलङ्कारं लक्षयति **भिन्नेति**। व्याकरोति **इहेति**।

सारबोधिनी—**उत्तरोत्तरेति**। उत्तरोत्तरं यत्रोत्कर्षः प्रतीयते स सारनामालङ्कार इत्यर्थः। स च परावधिः वर्णनीये उदीच्योऽवधिरिति विश्रान्तिस्थानं यस्येत्यर्थः। तदुक्तं धाराधिरोहितयेति। **राज्येति**। तल्पं महार्हशय्या। **भिन्नदेशतयेति**। कार्यकारणभूतयोर्धर्मयोरत्यन्तं भिन्नदेशतया युगपत् यत्र ख्यातिः सोऽसङ्गतिरिति नामालङ्कारः।

उदाहरणम्

जस्सेअ वणो तस्सेअ वेअणा भणइ तं जणो अलिअं।
दन्तक्खअं कवोले बहुए वेअणा सबत्तीणं ॥५३३॥

एषा च विरोधबाधिनी न विरोधः, भिन्नाश्रयत्वेनैव द्वयोरिह विरोधिताया प्रतिभासात् । विरोधे तु विरोधित्वम् एकाश्रयनिष्ठमनुक्तमपि पर्यवसितम् । अपवादविषय-परिहारेणोत्सर्गस्य व्यवस्थितेः । तथा चैवं निदर्शितम ।

बालचित्तानुरञ्जनी—उदाहरति **जस्सेति** । जस्सेअ यस्यैव व्रणो व्रणः । तस्सेअ तस्यैव, वेअणा वेदना, तं तत्, जणो जनः, अलिअं अलीकम्, भणइ भणति । बहुए वध्वाः, कवोले कपोले, दन्तक्खअं दन्तक्षतं, सवत्तीणं सपत्नीनाम्, वेअणा वेदना । अत्र व्रणनिमित्तसापत्न्यनिमित्तवेदनयोश्चाभेदाध्यवसायः । नन्वियं विरोधभेदेषु कश्चिदित्याशङ्क्याह **एषेति** । इयं विरोधस्यापवादिका न विरोध इत्यत्र हेतुमाह **भिन्नेति** । एकदेशत्वं भिन्नदेशत्वं च विरोधालङ्कारस्य विषय आसीत्, सामान्येनोक्तत्वात् असङ्गतिः विरोधस्यापवादिका । अतोऽस्या विरोधात् भेद इत्यर्थः ।

सारबोधिनी—यस्यैव व्रणस्तस्यैव वेदना भणति तज्जनोऽलीकम् ।

दन्तक्षतं कपोले वध्वा वेदना सपत्नीनाम् ॥

ननु विरोध एवायं स्यादिति अत आह **एषेति** । हेतुमाह **भिन्नेति** । यत्र विरुद्धयोरैकाधिकरण्य-प्रतिसंधानप्रयुक्तविरोधबोधः स विरोधः । यत्र समानाधिकरणयोर्वैयधिकरण्यप्रतिसंधानप्रयुक्तो विरोधस्तत्रासङ्गतिरिति बोध्यम् । ननु विषयभेदान्नोत्सर्गापवादभावो विषयैक्य एव तत्संभवादिति चेन्न । विरोधस्य विरोधसामान्यं विषयः, अस्याः कार्यकारणवैयधिकरण्यमात्रप्रयुक्तो विरोधविशेष इति समानविषयत्वस्योत्सर्गापवादभावस्य च संभवात् । अत्र व्रणक्षतपदयोरक्रमभङ्गश्चिन्त्यः ।

समाधिः सुकरं कार्यं कारणान्तरयोगतः ।

साधनान्तरोपकृतेन कर्त्रा यत् अक्लेशेन कार्यमारब्धं समाधीयते स समाधिर्नाम । उदाहरणम्

मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्टयैतदुदीर्णं घनगर्जितम् ॥५३४॥

बालचित्तानुरञ्जनी—समाधिं लक्षयति **समाधिरिति** । हेत्वन्तरानुदये सौकर्याभावः, तदुदये तु कर्तुः कार्यं प्रति सौकर्यमित्याह **साधनान्तरेति** । उदाहरति **मानमिति** । अस्या मानं निराकर्तुं पादयोः पतिष्यतः मे उपकाराय दिष्ट्या इदं घनगर्जितं उदीर्णम् । अत्रापराद्धेन यूना माननिराकरणलक्षणेन कार्येण पादावनतमात्रात् अदैवयोगात् घनगर्जितोदयस्तत्सौकर्याय कल्पते [?] ।

सारबोधिनी—समाध्यलङ्कारमाह **समाधिरिति** । सुकरं सुकरत्वेन विवक्षितमिति । न च तत्सिद्धिहेतावित्यादिलक्षितसमुच्चयसङ्कर इति वाच्यम् । तत्र कारणानामागम एव तात्पर्यम् अत्र तु कार्यस्य सुकरत्व एव तात्पर्यमिति भेदः । **मानमिति** । उदीर्णं उद्भूतम् ।

समं योग्यतया योगो यदि संभावितः क्वचित् ॥१२५॥

इदमनयोः श्लाध्यमिति योग्यतया संबन्धस्य नियतविषयमध्यवसानं चेत्तदा समम् तत् सद्योगेऽसद्योगे च । उदाहरणम्

धातुः शिल्पातिशयनिकषस्थानमेषा मृगाक्षी
रूपे देवोऽप्ययमनुपमो दत्तपत्रः स्मरस्य ।
जातं दैवात् सदृशमनयोः सङ्गतं यत् तदेत्,
च्छृङ्गारस्योपनतमधुना राज्यमेकातपत्रम् ॥५३५॥

यथा वा

चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं
जातो दैवादुचितरचना संविधाता विधाता ।
यन्निम्बानां परिणतफलस्फीतिरास्वादनीया
यच्चैतस्याः कवलनकलाकोविदः काकलोकः ॥५३६॥

बालचित्तानुरञ्जनी—**सममिति** । व्याकरोति **इदमनयोरिति** । इदं संबन्धिरूपं वस्तु । उत्तमविषयं समं, अधमविषयं चेति समं द्विविधम् । तत्राद्यमुदाहरति **धातुरिति** । एषा मृगाक्षी धातुः शिल्पातिशयनिकषस्थानम् । अनुपमे रूपे अयं देवोऽपि स्मरस्य दत्तपत्रः । अनयोः दैवात् यत् सदृशं सङ्गतं मेलनं तदेतत् अधुना श्रृङ्गारस्य एकातपत्रं राज्यमुपनतम् । द्वितीयमुदाहरति **चित्रमिति** । विधाता उचितरचनासंविधाता दैवात् जातः । यतः निम्बानां परिणतफलस्फीतिः आस्वादनीया । चित्रं चित्रं एतन्महच्चित्रम् ।

सारबोधिनी—औचित्येन यत्र संबन्धिनोः संबन्धस्य संभावना स समनामालङ्कारः । **श्लाध्यमिति** । उचितमित्यर्थः । **सदिति** । सतां सतेति असतां चासता योगस्तुल्यत्वादेवोचितः । **धातुरिति** । यत्र पराजयः । **चित्रमिति** । स्फीतिर्वृद्धिः ।

क्वचिद्यदतिवैधर्म्यान्न श्लेषो घटनामियात् ।
कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद् भवेत् ॥१२६॥
गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये ।
क्रमेण च विरुद्धे यत् स एव विषमो मतः ॥१२७॥

द्वयोरत्यन्तविलक्षणतया यत् अनुपपद्यमानतयैव योगः प्रतीयते [१] यच्च किञ्चिदारभमाणः कर्ता क्रियायाः प्रणाशात् न केवलमभीष्टं यत् फलं न लभेत यावदप्रार्थितमपि अनर्थं विषयमासादयेत् [२] तथा सत्यपि कार्यस्य कारणरूपानुकारे यत् तयोर्गुणौ क्रिये च परस्परं विरुद्धतां व्रजतः [३।४] स समविपर्ययात्मा चतूरूपो विषमः ॥

क्रमेणोदाहरणम्

शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना ।
अयं क्व च कुकूलाग्निकर्कशो मदनानलः ॥५३७॥

बालचित्तानुरञ्जनी—विषमालङ्कारं लक्षयति **क्वचिदिति** । अतिवैधर्म्यात् वैलक्षण्यात् श्लेषो न घटनामियात् तदेकं विषमम् । क्रियायां सत्यामपि तस्य लाभानवाप्तौ वैषम्यमात्रतया प्रादुर्भावः । उपर्यतथातिपाते तस्योत्कर्ष इति द्वितीयकारणप्रक्रमेण कार्यारम्भ इति स्थित्या कार्यस्य कारणस्वभावानुपहारः । अथापि हेतुना द्वाभ्यां गुणक्रियाभ्यां हेतुमति द्वयोर्विरोध इति तृतीयम् । तस्यैव गुणक्रियाभेदात् तृतीयस्य द्वैविध्याच्चतुर्थमित्याह **द्वयोरित्यादिना** । आद्यमुदाहरति **शिरिषादिति** । शिरीषादपि सुकुमाराङ्गी इयमायतलोचना क्व, कुकूलाग्निकर्कशोऽयं मदनानलः क्व ? अत्रात्यन्तकोमलाङ्ग्याः अतिक्रूरः कामानलो नोपपद्यते ।

सारबोधिनी—क्वचिदिति । श्लेषो योगः । घटनामौचित्यमियात् गच्छेत् । अनुकारस्तदनुविधानम् । अनुकार इत्यनन्तरं औत्सर्गिक इति शेषः । **परस्परमिति** । क्रमेणेति शेषः । **शिरीषादिति** । कुकूलं कुम्भकारपचनम् । तस्याग्निः स इव दुःखसहमित्यर्थः । तुषानल इत्यर्थः । तथा चानयोर्योगोऽनुचित इति व्यञ्जनया प्रतीयते ।

सिंहिकासुतसंत्रस्तः शशः शीतांशुमाश्रितः ।
जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः ॥५३८॥

सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यत्र कृपाणलेखा ।
तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोक्याभरणं प्रसूते ॥५३९॥

आनन्दमन्दमिमं कुवलयदललोचने ददासि त्वम् ।

विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥५४०॥

अत्रानन्ददानं शरीरतापेन विरुद्धचते । एवम्

विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये ।

मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया दृशा ॥५४१॥

इत्यादावपि विषमत्वं यथायोगमवगन्तव्यम् ।

बालचित्तानुरञ्जनी–द्वितीयमुदाहरति **सिंहिकेति** । सिंहिकासुतसंत्रस्तः शशः शीतांशुमाश्रितः । तत्र अन्यः सिंहिकासुतः साश्रयं तं ग्रसते । सिंही राहुमाता च । तदपत्ययोर्मध्ये पूर्वस्मात् संत्रस्तस्य प्रतीयमानोत्प्रेक्षास्पर्शे निशीथकिरणाश्रयणे क्रियाफलस्य निरुपद्रवस्य प्राप्तावान्तरभूतेन राहुणा तस्य स्वाश्रयेण चन्द्रेण सह यत् ग्रसनं तन्महानर्थरूपं संपद्यते । तृतीयमुदाहरति **सद्य इति** । यस्य कृपाणलेखा रणे यस्य करस्पर्शं अथवा तमालनीलापि सती त्रिलोकाभरणं शरदिन्दुपाण्डु यशः प्रसूत इति चित्रम् । अत्र करस्पर्शसंभागस्याग्रास्यतया उपलक्षणनिभात् कारणात् धवलकार्योदयो विरुध्यत इति गुणविरोधः । चतुर्थमुदाहरति **आनन्देति** । हे कुवलयदललोचने त्वं अमन्दमिमं आनन्दं ददासि । त्वयैव जनितः विरहः मे शरीरं तापयतितराम् । अत्र कारणनिष्ठानन्दनक्रियायाः कार्यनिष्ठःविरहक्रियाया विरोधः इति क्रियाविरोधः । अथ कर्तृकर्मभावेऽपि इदमुदाहर्तव्यमित्याह **एवमिति** । यस्य सागरशयस्य विपुलेन कुक्षिणा युगक्षये भुवनानि प्रतिरोपितानि स पुनः एकतमया स्वीयमदविभ्रमासकलया एकया दृशा पयसि सागरमवलोकित इत्यर्थः[?] । एकस्याः स्त्रियाः एकत्वादेव परिमितत्वयोगिन्याः कर्तृभूतायाः दृशः सकलभुवनपानक्षमकुक्षिकुहरस्य हरेः कर्मभूतस्य पीयमानतायां पारिमित्यापारिमित्यलक्षणौ गुणौ विरुद्धाविति विषमत्वम् यथायोगं योगो युक्तिः कार्यकारणभावस्य कर्मकर्तृभावपर्यवसानलक्षणतामनतिक्रम्येत्यर्थः ।

सारबोधिनी – सिंहिकेति । सिंहिका सिंहपत्नी राहुमाता च तत्सुतः सिंहीसुतो राहुश्च । **सद्य इति** । अत्र कार्यकारणयोर्यशःकृपाणयोः पाण्डुरनीलाख्यगुणयोर्विरोधः । **आनन्द इति** । अत्र तु क्रिययोर्विरोध इति । न चायं विरोधोऽसङ्गतिर्वेति वाच्यम् । विरोध सामानाधिकरण्यनैयत्यात्, असङ्गतौ च वैयधिकरण्यनैयत्यात् । अत्र तु तदन्यतरप्रतिसंधानं विना कृतस्यैव कार्यकारणवृत्तिविजातीयगुणक्रियासंबन्धमात्रस्य चमत्कारप्रयोजकतेति भेदात् । तदुक्तम्—कार्यस्य कारणरूपानुकार इति । **एवमिति** । असकलया असंपूर्णया चक्षुःकोणमात्रेणेव इत्यर्थः । अत्र जगदाधारजगदीश्वरत्वेन लोचनैकदेशकरणकस्त्रीकर्तृकपानयोर्विलक्षणतया अनुपपद्यमान एव योगः प्रतीयत इति विषमस्तद्विधमधिकमिति योजना । प्रयोजनं च वर्णनीयप्रकर्षः ।

महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात् ।

आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकं तु तत् ॥१२८॥

आश्रितं आधेयं आश्रयस्तदाधारः, तयोर्महतोरपि विषये तदपेक्षया तनू अप्याश्रयाश्रयिणौ प्रस्तुतवस्तुप्रकर्षविवक्षया यथाक्रमं यत् अधिकतरतां व्रजतः, तदिदं द्विविधमधिकं नाम । क्रमेणोदाहरणम्

अहो विशालं भूपाल भुवनत्रितयोदरम् ।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ।।५४२।।

युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्यां सविकाशमासत ।
तनौ ममुस्तत्र न कैटभद्विष–
स्तपोधनाभ्यागमसम्भवा मुदः ।।५४३।।

बालचित्तानुरञ्जनी—**महतोरिति** । व्याकरोति **आश्रितमिति** । अन्यत्र भावोऽपि यथार्थः महतः कस्यचिदाधेयस्यविषयेऽपि तदपेक्षया तनुरिति अध्यारोपि महत्त्वमध्यास्ते य-् तदेकम् । अधिकं महतः कस्यचिदाधारस्य विषये तदपेक्षया तनुरपि आधेयः महत्त्वमध्यास्ते तद् द्वितीयमधिकम् । तत्राद्यमुदाहरति **अहो इति** । अहो आश्चर्यम् । भूपाल ! भुवनत्रितयोदरं विशालं यत् मातुमशक्योऽपि ते यशोराशिरत्र माति । अत्र यशोलक्षणस्य महत आधेयस्य अपेक्षया अतन्वपि भुवनत्रितयोदरं यशःप्रकर्षविवक्षणादाधिक्योत्कर्षमनुप्राप्यते । द्वितीयमुदाहरति **युगान्तेति** । युगान्तकालप्रतिसंहृतात्मनः कैटभद्विषो यस्यां तनौ जगन्ति सविकाशमासत तत्र तपौ तपोधनाभ्यागमसंभवा नारदागमनसंभूता मुदो न ममुः । अत्र महतीं भगवत्तनुमाधारं प्रति नारदागमप्रमोदलक्षणाधेयस्य तनोरपि आधिक्योत्कर्षः ।

सारबोधिनी—**अहो विशालमिति** । अत्राधेयस्य यशसो वैपुल्येऽपि तदपेक्षया तनोरपि भुवनत्रितयोदरस्याधिक्यमेव चारुताहेतुः ।

प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया ।
या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते ।।१२९।।

न्यक्कृतिपरमपि विपक्षं साक्षान्निरसितुमशक्तेन केनापि यत् तमेव प्रतिपक्षमुत्कर्षयितुं तदाश्रितस्य तिरस्करणं तत् अनीकप्रतिनिधितुल्यत्वात् प्रत्यनीकमभिधीयते । यथा अनीके अभियोज्ये तत्प्रतिनिधीभूतमपरं मूढतया केनचिदभियुज्यते तथेह प्रतियोगिनि विजेये तदीयोऽन्यो विजीयत इत्यर्थः ।

उदाहरणम्

त्वं विनिर्जितमनोभवरूपः सा च सुन्दर भवत्यनुरक्ता ।
पञ्चभिर्युगपदेव शरैस्तां ताडयत्यनुशयादिव कामः ।।५४४।।

बालचित्तानुरञ्जनी—प्रत्यनीकालङ्कारं लक्षयति **प्रतिपक्षेति** । **अशक्तेनेति** । अनीकस्य कटकस्य प्रतिनिधिः प्रत्यनीकं, तत्सादृश्यादलंकारोऽपि । प्रतिपक्षसंवन्धिविषयं प्रत्यनीकमुदाहरति **त्वमिति**। भो सुन्दर विनिर्जितमनोभवरूपस्त्वं सा च भवत्यनुरक्ता । अथ कामः अनुशयात् पञ्चभिः शरैः तां युगपदेव ताडयति । अत्र कामः केनचिज्जितः । त्वयि प्रहर्तुमक्षमः तव सौन्दर्यातिशयद्योतनाय त्वदनुरक्तां ताडयति ।

सारबोधिनी—प्रतिपक्षं प्रतिकर्तुमशक्यतया तदीयस्य तिरस्क्रिया प्रतिपक्षोत्कर्षफलकः स प्रत्यनीकनामालङ्कारः । **प्रतिपक्षमुकर्षयितुमिति** । प्रतिपक्षोत्कर्षफलकं तदाश्रितस्य तिरस्करणमित्यर्थः । यथाश्रुते प्रतिपक्षस्य प्रतिपक्षोत्कर्षेच्छाया बाधितत्वेन तुमर्थस्यासंगत्यापत्तेः । अनुशयात् इति दुःखात् ।

यथा वा

यस्य किञ्चिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः ।
कान्तवक्त्रसदृशाकृति कृती राहुरिन्दुमधुनापि बाधते ।।५४५।।

इन्दोरत्र तदीयता संवन्धिसबन्धात् ।

समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते ।
निजेनागन्तुना वापि तन्मीलितमिति स्मृतम् ।।१३०।।

सहजं आगन्तुकं वा किमपि साधारणं यत् लक्षणम्, तद्द्वारेण यत् किञ्चित् केनचिद्वस्तु वस्तुस्थित्यैव बलीयस्तया तिरोधीयते तत् मीलितमिति द्विधा स्मरन्ति । क्रमेणोदाहरणम्

अपाङ्गतरले दृशौ मधुरवक्रवर्णा गिरो
विलासभरमन्थरा गतिरतीव कान्तं मुखम् ।
इति स्फुरितमङ्गके मृगदृशः स्वतो लीलया
तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते ।।५४६।।

अत्र दृक्तरलतादिकमङ्गस्य लिङ्गं स्वाभाविकं साधारणं च मदोदयेन तत्राप्येतस्य दर्शनात् ।

बालचित्तानुरञ्जनी—संबन्धसंबन्धिविषयमुदाहरति **यथेति** । कायनिग्रहगृहीतविग्रहः कृती राहुर्यस्य विष्णोः किञ्चिदपकर्तुमक्षमः कान्तवक्त्रसदृशाकृतिमिन्दुमधुनापि बाधते । अत्र भगवान् प्रतिपक्षः तमपकर्तुमक्षमेण राहुणा तदीयश्चन्द्रः तिरस्क्रियते । तत्कथमिन्दोर्भगवत्संबन्धित्वमित्यत आह **इन्दोरिति** । भगवत्संबद्धं मुखं तत्संबन्धश्च सादृश्यं चन्द्रे, यदुक्तं कान्तवक्त्रसदृशाकृतीति ।

मीलितालङ्कारं लक्षयति **समेनेति** । समेन निगूह्य साधारणेन लक्षणेन कृत्वा कस्यचिद्वस्तुनो निगूह्यस्य केनचिद्वस्त्वन्तरेण निगूहनं मीलितम् । **सहजमागन्तुकमिति** । आद्यमुदाहरति **अपाङ्गेति** । लोचने अपाङ्गचञ्चले, गिरः मधुरवक्त्रवर्णाः, गतिः विलासभरमन्थरा, मुखमतीव कान्तमिति मृगदृशः अङ्गके लीलया स्वतः स्फुरितं तत् तस्मात् कारणात् । अत्र कृतपदोऽपि मदोदयो न संलक्ष्यते । अत्राङ्गनया सहजेन दृष्टितारल्यादिना लिङ्गभूतेन करणेन मदोदयो निगूह्यते । केचित्तु, समेन लक्ष्मणा वस्तुनेति सामानाधिकरण्यात् अन्वयमाचक्षाणाः अङ्गनालक्ष्मणा दृष्टितारल्यादिना मदोदयसाधारणेन मदोदयवर्ति तदेव तिरस्क्रियत इत्याहुः ।

सारबोधिनी—**समेनेति** । समेन साधारणधर्मेण निजेन स्वाभाविकेन लक्षणं चिह्नम् । **वस्तुस्थित्येति** । वस्तुनेत्यस्य विवरणम् । **तिरोधीयत इति** । अभिभूयत इत्यर्थः । तथा चैकेनापरस्याभिभवो मीलितमित्यर्थः । अभिभवश्च बलवत्सजातीयग्रहणकृताग्रहणम् । अतो न व्याजोक्त्यतिव्याप्तिः । अत्र गृहीतस्यैव कपटेन गोपनान्नापह्नुत्यतिव्याप्तिः, उपमानोपमेयभावाभावात् । **अपाङ्गेति** । अत्र स्वाभाविकधर्मकरणकं निगूहनं स्थाप्यत इति ।

> ये कन्दरासु निवसन्ति सदा हिमाद्रे-
> स्त्वत्पातशङ्कितधियो विवशा द्विषस्ते ।
> अप्यङ्गमुत्पुलकमुद्वहतां सकम्पं
> तेषामहो बत भियां न बुधोऽप्यभिज्ञः ॥५४७॥

अत्र तु सामर्थ्यादवसितस्य शैत्यस्यागन्तुकत्वात्तत्प्रभवयोरपि कम्पपुलकयोस्ताद्रूप्यं समानता च भयेष्वपि तयोरुपलक्षितत्वात् ।

बालचित्तानुरञ्जनी—द्वितीयमुदाहरति **य इति** । हे राजन् त्वत्पातशङ्कितधियः विवशा ये त्वद्द्विषः सदा हि अद्रेः कंदरासु निवसन्ति । अहो यत, आश्चर्यं सपुलकं सकम्पं अङ्गमुद्वहतामपि तेषां संबन्धिनीनां भियामभिज्ञः बुधोऽपि न । अत्र वर्णनीयविषयहिमकन्दरानिवासशैत्यसत्युद्भावे[?] ताभ्यां भयसाधारणाभ्यां तावेव कम्परोमाञ्चौ तिरस्क्रियेते ।

स्थाप्यतेऽपोह्यते वापि यथापूर्वं परं परम् ।

विशेषणतया यत्र वस्तु सैकावली द्विधा ॥१३१॥

पूर्वं पूर्वं प्रति यथोत्तरस्य वस्तुनो वीप्सया विशेषणभावेन यत् स्थापनं निषेधो वा सम्भवति सा द्विधा बुधैरेकावली भण्यते । क्रमेणोदाहरणम्

पुराणि यस्यां सवराङ्गनानि वराङ्गना रूपपुरस्कृताङ्गयः ।
रूपं समुन्मीलितसद्विलासमस्त्रं विलासाः कुसुमायुधस्य ॥५४८॥

न तज्जलं यन्न सुचारुपङ्कजं ।
न पङ्कजं तद् यदलीनषट्पदम् ।
न षट्पदोऽसौ कलगुञ्जितो न यो
न गुञ्जितं तन्न जहार यन्मनः ॥५४९॥

पूर्वत्र पुराणां वराङ्गनाः तासामङ्गविशेषणमुखेन रूपम् तस्य विलासाः तेषामप्यस्त्रमित्यमुना क्रमेण विशषणं विधीयते । उत्तरत्र प्रतिषेधेऽप्येवं योज्यम् ।

बालचित्तानुरञ्जनी—एकावलीमलङ्कारं लक्षयति **स्थाप्यत** इति व्याकरोति **पूर्वमिति**। स्थापना विधिः । अपोहो निषेधः । तत्राद्यमुदाहरति **पुराणीति** । यस्यां पुराणि सवराङ्गनानि । वराङ्गनाः रूपपुरस्कृताङ्गयः । रूपं समुन्मीलितसिद्विलासम् विलासाः कुसुमायुधस्यास्त्रम् । द्वितीयमुदाहरति **न तदिति** । तज्जलं न यत्र चारु पङ्कजं न तत् पङ्कजं न यत्र लीनः षट्पदो न । असौ षट्पदो न यः कल गुञ्जितो न । तद्गुञ्जितंन यन्मनो न जहार । क्रमेण विधायकत्वं चाह **पूर्ववाक्येति** ।

सारबोधिनी—परं परं वस्तु पूर्वपूर्ववस्तुनि विशेषणतया स्थाप्यते निषिध्यते वा सा द्विधा एकावली नामालङ्कारः ।

यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः ।

स्मरणम्

यः पदार्थः केनचिदाकारेण नियतः यदा कदाचिदनुभूतोऽभूत् स कालान्तरे

स्मृतिप्रतिबोधाधायिनि तत्समाने वस्तुनि दृष्टे सति यत् तथैव स्मर्यते तद् भवेत् स्मरणम् ।

उदाहरणम्

निम्ननाभिकुहरेषु यदम्भः प्लावितं चलदृशां लहरीभिः ।

तद्भवैः कुहरुतैः सुरनार्यः स्मारिताः सुरतकण्ठरुतानाम् ॥५५०॥

बालचित्तानुरञ्जनी—यथेति । व्याकरोति य इति । उदाहरति निम्नेति । लहरीति । चलदृशां निम्ननाभिविवरेषु यदम्भः प्लावितं सुरनार्यः तन्नवैः कुहरुतैः शब्दैः सुरतकण्ठरुतानां स्मारिताः । अत्र तत्सदृश इत्युक्त्या सादृश्यनिबन्धना स्मृतिरलङ्कारः । न स्मरणमात्रम् । अतः पूर्वानुभूतसुरतशब्दानां सदृशशब्दस्मरणेन स्मृतिरलङ्कारः ।

सारबोधिनी—यथानुभवमिति । स्मृतिः । प्रबोध उद्बोधः । कदाचित् । तत्प्रयोजके तत्समाने तत्सदृशे । तथा च सदृशदर्शनोद्बुद्धसंस्कारजन्या स्मृतिः । सोऽलङ्कारः न तु स्मरणमात्रम् । वैचित्र्याभावादिति भावः । निम्ननाभीति । सुरतकण्ठरुतानामिति कर्मणि षष्ठी ।

यथा वा

करजुअगहिअजसोआत्थणमुहविणिवेसिआहरपुडस्स ।

समरिअपञ्चजण्णस्स णमह कण्हस्स रोमञ्चं ॥५५१॥

भ्रान्तिमानन्यसंवित्तत्तुल्यदर्शने ॥१३२॥

तदिति अन्यत् अप्राकरणिकं निर्दिश्यते । तेन समानं अर्थादिह प्राकरणिकमाश्रीयते । तस्य तथाविधस्य दृष्टौ सत्यां यत् अप्राकरणिकतया संवेदनं स भ्रान्तिमान् ।

न चैष रूपकं प्रथमातिशयोक्तिर्वा तत्र वस्तुतो भ्रमस्याभावात् इह चार्थानुगमनेन संज्ञायाः प्रवृत्तेः तस्य स्पष्टमेव प्रतिपन्नत्वात् । उदाहरणम्

कपाले मार्जारः पय इति करान् लेढि शशिन-

स्तरुच्छिद्रप्रोतान् बिसमिति करी सङ्कलयति ।

रतान्ते तल्पस्थान् हरति वनिताप्यंशुकमिति

प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति ॥५५२॥

बालचित्तानुरञ्जनी—अत्रैवोदाहरणान्तरमाह **करेति**। भ्रान्तिमदलंकारं लक्षयति **भ्रान्तीति**। व्याकरोति **तदिति**। तस्या अलङ्कारान्तरव्यावृत्तिमाशङ्क्य परिहरति **न चेति**। भ्रान्तिश्चित्तधर्मः स चमत्काराय विद्यते यत्र स भ्रान्तिमदलङ्कारः स्फुटेन प्रतीतेः। ततो नेदं स्फुटं इत्यलम्। उदाहरति **कपाल इति**। मार्जारः कपाले पतितान् शशिकरान् पय इति लेढि। करी वृक्षस्थितान् मृणालमित्यास्वादयति। वनिता रतान्ते तल्पस्थान् तान् अंशुकमिति हरति। प्रभामत्तश्चन्द्रः इदं जगत् विप्लवयति। अहो आश्चर्यम्। अत्र शशिकराणां प्राकरणिकानामुपलम्भेन तत्सदृशपयःप्रभृत्यप्राकरणिकं प्रतीयते। इतिशब्दस्तु तत्तदपारमार्थ्यद्योतनाय एष मालारूपः।

सारबोधिनी—भ्रान्तिमदलङ्कारमाह **भ्रान्तिमानिति**। **तदिति**। तथा च प्राकरणिकार्थदर्शनोद्बुद्धसंस्कारजन्यस्मृत्युपनीताप्राकरणिकात्मतया प्राकरणिकज्ञानं भ्रान्तिमानित्यर्थः। एवञ्चानुभूयमानारोपस्थले प्रकारान्तरजन्यस्मृत्युपनीतभ्रमे च नायमलङ्कार इति भावः। **अर्थानुगमेनेति**। विशेषादर्शनप्रयोज्यज्ञानस्यैव भ्रमत्वेनाभिमतत्वात्। रूपकातिशयोक्त्योस्तु आहार्यरूपत्वात्ताभ्यां भेद इति भावः।

कपाल इति। लेढि आस्वादयति।

आक्षेप उपमानस्य प्रतीपमुपमेयता।
तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धनम् १३३॥

अस्य धुरं सुतरामुपमेयमेव वोढुं प्रौढमिति कैमर्थ्येन यत् उपमानमाक्षिप्यते यदपि तस्यैवोपमानतया प्रसिद्धस्योपमानान्तरविवक्षयानादरार्थमुपमेयभावः कल्प्यते तत् उपमेयस्योपमानप्रतिकूलवर्तित्वात् उभयरूपं प्रतीपम्। क्रमेणोदाहरणम्

लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा।
इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिन्तारत्नमदो मुधैव किममी सृष्टाः कुलक्ष्माभृतः॥५५३॥

ए एहि दाव सुन्दरि कण्णं दाऊण सुणसु वअणिज्जं।
तुज्झ मुहेण किसोअरि चंदो उवमिज्जइ जणेण॥५५४॥

अत्र मुखेनोपमीयमानस्य शशिनः स्वल्पतरगुणत्वात् उपमित्यनिष्पत्त्या वअणिज्जं इति वचनीयपदाभिव्यङ्ग्यस्तिरस्कारः।

बालचित्तानुरञ्जनी--प्रतीपालङ्कारं लक्षयति **आक्षेप इति**। व्याकरोति। **अस्येति**। उपमेयमुपमानकार्यं कर्तुं क्षमम् किमुपमानेनेति तिरस्क्रियमाणमाक्षेपः। उपमानतया प्रसिद्धस्यापि उपमेयता परिकल्प्यते तत् द्वितीयः। तत्राद्यमुदाहरति **लावण्येति**। भो देव लावण्यौकसि सप्रतापगरिमणि त्यागिनामग्रेसरे अवनीभरक्षमभुजे त्वयि निष्पादिते सति वेधसा इन्दुः किं घटितः? एष पूषा सूर्यः किं विहितः? चिन्तारत्नमिदं किमुत्पादितम्? अमी कुलक्ष्माभृतः मुधैव किं सृष्टाः? अत्रोपमानानामिन्द्वादीनां कार्यमाह्लादनादिकं उपमेयभूतो राजैव कर्तुं क्षम इति तेषां नैरर्थक्येनाभिधानमाक्षिप्यते। द्वितीयमुदाहरति **ए एहीति**। ए अयि सुन्दरि! एहि। तुज्झ मुहेण तव मुखेन, चंदो चन्द्रः उअमिज्जइ उपमीयते। अत्र चन्द्रस्योपमानस्योपमेयतया परिकल्पनमाक्षेप इत्याह **अत्रेति**।

सारबोधिनी—आक्षेप इति। उपमानस्याक्षेप इति प्रथमं, द्वितीनञ्चोपमावस्यैव तिरस्कारार्थमुपमेयताकल्पनमिति द्विरूपं प्रतीपम्। आक्षेपशरीरमाह अस्येति। कैमर्थ्यं किंप्रयोजनकता। प्रतीपपदार्थमाह **तदिति**। तथा चापकर्षबोधानुकूलो व्यापारः प्रतीपमिति सामान्यलक्षणं बोध्यम्। तत्र प्रथममाह **लावण्यौकसीति**। द्वितीयमाह **ए एहीति**।

अयि एहि तावत् सुन्दरि कर्णं दत्वा शृणुष्व वचनीयम्।
तव मुखेन कृशोदरि चन्द्र उपमीयते जनेन॥

अत्र द्वितीयं प्रतीपमिति।

क्वचित्तु निष्पन्नैवोपमितिक्रियाऽनादरनिबन्धनम्। यथा

गर्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि मुग्धे।
सन्तीदृशानि दिशि दिशि सरःसु ननु नीलनलिनानि॥५५५॥

इहोपमेयीकरणमेवोत्पलानामनादरः। अनयैव रीत्या यत् असामान्यगुणयोगात् नोपमानभावमपि अनुभूतपूर्वि तस्य तत्कल्पनायामपि भवति प्रतीपमिति प्रत्येतव्यम्।

यथा

अहमेव गुरुः सुदारुणानामिति हालाहल तात मा स्म दृप्यः।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्जनानाम्॥५५६॥

अत्र हालाहलस्योपमानत्वमसंभाव्यमेवोपनिबद्धम्।

बालचित्तानुरञ्जनी—क्वचित्तु उपमितौ निष्पन्नायामपि अनादरो भवतीत्याह **क्वचिदिति**। उदाहरति **गर्वमिति**। हे मुग्धे! पराजितेन लोचनयुगलेन, असंवाह्यं अपरिमितं, इमं गर्वं, किं वहसि?

दिशि दिशि सरस्सु ईदृशानि नलिनानि सन्ति । तव लोचनयुगं प्रति उत्पलानामुपमेयीकरणमेव तिरस्कार इत्याह इहेति । अस्तु उपमितेर्निष्पत्तिरनिष्पत्तिर्वा यत्र पुनरुपमानभावसंभावनैव नास्ति तत्राप्यनादराचरणतया प्रतीपमेवेत्याह **अनयैवेति** । रीतिः तिरस्कार निबन्धनत्वकल्पनाकरणयुक्तिः । तया यदसामान्यगुणयोगात् अन्यसदृशगुणसंबन्धाभावाद् उपमानत्वमपि नानुभूतम् । वरं वस्तुकल्पनायामपि अलङ्कारः प्रतीपमेवेत्यर्थः । उदाहरति **अहमिति** । हे तात हालाहल ! अहमेव सुदारुणानां गुरुः इति मा स्म दृप्यः । गर्वं मा कृथाः । अस्मिन् भुवने भवादृशानि दुर्जनानां वचनानि भूयः सन्ति । न त्वत्र दुर्जनवचनानि प्रति हालाहलस्य उपमानत्वमसंभवदेवोपनिबद्धमित्याक्षेप इत्याह अत्रेति । उपमानत्वस्य कथञ्चिन्निष्पत्तौ तदनिष्पत्तौ च त्रिधा द्वितीयं प्रतीपमुत्पद्यत इति भावः ।

सारबोधिनी—द्वितीयमाह **गर्वमिति** । अत्रोपमितिनिष्पत्तावप्युपमेयाधिक्याप्रतीतेर्व्यतिरेकतो भेदः । तृतीयमाह **अनयेत्यादि** । असामान्यगुणयोगादुत्कटानेकसाधारणधर्मानाश्रयत्वादित्यर्थः । उपमेयगतोत्कटानेकधर्मवत एवोपमानत्वात् तेन दुःखजनकत्वस्य यत् किञ्चित् धर्मस्य सत्त्वेऽपि न दोष इति । अनुभूतं पूर्वमनेनेत्यनुभूतपूर्वि, इन्नन्तं पदं कृतपूर्वी कटमितिवत् । मा स्म दृप्यः मा स्म गर्वीः ।

प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया ।

ऐकात्म्यं बध्यते योगात् तत् सामान्यमिति स्मृतम् ।।१३४।।

अतादृशमपि तादृशतया विवक्षितुं यदप्रस्तुतार्थेन संपृक्तमपरित्यक्तनिजगुणमेव तदेकात्मतया निबध्यते तत् समानगुणनिबन्धनात् सामान्यम् ।

उदाहरणम्

मलयजरसविलिप्ततनवो नवहारलताविभूषिताः
सिततरदन्तपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः ।
शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः ।
प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियोऽभिसारिकाः ।।५५७।।

अत्र प्रस्तुततदन्ययोरन्यूनानतिरिक्ततया निबद्धं धवलत्वमेकात्मताहेतुः । अत एव पृथग्भावेन न तयोरुपलक्षणम् ।

यथा वा

वेत्रत्वचा तुल्यरुचां वधूनां कर्णाग्रतो गण्डतलागतानि ।
भृङ्गाः सहेलं यदि नापतिष्यन् कोऽवेदयिष्यन् नवचम्पकानि ।।५५८।।

अत्र निमित्तान्तरजनितापि नानात्वप्रतीतिः प्रथमप्रतिपन्नमभेदं न व्युदसितुमुत्सहते प्रतीतत्वात् तस्य प्रतीतेश्च बाधायोगात्।

बालचित्तानुरञ्जनी--सामान्यालङ्कारमाह **प्रस्तुतेति**। प्रस्तुतस्याप्रस्तुतेन वस्तुना साधारणगुणयोगात् ऐकरूप्यं सामान्यमित्याह **अताद्दशमपीति**। न्यूनगुणमपि उत्कृष्टगुणेनैकात्मतया विवक्षितम्। वक्ष्यमाणतद्गुणनिराकरणार्थमाह **अपरित्यक्तेति**। तदेकोत्पत्त्याऽप्रस्तुतैकरूपेणापि व्युत्पादयति **तदिति**। उदाहरति **मलयजेति**। मलयजरसविलिप्ततनवः नवहारलताविभूषिताः सिततरदन्तपत्रकृतवक्त्ररुचः रुचिरामलांशुकाः विततधाम्नि शशिभृति धरां धवलयति अविभाव्यतां गताः। अत एव निरस्तभियः अभिसारिकाः सुखमेव प्रियवसतिं प्रयान्ति। अत्र प्रस्तुतस्य चन्दनलेपादेः अप्रस्तुतया चन्द्रिकया समं अविभाव्यतां गता इति अभेदप्रतीतिः। साऽलङ्कारस्य मूलमित्याह **अत्र प्रस्तुतेति**। अभिसारिकाणां भयनिरासाय उच्यते **न तयोरिति**। आर्थमुदाहरणान्तरमाह **वेत्रेति**। वेत्रत्वचा तुल्यरुचां वधूनां कर्णाग्रतः गण्डतलागतानि नवचम्पकानि भृङ्गाः सहेलं यदि नापतिष्यन् तर्हि चम्पकानि कोऽवेदयिष्यत्।

सारबोधिनी--**प्रस्तुतस्येति**। प्रस्तुतस्य प्राधान्येन वर्णनीयस्य यदन्येनाप्रस्तुतपदार्थेन योगादैकात्म्यं अपृथक्प्रतीयमानत्वं निबध्यते स सामान्यनामालङ्कारः। स च गुणसाम्यविवक्षया समानगुणतां प्रतिपादयितुमित्यर्थः। विवक्षापदस्वरसलब्धं व्याचष्टे **अताद्दशमपीति**। योगादित्यस्यार्थविवरणम् **संपृक्तमिति**। तेन तद्गुणे नातिव्याप्तिः तत्र स्वगुणतिरस्कारात्। तदेकात्मतयाऽपृथक्प्रतीयमानतयेति **निमीलिते** नातिव्याप्तिः। तत्र बलवत्सजातीयग्रहणकृताग्रहणस्यैव विवक्षितत्वात् अत्र [पृथक्त्वेना-] ग्रहणविवक्षितत्वात्।

वेत्रत्वचेति। तस्याश्चम्पकसवर्णता हि भवति। दन्तपत्रं दन्तनिर्मिततताटकमित्यर्थः। **अत एवेति**। अपृथक्भावेन तु नयोरुपलक्षणमस्त्येवेति भावः। **निमित्तान्तरेति**। यतः साक्षात्काररूपा भ्रान्तिर्नानुमाने **नापैति**। साक्षात्कारभ्रमे साक्षात्कारनिवेशस्य विरोधित्वात्। अत एव सूर्योदयेन प्राचीमनुमायापि मुह्यतीति। न च रूपकप्रथमातिशयोक्तिसङ्कर इति **वाच्यम्**। भ्रान्तिमत्सङ्करोऽपि न तस्य स्मर्यमाणारोपरूपत्वात् अस्य चानुभूयमानारोपरूपत्वादिति।

विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः।
एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा ॥१३५॥
अन्यत्प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः।
तथैव करणं चेति विशेषस्त्रिविधः स्मृतः ॥१३६॥

प्रसिद्धाधारपरिहारेण यत् आधेयस्य विशिष्टा स्थितिरभिधीयते स प्रथमो विशेषः

उदाहरणम्

दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिह कवयो न ते वन्द्याः ।।५५६।।

एकमपि वस्तु यत् एकेनैव स्वभावेन युगपदनेकत्र वर्तते स द्वितीयः । उदाहरणम्

सा वसइ तुज्झ हिअए स च्चिअ अच्छीसु सा अ वअणेसु ।
अह्मारिसाण सुन्दर ओसासो कत्थ पावाणं ।।५६०।।

यदपि किंचिद्रभसेनारभमाणस्तेनैव यत्नेनाशक्यमपि कार्यान्तरमारभते सोऽपरो विशेषः । उदाहरणम्

स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजतानवद्यविद्यम् ।
विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च ।।५६१।।

यथा वा

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां बत किं न मे हृतम् ।।५६२।।

सर्वत्र एवंविधविषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते तां विना प्रायेणालङ्कारत्वायोगात् । अत एवोक्तम्

"सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना" ।।इति।

बालचित्तानुरञ्जनी—विशेषालङ्कारं लक्षयति व्याकरोति प्रसिद्धेति । आधेयोपस्थितिरनाधारतया निबध्यमाना प्रथमो विशेषः । एकं स्वलक्षणकमेव वस्तु युगपदनेकेषु वर्तमानं द्वितीयो विशेषः । कस्यचिदुन्मादोत्कर्षात् कार्यमारभमाणस्य तेनैवारम्भेण अपृथक् प्रवृत्तावशक्यमपि कार्यान्तरमारभमाणं तृतीयो विशेषः ।

तत्राद्यमुदाहरति **दिवमिति** । दिवमुपयातानामपि येषामनल्पगुणा गिरः आकल्पं जगन्ति रमयन्ति ते कवयः केषां न वन्द्याः । अत्र कवीनां वागाधारभूतानामभावेऽपि आधेयानां वाचां ऐहिकी वृत्तिर्विशेषः ।

द्वितीयमुद्धाव्य उदाहरति **सा वसइ** इति । सती सपत्न्यनुरक्त नायकं काचनोपालभते—सा वसइ तुज्झ हिअए सा वसति तव हृदये, स च्चिअ अच्छीसु, सा अ वअणेसु सा च वचनेषु, ओसासो अवकाशः, कत्थ कुत्र ? अत्र एकस्या एव तस्या युगपदनेकत्र हृदयादिषु न्यासः विशेषः ।

तृतीयमुदाहरति **स्फुरदिति**। नवः सविता ससृजे। नवः बृहस्पतिश्च ससृजे। **अत्र** वर्णनीयैकमपि सत्यं भुवि[?] स्रष्टुश्चतुर्मुखस्य ब्रह्मणः तेनैव कारणेनापृथक्सामग्रीसाध्यं जन्मना शक्यनिर्माणं मनोभवादीनां सृष्टिर्विशेषः।

विधिनिषेधप्रदर्शनार्थमाह गृहिणीति। हे इन्दुमति! त्वं गृहिणी सचिवः। **मिथः सखी**। ललिते कलाविधौ प्रियशिष्या। एवंविधां तां हरता करुणाविमुखेन मृत्युना मे किं न हृतम्। वद! अत्रैकस्या इन्दुमत्या हरणादेव गृहिणीसचिवादिकमनेकं हृतम्।

ननु भामहोक्तप्रक्रियायां सर्वमिदमतिशयोक्तावन्तर्भवतीत्याशङ्क्य तत् उपगतप्रायमित्याह सर्वत्र विश्वे प्राणत्वेन जीविततया सारभावेनेत्यर्थः। अत्र भामहग्रन्थं संवादयति **सैषेति**। वक्रोक्तिरतिशयोक्तिः। वक्रिमातिशययोरेकत्वात्। अनया वक्रोक्त्या विभाव्यते विविधतया भाव्यते।

सारबोधिनी—विशेषं लक्षयति **विनेति**। एकात्मा एक आत्मा स्वभावोऽर्थाद्वृत्तिः स्थिति यस्यां सा तथा सा च तथाभूता अनेकस्मिन् वर्तमानेत्यर्थः। **दिवमिति**। जगतां कर्मीभूतानि। द्वितीयमुदाहरति **सा वसइ इति**।

सा वसति तव हृदये सैवाक्ष्णोः सैव वचनेषु।
अस्मादृशां सुन्दर! अवकाशः कुत्र पापानाम्॥

न च पर्यायसङ्करस्तस्य क्रमेणैकस्यानेकसंबन्धात्। अत्र त्वेकदैव एकपदस्यानेकपदसंबन्धस्य विवक्षितत्वादिति भेदात्।

तृतीयमुदाहरति **स्फुरदिति**। अनवद्याः विस्मरणादिदोषहीनाः। **यथा वेति**। संहारेऽपि दृश्यत इति भावः। नन्वलङ्काराणां बहूनां चमत्कारप्रयोजकरूपाभेदेऽपि कथं पृथगलङ्कारत्वमित्यत आह **सर्वत्रेति**। अतिशयोक्तिश्चमत्कारविशेषकारिण्युक्तिरिति यावत्। तथा चालङ्कारताप्रयोजकरूपाभेदेऽपि उक्तिवैलक्षण्यम्।

स्वमुत्सृज्य गुणं योगादत्युज्वलगुणस्य यत्।
वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः॥१३७॥

वस्तु तिरस्कृतनिजरूपं केनापि समीपगतेन प्रगुणतया स्वगुणसम्पदोपरक्तं तत्प्रतिभासमेव यत् समासादयति स तद्गुणः। तस्याप्रकृतस्य गुणोऽत्रास्तीति। उदाहरणम्।

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या।
रत्नैः पुनर्यत्र रुचा रुचिं स्वामानिन्यिरे वंशकरीरनीलैः॥५६३॥

अत्र रवितुरगापेक्षया गरुडाग्रजस्य, तदपेक्षया च हरिन्मणीनां प्रगुणवर्णता।

बालचित्तानुरञ्जनी—तद्गुणालङ्कारं लक्षयति **स्वमिति** । **अत्युज्ज्वलगुणस्य वस्तुन इति** शेषयोगात् संबन्धात् तस्य गुणस्यापि व्यञ्जकस्य प्रतिभासत्वम् अल्पगुणस्य प्रचुरगुणेन कवलीकारात् । तद्गुणशब्दं व्युत्पादयति **तस्येति** । उदाहरति **विभिन्नेति** । यत्र रैवतकपर्वते वंशकरीरनीलैः परितः स्फुरन्त्या रुचा गरुडाग्रजेन विभिन्नवर्णाः सूर्यस्य रथ्याः पुनः स्वामानिन्यिरे । अत्र सूर्यस्य स्यन्दनाश्वानां अरुणवर्णाश्वकालीनस्यापि गरुडमणिकिरणकवलीकरणमिति[?] । तद्गुणमिति तद्गुणद्वयमुक्तम् । न चेदं मीलितमेवेति नवाच्यम् । मीलिते प्रकृतं वस्तु वस्त्वन्तरेण बाधितत्वेन प्रतीयते । इह तु अनपह्नुतस्वरूपमेव वस्तु वस्त्वन्तरगुणाक्रान्ततया प्रतीयते इत्यनयोर्भेदात् ।

सारबोधिनी—**स्वमुत्सृज्येति** । अत्युज्ज्वलगुणस्य योगतः स्वं गुणमुत्सृज्य तद्गुणतामेति स तद्गुणनामालङ्कार इत्यर्थः । **वस्त्विति** । अभिभवे वस्तुतः स्वगुणस्य त्यागभावादन्यथा व्याचष्टे **तिरस्कृतनिजरूपमिति** । प्रगुणया स्वगुणसम्पादा केनापि समीपगतेन तिरस्कृतनिजरूपमिति सम्बन्धः । उपरोक्तसंबन्धं **विभिन्नेति** । परितः स्फुरन्त्या रुचा विभिन्नवर्णा इत्यन्वयः । न च मीलितेन सामान्येन वास्य सङ्करः । प्रथमे धर्मिण एवाग्रहात् । इह तु गुणमात्रस्यैवाभिभवात् । इह तु गृह्यमाणारोपस्येति भेदात् । यत्तु अन्यधर्मस्यान्यत्र भासनस्य परम्परासंबन्धावगाहितया प्रमात्वं प्रकृते च तथैव विवक्षितमिति न दोष इति । तत्र शोणं बिम्बोष्ठकान्त्येत्यादौ तद्गुणस्य भ्रमानुग्राहकतानापत्तेः । विशेषदर्शनेन प्रमायोगादिति ।

तद्रूपाननुहारश्चेत् अस्य तत्स्यादतद्गुणः ।

यदि तु तदीयं वर्णं संभवन्त्यामपि योग्यतायामिदं न्यूनगुणं न गृह्णीयात् तदा भवेदतद्गुणो नाम ।

उदाहरणम्

धवलोसि जह वि सुन्दर तह वि तुए मज्झ रञ्जिअं हिअअं ।
राअभरिए वि हिअए सुहअ णिहित्तो ण रत्तोसि ।।५६४।।

अत्रातिरिक्तेनापि मनसा संयुक्तो न रक्ततामुपगत इत्यतद्गुणः । किञ्च तदित्यप्रकृतम् अस्येति च प्रकृतमत्र निर्दिश्यते । तेन यत् अप्रकृतस्य रूपं प्रकृतेन कुतोऽपि निमित्तात् नानुविधीयते सोऽतद्गुण इत्यपि प्रतिपत्तव्यम् । यथा

गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते ।।५६५।।

बालचित्तानुरञ्जनी—अतद्गुणं लक्षयति **तद्रूपेति** । अननुहारः अननुवर्तनं अग्रहणमिति

यावत् । व्याकरोति यदि त्विति । तदीयमुत्कृष्टगुणसंबन्धि, अन्यस्य गुणस्य स्वगुणागुणस्वीकारो न्यायः । अन्यथाभावश्चेत्तदानीमतद्गुणः । तस्योत्कृष्टस्य गुणा न सन्तीति ग्रहणमतद्गुणः ।

उदाहरति धवल इति । हे सुन्दर शिव ! जइवि यद्यपि धवलोऽसि, तहवि तथापि, तुए मज्झ, त्वया मम, हिअअं हृदयं, रंजिअं रञ्जितं, राअभरिएवि रागभरितेऽपि, हिअए हृदये, सुहअ अस्तु । णिहितो निहितः । ण रत्तोऽसि न रक्तोऽसि । अत्र पूर्वार्धेधवलिमारुणिम्नोर्गुणयोर्विरोधः । उत्तरार्धेत्वतद्गुण इत्याह अतिरिक्तेनापीति । अतद्गुण इत्येतत् प्रकारान्तरेण व्याकरोति किञ्चेति । अस्मिन्नपि व्याख्याने उदाहरणमाह गाङ्गमिति । गाङ्गमम्बु सितं, यामुनं कज्जलम् । हे राजहंस जले यत्र मज्जतस्तव सैव-शुभ्रता न चीयते । नाप्यपचीयते । अत्र प्रकृतस्य हंसस्य शुभ्रता सत्यामपि योग्यतायां गङ्गाया पुनरुदकगुणे नानुलिप्यते ।

सारबोधिनी—तद्रूपेति । तद्रूपाननुहारः उत्कृष्टगुणाग्रहणम् । अस्य न्यूनगुणस्य तत्तदा ।

धवलेति ।

धवलोऽसि यद्यपि सुन्दर तथापि त्वया रञ्जितं मम हृदयम् ।
रागहृतेऽपि हृदये सुभग निहितो न रक्तोऽसि ॥

धवलः शुद्धगुणः । अथ च धवलो वृषभः । धवलत्तणं इति पाठे प्राकृतसप्तशतीदर्शनाद्धवल-शब्दस्य वृषभपरत्वं बोध्यम् । रागो लोहित्यमनुरागश्च । तदितीति । पूर्वं तत्इदंपदयोरधिकगुणन्यून-गुणवाचित्वं विवक्षितम् । इह तु प्रकृताप्रकृतवाचित्वमिति भेदः । गाङ्गेति । चीयते वर्द्धते ।

यद्यथा साधितं केनाप्यपरेण तदन्यथा ॥१३८॥

तथैव यद्विधीयेत स व्याघात इति स्मृतः ।

येनोपायेन यदेकेनोपकल्पितं तस्यान्येन विजिगीषुतया तदुपायकमेव यदन्यथाकरणं स साधितवस्तुव्याहतिहेतुत्वात् व्याघातः । उदाहरणम्

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः ॥५६६॥

बालचित्तानुरंजनी—व्याघातालङ्कारं लक्षयति **यद्यथेति** । व्याकरोति **येनेति** । कर्त्रा केनाप्यु-पायविशेषेण निष्पादितं वस्तु अन्येन प्रतिद्वन्द्विना तस्मादेवोपायविशेषात् अन्यथा क्रियते स व्याघात इत्यर्थः । उदाहरति **दृशेति** । यादृशा दृशा दग्धं मनसिजं दृशैव जीवयन्ति विरूपाक्षस्य जयिनीस्ता वामलोचनाः स्तुवे । अत्र विरूपाक्षेण कर्त्रा दृष्टिरूपेणोपायेन स्मरस्य दाहः साधितः । स्त्रीभिस्तेनैव दृष्टिरूपेण तस्य जीवितं साधितम् ।

सारबोधिनी--**यद्यथेति** । **इशेति** । यद्यपि विरूपाक्षदृग्वामलोचनादृशोर्नैक्यं तथा च न व्याघातः, तथाप्येकजातीयत्वादैक्यं विवक्षितत्वेदमुपपादनीयम् । यद्वा कार्यवैजात्यस्य कारणवैजात्यप्रयोज्यत्वादेकजातीयाद्विजातीयकार्याभिधाने व्याघात एवेति ध्येयम् ।

सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः ॥१३९॥

एतेषां समनन्तरमेवोक्तस्वरूपाणामलङ्काराणां यथासम्भवमन्योन्यनिरपेक्षतया यदेकत्र शब्दभागे एव, अर्थविषये एव उभयत्रापि वा अवस्थानम् सा एकार्थसमवायस्वभावा संसृष्टिः । तत्र शब्दालङ्कारसंसृष्टिर्यथा

वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया ।
चलितया विदधे कलमेखलाकलकलोऽलकलोलदृशान्यया ॥३६७॥

अर्थालङ्कारसंसृष्टिस्तु

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥५६८॥

पूर्वत्र परस्परनिरपेक्षौ यमकानुप्रासौ संसृष्टिं प्रयोजयतः, उत्तरत्र तु तथाविधे उपमोत्प्रेक्षे ।

बालचित्तानरंजनी—संसृष्टयलङ्कारं लक्षयति **सेष्टेति** । व्याकरोति **एतेषामिति** । तिलतण्डुलन्यायेन मिश्रणे संसृष्टिः । क्षीरनीरन्यायेन मिश्रणे तु सङ्करः । तत्र संसृष्टिः शब्दालङ्कारसंसृष्टिः, अर्थालङ्कारसंसृष्टिः, उभयालङ्कारसंसृष्टिश्चेति त्रिविधा । तत्राद्यमुदाहरति **कुसुमेति** । अत्र पूर्वार्धेऽनुप्रासालङ्कारः । तयोः शब्दालङ्कारयोः संसृष्टिः । द्वितीयमुदाहरति **लिम्पतीवेति** । नभः अङ्गानि लिम्पतीव । नभः अञ्जनं वर्षतीव । असत्पुरुषसेवेव दृष्टिः निष्फलतां गता । अत्र पूर्वार्धे उत्प्रेक्षालङ्कारः । असत्पुरुषसेवेत्युत्तरार्धे उपमालङ्कारः । अनयोरर्थालङ्कारयोः संसृष्टिः । पूर्वोक्तश्लोकयोः कथं संसृष्टिरित्याकांक्षायां क्रमेणाह **पूर्वत्रेत्यादिना** । पूर्वत्र कुसुमेत्यादौ यमकानुप्रासौ कार्यसमवायव्यतिरेकेण मियो निरपेक्षौ संसृष्टिलक्षणं वैशिष्ट्यं प्रयोजयतः । उत्तरत्र तु लिम्पतीत्यादौ परस्परनिरपेक्षे विद्यमानोत्प्रेक्षोपमे अर्थालङ्कारौ संसृष्टिगुणवैशिष्ट्यं प्रयोजयतः ।

शब्दार्थालङ्कारयोस्तु संसृष्टिः

सो णत्थि एत्थ गामे जो एअं महमहन्तलाअण्णं ।
तरुणाण हिअअलूडिं परिसक्कन्तीं णिवारेइ ॥५६९॥

अत्रानुप्रासो रूपकं चान्योन्यानपेक्षे । संसर्गश्च तयोरेकत्र वाक्ये छन्दसि वा समवेतत्वात् ।

बालचित्तानुरञ्जनी—तृतीयमुदाहरति सो णेति । हे सखि ! अत्थ अत्र, ग्रामे ग्रामे, सों णत्थि स नास्ति । जो यः, तरुणाण हिअअलुंडि तरुणलावण्यं [?], णिवारेइ निवारयति । स्वायत्तीकृत्य पुरुषान्तरसंसर्गे व्यावर्तयति । अत्र लाटानुप्रासः शब्दालङ्कारः । हिअअलूडि इति रूपकालङ्कारः । अनयोः संसृष्टिरित्याह **अत्रेति** । ननु शब्दालङ्कारयोर्भिन्नविषयत्वात् कथं संसृष्टिरित्यत आह **संसगश्चेति** ।

सारबोधिनी—सो णत्थीति ।

स नास्त्यत्र ग्रामे य एतां महमहायमानलावण्याम् ।
तरुणानां हृदयलुण्ठाकीं परिसंक्रामन्तीं निवारयति ।।
अत्र पूर्वार्द्धेऽनुप्रासः । उत्तरार्द्धे हृदयलुण्टाकीमिति रूपकम् ।

नन्वत्र रूपकमर्थालङ्कारोऽनुप्रासश्च शब्दनिष्ठः, कथमुक्तैकार्थसम्बन्धस्वभावा संसृष्टिरित्यत आह **संसर्गश्चेति** । एकत्र **वाक्य इति** । तथा च काव्यरूपैकोपाधिनानुगतयोः शब्दार्थयोरैक्यात् सङ्गतिरिति भावः । क्वचिद् वाक्य इति पाठः । तत्राकाङ्क्षायोग्यतादिमत्पदकदम्बस्यैव वाक्यत्वम् । अन्यथा निरर्थकानामपि वाक्यत्वापत्तिः । तथा चैकं वाक्यमित्यादिप्रतीतिसाक्षिकमेकत्वमादाय शब्दार्थालङ्कारयोरेकार्थसमवाय इत्यर्थः । रीतिरात्मा काव्यस्येति मतावष्टम्भेनोपपत्तिस्तु पूर्ववदेव, अन्यथाऽनुपूर्व्यात्मके छन्दसि वा शब्दालङ्काराणां यथाकथञ्चिद्वृत्तावपि, अर्थालङ्काराणां सर्वथैवावृत्या उक्तदोषानिवृत्तेः । समवेतत्वात् संबद्धत्वात् । केचित्तु रसस्वरूपनिरूपणे एकत्र धर्मिणि सर्वेषामुपकारकत्वात् साक्षात् संबन्धेन सर्वेषामेव सामानाधिकरण्यमित्याहुः ।

अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु सङ्करः ।

एते एव यत्रात्मनि अनासादितस्वतन्त्रभावाः परस्परं अनुग्राह्यानुग्राहकतां दधति स एषां सङ्कीर्यमाणस्वरूपत्वात् संकरः । उदाहरणम्

आत्ते सीमन्तरत्ने मरकतिनि हृते हेमताटङ्कपत्रे
लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे गृहीते ।
शोणं बिम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये
राजन् गुञ्जाफलानां स्रज इति शबरा नैव हारं हरन्ति ।।५७०।।

अत्र तद्गुणमपेक्ष्य भ्रान्तिमता प्रादुर्भूतम् तदाश्रयेण च तद्गुणः सचेतसां प्रभूतचमत्कृतिनिमित्तमित्यनयोरङ्गाङ्गिभावः ।

बालचित्तानुरञ्जनी—सङ्करालङ्कारं लक्षयति **अविश्रान्तीति** । व्याकरोति **एत इति**। अङ्गमनुग्राहकम्। **सीमन्तरत्न इति**। हे राजन्! अरण्ये इत्वरीणां त्वदरिमृगदृशां सीमन्तचिह्नके मरकतिनि हेमताटंकपत्रे हृते मेखलायां लुप्तायां मणितुलाकोटियुग्मे झटिति हृते सति बिम्बोष्ठकान्त्या शोणं हारं गुञ्जाफलानां स्रज इति भ्रान्त्या नैव हरन्ति। अत्र हारस्य शुक्लिमपरित्यागात् शोणिमस्वीकारात् तद्गुणालङ्कारात् गुंजाफलानां स्रज इति स्थले भ्रान्तिमानलङ्कारः। अत्र तद्गुणापेक्षया भ्रान्तिमानङ्गी प्रादुरभूत्। तदाश्रयेण च तद्गुणः सचेतसां चमत्कारनिमित्तमिति तयोरङ्गाङ्गिभाव इत्याह।

सारबोधिनी--सङ्करालङ्कारमाह **अविश्रान्तीति**। आत्मन्यात्ममात्रेऽङ्गाङ्गित्वमनुग्राह्यानुग्राहकत्वं तद्भूः सङ्कर इत्यर्थः। अविश्रान्तीत्यस्य विवरणं अनासादितस्वतन्त्रभावा इति। स्वातन्त्र्यञ्चाविजातीयासहकारेण चमत्कारासाधारणप्रयोजकत्वम्। एतेन संसृष्टेर्भेदा दर्शिताः।

आत्त इति। ताटङ्कः कर्णालङ्कारभेदः। लुप्तायां छिन्नायाम्, लुप्तृछेदने इति धात्वनुसारात्। तुलाकोटिर्नूपुरम्। **अत्रेति**। **शोणं बिम्बोष्ठकान्त्येति**। अत्र तद्गुणवशेन गुञ्जाफलानामित्यत्र भ्रान्तिमान्।

जटाभाभिर्भाभिः करधृतकलङ्काक्षवलयो
वियोगिव्यापत्तेरिव कलितवैराग्यविशदः।
परिप्रेङ्खत्तारापरिकरकपालाङ्किततले
शशी भस्मापाण्डुः पितृवन इव व्योम्नि चरति ॥५७१॥

उपमा रूपकम् उत्प्रेक्षा श्लेषश्चेति चत्वारोऽत्र पूर्ववत् अङ्गाङ्गितया प्रतीयन्ते।

बालचित्तानुरञ्जनी—उदाहरणान्तरमाह **जटेति**। जटाभाभिः जटातुल्यैर्भाभिः किरणैः। करधृतकलङ्काक्षवलयः। करो रश्मिः पाणिश्च, वियोगिव्यापत्तेरिव कलितवैराग्यविशदः। वैराग्यं विषयव्यावृत्तिः विरागता। भस्मापाण्डुः शशी पितृवनस्योपरि प्रेङ्खत्तारापरिकरकपालाङ्किततले व्योम्नि चलति। अत्र जटाभाभिरित्यार्थी उपमा करवैराग्यश्लेषस्याङ्गतां भजते।

सारबोधिनी—न केवलं द्वयोरेव बहूनामपि सङ्करो भवतीत्याह **जटाभाभिरिति**। अत्र चन्द्रव्यवहारे महाव्रतिकत्वारोपरूपायाः समासोक्तेरुपमादयोऽङ्गानीत्याह **उपमेति**। करो रश्मिः पाणिश्च। वैराग्यं विषयगतरागिता विषयव्यावृत्तिश्च। तत्र हेतुर्वियोगिव्यावृत्तेरिति। वियोक्तुं शीलं येषां ते वियोगिनो विषयविरहिणश्च तेषां व्यापत्तेर्नाशादित्यर्थः। विशदः पाण्डरः, शुद्धचित्तश्च। परिकरः समूहः। तलपदं स्वरूपार्थकम्। अधःस्वरूपयोरस्त्री तलमित्यमरात्! भस्मना पाण्डुर्भस्मेव पाण्डुश्च **अत्रेति**। जटाभाभिरित्युपमालङ्कारः करवैराग्यशब्दयोः श्लेषयोरङ्गतां भजते। जटाविषय एव पाणिविषयव्यावृत्तत्वयोग्यत्वात् श्लेषोऽपि च कलङ्क एवाक्षवलय इति रूपकस्याङ्गतां भजते।

कलङ्क एवाक्षवलयमिति रूपकपरिग्रहे करधृतत्वमेव साधकप्रमाणतां प्रतिपद्यते। अस्य हि रूपकत्वे तिरोहितकलङ्करूपम् अक्षवलयमेव मुख्यतयावगम्यते तस्यैव च करग्रहणयोग्यतायां सार्वत्रिकी प्रसिद्धिः। श्लेषच्छायया तु कलङ्कस्य करधारणम् असदेव प्रत्यासत्या उपचर्य योज्यते। शशाङ्केन केवलं कलङ्कस्य मूर्त्यैवोद्वहनात्। कलङ्कोऽक्षवलयमिवेति तु उपमायां कलङ्कस्य उत्कटतया प्रतिपत्तिः। न चास्य करधृतत्वं तत्त्वतोऽस्तीति मुख्येऽप्युपचार एव शरणं स्यात्। एवंरूपश्च संकरः शब्दालङ्कारयोरपि परिदृश्यते। यथा

राजति तटीयमभिहतदानवरासातिपातिसारावनदा।
गजता च यूथमविरतदानवरा सातिपाति सारा वनदा ॥५७२॥

अत्र यमकमनुलोमप्रतिलोमश्च चित्रभेदः पादद्वयगते परस्परापेक्षे।

बालचित्तानुरञ्जनी--अयं श्लेषालङ्कारोऽपि कलङ्क एवाक्षवलयमिति रूपकस्याङ्गतां भजते। अयं रूपकालङ्कारः वियोगिव्यापत्तेरित्युत्प्रेक्षाया अङ्गम्। पितृवन इवेति तु शाब्दी उपमा सर्वत्रोपकरोति। इति चतुर्णामङ्गाङ्गिभाव इत्याह **उपमेति**। ननु कलङ्कोऽक्षवलय इवेत्युपमितिसमासः किमिति न भवति व्याघ्रादीनामाकृतिगणत्वादित्याह **कलङ्कोऽक्षवलय इवेति**। समासे उपमायां कलङ्कस्य प्राधान्येन प्रतीयमानत्वात्। नास्य करधृतयोग्यता न स्यात्। रूपके तु अक्षवलयस्य प्राधान्यात् तस्य करधृतत्वं घटत इति रूपकमेवाङ्गीकर्तव्यमिति भावः। अनुकरैः रश्मिभिः धृतकलङ्कश्चन्द्र इति समाश्रयणे कलङ्कस्य करवरणं भवद्भिरपि स्वीकृतमेवेत्याशङ्क्याह **श्लेषेति**। शशाङ्कश्च करधृतकलङ्कश्चेति प्रत्यासत्तेः। करवरणोपचार इति भावः। उपमितसमासे तु उपचार एव शरणमिति प्रतिपादयितुमाह **कलङ्क इति**।

न केवलमार्थेष्वलङ्कारेष्वयं सङ्करः यावता शाब्देष्वपीत्याह **एवमिति**। **राजतीति**। अभिहतः दानवानां रासः सिंहनादो येन शंभुना, तस्य संबोधनम्। हे अभिहतदानवरासः अतिपातिनः जनेन व्रजं सासारावाः सशब्दा नादा यत्र सेयं राजते। अविरतेन सन्ततेन, दानेन मदेन, वरां श्रेष्ठां, सरसिजवनं दयति रक्षति। गजसमूहश्च पाति रक्षति। अत्र यमकमनुलोमप्रतिलोमलक्षणश्चित्रभेदश्चेति द्वावलङ्कारौ मिथः सापेक्षौ अङ्गाङ्गिभावसङ्करमनुभवत इत्याह **अत्रेति**। अलङ्कारयोः कथं परस्परापेक्षा इत्याशङ्कायामाह **पादद्वयेति**। अपेक्षापरस्यानुग्राह्यानुग्राहकभाव इत्यर्थः

सारबोधिनी--करधृतत्वस्यैकरूपकसाधकत्वेन वक्ष्यमाणत्वात् वियोगिव्यापत्तेरिवेत्युत्प्रेक्षाया अप्यङ्गं श्लेषः। रश्मेर्वियोगिव्यापत्तिमदयोग्यत्वात्। सर्वे पितृवन इवेत्युपमाया उपकारकः। ननु कलङ्कोऽक्षिवलयमिवेत्युपमितिसमासो न कुत इत्यत आह **कलङ्क एवाक्षवलयमित्यादि**। कथं करधृतत्वं

स्वरूपसापेक्षमत आह **मुख्यतयेति**। उपमितसमासे कलङ्क एव प्राधान्येनावगम्यते अक्षवलयं तूपसर्जनतया। एवं च कलङ्कस्य करधृतत्वं न क्वापि प्रसिद्धमिति भावः। तस्यैवाक्षवलयस्यैव। ननु तथापि सादृश्यं विना कथं रूपकं, न च करधृतत्वमेव सादृश्यं कलङ्के तदभावात्। नाप्याकारसाम्यं तस्यापि भेदादित्याह **श्लेषच्छाययेति**। छाया सामर्थ्यम्। अथवा श्लेषच्छाया न श्लेषः एकस्याप्रकृतत्वात्। प्रत्यासत्त्या करशालिचन्द्रवृत्तित्वरूपसांनिध्येनासत्त्वे हेतुः। **शशाङ्केनेत्यादि**। यद्यप्येवमपि कलङ्के रश्मिधृतत्वं अक्षवलये च पाणिधृतत्वमिति न साधारण्यं, तथापि करशब्दवाच्यधृतत्वं फलतः करशब्द एव साधारणो धर्म इति ध्येयम्। उपमितसमासेऽप्युपचार एव शरणमिति प्रतिपादयितुमाह कलङ्कोऽक्षवलयमिवेत्या-दिकलङ्कस्योत्कटतया। **मुख्येति**। उपमितसमासे कलङ्को मुख्यः। तथा च गुणप्रधानयोर्गौण एवोपचारः। **समुचित इति**। रूपकमेव साधीय इति भावः। **एवंरूप इति**। अनुग्राह्यानुग्राहकरूप इत्यर्थः।

राजतीति। इयं तटी राजतीत्यन्वयः। कीदृशी ? अभिहितो दानवानां रासः शब्दो यस्यां सा तथातिपाती शीघ्रपातीत्यारावः। स शब्दो नयो यस्यां गर्जता यूथमतिशयेन पाति रक्षति। सापि कीदृशी ? अविरलेन दानेन मदेन वरा श्रेष्ठा। तथा सारा स्थिरा। तथा वनदा वनसण्डिता। **अत्रेति**। चित्रभेदः। चित्रनामा शब्दालङ्कारः **परम्परापेक्ष इति**। नपुंसकानपुंसकयोर्नपुंसकमति न्यायात्।

एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः ॥१४०॥

द्वयोर्बहूनां वाऽलङ्काराणामेकत्र समावेशेऽपि विरोधात् न यत्र युगपदनवस्थानं, न चैकतरस्य परिग्रहे साधकं तदितरस्य वा परिहारे बाधकमस्ति येनैकतर एव परिगृह्येत स निश्चयाभावरूपो द्वितीयः संकरः समुच्चयेन संकरस्यैवापेक्षात्। उदाहरणम्

जह गहिरो जह रअणणिब्भरो जह अ णिम्मलच्छाओ।
तह किं विहिणा एसो सरसवाणीओ जलणिही ण किओ ॥५७३॥

अत्र समुद्रे प्रस्तुते विशेषणसाम्यादप्रस्तुतार्थप्रतीतेः किमसौ समासोक्तिः किमब्धेर-प्रस्तुतस्य मुखेन कस्यापि तत्समगुणतया प्रस्तुतस्य प्रतीतेः इयमप्रस्तुतप्रशंसेति संदेहः।

बालचित्तानुरञ्जनी—न च शब्दालङ्कारयोः शब्दवत् परस्परोपकार्योपकारकत्वाभावेनाङ्गाङ्गि-भाव इति वाच्यम् शब्दालङ्कारसंसृष्टिस्त्वत्र ज्यायसीति अलङ्कारसर्वस्वकारेणोक्तत्वात्। शब्दालङ्कार-संकरभेदान्तरमाह **एकस्य चेति द्वयोर्बहूनामित्यादि**। नन्वेकस्य च ग्रहे इत्यादिनापि कथं सङ्कर एव प्रतिपद्यत इत्याशङ्क्याह **समुच्चयेनेत्यादि**। **एकस्य च ग्रह इत्यादि**। तत्र सङ्करसमुच्चयार्थश्चकारः। तेन समुच्चयेन समुच्चयद्योतकेन च शब्देन सङ्कर आक्षिप्यते। उदाहरति **जहेति**। गहिरो तीरो, यथा रहणिब्भरो यथा। **अत्र समासोक्तिः**। प्रस्तुतप्रसवायेत्याह **अत्रेति**। विशेषणसाम्यादित्यनेन समासोक्तेः लक्षणमुहसार्यते। तत्समानगुणतयेत्यनेनाप्रस्तुतप्रशंसायाः।

सारबोधिनी--द्वितीयं सङ्करमाह **एकस्य चेति**। **एकतरस्य** चेत्यर्थः। **न्यायदोषौ साधकबाधक-प्रमाणे**। तथा चोभयत्र साधकबाधकप्रमाणाभावप्रयुक्तस्तुल्यकोटिकः संशयः संदेहसङ्कर इत्यर्थः। **व्याचष्टे द्वयोर्बहूनामिति**। एकत्र काव्ये समावेशेऽपि स्वरूपतः सत्त्वेऽपि विरोधात् कवितात्पर्यग्राहकयोरन्योन्य-प्रतिबन्धात्। अवस्थानं निश्चयः। ननु वस्तुस्वरूपसत्त्वे किमिति न निश्चय इत्याह **न चेति**। कारिकायां विशेष्यं पूरयति **समुच्चयेति**। समुच्चयबोधकेन चकारेणेत्यर्थः। आक्षेपादनुकर्षणादित्यर्थः।

यद्यपि वक्ष्यमाणोदाहरणेषु नयनानन्ददायीत्यादिष्वलङ्काराणां निश्चय एव तथापि किमय-मलङ्कारः कवितात्पर्यविषयोऽयमित्याकारः सन्देहोऽत्र विवक्षितः। अत एवाह वृत्तिकृत् अलङ्काराणामेकत्र समावेशेऽपीति। अत एव विरोधपदमन्यथैव योजनीयमन्यथा समावेशेऽपि विरोधादित्यसङ्गत्यापत्तेः। एवं निश्चयोऽपि कवितात्पर्यविषयत्वेन निश्चयो बोद्धव्यः। **जह गंभीर इति**

यथा गंभीरो यथा रत्ननिर्भरो यथा च निर्मलच्छायः।
तथा किं विधिना सुरसपानीयो जलधिर्न कृतः॥

अत्रेति। अयं च संदेहः समुद्रस्य प्रकृताप्रकृतत्वग्राहकप्रमाणानवतारे बोद्धव्यः।

यथा वा

नयनानन्ददायीन्दोर्बिम्बमेतत् प्रसीदति।
अधुनापि निरुद्धाशमविशीर्णमिदं तमः॥५७४॥

अत्र किं कामस्योद्दीपकः कालो वर्तते इति भङ्ग्यन्तरेणाभिधानात् पर्यायोक्तम् उत वदनस्येन्दुबिम्बतया अध्यवसानात् अतिशयोक्तिः, किं वा एतदिति वक्त्रं निर्दिश्य तद्रूपारोपवशात् रूपकम्। अथवा तयोः समुच्चयविवक्षायां दीपकम् अथवा तुल्ययोगिता। किमु प्रदोषसमये विशेषसाम्यादाननस्यावगतो समासोक्तिः आहोस्वित् मुखनैर्मल्यप्रस्तावात् अप्रस्तुतप्रशंसा, इति बहूनां संदेहादयमेव संकरः।

यत्र तु न्यायदोषयोरन्यतरस्यावतारः तत्रैकतरस्य निश्चयान्न संशयः। न्यायश्च साधकत्वम् अनुकूलता दोषोऽपि बाधकत्वं प्रतिकूलता। तत्र

सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिः॥५७५॥

इत्यत्र मुख्यतयावगम्यमाना हासद्युतिर्वक्त्रे एवानुकूल्यं भजत इत्युपमायाः साधकम्। शशिना तु न तथा प्रतिकूलेति रूपकं प्रति तस्या अबाधकता।

बालचित्तानुरञ्जनी—एवं द्वयोः संदेहमुदाहृत्य बहूनामुदाहरति **यथा वेति**। नयनानन्ददायीन्दोः एतत् बिम्बं प्रसीदति। अधुना निरुद्धाशमपीदं तमः शीर्णम्। पर्यायोक्त्यतिशयोक्तिरूपकदीपकतुल्ययोगितासमासोक्त्यप्रस्तुतप्रशंसानां संशयात् संदेहलक्षणसङ्कर इत्याह **किमिति**। भङ्ग्यन्तरेण प्रकारान्तरेण। **अथ तयोरिति**। मुखेन्दुबिम्बयोः समुच्चयविवक्षायां बिम्बं प्रसीदति तव मुखं प्रसीदति ग्रामस्थपुरुषपशुवत् समुच्चयप्रीतिसद्भावात्। प्रस्तुताप्रस्तुतयोश्च प्रमुखयोर्दीपकम्। मुखे नैर्मल्यप्रस्तावादिति मुखनैर्मल्ये प्रस्तुते चन्द्रप्रशंसेति अप्रस्तुतप्रशंसा। अयमेवानिश्चयात्मक इत्यर्थः। न्यायदोषयोः संभवे अयं सङ्करो न संभवतीत्याह **यत्र त्विति**। न्यायशब्दार्थमाह **न्यायश्चेति**। मुख्यतया घटितत्वमनुकूलतासाधकं प्रमाणं बाधकं दोष इति भावः। उपमारूपकयोः प्रत्येकं साधनम्। चत्वारो दोषाः उपमायाः साधनं न रूपकस्य दूषणम्। किन्तु एकस्य रूपकस्य साधनं नोपमाया दूषणम्। किन्तु ताटस्थ्यमिति द्वितीयः। उपमाया दूषणं रूपकताटस्थ्यमिति तृतीयः। रूपकस्य दूषणम् हासद्युतेर्मुख्यया वृत्त्या एवावस्थानात् शशिनस्तिरोधानं वक्त्रस्याविर्भाव इति तस्या आनुकूल्यं भजत इत्युपमायाः साधनमित्यर्थः। ननु शशिनि तस्याः प्रातिकूल्याद् रूपकलक्षणस्य दूषणमेवास्ति। अत आह **शशिना नत्विति**।

सारबोधिनी—द्वयोः सङ्करमुक्त्वा बहूनां सङ्करमाह **नयनेति**। समुच्चयविवक्षायामित्यर्थः। तथैकस्याऽप्रकृतत्वे परस्याप्रकृतत्वे दीपकम्। **तयोरिति**। चन्द्रः प्रसीदति। एतन्मुखं प्रसीदति इति चकाराभावेऽपि गामश्वं पुरुषं प्रभुमित्यादिवत् समुच्चयविवक्षया प्रकृतत्वविवक्षायां अप्रकृतत्वविवक्षायां वा तुल्ययोगिता। **अयमेवेति**। संदेहात्मा सङ्करः इत्यर्थः। **मुख्यतयेति**। स्वारस्येन लक्षणादिकं विनैव संबद्धतयेत्यर्थः। रूपके चन्द्रस्यैव प्राधान्येन तत्र हासानन्वयात्। उपमायां तु प्रधाने मुखे स्वारस्यादन्वयः संभवतीत्यर्थः। अत्र द्युतिपदस्य शोभापरत्वनिश्चये सतीदं विनिगमकम्। अन्यथा द्युतिपदस्य प्रभापरत्वे हास एव द्युतिरिति रूपकं, वक्त्रमेव शशीति रूपकस्यानुकूल्यं भजत एवेति संदेहता। **न तथेति**। हासपदेन विकासलक्षणायां कथंचिदर्थघटनादिति भावः।

वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्यतः ॥५७६॥

इत्यत्रापरत्वमिन्दोरनुगुणं न तु वक्त्रस्य प्रतिकूलमिति रूपकस्य साधकतां प्रतिपद्यते न तूपमाया बाधकताम्।

राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम् ॥५७७॥

इत्यत्र पुनरालिङ्गनमुपमां निरस्यति सदृशं प्रति परप्रेयसीप्रयुक्तस्यालिङ्गनस्यासम्भवात्।

पादाम्बुजं भवतु नो विजयाय मञ्जु—
मञ्जीरशिञ्जितमनोहरमम्बिकायाः ॥५७८॥

इत्यत्र मञ्जीरशिञ्जितं अम्बुजे प्रतिकूलं असम्भवादिति रूपकस्य बाधकं न तु

पादेऽनुकूलमित्युपमायाः साधकमभिधीयते विध्युपमर्दिनो बाधकस्य तदपेक्षयोत्कटत्वेन प्रतिपत्तेः।

एवमन्यत्रापि सुधीभिः परीक्ष्यम्।

बालचित्तानुरञ्जनी—गुणवृत्त्या द्वितीयमुदाहरति **वक्त्रेन्दाविति**। अत्र चन्द्रस्यानुकूलमपरत्वं वक्त्रस्य प्रतिकूलमिति रूपकम् साध्यते। तेनोपमा दुष्यत इत्यर्थः। तृतीयमुदाहरति **राजेति**। अत्रालिङ्गनमुपमायां प्रतिकूलम्। तदेवोपपादयति **सदृशमिति**। चतुर्थमुदाहरति **पादाम्बुजमिति**। पादाम्बुजमिवेत्युपमा। अत्र मञ्जीरशिञ्जितं अम्बुजे प्रतिकूलमिति रूपकमिष्यत इत्यर्थः।

ननु यत्र रूपकस्य दूषणं तत्र तत एवोपमासिद्धिरिति कथं नोपमा साध्यत इत्याह **विध्युपमर्दिन इति**। विधिना तयोर्व्यपदेशविकल्पौ बाध एव प्रकल्पत इति न्यायेन रूपकविध्युपमर्दिनो मञ्जीरशिञ्जितप्रतिकूललक्षणस्य बाधः स्यात्। तदाऽनुकूलतालक्षणसाधकापेक्षया उत्कटत्वेन विध्युपमर्दितत्वजनिताधिकेन परिज्ञानादित्यर्थः। साधकबाधकविषयेऽतिदेशमाह **एवमिति**। शरदेव प्रसर्पन्त्या तस्य कोदण्डसत्कृतो विनिद्रजृम्भितहरिर्दुग्धोदधिरजायतेत्यत्र विनिद्रजृम्भितहरिरिति नरसिंहद्वयविषयं यत्साधारण्येन विशेषणं तन्न दुग्धोदधिरिवेत्युपमाबाधितेन रूपकं साधयति सामान्याप्रयोग इत्युक्तत्वात् इत्यादि स्वयमेवोह्यमित्यर्थः।

सारबोधिनी—ननु चेदनुकूल न कथं साधकं किञ्च साधकत्वपरिहारेण बाधकत्वोपादानं किमर्थमत आह **विधीत्यादि**। विधीत्यस्य स्वविरोधिकोटीत्यादिः। तथा च स्वविरोधिकोटेर्विध्युपमर्दिनो व्यतिरेकनिश्चायकस्य तदपेक्षया स्वसाधकापेक्षया उत्कटत्वेन बलवत्त्वेन प्रतिपत्तेः सन्देहप्रतिबन्ध इति शेषः। तथाहि, उपमासाधकत्वमात्रेऽभिहिते रूपकस्यापि कश्चित्साधकः स्यादिति सन्देहाहितसन्देहस्य तादवस्थ्याद् बाधके त्वभिहिते तद्व्यवच्छेदप्रतीत्या सन्देहाविषयत्वमुपपद्यते। एवञ्च सतोऽपि साधकस्याकिञ्चित्करतया बाधकमेव प्राधान्यादुपमासाधकमिति भावः।

स्फुटमेकत्र विषये शब्दार्थालङ्कृतिद्वयम्।

व्यवस्थितं च

अभिन्ने एव पदे स्फुटतया यदुभावपि शब्दार्थालङ्कारौ व्यवस्थां समासादयतः सोऽप्यपरः संकरः। उदाहरणम्

स्पष्टोल्लसत्किरणकेसरसूर्यविम्ब—
विस्तीर्णकर्णिकमथोदिवसारविन्दम्।
श्लिष्टाष्टदिग्दलकलापमुखावतार—
बद्धान्धकारमधुपावलि संचुकोच ।।५७६।।

अत्र, एकपदानुप्रविष्टौ रूपकानुप्रासौ।

तेनासौ त्रिरूपः परिकीर्तितः ।।१४१।।

तदयमनुग्राह्यानुग्राहकतया संदेहेन, एकपदप्रतिपाद्यतया च व्यवस्थितत्वात्त्रिप्रकार एव संकरो व्याकृतः। प्रकारान्तरेण तु न शक्यो व्याकर्तुम् आनन्त्यात् तत्प्रभेदानामिति प्रतिपादिताः शब्दार्थोभयगतत्वेन त्रैविध्यजुषोऽलङ्काराः।

बालचित्तानुरञ्जनी—एकपदानुप्रवेशस्वभावं तृतीयसङ्करमाह **स्फुटमिति**। यः कौमारहर इत्यादौ विभावनाविशेषोक्त्योः अस्फुटतया न सङ्कर इति तदपोहार्थं स्फुटमित्युक्तम्। अभिन्नपदानामभावादस्फुटंनिश्चितमित्यर्थः। व्याकरोति **अभिन्नेति**। उदाहरति **स्पष्टेति**। अथो स्पष्टमुल्लसत्किरणा एव केसरा यत्र स्यात् तत् सूर्यबिम्बमेव विस्तीर्णकर्णिका यस्य श्लिष्टाष्ट दिश एव दलानि तेषां कलापमुखः अवतारो यस्य स चासौ बद्धान्धकारः स एव मधुपावलिर्यत्र। एवंविधं दिवस एवारविन्दं सञ्चुकोच सङ्कुचितवान् अत्र तयोः साङ्कर्यमित्यत आह **अत्रेति**। निगमयति **तेनेति**। व्याकरोति **तदिति**। सर्वालङ्कारोदाहरणानि सङ्करे दर्शयितुं न शक्यत इत्याह **प्रकारान्तरेणत्विति**। तत्र हेतुमाह आनन्त्यादिति। तस्य संकरस्य प्रभेदाः। अगांगिभावसंदेहैकवाचकानुप्रवेशरूपाः तेषां भेदाः तदलङ्कारसङ्कररूपाः तेषामानन्त्यात् त्रिप्रकारतैवेति भावः। नवमदशमोल्लाससमर्दितं चरमप्रकरणार्थमुपसंहरति **इति प्रतिपादिता इति**।

सारबोधिनी—तृतीयसंकरमाह **स्फुटमिति**। स्फुटमित्यनेनास्फुटालङ्कारद्वयसंसर्गश्चमत्काराधायकतया नालङ्कारत्वमर्हतीत्युक्तम्। व्यवस्थामवस्थितिम्। **स्पष्टेति**। अत्र दिवसारविन्दं कर्तृ।

कुतः पुनरेष नियमो यदेतेषां तुल्येऽपि काव्यशोभातिशयहेतुत्वे कश्चिदलङ्कारः शब्दस्य कश्चिदर्थस्य कश्चिच्चोभयस्य, इति चेत् उक्तमत्र यथा काव्ये दोषगुणालङ्काराणां शब्दार्थोभयगतत्वेन व्यवस्थायामन्वयव्यतिरेकावेव प्रभवतः, निमित्तान्तरस्याभावात् ततश्च योऽलङ्कारो यदीयान्वयव्यतिरेकावनुविधत्ते स तदलङ्कारो व्यवस्थाप्यते, इति।

बालचित्तानुरञ्जनी—अलङ्काराणां शब्दार्थनैयत्यान्वयव्यतिरेकाभ्यां प्रतिसमाधातुमाक्षिपते कुत इति। प्रतिष्ठितो नियमः प्रतिनियमः। आश्रयाश्रयिभावः स्वीकारश्चेदगम्यत इति भावः। समाधत्ते **उक्तमत्रे**ति। प्रागप्युक्तप्रायमेतत् प्रतिपत्तिसौकर्यार्थं प्रपञ्चयत इत्यर्थः। शाब्दः, आर्थः उभयिक इति। अलङ्कारविवेके प्रमाणमन्वयव्यतिरेकावित्याह **यदीयेति**।

सारबोधिनी--उक्तमत्रेति। श्लेषालङ्कारप्रकरणे नवमोल्लासे इत्यर्थः। यथेति क्षणदाऽसावक्षणदेत्यादौ। शब्दशक्तिमूलविरोधालङ्काराङ्गभूतार्थान्तरन्यासेति सकलकलं पुरमेतदित्यादिस्थलीयशब्दसाम्यनिबन्धनोपमादयोऽपि द्रष्टव्याः।

एवं च यथा पुनरुक्तवदाभासः परम्परितरूपकं चोभयोर्भावाभावानुविधायितया, उभयालंकारौ तथा शब्दहेतुकार्थान्तरन्यासप्रभृतोऽपि द्रष्टव्याः। अर्थस्य तु तत्र वैचित्र्यम् उत्कटतया प्रतिभासते, इति वाच्यालंकारमध्ये वस्तुस्थितिमनपेक्ष्यैव लक्षिताः।

योऽलंकारो यदाश्रितः स तदलंकार इत्यपि कल्पनायाम् अन्वयव्यतिरेकावेव समाश्रयितव्यौ। तदाश्रयणमन्तरेण विशिष्टस्याश्रयाश्रयिभावस्याभावादित्यलंकाराणां यथोक्तनिमित्त एव परस्परव्यतिरेको ज्यायान्।

बालचित्तानुरञ्जनी—फलितमाह **एवंचेति**। उभयालङ्कारान् दर्शयति **यथेति**। एवमेवान्यानुभयालङ्कारानाह तथेति। नन्वर्थान्तरन्यासादयो यद्युभयालंकाराः तर्हि तेऽर्थालङ्कारेषु कथं लक्षिता इत्याशङ्क्याह **अर्थस्य त्विति**। वाच्यालङ्कारः अर्थालङ्कारः। तर्हि कथं विवेकत्वमार्गः तत्राह **वस्त्विति**। तदनुसारेण पुनः पुनरुभयिका एवेति भावः। आश्रयाश्रयिभावेन शब्दार्थोभयालङ्कारस्य व्यवस्था न तु अन्वयव्यतिरेकाभ्यामित्यलङ्कारसर्वस्वकारादीनां मतं दूषयितुमनुवदति **योऽलङ्कार इति**। आश्रयाश्रयिभावस्याव्यभिचारे प्रमाणमन्वेषणीयम्। तच्चान्वयव्यतिरेकरूपमेव प्रमाणमङ्गीकर्तव्यमिति भावः। विशिष्टस्य व्यवस्थितरूपस्य यथोक्तावन्वयव्यतिरेकौ निमित्तं यस्येति विग्रहः।

सारबोधिनी--ननूभयालङ्कारत्वे तेषां प्राथम्यात् शब्दालङ्कारमध्ये गणनमनुचितमिति। **अत एवाह अर्थस्येति**। अत एव शब्दवैचित्र्यमुत्कण्ठमनुभवसिद्धं स पुनरुक्तवदाभासः शब्दालङ्कारमध्य एव गणितः। **वस्तुस्थितिमिति**। उपमालङ्कारत्वमविवक्षितमित्यर्थः, वस्तुगत्या पुनरुपमालङ्कार एवेति भावः। उद्भटाचार्यमतेऽप्येवमिति दर्शयति **योऽलङ्कार इति**। आश्रयाश्रयिभावस्योत्पत्त्यनन्तरमधिकस्येति शेषः। **व्यतिरेक इति**। भेद इत्यर्थः।

एषां दोषा यथायोगं संभवन्तोऽपि केचन ।

उक्तेष्वन्तर्भवन्तीति न पृथक् प्रतिपादिताः ।।१४२।।

तथाहि——अनुप्रासस्य प्रसिद्ध्यभावो वैफल्यं वृत्तिविरोध इति ये त्रयो दोषाः ते प्रसिद्धिविरुद्धताम्, अपुष्टार्थत्वम्, प्रतिकूलवर्णतां च यथाक्रमं न व्यतिक्रामन्ति तत्स्वभावत्वात् । क्रमेणोदाहरणम्

चक्री चक्रारपङ्क्तिं हरिरपि च हरीन् धूर्जटिर्धूर्ध्वजाग्रा—
नक्षं नक्षत्रनाथोऽरुणमपि वरुणः कूबराग्रं कुबेरः ।
रंहः संघः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य
स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरुचेः सोऽवतात् स्यन्दनो वः ।।५८०।।

अत्र कर्तृकर्मप्रतिनियमेन स्तुतिः, अनुप्रासानुरोधेनैव कृता न पुराणेतिहासादिषु तथा प्रतीतेति प्रसिद्धिविरोधः ।

बालचित्तानुरञ्जनी——एषामलङ्काराणां दोषाः उक्तेष्वेव दोषेष्वन्तर्भूतत्वात् पृथक् नोच्यन्त इत्याह **एषामिति** । तत्रादौ शब्दालङ्कारेषु अनुप्रासदोषान् आद्योक्तेषु दोषेष्वन्तर्भावयति **अनुप्रासस्येति** । अनर्थाः दोषाः । तत्र प्रसिद्ध्यभावः प्रसिद्धिविरोधेऽन्तर्भवति । वैफल्यमपुष्टार्थतायां वृत्तिविरोधो वर्णप्रातिकूल्य इत्यर्थः । तन्मूलत्वात् तेषां प्रसिद्ध्यभावादीनां प्रसिद्धिविरोधिलक्षणत्वादित्यर्थः । आद्यमुदाहरति **चक्रीति** । जगदुपकृतये ये नित्ययुक्तस्य अहिमरुचः सूर्यस्य, यस्य स्यन्दनस्य चक्रारपङ्क्तिं चक्रीं स्तौति । हरिरिन्द्रोऽपि हरीनश्वान् स्तौति । धूर्जटिः शिवः, धूः अङ्गविशेषः, तद्ध्वजान् स्तौति । नक्षत्रनाथश्चन्द्रोऽपि अरुणमनूरुं स्तौति । कुबेरः कूबराग्रं स्तौति । प्रसन्नः सः स्यन्दनः, वः अवतात् । अत्र स्तुतौ स्तुत्यव्यत्यासेऽपि न किञ्चिदनौचित्यम् अन्यत्र कवेरनुप्रासकुतूहलभङ्गादित्याह **अत्रेति** । चक्री कर्ता चक्रारपंक्तिमेव कर्मभूतां स्तौति नान्यत इत्येवंरूपेण स्तुतिरनुप्रासानुरोधेनैव कृता । न पुराणाद्यनुरोधात्, नाप्यर्थौचित्यादतः प्रसिद्धिविरोधो दोष इत्यर्थः ।

सारबोधिनी——स्वग्रन्थस्य न्यूनतां परिहरति **एषामिति** । **वैफल्यमिति** । चमत्काराप्रयोजकत्वमित्यर्थः । **वृत्तीति** । उपनागरिकादिवृत्तिविरोधः इत्यर्थः । माधुर्यव्यञ्जकवृत्तौ शब्दत एव टवर्गपर्युदासात् । एवमोजोव्यञ्जकवृत्तावपि उद्धतगुम्फविधानमुखेन शिथिलबन्धस्यार्थतः पर्युदासादिति भावः । **चक्रीति** । अहिमरुचः सूर्यस्य, सं स्यन्दनः वः अवतात् इत्यन्वयः । चक्रे अराश्चक्रारास्तेषां पंक्ति कीलपंक्तिमित्यर्थः । **धूरिति** । धूः स्त्री क्लीबे यानमुखमित्यमरः ।

अक्षं चक्रं, नक्षत्रनाथश्चन्द्रः, अरुणं सारथिं, कूबराग्रं युगंधराग्रं, रंहो वेगः, संघः समूहः ।

भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि ।
यदि सल्लीलोल्लापिनि गच्छसि तत् किं त्वदीयं मे ॥५८१॥
अनणुरणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम् ।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते ॥५८२॥

अत्र वाच्यस्य विचिन्त्यमानं न किञ्चिदपि चारुत्वं प्रतीयते इत्यपुष्टार्थतैवानुप्रासस्य वैफल्यम् ।

बालचित्तानुरञ्जनी—द्वितीयमुदाहरति **भणेति** । आनन्दस्यन्दिसुन्दरेन्दुमुखि सल्लीलोल्लापिनि, तरुणि यदि मे रमणमन्दिरं रतिवेश्म गच्छसि तर्हि अनणुरणन्मणिमेखलं अविरतशिञ्जानमञ्जुमञ्जीरम्, ते परिसरणं अकारणं रणरणकं, किं कुरुते ? अत्र यदनुप्रासस्य वैफल्यं तदर्थस्यापरिपोषेऽपि भविष्यति । तादृगनुप्रासप्रसाधितवाचकानीव वाच्यस्य तद्द्वारा वाक्याधीनत्वम् । परस्य वाच्यासिद्धेरित्याह **वाच्यस्येति** ।

सारबोधिनी—**भण तरुणीति** । हे तरुणि यदि रमणमन्दिरं गच्छसि तत् किं त्वदीयं परिसरणं, रणरणकं कुरुते इत्यन्वयः । रमणमन्दिरं आनन्दस्यन्दी सुन्दरः इन्दुः, स एव मुखं यस्याः सती लीला उल्लासयितु शीलं यस्याः । क्वचिदुल्लासयतीति पाठे तत्र सतीभिर्लीलाभिरुल्लपितुं वक्तुं शीलं यस्याः इत्यर्थः ।

अनणुरणन्मणिमेखलमिति अविरतसिञ्जानमञ्जुमञ्जीरमिति च द्वयं परिसरणविशेषणम् । शिञ्जानानां शब्दायमानंभूषणानां च शिञ्जितमिति कोशात् । रणरणकं चिन्ता । अत्र **वाच्यस्येति** । क्रीडागृहं यदि गच्छसि तदा किमित्यकारणं मम चिन्तां कुरुते । तव गमनमिति वाक्यार्थे वैचित्र्याभावस्यानुभविकत्वेन केवलं शब्दमात्रपर्याप्तोऽनुप्रासः इत्यर्थापरिपोषादपुष्टार्थतेत्यर्थः । तथा च शब्दालङ्कारत्वेऽप्यनुप्रासादीनामर्थोपकारकत्वेनावश्यं भवितव्यमिति भावः । न हि शब्दालङ्काराणां सर्वथा अर्थं पुरस्कृत्यैव रसोपकारकत्वं परम्परासंबन्धेन शब्दवदर्थस्यापि घटकत्वात् । परन्तु शब्दान्वयव्यतिरेकानुविधायित्वात् 'प्राधान्येन व्यपदेश' इति न्यायात् तदीयत्वेन व्यपदेश इति । न तु सर्वथार्थनिपेक्षता । तदुक्तम् 'यदर्थान्तरयुक्' तथेति । एवञ्चार्थोपकारकत्वरूपद्वारबाधात् प्रकृतानुप्रासस्य चमत्कारानुपयोगित्वमेवेति दिक् ।

अकुण्ठोत्कण्ठया इति । अत्र शृङ्गारे परुषवर्णाडम्बरः पूर्वोक्तरीत्या विरुध्यते इति परुषानुप्रासोऽत्र प्रतिकूलवर्णतेव वृत्तिविरोधः ।

यमकस्य पादत्रयगतत्वेन यमगमप्रयुक्तत्वं दोषः । यथा

भुजङ्गमस्येव मणिः सदम्भा ग्राहावकीर्णेव नदी सदम्भाः ।
दुरन्ततां निर्णयतोऽपि जन्तोः कर्षन्ति चेतः प्रसभं सदम्भाः ॥५८३॥

उपमायाम् उपमानस्य जातिप्रमाणगतन्यूनत्वम् । अधिकता वा तादृशी अनुचितार्थत्वं दोषः ।

धर्माश्रये तु न्यूनाधिकत्वे यथाक्रमं हीनपदत्वमधिकपदत्वं च न व्यभिचरतः । क्रमेणोदाहरणम्

चण्डालैरिव युष्माभिः साहसं परमं कृतम् ॥५८४॥

वह्निस्फुलिङ्ग इव भानुरयं चकास्ति ॥५८५॥

अयं पद्मासनासीनश्चक्रवाको विराजते ।
युगादौ भगवान् वेधा विनिर्मित्सुरिव प्रजाः ॥५८६॥

पातालमिव ते नाभिः स्तनौ क्षितिधरोपमौ ।
वेणीदण्डः पुनरयं कालिन्दीपातसंनिभः ॥५८७॥

अत्र चण्डालादिभिरुपमानैः प्रस्तुतोऽर्थोऽत्यर्थमेव कदर्थित इत्यनुचितार्थता ।

बालचित्तानुरञ्जनी—तृतीयमुदाहरति **अकुण्ठेति** । अकुण्ठोत्कण्ठया आकण्ठं पूर्णया हे कलकण्ठि तीक्ष्णं कुरु । कण्ठार्तिमुद्धर । अत्रोपनागरिकां विमुच्य परुषाया अङ्गीकारात् यो वृत्तिविरोधः तं वर्णयति । तुल्यान्तान्नातिरिच्यत इत्याह **शृङ्गार इति** । यमकविषयं दोषमप्रयुक्तमेतदविषयि । **यमकस्येति** । उदाहरति **यथेति** । सदं सदा भाः कान्तिर्यस्याः सा, भुजङ्गमस्य मणिरिव, ग्राहैः जलग्राहैः, अवकीर्णा व्याप्ता सत् अम्भो यस्याः सा मदीयप्रमुखे आदौ दम्भेन सह वर्तन्त इति ते सदम्भाः खलाः, दुरन्ततां निर्णयतोऽपि जन्तोश्चित्तं कर्षन्ति । पादद्वये पादचतुष्टये क्वचिदेक उपादेययमकस्य प्रयोगाः ।

पादत्रयगतत्वमप्रयुक्तान्नान्यद्दूषणमित्यर्थः । लिङ्गवचनभेदलक्षणाद्युपमादोषा अप्यत्र संभवन्तीति मत्वाऽर्थालङ्कारेषु भट्टवामनाद्युदाहृतानुपमादोषानत्र सङ्क्रामयति **उपमायामिति**। जातिः ब्राह्मणत्वम् । प्रमाणं वैशिष्ट्यम् । तद्गतन्यूनत्वमधिकता । तादृशी अनुचितार्थान्निष्टदोषादित्यर्थः । उपमानस्य धर्मः साधारणः । तद्गतन्यूनत्वमाधिक्यं पृथग्दोषतयाऽन्यैरभिमन्यमानं क्रमेण न्यूनपदत्वमधिकपदत्वं च न व्यभिचरतः । किन्तु तददन्तः तु प्रविशत इत्याह **धर्माश्रये त्विति** । जातिन्यूनत्वमुदाहरति **चण्डालैरिति** । युष्मद्दत्ति सन्तापानि [?] पुरुषान् प्रति चण्डालानामुपमानीकरणे जातिन्यूनत्वम् । परिमाणन्यूनत्वमुदाहरति **वह्नीति** । भगवतःसहस्रधाम्नो ज्वलनस्फुलिङ्गलक्षणमुपमानं परिमाणन्यूनम् । जात्यधिकमुदाहरति **अयमिति** । चक्रवाको भगवान् पितामहो जात्यधिकमुपमानम् । परिमाणाधिकमुदाहरति **पातालमिति** । अत्र नायिकायाः नाभिस्तनबेणीदण्डानां पातालक्षितिधरकालिन्दीप्रवाहाः परिमाणाधिकाः ।

सारबोधिनी —भुजङ्गमस्येति । सदम्भाः दम्भयुक्ताः खलाः, स्वीयां दुरन्ततां तां निश्चिन्वतोऽपि जन्तोः चेतः प्रमुखे आपाततः कर्षन्तीत्यन्वयः । **सदम्भा इति** । सदम्भमिति सदेत्यर्थेऽव्ययम् सदा द्युतिरित्यर्थः । यदा अम्भस्तेजः । अत एव शस्त्रस्फटिकादौ सपानीयमिति व्यवहारः परीक्षकाणाम् । तथा च विद्यमानतेजा इत्यर्थः । सत् अम्भो यस्याः सा सदम्भा इति नदीविशेषणम् । **उपमायामिति** । न्यूनत्वमधिकत्वं वा यत्रेति शेषः ।

धर्माश्रये त्विति । तुः समुच्चयार्थः । धर्मः साधारणो धर्मः आश्रयो ययोस्तथा । साधारणधर्माश्रिते न्यूनाधिके इत्यर्थः । उपमानस्य न्यूनधर्मत्वमधिकधर्मत्वं चेति फलितार्थः । **चण्डालैरिति** जातिन्यूनोदाहरणम् । **वह्नीति** । परिमाणे न्यूनोदाहरणम् । **अयमिति** जात्यधिकोदाहरणम् । कल्पभेदेन ब्रह्मभेदात् ब्रह्मत्वस्य जातित्वात् । पातालमिवेति परिमाणाधिक्योदाहरणम् । **अत्रेति** । यद्यपि चण्डालादेन्यूनत्वेनोपमेयस्य कदर्थनेऽपि ब्रह्मादिभिरुपमानैर्न तथा भवितुमर्हति तथाप्यत्यन्तोत्कृष्टस्योपमानीकरणमपकृष्टस्योपमेयस्योपहास एव पर्यवस्यतीति तथोक्तमिति भावः ।

स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन् ।
व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान् ॥५८८॥

अत्रोपमानस्य मौञ्जीस्थानीयस्तडिल्लक्षणो धर्मः केनापि पदेन न प्रतिपादित इति हीनपदत्वम् ।

स पीतवासाः प्रगृहीतशाङ्गो मनोज्ञभीमं वपुराप कृष्णः ।
शतह्रदेन्द्रायुधवान्निशायां संसृज्यमानः शशिनेव मेघः ॥५८९॥

अत्रोपमेयस्य शङ्खादेरनिर्देशे शशिनो ग्रहणमतिरिच्यते इत्यधिकपदत्वम् ।

लिङ्गवचनभेदोऽपि उपमानोपमेययोः साधारणं चेत् धर्ममन्यरूपं कुर्यात् । तदा एकतरस्यैव तद्धर्मसमन्वयावगतेः सविशेषणस्यैव तस्योपमानत्वमुपमेयत्वं वा प्रतीयमानेन धर्मेण प्रतीयत इति प्रक्रान्तस्यार्थस्य स्फुटमनिर्वाहादस्य भग्नप्रक्रमरूपत्वम् ।

बालचित्तानुरञ्जनी—धर्माश्रयन्यूनत्वमुदाहरति **स इति** । अत्र मौञ्जीलाञ्छितस्य कृष्णाजिनधारिणो मुनेः उपमेयस्य नीलजीमूतभागाश्लेषिणि सूर्ये उपमाने मौञ्जीसदृशविद्युतो नोक्तिरस्तीति धर्मन्यूनत्वमित्याह **अत्रेति** । धर्माश्रयाधिक्यमुदाहरति **स पीतेति** । पीतवाससः शार्ङ्गधरस्य चोपमेयीकरणे शतह्रदेन्द्रायुधत्वमत्र समुचितं न पुनः शशिनो ग्रहणं पाञ्चजन्यानिर्देशात् । अतो धर्माधिक्यमित्याह **अत्रेति** । इदानीं लिङ्गवचनभेदरचनादयो दोषाः क्रमभङ्गेऽन्तर्भवन्तीत्याह **लिङ्गवचनेति** । लिङ्गभेदेन वचनभेदेन वा अन्यरूपमित्यर्थः । **सविशेषणस्यैवेति** । वाक्ष्यमाणच्युतादिविशेषणकस्येत्यर्थः ।

सारबोधिनी—न्यूनधर्मत्वमुदाहरति **समुनिरिति** । **स पीतवासा इति** । अनयोः उपमानन्यूनाधिकधर्मत्वम् उपमेयाधिकन्यूनधर्मत्वेऽपि संभवत इति बोध्यम् । अत एव धर्माश्रये तु न्यूनाधिकत्व इति प्रतिज्ञायां उपमानोपमेयनियमो नोक्त इति **अन्यरूपमिति** । असाधारणरूपमित्यर्थः । **तदा एकतरस्येति** । असाधारणत्वादेवोभयत्र नान्वय इत्यर्थः । **सविशेषणेति** । यदोपमानान्वितं विशेषणं तदा विशिष्टस्योपमानता, यदोपमेयान्वितं विशेषणं तदा विशिष्टस्योपमेयतेत्यर्थः ।

यथा

चिन्तारत्नमिव च्युतोऽसि करतो धिङ्मन्दभाग्यस्य मे ॥५९०॥

सक्तवो भक्षिता देव शुद्धाः कुलवधूरिव ॥५९१॥

यत्र तु नानात्वेऽपि लिङ्गवचनयोः सामान्याभिधायि पदं स्वरूपभेदं नापद्यते न तत्रैतद्दूषणावतारः उभयथापि अस्य अनुगमक्षमस्वभावत्वात् । यथा

गुणैरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः ॥५९२॥

तद्वेषोऽसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः ।
दधते स्म परां शोभां तदीया विभ्रमा इव ॥५९३॥

कालपुरुषविध्यादिभेदेऽपि न तथा प्रतीतिरस्खलितरूपतया विश्रान्तिमासादयतीत्यसावपि भग्नप्रक्रमतयैव व्याप्तः । यथा

अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमुद्वती ।

पश्चिमाद् यामिनीयामात् प्रसादमिव चेतना ॥५६४॥

अत्र चेतना प्रसादमाप्नोति न पुनरापेति कालभेदः ।

बालचित्तानुरञ्जनी—चिन्तेति । अत्रोपमेये पुंसि च्युत इति उपमाने चिन्तारत्ने च्युतमिति । लिङ्गविकारेण स्निग्धस्य रक्तस्य वा कस्यचिदेव च्यवनलक्षणधर्मसमवायगते च्युतत्वरूपविशेषण-शून्यस्योपमानत्वमुपमेयत्वं वा न घटत इति तस्य उभयशब्दत्वेन भाव्यम् । तद्वत् क्वचिदुच्यते, पुंसि-चिन्तारत्ने तु केवलं प्रतीयत इति लिङ्गवैषम्यं यत् तत् क्रमभङ्गेऽन्तर्भवतीति भावः । तनुदाहरति **सक्तव इति** । अत्रोपमेयेषु सक्तुषु शुद्धा इति बहुवचनं उपमाने कुलवध्वां शुद्धेति एकवचनमिति वचन-वैकृतेन सक्तूनां कुलवध्वाः कस्यचिदेव शुद्धिलक्षणधर्मसमन्वयावगाहः, शुद्धस्वरूपविशेषणशून्यस्योपमेय-त्वमुपमानत्वं वा न घटत इति तस्योभयत्रान्वयेन भाव्यम् । तद्वत् क्वचिदुच्यते । सा कुलवध्वा तु प्रतीतिपरिस्खलनात् वचनभेदात् क्रमभङ्ग एवान्तर्भवतीति भावः । असाधारणभेदस्यान्यथाकरणे निर्दोषत्वमाह **यत्र त्विति** । उपमानोपमेययोरवैषम्यप्रतीत्या प्रवर्तमानत्वादिति हेतुमाह **उभयथेति** । **उदाहरति यथेति** । अत्र गुणानां रत्नानां च तत्त्वतो लिङ्गभेदेऽपि तृतीयान्ततया तिरोधानात् लिङ्ग-भेदरूपः प्रक्रमभङ्गेऽन्तर्भवतीति भावः । वचनभेदस्यादोषत्वमुदाहरति **तद्वेष इति** । तस्याः वेषः आकारः असदृश इति कञ्प्रत्ययान्तमेकवचनम्, क्विप्प्रत्ययान्तं बहुवचनं मधुरतरतया भृतः युक्त इत्येकवचनान्तं, मधुररतां बिभ्रतीति बहुचनम् । दध धारण इत्यस्मात् एकवचनं दधत इति दधातेर्बहुवचनं बिभ्राणं वचन-भेदेऽपि श्लेषबलात् प्रतीतिरस्थगितेति तद्भेदरूपो न प्रक्रमभङ्ग इति भावः । अन्यानप्युपमादोषान् प्रक्रमभंगेऽन्तर्भावयति **कालेति** । आदिशब्दादामन्त्रणकालभेदमुदाहरति । **यथेति** । सर्वेषां चेतना अद्यापि प्रसादमाप्नोतीति वर्तमानकाल एव न्याय्यः कालभेद इत्याह **अत्रेति** ।

सारबोधिनी—ननूपात्तधर्मस्य विशेषनिष्ठत्वे साधारणधर्माभावात् कथमुपमानिर्वाह इति, अत आह प्रतीयमानेनेति । शब्दोपस्थापितस्य विशेषनिष्ठत्वेऽपि प्रतीयमानेनैव साधारणधर्मोपमा-निर्वाह इत्यर्थः । अपिशब्दात् शब्दान्तरोपस्थापितेनाऽपीति समुच्चीयते । **चिन्तारत्नमिति** । अत्र च्युतत्वाख्यः साधारणो धर्मः पुलिङ्गावरुद्धे उपमेयमात्रे अन्वेति न तु विरुद्धलिङ्गावरुद्धे उपमान इति । विशिष्टाविशिष्टयोरुपमेयोपमानत्वप्रतीतेर्भग्नप्रक्रमत्वम् । **सक्तव इति** । अत्र शुद्धत्वं साधारणो धर्मो बहुत्वावरुद्धेषु सक्तुषु उपमेयेष्वेवान्वेति, न तु विरुद्धसंख्यावरुद्धे वधूरूप उपमान इति विशिष्टा-विशिष्टयोरुपमेयोपमानत्वात् भग्नप्रक्रमत्वम् ।

यत्रत्विति । यत्र लिङ्गयोर्वचनयोर्वा नानात्वेऽपि साधारणधर्माभिधायि पदं स्वरूपभेदमानुपूर्वीभेदं नापद्यते । तत्र नैतद्दूषणमित्यर्थः । समानानुपूर्वीदर्शनेन युगपदेवोपमेयोपमानोयोपस्थितेरिति भावः । **गुणै-रिति** । अत्रोपमेयोपमानवाचकयोर्गुणरत्नशब्दयोर्लिङ्गभेदेऽपि अनर्घ्यैरिति,गुणरत्नसाधारणधर्माभिधायिपदस्य, तृतीयाबहुचनान्तस्योभयलिङ्गे तुल्यरूपत्वान्न दोषः । **तद्वेष इति** । अन्याभिरसदृशः अन्यासां वेषैरसदृश-स्तद्वेष इत्युपमेयम् । विभ्रमा इत्युपमानम् । असदृश इति, मधुरताभृत इति, दधत इति साधारण-

धर्माभिधायिनि पदान्युभयत्रापि अन्वितानि । तत्र वचनभेदेऽपि रूपसाम्यान्न दोषः । **अत्रासदृश इति** अजन्तत्वे एकवचनान्तम्, हलन्तत्वे बहुवचनान्तम् । एवं मधुरताभृत इत्याद्यपि, दधत इति दध धारणे इत्यस्य, दधातेश्च यथाक्रममात्मनेपदैकवचनबहुवचनयोरपि रूपम् । **कालेति** । कालो वर्तमानादिः । पुरुषः प्रथममध्यमोत्तमरूपः । विधिरप्रवृत्तप्रवर्ता । आदिपदान्निवर्तनम् । विश्रान्ति चमत्कारम् । **अतिथिमिति** । प्रसादं वैमल्यम् ।

प्रत्यग्रमज्जनविशेषविविक्तमूर्तिः
कौसुम्भरागरुचिरस्फुरदंशुकान्ता ।
विभ्राजसे मकरकेतनमर्चयन्ती
बालप्रबालविटपप्रभवा लतेव ॥५६५॥

अत्र लता विभ्राजते न तु विभ्राजसे इति संबोध्यमाननिष्ठस्य परभागस्य असंबोध्यमानविषयतया व्यत्यासात् पुरुषभेदः ।

गङ्गेव प्रवहतु ते सदैव कीर्तिः ॥५६६॥

इत्यादौ च गङ्गा प्रवहति न तु प्रवहतु इति अप्रवृत्तप्रवर्तनात्मनो विधेः । एवं-जातीयकस्यान्यस्यार्थस्योपमानगतस्यासंभवात् विध्यादिभेदः ।

ननु समानं उच्चारितं प्रतीयमानं वा धर्मान्तरमुपादाय पर्यवसितायामुपमायामुप-मेयस्य प्रकृतधर्माभिसंबन्धान्न कश्चित् कालादिभेदोऽस्ति ।

यत्राप्युपात्तेनैव सामान्यधर्मेण उपमा अवगम्यते यथा "युधिष्ठिर इवायं सत्यं वदति" इति तत्र युधिष्ठिर इव सत्यवाद्ययं सत्यं वदतीति प्रतिपत्स्यामहे । सत्यवादी सत्यं वदतीति च न पौनरुक्त्यम् आशङ्कनीयं रैपोषं पुष्णातीतिवत् युधिष्ठिर इव सत्य-वदनेन सत्यवाद्ययमित्यर्थावगमात् ।

सत्यमेतत्—किन्तु स्थितेषु प्रयोगेषु समर्थनमिदं न तु सर्वथा निरवद्यम्, प्रस्तुत-वस्तुप्रतीतिव्याघातादिति सचेतस एवात्र प्रमाणम् ।

असादृश्यासंभवाप्युपमायाम् अनुचितार्थतायामेव पर्यवस्यतः ।

यथा

ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम् ।।५९७।।

अत्र काव्यस्य शशिना अर्थानां च रश्मिभिः साधर्म्यं कुत्रापि न प्रतीतमित्यनुचितार्थत्वम् ।

निपेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः ।
जाज्वल्यमाना इव वारिधारा दिनार्धभाजः परिवेषिणोऽर्कात् ।।

अत्रापि ज्वलन्त्योऽम्बुधाराः सूर्यमण्डलात् निष्पतन्त्यो न संभवन्तीत्युपनिबध्यमानोऽर्थोऽनौचित्यमेव पुष्णाति ।

उत्प्रेक्षायामपि संभावनं ध्रुवेवादय एव शब्दा वक्तुं सहन्ते न यथाशब्दोऽपि केवलस्यास्य साधर्म्यमेव प्रतिपादयितुं पर्याप्तत्वात् तस्य चास्यामविवक्षितत्वादिति तत्राशक्तिरस्यावाचकत्वं दोषः ।

उद्ययौ दीर्घिकागर्भान्मुकुलं मेचकोत्पलम् ।
नारीलोचनचातुर्यशङ्कासङ्कुचितं यथा ।।५९९।।

बालचित्तानुरञ्जनी—विधिभेदमुदाहरति **गङ्गेति** । गङ्गा प्रवहत्विति लोडन्त एव भवतु को दोष इत्याह **अप्रवृत्तेति** । अप्रवृत्तप्रवर्तनात्मा विधिः, विधिरित्यन्तमप्राप्त इत्युक्तत्वात् गङ्गायां न संभवति नित्यप्राप्तत्वात्तस्याः । एवं च कालपुरुषविध्यादीनामुपमेये केवलमौचित्यं नोपमान इति तद्भेदस्य प्रक्रमभङ्गेऽन्तर्भाव इति भावः । ननु सर्वोऽपि सर्गबन्धादिव्यवहारः उक्तः अन्तः स्यादिति आलङ्कारिकं प्रति कश्चिदाक्षिपति **नन्विति** । साक्षादुच्चरितस्य प्रतीयमानस्य वा धर्मस्य न वैषम्यं तन्मात्रोपादानेऽपि उपमायाः प्रसर्पणात् तत् सामान्येनोपमायां परिपूर्णायां यथोचितकालान्वय इति कोऽयं कालभेद इत्याक्षेपार्थः । साक्षादुच्चरितेऽपि धर्मे तदभिसंबन्ध्युपमेये पाक्षिक संबन्धः लक्षणा । यत्र भेदादेवेति सर्वत्रोपमायाः स्वभाव इत्याह **यत्रापीति** । उपात्तेन साक्षादुच्चरितेन युधिष्ठिर इवायं पुरुषः सत्यं वदतीत्यत्रापि प्रयत्नबलात् सत्यवादीव सत्यं वदतीत्यर्थः पर्यवस्यति । सामान्यविशेषभावसंमिश्रोऽयमन्वयः उपमायां सार्वत्रिक इति प्रतिपत्स्यामहे इति प्रयत्नभेदमवलम्बमाना तस्मात् प्रतिकालादिभेदोद्भावनौचित्यमिति भावः । सत्यं वादी सत्यं वदतीति पौनरुक्त्यमित्याशङ्क्याह **सत्येति** । अर्थाङ्गीकारेण परिहरति **सत्यमिति** । यद्यपि चिरन्तनप्रयोगेषु कालभेदादि दृश्यते तथापि तन्मात्रमेव समर्थनीयम् न तु तद्वदन्येन प्रयोक्तव्यम् प्रस्तुतप्रतीतिविधानात् । तथा चोक्तम्

पूर्वे विशृङ्खलगिरः कवयः प्राप्तकीर्तयः ।
तत्समाश्रित्य न त्याज्या इतरेषां मनीषिणाम् ।। इति ।

दोष। इति शेषः । इति परिहारग्रन्थः । असादृश्यमसंभवश्चेति उपमादोषावनुचितार्थतायामन्तर्भूतावित्याह **असादृश्येति** । असादृश्यमुदाहरति **यथेति** । असादृश्यस्यानुचितार्थत्वमाह **अत्रेति**। ननु अर्था रश्मय इव प्रीतिदायिन इति साधर्म्यसिद्धेः काव्यशशिनोरपि सिद्धिरिति चेन्मैवम् इतरेतराश्रयपराहतत्वात् । तथा च वामनः "तदेवमितरेतराश्रयदोषो दुरुत्तरं" इति ।

असंभवमुदाहरति **निपेतुरिति** । तादृशी वारिधारा उपमानतया नोपपद्यत इत्यनुचितार्थत्वं दोष इत्याह **अत्रापीति** । उत्प्रेक्षादोषमप्यवाचकत्वेऽन्तर्भावयति **उत्प्रेक्षायामपीति** । इवादय इव यथाशब्दोऽपि संभावनाया द्योतयितुमपक्रतम्[?] तस्य तथा शक्त्यभावात् । क्वचित् समर्थस्यापि मन्ये शङ्के इत्यादेरुपमायामसामर्थ्यं केवलस्य समासरहितस्येत्यर्थः । अस्यामित्युत्प्रेक्षायाम् । सामर्थ्यप्रतिपादने **शक्तिः** सामर्थ्यमत्रेत्युत्प्रेक्षायां अवाचकत्वं दोषः । इव शब्दस्य साधर्म्यसंभावनां च प्रकटयितुं पाटवमस्ति यथाशब्दस्य तु साधर्म्यमेवेति भावः । उत्प्रेक्षादोषमुदाहरति **यथेति** । नारीलोचनचातुर्यशङ्कासङ्कुचितं ध्रुवमित्युक्तः पाठः ।

सारबोधिनी--प्रत्यग्रेति । मज्जनं स्नानं आसेचनं च । स्फुरन्नंशुकस्यान्तो यस्याः स्फुरद्भिरंशुभिः कान्तिभिर्वा कान्ता विविक्तमूर्तिः शुद्धमूर्तिः बालप्रवालानामेव किसलयं यस्यैवंभूतो यो विटपस्तदुत्पत्तिस्थानमित्यर्थः । अत्र लतेत्यचेतनत्वेन लतायाः संबोध्याभावादिति भावः ।

विधिभेदं दर्शयति **गङ्गेति** । ननु प्रवहत्वित्यस्यैवोभयत्रान्वेतु इत्यत आह **नन्विति** । **विधेरिति** । आशीर्विहितस्य लोट्प्रत्ययस्यानागतेष्टार्थविषयत्वात् । कीर्तावेवान्वयो न गङ्गाप्रवहणे विद्यमाने । तथा च यथा गङ्गा प्रवहति तथा कीर्तिः प्रवहत्वित्यर्थे विधिभेदः । शङ्कते **नन्विति** । धर्मान्तरं कालाद्युपहितोपात्तभिन्नरूपम् । तत्र प्रत्यग्रेत्यत्र विविक्तत्वादिसाधारणधर्ममादाय नायिकालतिकयोरौपम्ये पर्यवसिते पश्चाद्विभ्राजस इति क्रियान्वयः । तेन क्रियाया एकमात्रान्वयात् कथं पुरुषभेदो दोष इत्यर्थः । अन्यत्राप्येवं विषये क्वचित् वाच्यं क्वचित् प्रतीयमानं समानधर्ममादायौपम्ये पर्यवसिते पश्चादुपमेयेन क्रियान्वयान्न पुरुषादिभेदः । ननु यत्र नास्ति समानधर्मान्तरमपि तु तिङन्तवाच्यमेवौपम्यघटकं यथा--युधिष्ठिर इवायं सत्यं वदतीत्यत्र, तत्र का गतिः ? युधिष्ठिरो हि सत्यमवादीन्न तु सत्यं वदति । तथा चात्र सत्यवादित्वमेव साधर्म्यंतश्च वस्तुगत्या भिन्नमेवेति कथमत्र पूर्वोक्तं समाधानमित्याह **यत्रेति** । **तत्रेति** । तथात्रापि प्रतीयमानेन सत्यवादित्वेन प्रथमं युधिष्ठिरसादृश्यं प्रतीयते ततः सत्याभिधानं विधीयते ।

युधिष्ठिर इव सत्यवादी अयं सत्यं वदतीति । न चैवं पौनरुक्त्यम् । आवश्यकादौ णिन्विधानात् । रैपोषं पुष्णातीतिवदयं युधिष्ठिर इव सत्यवादी तस्मात् सत्यं वदतीति समुदायार्थलाभात् अत्रापि न कालादिभेदः । **प्रस्तुतवस्त्विति** । एकरसप्रसूताया धियो भङ्गात् । अयमभिप्रायः । रैपोषं पुष्णातीति स्थले आनुशासनिकत्वेनानुप्रयोगस्य साधुत्वार्थमात्रता । प्रकृते चानुशासनाभावात् पौनरुक्त्यमेवेति । तदिदमुक्तं न तु सर्वथा निरवद्यम् । **किन्तु स्थितेष्विति** । स्थितेष्वनुप्रयोगेषु विद्यमानेष्वित्यर्थः ।

तथा चौपम्यप्रतीतौ कालादेरेकमात्रान्वयित्वादन्यत्र भङ्गेन भग्नप्रक्रमत्वानगायादिति । अनुचितार्थतायामिति । आपाततः, वस्तुतस्तु अप्रयुक्तत्वमेव दोषः ।

निपेतुरिति । दिनार्धभाजो मध्याह्नभाजः ।

उदयाविति । मुकुल मुकुलितम् । निरुपाख्यमलीकम् ।

उत्प्रेक्षितमपि तात्त्विकेन रूपेण परिवर्जितत्वात् निरुपाख्यप्रख्यम् तत्समर्थनाय यदर्थान्तरन्यासोपादानं तत् आलेख्यमिव गगनतलेऽत्यन्तमसमीचीनमिति निर्विषयत्वमेतस्य, अनुचितार्थतैव दोषः । यथा

दिवाकराद्रक्षति यो गुहासु लीनं दिवा भीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव ॥६००॥

अत्राचेतनस्य तमसो दिवाकरात् त्रास एव न सम्भवतीति कुत एव तत्प्रयोजितमद्रिणा परित्राणम् । संभावितेन तु रूपेण प्रतिभासमानस्यास्य न काचिदनुपपत्तिरवतरतीति व्यर्थ एव तत्समर्थनायां यत्नः ।

साधारणविशेषणवशादेव समासोक्तिरनुक्तमपि उपमानविशेषं प्रकाशयतीति तस्यात्र पुनरुपादाने प्रयोजनाभावात् अनुपादेयत्वं यत् तत् अपुष्टार्थत्वं पुनरुक्तं वा दोषः । यथा

स्पृशति तिग्मरुचौ ककुभः करैर्दयितयेव विजृम्भिततापया ।
अतनुमानपरिग्रहया स्थितं रुचिरया चिरयापि दिनश्रिया ॥६०१॥

अत्र तिग्मरुचेः ककुभां च यथा सदृशविशेषणवशेन व्यक्तिविशेषपरिग्रहेण च नायकतया नायिकात्वेन च व्यक्तिः, तथा ग्रीष्मदिवसश्रियोऽपि प्रतिनायिकात्वेन भविष्यतीति किं दयितयेति स्वशब्दोपादानेन ।

श्लेषोपमायास्तु स विषयः यत्रोपमानस्योपादानमन्तरेण साधारणेष्वपि विशेषणेषु न तथा प्रतीतिः । यथा

स्वयं च पल्लवाताम्रभास्वत्करविराजिता ।
प्रभातसंध्येवास्वापफललुब्धेहितप्रदा ॥६०२॥ इति ।

अप्रस्तुतप्रशंसायामपि उपमेयम् अनयैव रीत्या प्रतीतं न पुनः प्रयोगेण कदर्थतां नेयम् ।

यथा

आहूतेषु विहङ्गमेषु मशको नायान् पुरो वार्यते
मध्येवारिधि वा वसंस्तृणमणिर्धत्ते मणीनां रुचम् ।
खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
धिक् सामान्यमचेतनं प्रभुमिवानामृष्टतत्त्वान्तरम् ।।६०३।।

अत्राचेतनस्य प्रभोरप्रस्तुतविशिष्टसामान्यद्वारेणाभिव्यक्तौ न युक्तमेव पुनः कथनम् ।

तदेतेऽलङ्कारदोषाः यथासंभविनोऽन्येप्येवंजातीयकाः पूर्वोक्तयैव दोषजात्याऽन्तर्भाविताः, न पृथक् प्रतिपादनमर्हन्तीति संपूर्णमिदं काव्यलक्षणम् ।

इत्येष मार्गो विदुषां विभिन्नोऽप्यभिन्नरूपः प्रतिभासते यत् ।
न तद्विचित्रं यदमुत्र सम्यग्विनिर्मिता संघटनैव हेतुः ।।१।।

इति काव्यप्रकाशेऽर्थालङ्कारनिर्णयो नाम दशम उल्लासः ।।

समाप्तश्चायं काव्यप्रकाशः ।

बालचित्तानुरञ्जनी—इदानीमुत्प्रेक्षामूलस्यार्थान्तरन्यासस्यापि अनुचितार्थत्वमेवेत्याह उत्प्रेक्षितमिति । निरुपाख्यप्रख्यमित्यसत्यप्रायं तत्समर्थनाय उत्प्रेक्षितस्यार्थस्य समर्थनाय । गगनतल इति । समर्थनीयस्य वास्तवस्याभावादित्यर्थः । उदाहरति यथेति । अत्रासंभावनैकशरणत्वं परिपोषयति अत्राचेतनस्येति । तदेकशरणतायां नार्थान्तरन्यासापेक्षा निर्विषयत्वात् । एवञ्चोत्प्रेक्षैव दुर्लक्ष्येत्याह । संभावितेनेति । अथ समासोक्तावुपमानविशेषप्रकाशतेत्यवद्यमपुष्टार्थत्वं पुनरुक्तत्वं वा स्यादिति समर्थयति साधारणेति । एवकार उपमापेक्षामपहस्तयति । अनुक्तमपीति । तादृक्स्वभावत्वात् तस्याः । तस्योपमानस्य प्रयोजनाभावादपुष्टार्थता अनुपादेयत्वात् पौनरुक्त्यं वा दोष इत्यर्थः । उदाहरति यथेति । तिग्मरुचौ सूर्ये, करैः किरणैः, ककुभः दिशः, स्पृशति सति, दयितेव जृम्भिततापया अतनुमानपरिग्रहया रुचिरया चिरयाऽपि दिनश्रिया स्थितम्, करा रश्मयः पाणयोऽपि, अभिमानः मानं नाडिकाधिक्यम्[?] । अत्र समासोक्तेरपुष्टार्थत्वमाह अत्रेति । सदृशविशेषणमनुकूलविशेषणम् । रवौ करैः स्पृशतीति । दिनश्रिया विजृम्भिततापयेति विशेषणम् व्यक्तिविशेषेति । व्यक्तिर्लिङ्गं तिग्मरुचावित्यत्र पुंलिङ्गं, ककुभ इति दिनश्रियेति स्त्रीलिङ्गं, नायकतयेति । नायकश्च नायिका चेति पुमान्स्त्रियेति कृतैकशेषो नायकशब्दः । अन्यथा तिग्मरुचेः ककुभां च वक्तुमयुक्तत्वादतः किमिति कृतं अपुष्टार्थेन पुनरुक्तेन दयितयेति स्वशब्दप्रयोगेणेत्यर्थः । ननु

यथा-दयिते दयितां करैः स्पृशति दयितान्तरस्य तापो भवति- तथा रवौ- करैः ककुभः स्पृशति- तथा ग्रिष्म-समये दिनश्रियोपि ताप इति श्लेषोऽयमित्युपादेयमेव दयितेति पदमित्याशङ्क्याह **श्लेषति**। उदाहरति **तथेति**। भास्वन्तौ करौ दीप्यमानौ पाणी भास्वतः स्वकरा रश्मयः। अस्येदं दुर्लभं यत्फलं तत्र लुब्धानां ईहितं प्रददाति। स्वापत्य फले विश्रान्त्यां लुब्धः, तत्र हितं न प्रददाति च। अत्र गौर्या उपमेयत्वं अप्रस्तुतप्रशंसायामु मेयस्योपमानीकरण अपुष्टार्थत्वं पौनरुक्त्यं वा दोषः इत्याह **प्रयोगेणेति**। अनयैव समासोक्त्युक्तरीत्यैवाप्रस्तुतप्रस्तुतयोस्तुल्यनिबन्धनत्वादुपमानानां तदोपमेयप्रतीतौ किञ्चित्पद-प्रयोगेण पुनरुपमेयस्योपमानीकरणेनेत्यर्थः। उदाहरति **यथेति**। विहङ्गमेषु आहूतेषु पुर आयान्मशको न वार्यते। तृणमणिः अप्रधानमणिः काचादिः मणीनां मध्ये धुरि वा वसन् रुचं धत्ते। तेजस्विनां मध्ये खद्योतोऽपि प्रचलितुं न कम्पते न बिभेति। तत्त्वानां क्षुद्रमहतां अन्तरं विशेषः अनामृष्ट-मपरामृष्टं येन। अचेतनं प्रभुमिव साम्यं, धिक्। अस्याप्यपुष्टार्थत्वं पुनरुक्तत्वञ्चेत्याह **अत्रेति**। अचेतनत्वेन विशिष्टं सामान्यम्। अवान्तरप्रकरणमुपसंहरति। तदिति। यथासंभविन इति। उद्भटादि-भिरुपमादौ लक्षितपरीक्षिताः। **अन्य इति**। व्यक्तिविवेकादित्युक्त्या समासोक्त्यादौ परिकल्पिताश्च। **एवंजातीयका इति**। तत्तुल्यः तदीयं च योजनम् विषयान्तरेणान्तेराङ्ग्राह्या पूर्वोक्तयैव सम्रमसमर्थितयैव दोषजात्या अन्तर्भावयोग्यतया पृथक् प्रपञ्चनमप्यनौचित्यायेति भावः। उक्तमर्थं प्रकरणार्थमुपसंहरति **इति संपूर्णमिति**। ननु प्राचीनाचार्यमतोल्लङ्घनेन विवेचितमिदमत्राप्रमाणमेव स्यादिति आशङ्क्याह **इत्येष इति**। विदुषां ध्वनिकारादीनां य एष मार्गः स्वसिद्धान्तः विभिन्नः विप्रकीर्णोऽपि अभिन्नरूपः एकत्र सङ्कलितः प्रतिभासत इति। संपूर्णमिति यत् तत् तद्विचित्रम्। यत् यस्मात् कारणात् अमुत्र ग्रन्थे सम्यग्विनिर्मिता संघटनैव हेतुः। येन पदसंदर्भेण विकीर्णं जातं सङ्कल्पं प्रतिपाद्यत स गद्यसन्दर्भा कृति इति नाप्रामाणिक इति भावः।

पञ्च क्लेशानजैषुर्जगति सुकृतिनो दुश्चरैर्ये तपोभि-
र्येषां चेतोऽरविन्दे स किल पुरहरो वासमङ्गीचकार।
येषां पादारविन्दे स्मृतिरपि जडताहारिणी देहभाजां
तैष्टीकेयं सरस्वत्युपपदविलसत्तीर्थसंज्ञैरकारि ॥१॥

साहित्यकुमुदकाननिद्राविद्राणयामिनीनाथाः।
काव्यप्रकाशटीकां व्यरीरचंस्ते सरस्वतीतीर्थाः ॥२॥

एवं सरस्वतीतीर्थयतिना तेन निर्मिता।
टीका काव्यप्रकाशस्य मुदे स्याद् विदुषां चिरम् ॥३॥

इति सरस्वतीतीर्थविरचितायां काव्यप्रकाशटीकायां दशमोऽर्थालङ्कारनिर्णय उल्लासः ॥

सारबोधिनी—दिवाकरादिति। अत्र स्वतःसंभवित्वपक्षे दूषणमिदं कविप्रौढोक्तिनिष्पन्नत्वपक्षे पक्षे न दोषः। 'पीडनभीरु' इत्यादौ स्वयमुदाहृतत्वादिति। नन्वद्रिणा तत्त्राणमुत्प्रेक्षितमुच्यत इत्यत आह **संभावितेन त्विति**। तदा नानुपपत्तिः। तथा च किं समर्थितं द्वितीयार्थेन। **स्पृशतीति**। **ककुभस्तिरमरुचो करैः**

स्पृशति दिवसश्रिया अतनुमानग्रहया स्थितमित्यन्वयः। करैर्हस्तैः रश्मिभिश्च। तापशब्द उष्णतायां, खेदेऽपि। मानशब्दः परिमाणेऽभिमाने च। यथा सदृशेति। तिग्मरुचेः करेण स्त्रीस्पर्शकारित्वं नायकोचितं विशेषणम्। ककुभां च करेण पुरुषस्पृश्यत्वम् नायिकायोग्यं विशेषणमित्यर्थः। व्यक्तीति। लिङ्गविशेषस्य परिग्रहेणेत्यर्थः, तिग्मरुचेः पुंलिङ्गयोगेन, ककुभां च स्त्रीलिङ्गयोगेन।

श्लेषेति। अप्रस्तुतप्रशंसायामपीति।

आहूतेष्विति। विहायसा गच्छन्तीति विहङ्गमाः। आयान् आगच्छन् वावसन्निति यङ्लुक्। तृणमणिस्तृणाकर्षको मणिविशेषः। कम्पत इति। नत्रि काकुः। कम्पत एवेत्यर्थः। सामान्यं समानधर्मवत्त्वं विहङ्गमत्वादिमत्त्वम्। अत्र कल्पितविशेषं धिगस्त्वेतावतैव। प्रस्तुतस्य मन्दमतेरीश्वरस्य लाभान्न पुनः कथनं युक्तमिति एवंजातीयका इति। यथा

या धर्मभासस्तनयापि शीतलैः स्वसा यमस्यापि जनस्य जीवनैः।
कृष्णापि शुद्धेरधिकं विधायिभिर्विहन्तुमंहांसि जलैः पटीयसी।

अत्र धर्मभासस्तनयत्वादीनां शीतलत्वादीनां च विरोध उक्तः। स च भिन्नाधारतयैव निर्देशान्न संभवति। एकाश्रयत्वेनैव विरोधस्य निरूपितत्वादित्यनभिहितवाच्यत्वमेव, इत्यादि स्वयमूहनीयमिति दिक्।

इति श्रीमहामहोपाध्यायश्रीविष्णुभट्टाचार्यचक्रवर्तिपुत्रश्रीवत्सलाञ्छनभट्टाचार्यकृतौ काव्यप्रकाशटीकायां सारबोधिन्यां दशम उल्लासः। श्रीमहाकालीमहालक्ष्मीमहासरस्वतीभ्यो नमः। श्रीमहागणपतये नमः।

नरसिंहतनूजेन सखारामेण धीमता।
काव्यप्रकाशगा व्याख्या लिखिता गुरुतुष्टये॥

सं १८९० कार्तिक दशमी ४ तद्दिने समाप्तोऽयं ग्रन्थः।

—

श्लोकसूची

FOREWORD

It is my proud privilege to introduce to the scholars the Darpana of *Visvanatha*, the most eagerly awaited commentary on the Kavyaprakasa.

Darpana has the unique importance of being composed by a person whose scholarship was in no way inferior to the author of the work he commented upon. I would even rate *Visvanatha* higher than *Mammata* since in addition to his being a scholar and a critic he was also a poet of considerable merit. And since he himself had written a comprehensive work on the *Alankarasastra*, he was most suitable a person to comment upon a scholerly work like *Kavyaprakasa* which must have enjoyed great popularity even at his time. In my opinion it is *Kavyaprakasa* which has gained in importance with the commentary of *Visvanatha* and it is a matter of honour for *Mammata* to be commented upon by a scholar like *Visvanatha*.

No wonder, the commentary of *Visvanatha* was the most sought after one among the scholars as well as the students of *Alankarasastra*. It is this great desideratum which Dr. Goparaju Rama has fulfilled with the present publication. Some portions of the *Darpana*, *i. e.* those dealing with the Ullasas 3-6 have already been published by this Vidyapeetha in 1976. This was done mainly on the basis of a fragmentary manuscript available in this Vidyapeetha. The transcript and edition of this text was mainly done by Dr. Rama in collaboration with Dr. J. Pathak. In continuation of his search for the manuscripts of Darpana, Dr. G. R. Rama fortunately chanced upon of paper copy of an older manuscript of Darpana which was written in V. S. 1730 or A. D. 1673 and which is presently deposited in the Bhandarkar Oriental Research Institute, Poona. This discovery in itself was so important that Dr. Raju decided to make the text available to the scholars without further delay realising fully that he may not be able to present to the scholars a meticulously edited text of *Darpana* for want of further manuscripts. He has tried to reproduce the text as faithfully as possible correcting only scribal mistakes and giving his suggestions or textual amendments in brackets,

Dr. Raju has all pre-requisites and qualifications to do this job. He is the person who has introduced *Darpana* for the first time to the scholars and has already edited more than one third of it. He is very well trained in grammar, both in traditional and modern manners and has a specialised background for *Sahitya* which is now being put to use by this Vidyapeetha by letting him edit the Haravijaya of *Ratnakara*.

It has been the common notion among the scholars that *Visvanatha* saw a sort of rival-if not an adversary-in *Mammata*. This notion is proved baseless when one goes through *Darpana* since in it *Visvanatha* mostly seems to support the views of Mammata. Dr. Raju has pointed this out and I fully agree with him.

Dr. Raju was so eager to see this work reach the hands of the scholars as soon as possible that he himself has borne the costs of its publication and now intends to make it available to the scholars at its cost price. Thus the world of scholars should be doubly thankful to him : first for bringing this work to light and salvaging it from oblivion and secondly for making it available to the scholars at such a moderate price.

I thank Dr. Raju for carrying out this task in a most successful manner and wish that this new commentary shall go a long way in understanding and appreciating *Kavyaprakasa* better.

G. N. Jha K. S. Vidyapeetha
Allahabad-2
September 24th, 1979

Dr. G. C. Tripathi
Principal

PREFACE

The motto of the Sanskrit Scholars that such works, which have not been able to see the light of the day be brought to limelight, has been the main source of inspiration behind this attempt of presenting the complete text of the Kavyaprakasadarpana to the Scholars. It is obvious to mention that the manuscript is more than three hundred years old and was catalogued by the BORI, Poona more than fifty years ago, but could not be brought to light. I feel it a pleasure to have it edited in its right perspective form but wherever it did not strike me proper and I felt any ambiguity I retained the version of the manuscript with question tags. I request the Scholars to crave their indulgance and render scholarly suggestions which may be adopted in its subseqent edition.

CONTENTS

*Printed text. : The text of Kavyaprakasa, published with three unpublished commentaries by the G. N. Jha. K. S. Vidyapeetha, Allahabad in 1976.

Introduction

The *Kavyaprakasadarpana* (KPD) ranks among a few prestigious commentaries written on the *Kavyaprakasa* (KP). Its (KPD) author is Viswanatha, who is the author of the famous *Sahityadarpana* (SD) which was written by him as on the lines of KP, having been inspired by the latter which had gained a great amount of prominance and significance. The KP renowned for its technic of amalgamating all the literary theories and disciplines that sprang up in the literary field in a span of three to six hundred years earlier. The SD too for its possession of similar qualities like those of KP attained equal amount of prominance and popularity on par with KP. Consequently, much remained in obscurity with regard to KPD, as it was not published in its entirity. Much curiosity and eagerness are also entertained by scholars, *constantly*, due to the fact that the SD rendered quite a good number of topics dealt with in KPD. It was but natural as is clear from its (SD) popularity.

The full text of the *Kavyaprakasadarpana* is being presented to the scholars here.

It is on the basis of the transcript of a ms. written on paper and dated Samvat 1730 (1673 AD) which was procured from the Bhandarkar Oriental Rescarch Institute, Poona, by me last year.

In a brief introductory note which I presented to the KP, published with three unpublished commentaries, by the G.N. Jha. K.S. Vidyapeetha, Allahabad in 1976, I was able to furnish a little information about the KPD and its author with the help of its incomplete material then at hand.

After continuous and strenuous efforts I could locate the ms. of KPD (full text) in the BORI Poona last year. After some correspondence, I procured a transcript of it. Subsequently, I worked on it and prepared its press copy. I contacted the Sadasiva Kendriya Sanskrit Vidyapeetha. Puri and the State Mueseum, Bhuvaneswar. Dr. G. C. Tripathi, our Principal joined me in my efforts. Unfortunately, all our attempts were unsuccessful,

Now let me discuss, within the sphere of the present commentary, the general and particular aspects which generally engage the scholar's attention.

Kavyaprakasadarpana, its author, date and works

It is known to scholars that the author of the KPD is Viswanatha, who is identical with the author of SD. He mentions his SD very often and quotes from it frequently. At many places he has directed the reader to refer to it for further clarification of a particular matter, here and there.

Secondly, at places which were left unillustrated by the KP because of their uncontextual nature, the author of the KPD quotes from the SD. These are the places where he has chosen to bring in the references from SD.

The above facts prove to establish beyond doubt that the author of the SD and that of KPD are identical to each other. He is precisely Viswanatha*

His Date

The *Chandrakalanatika* of Viswanatha furnishes us a salient and silent clue to establish the exact period of Viswanatha. The historocity of the *Chandrakalanatika* reveals that it was composed and staged on the occasion of the Victory of निशङ्कभानुदेव who succeded *Narasimha* IV and whose first regnal year is generally accepted as 1414 A. D.**

The *Chandrakalanatika* was quoted in the *Sahityadarpana* which suggests apparently that the SD was a later work of Viswanatha.

In further sequence, both the *Chnadrakalanatika* and the *Sahityadarpana* were quoted together in the *Kavyaprakasadarpana*.

The above sequence conduces one to establish the exact period of Viswanatha as the first half of the 15th century.

Since his first work is dated around 1414 A. D, his literary activities can be ascribed to the later period of 1414 A. D. which can otherwise be specified as the first half of the 15th century A. D.

---

*According to the introductory reference, written by Sivaprasad Bhattacharya, he (Viswanatha) belonged to HARIKRISHNAPURA a village, a few miles from PURI, reputed in local tradition (see his introduction to the काव्यप्रकाशदीपिका) ।

**The History of Orissa by Dr. Hare Krishna Mahatab. pp. 257-259.

Internal Evidence in the KPD:

Apart from the external and historical evidence, one can have a look at the internal evidence too, which leads one to the exactness of his date.

He has referred to three commentators on K. P. They are, as per the chronological order वाचस्पतिमिश्र, who belonged to 1200 AD. He is other than the author of the तत्त्वबिन्दु, श्रीधरसांधिविग्रहिक who wrote the commentary on KP by name काव्यप्रकाशविवेक and is believed to have belonged to 1225 A. D. and चण्डीदास, who wrote a commentary on KP by name दीपिका in 1300 A. D. and at the same time was a brother of the grandfather of Viswanatha.

वाचस्पतिमिश्र is referred to at two places, श्रीधरसांधिविग्रहिक at four places and चण्डीदास at several places.

In addition to the three, which I found to have been referred to by name, the KPD gives veiling references of four other commentators as केचित्, अन्ये, अपरे etc.

His other Works

In the course of his commentary (KPD) the author has cited illustrations from four of his other works : They are :

1. *The Chandrakalanatika*
2. *The Narsimhavijayam*
3. *The Prabhavatipradyumnam and*
4. *The Sahityadarpana.*

Evaluation of the Commentary

The present commentary, if evaluated seriously can be adjudged in many dimensions as a commentary in its true sense. The multidimensional aspects would cover at least six characteristics namely :

i. Clarity ii. Originality iii. Treatment iv. Endorsement v. Refutation vi. Perspicuity. It is not necessary that a commentary should satisfy all the characteristics together. It is the general tendency of the commentator *that prevails* but whatever is commented upon should not be at the cost of the original text. That enables the commentary to sustain and survive.

---

*इहास्मत्पितामहानुजकविपण्डितमुख्यश्रीचण्डिदासपादैरुक्तं परमार्थतस्त्वखण्ड एवायं रसो वेदान्तप्रसिद्धब्रह्मतत्त्ववद्वेदितव्य इति । (P. ४१)

Coming to the point, I deal with the point of clarity as reflected in the KPD. If enlisted in a systematic process one can come across more than fifty such instances to substantiate the view point of "clarity" maintained by the author. I classify them into two categories, one pertaining to the *Lakshana* part and the other to the *lakshya* part. While the former is the main and important concern of the scholars the latter is not completely ruled out to be less important. The former bears a testimony to the command over the subject by the author. The latter proves his genious.

Now let me consider them one after another.

Clarity

1. The author while commenting on the Karika "तददोषौ शब्दार्थौ" clarifies and also justifies the propriety of its composition with the specific words inserted in it (See page 3) :

2. Tracing the origin of Dhvani theory to Sphota, the Vrittikara clearly said that the word बुधैः is directly referred to वैयाकरण s. Making it further clear that *Sphota* and *Dhvani* are two sides of a coin. The present author has emphasised that what Sphota is to Vaiyakaranas Dhvani is to Alamkarikas (See page 5).

3. While proving the slight difference between the two kinds of लक्षणा (शुद्धा and गौणी) the author of KPD has pointed out that in spite of all the similar characteristics between the two, there is a narrow difference in the latter which necessitates us to place it under an independent category (See page 26).

4. While producing counter arguments to those who held that व्यञ्जना could be understood by लक्षणा, the author clarified to say that both are apart from each other on all counts and on all grounds. (See page 26).

5. While lying emphasis on the two different grounds which separate the लक्षणा from व्यञ्जना, the author clarifed the कारिका "ज्ञानस्य विषयो ह्यन्य" etc. vividly. (See page 26).

6. While illustrating the necessity of व्यञ्जना in the word "परिवार ए' he has clarifed its propriety (See page. 29).

7. While commenting on the कारिका "शब्दप्रमाण वेद्योऽर्थः" etc. the author has clarified beyond doubt that शब्द also is as equally important in व्यंग्यार्थ as अर्थ is. (See page 34)

8. The rasa cannot be relished at the mere existence of विभाव or अनुभाव or व्यभिचारिभाव alone. The fact, which has been established is that all the three factors together culminate into rasa. (See page 43).

Similar places can be located in the remaining text also which he prefaced them with the words अयमर्थः, तदयं पिण्डार्थः, इत्यर्थः, इतिभावः, इतिफलितार्थः, etc.

Originality

A commentator should be original in thinking and also in correlating the *Lakshana* and *Lakshya*. At certain places the reader may fail to apply his mind to the accurate correlation of the *Lakshana* and he may feel confused. The commentator keeping in mind that 'lest the reader may be perplexed' should render an example, a citation or an illustration where the lakshana can be understood after its due application, flawlessly, which enables the reader to follow the order of the text further.

The present commentator in this context preferred mostly to refer to the SD, an original work of his own, besides citing a very few lakshyas, *here and there* from his other works which I have mentioned in the initial paras.

Treatment

On a close perusal of the commentary it can safely be arrived at, that the original text (KP) is not treated badly. Scholars held a view that Viswanatha is the opponent of Mammata. But, his opponence in any type of vehemence is not noticed as such, in the KPD, where it ought to have been, because *he was commenting* the KP directly. On a close observation what I feel is, that the author of KPD drew a parallel view with regard to the definition of kavya, which he regards as the essence of the definition of kavya, drawn by Mammata. He says to that effect : तदयं तददोषाविति कारिकायाः फलितार्थः । ग्रास्वादात्मकं वाक्यं काव्यमिति । See page 3-4

Earlier to it, he did not discard any one of the specific words inserted in the लक्षणा nor written off any one of them. He commented and clarified each one of them and established each one's propriety. Subsequent conclusion of his, amounts to mere moditication of the Mammata's kavyalakshana rather than to a straightway refutation of it.

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि । तदिति काव्यम् ।

अदोषाविति । काव्यं श्रुतिकट्वादयो दोषा यथाशक्ति परिहर्तव्याः निर्दोषताया लक्षणत्वे काव्यं निर्विषयं प्रविरलविषयं वा स्यात् । वस्तुतो हि दोषाणां देहिनः काणत्वखंजत्ववत् अपकर्षकत्वम् ।

शब्दार्थाविति । यद्यपि विशिष्टार्थप्रतिपत्यर्थं संयोज्यमानं पदकदम्बकमेव काव्यम् । अर्थस्तु न कविव्यापारगोचरः तथापि लक्षणे शब्दसमकक्षतया तदुद्देशस्तत्र विशिष्टविशेषणादिकोपेक्षं

व्यांप्रियंमाणस्यैवार्थस्यातिशयद्योतनार्थः । काव्यंत्वसामान्यस्य हि शब्दार्थयोः संयोगादिरर्थं व्यासज्यवृत्तित्वं सामान्यत्वादेव, न च गोत्वादिवत् प्रत्येकपरिसमाप्यवृत्तित्वं सामान्यत्वादेव प्रत्येकं काव्यताप्रसङ्गात् ।

सगुणाविति । आत्मनः शौर्यादिव्यञ्जकशरीरवत् काव्यानुभूतस्यास्वादस्य उत्कर्षाय गुणाभिव्यंजकौ शब्दार्थौ काव्ये प्रयोज्याविति भावः । गुणानामास्वादान्तःपातितया शब्दार्थरचना धर्मत्वात् ।

अनलंकृती इति । अत्रास्फुटार्थे नञ् । तेन विशेषप्रतिषेधे शेषाभ्यनुज्ञानमिति न्यायेन सर्वत्र सालंकारयोः क्वचित् अस्फुटालङ्कारयोरपि शब्दार्थयोः काव्यत्वमिति भावः, अत्राप्यलङ्काराणां शरीरिणः कटककुण्डलादिरिवात्मनः काव्ये उत्कर्षाधायकत्वात् उपादेयत्वं सूचितम् । नत्वेषामदोषत्वादीनां काव्यलक्षणत्वमित्यर्थः ।

Endorsement

The classification of poetry, according to Dhvanikara is simple. He has accepted only two catcgaries of it and discarded the third one (chitra), on the grounds that there won't be any suggested sense in such a kavya and even if any suggested sense is extracted from it, it won't be relishable. In spite of this ruling Mammata counted the third one and Viswanatha endorsed it. (P. 9-10).

2. Suppose there is a noun. It is rid of two blemishes, Endlessness and Violation. Then it can convey a meaning even without the attribution of a convention. In case any convention is attributed to it, it will amount to a blemish called आत्माश्रय. In spite of that gross apprehension, convention is attributed to-by Mammata. Endorsing this particular point of view of KP, Viswanatha has said that this type of ideal form of words like *Dittha* etc. is imposed upon by a speaker arbitrarily on objects like Dittha. (P. 14).

3. *Pravisa Pindim*. In the example गौरनुबन्ध्यः where the word satisfied two of the three conditions of a lakshana namely i. Inapplication of primary sense ii. Connection of secondary sense with that of the primary sense and iii. Motivation or usage. In the usage *Pravisa Pindim* there is no inseparable convention, we can infer the words गृहं just as we infer an agent in क्रियताम्. For, unless there is an agent no action can be performed. Similarly, we can infer व्यक्ति from जाति. In कुरु the object is inferred. Therefore, the mode of understanding the meaning in गौरनुबन्ध्यः and प्रविश पिण्डीम् is the same. This view of Mammata has been endorsed by Viswanatha. (P. 19).

4. Viswanatha justified the application of शुद्धा and सारोपा in गङ्गायां घोष: and गौर्वाहीक: and has rebuked Chandidasa, who felt such application of the both, in both the examples, respectively, is an utter useless attempt by Mammata. 4. (P. 21).

5. Mammata's contention that there is no भेदप्रतीति (apprehension of difference between the two) between उपादानलक्षणा and लक्षणलक्षणा, is endorby Viswanatha. (P. 21)

6. The mode of analysis propounded by Mammata in understanding the meaning of गौरनुबन्ध्य: has been endorsed by Viswanatha. (P. 16).

7. The acceptance of *Santarasa* by Mammata has been justified by Viswanatha stating that it was in accordance with the view of an earlier Acharya. (P. 48).

8. Separate identity to कविनिबद्धवक्तृप्रौढोक्ति established by Mammata has been endorsed by Viswanatha. (P. 53).

9. The viewpoint of Mammata in "आदिग्रहणात् वर्णरचने" has been elaborated and endorsed by Viswanatha and also.

10. The classification of गुण and अलङ्कार. In addition to these, at several other places he endorsed with the words इति ग्रन्थकृदभिप्राय:, P. 61 अस्य ग्रन्थकारस्यायमाशय: P. 63 इति ग्रन्थकृन्मतं सुसमंजसम् etc. (8 th ullasa).

Refutation

While preparing the chronology of the commentators it became a matter of importance to note particularly the main opponent of the commentator. The more he opposes his predecessors' views the more he is regarded conversant with the subject and also held in high regard. Noting down the opponents of a commentator helps in many ways. First, it helps in establishing the date of the commentator and subsequently his scholarship etc.

In the present commentary the main opponent of its author is चण्डिदास, who is also a commentator of KP. He wrote the commentary on KP in 1300 A. D. His views were refuted at a number of places in the KPD. All of the instances which were attributed to different scholars and subsequently refuted by Viswanatha, in his KPD are found in pages : 14, 16, 19, 20, 23, 26, 28, 29, 41, 56, 75, 81, 96, 112, 116, 129, 130, 131, 142, and so on.

Perspecuity

So far as the perspecuity aspect of a commentary is concerned the commentator should not at anytime demonstrate or exhibit pedantry while commenting the text. Thus he has shown adherence to the text. To explain vividly, I may be permitted to split the text into two parts, *i. e.* लक्षणा and लक्ष्य. With reference to the both the commentator has confined to their explanation *verbertum*, to contradict wrong notions of fellow commentators, to endorse the view of KP and also to analyse them within their own purview.

Conclusion and Acknowledgements

Thus the KPD which could not see the light of the day all these centuries, remained untraceable because of its nonavailability on one side and its obscurity on the other. The Bhandarkar Oriental Research Institute, Poona, deserves profound admiration in this regard for preserving the single ms. which provides us the full text. My successive and multisided attempts to procure more mss., if any, were in vain and I have to confine and satisfy myself with this alone.

The Telugu saying reads 'whenever any problem persists put it before ten people, the solution comes automatically'. In that way, I am putting this text of KPD before the scholars and it is upto them now to judge what this commentary is upto and to what extent it is worth.

I owe much to Dr. Gayacharan Tripathi, Principal, G. N. Jha. K. S. Vidyapeetha, Allahabad for the creditable suggestions he rendered me. My thanks are also due, to Dr. Raghavaprasad Choudhari, Sri K. Raghunathan, Kumari Tapati Pal, my collegues, for their help at different stages of the work, to Sri Rupnarayana Pandey, to Dr. P.G. Lalye, to Sri P. Nanrayana Namputiri and Sri S. N. Tripathi for their help.

I particularly thank Dr. Abhaya Mitra and Smt. Ragini Mitra, Lecturer, D. P. Girls Inter. College, Allahabad for their company and cooperation in expediting the work. Last, but not the least I thank my wife, Smt. Rajeshwaree for her encorougement in this work.

And, at the end, I thank the Takneeki Mudranalaya for taking meteculous care in printing the Book.

Allahabad
18-9-79

GOPARAJU RAMA

श्रीविश्वनाथमहापात्रविरचितः

काव्यप्रकाशदर्पणः

अथ प्रथम उल्लासः

ओं नमो गणपतये

प्रमातृप्रमाणप्रपञ्चप्रमूर्ति
प्रमिर्ति प्रमिण्वन्ति [प्रमूर्ति प्रमिण्वन्ति[१]] यां योगिवर्याः ।
गिरां देवतां देवतानां प्रबोधं
प्रदेयादियं मत्प्रबन्धे [प्रगल्भे] ॥१॥

टीका काव्यप्रकाशस्य दुर्बोधानुप्रबोधिनी ।
क्रियते कविराजेन विश्वनाथेन धीमता ॥२॥

इह सर्वग्रहग्रस्ताः[२] कुर्वन्ति कुधियो मुदा ।
न दोषं किन्तु तन्मौर्ख्यं विचिन्वन्तु गतिं चिरात् ॥३॥

मङ्गलाचरणम्

निर्विघ्नेन प्रारिप्सित [ग्रन्थ] परिसमाप्तिकामस्य ग्रन्थकृतोऽथ विगीत [विगत] शिष्टाचारपरम्पराप्राप्तस्वाभीष्टदेवताप्रसादनसूचिकां प्रथमकारिकां वृत्तिकृदवतारयति ग्रन्थारम्भ इति । ग्रन्थारम्भं प्रति विघ्नः प्रतिबन्धकसद्भावः, प्रवर्तित स्वीकृत विरहो वा, तस्य विघातो निःशेषमुच्छेदः देवतामिति । यद्रूपवांक्-

---

१. साहित्यदर्पणः (introduction p. 30)

२. सर्वग्रहग्रस्ता इत्यपि पाठः ।

मयमात्रवैलक्षण्येन तत्प्रमात्रीं तस्या एव ह्यभीष्टसम्पादनक्षमत्वं, समुचितत्वं चास्या वाङ्मये अधिष्ठातृतया स्वप्रसादविधेयत्राग्वैभवब्रह्मादिदेवतावैलक्षण्येन प्रकृत-ग्रन्थनिर्वाहकत्वात्।

इष्टत्वञ्च भक्तिश्रद्धातिशयेनाश्रवणीयत्वात् [आश्रयणीयत्वात्] एवं च समुचितेष्टत्वगुणद्वययुक्तदेवताराधनं सर्वदा सफलमेव स्यादिति भावः। **परामृशति**। आराध्यत्वेनानुसंधत्ते।

नियतिः सर्वोत्पत्तिमत् निमित्तमदृष्टम्, नियम्यन्ते स्वस्वकार्योत्पत्तये प्रेर्यन्ते भावा अनयेति व्युत्पत्या, तत्कृतो नियमः कालवस्तुदेशवयोऽवस्थादिवैषम्यात् सुखादि-वैषम्यं, तेन रहिताम्। कविवक्रोक्तीनां रत्याद्यङ्गसंवलितसुप्रकाशावंतविस्फारनंय-त्यात्। एतदेव बोधयति **ह्लादैकमयीं** सुखैकरूपाम् अव्यभिचारेण सुखमात्रजनकत्वात् तत्वोपचारः। **अनन्येति**। अन्यत् असमवायिसमवायिनिमित्ताख्यं हेतुत्रयं तस्यापर-तन्त्र्यं न तु साक्षात् तदन्वयव्यतिरेकानुविधायिनीम्। एवञ्च कविभारत्या निर्माणस्य रसादितत्वहिष्करणं [रसादितत्वाविष्करण] स्वरूपम्। रसादितत्वं हि वाक्विहगता-लादिवासनान्तर्लीनम्। तत्वबहिष्करण [आविष्करण] प्रतिबन्धकविगमार्थमेव हेतुत्वाभिमतस्यावधानादेरपेक्षणमिति तस्य हेतुत्रयजन्यं प्रपञ्चवैलक्षण्यमिति भावः। परतन्त्रशब्दोऽत्रायत्तमात्रवाचि गुरुपरतन्त्रतयेत्यादिवत्। तेन न पुनरुक्तिः।

नव रसाः शृङ्गारादयः शान्तान्तास्तैः रुचिरां हृद्यां, एवंभूतां निर्मितिं निर्माणमादधाति। अत एव जयति उत्कर्षेण वर्तते अर्थात् ब्रह्मणः। यद्वा वक्तृरूपाया कविवाचः सुनिर्मितमुखादीनां चन्द्रादिस्वरूपे उक्तरूपो नियमः, काव्ये त्रयं च नास्ति नवरसानां प्रकाशकत्वेन रुचिरत्वं अत एक [एव] ह्लादैकमयत्वं चास्तीति ब्रह्मणः कवेः उत्कर्ष इति भावः।

इममेव द्विधापि कारिकार्थं व्यतिरेकेण विवृणोति। **नियतिशक्त्येति। सुखेति।** [1]सांख्या हि जगन्मूलकारणं प्रकृतिं तस्याश्च त्रिगुणात्मिकायाः परिणामतया पुरुषेतरमहदहंकाराद्यनुजातं त्रैगुण्यात्मकम्। तथाह्येकस्यैव कामिनीशरीरस्य संयुक्त-वियुक्तप्रार्थ्यमानेषु सुखदुःखमोहोत्पादकत्वं व्यक्तमेव प्रतिभासत इत्याचक्षते तन्मते परमाणूकृतं तन्मात्रं, तच्च शब्दस्पर्शादिपञ्चकं उपादानं समवायिकारणम्। **कर्म** क्रिया षड्रसा मधुरादयः तैरिति षड्रसैः **जयत्यर्थेन चेति।** ग्रन्थादाविष्टदेवतायाः एवंविधस्तुतिप्रवृत्तेन नमस्कारः कृत एवेति लभ्यते। एवञ्च भावशुद्धिमूलाभ्यां स्तुतिनमस्काराभ्यां कर्तुरभिमतसिद्धेरव्यभिचार इति सूचितम्।

---

१. cf. सा० का० ३।

काव्यप्रयोजनानि

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति अत्र काव्यपरीक्षाशास्त्रे प्रयोजनप्रेक्षाया [प्रयोजनापेक्षाया] मेतदर्थिनः परीक्षणीयकाव्यस्य फलैरेवास्य फलवत्त्वमित्यभिप्रेत्योक्तां द्वितीयां कारिकामवतारयति **इहेति**।

अभिधेयं काव्यपरीक्षणं। कृते इत्यवयवं [इत्यव्ययम्] [1]तादर्थ्ये अर्थायेन्यर्थः। संपदादिर्वा तेन कर्णं [करणं] कृत् अनुकर्णायेत्यर्थः अर्थकरणायेत्यर्थः शिवेतरत् अशिवं विवृणोति **कालिदासादीनामिवेति**। यश इत्यादीनां कर्मपदानामुपरितन्या करोतीति क्रियया‌भिसंबन्धः।

व्यवहारविदिति पदं विवृणोति **राजादीति**। आनन्दमिति निर्वृतिपदस्यार्थः। तद्विशेषणस्य च परेत्यस्य। **सकलेत्यादि**। एवं विश्वानन्दं हेतुमाह **रसेति**। रस्यते रसीक्रियते इति रसो रत्यादिः। तस्यास्वादनं भोगापरपर्यायं साक्षात्कारः, तेन समुद्भूतं संवलितं एकीभूतमिति यावत्।

न चेह रसपदार्थः शृङ्गारादिः। तस्य वक्ष्यमाणरीत्या आस्वादार्थत्वेनैव तत्कर्मत्वानुपपत्तेः। तदेकात्मनः आनन्दांशस्यांकार्यत्वात्।

विगलितेति। ब्रह्मास्वादसहोदरस्यास्य वैषयिकसुखवैलक्षण्येन विजातीयावच्छिन्नप्रवाहराहित्यं सूचितम्। **प्रभ्वीत्यदि**। श्रुतिस्मृतीनां हि प्रभुतुल्यत्वं हि वचनं कथमस्मात् कर्मणेवं [कर्मणः एवं] भविष्यतीति विचार्यैव यथा श्रूयते तथैव भृत्यैरिव नित्यनैमित्तकादिकमनुष्ठीयते। अत एव तासां शब्दप्रधानत्वम्। शासनामात्रप्रधानत्वादेव। तत्र शास्त्रपदाभिधायक सर्गादिपञ्चलक्षणकं पुराणम्[2]। पूर्ववृत्तिकथनमितिहासः। आदिशब्दादाख्यानम्। तेषां च सुहृत्तुल्यत्वम् ते हि सुहृद एव युक्त्या हिताहितसाधनतां दर्शयित्वार्थानर्थेषु प्रवृत्तिनिवृत्ती सम्पादयति। अत एव तेषामर्थतात्पर्यवत्त्वम्।

काव्यस्यैतदुभयवैलक्षण्यमाह **शब्दार्थयोरिति**। गुणभावे हेतुमाह **[illegible]ति**। रसशब्देन रसनधर्मयोगाभावादेरपि संग्रहः रसस्याङ्गभूतो यो व्यापारः सचेतसां रसाभिव्यक्तिनिष्ठत्वेनेति भावः। तदुक्तं काव्यकौतुके—

---

१. तादर्थ्ये चतुर्थी वाच्या।

२. सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च। वंशानुचरितं चैवं पुराणं पञ्च-लक्षणम्।

[1]प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता ।
तदनुप्राणना जीववर्णनानिपुणः कविः ।।

तस्य कर्म स्मृतं काव्यमिति उक्तम् । **तत्कान्तेवेत्यादि** । अयमर्थः राजपुत्रादयो हि सुकुमारमतयः शब्दार्थतात्पर्यप्रधाने वेदस्मृतिपुराणादौ प्रचुरतरायासग्राह्यतया न प्रवर्तन्ते । काव्ये तु रसास्वादलंपटतया प्रवृत्ताः हृद्याः हृदो सुखेन उत्पाद्यन्ते तदुक्तम्—

[2]स्वादु काव्यरसोन्मिश्रं काव्यार्थमुपयुञ्जते[3] ।
प्रथमालीढमधुरा पिबन्ति कटु भेषजम् ।। इति ।।

एवं च परिणतबुद्धिभिरपि काव्यं प्रवर्तितव्यम् । तदुक्तं मम साहित्यदर्पणे[4]—

"कटुकौषधशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्" । **उपदेशयुजेति** । चकारः कालिदासादीनामिव यश इत्यादीनां समुच्चये । **यथायोगमिति** । यशोऽर्थोऽननुगमश्च [यशोऽर्थानुगमञ्च] द्वयोरपि शेषास्तु भावकस्यैव । आनन्दानुभूतिस्तु कवेर्मन्यमानापि न करणोपाधिकृता, किन्तु भावनोपाधिकृतेति, भावना भावकनिष्ठैव प्राचीनवासनासंवलितांगविद्यानिपुणतोपस्कृताबुद्धिरत्र हृदये कृतं सहृदयत्वम् ।

अग्रिमकारिकासङ्गतिं सूचयति **सर्वथेति** । एवं यतो दृष्टादृष्टफलं काव्यं ततस्तत्र सर्वथा अवश्यं यत्नः कर्तव्यः तन्निर्माणनैपुण्यं सम्पादनीयमिति भावः ।

काव्यकारणानि

अतः कानि तन्निर्माणकारणानीत्यपेक्षयां तृतीयां कारिकामाह **शक्तिरित्यादि** ।

संस्क्रियते शिष्टकार्यभाजनं क्रियते प्रमाणेनेति संस्कारः । प्राचीना वासना देवताद्यनुग्रहजनितः कश्चनातिविषयो वास एव विशिष्यत इति विशेषः । स एव च शक्तिः शक्नोत्यनयेति व्युत्पत्या । उपहसनीयं स्यादिति "मुग्धे कामयमानं मां न त्वं

१. रुद्रकेशोक्ता-औचित्यविचारचर्चायाः का ३६ गतवृत्तिः ।
२. भट्टनायककृते हृदयदर्पणे इति बहुलाकरनिर्देशः ।
३. "शास्त्रमप्युपयुञ्जत" इत्यपि पाठो दृश्यते(द० काव्यप्रकाशदीपिका पृ० ८ ।
४. साहित्यदर्पणः । पृ० ६ ।

कामयसे कथमित्यादिवत् । अभिधानानि नामानि तेषां कोशः सङ्ग्रहः । कला चित्र-गीतादिविज्ञानम् । इतिहासादीनामिति आदिशब्देन निखिलवाक्प्रपञ्चपरिग्रहः । तदुक्तम्—

[1]न स शब्दो न तद्वाक्यं न सा विद्या न सा कला ।
जायते यन्न काव्याङ्गमहो भावो [रो] गुरुः कवेः ।। इति ।।

करणे काव्यस्वरूपनिष्पादने योजने पूर्वापराविरोधेन पदवाक्यविन्यासे उद्भवो निर्माणं वचनेति यावत् । समुल्लासः प्रवयावाप्तिः [प्रबन्धावाप्तिः] ।

काव्यलक्षणम्

संप्रति काव्यलक्षणे जिज्ञासिते तत्सामान्यलक्षणप्रतिपादिकां तददोषाविति कारिकामवतारयति । **एवमित्यादि** । **स्वरूपमिति** । स्वमसाधारणं रूपं इतरव्यावर्तको धर्मः तदिति काव्यम् । **अदोषाविति** । काव्ये श्रुतिकट्वादयो दोषा यथाशक्ति परिहर्तव्याः निर्दोषताया लक्षणत्वे काव्यं निर्विषयं प्रविरलविषयं वा स्यात् वस्तुतो हि काव्यस्य दोषाणां देहिनः काणत्वखञ्जत्ववत् अपकर्षकत्वम् । **शब्दार्थाविति** । यद्यपि विशिष्टार्थप्रतिपत्त्यर्थं संयोज्यमानं पदकदम्बकमेव काव्यम् । अर्थस्तु न कविव्यापारगोचरः तथापि लक्षणे शब्दसमकक्षतया तदुद्देशस्तत्र विशिष्टविभावादि-रूपेऽर्थे व्याप्रियमाणस्यैव शब्दस्यातिशय इति द्योतनार्थः । काव्यत्वसामान्यस्य हि शब्दर्थयोः संयोगादिरर्थव्यासज्यवृत्तित्वं प्रत्येकं काव्यताप्रसङ्गात् **सगुणाविति** आत्मनः शौर्यादिव्यञ्जकशरीरवत् काव्यानुभूतास्वादस्य उत्कर्षाय गुणाभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्याविति भावः । गुणानामास्वादान्तःपातितया शब्दार्थरचनाधर्मत्वात् ।

अनलंकृती इति । अत्रास्फुटाथ नञ् । तेन विशेषप्रतिषेधे शेषाभ्यनुज्ञानमिति न्यायेन सर्वत्र सालङ्कारयोः क्वचित् स्फुटालंकारयोरपि [क्वचिदस्फुटालङ्कारयोरपि] शब्दार्थयोः काव्यत्वमिति भावः । अत्राप्यलङ्काराणां शरीरिणः कटककुण्डलादि-रिवात्मनः । काव्ये आस्वादस्योत्कर्षाधायत्वात् उपादेयत्वं सूचितम् । न त्वेषामदो-षत्वादीनां काव्यलक्षणत्वमित्यर्थः । तदयं तददोषाविति कारिकायाः फलितार्थः आस्वादात्मकं वाक्यं काव्यमिति । तथाहि । शब्दार्थावित्यत्रार्थस्य सम-कक्षतयोद्देशात् । शब्दस्य विशिष्टविभावादित्वयार्थव्याप्रियमाणत्वं सूचितम् । तेन शब्दस्यास्वादार्थकत्वयुक्तिभवंत्येव । अर्थस्य च विभावादिस्वरूपत्वं सगुणावित्यनेन सूचितम् । रसाभावे गुणाभावात् । [गुणाभावे रसाभावात्] तदभावे च शब्दार्थ-

१. द० काव्यप्रकाशदीपिका, पृ० ११ ।

योस्तदभिव्यञ्जकत्वासंभवात् । शब्दसमुदायरूपं वाक्यमर्थत एव सिद्धम् । तत्र च दोषा आस्वादस्यापकर्षकत्वात् यथाशक्ति हेयाः । गुणाभिव्यञ्जकवर्णस्वना अलङ्काराश्चोत्कर्षकत्वात् प्रयत्नेनान्वेष्टव्याः । तेन रसवत्वेन काव्यव्यवहारो मुख्यो अन्यत्र च गौणः ।

यत्तु काव्यान्तर्वर्तिषु केषुचिन्नीरसेषु पद्येषु काव्यव्यवहारः । रसवत्पद्यान्तर्गतनीरसपदानामिव पद्यरसेन प्रबन्धरसेनैव रसवत्ताङ्गीकारादिति । एतच्च प्रपञ्चितमस्मत्साहित्यदर्पणे ।[१]

लक्ष्यनिरूपणम्

स्फुटालङ्कारविरहे उदाहरति **यः कौमारेति** । कौमारं नवयौवन, तत्कृतप्रेमासक्ततया योऽविवाहितामतिवाहितवान् स कौमारहरः वरः स्वयं वृतो न तु पित्रादिभिर्ग्राहितः । चैत्रो वसन्तः । तत्र जातौ [मालतीं] कदम्बभावात्, [असम्भवात्] मालती वासन्तिकलता । कदम्बो धूलीकदम्ब इति केचित् ।

सम्प्रदायविदस्तु[२] स एव वसन्तस्ता एव वर्षा इति मन्मथोद्दीपकत्वाविशेषादृतुत्वमस्यापि ग्रहणमिति व्याचक्षते ।

स्फुटो नेति । कारणसामग्र्ये [सत्यपि] कार्यानुत्पत्तिर्विशेषोक्तिः[३] । सा चेहास्फुटा । प्रियासन्निधानादयो धृतेः कारणानि । अत्र तेषु सत्स्वपि धृतिनोत्पन्नेत्युत्कण्ठोत्पत्तिमुखेन वर्णितम् । यदि धृतिनोत्पन्नेत्युच्यते तदा कार्यानुत्पत्तेः स्फुटतयोक्तत्वाद्विशेषोक्तिः स्फुटा स्यात् । इह तु विरुद्धरूपोत्कण्ठोत्पत्तिमुखेन धृतेरनुत्पत्तिरुक्ता । अतो विशेषोक्तिरस्फुटा । यद्वा—

प्रियसङ्गमाभावादय उत्कण्ठायाः कारणानि तेषामभावेपि तस्या उदय इति कारणाभावेऽपि[४] कार्योत्पत्तिरूपा विभावनापीहास्फुटा । एवञ्च विभावनाविशेषो-

१. साहित्यदर्पणः, पृ० १९ ।

ननु तर्हि प्रबन्धान्तर्वर्तिनां केषाञ्चिन्नीरसानां पद्यानां काव्यत्वं न स्यादिति चेत् ? न, रसवत्पद्यान्तर्गतनीरसपदानामिव पद्यरसेन, प्रबन्धरसेनेव तेषां रसवत्ताङ्गीकारात् । यत्तु नीरसेष्वपि गुणाभिव्यञ्जकवर्णसद्भावाद्दोषाभावादलङ्कारसद्भावाच्च काव्यव्यवहारः स रसादिमत्काव्यबन्धसाम्याद्गौण एव ।

२. द्रष्टव्यः रुचककृतसङ्केतः ।

३. सति हेतौ फलावचः विशेषोक्तिः [का० १०८]

४. विभावना विनापि स्यात् कारणं कार्यजन्म चेत् का० प्र० का १०७ ।

क्तयोः साधकबाधकप्रमाणाभावनिमित्तकः सन्देहसङ्करः सोऽपि अनभिव्यक्तकोटिद्वयालम्बनत्वादनभिव्यक्त इति केचित् ।

रसस्य हीति । [ररस्य चेति] रसोऽत्र न संभोगशृङ्गारः । किन्तु रस्यतेऽस्वाद्यते इति व्युत्पत्तिलभ्यं तद्व्यभिचारौत्सुक्यं स्वाधीनभर्तृकाया क्रीडास्थानं प्रत्युत्कण्ठायाश्चर्वणीयत्वात् । तेनात्र चौत्सुक्यस्य प्राधान्यादलङ्कार्यत्वमेव । यत्रत्वङ्गता तत्रालङ्कारता । तदुक्तम्—

[1]प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरपि [रिति] मे मतिः ।।

एवं काव्यस्य सामान्यलक्षणमुक्त्वा विशेषलक्षणं तत् प्रयोजनकधर्मनिर्देशरूपविभागञ्चावतारयति **तद्भेदानिति** । भेदशब्दोऽत्र श्लिष्टः । तथाहि-भिद्यतेऽनेनेति भेदो विशेषलक्षणं अतिशयितव्यङ्ग्यचालराङ्कादिकथनम् भेदनं भेदश्च सर्वोत्तममध्यमाधमत्वेन विभागः । वाच्यादतिशयः । तत्कृतोत्कर्षपात्रता ।

उत्तमकाव्यलक्षणम्

यद्यपि ध्वनिशब्दो ह्यनेकार्थः । ध्वन्यत इति ध्वनी रसादिरर्थः । ध्वनतीति ध्वनिः शब्दो वाच्यादिरर्थो वा । ध्वन्यतेऽनेनेति ध्वनिः वाच्यादिगता शक्तिः । ध्वननं ध्वनिः रसादिप्रतीतिः । ध्वन्यन्तेऽस्मिन्निति ध्वनिः काव्यम् । तथापि वाच्योपस्क्रियमाणव्यङ्ग्यव्यञ्जके एव काव्ये ध्वनिपदं नियम्यते ।

नायं निर्मूलो ध्वननव्यापारानुवंधी ध्वनिव्यहार इत्याह **बुधैरिति** । वैयाकरणा हि प्रथमे विद्वांसः, तन्मूलत्वाच्छब्दव्यवहारस्य । प्रधानत्वं च स्फोटस्यार्थप्रत्यायनरूपफलप्रत्यासत्या स्फुटत्यस्मादर्थ इति स्फोटः ।

उच्चरितप्रध्वंसिनां हि वर्णानां कथं तत्समुदायरूपपदार्थप्रकाशत्वमिति तत्र स्फोटरूपव्यङ्ग्यः स्वीक्रियते[2] । स च पूर्वपूर्ववर्णानुभवजनितसंस्कारसध्रीचीनान्त्यवर्णानुभवजनितप्रतिपत्तृगतोऽतिशयवशादपरोक्ष इव क्रियमाणः सकलाभिधेयाभिधानमयः शब्दब्रह्मेति[3] व्यपदेश्यः ।

---

१. ध्वन्यालोकः उद्योतः, का ।

२. This portion from स च to व्यपदेश्यः can be found in the दीपिका Written by चण्डिदास P. १६ ।

३. दीपिका reads यमिमं शब्दब्रह्मेत्याहुः ।

स च व्यङ्ग्यः सन्नेव वा विक्रियमाणोऽर्थव्यञ्जक [व्यवह्रियमाणोऽर्थव्यञ्जकः] अन्यैर्ध्वनिकारप्रभृतिभिः न्यग्भावितं सुश्रवणीकृतं वाच्यम्[१] । येन तथाविधस्य व्यङ्ग्यस्य व्यञ्जने प्रतीतौ क्षमस्य समर्थस्य ।

तदयं पिण्डार्थः । वैयाकरणैर्ध्वननव्यापारयोगाद्यः स्फोटः व्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिव्यपदेशः कृतः सोऽयमस्माभिर्वाच्यातिशायी व्यङ्ग्यव्यञ्जकस्य शब्दार्थयुगलस्य । ततश्च कारिकार्थानुसङ्गतिरेवं पर्यवस्यति—

बुधैः कथितो ध्वनिरस्मन्मते वाच्यातिशायिनी व्यङ्ग्यो भवति । स च ध्वनिरुत्तमं काव्यमिति । यद्वा नेह वृत्तिकृत्कारिकान्तर्गतं बुधैरिति पदं तोलयित्वा व्याख्यातवान् । किन्तु पूर्वे वैयाकरणाः बुधाः । प्रधानेत्यादि विशेषणविशिष्टस्य शब्दस्य यस्मात् ध्वनिरिति व्यपदेशं कृतवन्तस्तस्मात् अन्यैरपि ध्वनिकारादिभिर्बुधैः तन्मतानुसारिभिः सद्भिः तन्मतानुसारेण न्यग्भावितेत्यादि विशेषणविशिष्टस्य शब्दार्थयुगलस्य ध्वनिरिति व्यवहारः कृत इत्यर्थः । एवञ्चान्यैरित्यादिना कारिकाव्याख्याने वैयाकरणमतानुसारादिति वृत्तिकृतो हेतुप्रकटने सूत्रार्थस्य **सन्मूलतापादानम्** ।

निःशेषेति । तटं समीपं । स च समप्रायः प्रदेशः । तत्र चन्दनं निःशेषच्युतं, चुचुकादिषुक्तमशेषं, अधरो निःशेषमृष्टरागो न तु ओष्टः, दूरमनञ्जने निकटे तु सांजने तेनाञ्जनस्य क्वचित् क्वचिदवशेषः सूचितः । यं तनुश्चिरकालीनेऽपि स्नाने इदानीं पुलकिता तन्वी क्षामा च [क्षमा च] अधमस्य प्रागपि लक्षितनिकृष्टपरिग्रहस्य । एतेषाञ्च पदार्थानां वापीस्नानविरुद्धानामनुसंधानादेव वापीस्नानगमनस्याभातमात्रस्य प्ररोहाभावात् तदन्तिकं न गतासीति । अत्र विपरीतलक्षणया गतासीति लक्ष्यते तेन वृत्तौ गतासीत्यनन्तरं "लक्ष्यत इति शेषः" देयः । रन्तुमिति पदे दूतीति शेषः । एतच्चोद्धृत्य पश्चात् प्राधान्येनेत्यादौ योज्यं । ततश्च रन्तुमिति प्राधान्येन व्यज्यत इति वृत्तेः सङ्गतिः ।

अत्र **वाचस्पतिमिश्रादीनामियं** ईदृशी व्याख्यैवं ज्यायसी । इह चोक्तव्याख्यानमयेन पदार्थान्वयसमसमययेव गमननिषेधस्य बाधप्रतीतिरिति लक्षणैवाभ्युपगन्तुमुचिता । "भम धम्मि" इत्यादौ तु [श्व] मारणस्य वास्तवतया पदार्थान्वयोत्तरकालमेव उपपत्तिपर्यालोचनया भ्रमणविधेर्बाधप्रतीतिरिति व्यञ्जनैव । तदाहुः ।

१. द्र० "यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यंक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥
—(ध्वन्यालोकः प्र० उ० का० १३)

२. टीकेयं नोपलभ्यते येनास्योद्धरणनिर्देशो कर्तुं शक्नोमि ।

[1]क्वचित् बाध्यतया ख्यातिः क्वचित् ख्यातस्य बाधनम् ।
पूर्वत्र लक्षणैव स्यात् उत्तरत्राभिधैव तु ॥

इह च यद्यपि दौत्यकर्मजीविकायां कृतघ्नायां त्वै न पि·······द्भवमशते च समानासूया किन्तु वैश्यदेवं विधाय त्वै विश्वसिमि । तथाविधे च तस्मिन्ननुरक्तास्मि तदेवं चञ्चला सहस्रजनितप्रौढ़परितापपात्रत्वं मम युक्तमेवेति विप्रलम्भप्रभेदेर्ष्यामान-व्यभिचारी निर्वेदध्वनिः प्रधानं, तदङ्गन्तु लक्षणामूलवस्तुध्वनिः तथाप्यस्य वाच्यापेक्षया प्रधानभूतास्वादप्रत्यासत्तिमपेक्ष्य प्राधान्ये उदाहरणम् ।

मध्यमकाव्यम्

अतादृशीत्यादि । अतादृशी व्यङ्ग्ये सति गुणीभूतव्यङ्ग्य नाम काव्यम् । तच्च-मध्यममित्यन्वयः ।

वाच्यादिति । इह व्यङ्ग्यस्य यद्यपि विचित्रवत् [चित्रवत्] अत्यन्तं नास्फुटता तथापि वाच्यापेक्षया अभङ्गभावादिना निकृष्टत्वेन समवेतत्वेन चानतिशायित्वम् ।

ग्रामतरुणमिति । आजन्मैकदेशनिवासादनुरागातिशयप्रकटनम् **मुहुर्नितरामिति** । यदा यदा वञ्जुलमञ्जरीयुक्ते नायके दृढ़मवधत्ते तदा तदानुतापोत्कर्षाविष्कारान्मुख-मालिन्यप्रकर्ष इति वाच्यस्य मुखमालिन्यस्यैव विप्रलम्भाभासोत्कर्षकत्वेन प्राधान्यं सङ्केतसमयभङ्गरूपस्य तु व्यङ्गचस्य तत्सिद्धङ्गतया भुजिष्येधस्येव [?] गुणीभूतत्वम् ।

इह बाधादेव व्यङ्गचयोर्वस्त्वलङ्कृत्या गुणीभावाव्यभिचारेऽपि वाच्यतः प्राधान्याप्राधान्याभ्यां ध्वनिगुणीभूतव्यङ्गचव्यवहारः । काव्यार्थस्य चाखण्डबुद्धिवेद्यतया आस्वाददशायां तदवयवानां गुणप्रधानभावो नावभासते किन्तु आस्वादोत्तर-कालविवेचने एव ।

चित्रकाव्यम्

शब्दचित्रमिति । शब्दार्थगतत्वेन विभागकथनेन चित्रस्य सामान्यत्वमर्थत एव । अस्य वाच्यव्यङ्गचप्राचीनव्यवहारनियन्तृकतया ग्रन्थकृतः काव्यभेदत्वगणनं काव्यस्या-स्वादमात्रायत्तत्वात् । ईषदर्थे नञ् प्रयोगादेवमिति । [अवरमिति] चेदव्यङ्गचस्य [अव्यङ्गचस्य] क्षुद्रत्वेऽनास्वाद्यत्वात् । अत एव ध्वनिकृता काव्यस्य द्वैविध्यमेव दर्शितम् ।

---

१. cf. दीपिका ।

तदुक्तम्—ध्वन्यालोके तृतीयोद्योते का० ६६—६६ ।

गुणप्रधानभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते ।
उभे काव्ये ततोऽन्यत्र [तत्] चित्रमभिधीयते ।। इति ।।

यद्वा रसवत्प्रबन्धावयवा अपि ध्वनिगुणीभूतव्यङ्ग्यचित्रतया त्रिविधा इति तत् परं त्रैविध्यगणनं सरसगायादिगत [सरसकाव्यादिगत] नीरसैकपदादिवत्तेषां काव्यावयवत्ताः [काव्यावयवत्वा] न्यग्भावात् । प्रबन्धस्यैव तत्र काव्यतास्वीकारादिति ग्रन्थकृतोऽभिप्रायः ।

स्वच्छन्देत्यादि । छातेतरा अनवच्छिन्ना मूर्च्छन्मोहा वर्धमानप्रीतयः [?] आन्हिकं स्नानव्यतिरिक्तंमहःकल्पं अदरिद्राः मूलखननशनूथाः [शून्याः] अह्नाय झटिति वो मन्दताम् भिहृदयादिव्यन्वयः [भिद्यादपनयतात्] । न चेह गङ्गाविषयवति भावध्वनिः कवेः सर्वथा तन्मयीभाव एव न तु दैवतोपनिबन्धमात्रे तदङ्गीकारात् । किन्त्वंवन्धवैकद्येन [वन्धवैचित्र्ये] तादृशवर्णने त्याव [नायिका] चेतसि कश्चित् प्रकर्ष आधीयते । यदृच्छा स्वेच्छा इह च प्रबन्धपर्यालोचनया प्रतीयमानवीररसमपेक्षत् [वीररसापेक्षया] उत्प्रेक्षामभिप्रेत्यैव च वैचित्र्यमिति सहृदय [सहृदय हृदय] संवेद्यम् ।

इत्यालङ्कारिकचक्रवर्तिध्वनिप्रस्थानपरमाचार्यमहापात्रविश्वनाथकृतौ
काव्यप्रकाशदर्पणे प्रथम उल्लासः ।

अथ द्वितोय उल्लासः

शब्दार्थस्वरूपम्

संप्रति विशेष्यतया निर्दिष्टस्य शब्दस्य तत्प्रतिपाद्यस्यार्थस्य च विशेषलक्षणार्थं विभागकारिकामवतारयति **क्रमेणेति**। शब्दस्य विषयत्वेन मुख्यत्वात् प्रथमं निर्देशः।

स्वस्मात् सजातीयादेव। रूप्यतेति. रूप्यते अनेनेति स्वरूपं विशेषलक्षणम्। जात्याख्यायामत्रैकवचनं कस्यचित् वाचकादेरिव दुया [द्विधा] विभेदादेकस्यैव शब्दस्य वाचकादिसंज्ञाभेदः। न तु गवाश्वादिवत्तत्वान्तरम्।

एवञ्चोद्दिष्टविभागस्य शब्दस्य विशेषलक्षणाभिधानं प्राप्तावसरमपि परित्यज्य द्वयोरेकमेव विभागलक्षणप्रकरणं भवत्वित्यभिप्रेत्याह **वाच्यादय इति**। तदर्थाः तेषां वाचकादीनामर्थाः। गौण्याश्च लक्षणाया अन्तर्भावनीयत्वात्। गौणार्थस्य न पृथङ् निर्देशः।

सार्वत्रिकव्यवहाराभावं दर्शयन्नर्थान्तरमाह **तात्पर्यार्थ इति**। व्यङ्ग्यस्यापि सार्वत्रिकव्यहाराभावेऽपि एतच्छास्त्रे प्रधानवाच्यादिसमकक्षतया निर्देशः।

आकाङ्क्षेत्यादि। [1]आकाङ्क्षा प्रतीतिपर्यवसानविरहः। स च श्रोतुर्जिज्ञासारूपः। तेन नीराक्षाकांक्ष [निराकांक्षे] गौरश्वः पुरुषो हस्तीत्यादिना न संबन्धः। [2]योग्यता पदार्थानां परस्परसंबन्धे वा भावः। तदभावेपि संबन्धे वह्निना सिञ्चतीत्याद्यपि वाक्यं स्यात्। [3]सन्निधिर्बुद्धिविच्छेदः [सन्निधिर्बुद्धेरविच्छेदः] बुद्धिविच्छेदेऽपि वाक्यत्वे इदानीमुच्चरितस्य गोशब्दस्य दिनान्तरोच्चरितेन गच्छतीति पदेन सङ्गतिः स्यात्।

तात्पर्यार्थविवेचनम्

इहाकाङ्क्षायोग्यतयोरात्मधर्मत्वे त्वनुपचारापि [अनुपचारादपि] पदार्थात्। **वक्ष्यमाणेति**। जात्यादिरूपाणां समन्वये संबन्धे विशेषवपुः समन्विताकारस्तथाभिधेयादि विलक्षणस्वरूपः अपदार्थोऽपि वाक्यार्थ इति। एकैकपदालभ्योऽपि आकांक्षादीतिकर्तव्यतासचिवैः पदैः संभूयोच्चार्यमाण इत्यर्थः।

---

१. पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकांक्षा (तर्कसंग्रहः)।

२. अर्थाबाघो योग्यता (तर्कसंग्रहः)।

३. पदानामविलम्बेनोच्चारणं सन्निधिः (तर्कसंग्रहः)।

अभिहितान्वयवादिनां मतमिति । अभिहितानामभिधया लक्षणया वा बोधितानां पदार्थानां पश्चात्तात्पर्याख्येन वृत्यन्तरेणान्योन्यान्वयं ये मन्यन्ते, **नैयायिकादयः** तेषां तात्पर्यार्थः पृथगभिमत इति भावः ।

तौतातितादयस्तु लक्ष्यो वाक्यार्थ इति वदतो वृत्तिमिमामेव द्वितीयलक्षणानाम्ना व्यवहरन्ति । न तु गङ्गायां घोष इत्यादौ तटाद्यनुवक्ष्यमाणलक्षणाविषयतया वाच्य एवेति चैत्र गामानयेत्युत्तमवृद्धोपदेशात् । सास्नादिमृत्पिण्डे मध्यमवृद्धेन देशान्तरं सञ्चार्यमाणेन ।

चेष्टया तस्य वाक्यस्य तदनुरोधकतामनुमाय अनन्तरं गां नयाश्वमानयेति प्रयोगेषु आवापोद्वापदृशा क्रियापदार्थान्वितेषु कारकपदार्थेषु, कारकपदार्थान्विते च क्रियापदार्थेऽन्वयव्यतिरेकाभ्यां बालस्तस्य पदस्य शक्तिमवधारयति । ततश्च प्रयोगकाले तस्य प्रथमत एव तथाविधैव बुद्धिर्जायत इति । किमभिधातिरिक्ततात्पर्यवृत्या **कार्यमिति** अन्विताभिधानवादिनः **प्रभाकरगुरोर्मतमित्यन्वयः** ।

अर्थत्रयस्य व्यंजकत्वनिरूपणम्

सर्वेषां वाच्यादीनां प्रायशः क्वचित्कस्यचिदित्यर्थः । **माए इति** ।

मातर्गृहोपकरणमद्य खलु नास्तीति कथितं त्वया ।
तत् भण किं करणीयं एवमेव न वासरस्तिष्ठति ॥

इह मातरिति संबोधने काकुः । स्वस्यास्तं नियम्यतामाविष्करोति । तथा च मय्यवस्थितायां तव गमनमनर्हमिति । अद्य खलु नास्ति न त्वन्यदारा तेन सकृद्बहिर्गमनं दोषायेति त्वया कथितं न तु मयैवेदं स्वयमुन्नीतम् ततश्च नान्यथा शङ्क्ष्ठा इति । **भणेति** । न तु स्वयमेव किञ्चिदाचरामीत्यादि व्यञ्जनवशाद्वाच्यरूपोऽर्थः एतत्प्रतिपादिकायाः स्वच्छन्दविरहेच्छां व्यनक्ति, अत्र वाक्यार्थस्य वाच्यत्वं **गुरुनयाश्रयात्** ।

साहेन्तीति । कथयन्ती सुभगंक्षणे दूनासि मनंकृते [मत्कृते] ।
सद्भावस्नेहकरणीयसदृशं तावद्विरचितं त्वया ।

सद्भावः साधुता । स्नेहोऽनुरागः । अत्र वक्त्रादिवैशिष्ट्यसहकृतेन सद्भावेत्यादिना तद्विपरीतं शत्रुत्वाचरणं लक्ष्यते । लक्षणाफलञ्च ।बोद्धव्यदूत्या सद्भावाद्यभावस्यातिशयः ।

तेन चेति । तेन क्षणे दूतीगतानिष्ठकर्मणा लक्ष्येण । इह **चण्डिदासपण्डिता** व्याचक्षते । [1]शत्रुत्वमाचरितमिति लक्ष्यमित्यत्र लक्षणं लक्षणामूलव्यङ्ग्यम् । स तु वृत्तिकृतोक्तं कामुकविषयसापराधत्वप्रकाशनं व्यङ्ग्यमिति तच्छत्रुत्वाचरणस्य व्यङ्ग्यत्वेऽसतबोधानां मतमनुसृत्य द्वितीयव्यङ्ग्यप्रदर्शनपरमिति व्याख्यातम् । इदं तेषां प्रियसीसंभाषण [प्रेयसीसंभाषण] कालपतितमिति भ्रान्तिकृतत्वादुपेक्षणीयम् ।

तथाहि । सद्भावेत्यादेर्विपरीतं यत्सद्भावादि तदेव पर्यायान्तरेण शत्रुत्वाचरणम् । यच्च तत्र लक्षणामूलव्यङ्ग्यस्य सद्भावादेरतिशयो नासौ लक्ष्यार्थस्य व्यङ्ग्यः, किन्तु लाक्षणिकशब्दस्य अन्यथाभिधालक्षणामूलत्वेन शब्दव्यञ्जनाया द्वैविध्यमसमंजसं स्यात् । तत्तु प्राचीनैरेवोक्तम् तदत्र योऽसावसद्भावाद्यतिशयरूपो लक्षणामूलो व्यङ्ग्यः तत्र शब्दस्य व्यञ्जना कामुकविषयापराधे । व्यङ्ग्यस्य तु विपरीतलक्षणा लक्ष्यार्थाच्छत्रुत्वाचरणादेरुद्भवाद् व्यञ्जनाया आर्थीत्व, मत्प्रियं रमयन्त्येति च बोद्धव्यगतापकारित्वरूपवैशिष्ट्यसूचनं, तस्य सद्भावेत्यादिपदानां वैपरीत्यप्रकाशकत्वं, तदभावे मुख्यार्थबाधप्रतिभासाभावात् कुतो लक्षणया प्रवेश इत्यर्थ [इत्यल] मुपजीव्यैः सह कलहपरिग्रहेण ।

> व्यंग्यार्थस्य व्यञ्जनामाह । उवणिच्चलेति ।
> पश्य निश्चलनिष्पन्दा विसिनीपत्रे राजते बलाका ।
> निर्मलमरकतभाजनप्रतिष्ठिता शङ्खशुक्तिरिव ।।

निश्चलेति । निरुद्यमेति संबोधनम् [णिच्चलणिप्पन्दा] शङ्खशुक्तिः शङ्खपात्री ।

अथवेति । अतः सङ्केतस्थानमेतदिति तृतीयव्यङ्ग्यस्य विकल्पे पूर्वव्यङ्ग्यद्वयेपि तदवस्थमेव ।

वाचकस्वरूपम्

वाचकादीनां पूर्वकृतविभागानां त्रयं विशेष श्री [?] लक्षणं अभिधत्ते समयस्मरणावांतर व्यापारः सन् स्मारयति । संकेतस्यार्थ प्रतीतिहेतुत्वं व्यतिरेकमुखेनाह इहेत्याद्यु [पाधावे] नेत्यन्तेन । इह शाब्दे व्यवहारे साक्षादित्यस्यार्थः व्यवधानेन [अव्यवधानेन] ।

---

१. दीपिका (चण्डिदासकृता) reads तदेतदाह **शत्रुत्वमिति** । लक्ष्यमिति लक्षणामूलव्यंग्यमित्यर्थः । Beyond this remaining version is not found in the printed काव्यप्रकाशदीपिका ।

एवं हि यन्नामा यत्र चैत्यादिस्तन्नामा विषयोऽपि स इत्युक्तप्रकाराद्दाश्रित-चैत्यादिनाम्नो विषयादेरिव सान्तरायसङ्केतिता वैलक्षण्यं सूचितम् । स शब्दस्त-स्यार्थस्य ।

अथ कोऽसौ सङ्केतितोऽर्थ इति जिज्ञासायामाह **संकेतित इति**। जात्यादिरि-त्यादिशब्दात् गुणक्रियाद्रव्याणीत्यर्थः[संज्ञानीत्यर्थः]प्रयोजनमुदकहरणादि[काहरणादि] तस्य क्रियानिर्वाहः। व्यक्तिर्घटादि ।

आनन्त्यादिति। व्यक्तिसङ्केतस्याशक्यत्वं सूचितम् ।

व्यभिचारादीति। यादृशरेखोपरेखादिमति सङ्केतो गृहीतस्तदन्यथाभूत इत-रस्मिन् घटशब्दवाच्यताप्रतीतिर्नस्यादिति भावः ।

तत्रेति। व्यक्तौ गौरित्यादीनां [सङ्केतो] न प्राप्नोतीत्थं नानामयमर्थः [पदानामयमर्थः]। व्यक्तिसङ्केतपक्षे गौरित्यादीनां त्रयाणां अभिमदाग्नामेकव्यक्तौ [अभिहितानामेकव्यक्तौ] समभिव्याहारात्। गोत्वेन गौः, शुक्लगुणेन शुक्लश्चलन-क्रियया चल इत्येवं प्रकारो विषयविभागोऽपि कथं न स्यादिति तदुपाधौ तस्या व्यक्तेरुपाधौ जात्यादौ, न तूपाध्येयभूतायां व्यक्ताविति भावः **यदृच्छासन्निवेशित इति**। यदृच्छया भृङ्गग्राहिकतया सन्निवेशितश्चैत्रादि संज्ञाशब्दः। यद्यपि सजातीय-शून्येऽर्थे आनन्त्यव्यभिचारदोषाभावादुपाधिं विनापि संभवति वाच्यवाचकभावसम्बन्ध समयग्रहः, संज्ञाशब्दस्य च सुप्रवृत्तावुपाधित्वपरिकल्पनिबन्धने आत्मप्रियदोषः [आत्माश्रयदोषः] तथात्यव [तथाचात्र] तस्योपाधित्वं चैत्रादिनारोपित धर्म-विशिष्टत्वेनापीतरव्यवच्छिन्नत्वरूपविशेषप्रत्यायनादिति **ग्रन्थकृतोऽभिप्रायः**।

नन्वेवं संज्ञाशब्दस्येतरव्यवच्छिन्नस्य संज्ञाप्रवर्तकत्वमित्यन्योन्याश्रय इत्यपि वक्तृव्यङ्ग्यः खलु चैत्रादेरितरव्यवच्छिन्नत्वरूपो विशेषः स पूर्वसिद्ध एव। अन्यथा तस्य पृथग्धर्मित्वसिद्धेः। किन्तु तत्र विशेषे लोकव्यवहारप्रवृत्तये काचित्संज्ञा निर्दिश्यत इति सङ्गतिः।

वस्तुतस्तु चैत्रादिसंज्ञाया तदर्थ एव सङ्केतग्रहः। तस्य हि सजातीयशून्यत्वा-न्नानन्त्यव्यभिचारदोषः।

> यत्तु **चण्डिदास पण्डित** व्याचक्षते। [1]यदृच्छा भृङ्गग्राहिकतया सङ्केतनं तस्याः सन्निवेशः समर्पणम्। तत्सञ्जातमान्निति [तत् जातमत्रेति] यदृच्छासंनिवेशितः

१. दीपिका (चण्डिदासकृता) पृ० ३४।

सजातीयशून्यो देवदत्ताद्यर्थं इति तत् कष्टसृष्टं, कांचिद्व्यक्तिषु [कासुचिद्व्यक्तिषु] वैचित्राद्यर्थप्रवृत्तौ [चैत्राद्यर्थप्रवृत्तौ] चैत्राद्यर्थ एवोपाधिरिति सङ्गतिः । डित्थादिशब्दानामन्त्यबुद्धौत्याद्युत्तरग्रन्थविरुद्धञ्च ।

पदार्थस्य पदोद्देश्यधर्मिणः, प्राणनं प्राणो हानोपादानयोग्यताविशेषः सजातीयाद्व्यावर्तनम् ।

जातेः प्राणप्रदत्वे प्रामाणिकसम्मतिमाह **उक्तं हीति** । [१]भर्तृहरिणेति शेषः ।

स्वरूपेण जातिरूपोपाधिमन्तरेण, न गौः न गोव्याहारव्यवहारविषयः । नागौः नाश्वादिव्यवहारगोचरः ।

लब्धसत्ताकं जातिविशेषोपग्रहाल्लब्धव्यवहारयोग्यताकं शुक्लादिना गुणेन विशिष्यते विशिष्टव्यवहारपात्रं क्रियते ।

पूर्वापरीभूताः कार्यं कारणरूपतया सन्तानीभूताः । अवयवाः निष्पादकान्यङ्गानीन्धनानयनादीनि । यस्याः पाकादिप्रधानक्रियायाः तत्स्वरूपो वस्तुधर्मसाध्यपदवाच्यः ।

तस्य क्रियमाणतया निर्दिश्यत्वात् । **अन्त्येति** । अन्ते भवा अन्त्या उच्चरणानन्तरमुत्पन्ना एकैकधीः, तथा विषयीकृतं गवादिपदवदिहौपाधिप्रत्ययानन्तरमुपाधेयप्रत्ययो नास्तीत्यर्थः । डित्थादिशब्दानां स्वरूपं डित्थादिशब्दा एव । एषां चान्त्यबुद्धिनिर्ग्राह्यत्वमेव विशदयति **संभूतक्रमेति । [संहृतक्रमेति]** । क्रमणं क्रम उपाधिविग्रह पूर्वमुपाधेयग्रहणं, तदत्र संहृतं अस्थितं उपाधित्वेन, शब्दव्यहारनिर्वाहकत्वेन डित्थादिशब्द एव यदृच्छात्मः इत्यादिरूपेण चतुष्टयी चतुःप्रकारा जातिगुणक्रियायदृच्छाकल्पिकत्वात् । सुलक्षणरूपा । प्रवर्ततेऽनयेति प्रवृत्तिः प्रवृत्तिनिमित्तम् ।

एवञ्च शब्दानां प्रवृत्तेर्जात्यादिचतुर्विधोपाधिनिमित्ततांगीकारे परमा [परमाण्वादि] एवादिशब्दानां प्रवृत्तौ किं निमित्तमत आह **परमाण्वादीनान्त्विति भावपरोऽयं निर्देशः । गुणमध्यपाठादिति** ।

[२]परिमाणस्य हि गुणमध्ये पठनं, तेन तत् प्रभेदानां परमाण्वणुपरममहत्वादीनां जातित्वाद्युपगमे पृथिवीत्वादिना जातिसंकरापत्तेः । तथाहि पृथिवीत्वं जलपरमाणादि परिहारेण घटादौ, जलपरमाणत्वं च घटादिपरिहारेण जलपरमाण्वादौ वर्तते, तदुभयस्य च एकत्र पार्थिवपरमाण्वादौ समावेशादिति भावः ।

---

१. वाक्यपदीये ।

२. रूपरसगंन्धस्पर्शसंख्यापरिमाणं etc. (तर्कसंग्रहः)

गुणादीनाञ्चैककस्य प्रतिव्यक्तिभेददर्शने दृश्यानन्तर [दृश्यानन्त्य] व्यभिचार-दोषाशङ्का न कार्येत्याह गुणेति। यदृच्छाविषयो डित्थादिरर्थ एवात्र यदृच्छा आश्रया:, कुन्दकुमुदकौमुद्यादय: क्षीरकनकादयश्च प्रतिपदादितिथिविशेषादिलब्ध-न्यूनाधिकभावकलादिकलितचन्द्राद्यवयवाश्च तेषां भेदात् भेद इवेति। इह शुक्ल:शुक्ल इत्याद्यनुगतव्याहारव्यवहारान्यथानुपपत्तिक: स एवायं शुक्ल इत्यादि।

प्रत्यभिज्ञानिमित्तकश्च शवलं········वलेपादिषु गोत्वादि सामान्यवत् गुणादीनां भेदोल्लेखि प्रमाणबाध: तेनाश्रयोपाधिकतया गुणादितो न तात्विक इति भाव:। आलम्बनं प्रतिबिम्बाश्रय:।

जातिरेवेति पक्षं व्याकरोति हिमेति। परमार्थतो भिन्नेषु तारतम्यदर्शनात्। सामान्यवन्नैकैकरूपेषु अभिन्नमेकाक [त्वेना] भिधानं शब्दप्रयोग:। प्रत्ययो ज्ञानञ्च तयोरुत्पत्ति: शुक्लत्वादिसामान्यं शुक्लादिगुणेषु शुक्लादिपदप्रवृत्तिनिमित्तम्। एवञ्च शुक्लादिगुण [प्रयोगोऽ] पि भाक्त:। शुक्लादिपदप्रयोग इति भाव:। गुडतण्डुलपाका-दीति। एवमेव शुक्लादिगुणवत्सु शुक्लादिसामान्यवदेव रूपादिपरा द्वित्रिरूपस्य··· डादिपाकस्य पूर्वं द्रव्यादिनाशात्पूर्वं द्रव्यान्तरोत्पत्तिरूपस्य तण्डुलादिपाकस्याभिन्ना-भिधानप्रत्ययोत्पत्तौ पाकत्वादि सामान्यमेव निमित्तमिति भाव:।

बालेत्यादि डित्थादिशब्देषु स्वरादिभेदादभिन्नेषु प्रतिक्षणमिति। एकस्मिन् क्षणे कृशतयोपलभ्यमानडित्थस्य तदितरक्षणे स्थूलतयोपलभ्यमानत्वात्।

ये क्षणे क्षणेऽन्यभावोत्पत्तिमंगीकुर्वते तन्मतेन भिद्यमानेन बालस्थविरादिरूपेण डित्थाद्यर्थेऽभिन्नाभिधानप्रत्ययोत्पत्तौ डित्थादित्वसामान्यमेव निमित्तमिति भाव:।

अत्र शब्देष्वित्यनन्तरं चकार:, डित्थाद्यर्थ इत्यनन्तरं पूर्वोक्तसमुच्चयार्थ:। यद्यपि द्रव्यरूपो डित्थाद्यर्थ एक [त्र] शुक्लादिपाकादिकयोर्गुणक्रिययो: समकक्षतया निर्दिष्टुमुचितस्तथापि तद्वाचकशब्दोऽपि जातियुक्त इति प्रसङ्गात् कथनम्।

यत्तु[1] केचिच्चण्डिदासप्रभृतय: शब्देष्वित्यनन्तरं पूर्वोक्तसमुच्चयश्चकारो डित्थाद्यर्थ इत्यनन्तरं।

एतदनन्तरञ्चयौपम्यार्थो वाशब्द: शब्देष्वित्यनन्तरं पठनीय:, ततश्च शब्देष्वि-त्यनन्तरं वाक्यमौपम्यार्थं कल्पयंति तत्कष्टतरम्।

---

१. दीपिका (चण्डिदासकृता) (पृ० ३८) reads, बालवृद्धेत्यादि वृत्तौ चका-रवाकारौ पूर्वोक्तसमुच्चयौपम्यार्थौ व्यत्ययेन योजनीयौ।

तद्वानिति। तदस्यास्तीति तद्वान्, तच्छब्देन च जातिरित्युच्यते, [1]आकृति-जातिर्वा। तेन जातिरेव पदार्थो व्यक्त्याकृतिजातयः पदार्थ इति दर्शनद्वयमुपन्यस्तं भवति।

तत्र जातिमात्रे सङ्केतितस्यानुपयोगो जातेरर्थक्रियाकारित्वाभावात् व्यक्तिमात्रे त्वानन्त्यव्यभिचारदोषापात इति जातिस्तत्रोपलक्षणमिति **प्रथमः पक्षः**

द्वितीयपक्षे क्वचत्तु गौः पदा न स द्रष्टव्या इत्यादौ जातेः प्राधान्यं व्यक्ते-रङ्गभावः। सर्वगोषु प्रतिषेधावगमात्।

क्वचिद्गां बधानेत्यादौ व्यक्तेः प्राधान्यं, तत्र जातेरनुपयोगादङ्गभावः।

क्वचित् पिष्टमय्यो गावः क्रियन्तामित्यादौ त्वाकृतेः प्राधान्यं व्यक्तेरङ्गभावः, जातिस्तु नास्त्येव। सन्निवेशचिकीर्षामात्रेण गोशब्दे प्रयोगादिति। **अपोहो वेति**। क्षणभङ्गनये हि स्थिरस्य सामान्यस्याभावादितरव्यावृत्तिरेव समयग्रहविशेषः। **गौरवं** विस्तरः। न दर्शितं युक्तियुक्तया वाचा न प्रकाशितं, लोकप्रसिद्धेनैव व्यवहारेण प्रकृतस्य काव्याङ्गनिरूपणस्य निर्वाहादित्याशयः।

स इति। मुख्यनाम्ना अभिधानाम्ना व्यापारोऽयमुच्यत इत्यन्वयः।

लक्षणानिरूपणम्

संप्रति लाक्षणिके निरूपयितव्येऽनर्थसंहितोपाधेरुपहितप्रत्ययायोगात् प्रथमं तदुपाधिभूतां लक्षणां निरूपयति **मुख्येति**। बाधः पदार्थान्वयानुपपत्तिलक्षणः, न च यतः कुतश्चिद्यदेव तदेव लक्ष्यतेऽतिप्रसङ्गादित्यत आह **तद्योग इति**। तेन मुख्यार्थेन लक्षणार्थस्य सम्बन्धे रूढितोऽनादिवृद्धव्यवहारपरम्पराप्रसिद्धेः। अथ विकल्पे **प्रयोजनात्** प्रयोजनमुद्दिश्य। **यदिति** ययेत्यर्थेऽव्ययम्। **आरोपिता** स्वाभाविकेतरा ईश्वरानुद्भाविता वा, **क्रिया** शक्तिः। **कर्मणीत्यादि** लक्षणायाः प्रयोजकं हेतुत्रयं **मुख्यार्थबाधः**। **तत्सम्बन्धि क्वचिद्रूढिः, क्वचित्प्रयोजनञ्चेति**। तेन कर्णणि कुशल इत्यादौ कुशलशब्देन दर्भग्रहणाद्ययोगान्मुख्यार्थबाधः। विवेचकत्वाख्यसादृश्यं **सम्बन्धः**, प्रयोजनाभावाद्रूढिश्चेति हेतुत्रयम्। गङ्गायां घोष इत्यादौ जलमपादे [जलमयादि] घोषाद्यधिकरणत्वासंभवात् मुख्यार्थबाधः। सामीप्यादिसंबन्धः। घोषादेः शीतत्वपावनत्वादतिशयबोधनम् प्रयोजनमिति **हेतुत्रयपिण्डार्थः**।

---

१. आकृतिर्ग्रहणा जातिः। (सि० कौ० स्त्रीप्रत्ययप्रकरणम्) जात्याकृतिव्यक्तयः पदार्थाः।

इह कुशलशब्दे दक्षरूपस्यैव मुख्यार्थत्वात् मुख्यार्थबाधाभावाच्च लक्षणात कुशग्राहिकरूपस्य व्युत्पत्तिलभ्यत्वेऽपि मुख्यार्थत्वाभावात् अन्यद्धि शब्दानां व्युत्पत्ति-निमित्तमन्यच्चं प्रवृत्तिनिमित्तम् । व्युत्पत्तिलभ्यस्य मुख्यार्थत्वे "गौः शेत" इत्यत्रापि गमधातोर्डो प्रत्ययेन[1] व्युत्पादितस्य गोशब्दस्यापि लाक्षणिकप्रसङ्ग इत्यन्ये[2] तेनात्र कलिङ्गः साहसिक इति रूढावुदाहार्यम् ।

इह कलिङ्गशब्दो देशविशेषवाचकत्वात् मुख्यार्थबाधादाधार्याधारभावसम्ब-न्धाच्च कलिङ्गदेशस्थं पुरुषं लक्षयति ।

तथा प्रतिपादनात्मन इति । गङ्गातटे घोष इति आदिशब्दप्रतिपादनाद्यर्थे प्रतिपादनस्वरूपत्वात् शीतत्वपावनत्वातिशयादेः प्रयोजनात्-सान्तरो मुख्यान्तरित-स्तटादिस्तन्निष्ठस्तद्विषयः ।

लक्षणाभेदाः

एवं सामान्यत उक्तं लक्षणाद्वयं विभजते **स्वेति ।** स्वस्यात्मीयस्य वाक्यार्थेऽन्वयस्य सिद्धये निर्वाहाय । परस्य प्रकृतनिर्वाहोपयुक्तस्य यदाक्षेप आकृष्योपनयनं तद्वाक्यार्था-न्वये मुख्यार्थस्यात्मनोऽप्युपादानादुपादानम् ।

इह चाभिधेयापि [अभिधेयाविना] बोधितस्य कुन्ताद्यर्थस्य स्वातन्त्र्येण सिद्धस्यान्वयस्य निर्वाहाय पुरुषादेर्विशेषणतया पुनर्लक्षणीयत्वम् ।

यच्च परोऽन्वयारान्तरादिः [अन्वयार्थान्तरादिः] तत्प्रतिपद्यर्थं गङ्गादेः स्वस्या-त्मनः समर्पणम् । तत्सम्बन्धिमात्रस्योपलक्षणात् लक्षणम् ।

चः पूर्वोक्तसमुच्चये । **इतीति ।** यस्मादिदमुपाधिद्वयं ततो हेतोः सा पूर्वोक्ता रूढिप्रयोजनोपाधिलक्षणा शुद्धैव, प्रत्येकं द्विधा । गौण्यन्तर्भावे पुनर्भेदान्तरमप्य-स्तीति भावः ।

सेति । पूर्वोक्ता रूढ़िलक्षणा प्रयोजनलक्षणा च ।

इह च गवादिपदेषु जात्यभेदसङ्केतत्वाभिहितायां त········दुपहितामु व्यक्तिषु लक्षणया बोधितासु तात्पर्यापरनाम्ना द्वितीयलक्षणयान्वयो बोध्यत इति अभिहिता-

---

१. गमेर्डोः (उणादि २/२७) ।
२. अन्ये (अस्मदादय इत्यर्थः) cf. टीका on साहित्यदर्पण पृ० ३६) ।

न्वयवादिनां मतं कटाक्षयति-**गौरिति**। गौरित्यादि श्रुत्या गोशब्दसामानाधिकरण्य-श्रवणे न वेदाख्यया [?] वा विहितम्। मम गोशब्दाभिहिताया जातेरनु बन्धन·······प्रतीतिबोधनमनुपपन्नमिति जातिव्यक्तिरूपं स्वलक्षणमाक्षिपति अचेतनायामपि जातौ ग्रन्थकृद्वैदग्ध्योक्त्या चेतनव्यवहारमारोपितवान्। **उच्यते** अभिधया बोध्यत इत्यर्थः।

विशेष्यमित्यादि। विशेष्यं व्यवच्छेद्यं विशेषणे व्यवच्छेदके, क्षीणशक्तिर्विश्रान्त-रूपा-शब्दबुद्धिकर्मणां विरम्य व्यापाराभावादिति भावः।

नह्यत्रेति। जातिव्यक्तिपदार्थौदासीन्येन हि लोकमाश्रित्य रूढिप्रयोजनयो-श्चिन्ता। एवञ्चार्थप्रतिपत्यादि फलस्यादि फलस्यानादिप्रयोगस्य सद्भावेऽपि न लक्षणेति भावः।

तर्हि कथं व्यक्तिप्रतीतिर्विद्यत [भिद्यत] इत्याह **व्यक्तीति**। कर्ता संमुखीनः, कर्म कटादिः। अथ न केवलमविनाभावाद्व्यक्तेराक्षेपो न्याय्यः। किन्तु प्रस्तुता-न्वययोग्यतयापि इति बोधयितुं योग्यविशेषाक्षेपे निदर्शनमाह **प्रविशेति**। प्रकरण-वशात् गृहमाक्षिपति **पिण्डीमिति च**। भक्षयेति क्रिया एतच्च गृहीतसङ्केततया जात्यविनाभावादाक्षिप्तासु व्यक्तिषु द्वितीयलक्षणया **संसर्गबोधनमङ्गीकुर्वतां मतानुसारेण ग्रन्थकारेणोक्तं** तद्गतस्त्वविनाभावस्यानुसन्धानमन्तरेण नाक्षेपकत्वम्। यथा धूमादिगतस्य वह्न्यादेः।

इह च जात्या व्यक्तेराक्षेपेऽविनाभावानुसंधानस्यानुपलक्षिबाधिततया जाति-मात्रेणाक्षेपोऽङ्गीकार्य्यः। अत्र च न लक्षणा पूर्वोक्तादेव न्यायात्।

न च तात्पर्यस्य संसर्गमात्रबोधननैयत्यात्, तेन तत्रान्वययोग्याया व्यक्तेः शब्द-बोधितत्वम् विना शाब्देऽन्वये प्रवेशासंभव इति जात्यभिधायके शब्दे वृत्यन्तरमेवाङ्गी-कार्यमिति **अभियुक्तानां मतम्**। किञ्च संसर्गापिगमार्थमुपात्तानि पदानि संसर्गस्य मुख्याङ्गसंसृज्यमानं व्यक्तिरूपं साक्षान्न बोधयन्ति। बहिरंगन्तु, तदुपाधिभूतं सामा-न्यमेव बोधयन्तीत्यसङ्गतम्।

येत्वाहुः-व्यक्तिसध्रीचीनायामेव जातौ सङ्केत इति। तैरपि प्रकृतस्वलक्षणस्या-सङ्केतितत्वात्, सङ्केतितस्यचेदानीमभावात् प्रकृतसंसर्गयोग्यव्यक्तिप्रतीतौ शक्यनन्तर [शक्त्यन्तर] मवश्यमभ्युपेयम् सामान्यस्य सर्वविशेषगर्भाकारात्। तत्संख्ये तेन सर्वविशेषज्ञाने तु सर्वस्यापि सर्वज्ञतापत्तिः। प्रथमोपदेशकाले सर्वव्यक्तीनां समुग्धा-कारतया सामान्यालिङ्गततया प्रतीत्यङ्गीकारे पुनराधुनिकस्यापि स्वलक्षणस्य

प्रथमोपदेशकालवत् समुग्धाकारेणैव प्रतीतिः स्यात्। ततश्चान्वयोपपत्तिप्रतिपादिकायाः साक्षात्प्रतीतेः पदस्य शंक्यनन्तरं [शक्त्यन्तरं] विना किं बीजमित्यलं बहुना।

पीनेत्यादि। दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यते इति तदर्थकल्पनमर्थापत्तिरित्येत [रित्यन्तेन] **भाट्टा** विवृणुते। **दृष्ट इति**। प्रत्यक्षानुमानोपमानार्थापत्त्यभावलक्षणैः पञ्चभिः प्रमाणैरुपलब्धशब्दस्य प्राधान्यख्यापनार्थं भेदेन निर्दिशति **श्रुत इति**। शब्दलक्षणेन ज्ञातोऽर्थो वस्तुविशेषः अन्यथा नोपपद्यत इति, [१]शाब्दीह्याकाङ्क्षा शब्देनैव पूर्यत इति दर्शनात्, रात्रौ भुंक्त इति वाक्यशेषः कल्प्यते।

प्राभाकरगुरुस्त्वाह-दृष्टःश्रुतो वेति। लौकिकीयमनास्थोक्तिः। ततो लोकप्रसिद्धा उपलब्धिमात्रे वर्तते, न तु विकल्पप्रतिपादन इति। शब्देऽपि हि कल्पितेऽर्थप्रतीत्या एव प्रकृतसमाधानम्। तद्वरमर्थ एव कल्प्यतामिति। तेन **भाट्टमते** श्रुतार्थापत्तौ रात्रौ भुंक्त इति शब्दः कल्प्यते। **गुरुमते**ऽर्थापत्तौ रात्रिभोजनमर्थः। एवेत्युभयनयेपि पीन इत्यादौ रात्रिभोजनस्य वाक्यार्थप्रतीत्यन्तरबोधितस्य अर्थापत्तेरेव विषयत्वम्। न त्वन्वयबाधजीविताया लक्षणाया अवकाश इति मीमांसाद्वयबलाबलजिज्ञासायामनस्थोक्तं [मनन्तरोक्तं] **श्रुतार्थापत्तेरर्थापत्तेर्वेति**।

लक्षणलक्षणामुदाहरति **गंगायामित्यादि**। स्वार्थमभिधेयम्। जलमयसूयं [जलमयरूपम्]।

शुद्धत्वे हेतुमाह **उपचारेणेति**। अत्यन्तं विशकलितयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमुपचारः। स च गौर्वाहीक इत्यादि। अर्थोकियो [अर्थक्रिययो]रुदाहरणयोरस्तीत्यर्थः। तदेतदाह-अनयोः शुद्धभेदयोः लक्ष्यस्य, तटादेर्लक्षकस्य जलमयादेर्न भेदसदृशं, ताटस्थ्यमौदासीन्यम्। यथा-गौर्वाहीकयोः, किन्तु सामीप्यात् कतिपयस्य गुणस्य ग्रहणयोग्यतासद्भावाद्भेदाभेदौदासीन्यमिति भावः। तत्वं गङ्गादित्वं, प्रयोजनं शीतत्वादिः, को भेदः को विशेषः?

> इह गङ्गातटयोस्तादात्म्यप्रतीत्या तटे शीतत्वाद्यतिशयः गौर्वाहीक इत्यत्र च गोर्वाहीकयोस्तादात्म्यप्रतीत्या वाहीके जात्याद्यतिशयः प्रतीयते इति व्यर्थोऽयमुपचारेतरलक्षणाप्रयासोऽयं इति **ग्रन्थकारस्य** इति [२]**चण्डिदासपण्डितानामविचारिताभिधानम्**।

---

१. मीमांसान्यायप्रकाशः

२. दीपिका reads is this ननु गौर्वाहीक इत्यादावपि वाहीकादेर्गो-तादर्थ्यादिरेवाविवेकित्वाद्यतिशयप्रतीतिफलोपासनीया, गवादिभेदराहित्यमात्रप्रतीतौ हि गोगतधर्मादिसदृश धर्माधिकरणत्वमात्रप्रतीतिफलायां 'गो सदृशो वाहीक' इत्यादि-

तथाहि-सादृश्यसंबन्धिनो विवेचरससंबन्धिनोर्न सर्वथौदासीन्येन वृत्तिः। किन्तु सामानाधिकरण्यप्रयोगात्तस्याः स्थगनमात्रम्। तदुक्तं [२]शारीरिकमीमांसाभाष्यव्याख्याने **वाचस्पतिमिश्रैः**। "अपि च परशब्दः परत्र दृश्यमानगुणयोगेन वर्तत इति यत्र प्रयोक्तुः प्रतिपत्तेः संप्रतिपत्तिः"। इति।

स गौणः स च भेदप्रत्ययपुरः सर इत्यनयोर्भेदयोरित्यादिना ग्रन्थेन ग्रन्थकारोक्ते गौणशुद्धविभागे न काचिदनुपपत्तिः। किन्तु गुणसंबन्धस्यापि संबन्धानन्यत्वात् मुख्यार्थबाधादिहेतुकायां लक्षणायामन्तर्भावो **ग्रन्थकारस्याभिमतः**।

भेदरूपं न ताटस्थ्यमिति वचनेन **भट्टमुकुलमतं** च दूषितम्।

एवं चतुः प्रकाराया लक्षणाया आरोपाध्यवसानाभ्यामुपाधिभ्यामष्टप्रकारत्वं [अष्ट ?] दर्शयन्नाह **सारोपेति**। अन्या तु एका पुनः सारोपा नाम।

लक्षणास्वरूपमाह **यत्रेति विषयी**त्यस्यार्थं आरोप्यमाणो गवादिः। **विषय** इत्यस्यार्थं आरोपविषयो वाहीकादि। उक्ताविस्यस्यार्थोऽनपह्नुतभेदौ शाब्दाविति यावत्। एतदेव विशदयति **सामानाधिकरण्येनेत्यादि**।

तथेति चार्थे। एवञ्च विषयविषयिणोः सामानाधिकरण्यनिर्देशादेवात्र मुख्यार्थ-बाधः आरोपो नामा निगीर्णस्वरूपस्यान्यतादात्म्यप्रतीतिः।

तत् कर्ता सारोपेऽन्वर्थनाम्नापि गतार्थत्वेऽपि स्फुटीकरणार्थमेव लक्षणानिर्देशः **विषयीति**। आरोप्यमाणेन गवादिना निगीर्णेऽध्यवसिते आरोपविषये वाहीकादौ, विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोऽध्यवसानं, तत्कर्त्री साध्यवसानिका। अत्रापि-लक्षणानिर्देशः पूर्ववत्।

भेदावित्यादि। इमौ प्रक्रान्तौ, सम्बन्धान्तरं सादृश्यादन्यत् कार्यकारणादि। सादृश्याद्गौणौ सम्बन्धान्तरतश्च शुद्धाविति यथासंख्यं सम्बन्धः। एवञ्च पूर्वोक्ताना-मष्टानां भेदानां प्रत्येकं द्वैविध्येन लक्षणायाः षोडशभेदाः।

प्रयोगनिर्विशेषत्वं, न चैतत् भेदः प्रत्ययस्थगनादेव तद्धर्मातिशयप्रत्यय इति न्याय्यं, न चैवंविधयुक्तिप्रसरनिषेधं प्रकृतेऽपि जागर्त्याज्ञाडिण्डिमारावः। तस्मादलीक एवैता-वानुपचारकत्वविवेचनाय प्रयास इति चेत् सत्यमेतत्-किन्तु प्राचीनप्रणयमनुरुन्धानेन ग्रन्थकृतेत्थमभिहितम्। (पृ० ४८)।

२. This reference, attributed to Vachaspati Misra is not found in the printed text of Bhamati.

आरोपाध्यावसानरूपौ भेदौ सादृश्यहेतू सन्तौ उदाहरतीत्यन्वयः। गौर्वाहीक इत्यत्र सारोपा गौणी, गौरयमित्यत्र साध्यवसाना गौणी। अत्र चायमिति वाहीकादि-विषयप्रयोगप्रकटनमिति **प्राच्या** व्याचक्षते तदसङ्गतम्। विषयप्रकटने सारोपा-पातात् तेनेदं शब्दस्य सजातीयव्यावर्तनपरं विषयभूतं वाहीकनिगरणेनोद्दिष्ट विषयि-रूपगवार्थत्वमेव **ग्रन्थकारमतमिति** सुसमञ्जसम्।

अत्र हीति। स्वार्थो गौर्लक्ष्यमाणा लक्षणाबोध्यमाना। अपिशब्दात्तेषां लक्ष-माणत्वमात्रेण विश्रान्तिर्नास्ति तदेतदाह अत्र **गोशब्दस्येति**। परोऽर्थो वाहीकः, तस्याभिधानेऽभिबोधने।

केचिदिति। तन्मते अरुचिं सूचयति। तथा हि। गोशब्दोऽगृहीतसङ्केतं वाहीकार्थं कथमभिधया बोधयेत्। गोशब्दार्थमात्रबोधनविरताया अभिधायाश्च कुतः पुनरुत्थानं शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इति न्यायात्। अभिधान्तरकल्पने तु कल्पना-गौरवम्।

मतान्तरमाह स्वार्थेत्यादि। गोशब्दस्य स्वार्थसहचारिणो गुणा जाड्यमान्द्यादय एव। तदभेदेन तैः सह साजात्येन सम्बन्धेन परोऽर्थो वाहीकादिः तद्गता गुणा एव न तु गुणी। अत्रैवकारस्य काकाक्षिन्यायेन लक्ष्यन्त इत्यत्रापि सम्बन्धः। तेन लक्ष्यन्त एव। न तु समनन्तरोक्तदर्शनवद्वाहीकार्थोऽभिधीयते।

एतदेव विशदयति **न त्विति**। अत्रैत एव प्रष्टव्यः। अत्र गोशब्दात् वाहीकार्थः प्रतीयते न वा? आद्येऽपि गोशब्दादेव वा लक्षिताद्गुणादविनभावाद्वा?

न प्रथमः, समनन्तरोक्तादेव न्यायात्।

न द्वतीयः। अविनाभावलभ्यस्यार्थस्य शाब्दींत्याकाङ्क्षादिनयेन शाब्दे नये प्रवेशासंभवात्।

[न[द्वितीयः यदि हि गोशाब्दाद्वाहीकार्थो न प्रतीयते तदास्य वाहीकशब्द-सामान्याधिकरण्यमसमंजसं स्यात्। किञ्च वाहीकादिगुणानां गोशब्दस्यैवार्थेन संब-न्धाभावात् कथं लक्षणमित्यत्रापि दर्शनेऽपरितोषात्।

पक्षान्तरमाह **साधारणेत्यादि**। साधारणो गुणो जाड्यमान्द्यादिः. तदाश्रयेण संबन्धेन लक्ष्यते लक्षणया विषयीक्रियते। न तु तद्गतगुणातिरेकोऽपि तस्य वृत्यन्तर-

गम्यत्वादिति भावः। एवकारेण तद्गत गुणरूपान्ययोगव्यवच्छेदः। **अपरे सांप्रदायिका** इति भावः। एतेन मुख्यार्थबाधत्यादिलक्षणानुगमात्। गौणाख्याया वृत्तेर्लक्षणायामन्तर्भावः सूचितः।

अत्र च प्रामाणिकसम्वादमाह **अभिधेयेति**। प्रतीयतेऽनयेति प्रतीतिः। जातिमात्रसङ्केतपक्षे लक्ष्यमाणस्याक्षिप्यमाणस्य गुणौ यद्वा लक्ष्यमाणैरभिधेयार्थविशेषणतया प्रतीयमानैर्गुणैर्योगात्। सम्बन्धात्सादृश्यादिति भावः।

अयमाशयः। गौण्यामपि मुख्यार्थबाधसंबन्धरूढिप्रयोजनान्यतरार्थबोधस्तावदस्त्येव। किन्तु यद्यपि सम्बन्धानन्तरवत् [सम्बन्धान्तश्वत्] सादृश्यस्य सम्बन्धता साक्षान्न भवति। तथापि सम्बन्धस्य साक्षादसाध्यत्वेन वैचित्र्यमात्रं किञ्चदवान्तरवैधर्म्यमाधत्त इति लक्षणाविशेष एव गौणी।

ननु यद्यविनाभावो लक्षणानिमित्तं तदोक्तलक्षणाभेदेषु का गतिरित्याह **अविनाभाव इति नान्तरीयकत्वम्**।

तदन्वयव्यतिरेकार्थविधायत्वं उक्तं उपादानलक्षणानिरूपणावसरे।

गौरनुबन्ध्यः इत्यादावित्यादिना शुद्धसारोपाध्यवसानयोरुदाहरति **आयुरिति एवमादाविति** आरोपाध्यवसाने कार्यकारणभावादिसंबन्धहेतुका लक्षणपूर्वा मूलम्। यत्र तत् कार्यकारणभावादिलक्ष्यसंबन्धो पूर्वं यथाभ्यां तथा भवत इति क्रियाविशेषणम्। लक्षणपूर्वमिति पाठे कार्यकारणसम्बन्धादिलक्षणं लक्षणा तत्पूर्वमित्यर्थः। **ताद्रूप्येति**। **सर्वथैवेति**। यथासंख्यं सम्बन्धः।

गौणसारोपायां भेदेऽपि सर्वथैवाभेदावगमः प्रयोजनम्। अवान्तरमिति शेषः। जात्याद्यतिशयप्रतीतेरेव मुख्यप्रयोजनत्वात्। तेन पूर्वत्र गोनिष्ठं जाड्यं वाहीके वर्तत इति प्रत्ययः। परत्रास्यैत्र दृढतरमन्यूनानतिरिक्तत्वेन वाहीके वृत्तिरिति प्रत्ययः। अत एव पूर्वत्र रूपकालङ्कारः। द्वितीये च भेदेऽभेदरूपातिशयोक्तिः।

यत्पुनः केचिदाहुः साध्यवसानिकायां विषयाप्रयोगाद्भेदस्य बुद्ध्यनारोहात्। वाहीके गोप्रत्यय एवेति तन्न, तथा सति भ्रान्तिमदलङ्कारवद्भ्रान्तिज्ञानापातात्। शुद्धसारोपायामन्यान्याक्षराणि [मन्यानिवैलक्षण्यानि]। तद्वैलक्षण्येन तदतिशयेन शुद्धसाध्यवसानिकायां विषयस्यानिर्देशेन तादात्म्यप्रतीतिदार्ढ्यादिव्यभिचारेण कार्यमासुरादि तत् करत्वम् [कार्यकारित्वादि]। इदश्चात्र मुख्यं प्रयोजनं अवान्तरं तु पूर्ववदभेदावगमः।

सम्प्रति विषयव्याप्तये संबन्धभेदमुदाहरति **क्वचिदित्यादि अग्रहस्त इति।** अत्राग्रश्चासौ हस्तश्चेति **समासे हि** अग्रमात्रेऽवयवेऽवयविनो **हस्तस्य** प्रयोगः। एकदेशदाहेऽपि ग्रामो दग्ध इति धहधयवे [दहनावयवे] समुदायोपचारात् अभक्षा [अतक्षा] ब्राह्मणादिः।

एषाञ्च षोडशानां लक्षणाभेदानां इहादर्शितान्युदाहरणानि **मम साहित्य-दर्पणेऽवगन्तव्यानि**[1]।

षड्विधेति। रूढिप्रयोजनोपादानलक्षणारोपाध्यवसानैः षड्भिरुपाधिभिर्द्विधा उक्ता। षोडशप्रकारा यस्याः सा षड्विधा, न तु षट्प्रकारा।

आद्यभेदाभेदाभ्यां प्रथमोक्तोपाधिभ्यां रूढिप्रयोजनाभ्यां सह यद्वा प्रथमं रूढि-प्रयोजनाभ्यां सामान्यत उक्तं लक्षणाद्वयं भिद्यते। **अद्याभेदाभ्यामिति**। भेदावुपा-दानलक्षण [लक्षित] लक्षणे। ताभ्यां सह इति **ग्रन्थसङ्गतिः**।

संप्रति एतावल्लक्षणाप्रपञ्चप्रयोजनरूपंव्यङ्ग्यद्वयमवतारयति **सा चेति।** सा लक्षणा।

प्रयोजनं हीति। वक्ष्यमाणरीत्येति शेषः।

तच्चेति गूढम्। सहृदयैकसंवेद्यम्।

अगूढं सहृदयासहृदयसाधारणं, आभ्यामेवोपाधिभ्यां ध्वनिगुणीभूतव्यङ्ग्यौ **वक्ष्येते**। वा शब्दः समुच्चये।

अत्र विकसितत्व-वशितत्व-समुच्छलितत्वापास्तसंस्थत्व मुकुलितोद्धूरत्व-मोदनैः प्रसरण-प्रश्लेषोल्लासविपय-महस्रसंचरणोद्भेदयोग्यत्वविजृम्भणानि लक्ष्यन्ते, तेषा-मतिशयश्च सहृदयैकगम्यो विद्यते।

उपदिशतीति। आविष्कारो लक्ष्यते। तदतिशयश्चाभिधेयवत् असहृदैरपि स्फुटं प्रतीयते।

त्रिधेति। अव्यङ्ग्यत्वगूढागूढव्यङ्ग्यैस्त्रिभिरुपाधिभिस्त्रिधा। एतेन पूर्वोक्तानां षोडशानां भेदानां मध्ये रूढावष्टौ, प्रयोजने च येऽष्टौ भेदास्तेषां प्रयोजनरूपव्यङ्ग्यस्य गूढागूढत्वेन षोडश भेदाः। किञ्च तस्यैव व्यङ्ग्यस्य धर्मिधर्मनिष्ठत्वेन प्रत्येकं द्वैविध्यात् द्वात्रिंशदिति पिण्डने [गणने] चत्वारिंशल्लक्षणाभेदाः।

---

१. द्र० साहित्यदर्पणः अ० २. ८-९ कारिका गतवृत्तिः।

अव्यङ्ग्या रूढ़िलक्षणा। एवमुपाधिरूपां लक्षणां लक्षयित्वा **तदुपाधेयमाह तद्भूरिति**। एवञ्च लक्षणार्थो लक्षितप्रायः।

व्यञ्जनानिरूपणे तर्कप्रस्तावः

संप्रति व्यञ्जके शब्दे लक्षयितव्ये तदुपाधौ व्यञ्जनायां निरूपयितव्यायां स्पष्टप्रतिपत्तये प्रतिपदोक्तलक्षणामूलायामस्यां विप्रतिपत्तिं निराकरोति **तत्रेति**। तत्र प्रयोजनलक्षणावति काव्ये, समुपास्यते आद्रियते, एकशब्देनान्ययोगव्यवच्छेदः। लक्षणाशब्दो गङ्गादिः, तत्प्रतिपत्तिः प्रयोजनावबोधः।

नाभिधेति। तत्र शीतलत्वादिधर्मबोधने। अत्र च नापि तात्पर्यशक्तिः, तस्याः संसर्गमात्रबोधनपर्यवसानादिति पूरणीयम्। अन्यथात्वे चाभिधातात्पर्यलक्षणाभ्यां व्यापारान्तरेण गम्या इत्युपरितनोपसंहारग्रन्थस्याघटना स्यात्।

हेत्विति। मुख्यार्थबाधादीत्यादिशब्दात् मुख्यार्थसंबन्धः रूढ़िप्रयोजनयोरन्यतरच्च हेत्वभावमेव दर्शयति **लक्ष्यमिति**। लक्ष्यं तटम्। अत्र तटे बाधान्वयानुपपत्तिः, फलं पाव [न] त्वादि, तद्धि गङ्गादिगतमेव वास्तवं तत्तादात्म्यप्रत्ययबलादेव हि तटादिगतं प्रतीयते। **न प्रयोजनमिति**। पावनत्वादिप्रयोजनं हि यदि लक्ष्यं तत्र नास्त्येव रूढ़िः। प्रयोजनं पुनः किमनुभूयत इति भावः। **नचेति** गङ्गादिशब्दस्थलस्खलद्गतिरिति गङ्गादिशब्दोऽत्र स्खलद्गतिः सन् यमर्थं बोधयति तस्यैव तटादेर्लक्ष्यत्वम्, पावनत्वादौ तु स्रोतोऽविनाभावित्वात् प्रकारान्तरेण बोधयितुं शक्यनास्य [**शक्यते** अस्य] गतिः स्खलिता। अयमेवार्थो वृत्तिकृता व्याख्यातः **गङ्गाशब्दस्तटमिव प्रयोजनं पावनत्वादि प्रतिपादयितुमस (म) र्थं इति**। यदा तु प्रतिपादयितुं समर्थ इति वृत्तौ पाठस्तदा लक्षणयेति शेषः। तद्वत् स्रोतसोव सबाधो घोषान्वयप्रतीतिशून्यः तत्तदा लक्षणार्थैर्लक्षणीयतया प्रतिकाद्य [प्रतिपाद्य] मभिमतः।

एतस्मिन्निति कारिकापदार्थः। **प्रयोजने लक्ष्ये इति**। ननु प्रयोजने लक्ष्ये कथं प्रयोजनान्तरं नास्तीत्याह **एवमपीति**। पावनत्वादिप्रयोजनं लक्ष्यमुपकल्प्य प्रयोजनान्तरस्य लक्षणाफलत्वकल्पने यत्फलनिमित्तं प्रयोजनं लक्ष्यते, तस्यापि लक्ष्यतया प्रयोजनान्तरं तस्यापि प्रयोजनान्तरमित्यनवस्था स्यादिति भावः।

मूलक्षतिकारिणीति। अस्यार्थः प्रकृताप्रतीतिकृदिति। प्रकृतं लक्ष्यत्वेन भवताङ्गीकृतं यत्प्रथमं प्रयोजनं तस्यैव एवंविधानत्वमूलत्वात्। लक्ष्यत्वेन परित्यागो न्याय्य इति भावः।

ननु यदि तटाद्यर्थमात्रबोधना लक्षणया विरामोऽभ्युपागम्येत तदैव पावनत्वादि-विशेषस्य प्रतिपत्तये तुरीया वृत्तिराश्रयणीया इति। इह च एतद्विशिष्टमेव तटं लक्षणा [लक्षणया] बोधयितुं [शक्यत] किं शक्त्यन्तरेणेत्यभिप्रायवान् प्रतिपक्ष-यति **नन्वित्यादि**। अधिकस्यार्थस्य पावनत्वादिवैशिष्ट्यस्य एतदुक्तं भवति, गङ्गा-तादात्म्येन तटप्रक्ष्यस्थ [तटप्रत्यय] स्तावत् लक्षणासाध्यः। गङ्गातादात्म्यप्रतीत्या च तटस्य दैवसिद्धमेव शैत्यादिविशिष्टत्वमिति। परिहरति **प्रयोजनेनेति**।

अयमाशयः। गङ्गातादात्म्यप्रतीतेः कार्य एव तटपावनत्वादिप्रत्ययः। न तु तदात्मा विशिष्टज्ञानस्य विशेषेण विशेष्यज्ञानपूर्वकत्वात्। इह हि गङ्गायामित्यत्र सरिद्भेद एवार्थः प्रतीयते न खलु तत्संलग्नः शैत्यादिरपि न हि धर्मिणि सङ्केत्ये तद्गतः सर्वोऽपि गुणादिसंकेत्यो भवितुमर्हति। ततश्च गङ्गातादात्म्यप्रत्ययेन तटस्य सरिद्भेदत्वमेव प्रतीयते। तत्कारणकश्च शैत्यादिप्रत्यय इति। तेन तटशैत्यादिप्रती-त्योर्हेतुफलरूपतया भिन्नकालीनत्वमेव वक्तुं युक्तमिति कथं द्वयोरेकवृत्तिमात्रविषय-त्वमिति। तदिदं वक्ष्यति **विशेषाः स्युस्तु लक्षित इति**।

इममेव हृदिस्थमर्थं व्याप्तिदर्शनेन द्रढयति **ज्ञानस्येति**। हि यस्मात् फलं ज्ञेयगतम्।

अयमाशयः। ज्ञानस्य खलु विषयोऽप्यन्यः ज्ञेयगतं फलं चान्यत्। तथाहि सविकल्पकज्ञानेन स्वविषये घटादौ हेयोपादेयता बुद्धिरुपजन्यते तया च घटादौ हानमुपादानं वेति। अतश्च लाक्षणिकस्य तटप्रत्ययस्य ज्ञेयस्तटादिरन्यः। फलं च तन्निष्ठं शैत्यादिज्ञानमित्यन्तेन तयोः कार्यकारणतया भिन्नकालीनत्वमेव भवितुं युक्तमित्यर्थः।

चण्डिदासपण्डितास्तु स्वरसतो व्याख्यानमिदमसहमाना आहुः। ज्ञानस्येति कारिकायां लाक्षणिकस्येत्यर्थः। यदि तु ज्ञानपदेन श्रूयमाणं ज्ञानसामान्यं विवक्षितं तदा ग्रन्थस्यास-ङ्गतिः। तथाहि यदि ज्ञानस्य फलमात्रं विषयव्यतिरिक्तं तदो-मिति ब्रूमः। प्रकृतेपि गोस्वामिसन्तोषादेः विषयव्यतिरिक्त-त्वस्योभयवादिसिद्धत्वात्। समनन्तरव्याख्यानप्रकारेण ज्ञेयगत-फलस्य विषयगतव्यतिरिक्तत्वे विवक्षिते प्रकृत एव व्यभिचारः। न खलूक्तप्रकारेण हेयोपादेयताबुद्धिविषये घटादौ हानोपादा-नादिच्छेत्यादौ प्रतीत्या स्वविषये तटादौ किंचिज्जन्यते। अपि तु गोस्वामिसंतोषादिरिति। **इदमविचारिताभिधानम्**।

यत्र [यतो हि] हि ज्ञानस्य ज्ञेयगतफलस्य सद्भावस्तत्रैव तत्फलं ज्ञेयगतव्यतिरिक्तं न वेति सन्देहो भवितुमुचितः। नान्यत्र। न ह्याकाशकुसुमं सुगन्धि न वेति कश्चित् सन्दिग्धेन हि शैत्यादिप्रतीत्या तटादिगतं किं च जन्यते इति। तेषामेवोक्तरीत्या उक्तप्रकारेण शैत्यादिप्रतीतेरसतः फलस्य विषयव्यतिरिक्तत्वाव्यतिरिक्तत्वचिन्ताकोटौ दृष्टान्तयताम्। तेषामुपजीव्यानां किमाचक्ष्महे वयं मांसजिह्वाः। तदत्र ज्ञानस्येति कारिकायां यथाश्रूयमाणज्ञानपदार्थो ज्ञानसामान्यवचन एव भवितुं युक्तः। तदेव वृत्तिकृत् दृष्टान्तेन द्रढयति प्रत्ययादेहीति। प्रकटता ज्ञातता, पवनाममो [पावनादिको] धर्मः।

स च प्रत्यक्षादिना नीलादेर्विषयीकरणानन्तरं तत्र जातो ज्ञानजन्यो ज्ञानज्ञेयत्वनियामकः कश्चनातिशयः। येन ज्ञातोऽयं घट इति मतिरुत्पद्यते इति भट्टमतं सम्यक्। हेयोपादेयतयासंवेदनं संवित्तिः तेन लाक्षणिकतटप्रत्ययात्। फलं पावनत्वादिप्रत्ययः पृथगेव सिध्यतीत्यर्थः।

एवमुक्तरीत्या विशेषा इति लक्षिते लक्षणाविषयीकृते। उपसंहरति ते **चेत्यादिना**। प्रकरणसंगतिमाह **एवमिति**।

अनेकार्थस्य अनेकविष्णुसिंहाद्यभिधेयस्य शब्दस्य हरिप्रभृतेः। पुंयोगाद्यैर्नियन्त्रित इत्यन्वयः। नियन्त्रिते अर्थान्तरनिरुद्धप्रसवतया एकत्रार्थे व्यवस्थापिते अवाच्यसंयोगादिसाचिव्याभावादभिधायाः अविषयः। अञ्जनं व्यञ्जनं नाम व्यापारः। संयोगादिना आहुः। **संयोग इति**।

सशङ्खचक्रो हरिरित्यत्र शङ्खचक्रसंबन्धः सिंहाश्वसूर्यचन्द्रादिव्यावृत्तमच्युतमेवाभिधत्ते। एवञ्च शङ्खचक्रवियोगेऽपि तमेव। प्रतिषेधस्य प्रसक्तिपूर्वकत्वात्। रामलक्ष्मणाविति साहचर्याद्दाशरथी। रामार्जुनावित्यत्र......वध्यघातको विरोधः। सहानवस्थानविरोधे च्छायातपाविति अर्थः [अर्थः] फलं स्थाणुपदस्य शम्भुवाचकत्वे भवच्छेदानुरूपं फलं घटते। प्रकरणं बुद्धिसान्निध्यम्। युष्मदिति प्रकृतराजादिपरलिङ्गम्। विपक्षव्यावृतौ (?) धर्मः। अत्र कोपरूपचिह्नेन न मकराकारो ध्वजः। सन्निधिसामानाधिकरण्यं तेन पुरारातिपदं न नगररिपौ वर्तते। सामर्थ्यं तत्करणनियमः। कोकिलमत्ततासाम्यादनेन वसन्तस्यैव सामर्थ्यं न पुनर्मधुपदवाच्यस्य मद्यस्यापि। औचिती योग्यता सांमुख्यस्यैवाह कामकातस्त्राणयोग्यत्वं देशस्तद्विशेषः। राजविजतु [?] वासुदेवादौ। कालस्तद्विशेषः दिवादीति न वक्र

रात्रौ च न रवेः। व्यक्तिः पुंस्त्वादिः। नपुंसको हि मित्रशब्दो न रवौ पुंल्लिङ्गकश्च न सुहृदि। इन्द्रेति षष्ठी। तत्पुरुषे समासात् उदात्तसूचिते हि इन्द्रस्य शमयिता शातयिता वा दैत्यादिरेव प्रतीयते। बहुव्रीहौ तु पूर्वपदान्तोदात्तनिर्णीते इन्द्र एव शमयिता शातयिता वेति स्वरः उदात्तादिर्न काव्ये विशेषप्रतीतिकृदिति तद्विषये नोदाहरणमिति ग्रन्थकृतोऽभिप्रायः।

इदं च श्रीधर-चण्डिदासाद्याः केचन प्राचीना आहुः। यद्यपि नोदात्तादेः स्वरस्य काव्ये विशेषप्रत्यायकतास्ति काकु ......विशेषाणां तु तत्सद्भावान्तदुदाहरणमुचितमेव। किं चोदात्तादेरपि ध्वनेः पाठशुकोक्तिदिनास्त्येव। तत्र विशेषबोधनं यदाह हास्यशृङ्गारयोः। स्वरितोदात्तं वीररौद्राद्भुतेषु उदात्तकल्पितम्। करुणवीभत्सभयानकेषु अनुदात्तस्वरितकम्पितमुत्पादयेदिदं न समीचीनम्। कालविशेषे हि मथ्नामि कौरवशतं समरेण [समरे न] कोपादिति काव्यनिष्ठैर्मथ्नाम्येवेति व्यङ्ग्यरूप एव विशेषः प्रत्याय्यते। न तु प्रकृतोक्तः संयोगादिभिरभिधेयविशेषः उदात्तादिभिरपि योऽसौ रसविशेषः प्रत्याय्यते सोऽपि व्यंग्य ,एवेत्यादि प्रपञ्चितमस्मत्साहित्यदर्पणे।

एकुह इति।
एतावन्मात्रस्तनी एतावन्मात्राभ्यामक्षिपात्राभ्याम्।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः॥
अभिनयो हस्तादिचेष्टा।

आदिशब्दात् "इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षय" मित्यादावात्मनिर्देशादयः।

भद्रात्मन इति। शोभनो (सुभगः) गजजातिविशेषश्च अधिरोहोऽत्रकलनमारोहणश्च। विशालता बहुप्रसिद्धेर्दैर्घ्याद्वा, वंशः कुलं वेणुश्च। शिलीमुखो बाणो भ्रमरश्च। गतिर्ज्ञानं गमनञ्च। परः शत्रुरुत्कृष्टश्च। वारणो निवारको हस्ती। दानं त्यागो मदश्च।

अत्र प्रकरणेन राजन्यभिधेयत्वेन नियन्त्रिते यः सारो प्रकृतो न गजार्थःप्रतीयते तस्याभिधादिशक्तिभिर्बोधयितुमशक्यतया व्यञ्जनाख्य एव........................"

.........गजार्थः प्रतीयते । तस्यासंबन्धत्वं मा प्रसांक्षीदिति गजनृपयोरुपमानोपमेयभावः कल्प्यते । तेन परवारणस्य इवेत्युपमानध्वनिः ।

अयमाशयः—इह हि परिवार ए शब्दे येयं द्वितीयार्थप्रतीतिस्तत्राभिधायाः प्रकृतार्थबोधनविरामात् लक्षणायाश्च मुख्यार्थबाधादिहेतुकत्वात् व्यञ्जनाख्या तुरीया वृत्तिरूपास्यैव ।

नन्वत्रार्थभेदेन शब्दभेद इति दर्शनादत्र शब्दद्वयमस्ति । तच्च साजात्यादैक्य भ्रमहेतुः । ततश्च प्रथमं परवारणादिशब्देन राजार्थबोधनाद्विरतायां प्रथमाभिधायां द्वितीयः शब्दस्तन्निष्ठाभिधाशक्तत्या द्वितीयार्थं बोधयतु किं वृत्यन्तरकल्पनेनेति चेन्न । अत्र हि शब्दद्वयकल्पने कथं प्रकृतार्थस्य प्रथमं प्रतीतिः द्वयोरभिधेयत्वेन पूर्वपश्चाद्भावनैयत्यासंभवात् ।

> तेनात्रानेकार्थस्य शब्दस्येत्यादिसूत्रे **चण्डिदास पण्डिता-नामर्थभेदेन** शब्दभेदमाश्रित्यावि [त्यैव] **द्वितीयव्याख्यान-मसमञ्जसप्रायम्** ।
>
> एवञ्च भ्रमिमरतिमित्यादावपि विषयशब्दस्य गरलार्थत्वे भुजगादिपदसाचिव्यात् न पुनरभिधाया तज्जीवनं किन्तु व्यञ्जनैव व्यापारः किन्त्वत्र द्वितीयार्थबोधे हेतुर्भुजगादिरूपः शब्दः भद्रात्मन इत्यादेरर्थः । येन ध्वस्त इत्यादौ तु नियामकाभावादनेकार्थविषयः सन्देहः व्यथाद्वयेषामपि (?) मेदिनीभृतामित्यादावुभयाभिधानञ्चेति **चण्डिदासपण्डिताः** । **एतन्निराकरिष्यामहे श्लेषालङ्कारव्याख्यानावसरे** ।

भद्रात्मन इत्यादौ तु द्वितीयार्थस्यानुभवसिद्धस्याभावं वदतो **महिमाचार्यस्य** गजनिमीलिकेव दुर्व्याख्या । सदुपदेश परस्परयैव द्वितीयार्थव्याख्याने व्यासवाल्मीकि प्रभृतिमहाकवीनां तादृशकाव्यनिबन्धस्य विफलताप्रसङ्गः । अर्थद्वयस्यापि प्रतीत्यविशेषात् व्याख्याविशेषविनिगमनायां प्रमाणाभावश्च । किंच द्वितीयार्थबोधने धर्मिकल्पनातो वरं धर्मकल्पनमिति भिन्नशब्दकल्पनात् भिन्नैव व्यञ्जनाख्या **वृत्ति-रङ्गीकर्तुमुचिता** तस्याश्च यत्र तत्र प्रसवे इति प्रसङ्गभीत्या संबन्धत्वेन **सैवाभिधा-श्रीयत** इति **सर्वमवदातम्** ।

एवं व्यञ्जनारूपमुपाधिं लक्षयित्वा तदुपायेयं लक्षयति **तद्युक्त इति**। ननु शब्दमात्रस्य चेदयं ध्वननव्यापारः कथं शब्दार्थयुगलं ध्वनिरिति सङ्गच्छतामित्यत्र आह **यत्स इति**। यद्यस्मात्स शब्दः अर्थान्तरयुगर्थद्वययुक्तः तदेव व्यञ्जको न त्वेकार्थः। तेन शब्दस्य व्यञ्जकत्वेऽर्थस्य सहकारिता किन्तु शब्दप्राधान्यादिह व्यञ्जनमूलत्वव्यपदेश इत्याशयः।

इत्यालङ्कारिकचक्रवर्तिध्वनिप्रस्थानपरमाचार्यश्रीविश्वनाथकविराजकृतौ काव्यप्रकाशदर्पणे द्वितीय उल्लासः।

अथ तृतीय उल्लास:

एवं शब्दस्य व्यञ्जकत्वं निर्णीय प्राप्तावसरमर्थस्य व्यञ्जकत्वं दर्शयितुं तदुपदेश स्मारयति **अर्था इति**। प्रोक्ताः पुरेति वाक्यादयस्तदर्था स्युरित्यनेन [वाच्यादयस्त-दर्थाः स्युरित्यनेन]। अर्थस्य व्यञ्जकता अर्थात् परेषां प्राचीनादिवृत्तिबोध्यत्वेनानु-मेयत्वेन वाऽभिमते व्यङ्ग्येऽर्थे। उच्यते विप्रतिपत्तिनिरासत्येत्यर्थः। अर्थव्यञ्जकतेति पाठे तु सर्वेषामिति शेषः।

ननु सर्वेषां प्रायसोऽर्थानामित्यादिना पूर्वमर्थस्य व्यञ्जकत्वमुक्तमेव संप्रति कतमं विशेषमसंधाय [मभिसंधाय] पुनरुच्यत इति पृच्छति **कीदृशीति**। वाक्येति वाक्य-वाच्यसहितोऽन्यसन्निधिरिति मध्यमपदलोपीसमासः। वैशिष्ट्याद्वैलक्षण्यादिति वक्त्रादिषु प्रत्येकमन्वयः। प्रतिभाजुषां नवनवोल्लेखिबुद्धिशालिनां, न तु स्थूल-बुद्धीनाम्। **अन्येति**। प्राचीनादिवृत्तिबोध्यत्वनिरासः। व्यज्यते अनयेति व्यक्ति-र्व्यञ्जना। एवकारेणानुमानादि वाक्यार्थाद्भेदं विशदयति। प्रतिपाद्यते यः स प्रति-पाद्यः। शब्दप्रयोगस्य पदार्थत्वाद्यत्समवेता प्रतीतिरुत्पद्यते स इत्यर्थः। काकुः ध्वनेर्विकारः। भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते" इत्युक्तः प्रकारः। तद्भे-दाश्च तत्र स्वरूपभेदाश्चानन्ता आकरेभ्यो बोद्धव्याः।

अइ तमिति।
अति पृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि त्वरितम्।
श्रमस्वेद स निश्वासनिःसहा विश्रमामि क्षणम्॥

श्रमाज्जाताभ्यां स्वेदसलिनलिः श्वासाभ्यां [स्वेदसलिलनिःश्वासाभ्यां] निःसहा निरुद्यमेत्यर्थः इयं हि किञ्चिन्नद्या आगतां एकाकिनीं वीक्ष्य कुतोऽयमस्तात्तव श्रम इति तर्कयन्तीं प्रतिवेशिनीं प्रत्युक्तिः। अत्र ममायं श्रमो जलकुंभवहनादेव न तु चौर्यरतकृतां "मा मा शंकिष्ठा" इति वक्तुरभिप्रायरूपोऽर्थः प्रकाश्यते। इदमुदा-हरणं त्विह वक्तृवैशिष्ट्ये। न खल्वेकंविधान्तर [एवंविधार्थान्तर] प्रतिपत्तिः वक्त्रचां व वार्द्धकां [?[द्विगुणविशिष्टायाम्। [जलकुंभवहनत्वं कामुकत्वं च]।

ऐन्नित्यं [औन्निद्रचं दौर्बल्यं चिन्ता अलसत्वं सनिःश्वसितम्।
मम मन्दभागिन्याः संबंधि सखि तवापि अहह परिभवति॥

अह ह परिखेदे त्वामित्यर्थे तवेति षष्ठी । परिभवतीत्यस्य हिंसार्थत्वात् । अत्र परकीय उन्नतादिः कथं परं [कारं] परिभवतीति ।

अन्वयार्थापत्या लक्षणयावत् सदृशमौभियादि [सदृशमौंन्निद्यादि] लक्ष्यते । तदतिशयश्च लक्षणा फलरूपो व्यज्यते । तेन चाभिनतस्या एव वाक्यादिन्याः [?] कामुको दूत्योपभुक्त इति व्यज्यत इत्याशयः । एष चार्थो दूत्यां निसर्गदद्भावादि [?] गुणविशिष्टायां न संभवतीति प्रतिपाद्याया एव दूत्या वैशिष्ट्यप्रयोजितः ।

तथाभूतामिति । अत्र उषितं स्थितमिति च दृष्ट्वेत्यस्य कर्मपदम् । अत्र दृष्ट्वेत्यनन्तरं मयीति योज्यम् । खिद्यतेऽनेनेति खेदो मात्सर्यं [?] खिन्ने ग्लाने । अत्र खित्वे [खिन्ने] मयि खेदं भजतीत्येका सोपहासात् प्रासकाकुः । तस्याश्च मयि खेदोऽत्यन्तमनुचित इति व्यङ्ग्योऽर्थः । स च क्रोधप्रकर्षाविष्कृतत्वाद्वाच्येन परिप्रष्टो [परिपुष्टः] न तु तत् परिपोषक इति गुणीभूतः । नाद्यापि कुरुष्वित्यत्र चेतराम [?] काकुः । तया च कुरुषु किं न भजतीति प्रश्नरूपः किमर्थ एवाक्षिप्त इति । तन्मात्रस्यैव गुणीभावो न्याय्य इत्यभिप्रायवानाह न च वाच्यसिद्ध्यङ्गमिति । सिद्धिः शोभना निष्पत्तिः । अत्र शक्यमित्यनन्तरं वाच्येनैव व्यंग्यस्य गुणीभूतत्वे प्रकृते तदुदाहर्तुं न काचित् क्षतिः । तथापि प्रसङ्गादयं विषयविवेकः । **उइमा इति** [तइआ इति]

तदा मम गण्डस्थलनिर्मितां दृष्टिं न नयस्यन्यतः ।
इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः ॥

निर्मितां निर्लग्नाम् । इहत्वेत्यादिना [?] ग्रन्थकृता प्रकाशितो व्यंग्योऽर्थः । एवंविधविच्छित्तियुक्तं वाक्यवैशिष्ट्यम् ।

उद्देशोऽयमिति । नर्मदाया उद्देश इत्यन्वयः । पवनानां सुरते घर्मश्रमानुकूलत्वान्नयनेन रागदीर्घदान्तेन च सुहृदुपचारात् । अकाण्डकोपः आकस्मिकक्रोधः ।

अत्र नर्मदोद्देशानां तत्सुरतानुगुणानां वाच्यानां वैशिष्ट्यं प्रयोजकम् ।

नुदत्यनार्द्रमनाः श्वश्रूर्मा गृहभरे सकले ।
क्षणमात्रं यदि सन्ध्यायां भवति न वा भवति विश्रामः ॥

क्वचित्तु सं एणवरं हो इ वीसामो इति पाठः । च वरं केवलं तटस्थः [?] तस्य संनिधेः । प्रकरणवशात् व्यङ्ग्यस्यात्र वैशिष्ट्यम् ।

श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण ।
एवमेव किमिति तिष्ठसि तत्सखि सज्जय करणीयम् ॥

अत्र भवेति [तवेति] प्रियेति सखीं प्रति सोल्लुण्ठनवचनम्[१] । अन्यत्र च रहस्यगोपनम् । एवमेवाङ्गमण्डलाद्यकृत्वा[२] सज्जय सज्जीकृत्वा[३] । अत्रोक्तरूपे व्यंग्येति [अत्रोपपतिमिति][४] पत्यागमनप्रस्तावविशिष्ट्यं प्रयोजनम् ।

अन्यत्रेति । अस्मि अहम् । प्रच्छन्नगुप्तः । अत्र प्रतिपादिदेशवैशिष्ट्यम् !

गुरुजनपरवश प्रिय किं भणामि तव [मन्द] भागिन्यहम् ।

अथ[५] प्रवाहं [सं] न यासि व्रजसि व्रज स्वयमेव जानासि करणीयम् । अन्यथा अनुमरणं[६] न जीवामि । अत्र वसन्तकालस्य वैशिष्ट्यम् ।

द्वारेति । निरन्तरे निकटे आकूतं भावः । स च शृङ्गारचारी[७] लज्जाख्यः [शृङ्गारव्यभिचारी लज्जाख्यः] । तेनान्यार्थ धीहेतुरित्यत्रान्यार्थशब्देन वस्त्वलंकार रसादिलक्षणस्य द्विरूपस्यापि ध्वनेः सङ्ग्रहः । [८]एवमलङ्कृतित्वस्यापि [रसस्यापि] ध्वनेः संग्रहः । एवमलंकृतिरूपस्यापि व्यंग्यस्योदाहरणमूह्यम् । चेष्टादेरित्यादिग्रहणाद्वर्णनीयनायकादिगतसात्विकादिपरिग्रहः ।

निराकाङ्क्षेति । अयमर्थः । अत्र अहपित्तु न [अतिपृथुलं] मित्यादौ [९]वक्तुर्वाक्यादितरोऽर्थः प्रतीयते । नास्मरभिदादे विषयः [नासावभिधादेर्विषयः] तस्य [१०]स्वार्थनिरोधननियमात् न चार्थमात्रस्य । तथाहि प्रतिवेशिन्यादिभिस्तत्कालसंनिहितैरल्पैर्वाऽनुमाने न काचित् क्षतिरस्माकं । यदि च काव्यार्थभावनया सहृदयैरनुमीयते तथा वक्त्रादीनां [११]तथाविधाभिप्रायविरहस्तनैः व्यभिचारः । किन्त्वेवंविधानां काव्यानां कविप्रतिभासोक्तजन्मनां प्रामाण्यानावश्यकत्वेनासन्दिग्धादिर्ववत्वं हेतोः इत्यादिकं **प्रपञ्चितमस्मत्साहित्यदर्पणे** ।

[१२]एवंप्रायाश्च उक्तयः उक्तोदाहरणेषु यथायोगं सुमतिभिरवगन्तव्याः । **क्रमेण** परिपाट्या वाच्यार्थव्यञ्जकत्वे[१३] । पिहुलमित्यादि लक्ष्यार्थस्य, उन्निद्दमित्यादि **व्यंग्यार्थस्य** ।

---

१. Pt. text reads सोत्कम्पनवचनम् for सोल्लुण्ठनवचनम् ।
२. " reads अङ्गमण्डलंकृत्वा for अङ्गमण्डलाद्यकृत्वा ।
३. " reads सज्जीकरु for सज्जीत्वा ।
४. " reads निजपत्या ।

उम्वलिच्चलेति । शब्देति । अत्र प्रमाणपदेन सर्वस्यैव काव्यरूपशब्दस्य सुप्रकाशरसास्वादमित्याह अयोगव्यवच्छेदेन प्रामाण्यनियमः सूचितः । [१]प्रमाणानन्तरं प्रत्यक्षादि तद्बोध्योऽर्थो न प्रकृत्याद्यतिशयद्योतक इति भावः । एतेनार्थस्य व्यञ्जकत्वे शब्दस्यापि सामर्थ्यं कल्पनीयम् । न त्ववर्जनीयम् । **सन्निधिमात्रत्वमिति** [२]सर्वत्रैवोभयशक्तिमूलता ।

किन्तु यत्र यच्छक्तिरुत्कटा तत्र तन्मूलताव्यपदेशः द्वयोरुत्कटत्वे उभयशक्तिमूलमिति सर्वमवदातम् ।

इत्यालङ्कारिकचक्रवर्तिध्वनिप्रस्थानपरमाचार्यमहापात्रश्रीविश्वनाथ कविराजकृतौ काव्यप्रकाशदर्पणे तृतीय उल्लासः ।[३]

५. Pt. text reads अद्य प्रवासं for अथ प्रवासं ।

६. „ reads अर्थादामरणं for अनुमरणम् ।

७. „ reads श्रृङ्गाररसः for श्रृङ्गारचारी ।

८. „ reads एवमलंकृतेरस्यापि for एवमलंकृतिरूपस्यापि ।

९. „ reads कावक्वादि वैशिष्ट्यादितरोऽर्थः ।

१०. „ reads स्वार्थबोधननियमात् for स्वार्थनिरोधननियमात् ।

११. „ reads तथाविधादिप्रियविरहस्तव्यैः for तथाविधाभिप्राय विरहस्तनैः ।

१२. „ reads एवंप्रायानुक्तोदाहरणेषु for एवंप्रायाश्च उक्तयः ।

१३. „ reads वाक्यार्थव्यञ्जकत्वेष्वपि ।

१. „ reads प्रमाण for प्रमाणानन्तरं ।

२. „ reads सर्वशक्तिमूलता for सर्वत्रैवोभयशक्तिमूलता ।

३. adds to the colophon इदं पुस्तकं बालभट्ट अयाचितेन लिखितम् ।

अथ चतुर्थ उल्लासः

अविवक्षितवाच्यध्वनिः

इह हि "तददोषा"विति काव्यसामान्यलक्षणकारिकायामुद्दिष्टस्य काव्यरूपस्य धर्मिणो विशेषा उत्तमादयः, शब्दार्थयोः स्वरूपश्च निरूपितम् । तदिदानीं दोषादिरूपणे प्राप्तावैरेकय [प्राप्तावसरे] कथमुत्तमादिकाव्यभेदप्रभेदप्रदर्शनमित्याक्षेपयन् वृत्तिकृदाह **यद्यपीति । प्रदर्शित इति** प्रकर्षेण अर्थात् भेदप्रभेदाभ्यां प्रदर्शिते ख्यापिते, हेयता दोषाणाम्, उपादेयता गुणालङ्काराणाम् ।

अयमर्थः । दोषाणां रसस्य कुतोऽपकर्षोत्कर्षज्ञानं सुकरं स्यादिति । **काव्यभेदानिति** । काव्यशब्देनात्र काव्यविशेष उक्तरूपो ध्वन्यादि । तस्य भेदाः अविवक्षितवाच्यादयो विशेषाः अत एवाभिधामूलस्य प्रथमं विवेक्तुमुचितत्वेऽपि पूर्वोक्तानुसारेण सूचीकटाहन्यायेन प्रथमं लक्षणामूल विवेचयति । अभिधामूलेति । **लक्षणामूलेति** ।

लक्षणामूलत्वादेव वाच्यमभिधेयमविवक्षितम् बाधितस्वरूपं यत्र स एकोऽविवक्षितवाच्यो नाम ध्वनिः काव्यभेदः । स चार्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविध इत्यर्थः । **गूढेति** । अगूढव्यङ्ग्यप्रयोजितगुणीभूतव्यङ्ग्यव्यवच्छेदः । अनुपयुज्यमानत्वमर्थात् स्वरूपमात्रेण अर्थान्तरेषु विशेषरूपम् । संक्रमितमित्यस्यार्थः परिणमितम् । [3]क्वाक्वादिसाहाय्यसूचनम् । परिणामश्च तत्वादपरिच्युतस्य धर्मिणोऽवस्थान्तरगमनम् ।

अस्मि अहं । समुदायः समवायः । **अत्रेति** । विदुषां समुदाय इत्यादि प्रतिपादनेनापि [4]वक्तृप्रतिपादने सिद्धे वचनीति [वच्मींति] पुनर्वचनम् । पौनरुक्त्यापातात् । मुख्यार्थे बाधितवचनविशेषरूपोपदेशार्थम् । उपदेशश्च न वचनादन्यः ।

---

१. Printed text reads अनूद्य after आक्षेपयन् ।

२. Printed text reads लक्षयति for विवेचयति ।

३ Pt. tex. add, अत्र णिचा ।

[1]आदिशब्दात्प्रतिपाद्यस्य संमुखीनत्वादेव नवे प्रतिपाद्यत्वे त्वामिति पुनर्वचनम्। [2]अन्यव्यावृत्ते सिद्धे त्वामिति पुनर्वचनम्। अन्यथा वृत्तिविशिष्टं त्वतर्थं लक्षयति। एवं वचनी [वच्मी] त्यनेनापि अहमर्थे अस्मीति पुनर्वचनमन्यव्यावृत्तिविशिष्टं सदर्थम्। एतानि च लक्षितानि स्वातिशयं व्यञ्जयन्ति, तेन वक्तुर्वचनस्यावश्यं ग्राह्यत्वादिरूपोऽर्थः प्रतिपाद्यते।

अत्यन्ततिरस्कृतवाच्यं विवृणोति **क्वचिदिति**। उदाहरति **उपस्कृतमित्यादि [उपकृतमित्यादि]**। अत्र ह्युपकारसौजन्यसुखितत्वादिभिः प्रतिपादितैस्तद्विपरीतान्य[3]पकृतत्वादीनि लक्ष्यन्ते। अपकारादयश्चोपकारादीनां न विशेषरूपाः। किन्तु ततोऽत्यन्ततिरस्कृता अर्था इत्यत्रात्यन्ततिरस्कृतवाच्यत्वम्।

अभिधामूलमाह **विवक्षितमित्यादि**। अभिधामूलत्वादेवात्र वाच्यं विवक्षितमबाधितम्। अपरं विवक्षितवाच्यादन्यं व्यङ्‌ग्यनिष्ठं व्यङ्‌ग्ये निष्ठा तात्पर्यं यस्य एतेन गुणीभूतव्यंग्यव्यवच्छेदः। एष विवक्षितान्यपरवाच्यो ध्वनिः।

असंलक्ष्यक्रमध्वनिः

कोऽपीति। असंलक्ष्यक्रमव्यङ्‌ग्यः संलक्ष्यक्रमव्यंग्यश्चेति द्विविध इत्यर्थः। तैरित्यनन्तरं व्यक्त इति शेषः। इति हेतोः स क्रमः न लक्ष्यते उत्पलपत्रशतव्यतिभेदवल्लाघवादिति शेषः।

अत्र [4]च रसवति काव्ये [5]आस्वादपर्यन्तगमनात् वस्त्वलङ्कारूपव्यङ्‌ग्ययोरपि प्रतीति[6]र्नविलम्बिता। नीरसेति प्रतीतिविलम्बात् तत्साजात्येन [7]लक्ष्यक्रमव्यवहारः। तत्रासं[8]लक्ष्यक्रमसंलक्ष्यक्रमयोर्मध्ये प्रथमस्य व्यवस्थाहेतू रसादिरिति पिण्डार्थः।

---

१. Pt. text reads आदिपदात् for आदिशब्दात्।
२. ,, reads अन्यथा व्यावृत्ते for अन्यव्यावृत्ते।
३. अन्यापकृतत्वादीनि for अन्यप्रकृतत्वादीनि।
४. Pt. text omits च।
५. Pt. text adds झटिति after काव्ये।
६. Pt. text reads प्रतीतिरत्रविलम्बिता for नविलम्बिता।
७. Pt. text reads लक्ष्यस्य क्रमव्यवहारः for लक्ष्यक्रमव्यवहारः।
८. Pt, text reads तादृश for तत्र। प्रक्रम for अक्रम।

तदाभासेति । रसाभासभावाभासौ, तच्छान्तिर्भावशान्तिः । अक्रम इति दुरूहक्रमः । रसादिस्वरूपादलङ्कारादलङ्कार्यतया अलङ्कारकृतपरिपोषपात्रत्वेन यथोदाहरणदर्शनेन विविक्त करिष्यते हारिष्यते (?) वाक्यार्थे रसादिरूपे वर्णनामात्ररूपे वा अङ्गभूतः शोभाविशेषाधायकः । रसस्याङ्गत्वे रसवदलङ्कारः । भावस्य प्रेयोऽलङ्कारः एतयोराभासस्य ऊर्जस्वी । भावशान्तेः समाहितम् । समाहितादय इत्यादिशब्दात् भावोदयादयः गुणीभूतव्यङ्ग्याभिधाने पञ्चमोल्लासे (वक्ष्यन्ते) ।

रसस्वरूपम्

स्वं वास्तवं रूपम् । कारणानीति । लोके रामानुगतस्य रत्यादेः स्थायिनोऽनन्त रतिनोत्पन्नैर्भावान्तरैरनुच्छिन्नवासनस्य यान्यालम्बनोद्दीपनतया कारणानि सीतादिचन्द्रादीनि, अथ कार्याणि कटाक्ष [1]भ्रूक्षेपादीनि, सहचारीणि हर्षादीनि तानि नाट्ये अभिनेये[2] नाटकादौ, काव्ये [3]ग्रन्थरूपे महाकाव्यादावुपनिबद्धानि यथासंख्यं[4] विभावादीति [नि] व्यापारवत्तया न तु संज्ञाभेदमात्रेण विभावादिशब्दव्यपदेश्यानि तैश्च विभावाद्यैर्व्यक्तः प्रा ···ष्कृतः[5] [आविष्कृतः] स्थायिभावो भाव्यते वास्यत इति व्युत्पत्या वासनात्मतया सहृदयहृदयानन्दनो रसः । स्मृतो ध्वनिकारादिभिराम्नातः[6] । अत्र विभावस्य व्यापारो विभावनं भावकगतवासनान्तर्लीनस्य रत्यादेर्विशेषेणास्वादाङ्कुरणयोग्यतानयनं अनुभावनम् तथाभूतस्य तस्य परिपोषणं, व्यभिचरणं विशेषेणाभिमुखे चारणं, व्यक्तो व्यक्तीकृत एव रसः । न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते । तदुक्तं लोचनकारैः "रसाः प्रतीयन्ते इति त्वोदनं पचतीतिवद्व्यवहार" इति । एतेन प्रतीतिशरीरमेव रस इति सूचितम् ।

अत्र यद्यपि मिलितो विभावादिः पानकरसन्यायेन चर्व्यमाणोऽखण्डरूप[7]नवरसस्तथापि लोकप्रसिद्धप्राधान्यप्रत्यभिज्ञानात् स्थायिभावो रस इत्युक्तम् । इह च सात्त्विकानामनुभावरूपतया न पृथगुक्तिः । अत्रार्थे महर्षिसंमतिमाह उक्तं हीति । भरते भरतप्रणीते शास्त्रे निष्पत्तिः । अत एवाविर्भावः ।

---

१. Pt. text reads भुजाक्षेपादीनि for भ्रूक्षेपादीनि ।
२. ,, reads अभिनये for अभिनेये ।
३. ,, reads भव्यरूपे for ग्रन्थरूपे ।
४. ,, reads यथासंभव for यथासंख्यम् ।
५. ,, reads व्यञ्जितः for आविष्कृतः ।
६. ,, reads रत्यादेर्विशेषणञ्च for रत्यादेर्विशेषेणा० ।
७. ,, reads अखण्डरूप एव for अखण्डरूप नव० ।

संप्रत्यत्र भारतीयसूत्रे आचार्यः देशीयव्याख्यानतुच्छताप्रकटनपूर्वं सांप्रदायिकव्याख्यानं प्रदर्शयितुमारभते **एतद्विति** विवृण्वते। समनन्तरं वक्ष्यमाण भट्टलोल्लट-श्रीशङ्कुकादयः। आलम्बनकारणानि ललनापुरुषादीनि, उद्दीपनकारणानि उद्यानादीनि। उक्तं हि।

आलम्बनं स तु रसो यमालम्ब्य प्रवर्तते।
उद्दीप्यते रसो येन स चोद्दीपनसंज्ञकः इति॥

श्रीशङ्कुकमतम्

नटे इत्युपलक्षणं वाक्यपाठकेऽपि [काव्ये नाट्येपि] ज्ञेयम्। इदं च भट्टलोल्लटप्रभृतीनां मतमसमीचीनम्। तदुक्तं **मम साहित्यदर्पणे**।

पारिमित्यात् लौकिकत्वात् सान्तरायतया तथा।
अनुकार्यस्य रत्यादेरुद्बोधो न वसीभवेत्॥ ३-१८

[१]तथा शिक्षाभ्यासादिमात्रेण शब्दवादे [?] [स्वरूपतां दर्शयन् नर्तको नैव रसस्यास्वादको भवेत् काव्यार्थभावनेनायमपि सभ्यपदास्पदमिति। सान्तरायता नाटककाव्यश्रवणादिः। राम एवायमिति रामत्वस्यायोगव्यवच्छेदेन, अयमेव राम इत्यन्ययोगव्यवच्छेदेन चोभयथापि या सम्यक्[२]प्रतीतिः। न वा रामोऽयमिति औत्तरकालिका बाधविशिष्टा रामोऽयमिति च या मिथ्याप्रतीतिः, रामः स्याद्वा न वायमिति या च संशयप्रतीतिः, रामसदृशोऽयमिति या सादृश्यप्रतीतिः, ताभ्यो विलक्ष्य या [विलक्षणया] चित्रतुरगादिन्यायेन यथा बालानां चित्रतुरगे वस्तुपरिच्छेदशून्या तुरगोऽयमिति बुद्धिर्भवति तथाविधया रामोऽयमिति प्रतीत्या[३] ज्ञानेन ग्राह्ये नटे अभिनेतरि, **सेयमित्यादे**र्देवादित्यन्तश्च यथाक्रममालम्बनोद्दीपनाभिधायक संभोगविप्रलम्भश्रृङ्गारप्रधानस्य। आदिशब्दादितरेषामपि[४] काव्यानां यदनुसन्धानं साक्षादिव करणं, तद्बलात् शिक्षा उपदेशः अभ्यासः पौनःपुन्येन प्रवृत्तिः। ताभ्यां वर्तितं स्वकार्यमश्रुरोमाञ्चादि तस्य प्रकटनं येन तथाभूतेन नटेनैव प्रकाशितैः कार्यकारणसहकारादिभिर्विभावादिशब्दव्यपदेश्यैरनुमीयमानो रत्यादिर्भावः तदा रामतादात्म्येन प्रतीते नटे सामाजिकानां प्रेक्ष(का)णां वासनया तन्मयीभावदायिन्या धिया चर्व्यमाणः पुनःपुनरनुमीयमानो रस इति **श्रीशङ्कुकनामा कश्चिदाचार्य** इति संबन्धः।

---

१. Pt. text omits from तथा to पदास्पदमिति।
२. „ reads या साम्यप्रतीतिः for या सम्यक् प्रतीतिः।
३. „ reads प्रतिपत्या for प्रतीत्या।
४. „ reads आदिपदादितरैश्यमिव for आदिपदादितरेषामपि।

कारणादिभिः किं भूतैः ? तथा कृत्रिमतया अनभिमन्यमानैः। अनुमीयमान इत्यत्रानुमाने हेतुमाह संयोगात् संबन्धात् कोऽसौ संयोग इत्याह गम्येति। गम्यमनुमेयं रत्यादि गमकमनुमापकं कार्यकारणादि, रसनीयत्वेन स्पृहणीयत्वेन स्थायित्वेन दार्ढ्यदर्शनात् कालान्तरेऽप्यविच्छेद्यत्वेन। अत्रापि नटगतस्य रत्यादेरनुमापकानां सामाजिकानामनुमानाभासोत्पत्तेः बाध [ढ] सुप्रकाशानन्दचमत्काररूपस्याविर्भावः। अनुमानकारणकत्वाङ्गीकारे तु रसस्य कार्यत्वप्रसङ्गः अस्त्विति न, अग्रे निराकरिष्यमाणत्वात्।

भट्टनायकमतम्

न ताटस्थ्येन औदासीन्येन रसः प्रतीयते तथा सत्यरसनीयत्वापत्तेः [1]ज्ञानगतत्वेन सभ्यानां व्रीडातङ्काद्यापत्तिप्रसङ्गात्। यदि चोत्पद्यते किं सीतादिविषयत्वेन आत्म[2]कान्तादिविषयत्वेन वा। आद्ये पातकित्वापातः। द्वितीये रत्यादिसद्भावप्रसङ्गः। नाभिव्यज्यते पूर्वसिद्धत्वा[3]......दीपेन घटस्येव हि पूर्वसिद्धस्यैव[4] व्यङ्ग्यत्वं, किन्तु काव्यनाट्यनिष्ठेन [5]भावकत्वाख्येन व्यापारेण भाव्यमानः सकलसभ्यनिष्ठतया संभाव्यमानः स्थायी रामादौ स्थिरतरो भोगेन भुज्यते विषयीक्रियते।

कोऽसौ भावकत्वव्यापार इत्याह अभिधात इति। द्वितीयेनेत्युपलक्षणम्। ति नयस्य मते [भट्टनायकस्य मते] एक एवाभिधाव्यापारस्तन्मतेन द्वितीयेन, यस्य द्वौ तन्मतेन तृतीयेन, यस्य त्रयस्तन्मतेन चतुर्थेनेत्यर्थः। विभावादिभिः साधारणीकरणं च रसादिकवित्वभाविकानां भेदाभावेन प्रत्यायनं, तदेव तस्य भावकत्वव्यापारस्यात्मा स्वरूपम्। कोऽयं भोग इत्याह सत्वेति। सत्वस्योद्रेकाद्रजस्तमसी अतिभूयाविर्भावात्। प्रकाशःस्पष्टतरोऽयमानन्दस्तदेकरूपाया[6] संवित् ज्ञानं, तत्र विश्रान्तिर्वाह्यमेव ग्रहणराहित्येन स्थैर्यं तदेव सत्वं स्वरूपं यस्य तथाविधेन भोगेनेत्यर्थः। विश्रान्तिगतत्वेनेति पाठे विश्रान्तिगतोऽर्थात् प्रमाता तस्य भावस्तत्वं इति **भट्टनायकस्य विवरणमित्यर्थः**।

अत्रानुकार्यनिष्ठस्य स्थायिनः साधारण्येन प्रतीतस्यापि रसत्वं असंनिहितस्य भोगविषयतानुपपत्तेः भोगश्च संविदानन्दस्वरूप [सच्चिदानन्दस्वरूप] इत्युक्तम्

---

१. Pt. text reads नानुगतत्वेन for ज्ञानगतत्वेन।

२. „ reads आत्मकार्थतादिविषयत्वेन for कान्तादिविषयत्वेन।

३. „ reads पूर्वसिद्धत्वाभावात्।

४. „ reads पूर्वसिद्धस्येव for पूर्वसिद्धस्यैव।

५. „ reads काव्यं नाट्यनिष्ठेन for काव्यनाट्यनिष्ठेन।

६. „ reads रसोद्रेकरूपाया for तदेकरूपाया।

रसस्य च तदेकार्थतया निरूपयिष्यमाणस्य कथं तद्विषयत्वं उपचारस्तु भोगविषयताङ्गीकारे अस्माक एव पक्षः।

सिद्धान्तपक्षः

सप्रति "लोक" इत्यादिना "इत्याचार्यश्रीमदभिनवगुप्तपादा" इत्यन्तेन ग्रन्थेन तन्मतमुपन्यस्य ग्रन्थकारेण तेषु गौरवप्रकटनेन तन्मतस्यैवात्मनोऽभिमतत्वमुपदर्शितम्। ग्रन्थार्थस्तु। लोके न तु नाट्यकाव्ययोः स्थायिनोऽनादिवासनान्तर्लीनरत्यादेरुत्पत्तेरनुमाने (व्यज्यमाने) अभ्यासस्य पाटवमुत्कर्षः। तद्वतां न तु व्याप्त्याद्यनुसंधानविलम्बितानां सामाजिकानां स्थायी रत्यादिकः,तैः प्रमदादिभिरेव कारणकार्यसहचारिपदवाच्यतापरित्यागेन पूर्वोक्तालौकिकविभावनादिव्यापारवत्वात्। न तु पर्यायान्तरवाच्यत्वमात्रेण लौकिकविभावादिशब्दव्याहार्यैः साधारण्येन प्रतीतेरभिव्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतः। पानकरसन्यायेन यथा-पानके खण्डमरीचकर्पूरादीनां रसा मिलितानामुपपाद्यास्त्राद्यते तथा संवलितविभावादिसुखचमत्कारात्मकः स च चर्व्यमाणः आस्वाद्यमानः शृङ्गारादिको रस इति संबन्धः। साधारण्यं प्रतीतिस्वरूपं दर्शयति **ममैवेत इत्यादि**। प्रतिनियतपुरुषगतत्वेन योऽसी यस्य विशेषस्तस्य सैवैत इत्यादिरूपेण स्वीकारस्य न ममैवेत इत्यादिरूपेण परिहारस्य च यो नियमस्तस्यानध्यवसायापादनिश्चयात्। अत्र स्थायी रत्यादिक इति वचनमस्थायिनां व्यभिचारित्वप्रकटनार्थम्। तदुक्तं रसावस्थः परं भावः स्थायितां प्रतिपद्यत इति। किमाकारः न [स] चर्व्यमाण इत्याह **नियतेति**।

यद्यपि—सवासनानां सभ्यानां रसस्यास्वादनं भवेत्।
निर्वासनास्तु रङ्गान्तः काष्ठकुड्यात्मसंनिभा॥

इत्युक्तदिशा रसान्तर्वर्तिष्वपि विद्यमानेषु नियतः सवासनोऽथ प्रमाता, तन्मात्रगतोऽपि, न, श्रोत्रियजरन्मीमांसकादिनिष्ठसाधारणेति। उपायानां विभावादीनां पूर्वोक्तप्रकारसाधारण्यप्रतीतिप्रभावात् तत्कालेति वेद्यान्तरेणानवच्छिन्नप्रवाहापरिमितभावः साधारण्याभिमानो यस्य तथाभूतेन प्रमात्रा अत्र च पारिमित्याख्यं वेदनमेवापारमित्याति भानं रसप्रतीतिसकलाभिमानवितानवात् (?) रसास्वादऐकरूप्यं पुनः साधारण्येति वचनम्। फलसंबन्धाप्रकटनाय रत्यादीनामपि हि स्वगततया प्रतीत्यै सभ्यानां व्रीडातङ्कादिर्भवेत्। परगतत्वेन तु कुतश्चमत्कारित्वम्‌ः एवं विभावादयः स्वयं साधारण्येन प्रत्याययन्ति।

एवञ्च रत्यादीनां साधारण्येन प्रतीतावपि साधारणरत्यादिवदास्वाद्यत्वं ततश्च साधारणत्वारोपितत्वेनोन्मिषतीति **चण्डिदासपण्डिता** आहुः तच्चिन्त्यम् ।

सति हि साधारणेषु श्री [स्त्री] पुरुषोत्तमादिषु रत्यभावप्रसङ्गात् ।

किन्तु विच्छिन्नाशेषविषयव्यासङ्गे रसप्रतीतिकालेऽननुभूयमानो साधारण्याभिमानो विचारदशायामुन्मिषतीति भावः । अभिन्नोऽपि प्रतीतिशरीराद्गोचरीक्रियते । अर्थादुपचारवृत्या चर्व्यमाणा आस्वादनं तदेवैकं प्राणो जीवनं यस्य ततो बहिरसंभवात् **विभावादीति** । विभावादि प्रतीत्यन्वयव्यतिरेकार्थविधायी एतच्च पानकेत्यादिव्याख्यानेन सुव्यक्तमेव ।

इहास्मत्पितामहानुजकविपण्डितमुख्य-**श्रीचण्डिदासपादैरुक्तं**-"परमार्थतस्त्वखण्ड एवायं रसो वेदान्तप्रसिद्धब्रह्मतत्ववद्वेदितव्य" इति ।

यद्यपि चर्वणमास्वादनं तच्च स्वादः "काव्यार्थसंभेदात्मानंद समुद्भव" इत्युक्तनयेन [१]रसादनतिरिक्तम् तथापि चर्व्यमाणो रस इति काल्पनिकं भेदमुररीकृत्य कर्मकर्तरि वा प्रयोगः । पर इवेत्याद्युत्प्रेक्षणैश्चालौकिकानन्दरूपत्वं सूचितम् । **अलौकिकेति** चमत्कारैश्चित्तविस्तारैर्विषयापर पर्यायैस्तद्रूपः । तस्य च पश्चाद्वचनेन सकल रसप्राणत्वं ।

यदाहु*स्त्रिकलिङ्गभूमण्डलाखण्डलमहाराजाधिराज-**श्रीनरसिंहदेवसभायां धर्मदत्तं**[३] स्थगयतः सकलसहृदयगोष्ठीगरिष्ठ कविपण्डितास्मत्प्रपितामहः[४] [५]श्रीमन्नारायणदासश्चमत्कार एव सकलरसप्राणभूतः तस्य रागाद्यंशशबलत्वे यथायथं शृङ्गारादिव्यपदेशः, तदभावेत्वद्भुतव्यपदेश इति [६]कविभिराकाल्पनिकभेदमुररीकृत्योक्तम् ।

---

१. Pt. text reads रसास्वादनातिरिक्तः for रसादननिरिक्तम् ।
२. " " अपरपर्यायः for अपरपर्यायैः ।
३. " " स्थगयन्तः for स्थगयतः ।
४. " " अस्मत्स्वपितामह for अस्मत् प्रपितामह ।
५. " " नारायणदासपादाः for नारायणदासः ।
६. " " कविभिः करालपनिकं for कविभिराकाल्पनिकम् ।

*May be interpreted as श्रीकलिङ्ग (ORISSA) or त्रिलिङ्ग (Andhra)

ननु रसस्य विभावादिज्ञानकार्यस्य कथं व्यंग्यत्वमित्याह स चेति, न खलु प्रतिनियतः कारणविनाशसमकालं कार्यविनाशः, रसप्रतीतेस्तु विभावादिप्रतीति-सम्वलिततयैव सद्भावात्। नापि विभावादयो रसस्य ज्ञापका इत्याह **नापीति**। हेतुमाह **सिद्धस्येति**। विभावादिस्वरूपकारणात् बहिरिति शेषः। यदि रसे विभावादयो न कारणानि, न च ज्ञापकाः तर्हि कीदृश इत्याह **अपित्विति**। व्यञ्जि-तत्वमपि पूर्वसिद्धि एव भवति। यदाहुः—

स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः।
यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारणात्। [कारकात्]

इत्यत्राह **चर्वणीय इति**। चर्वणा आस्वादनम्। तद्विषयं चास्य काल्पनिकं स्वादः काव्यानुसंभेदोऽत्मानन्दसमुद्भव इत्युक्तदिशा स्वादानतिरिक्तत्वात्, तर्हि कथं व्यंग्यत्वं व्यञ्जनविषयत्वाभावात् इति चेत् सत्यम् अत एवाहुर्विलक्षण एवायं कृतज्ञप्रभेदेभ्यः [?] आस्वादनाख्यः कश्चित् व्यापारः, किन्तु प्रकाशितं प्रादुष्कृतं प्रकाशमात्रत्वेनाभिधादिविलक्षणव्यापारमात्रग्रहेणैव यस्माद्भावरसादीनां व्यञ्जकत्वमुक्तं भवतीति, एतदेवाह **कारकेति**। अन्यत्कारणं, एतेनास्य रसस्य सद्भावे चर्वणाभिन्नेऽपि चर्वणैव प्रमाणमिति सूचितम्। एतदुक्तं भवति—

न खल्वन्यत्रादर्शनमात्रेणानुभूयमानं वस्तुस्वरूपापह्नवः शक्यक्रिय इति चर्वणेति चर्वणा आस्वादना तस्या अपि रसानतिरिक्तस्य निष्पत्तेः कादाचित्कया उपचरितया कार्योऽप्युच्यतां कार्य इति व्यवह्रियताम्, तथा सत्येव दुर्ग्रणिहिलस्य [?] भवतः संतोषपूरणादिति भावः।

लौकिकेति। योगज्ञानं हि द्विविधम् मितमपरिमितञ्च। तत्र येन योगिनोऽभ्यासदशायां ध्यानेनासंनिहितमपि वस्तु विषयीकुर्वन्ति तत्प्रथमम्। तद्धि[१] लौकिकीय-प्रत्यक्षादिप्रमाणं, तत् ताटस्थ्येन औदासीन्येन योऽसाववबोधः प्रकाशः तच्छक्तिः तत्स्वरूपं तच्च लौकिकवस्तुस्वरूपमात्रनिष्ठत्वान्मितम्। यच्च विज्ञानानन्ददानस्वार्थ-मात्रपर्यवसितं तद् द्वितीयम् तद्वलितरसंपर्करहितं [?] यत्पुरपरिमितस्वप्रकाशानन्दरूपत्वात् रसाद्यंशसंवननत्वाच्च। तयोर्द्वयोरपि विलक्षणं लोकोत्तरस्वसंवेदनस्तद्गोचरः। तच्छरीरान्तर्गततया तत् प्रकाशेनैव प्रकाशितो रत्यादिभोग इत्येवंरूपतया यदि प्रत्यक्षं वदिष्यसि तत्वतस्तस्य तु दुर्जन इति भावः [?] **तद्ग्राहकमिति**। स रस एव ग्राहकं ज्ञानं, तच्च निर्विकल्पक इन्द्रियस्यपातमात्राज्जात्यादि-वैशिष्ट्यं शून्यस्वलक्षणविभासः तद्धि इन्द्रियसंबन्धिमात्रग्राहि रसस्तु असंनिहितानामपि परिभावादीनां यत्परामर्शनमनुसंधानम्। तत्प्रधान इति भावः। **नापीति**।

---

१. Pt. text reads तद्बुद्धि for तद्धि।

विकल्पो विशेषज्ञानम् चर्व्यमाणस्य चर्वणामात्रप्राणस्य सुसंवेदनं [स्वसंवेदनम्] स्वानुभवस्तत् सिद्धात् [1]अप्रकाशतयेति शेषः। न खलु रसप्रतीतिकाले विभावादिकारणानां स्फुटोऽवभासः उभयात्मकं निर्विकल्पकत्वाभावात् सविकल्पक, सविकल्पकत्वाभावात् [2] निर्विकल्पकमुपचर्यतामिति भावः। पूर्ववदकार्यत्वात् ज्ञाप्यत्ववत् काव्यार्थतत्वज्ञानसंपत्तिः। श्रीस्तद्योगात् श्रीमत्वम्। [3]सम्प्रदायपूर्वकत्वादाचार्यत्वम्। पादा इत्यनेन गुरुगौरवसूचनं एतेन विभावादिसंभिन्नानुद्रिक्तांशरत्याद्यंशक संवित्प्रकाशानन्दचमत्कारस्वरूपत्वं [4]रसस्योक्तं भवति।

इह ये केचिद्विभावादीनामन्यतमेनैव निष्पत्तिः यत्र तु त्रयाणां सद्भावस्तत्रोद्भटतया प्रतीतस्य रसस्यैव रसनवीजना अन्यस्त्वं [अन्येषां] वर्जनीयसंनिधितया-अवस्थितिरिति मन्यन्ते तान् प्रत्याह-**व्याघ्रादय इति**।

अयमाशयः। यदि विभावमात्रस्योपनिबन्धे रसप्रतीतिस्तदा भयानकरसस्य निष्पत्तये व्याघ्रादिमात्रस्योपनिबन्धे कथं तत्प्रतीतिः स्यात्। ते हि भीरूणां भयमिव [5]वीराणामुत्साहमपूर्वदर्शिनां विस्मयं व्याघ्रादिभयार्थानां [6]च क्रोधं जनयन्तीत्यनेकरसविभावः। एतमश्रुपातादय इत्यादि व्याख्येयम्। अतश्च विभावानां पृथक् पृथक् रसनिष्पादकत्वे अनैकान्तिकदोषापातः। [7]यदाहुः—[8]पक्षविपक्षसपक्षवृत्तिरनैकान्तिक इति।

इह हि येन विभावेन केवलेन भयानको निर्वाह्यः तस्य पक्षे वीरादावपि संभवः। विभावादीनां मिलितानां तु कारणत्वेन कश्चिद्दोष इत्यभिप्रेत्योक्तम्—"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति। एवञ्च मिलिता विभावादयः प्रतिनियतमेव रसं बोधयितुमीशत इत्याशयः। यत्क्वचित्तु यस्यैकस्य द्वयोर्वा सद्भावस्तत्र यत्रन्यतमाक्षेप.......तदा न दोष इत्याह **वियदित्यादि** मधुकराणां कोकिलानां च[9] कूजितं

१. Pi. text reads अपरिस्फुटविभावादिप्रकाशतया for अप्रकाशतया।
२. " " निर्विकल्पकमुपचर्यतामिति भावः for सविकल्पकं सविकल्पकत्वाभान्निर्विकल्पकमुपचर्यतामिति।
३. " " संप्रदायप्रवर्तकत्वात् for संप्रदायपूर्वकत्वात्।
४. " " एतस्यैव for रसस्यैव।
५. " " धीराणां for वीराणाम्।
६. " " Question tag for च।
७. " " तदाहुः for यदाहुः।
८. " " पक्षसपक्षविपक्ष for पक्षविपक्षसपक्ष।
९. Transcript omits च।

तैरिति [1]लक्षणे तृतीया । वर्षास्वपि जम्बुफलास्वादनलम्पटानां कूजितं वर्ण्यत इति न विरोधः । अभिनवाङ्कुरा एव [2]अङ्कानि चिह्नानि येषु एवंभूताः टङ्काः पाषाणदारणप्रायकचोरप्रदेशा यस्यां धरणौ अत्र प्रणतिपरो नायको मुग्धा च परस्परमालम्बन [विभावौ]·····वर्णितस्वरूपं गगनादि तु उद्दीपनं एतन्मात्रसद्भावे [3]सञ्चारिणामेव हि व्यभिचारिभावानामावेगादीनां, अनुभावादीनां रोमाञ्चस्तम्भादीनां सामर्थ्यादाक्षेपः ।

परिमृदितेत्यादौ चानुभावको निद्राच्छेदननिर्वेदादयः, आलम्बनञ्च माधवः, उद्दीपनं चतुर्गुणश्रवणादि प्रकरणसामर्थ्यादवगम्यते ।

दूरादिति । चरणानद्यां व्यतिरेकः [चरणानतिव्यतिकरः] संपर्को यस्येति समासः, प्रपञ्चो नानाविधता अत्रोक्तरूपमौत्सुक्यम् । विवलनादिनिश्चयानुभावैः सूचिता व्रीडाहर्षादयो यथासंख्यं व्यभिचारिणः । केवलायामित्यत्र स्फुटतयेति शेषः । साधारणत्वं मुख्यत्वम् । अन्यतमस्यैकस्य द्वयोर्वा अपेक्षया द्वयस्येत्युपलक्षणम् द्वयोरुपादाने एकस्यापेक्षत्वम् ।

[वैवि] शेषानिति । तस्य सामान्यतो निर्णीतस्य रसस्य [4]विशिष्यत इति विशेषस्तान् । तत्र शृङ्गारो नाम प्रौढतरपरस्परानुरागोत्थसुरतप्रकृतिः [5]रतिः स्थायिभावः । तत्रालम्बनं नायकौ, उद्दीपनं तयोरेव यौवनादि चन्द्रचन्दनकोकिलभ्रमरनिःश्वासदेशकालविशेषादिश्च । अनुभावाः [6]कटाक्षभ्रूक्षेपालिङ्गनचुम्बनादयः ।

> सञ्चारिणस्त्वाह··········लिः । [[7]अत आह]
> एकोनपञ्चाशदमी च भावा युक्त्या निबद्धा [8]परितोषयन्ति ।
> आलस्यमौग्र्यं मरणं जुगुप्सा तस्याश्रयाद्वैतविरुद्धनिष्ठम् ॥ इति
> एकोनपञ्चाशद्भावाश्च व्यभिचारिणः, स्थायिनोऽष्टौ ।

---

१. इत्थंभूतलक्षणे । पा० सू०
२. Pt. text reads प्रज्ञाविशिष्टानि for अङ्कानि चिह्नानि ।
३. „ „ अवहित्थ वेगादीनां रोमाञ्चस्तम्भादीनां for सञ्चारिणामेव हि व्यभिचारिणां, आवेगादीनां, अनुभावादीनां रोमाञ्चस्तम्भादीनामाक्षेपः ।
४. „ „ त इति विशेषास्तान् for विशेष्यत इति विशेषास्ताः ।
५. „ „ इति for रतिः ।
६. „ „ कटाक्षभुजाक्षेप for कटाक्षभ्रूक्षेप ।
७. Transcript omits अत आह ।
८. Pt. text reads परिपोषयन्ति for परितोषयन्ति ।

[वाग्वेदादि] वाग्वैचित्र्यादि चेष्टावैकृतभिश्चित्तविकारो हासः। तत्कृती रसो हास्यः। तत्रालम्बनं विकृतवेषादिकः कोऽपि। उद्दीपनं [1]चेष्टादि। अनुभावा अक्षिसङ्कोचनवदनस्मेरतादयः। सञ्चारिणोऽवहित्थाग्लानिमूर्च्छादयः।

करुणो बन्धुविभवनाशजनितशोकप्रकृतिः। अत्रालम्बनं बन्धुमरणादिः। उद्दीपनं तद्दाहादि। अनुभावो भूमिपतनरोदनोरस्ताडनादिः। सञ्चारिणो ग्लानि-निर्वेदमूर्च्छादयः।

[2]एवमादिरसस्य च यथा सान्द्रानन्दायतत्वमेव तथोपपादितमस्मत्साहित्यदर्पणे। रौद्रोऽपकारिणि प्रौढक्रोधप्रकृतिः। तत्रालम्बनमपकारी। उद्दीपनमपकारादि। अनु-भावोंऽस्फोटनतर्जनादिः। सञ्चारिणो गर्वादयः।

दान-दया-धर्म-परिपोषको वीरः। तत्रालम्बनं द्विजद्विपदार्तपुणचतीर्थादिः। अनुभावाः सर्वस्वत्यागाद्यः क्रूरसंचारजनितभयस्थायिभावस्त्रीनीचप्रकृतिर्भयानकः। तत्रालम्बनं क्रूरसत्वादि, उद्दीपनं तच्चेष्टादि अनुभावो नयनमीलनगात्रसंकोचन-पलायनादिः। सञ्चारिणो जडताग्लानिमूर्च्छादयः। विकृति पूतिमांसादि जुगुप्सा-प्रकृतिः बीभत्सः। तत्रालम्बनं पूतिमांसादिः उद्दीपनं तत्रैव कृमिपातादि। अनुभा-वास्तु उत्तमप्रकृतिगता कार्यान्तरव्यासङ्गादयः। अधमगताश्च मुखविकृतत्वनिष्ठी-वनादयः, व्यभिचारिणो निर्वेदापस्मारजाड्यादयः। लोकोत्तरस्तु प्रतिभासको विस्मयप्रकृतिरद्भुतः, तत्रालम्बनं दिव्यपुंसादिः अनुभावाः साधुवादशिरोधूलनादयः। संचारिणः [3]हर्षोत्साह धृत्यादयः। एते शृङ्गारादयः सात्विकबहुलगीतवाद्यादिपूर्विका-भिनयेन पुरावृत्तानुकारो नाट्यम्। तदाश्रया रसा महर्षिणाऽष्टौ कण्ठोक्ताः। [4]श्रव्येतु महाकाव्यादौ शान्तोऽपि नवमोऽस्ति रस [5]इत्याशयः। तस्य सम्यक् नाट्य-पोषकत्वाभावात्। यदाह धनिकः "पुष्टिर्नाट्येषु नैतस्य" इति। तत्र संभोगः संयुक्त-नायकविषयः। विप्रलम्भश्च विप्रयुक्तविषयः। संयोगवियोगौ [6]परस्परायत्तनायकरूपौ, तेन दूतीप्रेषणादेः [7]संभोगविषयत्वं ईर्ष्यामानादिश्च विप्रलम्भविषयत्वमविरुद्धम्।

---

१. Pt. text reads तच्चेष्टादि for चेष्टादि।

२. „ „ एवमादिरसस्य च यथोपपादित for एवमादिरसस्य च यथा सान्द्रानयतत्वमेव यथोपपादितमस्मत्साहित्यदर्पणे।

३. „ „ हर्षधृत्युत्साह for हर्षोत्साह धृत्यादयः।

४. „ „ अन्ये तु for श्रव्ये तु।

५. „ „ इत्याहुः for इत्याशयः।

६. „ „ परस्परो यत्र नापन्नतारूपौ for परस्परायत्तनायकरूपौ

७. „ „ संयोगविषयत्वं for संभोगविषयत्वम्।

शून्यमिति। अत्र नम्रशब्दः अन्तर्भूतणिजर्थः तेनालोकननमनयोरेककर्तृकतया पूर्वकाले क्त्वाप्रत्ययः। इह च [1]नायकावालम्बनविभावौ, शून्यवासगृहादिरुद्दीपनविभावः, अनुभावा बालागतादिविलोकनादयः। नायकगताश्च व्याजनिद्रादयः। निद्राया हि व्याजत्वमुद्भतभयानकव्यभिचारित्वम् व्यभिचारिणश्च नियामकागता विलोकनेन शंका उत्थानेन चपलता उत्थानस्य गनैमनिव्रासः [?] चिरं निर्णयेन [चुम्बनेन] सुप्तं नं वेति सन्देहप्रभवो वितर्कः। नम्रमित्यनेन निभ्रानिश्चयज्ञानेन हर्षः। परिचुम्बनेन औत्सुक्यम्। आलोकनेन च पतनामुखनमनेन च लज्जानिष्ठैव नायकगता च व्याजनिद्राभयेन धृतिः चिरचुम्बनेनौत्सुक्यम् हर्षश्च। एभिश्च साधारण्येन प्रतीतैः साधारण्येनाभिव्यक्तैः सहृदयैरिति भावः। शृङ्गाररसरूपता लभ्यते। एवं वक्ष्यमाणोदाहरणेष्वपि भावादिविवेको बोद्धव्यः। अत्र द्वयोरनुरागयोरनुरागोद्रेकेऽपि [2]नायिकाया औत्सुक्यमधिकम् नायकौत्सुक्यातिरेके पुनरुदाहरति **त्वमिति**। वीटिका ग्रन्थिः। सस्मितमुखी सैव नायिका नेत्रस्य उत्सवो विकासादिः, अपरो विप्रलम्भः। अभिलाषः सङ्गमप्रागभावः। विरह एकस्य द्वयोरपि गुर्वादिवशात्सङ्गमोपरोधः। ईर्ष्या अन्यासक्ते कान्ते नायिकाकोपः। एवं चोपलक्षणम्। तेन प्रणयमानोऽपि संगृह्यते। यदुक्तं मम **साहित्यदर्पणे**—

> द्वयोः प्रणयमानः स्यात् प्रमोदेऽपि [सु] महत्यपि।
> प्रेम्णः कुटिलगामित्वात् कोपो यः कारणं विना॥ इति सा० द० ३-१९८
> प्रवासो भिन्नदेशता। शापो मुन्यादिक्रोधयन्त्रणः।

तस्य चापवादत्वात् पूर्वभेदान्तरसंभवेऽप्यनेनैव व्यपदेशः। **प्रेमार्द्रा इति**। दर्शनादिगत भावव्यञ्जकः कश्चन विशेषः। प्रेम्णः तत्पूर्वको वशीकारः। प्रणयः रहस्यसंवेदनम् परिचयः नयस्तत् भयत्वमिव। निशान्तं गृहम्, वृत्तः प्रवृत्तः, निवर्तनस्य पार्श्वपरिवर्तनस्य व्यतिकरः।...........पुण्यं यस्या एवेति प्रकरणादित्यर्थः। सख्यं सौहार्द्रम्। तेन उपदेशोऽर्थात्सखीनां अश्रुभिःपर्यस्तनेत्रोत्पलेति संबन्धः। **प्रस्थानमिति**। अत्र प्रवासस्य भाविरूपो भेदः। यदुक्तं मयैव-**भावीभवन्भूत इति** त्रिधा स्यात्तत्र कार्यंज इति। सा० द० ३-२०८ कार्यज्जातः प्रवासभेदः।

त्वामिति। अत्र तवाकृतिलिखनं [लेखनं] कथंचिन्निर्वाह्य पादपतनारम्भे त्वद्विनामलासस्मरणविह्वलान्तःकरण [विपुलान्तःकरण]........[3]प्रवाहरूपता-

---

१. Pt. text reads नायकः आलम्बनविभावः for नायकावालम्बनविभावौ।

२. Transcript omits नायिका।

३. Pt. text reads प्रवाहरूपतामाप तैर्वाच्यैः for प्रवाहरूपतामापन्नैर्बाष्पैः।

मापन्नैर्बाष्पैः समन्ताद्दर्शनविघातः क्रियत इति सर्वशास्त्रविदां श्रीमद्वाचस्पतिमिश्राणां व्याख्यालिखनमपि [[1]व्याख्यालेखनमपि] गूढतिमित्वन्येषा [गूढमितित्व] एतावत् प[वि]द्यमानसंधानेनैवेदं रसध्वन्युदाहरणम् प्रबन्धपर्यालोचने तु विप्रलम्भसञ्चारी उन्माद एव ।

आकुञ्चेति । वादिति [थूदिति] प्रहारशब्दानुकरणम् । अत्र विष्ठरशर्मा [विष्णुशर्मा] आलम्बनम् । प्रहारदानादि[2]द्दीपनम् । कपोलोच्छ्वसनदृष्टिसङ्को-चादयो हर्षावहित्थाश्चानुभावव्यभिचारिणः ।··· · ·· ··· अपि सामर्थ्यात् नट्याः । [सामर्थ्याल्लभ्याः]· एवमन्यत्रापि ।

· **ग्रीवेति** । पश्चादर्थं ···············ति उच्छ्राय उच्छूनता । पिण्डी जंघोर्ध्वभागः । रङ्कुश्चिरदुर्लभताहारः । करङ्को अस्थिशेषम् । शिरःस्थपुटम् [4]विकटगतीविभावाः ।

न तिरोधीयते स्थायी, तैरसौ पुष्यते परम् इति रतिलक्षणम् । यथा **मम साहित्यदर्पणे** (३.१७६) रतिर्मनोनुकूलेऽर्थे मनसः प्रवणायितमिति । इष्टं च [इयंच] मदनाविष्टस्त्रीपुरुषनिष्ठैव शृङ्गारस्थायी ।

व्यभिचारिण इति ।
विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ ।।

तत्र तत्त्वज्ञानापदीर्ष्यादिश्चिन्ताग्लानिदैन्यादिकृत् स्वावमाननं निर्वेदः ।[5]
सदृशदर्शनादिजो क्रमानुमानादिकृत् वासनोद्बोधः[6] स्मृतिः । यथा मम······

[7]भ्रमयति समत्रायं स्मेरवक्त्रारविन्द—
स्फुटदधरपुटं तं दर्शित ·····विभेदम् ।
[8]अलसवलितभावं किञ्चिदाङ्गं ।
[9]केवलयति [कवलयति च] मनो मे पक्ष्मलाक्ष्याः कटाक्षः ।।

---

१. Pt. text reads व्याख्यानमपि for व्याख्यालेखनमपि ।
२. Pt. text omits प्रहारादिरुद्दीपनम् ।
३. Pt. text reads अनुक्ता मपि ।
४. „ „ विकटगतविभाबः । for विकटगतीविभावाः ।
५. Transcribed copy omits त्रक् सूत्रवृत्या भावानांमन्येषामनुगामकः।
६. Pt. text reads वासनोद्वेगः for वासनोद्बोधः ।
७. „ „ स्नपयति for भ्रमयति ।
८. „ „ स्फुटदधरपुटान्त for स्फुटदधरपुटं तं ।
९. „ „ अलसचलितमौर्वी for अलसवलितमावं ।

हर्षशोकप्रहारेणोत्कण्ठादिजोऽस्थानहसितगीतप्रलपितादिकृच्चित्तसंमोह उन्मादः।
यथा ममैव—किं कन्दर्पमुखं विधाय मधुपैः रेतैःनवैः पल्लवैं।
श्येतिश्युतशरैः करोषि जगतां जेतुं प्रयासं स्वधा[1]।
निद्रातुं शयितुं प्रयातुमथवा स्थातुं प्रभुः को भवेत्।
एकोऽसौ कलकण्ठकण्ठकुहरे जागर्ति चेत्पञ्चमः॥

एवमन्येषामपि व्यभिचारिणां कारणकार्यस्वरूपोदाहरणानि लोकप्रसिद्धचा मदीयसाहित्यदर्पणोक्तरीत्या बोद्धव्यानि। भावाश्चित्तवृत्तयो नाम। उद्देशतः त्रयस्त्रिंशदुक्ताः। अन्या अपि चित्तवृत्तयः एषामेव विभावानुभावरूपतया [3]एष्वेवान्तर्भवन्तीत्याशयः। किञ्च रत्यादीनापि स्थायित्वाभावे सञ्चारित्वमेव। तल्लक्षणायोगात्। तथा हि—

हासक्रोधादयः शृङ्गारवीरादौ [4]लवणोदकप्राये स्थायिनि ·········[5]प्राया उन्मग्ननिमग्ना दर्शयन्ते [दृश्यन्ते]। **अयमेव विशेषः**। निर्वेदादयः पुनः व्यभिचारिण एव न कदाचन स्थायिनो भवितुमर्हन्ति। ये स्वभूत [?] विक्रमोर्वशीय मदीयचन्द्रकलानाटिकाप्रभृतिषु तु उन्मानादादे [उन्मादादे] ग्रन्थव्यापित्वं। न[6] पात्रे धैर्यम्। **तदुक्तं मम साहित्यदर्पणे**—

उन्मादेन तु स्थायिपत्रे न स्थैर्यमेति।

यदिति [7]यच्च निर्वेदस्यापि भावतामवलम्ब्य ग्रन्थकृता अवान्तररसस्वीकारः तत् **प्राचीनस्य कस्यचिदाचार्यस्यानुरोधेनैव**। निर्वेदस्य [8]स्वावमाननरूपत्वात्। [9]विषयालम्बनप्रत्ययमात्रताद्बाह्यसञ्चार्येव भवितुमर्हन्ति। शान्तस्तु शमस्थायिभावो नवमो भवितुमर्हति। [10]तदुक्तं तत्रैव—(३-१८०)।

---

१. Pt. text reads वृथा for स्वधा।
२. See Sahityadarpana तृतीय परिच्छेद।
३. Pt. text reads एष्वेवान्तर्भवितुमर्हति for एष्वन्तर्भवन्ति।
४. „ „ लवणाकर इव for लवणोदकप्राये स्थायिनि।
५. „ „ Transc. copy omits बुद्बुदप्राया।
६. नतूपात्तस्थैर्यम्।
७. „ „ निर्वेदस्थायिभावतां for निर्वेदस्यापि भावतां।
८. „ „ स्वावमाननमात्रत्वात् for रूपत्वात्।
९. „ „ विषयालम्बनमात्रत्वाच्च for विषयालंबनप्रत्ययमात्रत्वात्।
१०. „ „ तदुक्तं for यदुक्तम्।

शमो निरीहावस्थायां आत्मनि विश्रामजं सुखमिति । यदुक्तं कृष्णद्वैपायनेन—

यच्च कामसुखं लोके यच्च किञ्चित् महत् सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥

स्त्रैणं स्त्रीसमूहः । संप्रत्युद्देशक्रमप्राप्तान् भावादीन् रूपयति रतिरिति । अञ्जितो मुख्यतया यद्यपि काव्यार्थस्याखण्डबुद्धिवेद्यतया आस्वाददशायां गुणप्रधानभावाभासो नास्ति । तथाप्यास्वादोत्तरकालं विवेचकैरयमनुभूयते । तदुक्तं तत्रैव साहित्यदर्पणे[1]—"यथा मरीचखण्डादेरेकीभावेऽपि पानके तत्रैकं कस्यचित् क्वापि तथा संचारिणो रस" इति । योग्यता माहात्म्यम् । [2]अस्याश्च देवताविषयरतेरपि स्वीकारेणाहङ्काररहितत्वे शान्तेऽन्तर्भावः ।

रसाभासाः

क्वचित् स्थायिनामपि प्रकरणपर्यालोचनया [3]परस्परं रागप्रकर्षपरिपोष-राहित्यभावत्वैव । यदाह—

"हरस्तु किञ्चित् परिवृत्त धैर्य" इत्यादौ । अत्र च[4] विषयानौचित्यं त्रिषया[5] ......भासः । अनौचित्यप्रवृत्तित्वं च भरतादिप्रणीतशृङ्गारादिरसलक्ष-णात्मकदेशमात्रयोगे बोद्धव्यम् । तच्चाधममात्रगतत्वे तिर्यगादिनिष्ठत्वे बहुनाय-कनिष्ठत्वे[6] ।

हास्याभास इत्यादि । स्तुम इत्यादि । अत्रैकस्या नायिकाया बहुविषया रतिः प्रतीयते [7]तत्राह अत्रेति । स्तूम [स्तुम] इत्यनेनानुगतं यं विना न रस इति रमणव्यापारोपादानम् । आदिशब्दात् कः प्राणान् विलेभ इत्यादिनानुगतं यं

---

१. Sahityadarpana reads : "यथा मरीचखण्डादेरेकीभावं प्रपाणके । उद्रेक : कस्यचित् क्वापि तथा संचारिणो रसे ॥ (३-२६१-२)
२. Pt. tex:, omits अस्याश्च ।
३. „ reads परस्परानुराग for परस्परं राग ।
४. „ omits च ।
५. Blank sems nonethlecss.
६. Pt. text reads वा शृङ्गाराभासः हासस्य after बहुनायकनिष्ठत्वे ।
७. „ तदाह for तत्राह ।

[1]मृगयस इत्याद्याद्यन्वेषणादि व्यापारोपादानं कर्तृ तस्या अनेककामुकविषयमतिना संव्यनक्ति। तथा हि। यदि ह्यत्र बहुव्यापारोपादानं एक विषयं स्यात् यच्छब्दस्यैकदैव निर्देशः स्यात्। तदत्र स्तुत्यादिमुख्यार्थेन बाधितुं सोपहासोत्प्रासका[3]……… नेनोचितप्रवृत्तस्य शृङ्गारस्याभासतामभिव्यनक्ति पर्यन्ते हास्यं परिपोषयन्तीति भावः। [4]एकेति। स्मेरं ईषद्विकसितं अत्र प्रकरणवशात् कस्यचित् दुर्भगस्यार्थं निविरित्यमानायां [निवर्त्यमानायां] नायिकायां चिन्ताख्यो भावाभासः।

मात्मस्येति [भावस्येति] तथेति। नाम्नादावपि भावशान्त्यादिरिति भावः। वीररभसेर्ष्या न [?] उत्साहवशेनालङ्कारसमुद्गमः प्रकर्षः।

भावेति। भावा व्यभिचारास्तेषां प्रशान्त्यादयश्चेति भावः। राजेति। यथा विवाहप्रवृत्तो भृत्यो राज्ञाप्यनुगम्यमानो लोकैराबद्धमुखे सुखतया[5] इत्यर्थः।

इदञ्च व्यासवाल्मीकिकालिदासप्रभृति[6] रग्गुफजीवित [रत्युपजीवित] भूतस्यासंलक्ष्यक्रमरूपस्य रसादेस्तत्त्वं[8] परकीयग्रन्थव्याख्याप्रसङ्गेन स्तोकस्तोकमुक्तं अल्पेनापि प्रसत्तेन [प्रसङ्गेण] सन्दर्भेण सशेषविशेषमवगन्तुकामा मदीयसाहित्यदर्पणमवलोकन्तु[9] विद्वांसः।

शब्दशक्त्युद्भवध्वनिः

संप्रति क्रमप्राप्तं विवक्षितान्यपरवाच्यभेदस्य लक्ष्यक्रमव्यंग्यस्यार्थवादपूर्वकं विभागमाह अन्विति। [10]अनुस्वानमनुरणनं तत्सदृशः, अत एव संलक्ष्यः,

---

१. Pt. text reads यं मृग for यं मृगयस।

२. „ reads ०० विषयमभिलाषं for विषयमतिना।

३. Transcript omits कुर।

४. Pt. text राकेति for एका० this ms. might have followed the reading "एका सुधाकरमुखी।

५. Pt. text adds प्रेक्षत after सुखतया।

६. „ adds महाकविभिः after ०० प्रभृति

७. „ reads ००० रनुगम्यजीवित for रत्युपजीवित।

८. „ reads रसादेस्तावं for रसादेस्तत्वम्।

९. See S. D. ३—२६७.

१०. Pt. text reads अनुस्वानेऽनुरणनं for अनुस्वानमनुरणनम्।

[1]क्रमप्रतीतेः पौर्वापर्यस्य तदुभयशक्त्या उत्थानमुखार्थात् । [2][3]व्यङ्ग्यस्य [श्च] यत्रेति विग्रहः । वृत्तावपि शब्दशक्तिमूलं प्रतीतिप्रधानबीजं यस्य तथाविधोऽनुरणनरूपो यत्रेति समासः । एवमन्ययोरपि । शब्दात् शक्तेः । अनु [अर्थ] शक्तेस्तु [4]साचिव्यमात्रमिति भावः । प्रधानत्वेनेति । गुणीभूतव्यङ्ग्यनिरासः । शब्दस्य च ········ ········रुद्भवः, अर्थात् व्यङ्ग्यस्य यत्र काव्यभेद इति समासः । अलङ्कारमिति । अलङ्करणमलङ्कारः । स न विद्यते यत्रेति समासः ।

उल्लास्येति । अत्र कम्पिण [किरण] नृपतिः [5]ग्रन्थकृद्वर्णनीयः । तेनाभिधेयोऽयमर्थः । येन देवेन राज्ञा कालो विप्रसंहर्ता [विश्वसंहर्ता] । करवालः खड्गः स एव महदम्बु धाराजलं वहतीति महाम्बुवाहः, तदुल्लासि इत्यादिरिति केचिद्व्याचक्षते । अन्ये तु करवाल एव महाम्बुवाहो मेघ इति रूपकसमासं स्वीकुर्वन्ति ।

नन्वेवमेकदेशविवर्तिरूपकमिति द्वितीयार्थस्य स्फुटाभावात् कथमिहोपमाध्वनिरिति चेत् न तथाहि यत्र "जल [द] भुजगजं विषमित्यादौ गरलत्वारोपणं विना जलदभुजगयोः सादृश्यमस्फुटं तत्रैव [6]रूपकाङ्गीकारो न्याय्य इति । इह तु खड्गमेघयोः सादृश्यं व्यक्ततया परसाचिव्य[7]मनपेक्ष्य स्वमात्रविश्रान्तमिति न रूपान्तरापेक्ष्यं यश्चात्र कालकरं कृष्णरश्मिं बालमभिनवमम्बुवाहमुल्लासस्य [?] देवेन मेघाधिकारिणा धाराकारैर्जलैरित्यादि द्वितीयोऽर्थःस्फुरति [8]तस्यानुभवसिद्धस्याशक्यापह्नुवस्याभिधया नियन्त्रणात् व्यञ्जनयैव बोद्धुमुचितस्यासंबद्धत्वं मा प्रासाङ्क्षीदिति [9]मेघाधिकारिणोरुपमानोपमेयभावः कल्प्यत इति भावः ।

तिग्मः शत्रुषु रुचिरो मित्रेषु प्रतापो यस्य विधुराणां शत्रूणां, मधुरा मनोहरा लीला चेष्टा यस्य मतिज्ञानयोस्तत्त्वेन वृत्तिर्यस्य, प्रतिपदं पक्षाणां सहायानामग्रणीः। तत्रास्यार्थस्य राजस्तुतेः प्रकृतस्याभिधेयत्वम् । द्वितीयार्थश्चातिग्मरुचिः सूर्योऽपि

---

१. Transcript reads क्रमप्रतीतेः पौत्रपर्यस्य for क्रमः पौर्वापर्यम् ।

२. „ omits तथाविध व्यंग्यस्य स्थितिर्यत्र ध्वनौ काव्यभेद स शब्दार्थस्य ।

३. Pt. text reads व्यंगयो यत्रेति for व्यंग्यश्च यत्रेति ।

४. „ „ साचिव्यमिति for साचिव्यमात्रमिति ।

५. Transcript reads ग्रथनीयः for ग्रन्थकृत् वर्णनीयः ।

६. „ reads रूपकालङ्कारो for रूपकाङ्गीकारो ।

७. „ reads मपेक्ष्य for मनपेक्ष्य ।

८. Pt. text reads तस्याप्तुं भवसिद्धस्य for तस्यानुभवसिद्धस्य ।

९. „ adds फणि before मेघाधिकारिणो ।

प्रतापरहितः, विधुश्चन्द्रोऽप्यनिशाकरः। मधुर्वसन्तोऽपि लीलारहितः। मतिमानपि अतत्त्वेऽवस्तुनि वृत्तिर्यस्य। प्रतिपत् तिथ्यादिरपि पक्षस्य नाग्रणीरिति विरोधाभासो व्यङ्ग्यः।

अत्रेति। तिग्मरुचिरप्रताप इत्यादिपदेषु खण्डीकृतेषु योऽसौ विरोधाभासः स्फुरति तेषां पदानां व्यङ्ग्य इत्यर्थः। समितः सङ्ग्रामात्। प्राप्तैरुत्कर्षैरमितः अपरिमितः असन्ता अनन्तः, अहितः शत्रुः, मानमितं तेन हीनः कथं तेन युक्तः, हितेन रहितः कथं तेन युक्त इति विरोधः।

अत्रापीति। विरोधस्याभासप्रतीतिः। कुपतिमपि कलत्रवल्लभमित्यादौ त्वपिशब्दबलात् झटिति विरुद्धार्थ एव प्रतिभासते। अन्यथा हि शब्दस्य निरर्थकतापत्तेः। पृथिवीपतित्वाद्यर्थस्य तु प्रकरणादिपर्यालोचनयैव बाध्यत्वाद्विरोधालंकारस्यैव प्रतिभास इति विरोधालङ्कारस्य व्यङ्ग्यत्वमेव। एवं पदस्य समंगासमंस्य त्व [?] विच्छित्याशयेनोदाहरणद्वयम् [?]।

[1]उपादानमुपकरणं चित्रं नानाप्रकारमालेख्यं च। कला शक्तिः। अत्र शिल्पिभ्य उत्कर्षप्रतीतेर्व्यतिरेकालङ्कारः।

ननूक्तं व्यङ्ग्यस्य प्राधान्ये ध्वनिरिति। इह च व्यङ्ग्यानामलङ्काराणां प्राधान्येऽलङ्कारमेव [अलंकार्यमेव] तत्कृतोऽलङ्कारत्वा…… [2]। यदाहु :—

काव्यशोभाकरान् धर्मानलङ्कारान् पवक्ष्यते [प्रचक्षते]। इति अत आह **अलङ्कार्यस्यापीति**। श्रमणः पाखण्डविशेषः। न च रसाद्युत्कर्षकत्वमात्रेणालङ्कारता, वाच्यवाचकालङ्करणरसाद्युत्कर्षत्व एव हि तथाङ्गीकारात्। रसाद्यपेक्षया पुनरप्राधान्येऽपि न काचित् क्षतिरि [त्यु] क्तमेव।

[3]वस्तुध्वनीनुदाहरति **यत्विति**।

पथिक नात्र प्रस्तरोऽस्ति मनाक् प्रस्तरस्थले ग्रामे।
उन्नतपयोधरं प्रेक्ष्य [यदि वससि तद्वस]॥

---

१. Pt. text reads उपादानमुपकरणत्व for उपादानमुपकरणम्:।
२. Blank।
३. Pt text omits वस्तुध्वनीनुदाहरति यत्विति।

स्तृणादिशय्या, प्रस्तराः पाषाणाः, पयोधरो मेघः, व्यंग्यपक्षे स्रस्तरं शास्त्रं, रत्याद्यनुशासकम् । उन्नतपयोधरां मामित्यर्थः । न चेह प्रस्तरशब्दस्य शास्त्रार्थत्वे नोपमाध्वनिः सादृश्यस्याविवक्षितत्वात् । रहस्यसङ्गोपनार्थ एव हि द्व्यर्थशब्दप्रयोगः ।

शनिर्ग्रहः । अशनिः कुलिशम् । अत्रैकयोरेकविषयाभावात् न विरोधालङ्कारः । उदारो महान् अनुगता दारा यस्येत्यनुदारः । अत्र तु विरोधालङ्कार एव चकारस्य [चमत्कारस्य] समुच्चयार्थत्वेनापि गतार्थत्वान्न विरोधालंकारस्य वाच्यत्वम् । अत्रेति । विरुद्धौ शन्यशनी ।

अर्थशक्त्युद्भवध्वनिः

अर्थशक्त्या उद्भवः [1]अर्थात् व्यङ्ग्यस्य यत्र काव्ये, तेन कविना उम्भितस्य काव्ये पूरितस्य निबद्धस्येति यावत् । न खलु कवेस्तन्निबद्धस्येव रागाद्याविष्टिता, तेन प्रौढोक्तेस्तन्निबद्धस्य वक्तृप्रौढोक्तिरधिकं सहृदयचमत्कारिणीति पृथगुक्ता । यत्र यतः अलस ग्रप्रसिद्ध । [?]

अलसशिरोमणिर्धूर्तानामग्रिमः[3] पुत्रि धनसमृद्धिमयः ।

इति [4]नलिनी नताङ्गी प्रफुल्लविलोचना जाता ॥

नताङ्गीति वेश्याया विशेषणम् । अत्रेति । वाच्येन वस्तुना मयैवोपभोग्य इति वस्तु व्यज्यत इति संबन्धः । अहं तु ध्वन्या [अहं त्वदन्या or अहं तु धन्या] उक्तप्रकाररागावेशदायि वल्लभे[5] त्वयीति भावः ।

दर्पेति । गन्धगजो मत्तगजः निघ्नमतिशिष्टम् । [6]कषाया रक्ता । अत्र[7] त्वुपमानेन हि यस्य कस्यचित् सदृशं वस्तु तस्य कार्यं करोति । तेन कालीकटाक्षतया संभाव्यमानः कृपाणः दृष्ट इति

---

१. Pt. text reads अर्थ व्यंग्यस्य यत्र काव्येति न कविना for अर्थात् व्यंग्यस्य यत्र काव्ये, तेन कविना उम्भितस्य ।

२. Pt text reads निरुद्धस्येति for निबद्धस्येति यावत् ।

३. Pt. text reads धूर्तानामग्रणीः for धूर्तानामग्रिमः ।

४. ,, reads भणितेन for नलिनी ।

५. ,, reads वल्लभतयेति for वल्लभे त्वयि ।

६. ,, omits कषाया रक्ता ।

७. ,, omits त्वुपमानेन ।

संभावनोत्थानादुत्प्रेक्षैवेति **चण्डिदासपण्डितः** । **एतच्चिन्त्यम्** । तथाहि कालोकटाक्षदर्शिनां भयक्षयो भवति । तत्कृपाणदर्शिनामपि वैरिणामुपमाया युगत्वात् [युक्तत्वात्] । इह च साधारणधर्मबिम्बप्रतिबिम्बभावो नोत्प्रेक्षायां घटत इति वादिनं **श्रीधरसांधिविग्रहिकमाक्षिपन्तो** यदात्मनो विरचितं ।

कण्ठे लुठत् काचन यक्षसूत्रं
संवीक्ष्यमाणः शितरामधैर्यः ।

श्यामोपभासे तडितोपगूढं

सशब्दलाकः [लसद्बलाकः] किमु वारिवाहः ।। इत्यादिश्लोकं दर्शयति **तदप्यविचारिताभिधानम्** । साधारणधर्मस्य बिम्बप्रतिबिम्बतया निर्देशे उत्प्रेक्षाबीजस्याध्यवसायस्यासंभवात् विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणो ह्यध्यवसायः स च कुतो भिन्नसाधारणधर्मतया निर्दिष्टः स्यात् ।

अध्यवसायाभावे च किमुशब्दमात्रस्य नोत्प्रेक्षाद्योतकत्वं किं च किमु शब्दप्रयोगो न घटत इत्यलं वहुना ।

गाढेति । विरोधालङ्कारेणेति विरोधमूलेन कार्यकारणयोः पौर्वापर्यविपर्ययरूपेणातिशयोक्त्यलङ्कारेणेत्यर्थः । तथाहि स्वाधारनिदर्शनं [स्वाधरदर्शनं] कारणम् । वैरिस्त्रीणामोष्ठानाञ्च कान्तदन्तक्षतमोचनं कार्यभूतं समकालतया निर्दिष्टम् । **अधरेति** । अधरो निर्दष्टश्च, शत्रवो व्यापादिताश्चेति तुल्यमेककालं[1] योगो ययोस्तौ तुल्ययोगिनौ । तयोर्भावस्तुल्ययोगितेति व्युत्पत्या समुच्चयालङ्कारो व्यज्यत इति भावः । न तु प्रकृताप्रकृतसमानगुणक्रियासंबन्धरूपा [2]तुल्ययोगिता । ममेति निदर्शनरूपः । क्रूरपिशाचैर्ममाधरं बलिरूपं [विलरूपं] प्राप्य अन्यान् धनान् सुखिनः करोत्विति बुध्या मुहुर्निजाधरं दष्टवानिति तस्य राज्ञो भूतिरुत्प्रेक्ष्यते [3]संभाव्यते ।

---

१. Pt. text reads तुल्यमेव कालं for तुल्यमेककालम् ।

२. ,, reads योगिता for तुल्ययोगिता ।

३. Pt. text omits संभाव्यते ।

ततश्चात्र समुच्चयोत्प्रेक्षयोरेकत्रायात्र [त्रात्र] प्रवेशलक्षणः सङ्करः । प्रथमः प्रधानं फलिनम्तरम् । केशेष्विति । केशेषु बलात्कारेण तेन समरे जयश्री-गृहीता यथा कन्दराभिर्विबुधा [धुरा] स्तस्य च दृढं कण्ठे संस्थापिताः ।

तस्य विधुरा इति संबन्धः । कण्ठे संनिवेशे इह चोत्प्रेक्षाव्यञ्जकत्वम् समासोक्ते तु कंदरा स्वस्त्रीव्यवहारसमारोपं विना उद्दीपितमदना इवेत्युत्प्रेक्षाया असंभवात् ।......

तच्चेदं व्यस्तकव्यञ्जत्वे उदाहरणं इति प्रकारान्तरेण व्याचष्टे । काव्यहेतुः काव्यंलिङ्गं, तस्य हि समक्षं जयश्रीग्रहणात् । भीती [भीत्या] शत्रवः पलायिता इत्येव स्वरूपं दृढं कण्ठे स्थापिता इति भागश्चापह्नुतेर्व्यञ्जकः । किञ्चात्रोत्प्रेक्षा-पह्नुतिसन्देहे न [हैः] सह काव्यलिङ्गमेकव्यञ्जकानुप्रविष्टम् ।

गाढालिङ्गनरभसोद्यते दयिते [1]लघुमुपसरति ।.
मनस्विनीनां मानः पीडनभीत इव हृदयात् ॥

लघु शीघ्रं । [2]अत्र चालिंगनोद्यममात्रेणैव वाच्यस्य सिद्धे प्रत्यालिगन-प्रसादहसितादीनां न तदङ्गत्वम् ।

मा ब्राह्मणमिव हसन्ती कविवदनाम्बुरुहबद्धविनिवेशा ।
दर्शयति तु ? बल [भुव] नमण्डलमन्यदेव जयति सा वाणी ॥
ये लङ्कागिरिमेखलायां स्खलिता संभोगखिन्नोवशी [खिन्नरगी]
स्फारोत्फुल्लफलावलीकवलना [ने] प्राप्ता दरिद्रत्वम् ।
त इदानी मलयानिला विरहिणीनिःश्वाससंसर्गिणो [संपर्किणिः]
जाता झटिति शिशुत्वेऽपि बहलास्तारुण्यपूर्णा इव ॥
सखि विरचय्यमानस्य मम धीरत्वेनाश्वासम् ।
प्रियदर्शनविश्रृङ्खलक्षणे सहसा तेनापसृतम् ॥

अत्र विभावनोत्प्रेक्षयोः संसृष्टिः ।

आर्द्रार्द्रै करजलक्षितैस्तव लोचनयोर्मम दत्तः ।
रक्तांशुकं प्रसादः कोपेन पुनरिमे नाक्रान्ते ॥

---

१. Pt. text reads लघुसमपसरति for लघुमुपसरति ।
२. „ reads तत्र च for अत्र च ।
३. Pt. text reads रदनखक्षतैः for करजलक्षितैः ।

[1]तत्रार्द्रार्द्रकरजरदनक्षतैर्मम लोचनयोरिति संबन्धः ।
रक्तोंऽशुकेव रक्तांशुकम् । अत्रेति । उत्तरालङ्कारेण ।

मम लोचने कोपेन रक्ते अपि तु रक्तांशुकवती इत्यपह्नुत्यलंकार सविवेनेति विशेषः [ध्वनिरिति शेषः]

महिलासहस्रभृते तव हृदये सुभग साऽमान्ती ।
दिवसमनन्य [कर्मा अङ्गं तनु कमपि तनयति] ।।*

मन्मथेति पदद्वयञ्च । तारका नक्षत्राणि अक्षिणी कनीनिका च । श्यामा रात्रिर्नायिका च । [1] अत्र रात्रिनायिकयोरुपमानोपमेयभावो व्यङ्ग्यः । श्यामादिपदस्थाने रजन्यादिपदनिक्षेपेऽपि, क सानन्दनं न करोत्युक्ते कान्तासादृश्यं……… च्छब्दार्थयोरप्यत्र शक्तिदार्ढ्यमिति चण्डिदासपण्डिताः ।

श्रीधरसांधिविग्रहिकस्त्वाह—यत्र एकदेशस्याशब्दशक्तिरेकदेशान्तरस्था च वक्रौचित्यादिसहकृतार्थशक्तिर्व्यङ्ग्यं प्रति व्याप्रियते तत्रोभयशक्तिमूलत्वम् । तेनात्र निशानायिकयोरुद्दीपनालम्बनविभावयोः औपम्यपर्यन्तप्रतीतिः श्लिष्टं, शब्दमाहात्म्यात् विप्रलब्धस्येति चिन्त्येति सानन्दमित्यादिना यो जगदपि सानन्दं करोति स मामेव तथा न करोतीत्यदि स्वाभिप्रायस्याभिव्यक्तिरर्थशक्तिमाहात्म्यात् ।

तेन पंथिअण एत्थेत्यादिशब्दशक्तिमूलोदाहरणादस्य भेदः । अहं तत्र श्यामाशब्देन वाच्याया रजन्याः नायिकासामान्यप्रतीतेः प्रयोजनकेऽस्तन्त्रेत्यादौ तावकेत्यादौ च विशेषणद्वयचन्द्रतारकापदयोः परिवृत्यसहत्वं दीपितमन्मथेतिविशेषणेन सर्वमपि पदं परिवृत्य सह अत्रोभयशक्तिमूलत्वं शब्दस्य परिवृत्तिसहत्वमित्ययमेव हि सर्वत्र शब्दार्थशक्तिमूलस्य व्यवस्थापनम् । अत एवेत्यस्य बहुपदनिष्ठत्वेनैव संभवाभिप्रायेण ग्रन्थकृ तु [ग्रन्थकृत्] कृत्यपदनिष्ठत्वं नास्तीति वक्ष्यति ।

पंथि अण एत्थेत्यादौ तु सहयोः सत्यशब्दयोरेव व्यञ्जकत्वमिति शब्दशक्तिमूलत्वं, व्यञ्जकस्य द्विशब्दनिष्ठत्वेऽपि पदसमु-

---

१. ,, reads तवार्द्रार्द्र for तत्रार्द्रार्द्र ।

*Four lines are left blank in the transcript beyond this.

दायनिष्ठत्वाभिप्रायेण वाक्यनिष्ठत्वं, उल्लास्यकालकरवाल इत्यादौ वाचकशब्दादिपदानां राज-मेघगर्जितरूपशक्तिविशेषाभिधायकत्वेन परिवृत्यसहत्वमेवेत्यभिप्रायवान् ग्रन्थकृत् शब्दमात्रशक्तिमूलत्वे तदुदाहृतवान् ।

अष्टादशेति । अविवक्षितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः । विवक्षितान्यपरवाच्योऽसंलक्ष्यक्रमव्यंग्यत्वेन च. व्यंग्यत्वशब्दार्थोभयशक्तिमूलत्वेन च पञ्चदशेति । नायकश्च नायिका च तौ नायकौ तयोः. अन्येषां रसानां भावादीनाञ्च ।

वाक्य इति । व्यर्थ [व्युत्थ] उभयशक्तिमूलः । एवं व्यंग्यभेदादेव व्यञ्जक भेदः । अन्ये उक्ताः सप्तदश भेदाः । **वाच्येति** । वाच्यादुत्पन्नो व्यङ्ग्यो वर्तते यस्यां सा वाचकव्यङ्ग्या । **अयमाशयः** । एकमेव पदं तथा व्यङ्ग्यं बोधयति, पदान्तराणां तु सहकारिमात्रेति ।

अस्येति । अत्र पद्ये एकैकवाक्येषु एकैकपदानामेव मुख्यार्थे बाधितया लाक्षणिकता ।

खलव्यवहारा दृश्यन्ते दारुणा यद्यपि तथापि वीराणाम् ।
हृदयवयस्यबहुमता न खलु व्यवसाया विमुह्यन्ति ॥

हृदयमेव वयस्यः सखा, तेन बहुमता परिगृहीताः । अत्राचेतनस्य व्यवसायस्य विमोहो मुख्यार्थे बाधितः स्थगितत्वं नयति । अत्र व्यामोहस्थगनयोः सामान्यविशेषभावादत्यन्ततिरस्कृतवाच्यो ध्वनिः, सर्वावयवगतः कोऽप्यतिशयो ' नारण्यां [नायिक्यां] तत्सौन्दर्यकान्तिरुज्वला पृथक् पृथगवयवाश्रिता । अत्र रसप्रतीते विभावादिसामग्रीसाध्यत्वेऽपि तद्विशेषवोत्तधिकानां [बोधितानां] तदादिपदानामेव प्राधान्यम् ।

धृतिः धैर्यं वच्चधानदृढं [?] स्वीकुरु भीतं भयचेष्टायुक्तमाननं यस्याः सा तथा तेनाति..................भसेनार्थश्च प्रतीयमान उपमायां पर्यवस्यति । मुक्तिभोगः मुक्तिर्निःश्रेयसं इतरव्यापारव्यासंगपरित्यागसुखञ्च ।एकान्ततः परमार्थस्वरूपं सङ्केतस्थानञ्च । सदागमः सच्छास्त्रं, सतः पुरुषस्यागमनञ्च । अत्र परमार्थस्य द्वितीयानुरूपरहस्यसङ्गोपनार्थमेवाभिधानात् नोपमाध्वनिः किन्तु शब्दशक्तिमूलो वस्तुध्वनिरेवायम् ।

[1]अर्थशक्त्युद्भवभेदेषु उदाहरति सायमिति । न विद्यते मीलनव्यति-[2]करः संपर्को यस्य तदमीलन [व्यति] करं यथा स्यात्तथा असितुं स्थातुमित्यर्थः ।

तदप्राप्तीति । मुक्तिं गुरुजनयंतु [??] त्रणामा [त्राणाय] मोक्षं च "न तस्य प्राणा उत्क्रामन्ति", अत्रैव समवलीयन्त इति श्रुतेः, निरुच्छ्वासताया मोक्षेऽपि संबन्धः । अत्र भगवद्वियोगजं दुःखं तदनु ध्यानजं सुखञ्च जन्मसहस्रोपभोग्य सुकृतदुष्कृतफलराशितादात्म्येनाध्यवसितमिति अशेषवय [चय] पदाद्यतिशयोक्ती व्यंज्येते [व्यज्यते] । अक्षणोऽन्वयः [अनुत्सवः] अवत्वं ररक्षहेतु [रक्षतु] अव्यसनं मेषाणां [3]असनं यत् तत्र क्षणदा कथमक्षणदेति विरोधालङ्कारः । सोंगमुत्थानहेतुर्य-स्येति विग्रहः ।

तव वल्लभस्य प्रभाते आस्तादधरोम्लानकमल [दलम्] ।
इति नववधु [धूः] श्रुत्वा करोति वदनं महीसंमुखम् ॥

अवनतं लज्जयेति भावः । मिलद्विपदं "मिलाण कमलदलो" इति समस्तपदं ।

[4]रात्रिषु चन्द्रधवलासु ललितमास्फाल्य [5]यश्चायम् ।
एकच्छत्रमेव करोतीति [6]त्रिभुवनराज्यं विजृम्भमाणः ॥

तेभ्यः कामिभ्यो योऽसौ स्मरभ्यादेश [स्मरस्यापदेशो] कश्चित् पराङ्मुख इति । तेभ्य इत्यत्र निधरिणे पंचमी । पक्षस्यानुमानविरुद्धत्वात् ।

[7]आज्ञाप्रधानो राज्ञः कर्म राज्यान्तेन भव..................[राज्यं त्रिभुवनं] पद्मार्थव्यञ्जकता । अदाने कुटिले सकलपुरुषसिहस्तत्वात्, वयसि यौवने, अवस्था त्रिमर्द्दोत्पदाद्याः [?] कार्यमाणोऽपि पुनः सन्तापकदम्बितेन [कर्दथितेन] हृदयेन

---

१. Pt. text reads अर्थशक्तिमूलेषु for अर्थशक्तयुद्भवभेदेषु ।
२. " reads न विद्यते मिलन व्यतिकरः for न विद्यते मीलन व्यतिकरः ।
३. " ज्ञानं for असनम् ।
४. " reads रात्रीषु for रात्रिषु ।
५. " reads यश्चापं for यश्चायम् ।
६. Trasncript reads त्रिभुवनं ।
७. Pt. text reads आज्ञाराधनो for आज्ञाप्रधानो ।

[1]स्तनभरवयस्येन विशुद्धजातिर्न च तमस्याहारः। विशुद्धाभिजलाहे आश्रयार्थ [2]कदाचिच्चलति स …………।

समुग्धः श्यामलांगो धम्मिल्लः कलितललितनिजदेहः।
[3]तस्यानुग्धादवनं गृहीत्वा स्मरः सुरतसङ्गरे जयति ॥ [4]धम्मिल्ल एव स्मर इति रूपकम्।

[5]नवपूर्णिमामृगाङ्कस्य सुभग [कः] त्वमसि भण मम साद्यं [सत्यं]
का सौभाग्यसमग्रा प्रदोषरजनीतवाद्य [नीव तवाद्य]

अत्र नवपदेन नवमत्वं पूर्णिमापदेन [6]नायिकान्तरसंसर्गः। ख्यातेः कलङ्कत्वम्, प्रदोषपदेन प्रकृष्टदोषत्वं, रजनीपदेन रागित्वम्।

सखि निधुवनसमरंगपाली सख्या [7]निबिडतया।
हारो निवारित एव तद्धियमानस्तः [उच्छियमाणस्ततः] [कथंरमितम्]॥

अङ्गपाली आलिङ्गन विशेष एव सखी तद्धियमानो [तदुच्छ्रियमाणो] आर्धधीमदत् ७[?] [8]अन्योन्यांगस्पर्शविश्रदायित्वादिति भावः। निबिडा दृढा विश्वस्तः। अत्र कथमिति प्रश्नेन पूर्वरतादधिकमनोहरत्वसूचनाद्व्यतिरेकः।

विशृङ्खलां त्वां सखि दृष्टवा कूटेन तरलतरदृष्टिं।

द्वारस्पर्शव्याजेन आत्मा गुरुवा इति। पातयित्वा विभिन्नकूटो घटः
ज्योत्स्नया मधुरसेन च विभी [वितीर्ण] तारुण्योत्सुकमनाः सा।
वृद्धापि नवोढेव परवधूरहह रति [परिहरति] तव हृदयम्॥

---

१. Pt. text reads स्तनभर[illegible]येन for स्तनभरवयस्येन
२. „ reads पदाच्चलति सः for कदाचिच्चलति सः।
३. „ reads तस्याः स्कन्धाद्वलं for तस्यानुग्धादवनं।
४. Transcript omits कलितेत्यादि स्मरविशेषणं, स्कन्धादिति स्कन्धशब्देन शोभातिशयो व्यज्यते।
५. Transcript omits स्कन्धोंऽश.सेनानिवेशश्च। बलं सामर्थ्यं सैन्यं च after रूपकम्।
६. Pt. text adds नायकानामपि after पूर्णिमापदेन।
७. „ reads अभिभवतु
८. „ reads अन्योन्यांगत्वस्यात for अन्योन्यांगस्पर्श…….।

पूर्वमर्थान्तरसंक्रमितवाच्यादीनां सामर्थ्यलक्षणप्रस्तावम् ।

प्रबन्धो महावाक्यम् [महाकाव्यम्] अर्थशक्तिभूर्द्वादशप्रकारः ।

कालधर्मो मरणम् । अस्य च श्लोकस्य पद्यान्तरसाचिवस्येव महाकाव्यतेति स्पष्टार्थं महाकाव्यांतरमुदाहरति ।

आदित्य इति । स्नेहं [१]जीवनोपायानुसारणबीजम् । मुहूर्तः संध्याकालः बहुविघ्नभूताद्यावेशसंभावसादायित्वात् [संभावि साधारणत्वात्] । अत्र स्वतः-संभविवस्तुना वस्तु व्यज्यते । लक्षन्तो लक्षात् । तद्यथा रघुवंशे—

"समपूजयतद्यात्यन्त श्रवेत्यादिना । उभयसिद्धिस्वभावरापन्तविद्यन्ते [?] न तुल्ययोगितया काव्यलिङ्गेन वा रघुराघवयोर्व्यतिरेकालङ्कारः प्रतीयते । किन्तु कुमारसंभवे हिमगिरिवर्णने [२]प्रौढोक्त्य प्रौढोक्तिसिद्धालङ्कारससृष्ट्या हिमि-गिरि[रे] रितरोत्कर्षः प्रतीयते । अर्थशक्तिभूरित्युपलक्षणम् । शब्दशक्त्युद्भवोऽपि क्वचित् प्रबन्धव्यंग्यो दृश्यते । यथा माघकाव्ये शिशुपालभूतोक्तौ [दूतोक्तौ] [३]संधौ वाच्ये वर्णमात्ररूपो विग्रहः उपमाध्वनिरपि तथाविधः संभाव्यते । पदैकदेशः प्रकृत्यादिः । [४]तस्य च यद्यपि केवलस्य न वाचकत्वं तथापि वाचकसमुदाय-प्रविष्टस्य रसादिषु तत्तदतिशयाधायकत्वं ।

[५]रतिकेलिकृतनिरसनकरकिसलयरुद्धनयनयुगलस्य ।
रुद्रस्य तृतीयनयनं [६]पार्वतीविचुम्बितं जयति ॥

अत्रेति । शोभतेमातरित्यदि [भातीत्यादि] प्रकृतिरूपप्रकृतेर्व्यंञ्जकत्वे उदाहरति । **सार्यमिति** [पथिपथीति] किरतीति किरणस्य वर्तमानविहितत्वात् साध्यत्वम् । तेन कार्यस्य झटित्युत्पन्नत्वद्योतनेन तिङ्र्युयो [तिङ्कृद्भ्यां] रसोत्कर्षकत्वं किञ्चैवमत्र कार्यकारणपौर्वापर्यव्यत्ययरूपातिशयोक्त्यलङ्कारस्य

---

१. Pt. text reads जीवनोपायास [क?] रणबीजं for जीवनोपायानुसरण-बीजम् ।
२. ,, reads प्रौढोक्तिसिद्ध for प्रौढोक्त्यप्रौढोक्तिसिद्ध ।
३. ,, reads संध्यावाच्ये for संधौ वाच्ये ।
४. ,, reads तस्यापि केवलस्य for तस्य च यद्यपि केवलस्य ।
५. ,, reads रतिकेलिहृतनिवसन for रतिकेलिकृतनिरसन०
६. ,, reads पार्वतीपरिचुम्बितं for पार्वतीविचुम्बितम् ।

व्यंग्यत्वं। एवं च न केवलं रसध्वनेः [1]पदांशव्यंग्यत्वं, किन्तु वस्त्वलंकारयोरपि इति ग्रन्थकृदभिप्रायः सूचितो भवति।

ग्रामरुहास्मि ग्रामे वसामि नगरस्थितिं न जानामि। नागरिकाणां पतीन् हरामि यातयामि [भवामि] सा भवामि ।। ग्रामरुहा ग्रामजाता यस्या नादरव्यञ्जकते [अनादरव्यंजकते] त्यर्थः। आसीदिति वर्तमान एव क्षत्त्रियकुमारोऽतीतकालयामर्ष-प्रकर्षद्योतकता।

तेषां गुणग्रहणानां तासामुत्कण्ठानां तस्य प्रेम्णः।
तेषां भणितानां सुन्दर ईदृशं जातमवसानम्।।

एकत्वमनेकैरपि हेतुभिः अन्यथाभावमप्राप्तित्वादिति भावः।

अञ्चिता प्रादुष्कृता, किं मन्यसे विहरिष्यामीत्यर्थे किं मन्ये विहरिष्यस इति प्रहायर्थे परुषे [प्रहासार्थेपुरुष] व्यत्ययः। प्रहासे मन्योपपदे मन्यतेरुत्तम [पा० १-४-१०६] इत्यनुशासनात्। प्रहासः सोपहासोत्थत्प्रयासः दुर्बलतया विशिष्टाः सम्मता इत्यर्थः। नीतिशास्त्रेषु दण्डेषु [दण्डस्य] चतुर्थोपायत्वेन गणितत्वात्। रीतिः प्रकारः सा यस्य अल्पसुरतरत्वात् [अल्पाच्तरत्वात्] पूर्व-निपाते प्राप्तेऽप्यर्चितत्वद्योतनाय [उचितद्योतनाय] पराक्रमस्य पूर्वनिपातफलप्राप्तौ सत्यां क्रियासमाप्तिरपवर्ग इति न वंशिकथितमिति प्रकरणसंगतिः। अनुकम्पायां प्रवृत्तिर्यस्येति विग्रहः परीति पुनः शब्दोऽत्र द्वितीयचाव [पाद] मात्रे नत्वागामिति द्वितीयचारे [न त्वं गतवानिति द्वितीयपादे] जडयति स्तंभयति प्रशब्देलं [रोऽत्र] ध्वंसक्रियापकर्षः। तेन माधवस्य महामोहातिशयसूत्रणद्वारा रागदार्ढ्यव्यञ्जकः।

कृतञ्चेति। चादीनां स्वातन्त्र्येणार्थबोधनविरहात्। पादावयवगताः।

रामोऽसाविति सप्तभिः षड्जादिभिःपदादिभिः, असाविति सर्वनाम्ना साक्षात् क्रियमाण तदीयलोकत्तरप्रसिद्धिर्व्यज्यते। वचनं बहुवचनं गुणैरित्येकत्र प्रातिपदिकं बहुवचनं चोत्कर्षव्यञ्जकत्वं। न त्वदिति। त्वद्भाग्यविपर्ययात् [2]न मदिति मद्भाग्यविपर्ययात् अस्मदिति। सकलस्वकुलपरिग्रहः। अन्येत्यादि। [अथेत्यादि अत्रा भाग्यादित्यनुक्तावपि भाग्यविपर्ययादिति वचनेनास्माकं भाग्येन पूर्वमभावः। [3]तेन भवतः पूर्वं नेदृशी बुद्धिरासीत्। इदानीमेव भाग्यस्यान्यथा भाववचनेन तदिदानीमीदृशीबुद्धिरभूदिति भावः।

---

१. Pt. text reads पदातिशयव्यंग्यत्वं for पदांशव्यंग्यत्वम्।

२. " " omits न।

३. " " omits from तेन भवतः ० भावः।

तरुमणिति (तरुणिमनीति)। कलामुपचयं भ्रुवोरग्रे कर्तरि। अर्थान्मदनधनुः मदनधनुषः समीपे [1]पठति। मदनधनुर्नैपुणशिक्षां कुर्वतीत्यर्थः। स्वरूपस्य विशेषत्व-प्रत्ययादिमनिच् प्रत्ययस्य श्रुतिकटुत्वपरिहारेण सहृदयसंगतित्वम्। अव्ययीभाव-समासस्य च मदनधनुषो गुणीभावेन भ्रूलताग्रस्य जगद्वशीकरणसाम्राज्यं कर्मभूता-धारस्यचाधारैकदेशवृत्तित्वपरिहारेण सकलाधारव्यावृत्तिकमप्यास्वादप्रकर्षं द्योतयति। स एवेति। [2]व्यञ्जकःव्यङ्ग्यव्यञ्जनभावनियामकः।

एवमिति। उक्तप्रकारेणान्येषां प्रकृत्यादीनां कर्मप्रवचनीयादीनाञ्च नायिकादिष्वित्यनेन केवलमर्थशक्त्युद्भवद्वादशभेदवत् अवान्तरमहावाक्यव्यंग्योऽसौ रसादिरपि तु सर्वेष्वेवं दृश्यश्रव्यादिप्रबन्धेषु मुख्यतया व्यङ्ग्योऽयं अन्यथा काव्यत्वहानेरिति भावः। पूर्वगणिताभ्यां पदवाक्यवृत्तित्वेन द्वाभ्यां [3]भेदाभ्यां। तत् तस्माद्धेतोः एकपञ्चाशदिति। पूर्वगणिताष्टादशभेदानां मध्ये उभयशक्त्युद्भवो वाक्यमात्रे। अन्ये सप्तदश वाक्ये पदेपीति पञ्चत्रिंशत्। अर्थशवत्युद्भवा द्वादश प्रबन्धेऽपि इति सप्तचत्वारिंशत्। असंलक्ष्यक्रमव्यङ्ग्यस्य च पदांशादिवृत्तित्वे-नापि चातुर्विध्यमिति व्याख्याताः दर्शिताः। न [4]त्वेतावन्त एवेति नियमः शब्दशक्त्युद्भवस्यापि [5]प्रबन्धव्यङ्ग्यताया दर्शितत्वात्।

तेषामिति। अयमर्थः। प्रथमभेदस्य सजातीयविजातीयेन सह सङ्करसंसृष्टिभ्यां संमिश्रणे चत्वारो भेदाः। द्वितीयभेदेन सहैवं चत्वार इत्यष्टौ, तृतीयेन सहैवं चत्वार इत्यष्टौ, तृतीयेन सहैवं द्वादश। एवं प्रत्येकं चत्वार इत्यन्तिमभेदपर्यन्तमिश्रणे एकस्य भेदस्य चतुरधिकं भेदशतद्वयमिति। एकपञ्चाशतो भेदानां संभूय। भेदेति [विदेति] वेदाश्चत्वारः वियत् शून्यं, चन्द्रः एकश्च, एवञ्चाङ्कविन्यासे वैलोम्यं संख्या-शास्त्रप्रसिद्धत्वात्। अयुतमेकं शतचतुष्ठयं चत्वार ध्वनिभेदा इत्यर्थः। शुद्धभेदैरेकप-ञ्चाशतसह च। इति शराः पञ्च। इषवः पञ्च। युगं चतुष्टयम्। खं शून्यं, इन्दु-रेकश्च भेदाः संभवन्ति। द्वितीयभेदस्य तु शतद्वयमेव प्रथमभेदेन सहास्य [6]भेदस्या-योगगणनासंभवात्। तथाहि योऽसौ प्रथमभेदेन सङ्करसंसृष्टिभ्यां द्वितीयभेदेन सह

---

१. Pt. text reads शिक्षा कुर्वतीत्यर्थः for पठति।
२. „ reads व्यञ्जकव्यंग्यतावनियामकः for व्यञ्जकव्यङ्ग्यभावनियामकः।
३. Pt. text reads पदाभ्यां for भेदाभ्यां।
४. Pt. text reads न त्वभावन्त for नत्वेतावन्त।
५. „ omits प्रबन्धव्यङ्ग्यतायाः।
६. Pt. text योग्यता न संभवति for अयोगगणनासंभवात्।

भेदः सहैव, द्वितीयभेदस्य प्रथमभेदेन सहेति व्यवस्था। एवं हि द्वितीयतृतीयादिष्वन्तिमभेदपर्यन्तं क्रमेण चत्वारश्चत्वार [श्चत्वारतया] पातनीया [भावनीया] इति संभूय एषां व्यङ्ग्यानां एकपञ्चाशत्। सिन्धु-गगन-शिखि-शत (शर) संख्या एका (ता) एव भेदाः। सिन्धुश्चत्वारः, गगनं शून्यं, [1]शिखी त्रयः, शराः पञ्च,। एवं पञ्चसहस्राणि शतत्रयश्चत्वारश्च भेदाः शुद्धभेदैः सह [2]चैकपञ्चाशदधिका इति।

अस्य **ग्रन्थकारस्यायमभिप्रायः**। एषु एकपञ्चाशत् [3]व्यङ्ग्यभेदेषु मध्ये प्रथमस्य द्वितीयस्यान्तिमस्य वा यस्य प्रथमबुद्धिविषयत्वान्तस्य [त्वं तस्य] प्रथमगणनीयत्वमिति। सर्वेषां चतुरधिकशतद्वयपरिमिता भेदा किमर्थं क्रमेण चत्वारश्चत्वारः पातनीया इति।

[4]क्षणाभ्यागवदिव रजायते सुभगं किमपि याचितारोदिति पश्चाद्भागबहुभी गृहेऽनुनीयताम्।

क्षण उत्सवः। हे सुभग देवर जायया किमपि भणितेति संबन्धः। **अत्रेति**। अनुनीयतामिति पदं वक्त्रादिवैशिष्ट्ये झटिति प्रतीतेरनुनयनमात्रे विश्रान्तेः। स्वार्थे बाधितमुपभोगलक्षणे अनुनयस्यैवार्थान्तरे पर्यवस्यतीति अर्थान्तरसङ्क्रमितवाच्यो ध्वनिः। उत वक्त्रादिवैशिष्ट्यार्थसंधानात्। स्वार्थे बाधितमुपयुज्यत इत्येव व्यनक्तीति द्वयोरेकतरनिश्चायसाधकाभावात् सन्देहसङ्कर इत्यर्थः।

स्निग्धेति। वेल्लनं चलनं। पयोदसुहृदां मयूराणामानन्देन केका ध्वनयः। कला मधुराः स्फुटाः **अत्रेति**। नभसो लेपनस्यासंभवात् व्यापनं, सुहृदामित्यत्र चामित्रत्वासंभवात् परिपोषकारित्वं लक्ष्यत इति द्वयोर्भिन्नाश्रयत्वात् संसृष्टिः।

रामोस्मीति। न खलु रामः सर्वं सहत एवेति। प्रसिद्धेरभावात्, मुख्यार्थे बाधिते दुःखैः पौत्रत्वादिविशेषो [?] लक्ष्यत इत्यर्थान्तिरसङ्क्रमितवाच्यत्वम्।

---

१. ,, reads सखी for शिखी।

२. ,, omits एक।

३. Pt. text omits व्यङ्ग्य।

४. क्षणप्राघुणिका देवर जायया सुभग किमपि ते भणिता।
रोदिति गृहपश्चाद्भागवलभी गृहेऽनुनीयतां वराकी॥

अनुग्राह्येति। रामपदद्योत्ये तर्ह्येवंविधायामप्यवस्थायां जीवितं धारयन्तं मां धिगित्यादावनुग्राह्ये, अङ्गन्य [?] ग्राहकत्वमङ्गभावः। **रामपदलक्षणेति**। रामोऽस्मीत्यत्र हि उक्तप्रकारेणार्थान्तरसङ्क्रमितवाच्यो ध्वनिः। धैर्य-निर्वेदस्मृति-शङ्का-वेदोन्मादपरिप्रष्टो |पुष्टो| विप्रलम्भाख्यरसध्वने एकव्यञ्जकेऽर्थप्रविष्टौ [अनुप्रविष्टौ] ऽन्यदेव दिङ्मात्रेणोदाहृतेषु। इतरत् संसृष्टिं संकीर्णं च प्रधानभूतव्यङ्ग्य भेदावान्तरम्।

• इति काव्यप्रकाशे [काव्यप्रकाशदर्पणे] चतुर्थ उल्लासः।

अथ पञ्चम उल्लासः

गुणीभूतव्यङ्ग्यप्रभेदाः

वृत्तिकृदुल्लाससङ्गतिमाह एवमिति । निर्णीते भेदप्रभेददर्शनेन निश्चयं प्रापिते । [1]अङ्गमुत्कर्षकारि वाच्यसिद्धेरङ्गं कारणम् । अस्फुटं सहृदयानामपि क्लेशप्रत्येयम् [य्यम्]। [2]एवञ्च गूढव्यङ्ग्याद्भेदः। सन्दिग्धप्राधान्यं तुल्यप्राधान्यञ्च। काक्वाक्षिप्तं वाच्यवत् . स्फुटीकृतं [3]अत्यंवद्वाच्याद्यर्थेव्वचमत्कारं व्यङ्ग्यमिति प्रतिपदान्वयः। भिदा विशेषाः। अस्माभिः पूर्वं [4]न दृष्टा इदानीं स्मृताः।

आवहामि करोमि। अत्र [5]जीवन् अनुभवामीति जीवित इति वचनात् [6]बाधितस्वार्थः अश्लाघ्यजीवनत्वं लक्षयति। तदतिशयश्च वाच्यवत् सर्वजनगोचर इत्यगूढः। अस्य च व्यङ्ग्यस्य वाच्यादधिकचारुत्वाभावात् [7]गुणीभूतत्वम्। एवं [8]तुल्यप्राधान्येष्वपि ज्ञेयम्।

[9]...वीति। वदनसंसर्गरूपस्य चुम्बनस्य [10]प्रकृतेः संभवात् संसर्गमात्रं लक्ष्यते।

अत्रेति। [11]श्रीरामचन्द्रेण वक्त्रा केनापीति सोत्प्रा[छ्वा]सवचनेन [सोल्लास-वचनेन] मयेत्या.........त्मनः प्रदारनं [प्रकटनं] न युक्तमिति [12]गुणीभूतस्य

---

१. Pt. text reads अङ्गमप्रधानं for अङ्गमुत्कर्षकारि।

२. „ „ इति हि for एवञ्च।

३. „ „ अत्यन्त for अत्यंवत्।[?]

४. „ „ उक्ता for न दृष्टाः।

५. „ „ जीवन् न भवामि for जीवन् अनुभवामि।

६. „ „ बाधिश्चार्थः for बाधितस्वार्थः।

७. „ „ गुणीभूतं for गुणीभूतत्वम्।

८. „ „ तुल्यप्रधानादिष्वपि for तुल्यप्रधानेष्वपि।

९. „ „ वीति।

१०. „ „ प्रकृतेरसंभवात् for प्रकृतेःसंभवात्।

११. „ „ अत्र श्रीरामो वक्ता for श्रीरामचन्द्रेण वक्त्रा।

१२. „ „ गुणीभूतव्यंग्यत्वम्। तस्यापीति पाठे तस्य तथाविधस्य ममेत्यर्थः। तथास्य श्लोकस्य छन्नित्वमित्याशयः which the transcript om

रसादेरङ्गमुत्कर्षकारि रसादिवाच्यस्यार्थं रंशाषारू········ पं[??] व्यंग्यं करुणस्य प्रकृतस्य परिपोषकत्वादङ्गत्वं शृङ्गारस्येति भावः। इदं हि महाभारते समरच्छिन्नं भूस्रवसो [भूरिस्रवसो] हस्तमादाय तत्कान्ताया विलपनम्। भावो देवतादिविषयरतिः। प्रेग्रसामित्यनादरे पष्ठी। लान्ति गृह्णन्ति। तत्तस्मार्दखिला विपदो विध्वस्ता इति सम्बन्ध भावाभासः शत्रुभक्तेः कृतिमत्वात्। अर्थं [?] शब्देति स्थाने पादेति पाठे पाठशब्दो भाववाचकः। भावस्य गभ्र्त्राख्यशान्तिः [?] अभियुक्तः आविष्टः।

पश्येत्कश्चिदिति। अत्र यं पुरुषं ब्रवीति तस्मात् समं गोप्यः कश्चिद्व्यापार आक्षिप्यते। तेनात्र शङ्का।·····[1]त्यादौ काकुबलेन रागानुविद्धासूया। [2]का त्वरेति। [3]आवेगविश्रृंखलस्थानरूपा धृतिः। अयि कुमारीति स्मृतिः। हस्तालम्ब-मिना [मित्यादिना] तदङ्गस्यौत्सुक्यान्नावि········ फलावच्च [4]यः श्रमः, [5]कातर्य-प्रकटनाद्दैन्यं हहहाव्युत्क्रम [6]इति विशेषेण कथमेवं मया कुमार्या क्रियत इति [7]इति बोधो मयीति यावत्। य·· ···नीतिमार्गानु सत्यादेरर्थनिर्धारण मतिरिति। क्वासि यासीति तस्य तद्गतरागातिरेकबोधार्थं किञ्चित् कुतश्चिन्मिथ्यागमन-मालोक्यौत्सुक्यम्।

रसवदादीति। अयं स रसनेत्यत्र कैलासालयेत्यत्र च रसवदलङ्कारः। अत्युच्चा इत्यादिषु षट्सु क्रमेण प्रेय-ऊर्जस्वि-समाहित-भावोदयाभावस [ब] न्धिभावशवला व्याख्या: [व्याख्याताः] षडलङ्काराः। उक्तानि प्राचीनैरिति शेषः।[8] एषाञ्च[9] गुणीभूतरसादीनां स्वव्यञ्जक·····[10] वाच्यवाचकोपस्कृतानामङ्गिनो रसस्याभिव्यञ्जकवाच्यवाचकोपस्कारद्वारेण उपकुर्वतामलङ्कारव्यपदेशः।

---

१. Pt. tex omits त्यादौ काकुबलेन रागानुविद्धासूया।
२. ,, ,, त्वरेति for का त्वरेति।
३. ,, ,, आवेगविश्रृंखलार्थस्थानरूपा for आवेगविश्रृंखल स्थानरूपा।
४. ,, ,, Question tag for यः।
५. ,, ,, कातर्यप्रकटनं दैन्यं for कातर्यप्रकटनाद्दैन्यम्।
६. ,, ,, व्युत्क्रमविशेषणं for व्युत्क्रम इति विशेषेण।
७. Pt. text reads इति बोधोऽयमिति for इति बोधो मयीति।
८. ,, ,, षट्प्राचीनैरुक्ताः for षडलङ्काराः, उक्तानिप्राचीनैरितिशेष
९. ,, ,, omits च।
१०. ,, ,, reads वाच्यत्वात् चमत्कारोपस्कृतामलङ्काख्यपदेशः for वाच्यवाचकोपस्कृतानामङ्गिनो रसस्याभिव्यञ्जक-वाच्यवाचकोपस्कारद्वारेण उपकुर्वतामलंकारव्यपदेशः।

ननु ध्वनिगुणीभूतव्यङ्ग्यानां ध्वनिमिश्रणस्य पृथग्वक्ष्यमाणत्वात् शुद्धानामेवोदाहरणमुचितम्[१]। अयं स रशनेत्यादौ तु करुणादि संभेद इत्याह-यद्यपीति। सुप्रभेदैः सजातीयभेदैः। अयं स इत्यादौ करुणादेस्तत्प्राधान्येऽपि संभोगशृङ्गारादिद्वारेणैवास्वादप्रकर्ष इति तेनैव गुणीभूतेन व्यवहारो न्याय्यः। यच्चैवंभूतानामपि मिश्रीभावस्थलेऽप्युदाहरणम्। तस्मिन् [मि] श्री भावदर्शनमात्रफलमिति।

अथ [२]वाच्यस्याङ्गभूतमनुरणनरूपं शब्दशक्तिमूलञ्च क्रमेणोदाहरति जनेति। जनस्थानं नगरग्रामादि, दण्डकारण्यं च, कनकं प्रति मृगतृष्णा निष्फलाशा, कनकमृगे तृष्णा च, वै निश्चितं [३]देहि, प्रबन्ध [प्रयच्छ] विदेहजा सीता, अलं व्यर्थं, कःभर्तुः कुत्सितस्वामिनो [४]यद्वचनं प्रतिपादनं तस्य परिपाटीषु परम्परासु अलम्। काभर्तुः दारुणस्य वदनानां मुखानां[५]परिपाट्यां पंक्तौ इषुघटना [६]शस्त्रसंयोगश्च; कुशलवेति शुद्धं वसु धनं यस्य एवंभूतौ कुशलवौ सुतौ यस्याः सा सीता च। उपमानोपमेयभावः सादृश्यं वाच्यतामन्वयोपपादकतां। वाच्याङ्गमिति पाठे तु [७]वाच्यं वाच्यार्थः, तदङ्गतां [८]सत्ववाच्यायां [९]असंवन्धे सम्बन्धरूपाया अतिशयोक्तेरङ्गतां। अत्र [१०]रामत्वमित्यवसेऽपि शब्दशक्तेरेव प्रतीयमान रामतादात्म्यं वचनेनाविष्कृतमिति गोपनकृतचारुतानि वा स्यात्। गुणीभूतव्यङ्ग्यत्वमिति भावः।

आगत्येति। विसंष्ठुलं बिल्वमिति। प्रसादयति विकाशयति प्रसन्नां करोति च, पादानां रश्मीनां पतनं प्रणामश्च। नायकश्च नायिका च नायकावि [त्येक] शेषः। अध्यारोपेणैव स्थित इति। नक्षत्र [नह्यत्र] रविकमलिनीवर्णनरूपवाच्यार्थवत्

---

१. Pt. text omits उचितम्।

२. „ „ „ वाच्यस्याङ्गभूतमनुरणनरूपम्।

३. „ „ reads देहं प्रतिच्छविः for देहि प्रयच्छ।

४. Pt. text reads यद्वचनं for यद्वदनं।

५. „ „ reads परिपाटी पङ्क्तौ for परिपाट्यां पंक्तौ।

६. „ „ reads शरसंयोगश्च for शस्त्रसंयोगश्च।

७. „ „ reads वाच्यः for वाच्यम्।

८. „ „ omits सत्ववाच्यायाम्।

९. „ „ reads असंवन्धरूपाया अतिशयोक्तेः for असंबन्धे संबन्धरूपाया अतिशयोक्तेः।

१०. „ „ „ ०० मित्यध्यवसायेऽपि for मित्यवसेऽपि।

प्रतीयमानो नायककेलिरूपोऽर्थो वाच्यार्थतां लभते। विशेष्याभिधायिनोः पदयोः [1]उभयाय [यार्थं] प्रतिपादकत्वाभात् प्रसादयतीत्येतावन्मात्रेणैव प्रकृति निर्वाहात्। पादशब्दस्य व्यर्थत्वेऽपि नोत्कटा शब्दशक्तिरित्यर्थशक्तिमूलतोक्तिः। निरपेक्षेत्यनेन वाच्यसिध्यङ्गताया भेदश्च रसादौ चानुकरणनरूपस्य [2]गुणाभाव्येतिचार [?] एवेति तस्यागमनं। भ्रमिर्मुखविकारकारी कश्चिदान्तरो धर्मः येन दिग्भ्रमणमिव दृश्यते। प्रलयो नष्टचेष्टता।

अत्र [विष] शब्दवाच्ये जले गरलार्थप्रतीतिं विना जलदभुजगयोस्तादात्म्यरूपणमसङ्गतमिति शब्दशक्तिमूलालङ्कारस्य वाच्यसिध्यङ्गता।

गच्छामीत्यपरित्यक्तधैर्यदर्शनेन किं [4]तृप्तिः [5]किंतूपभोगेनेव किन्त्विति। अन्यथाप्ययातिश्चेदनमनुपयोगेनार्थवचनमिति व्यङ्ग्यानि। अत्र यद्यपि व्यङ्ग्ययोरलङ्कारवस्तुरूपतयाप्युदाहरणद्वयं दर्शनमुक्तम्। तथापि प्रकारान्तरेण भेदमाह **एकत्रेति**। एकत्र [6]भ्रमिमरतिमित्यादौ। व्यङ्ग्यं कविनिबद्धवक्तृगतम्।

आमन्त्रणेत्यादि। वाच्यं तु [7]कविगतम्। **अदृष्ट इति**। अत्रार्थप्रतीत्यनन्तरं विपर्यालोचनयैव प्रतीतिविषयत्वात्। व्यङ्ग्यं श्लिष्टं [8]झटिति सहृदयानामप्यगोचरं।

संदेह इति। वाच्यव्यङ्ग्ययोर्द्वयोरपि[9] प्रधानप्रत्यासत्त्यविशेषात्।

ब्राह्मणेत्यदि। वारणं प्रति [रामं प्रति] परशुरामभूपस्य वाक्यमिदम्। भवतां रक्ष [सां] मित्रं जन्मप्रभृति [10]निखिलरहस्यवेदी। अत्र वाक्यव्यङ्ग्ययोः सामदण्ड-

---

१. Pt. text reads उभयार्थानुप्रतिपादकत्वाभावात् for उभयार्थप्रतिपादकत्वा......।
२. " " " गुणीभावः व्यभिचार एवेति।
३. " " omits भ्रमिः।
४. " " reads फलं for तृप्तिः।
५. " " " किन्नूपभोगेनैव for किन्तूपभोगेनेव।
६. " " " जयं स रशनेत्यादौ for भ्रमिमरतिमित्यादौ।
७. " " " कविर्गावगतं for कविगतम्।
८. " " omits झटिति।
९. Pt. text reads प्रधानप्रत्यासत्तिविशेषात् for प्रधानप्रत्यासत्यविशेषात्।
१०. " " " अखिल for निखिल।

योस्तुल्यतयैव[1] वैरिमोचनपर्यन्तत्वादप्रस्तुतप्रशंसावत् । परस्परानपेक्षया चमत्कारास्पदत्वात् द्वयोरपि समप्रधान्यम् । [2]पूर्वत्र सन्देहालङ्कारवत् [3]सन्दिग्धवाच्यस्य निषेधस्य सहभावे समकालमेव [4]झटित्यर्थप्रतिभासाद् । अत एवात्र [5]विद्यमानमेव मुख्यार्थबाधादेरनुसन्धानमपश्यताम् केषाञ्चित् लक्षणावृत्यङ्गीकारः ।

वाणीरकुञ्जोड्डीन शकुनिकोलाहलं शृण्वन्त्याः ।

गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि ॥

अत्रौत्सुक्यावेगसंवलितसत्वभावभूतं वाच्यमेव मन्मथोन्मादं प्रत्याययति । दत्तसङ्केत इत्यादि । [6]व्यङ्ग्यं तु तटस्थप्रायमेवेति भावः । एतच्च वाच्यसिध्यङ्गतादेरपवादभूतत्वाद्भिन्नं । तेषु हि व्यङ्ग्यस्यापि [7]चारुत्वं संभवति । एषां समनन्तरोक्तगुणीभूतव्यङ्ग्यप्रकाराणां यथायोगं [यथा] संभव पूर्ववत् ध्वनिप्रकारवत् । ध्वन्यङ्गतेति । अङ्गता उपाधिः, तेनोपाधिना काव्यस्य ध्वनित्वमेव न तु गुणीभूतव्यंग्यत्वमिति भावः । काव्यवृत्तेस्तदाश्रयात् । [8]तदुभयसंवादनपूर्वकत्वात् [9]एतच्च प्राचीनानुसारेणोक्तम् ।

ज्योत्स्नापूर्वप्रसवधवले सैकतेऽस्मिन् सख्या

वादद्यूतं सुचिरमभवत् सिद्धयूनोः कयोश्चित् ।

एकः प्राह प्रथमनिहतं केशवः कंसमन्यः

सत्वं तत्वं कथय भवता को हतस्तत्र पूर्वम् ॥

---

१. Pt. text reads ००स्वल्पतयैव for तुल्यतयैव ।

२. ,, ,, ,, पूर्ववत् for पूर्वत्र ।

३. ,, ,, omits सन्दिग्ध ।

४. ,, ,, reads झटित्यप्रतिभासात् for झटित्यर्थप्रतिभासात् ।

५. ,, ,, reads विद्यमानमेव मुख्यार्थबाधात् रससंबन्धानपश्यतां for विद्यमानमेव मुख्यार्थबाधादेरनुसन्धानमपश्यताम् ।

६. ,, ,, omits व्यङ्ग्यं ।

७. ,, ,, reads चारुत्वं संभावितं for चारुत्वं संभवति ।

८. ,, ,, ,, तदभिवादनपूर्वकं ता for तदुभयसंवादनपूर्वकत्वात् ।

९. ,, ,, ,, एताश्च for एतच्च ।

इत्युदाहरणं यत् केचित् ध्वनौ पठन्ति तदयुक्तं—भवतेत्यनेन [1]लक्ष्यतारूपणस्य स्फुटीकृतत्वादिति लोचनकारोक्तदिशाऽगूढाख्यगुणीभूतव्यङ्ग्यभेदस्य वाच्याङ्गता-दर्शनात् वाच्यालङ्कारस्य पुनर्गुणीभूतालङ्कारस्य व्यञ्जकत्वं यथा—

साहित्यपाथोधिसुधारसज्ञः
कापिञ्जलः कश्चिदपीह लोके ।
आदत्तमेकोसवनुविनृपुष्पीषु [?]
पुष्पद्वयं वधी [?] रित्यादिषु । हृपति [वाच्यानां] दृष्टान्त प्रतिवस्तूपमादीनां गुणीभूतोपमाव्यञ्जकता ।

ध्वनेस्त्रैविध्यम्

सालङ्कारैरिति । ध्वनि [ने] रुक्त भेदश्वतः, तैः गुणीभूतव्यङ्ग्यैः अर्थादष्टाना-मप्येषां [2]ध्वनिभेदसंख्यारीत्या सजातीयसंसृष्टौ षट्त्रिंशत् । [3]पुनः सङ्करे तु शतमष्टोत्तरमिति । ततश्चत्वारिंशदधिकं हयुद्ध [शुद्ध ० हयु क्त] भेदाष्टकेन सह चैवं [4]**बाणचन्द्रसंख्याकभेदवद्धिः** ।

संसृष्टीति । एकया संसृष्ट्या त्रिभिश्च सङ्करैः योगः संबन्धः । **तैरेवालङ्का-रैरिति** । वाच्यालङ्कारव्यङ्ग्यैः **अलङ्कारयुक्तैरिति** । वाच्यालङ्कारयुक्तैः उद्योतते प्रकाशते ध्वनिरित्यनुषङ्गः भेदानां विशेषानां गणने शुद्धजातीय [सङ्कीर्ण] संसृष्ट-तया संख्याने शृङ्गारस्य विवक्षितान्यपरवाच्यविशेषासंलक्ष्यक्रमविशेषरसविशेषस्य [5]आनन्त्यं, पूर्वोक्तरीत्या शुद्धसङ्कीर्णसंसृष्टता । भिन्नानां ध्वनिगुणीभूत-व्यङ्ग्यानाम् ।

संप्रति व्यञ्जनावृत्तिसद्भावे विप्रतिपत्तिनिरासादभासमानस्य [निरासं आरभमाणस्य] प्रकरणस्य सुप्रतिपत्तये संक्षिप्य ध्वनिगुणीभूतव्यङ्ग्यभेदमाह ।

---

१. Pt. text reads कृष्णतारूपणस्य for लक्ष्यतारूषणस्य ।
२. „ „ reads ध्वनिभेदसंख्यानामित्याह for ध्वनिभेदसंख्यारीत्या ।
३. „ „ reads क्रमः for पुनः ।
४. „ omits बाणचन्द्र ।
५. „ „ reads संख्यानन्त्यं for आनन्त्यम् ।

:सङ्कलनेन सङ्क्षेपेण ध्वनेर्व्यञ्जनव्यापारोपहितस्य, तेन ध्वनेर्गुणीभूतव्यंग्यत्वस्यापीत्यर्थः। त्रीणि स्वरूपाणि वस्त्वलङ्काररसादिलक्षणादि। विचित्रं वक्रोक्तिरूपं अलङ्काररुपं च। अलङ्कार्यत्वेऽपि वक्रोक्तिरूपतया अलङ्कारपदवाच्यम्। एतदेवाह [अत्रापीति] य......लक्ष्यते ज्ञायतेऽनेनेति लक्षणं नाम, यस्य रसभावादेरित्यर्थः।

स्वप्नेऽपीति। सर्वथेत्यर्थः। तस्या वाच्यत्वे हेतुमाह-**स हीति**। हि यस्मात् तस्य रसादिपदस्य शृङ्गारादिपदस्य वा प्रयोगे **तदप्रयोगेऽपीति**। "शून्यं वासगृहमित्यादौ। एवञ्च "शृंगारः सखि मूर्तिमां नित्र [यथा] मधौ मुग्धो हरिः क्रीडति" इत्यादौ विभावादि सामग्र [ग्र्या] एव तद्व्यञ्जकत्वं, न [1]खलु शृङ्गारादिपदस्य, [2]प्रत्युत रसस्य सु [स्व] शब्दवाच्यत्वे दोष इति वक्ष्यते। **अर्थान्तरेति**। वाच्यपदस्य प्रत्येकमन्वयः। प्राक् लक्षणानिरूपणप्रस्तावे।

शब्देति। "भद्रात्मन" इत्यादौ नियन्त्रणेन। शक्त्यन्तरस्य गतेन निर्विवादमिति **तत्रैवास्मद्व्याख्या** [3]ग्राह्या।

अभिहितान्वयवादे व्यङ्ग्यस्य वाच्यतानिरासः

अर्थेति। विशेषे संसृष्टंकारेण [संसृष्टसंकरेण] युज्यन्ते न शक्यन्ते [4]आनन्त्यव्यभिचारदोषादित्याहुः **सामान्यरूपाणामिति**। विश?लिताकाराणां पदार्थानां पदैव ....[रभिधया] बोधितानां, [5]**यद्वा भाट्टमते**-अत्र विशेषे सुलक्षणे [स्वलक्षणे] सामान्यरूपाणां गोत्वादिसामान्यानामेव पदैरभिधानानन्तरं [6]तदविनाभावादाक्षिप्तस्वलक्षणानां। नैयायिकादिमते तु विशेषे प्रस्तुतोपयोगिनि ततो......?......नात्यन्तव्यभिचारः.. [नानन्त्यव्यभिचारः सङ्केतस्याशक्यतया जात्यवच्छादितया पदैरभिहितानां परस्परं संसर्गे विशेषणरूपं द्वितीयलक्षणोपनीते अपदार्थे [7]एकैकपदालभ्यार्थः विशेषरूपसन्वितानामिति विलक्षणस्वरूपः। [?] कारार्तेति [?]

---

१. Pt. text reads च for खलु।
२. " " " प्रधानरसस्य for प्रत्युतरसस्य।
३. " " " रीत्या for ग्राह्या।
४. " " " अनन्तदोषादित्यर्थः for आनन्त्यभिचारदोषादित्याहुः।
५. " " omits यद्वा भाट्टमते।
६. " " reads तद्विभावादाक्षिप्तसुलक्षणानां for तदविनाभावादाक्षिप्तस्वलक्षणानाम्।
७. " " " एकैकपदलभ्यार्थः for एकैकपदालभ्यार्थ :।

वस्त्वलङ्काररूपस्य व्यङ्ग्यस्यार्थस्य [१]वाक्यादपि [वाच्यादपि] पश्चाद्भावितया शब्दबुद्धिकर्मणां विरम्य व्यापाराभावादिति। येनाभिधावृत्ते बोद्धतया दुर्धिप्रकर्षात् का कथेत्यर्थः।

अन्विताभिधानवादनिरासः

संप्रत्यन्विताभिधानवादिभिरपि व्यञ्जनावृत्तिरंगीकार्येत्याह **आक्षिप्येति**। अहो [आंहु] रित्यादिना विध्यादेश्चेत्यन्तेन ग्रन्थेन। येप्याहुस्तेत्वन्विताभिधानावादिनां मत इति तूत्तरेण संम्बन्धः। इतिशब्देन शब्देत्यादिकारिकाद्वयपरामर्शः।

दृशा दर्शनेन, दिशेति पाठे मार्गेण कारिकार्थश्च शब्दो गामानयेत्यादि वाक्यं वृद्धौ प्रयोजकप्रयोज्यौ, अभिध्रेयः प्रयोजकवृद्धस्य गामानयेत्यादिवाक्यश्रवणानन्तरं, प्रयोज्यत्वस्य गवानयनादिः, एतान् श्रोत्राणि प्रत्यक्षेन पश्यति गृहयति [गृहणाति] अर्थात् व्युत्सा [व्युत्पित्सुः]। अत्र व्युत्पत्तिकाले श्रोतरिति प्रयोज्यवृद्धस्य प्रतिपन्नत्वं वृद्धवाक्यावगतित्वं गवानयनादिचेष्टयानुमानेन पश्यति जानाति। अनुमितिशरीरंच येयं प्रयोज्यवृद्धस्य प्रवृत्तिः।

सैतदनुगुणपूर्विका प्रवृत्तित्वात् [२]मदीयैवं प्रवृत्तिः स्यात् [त्वात्] सा च बुद्धिरेतद् प्रयोगजन्या[३] एतदन्वयव्यतिरेकार्थानुविधानादिति द्वयं आश्रयभूतस्य वाक्यस्य [४]वाचकत्वनियमनं विषयभूतस्य चार्थस्य [५]व्यङ्ग्यत्वनियमनं आत्मस्वरूपं यस्यास्तथाभूतां शक्तिं [६]वाचकप्रवाचारूपं संबन्धं अन्यथाऽनुपपत्याऽर्थात् प्रयोज्यवृद्धप्रवृत्तेर्जानाति।

नन्वेवं [७]भिन्नवाक्ययोगात् प्रतिवाक्यं व्युत्पत्तिरपेक्षणीया [८]सूचन [सा च न] दुरुपपादेति शब्दव्यवहारोच्छेदः स्यादित्यत आह **अर्थापत्त्या चेति**। चकारेण

---

१. Pt. text reads वाक्येऽपि for वाक्यादपि।
२. " " " तदादायैवं प्रवृत्तित्वात् for मदीयैवं प्रवृत्तिः स्यात्।
३. " " " प्रयोगजन्या एव for प्रयोगजन्या एतत्।
४. " " " वाचकत्वं for वाचकत्वनियमनम्।
५. " " " व्यङ्ग्यस्यानियमनं for व्यंग्यत्वनियमनम्।
६. " " " वाच्यवाचकरूपं for वाचकप्रवाचारूपम्।
७. " " " भिन्नवाक्यभागयोगात् for भिन्नवाक्ययोगात्।
८. " " " साचानत्स्यात् for सूचन [सा च न ?]

बोधेच्छक्तिं द्वयात्मिकामित्यस्य परामर्शः । अवगम्यन्त इति [1]पठेत् । अर्थत एवायमर्थः [2]गृहीतः, न संकेतत्वाद्वाक्यभागरूपस्य [3]पादस्याकारो यस्मिन्नर्थे [4]द्वावे चोत्वार [?] स्तस्मिन्नर्थे तस्यैव पदस्य शक्तिरर्थापत्त्या अवधार्यत इति नानावाक्येषु [5]पूर्वापूर्वपदयोगेऽपि न व्यामोहः । एवञ्चोक्तप्रकारेण प्रत्यक्षादि त्रिप्रमाणकं वाच्यवाचकसंबन्धव्युत्पित्सवो राजानन्ति [रेव जानाति] । शब्देत्यादि पश्यतीत्यन्तस्य कारिकाभागस्य देवदत्तेत्यादिना सतीत्यन्तस्य कारिकाभागस्य देवदत्तेत्यादिना सतीत्यन्तेन विवरणम । [6]श्रोतुरित्यादेरथेत्यन्तस्य अनेनेत्यादिना अनुमायेत्यन्तेन ग्रन्थेन । अन्यथानुपपत्त्यावेद्वयात्मिकामित्यन्तस्य तयोरित्यादिना अन्यथानुपपत्येति कारिकापदस्यार्थो । अर्थापत्येति अर्थापत्त्या चेत्यस्य परत इत्यादिना अन्वयव्यतिरेकाभ्यामित्यन्तेन ।

अयमर्थः । यस्य पदस्यान्वये यस्यानुभागस्यान्वयः यस्य व्यतिरेके व्यतिरेकस्तस्य तस्य शब्दस्य तं तमर्थं जानातीति व्यवहारेषु वृद्धानां वाक्यश्रवणादिषु आवापोद्वाप भेदेन पदानां शक्तिनिश्चिय इति । प्रकृते योजयति [इतीति] इत्युक्तप्रकारेण [7]प्रवृत्तिनिमित्तकारीति हेतुगर्भं विशेषणम् । तेन प्रवृत्तिनिमित्तकारित्वादित्यर्थः । गामानयेति वाक्ये गवानयनप्रवृत्तिकारिणां नानये [?] ह्यश्रुमानुयेति [अश्वमानयेति] वाक्ये तत्रैव निमित्तकारि इति शब्दस्यान्वयव्यतिरेकाभ्यामित्यतः पूर्वं पाठे इति शब्दः प्रकारार्थः । अन्वयव्यतिरेकाभ्यामिति पदस्य [8]च उत्तरवाक्ये योजना । वाक्यमेवेत्येवकारेण एकस्य विशकलितानार्था[9] पदानां व्यवच्छेदः इति हेतोः यस्मात् प्रयोजकादेव संबन्धनिश्चय इति भावः । **इतीति** । यस्मादेवं व्युत्पत्तिग्रहणप्रकारः तस्माद्वाक्यस्थितानां वाक्यतयैकार्थप्रतिपत्त्यर्थंगुणतया स्थितानामेव पदानामन्वितैः पदार्थान्तरसंसृष्टैः पदार्थैः सहान्वितानां समभिव्याहृतानामेव सङ्केतो गृह्यते । स च सम्यक् केतनं ज्ञापनम् ।

१: Pt. tex: reads इति for पठेत् ।

२: " " " गृहीतसंकेतत्वात् for गृहीतः न संकेतत्वात् ।

३. " " " यदस्याकारो for पादस्याकारो ।

४. " " " सङ्केतः ।

५: " " " पूर्वापरपदयोगेऽपि for पूर्वापूर्वपदयोगेऽपि ।

६. " " " श्रोतुरित्यादेश्चेष्टेत्यन्तस्य for श्रोतुरित्यादेर थेत्यन्तस्य

७. " " " प्रवृत्तिनिवृत्तिकारी for प्रवृत्तिनिमित्तकारी ।

८. ,, ,, omits च

९. ,, ,, reads विशकलितानर्थ वादानां for विशकलितानार्था प

उपसंहरति **इतीति**। इति हेतोः विशिष्टा गुणप्रधानभावेन परस्परान्विता एव पदार्थाः वाक्यार्थः न तु विशकलितया प्रथमं पदैरभिहितानां पदार्थानां वैशिष्ट्यं पश्चात् वृत्यन्तरयोः संसर्गमात्रम् ।

[१]ननु गामानयेत्यादौ [२]यान्येव गवादिपदानि तान्येव गां बधान अश्वमानयेत्यादावपि इति [३]निश्चयात् विशेषेषु चानन्त्यव्यभिचारदोषापातात्[४]। [५]क्रियासामान्यान्वितायामेव द्वारके [कारके] कारकपदानां [६]कारकसामान्यान्वितामेव [७]क्रियायां क्रियापदानामन्वयव्यतिरेकमूलस्य संबन्धग्रहणात् संबन्धानुसारेणैव [८]चाभिधानात् पदानां [९]सामान्याद्वयाभिधायितैव युक्ता। ततश्च विशेषान्वयरूपस्य वाक्यार्थस्य प्रतीतिरनुपपन्नेत्याह **यद्यपीति**। प्रत्यभिज्ञारूपः प्रत्यक्षो [प्रत्ययो] ज्ञानं स च प्राचीनेदानीन्तनदशा [१०]विशिष्टधर्मिबोधः। निश्चीयतेऽबाधिततया च बिषयीक्रियन्ते इति हेतोः एकदेशमात्रेण प्रतिबन्धविरहात् सामान्यमात्रविषयताविश्रान्तेत्यर्थः। सामान्यावच्छादितोऽभिहितान्विता सामान्यं विना [११]लभ्यः विशेषरूपः प्रकृताविनियोगे[?] योग्यः। असौ कान्वित [?] क्रियाभेदः प्रतिपाद्यते पदैः कुत इत्यत आह व्यतिषक्तानां गुणप्रधानभावेनान्वितानां पदार्थानां तथाभूतत्वात्[१२]प्रकृतविशेषार्थकत्वात् गुणप्रधानभावेनान्वयश्चाकाङ्क्षादिसामग्रीवशादिति भावः। पदानामिति पाठे तु व्यतिषक्तानां समभिव्याहृतरूपाणां पदानां तथाभूतत्वात्। समभिव्याहारमाह येन [१३]तथा विधश्च प्रतिपत्तिक्षमत्वादित्यर्थः। सामान्यविशेषरूपप्रहृतविषयस्य [प्रवृत्तिविषयस्य] सङ्केतानां समन्वितत्वात् सामान्यरूपः पदार्थान्विततया च विशेषरूपः पदार्थः

---

१. Pt. text reads न तु for ननु।
२. „ „ reads यानि for यान्येव।
३. „ „ reads ब्रूयात् for निश्चयात्।
४. Pt. text reads व्यभिचारदोषात् for व्यभिचारदोषापातात्।
५. „ „ reads क्रियासामान्यात् for क्रियासामान्यान्वित एव।
६. „ „ reads क्रियासामान्येऽन्यान्वितानामेव for कारकसामान्यान्वितायामेव।
७. „ „ reads क्रियाणां for क्रियायाम्।
८. „ „ omits च।
९. „ „ सामान्याभिधायितैव for सामान्यद्वयाभिधायितैव।
१०. „ „ विशिष्टधर्मिबोध for विशिष्टधर्मिबोधात्।
११. „ „ अलभ्यः for लभ्यः।
१२. Pt. text reads प्रकृतविशेषार्थकृत् for प्रकृतविशेषार्थकत्वात
१३. „ „ reads तथाविधार्थ for तथाविधश्च।

एकैकपदवोध्यः अतिविशेषभूतः प्रकृतोपयोगी शरीरः, तदेतदाह [1]वाक्यार्थान्ति ततः संसूच्यमाना क्रिया कारकविशेषार्थकयोसौ [?] संवुदितशरीरो [समुदितशरीरो] वाक्यार्थ उच्यत इत्यर्थः । अवाच्य एव प्रतिपाद्यते व्यवह्रियते बोध्यते वा पदैः अर्थान्तरभूतस्य संसृष्टोपान्तपद्यर्थातिरिक्तस्य विध्यादेः विध्यादिव्यङ्ग्यस्य वाच्यत्वं······ ·········वत इत्यर्थः । वाचस्पतिमते तु पूर्वोक्तरीत्या निःशेषेत्यादौ [2]विधेर्लक्ष्यत्वात् ।

अयमर्थः-शब्दतदर्थवाच्यवाचकव्युत्पन्नानामेव वाक्यार्थप्रतीतिव्युत्पत्तिश्च[3] वृद्धप्रयोगादेव स च वाक्यरूप एव वाक्यं चान्वितबोधननियतं, ततश्चोपदेशकालेऽन्वितत्तयैव प्रथमतः प्रतीतिः । ततश्च वाच्य एव वाक्यार्थः । किं तावत् तात्पर्याख्यवृत्यन्तरकल्पनये[4]··········· ·· दन्तो द्वक्तयाः [?] आनन्त्यव्यभिचाराभ्यां विशेषेषु सङ्केतग्रहणस्याशक्यतया कारकसामान्यान्वितं क्रियासामान्ये, क्रियासामान्यान्विते च कारकसामान्ये स्वयमाश्रयणीयः । ततश्चाभिधायाः [5]सामान्यान्वये प्रतीतेऽपि [6]तन्मात्रेऽस्याकिंचित्करतया प्रकृतविनियोगयोग्यस्य कारकविशेषान्वितस्य क्रियाविशेषस्य बोधने भवन्मते तात्पर्याख्यद्वितीयलक्षणावृत्तेरङ्गीकारात् व्यञ्जनैव वृत्तिरुपासितुमुचिता । [7]ततः पश्चाद्भाविनो व्यंग्यवस्त्वलङ्काराया [रयोः] पुनरभिधाने का कथा । एवं युक्तं मतद्वये वृत्यंगीकारस्यावश्यकत्वं उपसंहरति अनन्य इति । [अनन्वित इति] अन्वितविशेषविशेषः व्यंग्यरूपः । अपदार्थोऽनन्वितैरन्वितैर्वा पदैर्वोध्योऽनभिधेयश्च स न वाक्यार्थः दिवादिभोजनरहिते [8]पीने रात्रिभोजनापेक्षे [9]यद्वत् शब्दनिमित्तिका यस्य यस्यार्थप्रतीतिः तस्य तस्यापेक्षशब्दस्य निमित्तता कल्प्यते । किं व्यापारान्तरकल्पनयेति वदतां गुरुदर्शनैकदेशिनां [10]मतमनु-

---

१. Pt. text reads वाक्यान्तरितः for वाक्यार्थान्तरितः ।

२. ,, ,, reads विधेर्लक्षत्वात् for विधेर्लक्ष्यत्वात् ।

३. Transcript reads प्रतीतिव्युत्पत्ति वृद्धप्रयोगादेव स च वाक्यरूप एव वाक्यं चान्वयबोधनियतं, ततश्चोपदेशकालेऽन्वित एव संबन्धग्रहणात्—additionally.

४. Pt. text reads ०० त्रिव in theblank.

५. ,, ,, ,, सामान्यान्विते for सामान्यान्वये ।

६. ,, ,, ,, तन्मात्रस्य for तन्मात्रे तस्य ।

७. ,, ,, ,, तत् for ततः ।

८. ,, ,, omits पीने ।

९. ,, ,, reads यद्वत् शब्दनिमित्तिका for पीनशब्दनिमित्तका ।

१०. Pt. text reads मतमनूद्य for मतमनूद्य ।

सृत्य दूषयति [1]यदपीति। शब्दो हि नाज्ञानादिव घटं करोति, किन्तु दीपवत् प्रकाशयंति [2]ज्ञापकत्वमिति प्रत्यक्षेतरप्रमाणानां हि [3]ज्ञानकारणत्वं शब्दस्यातकरणत्वे [शब्दान्तरस्य कारणत्वे] गामानयेत्यादि [4]वाक्येषु..........न्नाव्यपन्वंयोरनुपरिज्ञाना विशेषप्रसङ्गः स्यात्। स च सङ्केतः पूर्वोक्तदिशा [5]अन्वयमात्रे, न तु व्यङ्ग्येऽर्थे।

उपसंहरति एवञ्चेति। [6]निमित्तस्य नियतनिमित्तत्वमित्यस्यार्थः। नियामकरूप-संबन्धशालित्वं नैमित्तिकस्य व्यंग्यार्थस्य संबन्धग्रहणात् पुरस्कारेऽपि च वाक्यार्थ-प्रतीति [र्ध]........मिग्राहकप्रमाणगम्या, यदि तु पूर्वसङ्केतग्रहणसंस्कृतस्य प्रति-भानवतः, तया प्रतिपत्तिर्भवतीत्यनेन क्रमेण निमित्तनैमित्तिकभावोऽभिधीयते तदेतदङ्गीक्रियत एव, व्यङ्ग्यव्यञ्जकभावं प्रत्युपात्तयोः शब्दार्थयोः प्रथममुपादीय-मानत्वात्। तदुक्तं ध्वनिकृता—

आलोकार्थी यथा दीपशिखायां यत्नवान् जनः।
तदुपायतया तद्वदर्थे वाच्ये तदादृतः॥
यथा पदार्थद्वारेण वाक्यार्थः संप्रतीयते।
[7]वाक्यार्थपूर्विका तद्वत् प्रतिपत्तस्य वस्तुनः॥ इति।

ननु तर्हि भट्टनयवत् पीनो देवदत्तो दिवा न भुंक्त इत्यादौ रात्रौ न भुंक्तं इत्यादिवाक्यशेषादत्रापि व्यंग्यार्थप्रतीतौ वाक्यशेषः कल्प्यतामिति चेन्न धर्मिकल्पनातो वरं धर्मकल्पनमिति न्यायात्। व्यापारान्तरकल्पनस्यैव न्यायात्।

संप्रति तदेकदेशान्तराणां परस्परोपकारकं शक्तिद्वयमुपन्यस्य दूषयति। येत्विति। यथा खलु धनुष्मता [8]मुक्तो बाणः एकेनैव [9]वेगरूपाख्येन शत्रोः कवच-

१: Pt. text reads तदपीति for यदपीति।
२: ,, ,, ,, ज्ञापयति वेति for ज्ञायकत्वमिति।
३: ,, ,, ,, ज्ञाते कारणत्वं for ज्ञानकारणत्वम्।
४. ,, ,, ,, ज्ञानविशेषे प्रयोगाः स्यात for ००० परिज्ञानाविशेष-प्रसङ्गः स्यात्।
५: ,, ,, ,, अन्वितमात्रे for अन्वयमात्रे।
६. ,, ,, ,, नैमित्तिकस्यानियतनिमित्तत्वं for निमित्तस्य नियत-निमित्तत्वम्।
७: ,, ,, ,, वाच्यार्थपूर्विका for वाक्यार्थपूर्विका।
८. ,, ,, ,, प्रयुक्तो for मुक्तो।
९: " " " घातेन for वेगरूपाख्येन।

युगादिकं [1]कलेवरं निर्भिनत्ति—तथैक एव शब्दस्याभिधाव्यापारो [2]याव………… [दर्थं] बोधयति। यत् परः………… [3]प्रयुक्तः शब्दः स शब्दार्थः, शब्देनावश्यं बोध्यः इति हेतोः। अत्र निःशब्देत्यादौ [निःशेषेत्यादौ] विधिर्वाच्य एव, इत्येवकारस्य व्यग्रययोजना [व्यंग्ये योजना] इति। ये तु ये पुनरभिदधति तेऽपुनर [?] तात्पर्यज्ञाः तात्पर्यवाचोयुक्तेस्तात्पर्यप्रयोगस्य देवानां प्रियाः। [पशवः] [4]शब्दतात्पर्यप्रयोगं न जानन्तीत्यर्थः। कुत इत्याह-तथा [हि] इति। भूतानि सिद्धरूपाणि कारकाणि, भव्यं साध्यं क्रियारूपं, एषां समुच्चारणे एतद्वाचकपदानां समभिव्याहारे। भव्याय साध्यरूपतया कारकपदार्था लोहितोष्णीषा इत्यादयः स्वक्रियाः स्वस्येवान्तर्लीना या क्रिया [5]नन्दति [?] संबन्धात् यद्यपि कारकस्वरूपं पूर्वसिद्धमेव, तथापि क्रियावत एव कारकत्वात्, क्रियायाश्च साध्यरूपत्वात् [6]कारकान्वयेऽपि साध्यरूपाणीति श्रावः, अदग्धस्य भागस्य पुनर्दाहो यथा [यथा] सर्वपदार्थानां [7]…… त्वेऽपि योऽर्थः प्रमाणान्तरेण प्राप्तः स एव विधीयते प्राधान्येनोपदिश्यते, [8]प्राप्तेरुपदेशवैयर्थ्यात्। तथाहि [9]दह्य एव प्राधान्ये अत्रैव [10]तात्पर्यशक्तिर्विश्रान्तिमर्हतीति न पुनः प्रतीतिमात्रे।

अनुपातु [अनुपात्त एव] रोपपद [पदे] वाक्यार्थप्रत्ययान्तरबोध्येऽर्थे [11]एवमतिप्रसङ्ग इत्याह **एवमिति**। अपराद्यर्थे पूर्वाद्यर्थेनाविनाभावेनालिप्ति [क्षिप्ते] भवतामपि तात्पर्यविशेष ………………………… शयः [12]वाच्यार्थव्यंग्यार्थव्यंग्यार्थप्रतीत्यो

---

१. Pt. text reads अनेकं for कलेवरम्।
२. " " " तद्वदवश्यं for यावदवश्यम्।
३. " " " यदुद्देशेन for blank।
४. " " " तात्पर्ययोगं for शब्दतात्पर्ययोगम्।
५. " " " तदभिसंबन्धात् for नन्दति [?] संबन्धात्।
६. " " " कारकाण्यपि for कारकान्वयेऽपि।
७. " " " विध्यर्हत्वेपि in the blank.
८. " " " प्राप्तेतूपदेश for प्राप्तेरुपदेश।
९. " " " दग्ध्र एव for दह्यएव।
१०. " " " तात्पर्यशक्ति विश्रान्तिरिति for तात्पर्यशक्तिर्विश्रान्तिमर्हतीति।
११. " " " एव हानिप्रसङ्गा for एवमतिप्रसङ्गः।
१२. " " " ०० तया अनङ्गीकृत इति भावः अयमा,,,,in the blank।

हेतुफलभावाङ्गीकारात् नैयायिकाभिधया तात्पर्येण वा वृत्या युगपत् प्रतीतिः । क्रमप्रतीत्यङ्गीकारेतु लक्षणांगीकारस्याप्यनुचितत्वात् अङ्गीकृततात्पर्याणां च विरम्य व्यापारस्वीकरणात् न केवलमपराद्यनु साधारणयोर्वस्त्वलङ्कारयोस्तात्पर्यं [1]न प्रभवति किन्त्व यातु [?] वाचकत्वात् प्राधानभूतयोरपीति भावः ।

ननु [2]यद्युपात्तवाचक एवार्थे तात्पर्यं [3]प्रसरति विषं भक्षयेत्यादि वाक्ये का गतिरित्याह **यस्त्विति** । स एव वाक्यार्थो वाक्योद्देश्य इति । अर्थैकत्वात् । एकं वाक्यं साकाङ्क्षा चेद्विभागे स्यादिति [पू० मी० २-१-४७] जैमिनिवचनात् विषं [4]भुंक्ष्वेत्येतावन्मात्रस्याकस्मादुच्चरितस्य साकाङ्क्षत्वात् समनन्तरोच्चारिते [न] मात्रेत्यादिना [मा चेत्यादिना] एकवाक्यता सा च चकारेण सूच्यत इति भावः। **न चेति** । व्यङ्ग्यत्वेनानुवाद्यवाचकत्वेन मा चेत्यादिः । प्राकर्णस्यैकतया विधेय-वाच्यस्याङ्गता अर्थवाद्यन्तेत्यर्थः । ततः [तत्र] किमित्याह **विषभक्षणादपीति** । दुष्टमधिकदोषावहं इत्यनेन नयेन उपात्तानामेव शब्दानामर्थे [5]संसर्गमात्रे संसृष्टा-कारे वा तात्पर्यं पर्यवस्यति, न तु व्यर्थे तद्त ········ [6]पदस्य भक्षणादपीति न साक्षादर्थः किन्तु व्यङ्ग्य एव इत्यभियुक्तानां मतम् ।

एवञ्च यत्परः शब्दः स शब्दार्थ इति पक्षस्य निरासिनापि [?] निरस्तं सेयमिषोरित्यादिपक्षं प्रकारान्तरेणापि परिहरति **यदिचेति** । **हर्षेति** । हर्षादयो हि न तेनापि [7]वाच्यत्वेऽवगम्यन्ते, यतोऽमी वाच्चार्थप्रतीत्या क्रियन्ते न खलु शब्दस्य कारकत्वं पूर्वोक्तरीत्यादिज्ञापकत्वात् । [8]तस्य तस्य तच्छब्दाद्वाक्यार्थः प्रतीयते, **तत्प्रतिपत्त्या** [9]**हर्षमुद्भवति** । एवमपि च शब्दाङ्गीकारे शब्दादेव केवलात् सकलार्थ-**प्रतिपत्तिःनिष्पत्तिः** । श्रुतार्थापत्यादि [10] प्रमाणान्तरस्वींकरणमपि निरर्थकं स्यात्,

---

१. Pt. text reads न प्रसज्यति for न प्रभवति ।
२. " " यद्युपात्तस्य वाचकस्य for यद्युपात्तवाचके ।
३ " " प्रसज्यति for प्रसरति ।
४. " " ०० भुंक्ष्वेत्यादि वाक्ये for भुंक्ष्वेत्येतावमन्मात्रस्यं ।
५. " " संगमात्र संसृष्टाकारेण for संसर्गमात्रे संसृष्टाकारे वां ।
६. " " तद्वतस्तत्र भंक्ष्वेति in the blank
७. " " वाच्यत्वेनाभ्युपगम्यते for वाच्यत्वेऽवगम्यन्ते ।
८. " " तस्मात् शब्दवाक्यार्थःनिष्पत्तिः प्रतीयते for तस्य तस्य तच्छब्दाद्वाक्यार्थः प्रतीयते ।
९. " " हर्षापुपमि [?] for हर्षमुद्भवति ।
१०. " " ००० स्वीकरणमपि for स्वीकारेणापि ।

लक्षणेत्यनन्तरं पृथगुच्यत इति शेषः। यद्यभिधायास्तात्पर्यस्य वा लिखितशब्दा ...[र्थ] प्रत्यायनसामर्थ्यं तदा श्रुत्यादिप्रमाणान्तरषट्कस्य[1] समवाये [2]पारदौर्बलमथविप्रकर्षादिति भवतः प्रक्रियाकल्पनमिति [मपि] नोपपद्यते सर्वेषां [3]समनुप्रसङ्गादित्यत आह **किमिति चेति**। द्वितीयान्तं पदं श्रुतिः तृतीयान्तमपीति भट्टः। पदार्थसामर्थ्यं लिङ्गम्, [4]यथासंख्यं स्थानं यौगिकम् नाम सामाख्या ताताश्शेष्टुंल्यष्टुं [?] [5]एषां समवाये पूर्वस्य बलीयस्त्वम्। तत्रोन्तरेषा [तत्रोत्तरोत्तरेषां दौर्बल्यं] मर्थविप्रकर्षात्। यथादर्शपूर्णमासयोः व्रीहीनवहन्तीत्यादौ योगिकसमाख्यया विनियोगः, तत्र लिङ्गापेक्षया श्रुतेर्बलीयस्त्वं यथा—"ऐन्द्र्या गार्हपत्यमुपतिष्ठत" इति। अत्र ऐन्द्र्याश्च [च] इन्द्रप्रकाशनसामर्थ्याल्लिङ्गं लक्षणालिङ्गादिन्द्रोपयो [?] स्थानविनियोगो गार्हपत्यमिति द्वितीयया श्रुत्या बाध्यते।

अयमाशयः। "ऐन्द्रेत्यादौ श्रुतौ यतः श्रुतेर्बलीयस्त्वं तदपदार्थत्वेन व्यञ्जनानङ्गीकारेण निर्वहतीति॥

उपसंहरति अपिशब्दादभिहितान्वयवादादौ विधेर्निःशेषेत्यादि व्यङ्ग्यस्यापि शब्दादलङ्कृतिध्वनेः।

संप्रति रसभाव तद्भारेत्यादिरूपे [?] व्यञ्जकत्वमङ्गीकार्यमिति दर्शयति] वैपरीत्यं रुचिं कुर्विति पाठः। अत्र हि चिङ्कुपद काश्मीरादिभाषायामश्लीलार्थबोधकम्। उत्कलादिभाषायां धृतवांडकं इव इत्यादि असभ्योऽश्लीलः। अपरित्याज्यं स्यात् व्यञ्जनानङ्गीकारे तत्प्रतीते .... [रसम्भ] वात् नित्यदोषत्वं सार्वत्रिकत्वात् कष्टत्वं कष्टोच्चार्यत्वं श्रुतिकटुत्वं तत्प्रभृतीनामनित्यदोषत्वं रौद्रादावदुष्टत्वात्।

यथा मम नृसिंहविजये—

स्फुटविकट [च] [6]पेटापातलेनायमष्टौ
सपदि कुलगिरीन् वा खण्डशश्चूर्णयामि।

---

१. Pt. text reads विकस्य for..... षट्कस्य।
२. „ „ पारदौल्यपकर्षादिति for पारदौर्बल्यपमर्थविप्रकर्षादिति
३. „ „ समनुपसंगात् for समनुप्रसंगात्।
४. „ „ यथालिङ्गस्पातं [?] for यथासंख्यम्।
५. „ „ ००० पांतलेन।

प्रलयमरुद्धु [?] दारस्फीतहेतो[१] हृतवात
प्रसूतितिरश्यगारातमावार्तक्षिपार्भि ॥ [?]

तथा च ममैव—

[२]निःश्वासोत्पातवातप्रसव धुतकुलाहार्यमुद्यष्ट दंष्ट्रा
जातः स्फुलिङ्गप्रकरणविरचितोत्कालिकाया निशङ्कम् ।
अर्द्धेपारीन्तनर्द्धे नवमहह महालोकमालोक्य लोकाः ।
स्तोकस्तोकावशेषाः शरणमुपययुर्वारिधिं वा [विधिं वा]

सर्वस्यैव [३]रसादितत्ववेदिनः [४]कस्यचिदेव रसादेरौचित्येन **समनन्तरोक्त-प्रकारेणानित्यदोषाणां क्वचिदानुगुण्यं** [५]दृढयति **द्वयमिति** । **अत्र प्रथममन्यथेति** शेषः । **वाच्यं** शोचनीयत्वं काव्यानुगुणत्वमिति पाठे काव्यस्योत्कर्षकत्वं कापालिपि-नाकिपदयोर्द्वयोरपि साम्ये भगवद्वाचकत्वे कपालिपदेन संबन्धनिमित्तकस्य सकला-मङ्गलविघ्नद्व [वि] निन्दिता [?] वाचकत्वादेः प्रत्यापनीत ·प्रहृतपोषकत्वम् [?] न चैतत् शृङ्गारादिरसोचितामित्यमङ्गलरूपाश्लीलस्यानित्यदोषता । एवञ्च व्यञ्जनाभावे कपाल्यादिपदं सर्वत्रैव वर्जनीयं स्यादिति भावः ।

किञ्चैकत्र वाक्ये एक एवाभिधेयः व्यङ्ग्यस्तु वक्रादिवैचित्र्येणानेक इत्यभिधातो [वि] लक्षणैव व्यञ्जनेत्याह-**अपि चेति** । वाच्योऽर्थः समभिव्याहृतपद-बोध्यः । **अवस्कन्दनं** प्रसभमवमर्दनं, **सुरभयो** गावः ।

संप्रति [६]विषयवैलक्षण्यदर्शनेनापि वाच्याद्व्यंग्यस्य भेदं दर्शयन्नाह [**वाच्य**] **व्यङ्ग्ययोरिति** । एवं स्वरूपादिभेदेऽपि यद्येकत्वं वाच्यव्यङ्ग्ययोः क्वचिदपि लीला **लीलादौ भेदो** [नीलपीतादौ भेदो] **न स्यादिति** संबन्धः । **संशये प्रकरणादिति**-नियमाभावादशायां **वा रसिके** व्यंग्यसंभेदरहिते, **वपुषा** स्वरूपेण **स्वरूपस्येति** समनन्तरोक्तेषु त्रिष्वपि तृतीयान्तेषु संबन्धः, **शब्दशासनं** व्याकरणं, **अर्थानुशासनं**

---

१. „ „ for स्फीतदत्तोद्धतं वा for स्फीतहेतोहृतवात ।
२. This श्लोक seems corrupt in transcript.
३. Pt. text reads रसावेदिनः for रसादितत्ववेदिनः ।
४. " " " कस्यचिद्रसादेवौचित्येन for कस्यचिदेव रसादेः ।
५. " " " द्रढयति for दृढयति ।
६. Pt. text reads पदवैलक्षण्य ०० for विषयवैलक्षण्य००।

मीमांसादि, प्रकरणवक्त्रादिसहकृतेन प्रतिभासा: [त्] काव्यरसस्य, ज्ञानाच्च यस्य गुणान्तरातिशयविशेषस्य नैर्मल्येन [1]वाच्यप्रतीतावपि प्रकरणादिसाहाय्यस्याङ्गीकारेऽपि तत्सहितत्प्रतिमानैर्मल्याङ्गत्वं [?] व्यङ्ग्यस्यैवेति विशेषः.। गतोऽस्तमर्क इत्यादेर्विषयाभेदापेक्षया पुनरुक्तिः ।

कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् ।
सभ्रमरपद्माघ्राणशीले वारितवामे सहस्व इदानीम् ।।

वारितवामे प्रतिकूलकारिणि । तत्र वाच्यं सखीविषयं अधरेण [भ्रमरेण] दष्टाधरेयं न पुनः [2]पथिकार्थकेन इति व्यङ्ग्यं तत्कान्तारं विषयं भेदेऽपीति पद्यन्ते ...... [प्रतिपाद्यत] मन्वयः ।

एकत्वमेकवृत्तिबोध्यतालक्षणमैकजाड्यम् [?] । अयमेव हि भेदो यत् विरुद्धधर्माध्यासः । अयमेव भेदहेतुर्य कारणभेद इत्यर्थः । प्रकारान्तरेणापि व्यङ्ग्यस्य वाच्याद्भेदमाह **वाचकानामिति** । **अयमर्थः**—यस्य शब्दस्य योऽर्थो वाच्यस्तस्यार्थस्य पूर्वपरिज्ञाने तस्य शब्दस्य तद्वाचकत्वं ज्ञातुमशक्यं । अतः शब्दानां वाचकत्वं सङ्केतितार्थज्ञानसापेक्षमत्रगम्यते । व्यञ्जकं......... व्यङ्ग्यार्थस्य पूर्वपरिज्ञानमपेक्ष्यापि भवतीत्यपि न वाचकत्वमेव व्यञ्जकत्वं, यद्वाचकानां वाचकन्वारगमे [वाचकत्वाद्भिन्ने] पदार्थज्ञानापेक्षा, व्यञ्जकानां तु सङ्गी च काकलीकोलाहलादीनां रसादिव्यञ्जकेन पदार्थप्रतिसन्धानाभावोऽपीत्युभयोर्भेदः, तात्पर्यवृत्तौ च व्यङ्ग्यार्थबोधनमिति वादिनं प्रति दूषणान्तरमाह **किञ्चेति** । यत्परः शब्दः स शब्दार्थ इति न्यायेन व्यङ्ग्यस्य गुणीभावे शब्दस्य तत्परत्वाभावात् व्यञ्जनानङ्गीकारे शब्दार्थत्वमनुपपन्नं स्यादिति कस्य व्यापारस्य द्यतः [?] पूर्वं व्यञ्जनादृत इति शेषः ।

ननु गतोऽस्तमर्क इत्यादिवाक्येन प्रकरणादिरूपज्ञापकास्तव [न्तर] सहायेन विरोधितस्य [बोधितस्य] कान्तमभिसरेत्यादि व्यंग्यार्थस्य कथं शब्दप्रमाणबोध्यत्वं शब्दैकसमधिकत्वाभावादिति चेत् अत्र **केचिदाहुः**—यथा शब्दस्य बोधितस्य क्वचिद्वाच्यस्यार्थस्य सत्यासत्यजिज्ञासायां सत्यमेवायमप्राप्तोक्तवादित्यन्वमानेन [वानित्यन्व भावेन] साधिते सत्यत्वे यथा शब्दप्रमाणवेद्यत्वं तथा व्यंग्यस्यापीति नैवं । तथा हि वाच्योऽर्थः शब्दप्रमाणविषयः तस्य क्वचित् सत्यासत्यजिज्ञासायां

---

१. Pt. text reads वाच्यप्रतीतेरपि for वाच्यप्रतीतावपि ।
२. „ „ „ परेण पथिकार्थेन ।

सत्यत्वमनुमानविषय इति शब्दानुमानप्रमाणयोर्भिन्नविषयत्वं व्यंग्यस्तु एक एव शब्दप्रमाणेन [१]प्रकरणादिनावरोध्यत इति [२]दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यम् । तत्का गतिरिति चेत् अत्रैवं सङ्गतिः यथा प्रमाणादेः वि [ष्णु] सिंहाद्यनेकार्थस्यापि हर्यात्येकाविधेये [हर्षादेरेकविधधियो] अवच्छेदकत्वं तथानेकव्यञ्जकस्यापि शब्द-स्यैकव्यंग्ये प्रकरणादिसाहाय्यस्येतिकर्तव्यतारूपतया शब्दस्यांगत्वं, सांगस्य व्यवधायकत्वं न्यायसिद्धमेवेति न शब्दप्रमाणाव्याकोपः । इह च यद्यपि वाक्यार्थस्य प्रतीत्यनन्तरं तस्य सत्यासत्यजिज्ञासायां यद्यत्वं [व्यंग्यत्वं] [३]प्रमाणान्तरेणानुमाने-नैव बोध्यते तथापि सत्यासत्यत्वजिज्ञासातः पूर्वश्रुतपन्नाया [?] वाच्यार्थप्रमाद्याः [याः] अप्रमात्वाभावात् शब्दैकसमासगम्यत्वाच्च । स[४] शब्दप्रमाणो व्याकोपः [शब्दप्रमाणव्याकोपः] न हि चक्ष्यरादिना [चक्षुरादिना] प्रतीतौ सत्यासत्यत्व-जिज्ञासायां प्रत्ययप्रमाणं [प्रत्यक्षप्रमाणं] व्याकुप्यते । एवं व्यङ्ग्यस्य वाच्यत्वं तात्पर्यविषयत्वञ्च निरांकृत्य लक्षत्वं सं [भा] वणां निवा चिकीर्ष [निराचिकीर्षु] राशङ्कते **नन्वित्यादिना** प्रतीयमाने घ (त्य) त्तेन ग्रन्थेन । वाम्रोऽस्मि [रामोऽस्मि] इत्यादौ राज्यभ्रंशलकेसहिष्णुतादयः ।

प्रत्याख्यानरुचेः कृतं समुदितं क्रूरेण यत्र क्षमा [यद्रक्षसा]
सोढं तच्च तथा [त्वया] कुलजनो धत्ते यथोच्चैः शिरः ।
व्यर्थं संप्रति बिभ्रता धनुरिदं त्वद्व्यापदः साक्षिणा
रामेण प्रियजीवितेन तु कृतं प्रेमः [म्णः] प्रियेनोचितम् ॥

इत्यत्र मायाशीतांच्छे[?]दर्शने साहसैकरसिकत्व-दुष्कृत-फलभोक्तृत्वादयः, रामोऽ-सावित्यादावलौकिकं [रामोऽस्मीत्यादावलौकिक] प्रभावत्वा द्वयो[दयो] वाम [राम] पदेन लक्ष्यन्त एवेति भवतामपि मतं प्रकरणादिसाचिव्येन उक्तरीत्या नानाविधे प्राधांन्यादिना धर्मपदेत्यादि [?] व्यपदेशाबीजं [५]वाच्येस्यार्थान्तरसंक्रमणादिना अर्थान्तरसंक्रमितवाच्यत्वादिव्यपदेशहेतुः ।

---

१. Pt. text reads प्रकरणादिना च बोध्यते for प्रकरणादिनावरोध्यत ।
२. ,, ,, ,, ००० विषयभेदात् for वैषम्यम् ।
३. ,, ,, ,, प्रमाणान्तरेणार्थज्ञानेन for प्रमाणान्तरेणानुमानेन ।
४. ,, ,, ,, न for स ।
५. ,, ,, ,, वाच्यस्य for वाच्येऽस्य ।

अर्थोऽभिधेयम् । एवञ्चोक्तस्य सर्वस्य व्यङ्ग्यप्रकारस्यं लाक्षाणकेप्यपन्ते: [लाक्षणिकेप्युपपत्तेः] तदतिरिक्तः सोऽयं [कोऽयं] नूतनः प्राचीनतत्वाप्र [तंत्राप्र] सिद्धोऽसाम्प्रदायि सुः [पु] प्रतीयमानः नाम प्रकाश्ये ।

सिद्धान्तमाह नियतत्वं नियतसंबन्धत्वं एतदेवाह **नखल्विति** । वाच्यार्थ-व्यंग्यार्थयोः संबन्धस्य नियतत्वानियतत्वे एतदुदाहरणव्याख्याने स्फुटीकरिष्यते **न चेति** । न च मुख्यार्थबाधे इति संबन्धः ।

श्वश्रू [रत्र] निषीदति अत्राहं दिवसं प्रलोकय ।
मा पथिक [रात्र्यन्ध] शय्यायां मम निषीद ।।

दिवसमिति [काले] कर्म, कथमत्र लक्षणा मुख्यार्थबाधजीवितेत्यर्थः । प्रति-पादितं लक्षणानिरूपणप्रस्तावे । **तथेति** । समयविशेषः समप्रायो विशेष्यः व्यञ्जनातो वैलक्षण्यम् ।

यद्यपि प्रयोजनलक्षणायां प्रयोजनस्य लाक्षणिकप्रतीतिकार्यत्वात् मुख्यार्थबाध-संबन्धयोरिव [रेव] प्रथमं परिज्ञानं तथापि रूढ़िलक्षणायां…… …………… परिज्ञानस्य पूर्वं संभवात् लक्षणजातीयसंभवमात्रेण किमप्यत्र प्रयोजनं भविष्यतीति प्रतीतेर्बुद्धिस्थतया चोक्तं मुख्यार्थबाधत्रितयं ति [इति] न खल्वत्र वाचकवन्मु-ख्यार्थबाधादिना परार्थो ज्ञेय इति [1]सम्वेद्यते, किन्तु वाच्यवाचकभावाव्युत्पन्नः स्वयमेव मुख्यार्थस्यान्वयानुपपत्तौ अन्वययोग्यमर्थं लक्षयति, व्यञ्जनायास्तु ज्ञायमान प्रतीतितया निमित्तसापेक्षविरहात् कथं लक्षणाभावः सुहृद्भूता सा लक्षणा, तदनु-गमेन तस्या लक्षणायाः पश्चाद्व्याप्रियमाणे तया [व्याप्रियमाणतया] अवाचकवर्णाः …………मित्यादयः । स्वोपि हि प्रकरणादिसाचिव्येन तत्तदर्थप्रकाशतावगमात् । तृतीयो भागस्त्रिभागः प्रान्तं लक्षप्रवृत्तानां नर्तकीना, तेनावलोकनस्य तन्नतस्वदनु-कूलवानुद्भावात् [?] आदिशब्दादधोमुखत्वादि भंगादि, एवमुक्तं सर्वमेव कारणार्थमुपसंहरति **इतीति** ।

अतिवर्ण अतिक्रान्तो विषयः अनप [ह्न] वनीयः अपह्नोतुमशक्यः, विषयान्तर-प्रतिपादनव्यग्रतया पूर्वमदर्षि [शि] तानियतसंबन्धान्युदाहरणानि दर्शयन्नाह **तत्रेति** । नियतः संबन्धाः [न्धः] वाच्यव्यंग्ययोरेकपन्विं [?] विषयत्वात् । कस्य न वा होयीत्यादौ तु वाच्यार्थं सखीविषयः व्यङ्ग्यार्थस्तु [2]ततिविषय [तत्तद्विषय]

१. Pt. text reads संबध्यते for संवेद्यते ।
२. " " reads तत्तत्प्रतिविषयः for तत्तद्विषयः ।

इत्युभयोर्भिन्नविषयतासंबन्धादनियतः, यद्वा प्रथमे तत्तद्वाच्यत्वात् तत्तद्व्यंग्यार्थस्य एकरूपेण प्रतीतेः सार्वत्रिकत्वात् सम्बन्धो नियतः ।

कस्मणवहो [कस्सणवहो] इत्यादौ व्यङ्ग्यार्थस्य ष········वेव [संभवेत्व] सत्यतयावगतिः । अन्येषान्तु लिख्यार्द्धेनैवेय [?] नियतः । एवमेव हि संबन्धस्यानियतत्वं सर्वथा संबन्धनियमत्वतोरे [?] व्यञ्जनेऽभिप्रसङ्गः [अतिप्रसङ्गः] स्यात् ।

विपरीत वते [रते] लक्ष्मीर्ब्रह्माणं दृष्टवा नाभिकमलस्थम् ।
हरेर्दक्षिणनयनं रसाकुला झटिति स्थगयति ।।
अत्र वाच्येन प्रथमव्यङ्ग्यस्य सम्बन्धः ।

अयमर्थः । "सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतिवाक्येन ब्रह्मणो निर्धर्मकत्वात् [1]सत्यादिपदेन खण्डशो धर्मप्रतिपत्तिविरहात् अविभक्त एव इत्यर्थः । प्रकाश्यते तन्वीत्यावाक्यान्तरेणापाति [?] ।

येप्याहुः वेदान्ति इत्यर्थः । अरित्यापादपतिते [?] व्यवहारदशामापन्नैः पदपदार्थंककल्पना कर्तब्येव । अन्यथा पदपदार्थव्याकोपे व्युत्पन्नान्यन्वयो [···व्युत्पन्नयोः] विशेषः स्यात् । उक्तोदाहरणं निःशेषच्युतीति [तेति] । व्यंग्य एव भट्टपक्षोक्तयुक्त्येति विशेषः । तेषां हि व्यवहारे भट्टनयः । किञ्चैषां मते सदानन्दस्वरूपं ब्रह्मणोभिधाया विशेषः [विषयः] । शं [सं] केता गोचरत्वात् नापि (ल) क्षणायाः सामग्रीविरहात् न हि तात्पर्यस्य तस्य [2]पदार्थस्य संसर्गमात्रनैयत्यात् । नाप्यनुमानस्य व्याप्तिग्रहणाभावात् । श्रुतेः पृथक् प्रामाण्याच्च इत्यन्यवृत्यादि भाषाव्यपदेश्यं तत्प्रकाशकं यद्व्यापारान्तरमङ्गीकृतं वेदान्तनिस्तत्रदेव [वेदान्तिभिस्तदेव] व्यंञ्जनादिव्यपदेश्यमस्माकं काव्योपनिषदनामिति [काव्योपनिबद्धानामिति] निर्विवादम् ।

अधुना ध्वनेरनुमानान्तर्भावं वाच्यादित्यादिना व्यापकविरुद्धोपल [ब्ध]···रित्यन्तेन ग्रन्थेन शङ्कते **भावदिति** [भ्रमेति] । व्यञ्जनावादिभिर्भवद्भिरपि एतदभ्युपगन्तव्यमिति भावः । जाचति भवनियतसंबन्धाभावहेतो [?] व्याप्यित्वे न ति यः [?] खलु व्यापकस्य व्याप्यायोग्यस्याप्यस्य [?] च व्यापकत्वयोगः तदुभयव्यवच्छेद समाव्याप्ति [···रूपाव्याप्ति] समन्वेन [संबन्धेन] नियतः । प्रकृतो यो

---

१. Pt. text reads सत्यादिभेदेन for सत्यादिपदेन ।
२. " " reads अपदार्थस्य सर्गमात्रनैयत्यात् for पदार्थस्य संसर्गमात्रनैयत्यात् ।

धर्मो आश्रयस्तन्वि [द्वि] शिष्टेन विरुपातपक्षसत्त्वस [सत्वस] पक्षसत्वविलक्षणव्या [या] वृत्तिनामकरूपत्रयोपपन्वान्दिंगात् [ताल्लिङ्गात्] व्याप्यात् लिंगव्यापके ज्ञाने अनुमानमित्युच्यते, [1]तत्क्रमः तत्स्वरूपः पर्यवस्यति वाच्यात् व्यंग्याच्चावगम इत्यर्थः ।

हेतुमाह **तथा हीति** ।

भ्रम धार्मिक विश्वस्तः स श्वाद्य मारितस्तेन ।

गोदावरी नदी कच्छकुञ्जवासिना तृप्तसिहेन [दृप्तसिंहेन] ।

इह हितः [वञ्जुलल] .... [तागृहे सङ्के[ति] तायाः केनापि निमित्तेन धार्मिक सतद्वेकुश [?] भ्रमणं [2]स्वमनारेथ विप्रकृतं मन्यमानाया वचनम्, अत्र यौ वाच्यव्यंग्यार्थौ तयोर्धूमाग्न्योरिव [3]साध्यमानभावेनावस्थितिः तदिह गोदावरीतीरवने कुञ्जे आश्रयभूते [4]भीरोरभ्रमणरूपो साध्यः, तत्र वाच्यरूपे [पो] तृप्तसिंहसद्भावः साधनम् । इह च लिङ्गस्य पक्षसत्वं निवद्धमेव सपक्षसत्वविपक्षव्यावृत्ते अनिबद्ध अपि सामर्थ्यादवसेये इत्यतो नानुमेयभावो व्यंग्य इति भावः ।

एतदेवाह **अत्रेति** । यः खलु भिरुः [भीरुः] शुचोऽपि [शुनोऽपि] सद्भावस्थाने भ्रमितुमशक्तः स कथं सिंहोपल [ब्ध]....... स्थाने भ्रमिष्यतीत्यर्थः । यमुद्भरुभ्रमणमिति यद्भीरुभ्रमणमिति] ।

अयमर्थः । धार्मिकस्य भ्रमणं भयकारणनिवृत्युपलब्धिपूर्वकं भीरुभ्रमणत्वात् । संप्रतिपन्ववदिव्यमा [संप्रति पन्नवदित्यनुमाने] यद्व्यापकं भयकारणं वृत्युपलंधि [लब्धि] पूर्वकं [यद्भयकारण निवृत्युपलब्धिपूर्वकं] तस्य य विरुद्धं [यद्विरुद्धं] भयकारणानिवृत्युपलब्धिपूर्वकं [?] तस्योपलंधिः [तस्योपलब्धिः] प्रतीतिः । सा च प्रकृतो संहोपलंधिः [प्रकृते सिंहोपलब्धिः] । तथाचात्रधार्मिकस्याभ्रमणमनुमितमिति भावः । एवं **ध्वनिकारोदा कृ** [हृ] तैतद्व्यङ्ग्योदाहरणरीत्या सर्वत्रैव विवादाध्यासितस्य व्यङ्ग्यभीचारी [व्यभिचारी]नास्य होतोर्हेतुत्वमिति [?]भावः । **श्रुत[शुन] इत्यादि** । यः खलु [शुनः]............स्पर्शाशङ्क्या शुनो बिभेति स सिंहसद्भावस्थानं प्रत्युपमृगयादि कुतु [त्] हलितया गच्छन्ती [गच्छतीति] दर्शनाद्विरुद्धः भ्रमणरूपसाध्यविरुद्धसाधनात् । दूषणान्तरमाह वचनस्येत्यादौ आङ्गुल्यादीनामिति [पुंश्चल्यादीनामिति] शेषः । अप्रतिबन्धात् प्रतिनियतो निश्चितः असिद्धः सन्दिग्धासिद्धः

१. Pt. text reads तटस्थरूपः for तत्क्रमः ।
२. " " " स्नमनोविप्रकृतं for स्वमनोरथविप्रकृतम् ।
३. " " " साध्यसाधन...... for साध्यमान
४. " " " भीरुभ्रमणरूपः for भीरोरभ्रमणरूपः

सिद्धोवा । उपसंहरति । [1]**तदेति** । गमकतया कामुकसमीपगमनबोधकतया । **व्यक्तिवादिनेति** । व्यञ्जनव्यापारस्थापनार्थमुद्युतेले [नें] त्यर्थः । न प्रमाणप्रतिपन्नत्वं सन्दिग्धासिद्धादसिद्धत्वात् ।

एवं व्यञ्जनव्यापारसामग्र्या नानुमानसामग्रीत्वमिति योऽर्थान्तराभिव्यक्तौ वः सामर्ग्राष्ठ्या निवन्धन [?] सैवार्थमिति पक्षे नो गमकत्वेन सस्मतेति [सम्मतेति] **महिमभट्टोक्तमनुमानत्वं** निरस्तमिति भावः ।

नन्वेवमनियतप्रतिबन्धमूलभाक् एवं व्यङ्ग्य व्यं [व्यङ्ग्याद्व्य] ञ्जन भावः स्यादिति चेत् एवमेवेत्याह एवंविधादिति [एवंविधादिति] उपपद्य [त्य] नपेक्षत्वेऽपि व्याप्त्यादिप्रतिवन्धनाभावेऽपीति, न चैवमभिप्रसङ्गः [मतिप्रसङ्गः] । प्रतीतेरन्यथोपपत्तावेव व्यक्ति [कल्प]·· ·····ना स्यादिति काव्यपुरुषावतारस्य [2]निखिलशास्त्रतत्ववेदिनः **श्रीमदानन्दवर्धमानाचार्यस्य व्यञ्जनव्यापारस्थापनमिति सर्वमवदातम्** ।

इह [इति] महापात्रश्रीविश्वनाथकविराजकृतौ । काव्यप्रकाशदर्पणे
पञ्चम उल्लासः ।

१. Pt. text reads तथेति for तदेति ।

२. Transcript omits इदमेव युक्तिजालमुदाहरणान्तरे दर्शनं द्रढयति ।

३. Pt. text omits तत्व ।

अथ षष्ठ उल्लासः*

इह यद्यपि [1]अलङ्कार्यभूतस्य शब्दार्थानुचित्रयोरलङ्कारवत्वाद्विशेपलक्षणं पश्चादुल्लासद्वयेन निरूपयितुमात्मनोऽभिमत इति ध्वनिगुणीभूतव्यङ्ग्यरूप काव्यविशेषप्रतिपादनानन्तरं तदुल्लासितं तथापि प्राचीनास्वरोधेन [प्राचीनानुरोधेन] काव्यविशेषत्वेन लक्षितयोस्तयोः किञ्चिद्विशेषमाश्रित्य उल्लासान्तरमानते [०० मारभते] । **शब्देति** । चित्रशब्द स्पर्णक्षर्थयोः [चित्रं शब्दार्थयोः] प्रत्यकं [प्रत्येकं] सम्बन्हवः [संबन्धः] । उदाहृतं शब्दचितं [शब्दचित्तं वांच्यचित्रमित्यादिना प्रतिपादितं **गुणेति** । शब्दचित्रे प्रधाने [अर्थचित्रस्य] अर्थचित्रे प्रधाने शब्दचित्रस्य गुणत्वमिति द्वयोरेकत्र सद्भावेऽपि प्रधानेन व्यपदेशा भवन्तीति उक्तन्यायेन यस्य [अस्य] प्राधान्येन व्यपदेश इत्यर्थः । अविचित्रत्वमित्यत्र [अर्थचित्रमित्यत्र] संवयेति [?] शेषः । तत्रैव तथाचोक्तमित्यादिना इष्टं द्वयत्रेनेन्यन्तेन [द्वयं तु न इत्यन्तेन] प्रामाणिकसंगतिं दर्शयति । उक्तं **प्राचीनैः**—रूपकादिरर्थाश्रयोऽलङ्कारो विभावादिस्वरूपारूपार्थोपस्कारतया मुख्यस्य [2]रसादेरुत्कर्षत्वात् तस्य काव्यस्य बहुधा बहुप्रकार [?] । शब्दालङ्काराणां तु [3]विभावाद्युपगमानयनमात्रप्रयोजकशब्दधर्मतया बहिरङ्गत्वान्नमुख्यालङ्कारमिति केचित् । अलङ्कारघटनया उपयोगस्य व्यतिरेकेण दृष्टान्तमाह नकारान्नमिति [न कान्तमिति] काव्यस्य शब्दविशेषरूपत्वादर्थस्य तद्व्यवच्छेदकमात्रेणामुख्यत्वात् अर्थाश्रितानामलङ्काराणां बहिरङ्गतेत्यर्थः । सुपांतिताङामिति [सुपांतिङामिति] सुवर्णानां [सुबन्तानां] तिङन्तानां पदानां व्युत्पत्तिविशेषणमाधुर्याद्यनुगुणवर्णविशेषार्थकत्वेनोत्पत्तिं वाचां वा श्रुत्यानीतदेततस्वपतिङव्युत्पत्तियोगित्व [सुप्तिङ्व्युत्पत्तियोगित्वं] सौशाद्वासुशब्दतां [सौशब्द्यं सुशब्दताम्] अर्थस्य व्युपत्तिः वंमानननादिना [वर्तमानादिना] योजनं नेदृशी शब्दका-

---

*Transcript maintains that the manuscript text of this ullasa is utterly corrupt and illegible.

Ed. It may be illegible but not corrupt to a Larger extent.

१. Pt. text reads अलङ्कार्यतया for अलङ्कार्यभूतस्य ।

२. Pt. text reads रसादेरेव for रसादेः ।

३. ,, omits ·······गम····

त्पत्तिप्राया [?] अतश्च [1]शब्देनैवोपाधिभूतेन काव्यत्वमिति शब्दस्यैव मुख्यत्वमिति शब्दालङ्काराणामेव प्राधान्यमित्यपरे ।

शब्देति । अभिधेयोऽर्थः । द्वयं शब्दार्थालंकारयुगलम् । नोऽस्माकं तु पुनरिष्टमिति मतम् । द्वयोरप्यर्थोपस्कारत्वा वा [त्] मुख्यरसादिपरिपोषकत्वेन परस्परतो विशिष्यमानत्वादिति भावः ।

प्रथममित्यादौ यद्यपि क्रमप्रधाना त् स्वभावोक्तिरीत्या [?] लकार दृष्टोयमाणश्च [दृष्टोपमाश्च ?] सन्ति तथापि अन्वयानुसन्धिमन्तरेणाप्यनुप्रासमहिम्ना [अन्वयानुपपत्तिमन्तरेणाप्यनुप्रासमहिम्ना [?] कश्चित् प्रकर्षो हृदि निधीयत इत्यनुप्रासस्य प्राधान्यात् शब्दाचित्रं [शब्दचित्रं] भावधैर्य विध्याताय [विधाताय] स्वास्यविध्याताय वा [स्वास्थ्यविघाताय वा ?] नीचानम्राः [नम्रा] हीनसत्त्वाश्च अतीकं समा चं [?] अप्रियं च कानतां [कालतां] [3]श्यामलतां दारुणतां च । [4]कुटिलतां कुञ्चित्रां अनृजुतां च । अत्रार्थ [नु] प्राससद्भावेऽपि अर्थालङ्कारस्यैव [5]उद्भटप्रतीतिरिति तत्प्रधानता ।

[6]ननु स्वादरूपमेव [आस्वादरूपमेव] वाक्यं [काव्यम्] । आस्वादश्च व्यंग्य एव । अनयोश्च [7]प्रथममित्यादिपक्षयो र्व्यंग्यत्वात् आस्वादरहिततया कथं काव्यत्वमित्याह **यद्यपीति** । अन्ततो महाकाव्यार्थपर्याव [?] [8]ज्ञानपर्यन्ते धिभावादिरूपतया एवं विधस्य समग्रैकवाच्यवर्णितस्य चन्द्रादेरित्यर्थः । रसपर्यवसानं प्रवणत्वं स्फुटस्य रसस्यानुपलंभात् महाकाव्यपर्यालोचनाहेतुकं व्यंग्यरहितमेतत् प्रथमं इत्यादिकाव्यद्वयमुक्तं प्राचीनानुवो [रो] धादिति भावः ।

तथाहि । यद्येवमादौ काव्येषूक्तरीत्या रसपर्यवसानमस्ति तदा आस्वादस्य

---

१. Pt. text reads शब्देनेनेषिधि भूतेन [?] for शब्देनैवोपाधिभूतेन ।
२. " " omits मुख्य ।
३. " " omits श्यामलताम् ।
४. " " reads कुञ्चितां ।
५. " " " ० प्रतीतिरिष्यत इति for प्रतीतिरिति ।
६. " " " न तु for ननु ।
७. " " " द्वयमित्यादि for प्रथममित्यादि ।
८. " " reads व्युत्पत्तेः for ज्ञानपर्यन्ते ।

प्रकर्षाप्रकर्षाभावो ध्वनिगुणीभूतयोरेवानुपातः [प्रासः] सर्वंथास्वादाभावेऽनु [?] काव्याभासतैत्रेत्युक्तमेत्र शब्दचित्रमित्यादि कारिकाव्याख्याने । विशेषतश्च अस्मत् [1]साहित्यदर्पणेऽलंकारनिर्णयेऽन्तिमोल्लासद्वये व्यवस्थापिते [2]निर्णेश्य [ष्य] न्ते

इति महापात्रश्रीविश्वनाथकविराजकृतौ काव्यप्रकाशदर्पणे
षष्ठ उल्लासः ।

१: „ „ omits अस्मत्.......
२. „ „ „ निर्णेष्यन्ते ।

अथ सप्तम उल्लासः

उल्लासे सङ्गतिमाह वृत्तिकृत् **काव्यस्वरूपमिति** । **दोषाणां** गुणालङ्कारयोः प्रष्टामं [दुष्टानां or निर्दिष्टानां] हेयत्वेन, काव्यलक्षणकारिकायां निर्दिष्टानाम् ।

मुख्यार्थेति । शब्दार्थशरीरस्य काव्यस्यानुभूततया मुख्य उद्देश्योऽर्थो रसः । इति [हृतिः] दोषापकर्षशब्दाः [रसापकर्षशब्दा] करणव्युत्पत्तिसिद्धाः ।

सामान्यलक्षणयुक्ता [मुक्त्वा] विशेषलक्षणार्थं त्रिभागमाह **रसश्चेति** । तदाश्रयान्ते [तदाश्रयात्] तस्य रसस्याश्रयणात् । तदाश्रयत्वञ्चात्र तदुपायतया [तदुपचारतया] वाच्यः। उपचारान्मुख्य इत्यर्थः । उभयं रसवाच्ये, **तेषु** **शब्दादिष्वपि** । शब्दात् [अर्थात्] रसवाच्ययोरपि स दोषः । शब्देत्यनेन पदवाक्ययोः संग्रहः । **आद्यशब्देन** पदांशः यस्मात् प्रथमं रसो मुख्यः तस्मात् तत्र रसे व्यभिचारिभावस्य सु [स्व] शब्दवाच्यतादयो दोषाः मूर्षतादय इव [??] काव्यानुभूतस्य रसस्य साक्षादपकर्षकाः । वाच्यदोषाश्च [अ] पुष्टार्थत्वादयः कारणत्वादिवत् [काणत्वादिवत्] तथा शब्दादिदोषाश्च श्रुतिकट्वादयः ।

एवञ्च रसे, वाच्ये, पदे, वाक्ये, पदांशेषता [इति] भवन्तः [अनन्तः] प्रकारा दोषा इति विभागः । **आद्यग्रहणादिति** । वचनाद्दोषस्य वाच्यसमस्त [वाक्यसमस्त] पदनिष्ठत्वेन शब्दपदोपग्राह्यत्वेऽपि वचनायाः [रचनायाः] पदसंयोगरूपत्वे पदयोर्व्यासज्यवृत्तित्वाभिप्रायेण पदांशवृत्तित्वादाप्त [दाद्य] पदग्राह्यत्वं अन्यकृतोऽभिमतम् [वृत्तिकृतोऽभिमतम् or ग्रन्थकृतोऽभिमतम्] एवञ्च यद्यपि वर्तमानपदेनापि नानाविधपदांशानामुपग्रहः [?] तथापि विप्रतिपत्तिनिरासार्थं वचनायाः [रचनायाः] पुनर्वचनं यद्यपि विभागे सदोषाणामेवं प्रथमं निर्देशस्तथापि पदस्य प्रथमं बुद्ध्यारोहात् तदंशानांचात्यल्पविषयत्वात् पददोषानावोह [नादावाह] **दुष्टमिति** ।

पददोषाः

श्रुतिकटु पदं **दुष्टं** भवेदिति संबन्धः । परुषवर्णत्वमेव विशदयति **कष्टं** कष्टोच्चारणीयम् । **अपाङ्गस्य भङ्ग्या तरङ्गितैः** । **संस्क्रियतेऽनयेति संस्कृत** व्याकरणलक्षणं ।

संस्कृतप्राकृतादिविषयम् । श्यामोदरं चापाण्डरप्राग्तं च । अप्रातृत [अप्राकृत] कुचयुगदर्शनेन कुञ्जरकुलं कुम्भातयाभ्यर्थतया [कुम्भाभयाभ्यर्थतया] तव वशीभूतं वर्ततामित्याशयः ।

ननु अनुनाथत इति पदस्य पदान्तरसव्यपेक्षस्यैव दुष्टत्वात् कथं न वाक्यदोष इति न । इह ध्वनिगुणीभूतव्यंग्य दोषगुणालङ्कारााणां शब्दानुगतत्वस्यान्वयव्यति-रेकार्थविधायित्वेऽपि व्यवस्थापितत्वात् यदास्यैव परिवृत्यसहत्वमिति भावः । तथा प्रत्ययांशं व्यवस्थाप्य प्रकृत्यंशपरित्यागेऽपीत्यस्य पददोषताभ्युपगमः ।

एवं दैवत इत्यादिष्वपि अप्रयुक्तत्वादौ बोद्धव्यम् ।

अत्र हन्तीति गमनार्थमित्यानन्तरं [मित्यर्थान्तिरे] पठितमपि तत्रासमर्थमिति शेषः [दोषः] ।

नन्वत्र हन्तप्रकृतेरेव परिवृत्यसहत्वादसमर्थत्वस्य पदांशनिष्ठत्वमेव तत्कथं पदनिष्ठत्वमिति चेदुच्यते असमर्थस्य पृथक् पदनिष्ठत्वस्यादर्शनात् । प्रकृतिप्रत्ययो स्वस्वरित्यनादृत्य [?] समुदितं पदं वाचकमिति मतमवलम्ब्य हन्तीत्यर्थपद-निष्ठत्वमेवोक्तम् । अत एवास्यैत्या [एवास्यैतदर्थक] बोधकान्तिमसूत्रे "पदस्यांशेऽपि केचन" इत्युक्त [त्वात्] पदांशेनास्य दोषस्योदाहरणं दर्शितम् ।

अप्रयुक्तत्वमेकार्थ [?] शब्दविपयम् । इदमसमर्थन्त्वनेकार्थशब्दविषयमिति भावः । शा कृतः ज्ञों ततः [??] इह शब्दानां विरलप्रयोगे निहतार्थत्वमसमर्थत्वं च सर्वथा प्रयोगाभाव इति भेदः । अत एवाह-अप्रयुक्तनिहतार्थौ श्लेषादावदुष्टा-विति । अत एव च्युतसंस्कृतसमर्थनिरर्थकत्वादीनि [नां] वाच्यदोषत्वेनागणलं [नम्] पशुपदं तथाविधसमराध्वरेषु अप्रयुक्तम् अत्र पशुत्वादेवारोपितत्वान्निहतार्थ-त्वादेर्भेदः ।

अवन्ध्येति । अत्र यत् ग्रन्थकृतोक्तं जन्तुपदमदातर्यर्थे विवक्षितमिति तेदनुक्तो-पलिन्मः [तदनुक्तोपनिबद्धः ?] तथाहि 'जन जनने' धातोः व्यत्याद्रितस्य [?] जंतुशब्दस्य कृतजन्मग्रहणमात्रैः पौरुषहीन एव वाच्यः । अवन्ध्येत्यादि प्रथमार्द्धस्य हि द्वितीयार्द्धवैधर्म्येण समर्थकं, अवन्ध्यकोपत्वमेधवहि [मेव हि ?] वैधर्म्येणामर्ष-शून्यत्वं आपन्निवृत्वमेव चासमनन्तरोक्तप्रकारं जन्तुत्वम् । मित्रहेतुक आदरभावः, शत्रुहेतुकोभयाभावश्च द्वयमपि वैधर्म्येणावश्यमेव । ततश्च यः कश्चिदमर्षशून्यः स नतिकोपो [नतशिरो] भवति । तेन जातहार्द्रेन उत्पन्नस्नेहेन जनस्यादरो न भवति, तथाभूतेनैव च विद्विषावरो भयं न भवतीत्यर्थः ।

एवमेवात्र पक्षे वाचकत्वदोषाभावमभिप्रेत्य पुनरन्यदाहवति [पुनरन्यमुदाहरति] हाधिर्गित। कुशले कुशलोत्पादने, विधुरो विक्रूरः, विमुख इति यावत्, सूर्योदयादस्त पर्यन्तस्तद्गत्यवच्छिन्नः कालविशेष एव दिवसशब्दवाच्यः, न तदविनाभूतं प्रकाशमय-त्वमपि, असमर्थत्वे स्वोदेयो समक्षस्य [?] वाचकः। दिनादयस्तु प्रकाशमयत्वेन तथेति भेदः,। इह दिवशोर्तितादिशब्दानां [?] स्वतः परिवृत्तिसहत्वेऽपि मुख्यनर [?] धर्मिरूपार्थप्रतिपादिकांशस्य तथाविधत्वाभावात् पदगतत्वयुक्तम्। अत एवालङ्कारसर्वस्वकृतापि "[१]सुनयने नयने निप्रही [?] त्यादौ विभक्त्यर्थस्या-पौनरुक्तचमपि लाटानुप्रासत्वमुक्तम्।

यच्चेति। चकारात्तदवश्यमिति भावः। उदरुणन्यायकपातिनय विशेषः [ऊर्ध्वचरणन्यासकाभिनयविशेष] स्वरूपो दण्डो पादः विदधदिति विशिष्ट-धारणार्थेत्र युक्तोऽवधातुः करणार्थ एव युक्त इति तन्नावाचकः। उपसर्गेण "हि धात्वर्थो बलादन्यत्र नीयत" इति।

साधनशब्दो हस्त्यश्वादिसाधनार्थः पुंध्वजस्य।

वायुशब्दः पवनमात्रार्थोऽपानपवनविशेषस्य। विनाशशब्दश्चादर्शनार्थो मरणस्मरणात्। क्रमेण वीडादिव्यञ्जकाः।

वन्द्यामिति। द्वितीयार्थेन सप्तम्यर्थेन च संभवात् सन्देहः।

केवले न तु लोकेऽपि, निहतार्थ तेऽर्थद्वयमपि [निहतार्थेतु अर्थद्वयमपि] लौकिकम्। इहत्वेकोऽर्थः शास्त्रीय एव, द्वितीयस्तु सन्धपि [सत्यपि] लौकिक इत्युभयोर्भेदः।

अत्रेति। योगशास्त्र एव न तु लोके तथाहि पातञ्जलसूत्रं "क्लेशकर्म-विपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर" इति। क्लेशा अविद्या, [तदस्पृष्टगुणा] कर्मणि सुकृतदुष्कृतानि तत्फलं विपाकः तदर्थगुणा वासना आशयः ते समस्ति [?] वर्तमाना पुरुषेऽपदिश्यन्ते इति। क्रिञ्चेदं वक्तृबोद्धव्ययोः शास्त्रानभिज्ञत्वे पुनः श्लेषादि बिना नादोष इति वक्ष्यते। ततश्चाप्रयुक्तत्वार्थ [अप्रतीतत्वार्थ] चेत्यर्थः।

---

१. द्र० अलङ्कार सर्वस्वम्

२. द्र०, पातञ्जलयोगसूत्र

रूढ़िप्रयोजनाभावादाकर्षणेन प्राप्यो लक्ष्यार्थोऽत्रेति नेयार्थः **अत्रेत्यादि** पद्यार्थमपि पदं [दुष्टम्] समासान्तत्वात् ।

मूर्ध्नामिति । उद्वृत्तमिति [उद्धृत्तमतिगाढ] कृत्तं कर्तनसंसक्त निरन्तरमुपनतो जातो जयो यत्र जगति । व्यतिकरः संपर्कः । तस्य पिशुलः [पिशुनः] सूचकः । मिथ्यामहिमत्वमिति बहुव्रीहावस्य [न्य] पदार्थस्य प्राधान्यात् । समासान्तः प्रविष्टस्य मिथ्यामहिमत्वस्यांशस्य विधयस्य प्राधान्येनानिर्देशादविमृष्टविधेयांशो दोषः । इह हि वक्तुर्दशमुखस्यायमाशयः—पुरा मम मूर्ध्ना यो महिमा स्थितः स इदानीं मिथ्याऽभूदिति । एवञ्च विधेयत्वेन विवक्षितस्य महिम्नो मिथ्यात्वस्य समासे गुणीभावादनुवाद्यत्वप्रत्ययः । तेन च पूर्ववो हि पि [?] महिम्नो मिथ्यात्वस्यावभासनं मूर्ध्नामपकर्ष एव प्रतीयते ।

ननु कविविवक्षितोत्कर्षः एवं चोपरितनोदाहरणेष्वपि बोद्धव्यं विषयव्याप्तये समासान्तरेषूदाहरति आसामित्यादि [स्त्रस्तामित्यादि] न्यासो निक्षेपः, स्थानविदा स्थानौचित्याभिज्ञेन द्वितीयमौर्वीमिवेत्यत्र तत्पुरुषसमासे उत्तरपदस्यैव............ ।
.............निर्जन्म इह जन्मनोऽलक्ष्यत्वं विधेयम् । मन्दानलं बन्धनं [संदाननैकसदनं] विधेयमित्यनन्तरं तत्पुरुषसमासे पूर्वपदत्वेन नञो हाणाभावाद्दोष [प्रयोगाभावाद्दोष] इति ।

पूरणीविशे [?] यथा विधेयस्य नञः समासाप्रयो [गेन] प्राधान्यं प्रतीतं दर्शयति **यथेति** । अत्राप्यदृप्तनिशाचर इत्युक्ते गुणीभावः । यत्र तु नञोऽनुबाधस्तत्रैव गुणीभावो युक्त इत्याह **न हीत्यादि** । आत्मगोपनादिविहितमित्यर्थः । गलग्रहशब्दः कश्चाश्लेषे [अश्लीले] प्रयुक्तः । कश्य [ण्ठ] रोगविशेषप्रतीतिकृत् ।

अन्त इति । भवानीशब्दो भवस्य पत्नी, न दावनप्रत्ययान्तः [न भवान्याः पत्यन्तरे] विरुद्धां धियमिति । अम्बिका माता तस्याः कामुक इति रूपा ।

वाक्यदोषाः पदांशदोषाश्च

संप्रति वाक्यदोषान् पददोषांश्चाह **अपास्येति** । संस्कारः संस्कृतिः । एतेषामनन्तरोक्ताः [एते समनन्तरोक्ताः] श्रुतिकट्वादयः । अतसंस्कृतत्वादि [च्युतसंस्कृतेत्यादि] दोषत्रयं हि वाक्यगतत्वेन लक्ष्येन संभवत्येव तर्हि को नाम मूढः पुनपुनरभिदध्यात् ।

अतार्प्सीत् तर्पितवान् । समूलघातं न्यवधीत् समूलं हतवान् । अत्राध्यैष्टे-त्यादिषु श्रुतिकटुत्वस्य पदनिष्ठत्वेऽपि पद्यव्यापित्वाभिप्रायेण वाक्यदोषता। व्यजष्टेषड्वर्गमित्येव धा [?] वाक्यदोषोदाहरणम् । अत्र श्रुतिकटुत्वस्य 'वधीत्' इत्यादौ क्वचित् क्वचित् पदांशनिष्ठत्वेऽपि पदांशनिष्ठानामबहुव्यापित्वेन वाक्य-गतत्वं बोद्धव्यम् । एबमन्यदोषाणामपि बोद्धव्यम् ।

रातु ददातु । भावुकानां शुभानां, अनंडमूकता [अने, मूकता] वक्तुं श्रोतुं वा शिक्षितत्वम् । एतानि च व......नि [रातीत्यादिपदानि] अप्रयुक्तानीति वाक्यदोषः ।

साथकः खड्गः, क्षमा पृथिवी । अब्जश्चन्द्रः, श्लोको यशः ।

कुविन्द इति । कुंपृथ्वी विन्दतीति कुविन्दश्चतुवायसमूहं अतितः [अभितः] परिणाहाल्यां च लग्लावन्दिनः [विगताच्छादनं] वस्त्रहीनाश्च आक्रादनं [आच्छा-दनं] आवरणं वस्त्रञ्च । उपश्लोकांमानस्य [उपश्लोक्यमानस्य] रथयमानस्य [स्तूयमानस्य] तिरक्षावहीनत्वावसादीत्यर्थः [तिरस्कारघोतत्वपर्यवसानादित्यर्थः ।

[प्राभ्रभ्राडिति] । प्राभ्रे प्रकृष्टजनदे भ्राजते, विष्णुधाम गगनं येन ।

भूपतेरित्यादि । उपसर्पणं समीपगमनं, दभावस्तस्य कम्पना सेना, कम्पयुक्ता च । **वामेषु शत्रुषु** लोचनं दर्शनंयस्य, आरामं मनोहरं लोचनं नयनं यस्या इति च । **प्रहरणं खड्गादिः दन्तादिश्च**, मोहनं मोहः स्वरतं च [सुरतं] ।

पितृवसतिपदं तातवेश्मार्थे विवक्षितम् । पावकशब्दः पावनार्थेऽनुयाशब्दोऽयं [अन्वयशब्दोऽयं] शार्ये [वंशार्थे] श्मशानाग्निसञ्चयानां स्मारकः ।

मार्गणप्रवणो भूतिर्भस्मेति द्वितीयोऽर्थः । [1]योगिनो हि त्रिविधाः मृदूपायो मध्योपायोऽधिमात्रोपायाश्च । तेऽपि प्रत्येकं मृदुसंवेगो मध्यसंवेगस्तीव्रवेगश्चेति त्रिविधाः । एवं नवप्रकाराणामुत्तमोऽधिमात्रोपायस्तीव्रसंवेगः । तस्यसमाधिना, तस्या यत्नतवतत्वत् हठभूमिर्दृढमूलः ।

अस्वररत्वं [अरविन्दः ?] रविस्तस्य पादा रश्मय, तमोऽन्धकारम् । नेत्रद्वन्द्वं बोधय [नेत्रयुद्धं वेदय] निभां जहीति ।

---

१. योगशास्त्र ।

न्यक्कार इति । तत्र धर्मिणमुद्दिश्य साध्यधर्मो विधीयत इत्यनुसारेण अयमेवेति प्रथममनूद्य विधेयो न्यक्कारः पश्चान्निर्देष्टुमुचितः । तद्वैपरीत्येनाविमृष्टविधेयांशो दोषः । इह चरणानामतत्त्वयस्यापि [अतत्त्वस्यापि ?] विपरीततेति वाक्यशेषः [वाक्यदोषः] । अत एव हिशब्दो नित्य इति वक्तव्येऽनित्यः शब्द इति वचनेऽप्रकालं [??] निग्रहस्थानमाहुः । अस्य च दोषस्य बहुव्यापित्वे नाप्यत्र वाक्यदोष इत्याह **उच्छूनत्वेति** । वृथात्वस्य हि विधेयभूतस्य तत्पुरुषसमासे गुणीभावे नानुवाद्यार्थस्य शब्दस्य निराकांक्षत्वप्रतिपत्तये विधेयार्थस्य तच्छब्दस्य समानानुतयाभिहितोऽप्यदः शब्दः पदान्तराव्यवधाने निर्दिष्ट इति प्रसिद्धिमात्रे प्रतीतिकृदिति उपरिवाक्ये तच्छब्दं विना यच्छब्दस्तस्याकांक्ष एवेत्याशयः ।

एतदेवोपपादयति तथाहीत्यादिना । "**स इत्यस्यानर्थकं स्यादित्यन्तेन** (१६१ श्लोकवृत्तौ) त्यतः प्रक्रान्तादिविषयेषु यत्र द्वयोरेकस्य द्वयोर्वानुपादानेऽप्यर्थत्वं संभवति । ततस्तद्व्यतिरेकेणान्यत्र साकांक्षत्वमेवेति पिण्डार्थः ।

यच्छब्दस्योपादानं नापेक्षत इति ।' तस्यार्थनेयावाग्रातन्वात [?] प्रकृतो राजा यः पूर्वोक्तप्रकारेण तथा तथा चरितवानित्यर्थः ।

सेत्यनेन सकललोकलोचना को वाचस्यमाधस्वधारस निःस्यन्दादिगुणविशिष्टत्वेन या प्रसिद्धा [भव] ति इत्यन्तेन तथा तथा चापनदीर्ध्यतादिगुण एव त्वया येऽनुभूत वाक्यार्थगतत्वेन वासत्वानुयित्वेन [?] उपात्तः साक्षाच्छक्तः । [शब्दः]

एवं पूर्ववाक्यार्थगतस्येत्यन्यत्र बोद्धव्यम् । सामर्थ्यात् तच्छब्दतयापेक्षमत्वात् ।

निराकांक्षत्वं यथा मम—

आज्ञाखण्डलमौनिमण्डलमाला संज्ञा…… …………………………
……………………………………,…………अचतुराऽवज्ञा जगद्रक्षिणी ।
तस्या पुल्लतदिस्वं तज्ञमदासरो श्रुतिद्रोणी
शक्तिर्याति कथं नामसपथं क्षोदी यशः कस्यचित् ॥

द्वयमुपातुरस्तु विषयत्वेनोपकल्पित………………… ।

इह ग्रन्थे एष यन्त्रः ग्रन्थकरणनिबन्धः ।

एवञ्चेति । "तनोति योऽसौ सुभगे तवाधुनेत्युदाहरणे" । अदःशब्दस्य यच्छब्दव्यवधानेन स्थितत्वात् प्रसिद्धिमात्रपरामर्शत्वादिव्यर्थः ।

ननु त्वयद: [नन्वत्वाद:] केवलस्य प्रयोगः किन्तु तच्छब्दसामान्यस्यादसोऽपीति कथं साकाङ्क्षत्वमित्यत आह **न चासाविति**। अयमर्थः। न सार्वत्रिकमिदमेतददः शब्दानां तच्छब्दसमानानुत्वं [गुणत्व] किन्तु यच्छब्दनिर्दिष्ट वाक्यार्थपरामर्शे एव। सोऽपि यच्छब्दव्यवधाने निर्देश एव भवतीत्याशयः। एवमदसस्तच्छब्दसमानार्थस्य सार्वत्रिकत्वाभात्र उदाहरति **असाविति**। मरुत् लौकिकः पवन तदधिष्ठाता हनुमत् पिता च। केसरं पुष्पविशेषः। केसराः सहाः। तारा नक्षत्रम्। वालवीय तदधिपश्चन्द्रः सुग्रीवश्च।

सुग्रीवश्च। मण्डलं वीत्वं [?] राष्ट्रं च। सामानां रामस्य चतुरादृष्टिः।

ननु क्वचित् केवलस्यादसोऽपि तच्छब्दार्थत्वमित्यत आह **प्रतीतौ वेति**।

द्वितीय प्रकृतमित्यत्र [कृतमित्यत्र] सुकृतमित्यर्थान्तरसंक्रमितवाच्यो ध्वनिः। **अथेति**।

अविकल्पं विविधकल्पनारहितम्, अर्थाः प्रमेयानि। तस्येत्यर्थे अस्येति अर्थान्तरे उपादानं तनोति यः पार्श्वमसौ समागतः इत्याकारेण। तत्रैव "तनोति योऽसौ सुभगे" इति यथावस्थितया 'तन्मे' इत्युक्तमिति द्वितीय तच्छब्दस्य निराकांक्षत्व कथं न कृतमित्यर्थः।

किं लोभेनेति। रामवनवासकाले तल्लक्ष्मणस्य वितर्कोक्तिरियं मात्रा मातृ-द्वारेण, आर्यः रामगुरुर्भवतः [रामानुजर्भरतः]। अनयोरार्य्यताततयोः ययोरनुरक्त-कलत्रत्वे न गुरुमात्रोर्महिमेत्यर्थः।

क्षमा सहनं पृथ्वी वा रक्ता वशीकृतादूर्य्यः [भूमय] शोणिताश्रयाश्च। शिवानि शुभानि, शिवाः श्रृगाल्यश्च। विग्रहो युद्धं शरीरञ्च। क्षयणं विनाशः, असुखानि असवः प्राणाः, खानि इन्द्रियाणि च।

आदाविति। दृशां अश्रुपयसा निषेकं, कामस्य भल्लीनां शरविशेषाणाम्। **प्रानकर्म कुरुत इवेति संबन्धः**।

> अत्र दृशामिति बहुबचनमनर्थकमिति यदुक्तं तदविचारि-ताभिधानम्। एकस्या कथं नेत्रबहुत्वमिति चेत् नैवम् भावार्थक्विप् प्रत्ययेन व्युत्पादितस्य दृक्शब्दस्य दर्शनार्थस्य बहुत्वेन बहुवचनस्यैव न्यायत्वात् [न्याय्यत्वात्] न हि कश्चिदनुन्मत्त एकस्या मुखद्वयं, नयनत्रयाधमवधिगच्छति।

कथं दर्शने मुंजनलेपादेः [अंजनलेपादेः] संभव इति चेत् त्वदवसानि तु [?] नत्रत्रो ग्रस्नो मिश्रतया इमहाक [?] वित्रणितस्यास्या तद्वार्थम ।

कुरङ्गेक्षणाया दृष्टीनां कामशरविशेषत्वेनाध्यवसितानां नेत्रस्थानां नेत्रकृताञ्जनपुञ्जेन भस्म सूत्रादिनेक प्रथमनेक [?] । ततो विरहानलेन लौकिकाग्निनेव तावनं [तापनं] अश्रुपयोमिश्रकेण च सामान्यजनेनेत्रप्लावनमिति महाकवेः सूक्तमेय मननबोधभावितः [?] प्राच्यानामुपालम्भः ।

किञ्चेह द्विवचनस्थाने बहुवचनप्रयोगे 'द्व्येकयोर्द्विवचनैकवचन' इत्यनुशासनोल्लङ्घनात् च्युतसंस्कार एव दोषो न तु निरर्थकत्वं ।

एवं कुरुत इत्यत्रापि सुविभक्तितः 'कर्त्रभिप्राये क्रियाफल' इत्यनुशासनविरोधेन च्युतसंस्कृतिरेव दोषो भवितुमुचितः । किन्तु क्रियाफलस्य कर्तुरभिप्रेतत्वे आत्मनेपदं पाणिनेरेवाभिमतं नान्येषाम् । यदाह :—धातोरुभयपदिनस्तदानीं नात्मनेपदं क्रियाफलं चेत् कर्तृस्थं परस्मैपदमन्यथेत्येव पाणिनेः पक्षो नापरैवेयमिष्य न इति ।

तथा च बहवः शिष्टप्रयोगाः 'कमलवनोद्घाटनं कुर्वते ये" शोषयते व्रीहीनातप" इत्यादिषु क्रियाफलस्य न कर्त्रभिमतत्वं । कर्तृगामित्वेऽपि "तनोति शुभ्रं गुणसम्पदा यशः" इत्यादिषु कथं परस्मैपदम् ।

ननु यथा गुरु इत्यत्र गुरव इत्यादि बहुवचनप्रयोगस्तथेहापि दृशोरित्यत्र दृशामिति चेत् नैवम् । अहमित्यर्थे वाज्यो [वाच्ये] ऽध्यतिमक भावविवक्षायां वयमित्यादिवत् । अत संवलितैरित्यादिषु व्यापारबहुत्वापेक्षया ईक्षणानामित्याद्यर्थे ईक्षणैरित्यादि । कलेह [कलहे] किमपि निमित्तं विवक्षितम् ।

निरर्थकत्वदोषस्य पदांशनिष्ठत्वे उदाहरणानि यथा । पयसां प्रवाह इव सौरसैन्धवः । अत्र स्वरसिन्धोरित्येतावतैव गतार्थत्वे तद्धितप्रत्ययोऽनर्थकः । एवं वन्यकरिणामित्यत्र यः प्रत्ययः [?]। एवं तदीयसेनाधुनीत्यत्र इयप्रत्ययः । विशक्तिशनयच्छेब्दपदार्थे एवं न [?] इत्यत्र वर्णप्रत्ययः ।

हन्तकारः सनकादिर्बालिः । तथाचानायासप्रदेयस्थित्यर्थः । विजेय इत्यनेन विजेतुं शक्तात्मनेव प्रतिपाद्यते । न विजितत्वम् ।

उर्जितानां वनामपि [जनानामपि] ऊर्जितं बलं बलमेव तदाश्रितं सत प्रवनलन इत्यर्थः [?]। अङ्गभोः ।

गीः शब्दो लक्ष्यते । तेन वचोबाणैरित्युक्ते गीर्वाणैरित्युक्तं भवति । उत्तरपदं बाणपदं, तेन गीः शब्दैरित्युक्तेऽपि नेयार्थत्वे नेयार्थत्वमेव उत्तरपदमेव परिवृत्तिं न सहते । जनपदस्थाने [जलपदस्थाने] मलिनादिपदं प्रयोगपिलक्षितः [प्रयोगेऽपि लक्षितः] ।

वाक्यदोषाः

एवं पददोषसजातीयान् वाक्यदोषानुक्त्वा तद्विजातीयानाह **प्रतिकुलेति**। वाक्यमेव न तु पदादिः, तथेति श्रुतिकट्वादिवत् दुष्टमित्यर्थः । **वक्ष्यते** गुणविवेचन-प्रस्तावे । सुकुण्डेति [अकुण्ठेति] अकुण्ठा तीक्ष्णा । प्रासाभेदनादिक्षमेत्यर्थः । आकश्चं [आकण्ठं] पूर्णम् । रूढमाक्रान्तम् । कलकण्ठीति सख्याः संबोधनम् । कोकिलाया वासापि [?] हि कलनिस्वनेन नायिकामानापनोदनक्षमा कण्ठस्य द्वन्दभतर [?] तदालिङ्गननिरन्तराकांक्षितया तमित्युपचारविषप्रयोगः [?]।

ननु श्रुतिकट्वाद्वौ परुषवर्णादिपदानामपि बहुवारप्रयोगे वाक्यदोषत्वं इहापि चकारादीनां बहुवारप्रयोगः तत्कथमनयोर्द्विधा व्यवस्थापि तयोर्वाक्यदोषयो र्भेद इति चेत् अत्रोच्यते-परुषवर्णादीनामेकपदनिष्ठत्वेन वाक्यस्य दुष्टत्वम् किन्तु तथा सति तेषां पदमदां [पदानां] सदोषत्वम् । अत एव तथाविधानां पदानां बहुवारप्रयोगे पद-दोषसजातीयो वाक्यदोषाः ।

ठकारादीनान्त्वेकपदनिष्ठत्वे नायं दोषः किन्तु वाक्यव्यापित्व एवेत्यत्र पददोष-विजातीयो वाक्यदोषः । अत एवोक्तं ग्रन्थकृता वा कामे वतधे [[1]वाक्यमेव तथा] इत्युभयोर्भेदः ।

किञ्चास्य वाक्यात्मभूतरसमुखप्रेक्षितया तद्भेदाङ्गीकारो
न ज्यायान्, सर्वेषामपि रसमुखप्रेक्षितयैय दोषतांगीकारात्
रसापकर्षकत्वमेव हि दोषसामान्यलक्षम् ।

रौद्र इति । रौद्रे.प्रतिकूल व [र्णो] यथेत्यर्थः । दोष [**देश**] **इति** । द्रोणवधकु-पितस्याश्वत्थाम्नो वचनमिदम् । आहितशस्त्राणां शस्त्रवतां धस्मराणि घात्राणि रामेण परशुरामेण ।

---

१. काव्यप्रकाशः का० ५५ ।

अचित्येवदाहरति [औचित्ये उदाहरति] **प्रागिति** निशुंभः नमनं। तथैव देशः सोऽयमित्यादिवदेव।

संधिवैरूप्यस्य त्रैविध्येन विसंधित्वदोषस्य त्रैविध्यमेवासन्धेरित्यादि। **राजन्नित्यादि**। अत्र तानि इन्दोरिति पदयोः भिन्नपादगतत्वेन संधिर्नकृतः। तच्च महाकविसमयविरुद्धम् अर्थान्तरगतयोरेव तथेष्टः। धां दोवलें इत्यादौ [धीं दोर्बले] इत्यादौ प्रगृह्यादिहेतुकत्वेन संधिनिषेधेऽपि तथाविधस्य बहुवारप्रयोगोऽरुचिदायकत्वेन दोषः। सहितां संधियुक्तां तानिन्दोरित्यत्र प्रगृह्यादीयते [?]। यत् स्वरेण पासकीयति [?] तत्प्रगृह्यं पदमित्यादिलक्षणानुसारेण सामर्थ्याभावस्य पुनरसकृत् प्रयोग एव दोषः यथा-धीदोर्बल इत्यादाविति भावः।

उत्तपते उत्तापयुक्तो भवति। अत्र [चल] ण्डा इति, चिंकु इति काश्मीरादिवेशेऽसत्यार्थप्रकाशकम् [असभ्यार्थप्रकाशकम्]।

मर्वत्ते मरोमंसे। असौ उर्वीति संबन्धः।

जं परीति

यं परिहर्तुं शक्यते मनापि सुन्दरद्धगुणेव।
अयं केवलं यस्य दोषः प्रतिपक्षेरपि प्रतिबद्धः॥

सकारोऽन्तगुणः [गुरुः]। भकार आदिगुरुः।

विकसितेति यत् व तु [यदुक्तं] पादान्ते लघोरपि गुरुता उक्ता, तत्सर्वत्र द्वितीयचतुर्थपादविषयं प्रथमतृतीयपादविषयं द्रवसति लकादावेवेघत्र [विकसितसहकारीयत्र]। भारहारीत्यत्रान्तलघुता गुरुतां न प्राप्तः।

मृत् समवायिकारणरूपः पार्थिवो भागः। वस्त्राणि चेत्यत्र यद्यपि ग्रन्थकृतां ह्[अ] प्राप्त गुरुको लघुत्वं दोष इत्युक्तम् तथापि वस्तुतो लघुनानुप...... बन्धस्य...... धवभ्यतेरित्यर्थः। चतुर्थपादान्तलघोरगुरुत्वानियमाच्च।

तथाभूतामिति। उषितमिति कर्मपदम्: दृष्ट्वेत्यनेनान्वयः, शेश......मिति क्रमाभावोऽक्रमः [क्रमाभावोऽक्रमः]।

क इति। धुर्धुराकारशब्दवती या धुरी वाद्यभांडविशेषः। तद्घोरो लघुवेत [?] शब्दविशेषं न कुर्यात्। अत्र......रोपितोर्विशेषकौ वीक्ष्य समाप्य, नखय इत्यादि [?] पुनरातुमस्थनेति [?]।

अत्र द्वितीयार्धगतं तदिति पदं प्रथमद्धेस्यावशिष्ट [?]······मनुबाधत्वेन गुण भावानां तच्छब्दनिर्दिष्टविधेयवाक्यार्थरूपपदार्थरूपपदार्थत्वेन गुणतया तुल्यत्वेन परस्परसमन्वयादेकनिष्ठविशेषरूपक्षपाचारपदार्थस्य सर्वे सह सम्बन्धं········ रेवभिं-मतोऽपि न घटत इत्याह **क्षपाचारिभिरित्यादि** ।

त्वमिति । अपिः संभावनायां, युवयोर्द्वन्द्वं, दिष्ट्या दैवेन, समुदभि [संवदति] अन्योन्यमर्थादं करोति । अतः शेषं उपभोगादिरूपम् ।

अत्रेति । यदि तस्य [यदित्यत्र] नाभिमतोऽपि संबन्धेन घटत इत्यर्थः । यथा च घटते तदाह-**तस्मादित्यादि** ।

संग्रामेत्यादि । 'कोदण्डेन शराः' इत्यादौ द्वितीयार्थे प्रतिपादितानामर्थानां केनापि संबन्धो न घटत इत्याह **अत्रेति** । आकर्णनक्रियाकर्मत्वेन संबन्धो यथा-वाह [आह] वाहकर्णय [देवाकर्णय] तथेहापि कोदण्डशराविति स्यात् । **वाक्यार्थस्येति** । वाक्यार्थकर्मत्वेत्युक्तरूपत्वमेव । "तथा च जानामि सीतां जनकप्रसूतां जानामि रामों मधुसूदनञ्च" इत्यादिवत् कोदण्डः शराः इति प्रथमान्त निर्देशः स्यात् । **नचेति** यच्छब्देन सह कोदण्डादीनां वाच्यवाचकभावः संबन्धः ।

न च केन केनेत्यादिना समासादनक्रियायाः कर्तुः कर्मणश्च सामान्येन निर्देशो विशेषजिज्ञासायां कोदण्डेन शरा इत्युक्तः स्यादित्याशंक्याह **न च केन केनेत्यादि** । न खलु जिज्ञासकोथायंकः [ऽयमेकः] प्रश्नोऽहऽस्त्वातींति [प्रश्नोऽत्रास्तीति] भावः । अतश्च येन येनेत्यादि वाक्यान [वाक्येन] द्वितीयार्द्धवाक्यानामभिमिहतः सम्बन्धः कथञ्चिदपि न घटत इति भावः ।

'यच्चापाचार्य' इत्यादौ "वेतुकाकञ्चिबाधां [रेणुकाकण्ठबाधां] कृतवतेति भार्गवनिन्दाप्रवृत्तस्य परशुनिन्दा घटत इत्यक्तम् तदयुक्तम् । परशुनिन्दामुखेन भाकु-बनिन्दाया [भार्गवनिन्दाया] अधिकवैदग्धी बहा [तेन सहृदया एव] प्रमाणम् ।

चत्वार इति । सर्वे·····गादिति विधेया । विमर्शे पदे चानिष्टं । इह तु प्रधान-स्याघ्वर पदार्थस्य प्राधान्येनाप्रतीतेः । सर्वोऽपि·····द्विगादिपदार्थः तदङ्गतया न प्रतीयत इति सर्ववाक्यानुविरोधाभाव इत्युभयोर्भेदः ।

एषोऽहमिति । न्यूनपदत्वे वाचकपदत्वस्यैव न्यूनता विवक्षिता । अस्य तु न तथात्वमिति भेदः । एवमन्यत्रापि । अत्र पदमात्रस्यास्थाननिवेशेऽपि सर्वमेव वाक्यं विवक्षितार्थप्रत्यायने मन्थरमिति वाक्यदोषता एवमन्यत्रापि ।

इह केऽप्याहुः-पदशब्देन वाचकमेव प्रायो निगद्यते, नच तन्नावचकता निर्विवादा-स्वातन्त्र्येणार्थबोधविरहादिति यथा-'द्वय' गतमित्यादौ त्वमित्यनन्तरं चकारार्थपदोपादानादक्रमतः तथान्नापीति अन्नांकः अद्रारूपं विरिञ्चः पाद्रिति [अद्रितनया पार्वती] इति संबन्धः। कोषः कुड्मलं स्वकुपिधानञ्च।

लग्नमिति। रागो रक्तं, शोणिमा अनुरागश्च, मातंगाश्चाण्डालाश्च, पुरे (परे) उत्कृष्टा अन्ये च प्रकृते······म धातुरूपाया प्रक्रमभंग इत्यर्थः। तथाहि यन्न चोद्दिष्टः स एव चेत् प्रतिनिर्देष्टुमिष्टः पूर्वोद्दिष्टशब्देनैव सर्वनाम्ना वा प्रयोक्तव्यः। शब्दान्तरेण प्रतिनिर्दिष्टस्तु अन्य एव प्रतिभासमानः प्रतीति रोधोरसास्वादनविघ्नहेतुरित्तर्थः। इममेवार्थमाशंकापूर्वं सम्पादयन्नाह वचिति तदिति उद्देश्यप्रतिनिर्देश्यरतिग्रनैव शब्दत प्रयोगे [?]। उदाहरति **उदेतीति**। पदोपसंग्रहणायेति पूर्वं वाच्यं, तपोनिधित्वस्य प्रथमोऽत्युन्नतत्वादित्यर्थः।

दोषाकरश्चन्द्रः। तस्यार्थः शोभापक्षे दोषाणामाकरभूता श्रीः वक्त्रे प्रतिवसतीति संबन्धः। महा·····कुट्टिनीयतीव शत्रु······हलशीलापक्षे महानीविवृत्या वृद्धि वोप्तया [प्राप्तया] जात्या च। अन्नेत्यमित्यस्य परामृष्टवाक्यान्तरमेव प्रयोगो युक्तः। न तु प्राच्येवेतिपदान्तरं तथा सति हि प्रोच्येवेत्यस्य परामृष्टवाक्यान्तःपातितयावभासनाद्वाक्यार्थतिरोभावः। जीदितेशो यमः प्राणेशश्च, रसो बीभत्सः।

अर्थदोषाः

संप्रति वाक्यप्रतीति पश्चाद्भावित्वेन रसदोषानन्द्यं [दोषाननूद्य] वाक्यदोषानन्तरमर्थदोषानाह **अर्थो पुष्ट इति**। नियमानियमाभ्यां संहितौ यौ विशेषाविशेषौ तत्परिवृत्तास्तनश्च नियमपरिवृत्तोऽनियमपरिवृत्तो विशेषपरिषपरिवृत्तः [विशेषपरिवृत्तो] विशेषपरिवृत्तश्चार्थो दुष्ट इत्यर्थः। दुष्ट इत्यनन्तरं प्रत्येकमिति शेषः।

अत्रेति। आदिशब्दात् सरणिमरुदुल्लासितसौरभपदार्था अधिकपदत्वे पदार्थानुप्रतीतेः समकालमेव बाधप्रतिभासः। इह त्वर्थप्रतिभासानन्तरमिति विशेषः। कष्टत्वं क्लेशगम्यत्वं, यस्य शास्त्रसाराप्राशो [शास्त्रमात्र] प्रयुक्तः, कष्टत्वादिति शेषः। अविदग्धः पामरवाच्योऽर्थः।

शस्त्रमोचनेऽश्वत्थाम्न इत्यर्थः।

कमलस्यातङ्को भयं यस्मात्तथाभूतं वदनं यस्या इति समासः।

कविषु प्रसिद्ध इत्यनन्तरं न त्वत्रेति शेषः।

षड्गुणा एव षाड्गुण्यं, एवं संधिविग्रहादयः। अनुशास्त्रं [अर्थशास्त्रं] कामन्दकादयः। न विहितं शृङ्गारशास्त्र इत्यर्थः।

प्राप्ताः श्रियः इत्यादि। अत्र ततः किमित्यस्य पसपर्यान्तरेग उपादानेऽपि यदि न विहित्यन्तरसंभव तदास्य दोषस्य सद्भाव एवेति कथितपदत्वाद्भेदः। तदु नवीकृतं [तत्तु नवीकृतं]।

अष्टाङ्गेति यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टौ योगा ज्ञानि [ङ्गानि]। परिशीलनं पुनः पुनरभ्यासः। कीलनं तत्रैव स्थैर्थम्। दुःसाध्या या सिद्धिः तस्य सविश्वं साद्विध्यं भूवी ·····र्वन [??] अणिमादि सिद्धावनासक्त इत्यर्थः। सत्वसुकपायोभेदप्रत्ययः [?] विवेकख्यातिः समाधिरेव धनं येपा मौलिमानः [मौलिर्मणिः] श्रेष्ठः।

यत्रेति। अनुल्लिखिताख्यं अनभिव्यक्ताकारं अस्फुटसाधारणमिति यावत्। अत्र यथा सनियतसत्वं तथा दर्शयति **छायामात्रेति**।

ननु वाच्चस्यानभिधाने कमपराधन [कथमवनियतें] इत्यादावपरभाव, इहत्वेवकारस्येति कोऽन्योर्भेदः। अत्राह नियमस्यावचनमेव पृथग्भूतं नियमपरिवृत्तेर्विषय इति। तनु [ननु] तथा सत्यपि द्वयोः शब्दानुदोषतया [शब्दार्थदोषतया] गमकाभावात् तत्का गतिरितिचेत् कमपराधनवमित्यादौ शब्दोच्चारणानन्तरमेव दोषप्रतिभासः, इह त्वर्थप्रत्ययानन्तरमिति भेदः। एवं च शब्दपरिवृत्तिसहत्वाभ्यामेव पूर्वोदाहृतोऽपि शब्दार्थयोर्दोषविभागः एवं पर्यवस्यति। यो दोषः शब्दपरिवृत्तिसहः सशब्ददोष एव यथा श्रुतिकटुत्वप्रतिकूलवर्णादिः। यश्च पदार्थ प्रतीतिपूर्ववोध्यः सोऽपि शब्ददोष एव यथा-न्यूनाधिक पदत्वादिः। योऽर्थप्रतीत्यनन्तरं बोध्यः सोऽर्थदोष इति। एवञ्चानियमपरिवृत्तादावप्यधिकपदत्वादेर्भेदो बोद्धव्यः। अमतपराद्धंत्वेतु राममन्मथशरेणेत्यादौं नियमेन वाक्यव्याप्तित्वाभिप्रायवाक्यदोषता अग्नीनित्यादौ' तु न नियमेन व्यापित्वम्।

वक्त्राम्भोजेति। सरस्वती वाक् नदीभेदश्च। समुद्रो मुद्रया सहितः, सागरश्च। वाहिन्यः सेनावहनशीलानि सर्वाणि श्रोतांसि, मानसं चित्तं सरोभेदश्च, श्यामां रात्रिं······ कूर्चका लोचकाः, तन्त्रमौषधं वेन्दित्वाभ्यालिताः सामान्यं रत्नसामान्यं, न तु कौस्तुभरूपः तद्विशेषः। **अत्रास्थिति**। प्रत्युत वैपरीत्ये त्तु···न डोहकारीणनु [?]। यथा ममेति। पुत्रो यज्ञः पुरुषोऽपसार्यतामित्यत्र स्वयं राज्ञः पुरुषः एति पुत्रो यस्माप्यतामिति [योऽपसार्यतामिति] संबन्धः। तथेहाप्युत्कर्षं च परस्येत्यत्र स्थिते न परस्येति पदेन स्त्रीरत्नमिति पदस्य संबन्धोऽस्तु तथा परस्त्रीरत्नं कथं मृष्यत इति

इति संबन्धो भविष्यतीत्याशङ्क्याह नहीति। न हि संबन्धो योग्यः उत्कर्षमित्यनेन परस्या कांक्षापूरणात् स्त्रीरत्नेमित्यनेनाकांक्षासान्निध्याभावाच्च शास्त्रशक्तेति।

द्रुहिणो [द्रुहिणो] ब्रह्मा, ईदृक् उक्तप्रकारगुणविशिष्टः, वरो जमाता श्रेष्ठो वा, रावणो जगदाक्रन्दकारी [जगदाक्रान्तकारी] अयमर्थः—अस्मिन् दशमुखे सर्वे गुणाः सन्ति, किन्तु जगदाक्रन्दकारीत्वं दोषः, अतश्च रावणपदस्य अर्थान्तरसंक्रमित-वाच्यत्वेनैव दोषास्पदत्वमित्येतावतैव वाक्यं समापयितुंसूचितम्। यत् पुनरुक्त पुनरित्यादि तेन पदे स्थाने अर्थंप्रतिपादनं न युक्तमिति अपदयुक्तोऽयं न च......... पुनरित्यादि समर्थकवाक्य त्वेन पुनरुक्तमिति वाच्यम्। वारणस्य वस्त्वस्यामुक्तता-पदेनार्थत्वमेव बहुमिष्टस्य वाक्यस्य [?] तथायुक्तत्वेन संबन्धस्यानौचित्यात्, तथा सति हि अनुक्तत्वेन वक्तुमिष्टं, वाच्यं युक्तियुक्तं स्यात्। जाल्मोऽसमीक्षकारी, व्युत्क्रमेण वाच्यं। क्रमेणोत्कृष्टप्रतिपादनस्यैवोचितत्वात्।

नानुवाद्यम्। तस्य प्रत्युताकथनहेतुत्वात्।

विवरं छिद्रं स्त्रीवराङ्गञ्च। अयमर्थः पुरुषव्यञ्जनस्मारकः।

दोषापवादाः

एवमुक्तदोषाणा क्वचिददोषत्वं, क्वचिद्गुणत्वं, क्वचिदनुभयत्वमित्याह **कर्णा-वीत्यादि**। ध्वनिः पदं सन्निधानादिबोधकमित्यस्यार्थः। कर्णादिस्थितिप्रतिपत्तये इति। सन्निधानेत्यादि अयमर्थः। अस्याः कर्णावतंसेनेत्यादिपद्ययोरवतंसादिपदप्रतिपाद नेनापि कर्णाद्यर्थप्रतिपत्तेः न पौनरुक्त्यम्। तथाहि कर्णादिपदानि कर्णादिस्थितिं बोधयन्ति, ततश्च सर्वविभूषणादिनावतंसादिहेतुकः, किन्तु नायिकादि कर्णस्थिति-हेतुक एवेति पर्यवस्यतीति भावः। सन्निधानादित्यादि शब्दसंग्राह्येषु आरूढत्वादि-षूदाहरति **विवीर्णेत्यादि**।

स्थितत्वित्यादि [स्थितेष्वेतत्वित्यादि]। यानि यानि कर्णावतंसादिपदानि महाकविभिः स्वप्रबन्धेन्धप्रयुक्तानि तंबे वै [स्वप्रबन्धेषु प्रयुक्तानि] तदुक्तप्रकारं समर्थनं तान्येव महाकविप्रबन्धस्थितानि कर्णावतंसादिपदानि अन्यैः प्रयोज्यानि। जघनकाञ्चीत्यादिपदानि तु पौनरुक्त्यमेवावहन्तीत्यर्थः।

क्रियाविशेषणत्वं [1]जगाब मधुरमिति विपदाक्षरसालीति चोक्तौ विवक्षितो वचनस्य मधुरता इत्यर्थः। विशेष्यस्य वाचकमिति पदस्य विशेषणं मधुरतादीति युक्तं नोक्तं [?] वामनादिभिरिति शेषः।

---

१. Correct reading is "जगाद मधुरां वाचं विशदाक्षरशालिनीम्।

यत्र तु विशेषणत्वं न घटते तत्र क्रियया नुंद्रस्यानुस्य [भिव्यक्तस्यार्थस्य] विशेषणदानार्थं प्रयोगः कार्य इत्याह युक्तत्वेवेति । चरणत्रे उपानहौ । अत्र व्रजन्निति । क्रिययापि पादाभ्यामिति विशेष्यस्यावगतादपि चरित्रेत्यादि विशेषणदानार्थं प्रयोगेन पुनरुक्तम् । विशेषणस्य क्रियाविशेषणत्वानुपपत्तेरिति भावः ।

न भुंक्त इति क्रिया । अत्र हेतुप्रतिपादनं विनापि निराकांक्षत्वप्रतिपत्तेर्न दोष इति भावः ।

अद्राक्षमिति श्रुतिकरणो [सुत्रामाणं] इति च्युतसंस्कृति, सुत्रामाणमितीन्द्रपर्यायमप्रयुक्तम् ।

वक्त्रादीदि । औचित्यवशादित्यस्यार्थो महाम्नेतिक युद्ध [?] दुर्बोधत्वं परुषवर्णत्वञ्च ।

दीधीङ् वेवीति । कश्चित् द्विगुः गुणः शौर्यादिपक्षे इकारादीनामेत्वादिः, वृद्धिः समृद्धिः इदानीमेत्वादिः [इकारादीनामेत्वादिः] क्विप्प्रत्ययनियमः [भः] सर्वाकारेण प्राप्तलोपः ।

समरच्यासं [समस्प्राक्षं] संस्पृष्टवान् । अत्रार्थोद्बोधः अ........अ....... परुषां व्यंग्यमहिम्ना यथा ।

अन्त्रप्रोतेत्यादि । अन्त्रेण प्रोता अद्दण [अन्त्रेण] निबद्धा बृहत्कपाला यत्र तथाभूता ये नलकास्तत्र वक्रूरंद्ध एंतः [?] कङ्कणाः तत्प्रायाणि तद्वहुनानि [तद्भूषणानि] प्रेक्षितानि च । तिनानिधनं [?] निरन्तरं प्राधारः क्षरणम् । अत्र वीभत्सो रसः शिरोधूनने रक्ताशोकगते अपद्यनैखयवै [?] दीर्घमभ्यमाघ्राता न व्याप्ता न उल्लाघयन् नीरोगा न कुर्वण यदाहुः—"उल्लायोनिर्गतो गदात्" । द्विगुणा बहुनाद्यनिस्तराया घृणादया तस्यां निर्विघ्नवृत्तेः आयत्ताः घृणयो रश्मयः ।

अत्र देवतावर्णनसद्भावे विकटवर्णाडम्बरदीर्घसमासातिनिवेशस्यैव प्रकटतयावभासान्नीरसत्वम् । अत आह ।

[1]रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।
अपृथग्यत्ननिर्वर्त्यः सोऽलंकारो ध्वनेर्मतः ॥

---

१. ध्वन्यालोकः । प्र० उ०

येनेत्यादि । हरपक्षे मनोभवः कामः । बलिजित् विष्णुः, तस्य कायः, पुरदैत्या त्वमस्त्रीकृतः उद्धृता असि, बाहुलाकागत्त [?] नागा एव हारवलया, यस्य गङ्गां त्रिपथगां, शशी विद्यते [ध्रियते यत्र शशिभृत्, अन्धकः दैत्यः यस्य, क्षयो नाशः, सर्वदा उमाधवः गौरीपतिः ।

हरिपक्षे येन अनः शकटं ध्वस्तं, अभवेन अजेन बलिजित्कायः आत्मन एव कायः, पुरा पूर्वं अमृताहरणकाले असुरमोहनार्थं स्त्रीरूपः कृतः, उद्धतः उद्धतो भुजंगः कालीयस्तं वलयेन दरूपेन [रूपेण] यो यस्य अगं पर्वतं गोवर्धनाख्यं गां पृथ्वीं च शशिनं मथ्नातीति शशिमद्राहुः अन्धकानां अंधकरं श्यामं क्षरो निवासः द्वारकापुरसम्बन्धी । सर्वं ददातीति सर्वदः माधवः श्रीपतिः ।

पिशुनयेत् सूचयेत् । स्थितौ मर्यादायां, करिणो गजस्य, हस्तः स्थूलहस्तः ।

"तर्जन्यनामिके श्लिष्टे मध्या पृष्टस्थिता तयोः" इति शृङ्गारशास्त्रप्रसिद्धरूपः स्त्रीयोनि बिम्बावनः [?] पुंध्वजाकारः ।

कविकावाक्याश्च्य, संबाधे संकटे, ध्वजाः पताकाः, पुंध्वजश्च साधनं, हस्त्यश्वादि स्त्रीवरांगं च, शक्तिरासक्तिः, अ·· मे निर्घुणस्य एतदश्लीलं शमकथानिबद्धं गुण इत्यर्थः ।

निर्वाणेति । प्रशमः शक्तिः, कनइ त्याग [?] इति यावत् । पक्षे विनाशा रक्ता रक्तारञ्जिताः, प्रकृष्टेन साधिताः आत्मसात्कृताः, पक्षे रुधिरेण मण्डिताः । अत क्षीणो विग्रहो युद्धं येषां पक्षे क्षतः खड्गादिप्रहारपाटितः विग्रहो देहो येषां, स्वस्थाः कुशलाः स्वर्गस्थाश्च । अत्र द्वितीयपक्षे सकारद्वयसद्भावे संयुक्तसजातीयानामुच्चारणविशेषादेकरूपता अत्रामंगलरूपाश्लीलो द्वितीयोऽर्थोमंगल सूचनार्थं प्रयुक्तो गुण इत्यर्थः ।

पृथूनि कार्तस्वरपात्राणि स्वर्णभाजनानि यत्र, पक्षे पृथुकानां बालानां आर्तस्वरस्य पात्रं स्थानं भूषिता मण्डिता आसनाभावाच्च, भुवि उषिताश्च बिलसन्तः करेणु यो गजः विनिर्गते, सन्तो रेणवश्च सत्वनिष्ठाः सत्वगुणमात्रविश्रान्ताः कमपि वाचामगोचरं यं वीक्षन्ते साक्षात् कुर्वन्तो, कथं : सत्वनिष्ठा एव तं साक्षात् कुर्वन्तीत्याहतमसां ज्योतिषा रजसा च परस्तात् परतो वर्तमानं, रजस्तमो उभूत्वैवानत्यामित्यर्थः [?] । केन क्रमेण साक्षात् कुर्वन्तीत्याह आत्मारामा आत्मनि प्रमातृप्रमाणादिप्रपंचातिरिक्ते चिदानन्दरूपे आरमतीत्यारामाः संसारोपजाता वैराग्याः सन्तः समनन्तरोक्तः स्वरूपः आत्मानमेव साक्षात्, कमपि निरन्तराकांक्षिणः, निर्विकल्पे परिदश्यामाने द्विधाकल्पनारहिते समाधौ जीवा अररमात्मनो ऐक्यापादने विहितः

सतताहितः । अतश्च ज्ञानस्याव्धानादिजनितस्य, उच्छेकात् दाद्यात् [?] विघटिततमोग्रन्थयः अपसारिता खिलासद्भावनारूपहृद्ग्रंथयः, यद्वा ज्ञानस्य ब्रह्माकाराया वृत्तेरुच्छेकात् विघटिततमोग्रन्थयः । अपसारिता विभ्या [ ] संसारबन्धनाः महार्थः अज्ञानातिरिक्तपदार्थः, अयं दुर्योधनः दीव्यतीति देवः, ज्योतिः, रूपं पुराणं च चराचरात्मकसकलसंसारकारणम् । अत्रैतदुक्तो भीमसेनः अभिज्ञः प्रतिपाद्यः सहदेवोऽपीति अप्रतीतत्वं गुण इत्येव ।

षडधिकेति । देहस्थितानां द्वासप्ततिसहस्त्राणां नाडीनां मध्ये मुख्यतमाः षड्भिरधिका दश षोडशनाडी इडापिंगला सुषुम्ना गान्धारी [गांधारी] हस्तिजिह्वाप्रभृतयः तासां चक्रं, तन्मध्ये स्थिताऽर्थात्स्थित शिवस्वरूपः, हृदि विनिहितरूपः, संलक्षस्वरूपसिद्धिर्योगस्याणिमादिसिद्धयः, तदेव शिवस्वरूपं, ये वदन्ति, तेषां साधकैर्योगनिष्ठैर्मृग्यमानोऽन्विष्यमाणः शक्तिभिरिच्छाज्ञानक्रियाभिः परिणद्धः सम्बन्धः शक्तीनां ब्राह्मीमाहेश्वरीप्रभृतीनां नाथः ।

फुल्लोत्कारमिति । फुल्लोत्करंकमलकूरसमंवदन्ति
ये सिन्धुवारविटपा मम वल्लभास्ते ।
ये गलितस्यमहिषीदध्नः सदृक्षास्ते
किंचिन्मुग्ध विचकिनप्रसूनपुंजाः ।।

कूरं भक्तं [?] गालितस्य विदूषकोक्तौ गुण इति शेषः ।

गाढेत्यादि । उक्तरूपा प्रिया मम मनसि स्वभावास्थिरतया वर्तमानत्वात् सुप्तापि पुनरुत्थाय मातीत्यशंक्याह । मृतानु किं सापि परैर्वहि······तं श ह्यतेत्याह आनीतेति जत्तकाष्ठवादिति शेषः । तथा भूतापि केनचिदुपायेन विदृढयितुं शक्यत इत्यत आह विलीनानु किं दु······ जलवदिति शेषः । अत्र मा मेति पदेन अध्याहियमानोऽतिपीडयेत्यर्थः । अयोग्या कियैतत्प्रतिपादिका नायिकायाः सान्तानन्द-[सान्द्रानन्द]जडीभूततया संपूर्णवाक्योच्चारणेऽप्यसामर्थ्यं व्यनक्तीति न्यूनपदं गुणः ।

तिष्ठेत्यादि । प्रभावेन दिव्येन पिपिता अदृश्या उर्वशी । एतत्प्रभावादृश्यत्वं कुं······नेत्यत आह नैतद्यत इति । यथा दीर्घं न सा कुप्यतीत्यर्थः । दृथतेर्नितंबत [?] इति पदैः विशेषबुद्धिः । कारणात् एतद्वाच्यस्य व्यंग्यस्य वितर्काख्यव्यभिचारिभावस्य उत्कर्षणादित्यर्थः । उत्तरा—"दीर्घं न सा कुप्यति" इत्युत्तरवाक्यजन्मा प्रतिपत्तिज्ञानम् । पूर्वां तिष्ठेत्यादिपूर्ववाक्यजन्यां प्रतिपत्तिम् । अयमर्थः । तिष्ठेदित्यादिवाक्यानन्तरं, दीर्घमित्यादिवाक्यार्धपूर्वं ।

नैतद्यत इति पदानां न्यूनत्वेऽपि उक्तरीत्यात्र विशेषबुद्धेरभावात् उत्तरवाक्येन पूर्ववाक्यस्याभिमतबाधानवभासाभावाच्चात्र न गुणेन दोषः। एवं योत्पतिताभवेदित्यत्र नैतंवंत [?] इति पदानां न्यूनतायामवगन्तव्यम्। अत्र न वदन्ति नेति नञ्द्वययोगेनापि वेदनातिशयेऽपि ते पुर्नविदन्तीति पदं त एव जानन्तीति विच्छित्ति-विशेष इति भावः।

विहितस्यानुवाद्यत्वे चेत्यनन्तरं कथितपदं गुण इति शेषः। पौरुषमेव कमला श्रीः समृद्धिकारी यस्याः तथा भूता कमला लक्ष्मीः। अतएव वक्ष्यमाण लाटानुप्रासोऽलंकारः।

ताला इति। "तदा जायन्ते गुणाः यदा ते सहृदयैर्गृह्यन्ते" इत्यादौ द्वितीयं कमलपदमर्थान्तरसंक्रमितवाच्यम्।

जितेन्द्रियत्वमिति। अत्र विहितानुवादः।

समाप्तेति। अत्र न विशेषणमात्रदानमिति। यथा—किं कार्यं समरकार्मुक इत्यादौ।

प्रागप्ताप्रेत्यादि। अत्र समाप्ते पूर्ववाक्ये पुनर्येनान्येत्थादिशक्यान्तरमुपात्तम्। **हुमित्यादि**।

> शरामि अपहस्तितरेखं निरंकुशमथ विरेचनविहिंतमपि।
> सुप्तेऽपि त्वयि.........प्रतीतिचिन्तां न स्मरामि॥

अपहस्तिता रेखा मर्यादा येन यौवनेनेत्यर्थः। कार्मुका देवस्य मधुयौवनं मनया निनादितः [?] सहचरै सह समागमे निजस्वभावप्रकाशनपूर्विकेयमुक्तिः। एवमुक्तदोषानामदोषत्वं नैरस्यानावहत्वेन मुख्यानपकर्षत्वात् गुणत्वं चास्वादस्वरूपविश्लेषार्थकवक्ष्यमाणा माधुर्यादिगुणप्रयोगो भाक्तः। अहो या गुणवत्वं च मुखं प्रति उपकारोऽपकाररराहित्यादिति संकलितार्थः।

रसदोषाः

रसदोषानांह **व्यभिचारीति**। व्रीडादीनामित्यनन्तरं सुशब्दवाच्यत्व [स्वशब्द वाच्यत्व] मिति शेषः। व्यभिचारिणो हि सुखानुभावमुखेनाभिव्यक्ता एव सहृदयैः नास्वाद्याः। तत्रोदाहरति **व्यानम्रेति**। अत्र व्यानम्रस्वकुलितत्वदयः क्रमेण व्रीडादीनामनुभावाः।

तरङ्गणं विलासचेष्टितम् । प्रहरणैरायुधैः । प्रहाराणां ठणत्कारैरिति संबन्धः ।

णिहुअ इत्यादि ।

निहतमारणे लोचनपथे पतिते गुरूणां मध्ये ।

सकल परिहारहृदयावनगमनमेव वांछति बधूः ॥

निहतमारणः प्रच्छन्नकामुकः । सकलपरित्यागपूर्वकं वनगमनं श्रृङ्गाराभासेऽपि यथा न दोषः तथेह नावितिं नायकाभिसाराय वनितागृहगमनं हि प्रत्युत श्रृंगार-वैपिकं [विषयकं] । यथा कुमारेति . रतिविलापेषु हि ।

अत्र मोहपरायणा सतीत्यादि पुरिपुष्ठिमान्वितस्यापि करुणस्य । अथ सा पुनरेव विरुध्यतेत्यनेन आकण्ठ परिपूर्णभोज्यस्य पुनर्भोज्यदानमिव देवस्यावद्धं छन्दो यथा इतः पूर्वं अकाण्ड इत्यस्यानुवृत्तिः । हयग्रीवस्य जलक्रीडादिवर्णन-मिति शेषः ।

प्रकृतिविपर्ययाख्यं दोषं व्याचष्टे प्रकृतय इत्यादिना देशव्यवहारसमुचितमेवो-पनिबद्धव्यमित्यन्तेन ग्रन्थेन ।

दिव्या महेन्द्रादयः । अदिव्या दुष्यन्तप्रभृतयः । दिव्यादिव्याः । अदिव्या अप्या-त्मनि नवाभिमानिनः श्रीरामचन्द्रादयः धीरोदात्तादीनामन्यरसाश्रयत्वे संभवत्यपि प्रायेण यथासंख्यं धीरादिप्रधानत्वमेवेत्यर्थः । तत्र धीरोदात्तादीनां लक्षणं यथा मम साहित्यदर्पणे—

अविकथ्यनः क्षमावानतिगम्भीरो महासत्वः ।

[1]स्वेच्छानिगूढमानो धीरोदात्तो दृढस्तः कथितः ॥

अविकथ्यनो नात्मश्लाघाकारः । महासत्वः हर्षशोकाद्यनभिभूतस्वभावः ।

निगूढमानोऽविनयललमर्दः दृढव्रतोऽङ्गीतानिर्वाहकः । [2]मायापरः प्रचण्डश्च-पलोऽहंकारभूयिष्टः आत्मश्लाघानिरतो धीयो [धीरोद्धतः] कथितः ।

---

१. साहित्यदर्पणः reads स्थेयान्निगूढमानो for स्वेच्छानिगूढमानो (द्र. ३ पः ३२ का ।

२. द्र० सा० द० ३ प० का० ३३ ।

[1]निश्चिन्तोमृद्धवलि [मृदुरनिशं] कलापरो धीरललितः स्यात् ।
[2]सामान्यगुणैर्भूयान् द्विजादिको धीरशान्तः स्यात् ॥

सामान्यगुणामन्वयुक्ता धृतिसमाधयः अदिव्योत्तम प्रवृत्तयः त्वय्यन्तादयः दिव्येष्वपि वर्णनीया इत्यर्थः ।

किंतु रतिवत्याद्धिये [?] शृङ्गारव्यंजकाः वरस्यार्थाः पित्रवर्णधितु मुचितास्ते [?] उत्तमदेवतानिष्ठा न वर्णनीया इत्यर्थः । अन्यथा रघुवंशादिषु रावणवधानन्तरं स्वराज्यमभिनिवृत्तस्य श्रीरामचन्द्रसींतासम्वादवर्णनमप्यनुचितं स्यात् अनुच्छितत्वे [चितत्वे] वा सकलमहाकविप्रबन्धेषु तथा वर्णनमसमंञ्जसं स्यात् ।

अवदानं वृत्तं कर्म तेन ...... वध्वजादीनां पातालगमनादिवर्णना तात्विकीति न विरुद्धा उभयथा दिव्यवृत्तस्य च मर्त्यावृत्तस्य चद्वयोरपि वर्णनमुचितमित्यर्थः ।

धीरोदात्तादीनामिति । **अयमर्थः** धीरोदात्तस्य रामचन्द्रस्य धारोत्ववत् प्रसिद्धोऽपि [?] लमुना [?] वालिवधो न वर्णनीयः । तथा सुकुमरमतीनां सोपदेशार्थप्रणीतेषु काव्येषु भार्यामविदतां महापुरुषे वा चरितेषु स्वपिकर्मसु विंतिदेषु [?] प्रवृत्तिः स्यात् । पुनः प्रकृतिविपर्ययदोषं प्रकारान्तरेण दर्शयति **तत्र भवन्नित्यादि** । उत्तमेन स्वनिप्रभृतौ वाच्येनाधमेनेति सम्बन्धः उपनिबद्धव्यमन्यथा प्रकृतिविपर्ययदोष इत्यर्थः ।

उपनिषद्रहस्यं ते समनन्तरोक्ता रसदोषाः क्वचिद्यत्र विभावानुभावमुखेन वचने वैशद्यप्रतीतिर्नास्ति । यत्र विभावानुभावकृतपुष्टिराहित्यमेवार्थगुणम् ।

औत्सुक्येनेति । सहभुवा द्वारा [?] समनन्तरकालोत्पन्नया **अत्रेति** । **अयमाशयः—अन्तः औत्सुक्यत्वरारूपानुभावमुखेन ......झटिति प्रतीतिः । दुरापाभयादिनापि [?] सम्भवात् । क्रियो [ह्रियो]ऽनुभावस्य च व्यावर्तनस्य कोपादिनापि संभवः । साध्वससाहसयोस्तु स्तुतिभावादिपरिपोषस्य प्रकृतिरसप्रतिकूलप्रायत्वमित्येषां [गतम्] ।**

स्वशब्दाभिधानमेवं न्याय्यः । अत्रैवार्थे दृष्टान्तमाह अत्रैवेति [अत एवेति] आगते विचलितमित्यादौ विचलनरूपाभिधानमुखेन यथा प्रेमादिप्रतिपादनं तथा

---

१. द्व० सा० द० ३ प० का० ३४ ।
२. ,, ३ प० का० ३४ ।

सहसा प्रकरणमुखेनौत्सुक्यप्रतिपादनेन विषदप्रतीतिरिति [विशदप्रतीतिरिति] दूरादुत्सुकमिति तस्य स्वशब्देनाभिधानमिति भावः।

क्वेति अत्र वितर्कादिष्विति। **अयमाशयः**। अत्र विरुद्धप्रसंगानां वितर्कमेति शंकाधृतीना सांगेवौत्सुका स्मृतिदैन्यचिन्ताभिस्तिरस्कारः, पर्यन्ते चिन्ता प्रधानमास्वादप्रकर्षम्।

आधिः भावयति, परक्षत्रैण छेदनीयो रोगः, साधारणत्वं करुणवत् विप्रलम्भोऽनुभावतयेत्यर्थः।

सत्यमित्यादि। **अत्रेति**। किन्तु मत्तांगनेत्यादौ तदंगाप्रतीतेः, तस्य शृङ्गारस्य अंगानां विभावादीनामभावात् नात्र शृङ्गारविरोधितस्य समासशेष इत्यर्थः। [रसदोष इत्यर्थः]।

ननु विनेया [नन्मुखीकर्तुं] न राजपुत्रप्रभृतीव शमकथासु व्युत्पादयितुमुन्मुखीकरणाय न [?] शृङ्गारानिबन्धनेऽपि न काचित् क्षतिः। तथाचोक्तम्—

"प्यथमा नीचमधरः पिबन्ति कटुभेषज [?] मित्यत्राविरोधिनः शृङ्गारस्य सद्भावेऽपि कोऽत्र विरोधः इत्यत आह **शान्त इत्यादि**। नैरन्तर्याभावात् नैरन्तर्याविरोधात्। नैरन्तर्याविरोधिनो हि यथासमावेशः तत्समनन्तरकारिकायामेव वक्ष्यति।

पुनर्विरोधिरससमावेशे प्रकारान्तराश्रयेण विरोधं दर्शयति **आश्रयैक्य इति**। इह हि रसानां विरोधिता, अविरोधिता च त्रिधा व्यवस्था—कयोश्चिदानन्तर्येण कयोश्चिदाश्रयैक्येन, कयोश्चिन्नैरन्तर्येणेति।

तत्र वीरशृङ्गारयोरालम्बनैक्येन विरोधः, तथा हास्यरौद्रबीभत्साः संभोगश्च, वीरकरुणरौद्रादिभिर्विप्रलंभस्य आनस्वनैक्येन [आश्रयैक्येन] वीरशृङ्गारयोः।

नैरन्तर्यविभावैक्याभ्यां शान्तशृंगारयोः त्रिधाप्यविरोधो वीरस्याद्भुतरौद्राभ्यां, शृङ्गारस्याद्भुतेन, भयानकस्य बीभत्सेनेति व्यवस्थिते एकाश्रयविरुद्धयोर्भिन्नाश्रयत्वेनैव नैरन्तर्यविरोधिनोश्च सान्तरान्तवितत्वेन निबन्धेन विरोध इत्यर्थः।

भूरेण्वित्यादीनि कर्मपदानि तृतीयश्लोकचतुर्थपादगतस्य स्वदेहान्तित्यस्य विशेषणानि। दिग्धान् उपचरितान् एवमेकाश्रयत्वेनविरोधिनो भिन्नालम्बनत्वेन विरोधः। यथा। काले जानब्हयः कविकरभदन्तक्षणि·······षिस्मरस्मेरस्मा भरपुलकं बहुः पश्य न गुण्ठनरजचरसेनाकलकलं जराजुरग्रन्थिं द्रढयति रज्जुनां परिवृढः। अत्र शृङ्गारे वीरावतीर्थालम्बनौ [ ]

स्मर्यमाण इति। विरुद्धोऽपि स्मर्यमाणस्तथा साम्येन विवक्षितो न दुष्टः, यौ चाङ्गिनि रसान्तरेऽङ्गभूतौ उभावपि परस्परं न दुष्टाविति सम्बन्धः।

अयं स इत्यादि। अक्षालम्बनविदेन [विभावेन] तत्रैव रसार्थतया स्मर्यमाणानां तदङ्गानां शोकोद्दीपकतया करुणानुकूलतया तदङ्गतेति भावः। [साम्य] सामान्य-विवक्षार्थमुदाहरति **हन्तेति** [दन्तेति] रक्ते रुधिरे, रागयुक्ते च।

निजबौद्धस्य यथेति। त ····शःतानि सिहीदन्तानि दन्तक्षतादीनि पश्यन्तः। क्रामन्त्य इत्यादि पदैः क्रामस्त्वमिति संबन्धः।

एवमंगिन्यंगत्वप्राप्तयो रसयोरविरोधं दर्शयितुं लौकिककथायामपि दृष्टान्तं दर्शयति **एहीति**।

अत्र ध्वनिक्रीडाङ्गतया गमनागमनादीनामविरोध इत्यर्थः।

एवमङ्गिन्यङ्गत्वं प्राप्तयोर्विरोधिनोरप्यविरोधे प्रकारान्तरेणोदाहरति **क्षिप्त इति**। त्रिपुरयुवतिषु प्रभावातिशयस्यातिप्रधानभूतकर्तृगतस्य भगवद्विषयस्य च विभावपरिपोषकस्यापरिपुष्टतयाव······भाव व्याप्तत्वेन भावमात्रेऽस्य भगवतस्त्रिषु विध्वंसं प्रत्युत सादृश्येनेत्यर्थः। श्रृंगारसदृशविशेषणावनायातः [?]।

तथापीत्यादि। तथाप्यात्मविश्रामधामताविरहात् त्रिपुरयुवषि [तिषु] प्रभा-वातिशयस्यांगतैव तस्यार्थः। अत्र श्रृङ्गारस्यायं सरशनोत्कर्षीत्यादिवत् पूर्वोक्तादिशा स्मर्यमाणतयांगभूत्वेनापि करुणेन न विरोध इत्याह **अथवेति**। यासां त्रिपुरयुवतीनां प्रणयदोषनिराकरणार्थं चाटुप्रवणः केशहस्तग्रहणादि कृतवान्। तास्वेव निःशरणासु शान्तरसवाग्भिः तथा चेष्टितवानिति सदृशदर्शनात् स्मर्यमाणेन ईर्ष्याविप्रलंभेन करुणः।

संप्रति पुष्टिमिवानीतः न तु विरोधमुख्यास्त्रिपुरविप्रभावातिशयपरिपुष्ठो भवति भावः उपोद्बल्यते उत्कर्षमानीयते सांगपरिपुष्ठेन प्रधानोपकारे प्रामाणिक-संमतिमाह **उक्तं हीति**। गुणीभूतः—यथा ब्रीह्यादिः प्रोक्षणादिना संस्कृतः प्रधानं दर्शपौर्णमासादिकं प्रतिपद्यते प्रधाने विनियुज्यत इति प्राक्प्रतिपादितरूपस्य समूहा-लंबनात्मकपूर्णघटानंदस्वरूपस्य रसान्तरेण तथाभूतेन न विरोधो नाप्यङ्गाङ्गिभावः, एकवाक्यनिवेशप्रादुर्भावयोगपद्यविरहात् परस्परोपमर्दकत्वानुपपत्तेः।

द्वयोरपि पूर्णत्वेन·······तंद्र [?] विश्रामराहित्याभावादिति भावः। इति शब्दो हेत्वर्थः।

स्थायीभावः तस्य बाध्यस्यांगस्य स्थायीभावः उपलक्षणे लक्षणस्य उपगम्यते **क्वचिन्मते** तु सञ्चारिरसनाम्ना व्यवह्रियते ।

चण्डिदासपंडितानां मते तु-खण्डरसनाम्ना यदाहुः—अंगं संसयत्यङ्गं स्यात् [?] सांतवे । नास्वाद्यते समग्रं यत्ततः खण्डरसः स्मृत ।। इति

इति श्रकविराजविश्वनाथमहापात्रकृतौ काव्यप्रकाशदर्पणे दोषदर्शनो नाम ।

सप्तम उल्लासः ।

अथ अष्टम उल्लासः

अथावसरप्राप्तान् गुणान्निरूपयितुकामः गुणालङ्कारयोः स्वरूपकथनेन भेदसाधकः कारिकान्वयमवतारयति [कारिकामिमामवतारयति] **एवमिति**। गुणालङ्कारयोर्विवेकं परस्परैकजाद्यम् [परस्परवैजात्यम्]। येव तस्येति [ये रसस्येति] अङ्गिनः [अङ्गिनः] काव्यात्मभूतस्य रसस्य अम्वादस्य [अङ्गादस्य] न तु शब्दार्थयोर्धर्माः। स्वरूपविशेषा इति लक्षणभागः। तेषां गुणसंज्ञाहेतुमाह **शौर्यादय इति**। यथा खलु शौर्यादयः पुरुषोत्कर्षहेतवो गुणा उच्यन्ते तथा माधुर्यादयोऽपि सुसमर्पकपदसन्दर्भस्य काव्यव्यपदेशौपयिकोत्कर्षानुगुणा भाजं इत्यर्थः। अचलस्थितयः काव्याव्यभिचारित्वात्।

तज्जातीयाव्यहितस्य नीरसत्वेनाकारत्वात् अलङ्काराणां पुनः सरसत्वेऽपि न तथा प्रायिकत्वं अवर्जनीय सन्निधानमात्रेणेति भावः। गुणानां वर्णधर्मत्वमाशङ्क्य निराकुर्वन् विवृणोति **आत्मन इति**। भाव [यथा] आकारस्यावयवसंस्थानस्य। **क्वचिदित्यादि**। व्यवहरन्तीत्यन्तो दृष्टान्तग्रन्थः। **तद्वदित्यादि व्यवहरन्तीत्यन्तो** दार्ष्टान्तिकः। क्वापि पुंसि ···· कामः [?] सुविश्रान्तंप्रतीतंयस्तत्वानभिज्ञाः माधुर्यव्यवहारप्रवृत्तेः। **माधुर्यमित्यादि** व्यवहारप्रवृत्तेरित्यर्थः **माधुर्यादीति**। अमाधुर्यादीति च व्यवहरन्तीत्यस्य कर्म। अत इति। अतो न वर्ण इत्यर्थः। मधुरादिवर्णधर्मत्वे हि तेषां तदभावस्थाने सर्वथा मधुरात्मास्वादयोगव्रवस्यात्[?]न चैवमपहृष्टस्यप्रकृष्टतत्वस्य वा तस्यानुभावात्।

उपकुर्वन्तीति। तं वसादिलक्षणं [रसादिलक्षणं] काव्यात्मानं सन्तं काव्येष्वावश्यकतया वर्तमानं, **अङ्गद्वारेण** शरीरस्थानीयशब्दार्थद्वारेण जातुचित् कदाचित् नत्वावश्यकस्थितिमन्त [सन्तः] उपकुर्वन्ति उत्कर्षं स्यन्ति। दृष्टान्तमाह **हारविदिति**। हारादयोऽपि कण्ठादिशोभाधानद्वारा आत्मानमुपकुर्वन्ति, न तु साक्षात्, न च तेषामावश्यकस्थितिः। एवं शौर्यादीति व्यवहारादीनां माधुर्यादिभ्योऽनुप्रासोपमादीनां भेदः।

तदुक्तं भक्तं भट्टेनेति [भट्टोद्भटेन]
शौर्योदौर्यादि यत् पुंसां न हि हाराङ्गदादयः।
अन्तरङ्गतवाभावं [तथाभावं] गन्तुं जातुचिदीशत ॥ इति ॥

संतपिति [संप्रति] कारिकापदार्थं व्यतिरेकेण विशदयति **यत्र त्विति**। तत्र काव्याभासे उक्तिवैचित्र्यमात्रपर्यवसिता न त्वलङ्कार इत्यर्थः। **क्वचित्त्विति**। **सन्तं** रसमित्यर्थः। एवञ्च सतोऽपि रसस्योपकारकत्वे तेषां नालङ्कारता। तदेवमनुप्रासोपमादीनां यत्र वाच्यवाचकमुखेन रसोपकारकत्वं तत्रालंकारत्वं, यत्र च सतो रसस्यानुपकारकत्वं तत्र नालङ्कारकत्वं यत्र च नास्ति रसस्तत्रापि तथा। **चित्त इति**।

चित्ते लिखाता इति न क्षुण्णा भवति। सा गुणेषु शय्यायां विपरिवर्तते। विकसति दिङ् मुखे। वचने वर्तते प्रवर्तते काव्यबन्धे ध्यानेन तृप्यति। चिरं तरुणी प्रगल्भालिखतो भवति। वाक्यकरणव्यापारशून्या भवति, न क्षुण्णा भवति, गुणेषु नायकगुणसंकीर्तने अवधानं न त्यजति, विकसति दिङ् मुखेषु नायिकागमनसंभावनया दिङ् मुखेषु दृष्ट्युन्मीलयति वचने प्रवर्तते नायिकानयनार्थं सखीं पुनः पुनः भूते [ब्रूते] काव्यबन्धे नायकपत्रिकालिखनार्थे ध्याने नायकस्यैवावाचकमेव न तु विप्रलम्भश्रृङ्गारमुपकरोति, टकारमयोऽनुप्रासस्तदनुपकारकत्वादित्यर्थः। इदं च नीरसत्वात् काव्याभासस्योदाहरणमिति केचिदाहुः।

ननु विप्रलम्भश्रृङ्गारसद्भावात् पूर्वोदाहृता अपसारयेत्यादि पद्यद्वयपक्षमाह—**आचार्येणात्रापि** शब्दार्थालङ्कारद्वयस्योदाहर्तुमुचितत्वात्। एवं रसवति काव्ये शब्दालंकारस्यानुपकारितायामुदाहृत्यार्थालङ्कारस्योदाहरति **भित्र इति**। मित्रे सूर्ये सुहृदि च। **न तु रसम्** विप्रलंभरसमुपकरोति। उपमा सादृश्यमित्यर्थः। तथा ह्युत्प्रेक्षैव अकुलाबिसनतयो [अर्गलाविसलतयो] र्द्वयोरपि जीवननिर्गमनविरोधलक्षणत्वस्याताद्विकत्वे [अतात्विकत्वे] न संभावनोत्थानात्।

प्रकृताननुगुणा अकुलारूपोपमानेन [अर्गलारूपोपमानेनाह [त्र] जीवस्य स्त्रीकरणमवगम्यते। अस्थिरीकरणकारणानामेव प्रकृतोचितत्वं। यत्र नास्ति रस इत्याद्युक्तस्य त्रिरसस्योदाहरणं यथा—

इयम······[पं] यितु शमनी त्रिदोषशदशनी [शमनी] बुभुक्षुकमनीया।
मर्त्यानाममृतघटी रसगन्धक पर्पटी जयति ॥
अत्र शब्दसामान्यस्य नालङ्कारता।
श्रोत्रियोऽपि दिवारात्र्यां मूत्रयत्त रामुखः।
अहो चन्द्रस्य माहात्म्यं रक्षते किमतः परं ॥
अत्रालङ्कारस्य

---

१. भट्टोद्भटः।

एवमिति । अस्मदुक्तगुणालङ्कारविभागव्यवस्थायां, एवं सिद्धमिति भावः । अपृथक् सिद्धानामाधार्याधारभूतानां यः संबन्धः । इहेति प्रत्ययहेतुः स समवायः । अव्टथ [शब्दार्थं] सिद्धयोः संयुक्तप्रत्ययनिमित्तं संयोगः । एवञ्च ग्रन्थकृता यत् "समवायवृत्या शौर्यादयः संयोगवृत्या तु हारादयः काव्यगुणालङ्कारविवेचनार्थं दृष्टान्तत्वेन दर्शितं [तत्र] दृष्टान्तदार्ष्ट्रान्तिकयोर्वैषम्यम् ।

तथाहि । चित्तद्रवीभावनमया··· ···द । एवं माधुर्यं स चास्वादरूपानतिरिक्त एव रत्यात्यंश [रत्याद्यंश] कर्तृ क्वचित् तत्प्रकाशनं, तस्यैव सत्वात् । यस्य तु समवायवृत्या गुणादिद्रव्यादौ वृत्तिस्तस्य च भिन्नमेव, यच्च काव्यालङ्काराणां काव्ये वृत्तिस्तत्र नित्य एव संबन्धः । शब्दार्थयोर्हि तथाभूतो वैचित्र्याख्यो धर्म एवालङ्कारस्तस्य कविना तथा तथा वर्णितयोः शब्दार्थयोः नित्यत्र [नित्यत्वं] संबन्धः । एवञ्च समवायवृत्या माधुर्यादीनां स एव स्थितिरिति य [त् ग्र] न्थकृतोक्तं तन्मुख्यादेवात्मधर्मत्ववादिनो नैयायिकादेर्मतमनुसृत्योपचारेण वा प्रयोगः । अलङ्काराणां च शब्दार्थस्वरूपाङ्गवृत्या समवायसंबन्धत्वेन उपचरणव [उपचारेण] संयोगपदप्रयोग इति ग्रन्थकाराभिप्रायो नेयः [ज्ञेयः] ।

एवञ्च गुणानां रसादेः स्वरूपविशेषात्मकत्वेन अलङ्काराणां च शब्दार्थशोभाभिधानद्वारेण रसोपकारकत्वेन भेद इत्युक्तं भवति तथा यद्गड्डुरिका [गड्डारका] प्रवाहणे वानयोर्भेदः तन्न तर्थत [घटत] इति यदुक्तं तदसंगतमिति भावः ।गड्डुरिकाप्रवाहश्च, यथैकां गड्डुरिकामपरागड्डुरिकानुगच्छति तां परेर्णेति, तासां गतानुगतत्वेन यथा कथञ्चिद्भेदव्यवहारः क्रियते स च नात्वा [वश्य] क इत्यर्थः ।

संप्रति गुणालङ्कारयोरन्यथा भेदवादिनां वामनादीनामतमनूद्य दूषयति यदप्युक्तमिति । लोकशास्त्रातिरेकां शब्दावनुरञ्जकः [शब्दार्थयोरनुरञ्जकः] कश्चिद्विशेषः शोभा, यस्याः कर्तारो धर्मा गुणास्तस्या एव प्रकर्षहेतवोऽलङ्कारा इति। गुणाश्चात्र तन्मतोक्ताः श्लेषप्रसादादयः ।

काव्यस्यात्मा तन्मत इति शेषः । अद्रावत्रे ति । ओजः प्रभृतिषु तन्मतोक्तेषु काव्यव्यवहारप्राप्तिर्नखलु तत्र व्यवहारे रसाभावादित्यभिप्रायः । स्वर्गेति । अत्र प्रथमेऽर्द्धे विशेषोक्तिः द्वितीये व्यतिरेकः । गुणनिरपेक्षावित्यत्रापि गुणास्तन्मतोक्ताः, स्वमते तु गुणरसानां रसानुव्यतिरेकार्थविधायित्वस्य शृङ्गाररसस्याद्रसद्भावादप्यैवैतन्मते माधुर्याख्यो गुणः ।

न पुनर्वश । त्वन्मतोक्ताः श्लेषादयः ।

आह्लादकत्वमिति । द्रुति द्रुतिकारणमितीतरोपचारवृत्या प्रयोगः । न हि रसस्याह्लादकत्वमपि द्वाल्लपस्वरूपत्व द्रुतिरपि तु स्वरूपैवेति [स्वरूपेणैवेति ।] अत एवोक्तमस्मत्साहित्यदर्पणे ।

[1]चित्तंद्रवीभावमयोह्लादो माधुर्यत्व [मुच्यते] त इति ।

इह चाह्लादस्यानन्दापरपर्यायत्वेन सर्वस्वोद [सहृदय] साधारणत्वात् द्रुतिकारणमित्यनेनाभिव्यापि [तिव्याप्ति] परिहारः । **अस्वादिति** [**अर्थादिति**] यतो विप्रलम्भे तन्माधुर्यमतिशयान्वितमिति समनन्तरं वक्ष्यति । ततोऽत्र शृङ्गारशब्दः संभोग शृङ्गारार्थ एवेत्यर्थः । द्रुतिपदार्थमनूद्य दूषयति द्रुतिर्गलितत्वमिवेति । गलितत्वञ्च स्वभाविकालाविष्टत्वार्थक्काठिन्य [?] सन्युक्रोधादिकृतदीप्तत्वविस्मयहासात्यपहित विशेषपरित्यागेन रत्याकारानन्दोद्बोधेन सहृदयचित्तस्था द्रंप्रायत्वम् ।

ओजः प्रसादयोरपि । अत्र संभोगकारणादिशब्दा उपलक्षणानि । तेन संभोगाभासादिष्वपि माधुर्याद्यवस्थितिः ।

दीप्त्येति । अत्रापि पूर्ववदुपचारेण प्रयोगो ज्ञेयः । तदुक्तमस्मत्साहित्यदर्पणे "एवमुक्तम्" [2]ओजश्चित्तस्य विस्ताररूपं "दीप्तत्वमुच्यते" । [इति]

शुष्केन्धनेति । अत्र काण्ठवह्निदृष्टान्तेन रसस्तसो [रसस्ततो] गुणसंसर्गेण प्रसन्नत्वं दर्शितम् ।

व्याप्नोतीति । आविष्टं करोति । **चण्डिदासपण्डितास्तु**शुष्केन्धनमग्निविरमुच्छजनरत्नप्रभादिविरेति [?] व्याचक्षते ।

अन्यदिति । **कर्मपदार्थमाह व्याप्य इति** । व्यापनयोग्यतया प्रकरणादवसेयमित्यर्थः । रसेषु आधारभूतेषु इति निमित्ते सप्तमी । अतश्च सूत्रेत्याधार [सर्वेत्रेत्या धार] निमित्तयोस्तन्त्रेण निवेशः । एवञ्च सर्वत्रेवाभिरोहित सर्वत्रेवाधिरोहित] शब्दार्थवचनाः समस्ता । अत्र समस्ताश्च निमित्तीकृत्य [सर्वेष्वेव रसेषु कृतास्पदो यः तत्स्वरूपविशेषात्मकः प्रसादाख्यो गुणविशेष इत्यर्थः । यत्पुनरेषां गुणानां शब्दार्थवृत्तित्वमुच्यते तदुपचारेणेत्याह अनुकरोत्येति [गुणवृत्येति] ।

१. अष्टमः परिच्छेदः का० १ ।

२. साहित्यदर्पणः, अ० प० का० ४ ।

दश वामनाद्युक्ताः । **बहूनामित्यादि** । श्लेषादीनां चतुर्णां प्राचीनोक्तगुणानामस्मदुक्ते··· ····जसि भक्त्या जः [?] पदवाच्ये पदार्थविशेषेऽन्तर्भाव इति संबन्धः । आरोहः उत्कर्षः । अवरोहः अपकर्षः, तेषां क्रमो वैरस्यानावहो विन्यासः, विकटत्वं पदानां नृत्यप्रायत्वं । क्रमेण यथा ।

उन्मज्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धताः
सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिभिः [प्रतिध्वानिनीः] ।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायं तदा [तथा]
प्रायः प्रेंखदसंख्यशंखधवला वेलेय सुकुच्छति [वेलेयमुग्दच्छति] ।।

अथं बन्धवैकट्यात्मकत्वादोज एव समाधिर्यथा । **चञ्चद्भुजेत्यादि** । अत्र घादत्रयक्रमेण बन्धस्य गाढता, चतुर्थपादे तु यद्यपि अपकर्मः [अपक्रमः] तथापि तीव्रप्रयन्नोच्चार्यतया ओजस्विता । उदारता यथा—

"स्वचरणविनिविष्टैर्नूपुरैर्नर्तकीनां झटिति रणितमासीत्तत्रचित्रं कलं च" अत्र [च] तन्मतानुसारेण रसानुसंधानमन्तरेणैव शब्दप्रौढिमात्रेमौजः ।।

यो यः शस्त्रं विभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां
यो गः [यः] पाञ्चालगोत्रे शिशुरधिकवया गुर्वशय्यां [गर्भशय्यां] गतोवा ।
यो यस्तत्कर्मसाक्षी चलति मयि रणे यश्य यश्य प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ।।

पृथगिति । पृथक्पदत्वरूपस्य माधुर्यगुणस्यासमासस्य माधुर्यव्यञ्जकत्वस्य वक्ष्यमाणतयैरांगीकार [वक्ष्यमाणतयैकांगीकार] इत्यर्थः । तद्यथा-मम प्रभावती परिणयनाटके—

[श्वा] सान्मुञ्चति भूतले विलुठति त्वन्मा [र्गं] मालोकते
दीर्घं रोदिति विक्षिपत्यत इतः क्षामां भुजा बन्दरी [वल्लरी] ।
किञ्च, प्राणसमानकांक्षितवती स्वप्नेऽपि ते सङ्गमं
निद्रां वाञ्छति न प्रयच्छतिं पुनर्दग्धो विधिस्तामपि ।।

प्रसादेनोपचाराच्छब्दधर्मेण स्पष्ठमुदाहरणम् । क्वचिद्दोषः । यत्र मार्गभिद्वस्यैवोचितत्वंमाहुश्च । मस्टणेन विकटेन चोपक्रान्तो यो मार्गस्थस्याभेदपर्यवसंनपर्य्यन्तं

निर्वाहस्तत् परित्यागस्य च प्रकृतोदाहृते "मातङ्गेत्यादौ गुणत्वं यत्र तत् तदपरित्यागस्योचितता । तत्रोक्तगुणेष्वेवान्तर्भाव इति भावः । तत्र मसृणवर्णनिर्वाहो यथा-मम चन्द्रकलायां नाटिकायाम् । तृ० अं० १६ श्लो० ।

विमुस्यासुकृते नन्दनवसनं [बिम्बस्यासुकृतेन दन्तवसनं] मातङ्गकुम्भद्वय-
स्यात्पुण्येन पयोधरौ कुवलयस्याकर्मणा चक्षुषी ।
इन्दोर्भाग्यविपर्ययेण वदनं कुन्दाकोरेण सा [कुन्दावलेरेन सा]
दन्ताली कदलीतरोश्च दुरितेनोरुद्वयं निर्मितम् ।। विकटवर्णनिर्वाहो यथा ममैव ।

ममै भमृर्द्धव्या धूयमाणध्वनदमव धुनीलोलकल्लोलजालो
वृत्तांभः क्षोदनभात् प्रसवमभिनतः क्षिप्तनक्षत्रलक्षम् ।
ऊर्ध्वन्यस्ताङ्घ्रिदण्ड भ्रमितरवभसो तनुमभूत् प्रवेग—
भ्रान्तब्रह्माण्डखण्डं प्रवितवत्तशुभं शांभवं भाण्डवं वः ।।

कष्टत्वं कष्टोच्चारणीयत्वं दुःश्रवत्वमिति यावत् सौकुमार्यं । यथा ममैव—
[द्व० चन्द्रकला नाटिका (तृ० अ० श्लो ४ ।

किं कन्दर्पमुखं विधाय मधुपैः पक्षं लवैः पल्लवै—
वेतिश्युतशरैः [रभिश्चुतशरैः] करोषि जगता जतुं प्रयासं खथा [वृथा]
निद्रातुं शयितुं प्रमातुमथवा स्थातुं क्षमः को भवे—
देकोऽसै कनकंक्तकं [कलकण्ठकण्ठ] कुहरं जागर्ति चेतश्चमः ।।
कान्तिर्यथा ममैव ।

नेत्रे खञ्जनगञ्जने, सरसिजप्रत्यर्थि पाणिद्वयं
वक्षोजौ करिकुंभविभ्रमकरीमत्युनुतिं [मत्युन्नतिं] गच्छतः ।
कान्तिः काञ्चनचम्पकप्रतिनिधिर्वाणी स्वधा स्पर्धिनी [सुधास्यन्दिनो]
स्मेयेल्लीव्रर [स्मेरेन्दीवर] पत्र [राम] सोदरवपुस्तस्याः कटाक्षच्छटा ।।

उपसंहरति एवमिति । पदार्थ इति । चान्द्रमिति एकस्मिन पदार्थे वक्तव्ये वरवर्णिनीति पदाभिधानम् । वाक्यार्थस्य व्यासो यथा—

असौ नानाकारः भवति सुखदःखव्यतिकरः
सुख वा दुःखं वा प्रभवति [न भवति] भबत्येव भवतः [च ततः] ।
पुनस्तस्मादूर्ध्वं भवति सुखदुःखं किमपि तत्
पुनर्यस्मादूर्ध्वं भवति न च दुःखं न च सुखमिति ।।

अस्यैव समासो यथा—

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आर्थन [आत्मनः] प्रतिकूलानि न परेषां समाचरेदिति ॥

तदेतत्प्रकारचतुष्टयेनार्थस्य प्रौढत्वमिति यदोज इति अर्थगुणत्वेनोक्तं तद्वैचित्र्यमात्रं न तु गुणः । अत्र हेतुमाह-तदभावेऽपीति । अपुष्टार्थत्वेत्यादि । ओजःप्रभृतयः पञ्च तन्मतोक्ताः एषामुदाहरणानि क्रमेणाष्टाथत्वदोषरहितानि काव्यानि कवित्वमात्र-गोचरानुस्वभावः यथा च वर्णनं स्वभावोक्तिः । यथा ममैव—

लाङ्गूलेनाति हत्यक्षितितलमसकृ··· रयनुग्रपद्भ्या
मार्धव्येवावलीयश्रुतमथ गगनं प्रोद्य तद्विक्रमेण ।
स्फूर्जझङ्कारघोरप्रतिदिशमखिलां द्रावयत्वेषजंत्र
न कोपाविष्टः प्रतिवनमरुणोच्छलचक्षयस्तरक्षुः ॥
[लाङ्गूलेनाभिहत्य क्षितितलमसकृद्दारयन्नग्रपद्भ्या—
मात्मन्येवावलीय द्रुतमथ गगनं प्रोत्पतन् विक्रमेण ।
स्फूर्जद्धुङ्कारघोषः प्रतिदिशमखिलान् द्रावयन्नेष जन्तून्
कोपाविष्टः प्रविष्टः प्रतिवनमरुणोच्छून चक्षुस्तरक्षुः ॥]

स्पष्टमन्यत् । [द्र० च० ना० २ रा अं० श्लो ४)

क्रमः क्रियासन्ततिः, कौटिल्यं विदग्धचेष्टितं, अनुल्बणत्वमप्रसिद्धवर्णनाविरहः, उपपत्तिरुपपादकयुक्तिन्यासः । एषां योगः संमेलनं स एवं रूपं यस्याः घटनायाः तद्रूपो विचित्रार्थत्वमात्रं अनन्यसाधारणरसोपकारित्वातिशयविरहानुगुण इति भावः ।

दृष्टवैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा—
देकस्या नयने निमील्य विहितक्रीडान्ववन्वच्छलः [नु बन्धच्छलः]
ईषत्वाकृतकंधरः [ईषद्वक्रितकंधरः] सपुलकः प्रेमोल्लसन्मानसा—
मन्तर्हास लसत् कपोलफलकां धूर्तोऽपरां चुम्बति ॥

अत्र दर्शनादयः किया उपपत्यसमर्थनरूपं कौटिल्यं लोकसंव्यवहाररूपमनु-ल्बणत्वम् । एकासनसंस्थिते पश्चादुपेत्य नयने निमील्य ईषद्वक्रितकंधर इति चोपपादकानि । एषां योगः । अनेन च वाक्योपपत्तिग्रहणव्यग्रतया रसास्वादनं

व्यवहितप्राय इत्यस्यानुगुणता । अवैषम्यमुपक्रान्तप्रक्रिया विपर्यासिनातुस्था विसंवादः स्पष्टमुदाहरणम् । अयोनिरर्थो यथा—

"[१]सद्यो मुण्डितमत्तहूणचुबुकप्रस्पर्द्धिनारङ्गकम्" । एवं भूतस्यार्थस्य कविनान्वयमेवोद्भावितत्वादयोनित्वम् । अन्यच्छायायोनिर्यथा "निजनयनप्रतिबिम्बैरम्बुनि बहुशः प्रभाविता [प्रतारिता इत्यपि पाठः] कापि नीलोत्पलेऽपि विमृशति करमर्पयितुं कुम्बमनारी [कुसुमलावी] ।

अत्र नयनस्य नीलोत्पलसादृश्यं पूर्वकविप्रसिद्धम् । विच्छित्तिविशेषाश्रयेणैवोपनिपद्धमित्यन्यच्छायायोनित्वम् ।

उपसंहरति तेनेति । वाच्या वक्तुं न्याय्या । शब्दगुणे उपचारेण शब्दे प्रवर्तमाना रसस्य स्वरूपविशेषा माधुर्यौजः प्रसादाख्या : ईडाः [इताः] प्राप्तः । व······ [गीन्त्यीः] कादयो मावसानाः पञ्च पञ्चमूत्वा पञ्चेतेषामन्त्याङ्‌ञणनामा [अन्त्याः ङ् ञ् ट नमाः] तै मूर्ध्निस्थितैर्युक्ता अर्थान्विता वर्गान्त्या एव स्पर्शाः वर्णाः स्पृश्यन्ते कण्ठताल्वादिभिरिति व्युत्पाद्या । अवृत्तिपदं व्याचष्टे समासाभावः अल्पशब्दार्थो मध्यमो न दीर्घ इत्यर्थः । तथेति । तथेति तच्छब्देन समनन्तरोक्तस्य माधुर्यस्यैव परामर्शः । तेन माधुर्यवती रचना माधुर्यगुणव्यक्तिकेत्यर्थः । एतदेव वृत्तिकृत् कारिकागतं तथेति पदमनूद्य विवृणोति माधुर्यवती ।

न भूत्वता रङ्गो नृत्यभूमिः, भङ्ग्यो विलासचेष्टाः ।

आद्याः कचटतपाः, तेषामन्त्यैः णलठयफैः [ञमङणनैः] तृतीया गजडदबाः, तेषामन्त्यैः धमढधतै र्योगस्ते च । तथा संयुक्तावमी. उपर्यधोद्वयोरेफेण तुल्याः संयुक्ताः ओजसो व्यञ्जिका इति भावः । गुम्फा इति कारिकापदार्थः संघटनेति ।

रसानां रसभावतदाभासादीनां, समासानां असमासाल्पसमासदीर्घसमासानां, प्रसादाभावे हि समासाभावोऽपि करुणविप्रलम्भशृङ्गारो न व्यनक्ति । तदपरित्यागे च असमासोऽपि संघटना प्रकाशयत्येव । अस्य च गुणद्वयप्रयुक्ता वर्णातिरिक्ता अपि जकारादयोऽपि वर्णाः व्यञ्जकत्वेनानु·····[सन्धात] व्याः । केवलं मकारादिभिः सह जकारादयो न योजनीया इत्याहुः । गुणपरतन्त्रा गुणानुरूपेण प्रयोज्यत्वात् ।

---

१. सा० द० पृ० ५६५ ।
२. ,, ,, ५६५ ।

मन्थो मन्थनं तेनायस्तं समन्ततः क्षिप्तं, धीरो गंभीरः कोणो वादनदण्डः। कृष्णा द्रौपदी। अत्र भूतः [दूतः] प्रथमाप्रेषितो भूतः [दूतः] अत्रेत्यादि। अत्र वाच्यस्य क्रोधादिव्यञ्जकत्वेन वाक्यस्य नाटकरूप रूपाभिनेयार्थत्वेनातिनथ [अतिशय] दुःखावहत्वेन चार्यचितस्यापि [?] दीर्घसमासादेव। उद्धतो भीमसेनो वक्तेति नानौचित्यमिति भावः।

प्रौढेति। प्रौढो वागो [वाण.] यश्छेदस्तदनुरूपेण य उच्छलनरूपः तत्पतनं वेगः। अर्थात् कर्णशिरसा: उपघातः संघटनं भासाकृष्टाश्वं] यथा स्यात् तिर्यग्वञ्चन-क्रियाविशेषं। आख्यायिकांया गद्यमयप्रबन्धत्वात् गद्यसचिविकटवर्ण दीर्घसमास-बाहुल्यात्। शृगारेऽपि न प्रायेण स्वकुमार [सुकुमार] रचनादि कथाख्यप्रबन्धस्य च गद्यमयत्वेऽपि श्रृङ्गाररसमयत्वात रौद्रादिरसप्रवेशेऽपि नात्यन्तोद्धतावचनादयो विधेयाः। नाटकादिषु दीर्घसमासानौचित्यहेतुः। समनन्तरमेवोक्तः एवमुक्तप्रकारे-णानुसर्तव्यं महाकविप्रबन्धेष्वित्यर्थः। तद्यथा मुक्तकेषु संबन्धाभिनिवेशिनः कवे रसाश्रयमौचित्यम्। यथा—शून्यं वासगृहम्त्यादौ। नीरसे तु कामचारः। एवं सर्गबन्धेऽपि पर्यस्तानां पत्यानां [?] मुक्तानामिव एकप्रघटनाबन्धः। अत्र च संस्कृतप्राकृतदेशभाषाबन्धे श्रृङ्गारबाहुल्यादसमासप्राया रचना, क्वचिद्रसो वा दिवसौचित्यादि भावो। एवम् एवं धर्मादिपुरुषार्थमुद्दिश्य, प्रकारवैचित्र्येण नाना-विधेति वृत्तवर्णनं परिकथा। अस्यां कथांमात्रतात्पर्येणात्यन्तं रसाभिवेशात् [सं] घटनादौ कामचार एव। समसुफलान्तेति वृत्तिवर्णनं, सकलकथा एकदेशवर्णनं खण्डकथा। एतयोः कुलकादि बन्धबाहुल्यात् दीर्घसमासादिरचना न विरुद्धयते। एवमन्यदपि ज्ञेयम्।

इति महापात्रश्रीविश्वनाथकविराजकृतौ काव्यप्रकाशदर्पणे गुणनिरूपणोनाम।
अष्टमउल्लासः।

अथ नवम उल्लासः

एवं गुणान्निरूप्य तत्प्रस्तावे सामान्यतो लक्षितानामलङ्काराणां विशेषलक्षण-प्रस्तावं दर्शयति वृत्तिकृत् गुणविवेचन इति। प्राप्तरसवा [प्राप्तावसरा] तदोषारिति [तददोषाविति] सामान्यलक्षणोद्दिष्टत्वात्। शब्दालङ्काखनु [शब्दालङ्काराणां] तु प्रत्ययात्, प्रथमं शब्दस्य बुद्धिविषयत्वात्। तत्रैव वैदग्ध्ये विशेषाश्रयद्वेन [विशेषाश्रयत्वेन] प्रथमं वक्रोक्तिं लक्षयति यदुक्तमिति। केनचिदन्यथा अस्यार्थ-त्वेनोक्तं वाच्यमन्येनान्यानुत्वेन- यत् योज्यते सा च वक्रोक्तिररिति सामान्यलक्षण-भागस्य संबन्धः। तच्चान्यथा योजनं श्लेषेण कांकारा [काक्वा] संभवतीति।

तथेति। तथाविधोपाधिद्वययोगात् सा वक्रोक्तिर्द्विविधेति विशेषनिर्देशः। श्लेषस्य सभंगाभंगरूपेण द्वैविध्यात्।

क्रमेणोदाहरणद्वयं दर्शयन्नाह **तत्रेति**। **नारीणामिति** अत्र नारीणामिति पदं केनचित् स्त्रीणामित्यर्थे नियोज्यमाना स्त्रीत्वं ते [स्त्रीत्वं बोध्यते] केनचिदुक्ते पदभंगेन न विवृणामित्यने [न अरीणामित्यने] घटयित्वा, अन्य उत्तरमाह **कश्चेतन इति** वामानां प्रतिकूलानां, एवं ददितवध्यैतत [ ] रामानां स्त्रीणामिति कल्पयित्वा दुरहितत्वादित्यादि हितकृत् हितकर्त्ता च्छेत्ता च, अबलानां स्त्रीणां दुर्बला-नाञ्च। बलं सामर्थ्यं, तदभावेन प्रसिद्धार्थो दुर्बलः। बलनामा दैत्यविनाशविख्या-तार्था महेन्द्रश्च।

अत्रोदाहरणेऽपि वामानामित्यारभ्य भङ्गश्लेष संभवेऽपि वैषम्याय पुनरत्रोदा-हरति। [**अहो इति**] अत्र दारुणा ......**रेणेति** विवक्षिते काष्ठेनेति कल्पयित्वाह **त्रिगुणेति**। त्रयो गुणाः सत्वरजस्तमांसि।

नैष्यतीत्यागमनस्य निषेधतात्पर्येण नायिकयोक्तं प्रतिवचने पुनः सख्या काक्वा एष्यत्येवार्थे घटितम्। न चायमर्थालङ्कारः। शब्दार्थयव्यतिरेकानुविधायित्वात् [शब्दार्थयोर्व्यतिरेकानुविधायित्वात्] एवमन्यत्रापि ज्ञेयम्।

इदानीयनकाद्वयपेक्षया [इदानी यत् काव्यापेक्षया] रसानुगुण्यभूयस्त्वात् प्रथम-मनुनि लक्षयिसुस्तत् [प्रथममनुप्रासं लक्षयंस्तत्] सामान्यलक्षणमाह **वर्णेति**।

सामान्यं साल्प्यं चैकस्थानोच्चार्यत्वेन वर्णानां साम्ये श्रुत्यनुप्रासो अनुप्रासविशेषत्वेन परिगृहीतो भवति । यदुक्तं मम साहित्यदर्पणे ।

उच्चार्यत्वामुदेकत्रस्थाने वानुवदादिके ।
सादृश्यं व्यञ्जनस्यैतत् श्रुत्यनुप्रास उच्यते ।। इति ।।
[1][उच्चार्यत्वाद्यदेकत्र स्थाने तालुरदादिके ।
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ।।]

स्वरवैसादृश्येऽपीत्यनेन यमककाव्यव्यवच्छेदकसादृश्याभावे तदभावादपिशब्देन क्वचित् स्वरसाम्यसंभवेऽपि नानुप्रासप्रयोजकत्वं व्यञ्जनानां सादृश्यं न तुर्रामस्यादाविरस्वनानां [?] तत्र वैचित्र्याननुभवात् । नामनिर्वर्त्तित रसादीति । **अयमाशयः**—रसाद्यमगमं [रसाद्यनुगमं] विनाऽनुप्रासस्य नालङ्कारता । यदुक्तं ध्वनिकृता—

[2]शृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धनात् ।
सर्वेस्वेरप्रभेदेषु [सर्वेष्वेव] प्रभेदेषु नानुप्रासः प्रकाशकः ।। इत्यदि ।

तद्भेदानाह च्छेक इति । नियतेति । रसस्वरूपविशेषात्मकमाधुर्यादिगुणव्यञ्जकत्वेन येषां वर्णानां नियम उक्तः, तद्‌गतस्तन्निष्ठो व्यापारो व्यञ्जनाख्यः **वर्तन्ते प्रवर्तन्ते रसप्रतीतिप्रकर्षे वर्णा अनयेति** व्युत्पत्या **वृत्तिरित्यर्थः** । **छेकानुप्रास इति** चायोगव्यवच्छेदपरं नाम । विदग्धप्रयोज्यत्वस्यान्यत्रापि संभवात् ।

इत्यं द्विधा विभक्तयोरनुप्रासयोर्विशेषलक्षणमवतारयति **कि तयोरिति** । **सोऽनुप्रासः अर्थादिति** सामान्यलक्षणे । वर्णपदेन व्यञ्जनस्य विवक्षितत्वात् । **अनेकस्येति** । साकाङ्क्षपदम् । 'वर्णसाम्यमनप्रास' इति सामान्यलक्षणस्थितेन साम्यपदेन **पूरयित्वा विवृणोति सादृश्यमिति** । एवमुक्तसूत्रे । **तत इति** अत्र नकारदकारयोः संयुक्तयोरेकवारं सादृश्यमेवं "गण्डपाण्डुता" मित्यत्रापि णकारदकारयोः ।

एकस्यापीति । अयमर्थः । न केवलमनेकव्यञ्जनस्य द्विबहुकृत्वो वा सादृश्यं **वृत्यनुप्रासः** । कपित्वे [किन्त्वे] कस्यापि किश्वापि [?] शब्दस्य काकाक्षिन्यायेनोभयत्र संबन्धः । तेन न केवलचकारो हेयमित्यादि च । एकस्य व्यञ्जनस्य त्सकृत्सादृश्यं तस्याप्येतद्ग्रन्थकारमते एकव्यञ्जनसादृश्यमध्येऽन्तःपातः । **वृत्यनुप्रास इति** सूत्रस्थपदार्थः ।

---

1. साहित्यदर्पणः प० १०, का० ५ ।
2. ध्वन्यालोकः ।

वैदर्भीत्यादीनामभिनिवेशः तत्तद्देशेषु कविषु प्रायेणोपलंभात् [?] प्रसाद-व्यञ्जककोमलवर्णमयी ओजोव्यञ्जकपरुषप्रायवर्णमयीं गौडी । माधुर्यव्यञ्जमसृण-प्रायवर्णमयी पाञ्चाली ।

शब्दयते ध्वन्यतेऽर्थोनेनेति शब्दः प्रातिपदिकादिः । तदाश्रितोऽनुप्रासविशेषः । त्तः [?] पूर्वोक्तवर्णमात्रवृत्तिव्यतिरेकसूचकः । तात्पर्यमात्रेण नं तु स्वरूपेण अनुस्य भेदे [अनुप्रासभेदे] । एतेनास्य स्वरूपव्यञ्जनसमुदायपौनरुक्तयेऽपि यमकाद्वैलक्ष-ण्यम् । तात्पर्यभेदादेकचनानुपुनरुक्ति दोषः ।

अन्वयेति । पदार्थानामनुयानन्तरमेव भेदप्रतीतेरित्यर्थः ।

यस्येति । अत्रात्येऽर्द्धे [अत्राद्येऽर्द्धे] तुहिनदीधितिर्द्वीदहनः [र्दवदहनः], द्वितीये दवदहनस्तुहिनदीधितिरिति संबन्धः ।

पदस्यापीति । पदानां स इति पूर्वत्रस्थतिः । एवञ्चायं लाटानुप्रासो बहुपद-निष्ठश्चेति द्विधेत्यर्थः ।

वदनमिति । विकलो हीनः । अत्र चन्द्रवाची प्रथमः सुधाकरशब्दो विधेयार्थो द्वितीयस्तदनुवाच्यार्थः [द्वितीयस्तदनुवादार्थः । एवमस्य भेदद्वयमुक्तवा पुनः प्रकारान्तेरेण भेदत्रयमाह **वृत्ताविति** । एकत्र समासोदाहरणम् । शितकरेति भिन्न-समासे, रुचिरविभा विभाकरेति समासासमासयोः । पौरुषकमला कमलेति पौरुषं पुरुषकार एव श्रीर्यस्या इत्यर्थः ।

उपसंहरति **तदेवमिति** । अर्थभिन्नानां अनुद्धारा [अनुप्रासद्वारा] भिन्नाना-मित्यर्थः । **वर्णानामिति** । बहुवचनमविवक्षितम् तेन वर्णद्वयावृत्तावपि यमकम् बोद्धव्यम् ।

क्वचि..........ईश्वराः साधनं विना" इत्यादौ ससुरैकव्यञ्जनावृत्तावप्येत-दिच्छन्ति ।

भिन्नानामनित्यस्यार्थे सतीत्येतद्विना व्याप्तिं दर्शयन् विवृणोति समरेति । समो वपुषि सङ्गत्याघातादीनामपि [?] मन्थुनातिरिक्तो वसो रागायस्य [?] अत्र द्वितीयसमवायस्य निरर्थकत्वमुपलक्षणम् चैतत् द्वयोरप्यनर्थकत्वं यथा-समवतामवतां धुरि स्थित इत्यादौ ।

सेति । नानुप्रासाद्विविनक्ति । **सेति तेनैव क्रमेणे**-त्यनेन एतदलङ्कारप्रयोजकेषु वर्णेषु स्वरादि भेदाभावो सूचितः । किञ्चास्य भिन्नानामित्यनेन लाटानुप्रासाद्विवेकः । पूर्वार्थिपूर्व्या [?] वर्णावृत्तिः । स्थानविशेषेषु यम्यत इति यमकमनुर्थनामन ....मकम् ।

तद्भेदानाहं पादेषु पादभागेषु वर्तनात् यमकमनेकप्रकारमित्यर्थः ।

प्रथमः पादः द्वितीयादाविति । क्वचित् द्वितीयपादस्थाने, क्वचित् तृतीयपाद-स्थाने, क्वचिच्चतुर्थपादस्थाने आवर्तत इति शेषः । एवं द्वितीय इत्यादावपि ज्ञेयम् ।

१. **प्रथमस्त्रिष्वपीतिच** एकः प्रकारः ।

२. तत्र यदि प्रथमद्वितीययोरैक्यें तदा सुखं नाम, [मुखं नाम],

३. प्रथमतृतीययोरैक्ये सदशः,

४. प्रथम चतुर्थयोरावृत्तिर्नाम,

५. द्वितीययोगेर्ग [र्वी]····· द्वितीय चतुर्थयोः सन्दष्टकम्,

६. तृतीयचतुर्थयोर्गुच्छः,

७. प्रथमस्य द्वितीयादिभिरेकत्वैवये पतिरिति सप्त शुद्धाः । मिश्रणे तु मुख-प्रच्छ [पुच्छ] योगे युग्मकम्, (२+६],

गर्भ्वीवृत्तियोगे परिवृत्तिः (५+४) ।

प्रथमो द्वितीये द्वितीयश्चतुर्थ इति। अत्र इति शब्द एकप्रकारद्योतकः । एवमुत्तरत्रापि । इह च पादवृत्तिद्वचनेन पादद्वितीयरूपार्द्धवृत्तेः समुकनाम्नः,

पादचतुष्टयरूपश्लोकावृत्तेश्च महायमकनाम्नश्चेति यमकत्वस्योपग्रह [?] इत्याह अर्धावृत्तिरिति ।

इदानीं पदभागावृत्तिप्रकारानाह **द्विधेति** । **पूर्ववदिति** । समनन्तरदर्शितंपाद-भेदगणना च न [व] धा ····विभक्त पादानाप्यात्यभाग [प्याद्यभाग] नात्यभागानां च भेदगणनायां विंशतिभेदा इत्यर्थः ।

ननु प्रथमपादाद्यभागस्य द्वितीयपादात्य (१) भागे तथा तृतीयचतुर्थपादाद्ययो रावृत्तिः (२) ।

एवं द्वितीयपादाद्यभागस्य तृतीयचतुर्थपादाद्यभागयोः, (३) ।
तृतीयपादाद्यभागस्य चतुर्थपादाद्यभागे । ४
प्रथमपादाद्यभागस्य त्रिष्वपीति सप्त । + ३ = (७)
एवं पुनरेकत्र श्लोके क्वचित् प्रथमपादाद्यभागस्य द्वितीयपादाद्यभागे,
तृतीयपादाद्यभागस्य चतुर्थपादाद्याभागे आवृत्तिः ।
क्वचिच्चैकत्र प्रथमपादाद्यभागस्य चतुर्थपादाद्यभागे [व] (६)
द्वितीयपादाद्यभागस्य तृतीयपादाद्यभाग इति न [च] भेदः ।
तथा आद्यार्द्धभागस्य द्वितीयार्द्धभाग इत्येकः (१०)
एवमेकत्र श्लोकेऽपि ये पादचतुर्थस्याद्यभागस्ते
द्वितींश्लोकस्य पादचतुष्टयस्याद्याद्यभापेष्वित्येकादश भेदाः ।(१०+५११)
एवमन्तिमभागानामपीति द्वाविंशति भेदास्तु । (२१+१=२२)

कथं युक्तं विंशतिभेदा इत्यत आह **श्लोकान्तरे हीति भागावृत्तिः** । श्लोकान्तरे द्ववस्थतया [ह्यव्यवस्थतया] चमत्काराभावात् न प्राचीनैः कुलतेति [गणितेति] भावः । **त्रिखण्ड इति** । पदानां त्रिधा विभागे, चतुःखण्डे चतुर्धाविभागे वञ्चादि-खण्डकन्यानां यं च [?] स्तोकानामक्षराणां दूरस्थितानामावृत्ति········सरत्र चमत्काराधायिनीति तदगणनम् । **एवंगत्येति** । यथायोगं गकल्पनया [गणनया] चमत्कारातिशयाधाने यमकप्रकारा उन्नेयाः ।

प्रथमादीति । [प्रथमेति] प्रथमादिपादानाममन्त्यार्द्धरूपो भागोऽर्द्धस्य वा भागः, द्वितीयादीनां पदानां [पादाना] मंत्यादौ अर्धरूपे भागेऽर्द्धस्य वा भागे यस्य तेन निबध्यत इत्यादीनां प्रकाराणां अनुर्थताया [अन्वर्थतया] आत्मानुगमनस्यानुसरणेन नाम विशेषनिवेशनायां बहुतरप्रकारं यमकमित्यर्थः ।

तेष्वेवात्मानुनामकप्रकारेषु किञ्चिदाह-**अन्तादिकमिति** । **प्रथमादिपादाना-मन्तभागस्य** द्वितीयादिपादानामन्त्यभागेष्वावृत्तावन्तादिकम् ।

तृतीयादिपादानामन्त्यभागस्य तृतीयादिपादान्तभागे आवृत्तौत्वात्यन्तिकम् ।

द्वयोरप्यनयोरेकत्रमिश्रणे समन्वयः ।

एवं प्रथमादिपादमध्यभागस्य, द्वितीयादिपादादि भागयमकमध्यादिकं, **प्रथमा-दिपादाद्यभागस्य** द्वितीयादिमध्ययमने आदिमध्यम् ।

तत्प्रथमादिपादान्त्यभागस्य द्वितीयादि पादपादमध्यवृत्तौ अन्तमध्यप्रथमपादा-दीनां मध्यस्य द्वितीयादिपादान्त्यवृत्तौ मध्यान्तकम् ।

अत्र च द्वयोस्त्रयाणां च मिश्रणे त्रिधा समुच्चय इत्याह—एषामिति [तेषा-मिति ।] एकस्यैव पादस्यादिभागो मध्यभागश्चान्तभागे एवमन्त आदाविति वर्तत इत्याह तस्मिन्नेवेत्यादि भागेष्वित्यन्तम् । एते च भागकलानयात् स्थाननियमेना-वृत्तिप्रकाराः । क्वचित् स्थानानियमेनावृत्तिः यथा—यमवतामवतां धुरि स्थितं इति ।

तत्र प्रथमाक्षरासुग्रमनेनान्त्य पादादिभाग यमनं इत्यादि गमनाममुक-स्यानन्त्यमित्याह [गणनायां यमकस्यानन्त्यमित्याह] अनियतेति चेति । आनयते भागस्थानादि नियम वाहते [?] मन्तर्गडुभूतं गडू तद्रतग ...वदसार भावप्रायः । [इत्यभिप्रायः] ।

तदुक्तं ध्वनिकृता—

यमकादिति वन्वेषु पृथग्यलोऽस्य जायते ।

शक्तस्यापि रसाक्त्वं तस्मादेषां न विद्यते ।। इत्यादि ।

[यमकादिनिबन्धेषु पृथग्यत्नोऽस्य जायते ।

शक्तस्यापि रसेऽङ्गत्वं तस्मादेषां न विद्यते ।।]

अत एव महाकवयोऽयत्र शक्तिप्रदर्शनार्थं पूर्वमहाकविविप्रहानुबोधेन [प्रबन्धा-नुरोधेन मन्तपर्वताप्रि[दि]वर्णनस्थाने कृताभिनिवेशा दृश्यन्ते । तदनुसारेणैवास्माभिः प्रदेशतो [प्रवेशतो] भेदख्यापनं कृतमित्यर्थः । मुख्याख्यं यमकं (२) युग्मको वा वृत्या उदाहृतं भविष्यतीति संदंशमुदाहरति ।

सन्वारीति [सन्नारीति] एवमन्यत्रापि वृत्तिकृदभिप्राय उन्नेयः । सतीनां नारीणां, भरणं पोषणं, यथा तथाभूता स्व मां याति गच्छति । आयतेरायस्तं विधुशेखरं आबाध्य [आराध्य] पृथ्वीं जय । तृतीयपादे सन्ना अतसादं गता अरीणा-मिभाः यत्र तथाभूतो रणो यस्येति विग्रहः । अमायो मायारहितः ।

युग्मकं यथा विनेति । प्रथमपादे—विना यमेन इति पदत्रयं [पदद्वयं ?] द्वितीयपादे विनेति विहगेनेति । पुरुष इति समस्तं पदम् । अयं विना विहगपुरुषः [विहगपुरुषेण] यमेन मानसाच्चत्तात् अरं शीघ्रं अदीयत अखण्ड-यत इति संबन्धः । एनोऽपराधं विना नयता स्वस्थानं गमयता अमखादिना

प्राणभक्षके सुखादिना ऊनयता मारणेन सुखादिहीनं कुर्वंतेति यमस्य विशेषणत्रयम् । महन् उत्सवान् अञ्जन्ति क्षिपन्ति ये दुर्जनाः तन्वोदनशीलाः द्वितीयपादे महो जनो महान्वेति च विहगपुरुस्य विशेषणद्वयम् । यतमानानां यत्नवतां सादमवसादं वाभिददातीति यतमानसादरं यथा स्यादित्यदीयत इति क्रियाविशेषणम् ।

महायमकं यथा—**सत्वेति** । सन्त महान्वा आरं अरेः समूहं. भवतो भावान् अवश्यमनायातुं अबलं दुर्बलं वितितावरं दीर्घाक्रिन्द्रं, सर्वदा रणं अनैषीत् प्रापयामास । अानसमावान [अनलसमावान्] अपि तु त्वरितं गच्छन् अस्थीनि तस्यति [?] उत्क्षीणोतीत्यस्थितः । अन्धसंतस्यचाधातो[अत्वसन्तस्यचाघातो] सावित विशेषदीर्घः । नास्ति अवश्यं नियतं सत्वेनारभेवमः अवलम्बितमाश्रितं नावरं [तारवम्] तुरुवणं येन इत्यावविशेषणं सर्वेषा दारणो यो मानश्चिन्तोन्वतिः [?] तदेषणशीलः दाराननेन समं स्थितं स्थितिर्थस्य ।

पादान्त्यार्द्धावृत्तिमुदाहरति **अनन्तेति** । यां देवीं, वेधा विधाता तन्वतो [मन्वतो] नवे दया च प्रणत मानवे दयां कृपां कुरुते, आत्यन्तगमकव्यपेतं यथा पदानत [यदानत] इति । यस्यामानतः प्रणतः अयश्रुभावहविर्धेति [अयं शुभावहविधेति] वि·····वं रयाति [न याति] न गच्छति . अयमेषः शिवं शुभं ईहितं चेष्टितं यस्याः शिवे भगवति हि तामनुकूलां स्मरेण कामेन अभितां [अमितां] अपरिच्छिन्नां स्मरामि तां देवीम् ।

अन्तादिकयुक्तमात्यन्तव्यपेतं यथा—**सरस्वतीति** । सरस्वती वागीश्वरीति संबोधनपदम् । तृतीयपादगतं सरस्वतीतिपदं मुनि [?] सुतरामतिशयेन प्रसाद प्रसन्नातां [कुरु] यच्छ । मे मम चित्तसरस्त्रति चित्तसमुद्रे स्थितिं कुरुक्षेत्रं शरीरमेव कुरुक्षेत्रं देशविशेषः । तत्र सरस्वती नदीविशेपरूपे युगके [युग्मके] रीत्या [?] पादार्द्धपरिवृत्ता ।

वात्यन्तदिकसमुच्चये [अन्त्यादिकसमुच्चये] यथा—**ससारसेति** । नवा नूतना शरत् दर्पेण दर्पविशिष्टेन कन्दर्पेण साकं ससार ससार सारसैः पक्षिभि; सहिता शरं काण्डं बिभ्राणा दधती नवालि अनांसि शकदानि [.?] यस्यां वीनां पक्षिणां भ्राणे षमणेत [भ्रमणे] अतस्तु वस्वधामहित स्वराजनीरागमनाद्ध्वांश्च [?] वर्षाश्च । स्वरुचितरवाहनवाहवपुष [?] स्त च हरेश्चोपमा घटत इत्यादौ शब्दयोर्घटपटयोर्विनैकप्रयत्वेन निरस्यन्तो नोपपद्यते तयोरेकारत्वेन तथांगीकारे एक एव कुलालः एकाबगवं [एकवारं] घटपटमेकया सामग्र्या निष्पादयेत् । नन्वेवं तथासति भेदव्यवहारोच्छेदप्रसङ्गात् ।

तदुक्तं–अयमेव हि भेदहेतुश्च यद्विरुद्धधर्माध्यासः कारणभेदश्चेति ।

किञ्च—यद्युभयानुप्रतिपादनसमीहया उक्तः एकदा शब्दः यस्योच्चारण-संभवस्तदा घटसहस्रं चिकीर्षुः कुलालोऽपि एकदा नाधिगहयेत् ।

तदुक्तमाचार्यश्रीमन्वद्योतकरचरणैः [श्रीमदुद्योतकरचरणः ?] "क्रमबुद्धित्वाद्वाच" इति । तेनैकत्रैव शब्दे नानाविषयानामभिधानं स्वसुसामग्रीवशेन [?] क्रमशः तर्ज्जीवनमिति वादिनां मतमेवाश्रयितुमुचितम् । किन्त्वत्र मते प्रथमं विरुद्धाया द्वितीयाभिधाया उज्जीवनमनुपपन्नमिति द्वितीयाभिधाननाम्ना जनस्थाने भ्रान्तमित्यादावित्रवात्रापि व्यञ्जनैव वृत्तिपादिश्यते । एवं ध्वनितं द्वे प्रकरणादिनियम स्थले । तस्मादेव शब्दात् उच्चारणादिसामग्रीसहकृतात् व्यापारान्तरेण सभङ्गाभङ्ग शब्दान्तरलब्धार्थप्रतीतिः [?] । यत्र तु "येन ध्वस्तेत्यादौ प्रकरणादिनियमो नास्ति तत्र द्वयोरर्थयोरभिधानसंशयः । यत्र तु शब्दपरिवृत्तावनुहानिः [र्थहानि.] तत्र शब्दशक्तेर्मूलत्वेन शब्दश्लेषः । यत्र शब्दपरिवर्तनेऽपि तदर्थक्षतिस्तत्रार्थप्रभामात्र प्रत्येव शब्दोपयोगादर्थश्लेषता ।

येत्वाहुः "प्रतिप्रसूते शब्द. शब्दान्तर' मिति । तदयुक्त प्रतिप्रसूतशब्दाननुभवात् अनर्थभूतशब्दनानुप्रतीतौ [शब्देनाप्रतीतौ] चातिप्रसङ्गात्, भिन्नवाचकाद्भिन्नवाच्योत्पतिनियमाभावाच्च ।

एवं वर्णाङ्गत्वेन श्लेषस्य प्राचीनास्वरोधेन [प्राचीनानुरोधेन] व्यवहार. । तद्वस्तु यत्र येन ध्वस्तेत्यादौ, जनस्थान इत्यादावपि व्यञ्जनानङ्गीकारप्रसङ्गः । "कृदिज्ञेषु च वक्षती त्यादौ [हृदि ज्ञेषु वक्ष्यतीत्यादौ] व्यथाद्वयेषामपि [?] मेदिनीभूतमित्यादौ स्वार्थस्य प्रथमं बुद्धयारोहः, तत्राभिधा अन्यत्र व्यञ्जना ।

एवमेव हि तुल्योगितालङ्कारे द्वयोरपि प्रकृतयोरेकधर्माभिसम्बन्धे वैवक्षिकमुपमेयभावमङ्गीकुर्वते प्राच्याः ।

न खलु तत्र द्वयोर्ब [हूनां] वा कस्यचिदपमेयत्वं कस्यचिदुपमानत्वं निर्द्धारयितुं शक्यम् । किन्तु यदा यस्य प्रथमं बुद्धया वो हस्तस्योपमेयता [बुद्धयात्रगतस्योपमेयता] अन्यस्योपमानतेति सङ्गतिः ।

किञ्चात्रैवमेतमेतत्प्रकृतो वर्णादिगतत्वेनाष्टविधत्वं श्लेषस्यासमीचीनमिति **चण्डिदासपण्तिाना** [मुक्ति] रसत् । तथाहि ।

वर्णादिगतत्वेन वृत्तिकृता यान्युदाहरणानि [प्रस्तुतानि] तेष्वेव केषाञ्चिद्व्यञ्जनवृत्तिविषयत्वं, केषाञ्चि··· श्लेषविषयत्व, न तु वर्णादिगतत्वेन श्लेषस्याष्टविधत्वं नास्ति ।

तथावणीभूते विधो सूचितरे भस्मानुलेपनश्मशाने च ।

चिरावासस्या·····न मुरता तथा [?] इत्यत्र प्रकरणाभावात् किं महादेवो वाच्य उत कश्चि····· विद्रोवेति सन्देहः । तेनात्र विधूविधिशब्दयोरुकारेकारयो र्नौकावरूपत्वा [रेकरूपत्वा] द्वस्तुश्लेषः । "येन ध्वस्तेत्यादौ च विभक्तिसमासयोर्वैलक्षण्ये न [वैलक्षण्येन] पदश्लेषः । "योऽसकृत्परगोत्राणाम्" इत्यत्र लिङ्गश्लेषः ।

महेत्यादि भीमानुयपाद्ययोर्न [?] कृता प्रकृतत्वं तेन ध्वनिविषयत्वाभावात् भःषाश्लेषः ।

शतकोटिदतामित्यत ददातिद्वयो [?] प्रत्ययोश्च श्लेषः । स्यार्थद्विभावीरूपाक्षपदे [?] प्रसेवणादित्यत्र किमहं नन्दितानन्दकः स्यामिति कस्यचिद्भक्तस्य वचनं उत कस्यचिद्भक्तस्यानन्दितानन्दितागमनविशेषत्वं स्यादिति वचनमिति सन्देहः । तेन त्रस्यां [?] स्यादिति प्रत्ययश्लेषः । सर्वस्वं हरेत्यत्र चार्थद्वयस्य संदेहास्पदत्वात् विभक्तिश्लेषः "दधते श्लेस्य [?] परां शोभामहो मधुरता हत" इत्यत्र·····पप्रत्ययकप्रत्ययोः 'अवधूत' इत्यत्र धाधातोः पक्षे बहुवचनं, पक्षे च धाधातोरेकवचनमिति वचनश्लेषः ।

तदेवमभिधाद्वयसन्देहप्रयोजनश्लेषालङ्कारविषयोऽविध [रिह] वर्णादिश्लेषस्य सद्भावस्य दर्शनादविचार्य प्राचीनावक्षेपकारीति उपजीव्यैःसह अलं वहुना विवादेन ।

नन्वेवं येन ध्वस्तेत्यादावपि यस्यार्थस्य प्रथमं बुद्ध्यारोहः स वाच्योऽस्तु, अपरस्तु, व्यंग्योऽस्तु । किंत्वत्रापि श्लेषालङ्कारकल्पनयेति चेन्नैवम् । इह हि द्वयोरर्थयोः संशयज्ञानविषयत्वात् अनिर्धारितत्वम् । 'भद्रार्थत' [भद्रात्मन] इत्यादौ, हृदि ज्ञेषु वक्ष्यतीत्यादौ च निर्धारितत्वात् वृत्तिद्वयकल्पनाभावेऽसङ्गतिः ।

यत्तु चण्डिदासपण्डितैरुक्त "व्यथा द्वयेषा" मित्यादौ उभयाभिधानं वेति तत् संध्यावन्दनवेलायां युक्ताहर्मिति मन्यते । खण्डनवेलायां दण्डमुद्यस्य [म्य] धावतीत्याभाणकमनुकरोति क्वचिदभिधा द्वयाङ्गीकारे भद्रार्थेन [भद्रात्मन] इत्यादावावपि विसपदाद्भमभिधात्व येन ।

ननु सभङ्गश्लेषादौ शब्दयोर्भिन्नप्रयत्नोच्चार्यत्वात् कथं तथाविध विच्छित्ति-विशेषस्यालङ्कारत्वमित्यत आह **काव्यमार्ग इति**। "स्वरस्य शब्दभेदकतानङ्गी-क्रियत" इति नये एवं विधानीत्यङ्गीकारे चेत्यर्थः।

अक्षरादिभिरिति। सूत्रपदस्याक्षरशब्दार्थोऽस्तु इति। आदिशब्दसंगृहीतानि पदानि विभक्त्यादियोगेन वर्णानामेकारविकारत्वे [वर्णानामेकारोकारत्वे] वर्णश्ले-षता। यथोदाहृते—"अलङ्कारः शङ्केत्यादौ। **विधाविति**। विधौ चन्द्रे विधातरि वा। अत्र विधुविधिशब्दोत्तरस्थितयोरुकारेकारयो. सप्तमीविभक्तियोगादौकाररूप [?] एकारोरिकारः।

यत्र पदभंगे विभक्तिसाम्यवैलक्षण्यप्रतीतिः स पदश्लेषः। यथा—पृथ्वीति [पृथु+इति]। अस्यार्थः प्रागेव व्याख्यातः। विभक्त्यादिवैलक्षण्याभावे च प्रकृति-श्लेषः यथा हृदिज्ञेवुच वक्ष्यतीत्यादौ. स्त्रीनपुंसकाद्यैकलिङ्गश्लेषः यथा तटीति हृधातोः [कृधातोः] परस्मैपदे द्विवचन हितं श्रेगः, ईहितं वाञ्छितम्। कुरुतामिति [**भक्तीति**] पक्वाः [प्रह्वाः] प्रवणाः, मात्मानेपदे एकवचनञ्च।

अत्र प्रणयिनीत्यादौ नपुंसकलिङ्गद्विवचनस्त्रीलिङ्गैकवचनयो रयोक्त्या [एको-क्त्या] द्विवचनश्लेषोऽपीत्याह **एष इति**। एवं भाषाश्लेषादुदाहृतौ पदादिश्लेष-योगो ज्ञेयः।

एकत्वानेकभाषासङ्गतौ भाषाश्लेषो यथा **महदे इति**। महदे उत्सवदेहे, **उमे** पार्वति मे म [मे मम] आमाहरणे [आगमाहरणे] विद्यादाने, तं समागम [समासङ्गं] समासक्ति अव रक्ष स्थिरीकुर्वित्यर्थः। स्वरसंधमिति [**सुरसंधम्मे इति**। **सुरैर्देवैः**, संधा संधानम्, येन विद्यारम्भस्य स्वर्गव्यापिहेतुत्वात्, अवसरे; बहुसरणं बहुप्रसा-रितम्, चित्तमोहं चित्तभ्रमं, हर अपनयेति संस्कृते।

प्राकृते तु मह मम, मह्यमित्यर्थे चतुर्थे षष्ठीं। देहि, रसं धर्मे तमवसं तमोवशां आसं आशां, समागमात् [संगमागम्] संसारात्, धनादिगृहगमागमाभ्यां, विशी-ष्टार्था इत लः [?] हरवधूपवणं तं [त्वं] चित्तमोहः अपसरतु मे महसा [महदा] मोहशब्दात् प्राकृतरसात् [प्राकृतवशात्] लिङ्गविपर्ययः।

यस्तु चण्डिदासपण्डितैः—

"चारसमीचणरमणे हरिणकलङ्कं किरलावली सविलासा" इत्यादि **भाषाश्लेषे**। विभक्त्यादिवैलक्षण्याभावे च प्रकृतिश्लेषः। यथा 'हृदि ज्ञेषु च वक्ष्यति' इत्यादौ।

उदाहृतं तदयुक्तं. अनुद्वयाभावात् । अत एव मम साहित्यदर्पणे तथाविधोदाहरणे शब्दैरेकविधैरेव भाषास्वविद्यास्वपि [?] वाक्यं यत्र भवेत्सोऽयं भाषासम इतीष्यतीति भिन्नोऽलङ्कारः उक्तः ।

यत्र प्रत्यक्षादिभेदाभावे भिन्नप्रकृतिकानां पदानां सारूप्यं स प्रकृतिश्लेषः । यथा **अयमिति** । अत्र साधाचरिष्यति वदिष्यतीति चरहिवच्छोः [?] सामर्थ्यादित्यत्र चकारत्वेन प्रत्ययद्वारा पदसारूप्यम् ।

प्रत्ययश्लेषो यथा [रजनीति] पादपद्मावलोक एव । क्षण उत्सवस्तस्य समवाये प्रथमाः [प्रमथाः] शिवगणाः, अहमुचितकविः [अहमुचितरुचिः] संदात्तानंन्दकः स्यां तथा सति समनन्दितानन्दित्वं नन्दिनान्या गणनैकत्वं स्यादिति वा । अत्र स्यां स्यादिति च प्रत्यययोः संधिवदैक्यरूप्यम् । नन्दितेति च तृचि तानि चकरूपं सुप्तिङोः सारूप्यम् ।

विभक्तिश्लेषो यथा **सर्वस्वमित्यादि** । हे हर सदाशिव त्वं नन्दिनाम्ना गणेन एकत्वं [लब्ध्वा] सर्वश्च [सर्वस्य] सर्वस्वं भवस्य संसारस्य च्छेदे तत्परः । यतः तन्ववर्तं [तनुवर्तनम्] शरीरवृत्तिं नयोपकारयोः सांमुख्यं । आयासा [आयासी] तयेकोऽर्थः ।

त्वं सर्वस्य सर्वस्वं हर अर्पय, च्छेदे तत्परो भव उपकारसांमुख्यं नय अपनय । उपकारसंमुखो भवेत्यर्थः । वर्तनं वृत्तिमायासि । खेदयुक्तं तत्वं विस्तारय ।

अस्य च [अत्र च] स्वरन्ततिङन्तत्वेन प्रत्ययान्तरसाध्य चमत्कारविशेषाधानात् प्रत्ययश्लेषेमगना [गणना] ।

न केवलमेव प्रकृतिप्रत्ययादीनां भिन्नत्वेऽष्टौ प्रकाराः श्लेषस्य । तेषामभावेऽपि नवमश्च प्रकार इत्याह **भेदाभावादिति** । भेदाभावात् पक्षद्वयेऽपि सहजसारूप्यात् । **अपिरिति** । अत्र समुच्चयार्थोऽपिशब्दभिन्नक्रमः । सूत्रे नवलोऽपीति [नवमोऽपीति] क्रमभेदेन योजनीय इत्यर्थः ।

परगोत्राणां शत्रुवंशानां उत्तममौलानाञ्च [उत्तमकुलानाञ्च] पक्षच्छेदे सहायनाशे, क्षणेनाविलम्बेन क्षमः पक्षाणां पतत्राणां वनरूपे [?] उत्सवेन संमतश्च शतं कोटिशश्च ददाति वितरति । शतकोटिना वज्रेण द्यतीति च शतकोटिदः । विबुधानां पण्डितानां देवानाञ्च । प्रकृतिश्लेषे रहिवच्योः [?] प्रकृत्योरन्यर्थाभावः एवं प्रत्ययादिश्लेषेऽपि ।

इह तु परगोत्रादिशब्दानामर्थद्वयप्रतिपादनेऽपि समानरूपता स्वाभाविकी। गोत्रशब्दे तु लिङ्गभेदेऽपि उत्कटरूपविपर्यासाभावा नुक्षतिः [न क्षतिः]। अस्य च भेदस्य प्रत्ययांशस्य च भेदात् प्रकृतिश्लेषेनापि गतार्थत्वेनास्यास्माभिः **साहित्यदर्पणे** पृथग्लक्षणं कृतम्। अस्य च ग्रन्थकारस्य गोत्रादिशब्दानां राजेन्द्रोभयपक्षसारूप्यं सहनमित्येव यथाकथञ्चिद्भेदानिर्देशोऽभिमतः।

वाच्यौ सन्दिग्धाभिधेयभावौ। एतेन ध्वनिव्यवच्छेदः। इहये सभङ्गः शब्दश्लेषः, अभंगश्चार्थश्लेष इत्याचक्षते, द्वावप्यलङ्कारमध्ये लक्षयन्ति। अस्य चालङ्कारान्तर-विविक्तविषयतयासंभवात् विद्यमानेष्वलङ्कारान्तरेष्वपक्षत्वेन [?] तद्वारा बोध-कतया गतेनैव व्यपदेशः, तत्पक्षानुपन्यस्य दूषयति नन्विति।

अवितम [स्वरितः] उदात्तादिमिश्रणकरः तद्गुणोऽवधर्मः स्वरविशेषः [तद्-गुणो वर्णधर्मः स्वरविशेषः] तद्भेदाद्भिन्नप्रयत्नोच्चार्याणां स्वरभेदस्य प्रयत्नभेदसा-ध्यत्वात् अलङ्कारान्तरस्य प्रतिभा विच्छित्तिः, हृदि स्थिता वा उत्पत्तेर्निर्वाहस्य हेतुर्यस्येति विग्रहः। यथासंख्यं शब्दयोर्जतुकाष्ठन्यायेन योगादर्थश्लेषः। अनयोरेकत्र शब्दे एकवृन्तगतफलद्वयन्यायेन श्लिष्टत्वात्।

सिद्धान्तमाह **उच्यत इति**। कष्टत्वं श्रुतिकटुवा गाढत्वं बन्धदैर्घ्यं व्यर्थमपुष्टा-र्थत्वं पौनरुक्त्यं वा प्रौढतः शब्दैः प्रागुक्तरीत्या गुणत्वेनाङ्गीकृतौ शब्दार्थौ, अनुविधा-यित्वात् तदधींनस्यान्वयव्यतिरेकानुविधायित्वात्।

स्वयञ्चेति। न केवलं सा गौरी तथाविधस्य हि मात्रैः स्वतास्वरं[स्वरितस्वरं] चैवं विधेत्यर्थः। भास्वद्भ्यां कान्तिमद्भ्यां कराभ्यां, भास्वतः सूर्यस्य करैः रश्मिभिः आस्वापे दुरापे, फले, लुब्धानामोहितं वाञ्छितं अस्वापेन अस्वपलेन यत् फलं तत्र जले हितं वाञ्छितं वा।

सुवर्णादिप्रकर्षापकर्षसूचिकाशलाका तुलाकोटिः। अत्र स्तोकादिस्थाने, मूल्या-दिन्निवेश पिनद्धार्थताहानिः। स्वयं चेत्यादौ तु सुतासुतादिस्थाने कान्तिमदादिति तु न तथेत्यर्थः।

अधुनालङ्कारान्तरबाधकत्वमस्य निरस्यन्नाह **नचेति**। अयं [?] स्वयं चेत्यादौ स्तोकेनेत्यादौ चानुभूयमानो विच्छित्तिविशेषः।

उपमेत्यादौ श्लेषेत्यादौ पूर्ववद्बहुव्रीहिः। एवं सर्वत्रैवंविधे ज्ञेयम्। अत्र श्लेष-साम्यनिर्वाहकता न तु साम्यस्य तन्निर्वाहकतेत्युपमाया एवाङ्गित्वेन व्यपदेशो भवितुं युक्तः। प्रधानेन व्यपदेशा भवन्तीत्युक्तनयात्।

ननु शब्दहेतुकस्य साम्यस्य वास्तवत्वाभावाद्रपि तत्कथमुपमेत्याह तथाहीति। कमलमिवेत्यादौ मनोज्ञत्वगुणसाम्यं मुखं चन्द्र इव शोभत इत्यत्र क्रियासाम्यं निर्द्धति [निर्द्धारिते] वृषभ इव तृप्त इत्यत्रोभयसाम्यम्।

सकलकलं कोलाहलध्वनिभिः सहितञ्च। आचार्यसम्मतिमाह तदुक्तमिति [तथाह्युक्तमिति ?] इह शब्दालङ्कारमध्ये, किं च [किन्तु] यदि शब्दसाम्ये सा नास्ति कथं "स्वयं चेत्यादौ पूर्वपक्षिणा बाध्यभूतोऽयमङ्गीक्रियत इत्यादि प्रपञ्चित-मस्मत्साहित्यदर्पणे पूर्णोपमाया इत्यादेः।

पूर्णोपमाया इत्यादि। अयमाशयः। यद्यपि सकलकलेत्यादौ शब्दश्लेषविषये नोपमा। कमलमिवमुखं मनोज्ञमित्यादौ मनोज्ञत्वादिधर्मस्य प्रतिसंबन्धि भेदादनु-श्लेविषयेऽपि [अर्थश्लेषविषयेऽपि] सा न स्यात्। तेन को नाम पूर्णोपमाया विषय इति विषयः स्थादिति।

न चैवं श्लेपरूपदेशस्य सर्वत्रैव भाव इत्याह। अत्र अत्यर्थं, पाता रक्षिता अधोत्तरणं च आशानां प्रत्याशानां दिशां च, चामरस्य व्यजनस्य मरुत्पवनस्य च समुच्चये, अमरमरुतां देववायूनाम्, अमराणां अमररहितानां देवानाञ्च।

यद्यपि पातालमित्यादौ व्यापकं विद्यते तथापि तस्य व्यंग्यत्वादत्र ग्रन्थकृता श्लेषस्यालङ्कारान्तरविविक्ततयाऽवस्थितिरुक्ता। काव्यालङ्कारापेक्षयैव हि प्रस्तुत-विचारप्रवृत्तिः।

यद्वा अत्राभिव्यक्तस्यापि रूपकस्य श्लेषगुणीभावे श्लेषस्य मुख्यता [अमुख्यता] निर्विवादेति भावः।

वस्तुतस्त्वत्र पातालत्वादिरूपणस्य राज्ञो लोकत्रयात्मकत्वरूपणहेतुत्वात् श्लिष्टशब्दनिबन्धनं परम्परितरूपकमेव।

यत्र तु "येन ध्वस्तेत्यादौ द्वयोरर्थयोर्वाच्चत्वे नियमः। संपष्ट [सुस्पष्ट] एव श्लेषविविक्तो विषयः। न च तत्र तुल्ययोगिता तस्यां द्वयोरर्थयोर्वाच्यत्वनियमा-भावादिति विज्ञेयम् मम साहित्यदर्पणात्। द्वयोरुपमानक्षणयोगे स्वयं च पल्लवे-त्यादावित्यादावित्यर्थः।

ननु पूर्वं श्लेषप्रतिभोपमेत्युक्तं तत्कथं सङ्कर इत्युच्यते इत्याह उपपत्तीति। अङ्गाङ्गिभावसंकरे एकस्याङ्गत्वमेकस्याङ्गित्वम्। यस्य चाङ्गित्वं तत्वा व व्यपदेशः [तत्वेन व्यपदेश] तच्चात्र युक्तिमुखेनोपमायामेव व्यवतिष्ठत इति तन्मुखेन व्यपदेश,

एव । सर्वं श्लेषप्रतिभोत्पत्तिहेतुरूपमेवेत्यनेनोक्त इति न किञ्चिदनुपपन्नमिति भावः। अत्र च हेतुं पूर्वोक्तमेव नेशतः [अंशतः] स्मारयति अन्यथेति ।

न केवलमुपमाविषयश्लेषस्य वाच्यत्वं किन्त्वलङ्काराणामपीति दर्शयति नचेति । अप्सु प्रतिबिम्बतः इन्दुः अबिन्दः गणन्तो [गलन्तो] लावण्यबिन्दवो यस्यः । अत्र गललंब्रत्प्रेक्षा [गलल्लावण्योत्प्रेक्षा] गर्ब्भाकारात् [गर्भाकारात्] ।

एवञ्च या चाबिन्दसुन्दरी तस्याः कथं विद्धं [विरुद्धं] गगनमिति [निरोधाभासः । उपपत्तिमानक्षत्रेति । [?] द्वितीयस्य विरुद्धस्य यथा भासनं विश्रान्तिः। प्ररोहः श्लेषप्रतीतेनि तिर्यं [यत्] पदं, समासे लिङ्गासङ्गतेः । बंशं कुलं रेणुश्च [वेणुश्च] । अत्रैतन्मम रूपकम् । परम्परितं एकदेशाविवर्तयितुमतान्तरमाश्रित्योक्तं श्लोकः कीर्तिः यस्य च [सः] अत्र श्लेषव्यतिरेकः ।

अनुरागो अनुगतं लौहित्यमासक्तिश्च । अचलं शैलं निश्चलश्च । अत्र समासोक्तिः ।

अहीनां नागानामोनं स्वामिनञ्च । द्वितीये पक्षे होनं धनुषोन्मूलनप्रमाणं विषमा दुर्दशा अस्थिरता च, दृष्टिः चक्षुस्तव्द्यापारद्धा अच्युतो नारायणः अनिर्गतश्च । लक्ष्यं शख्य भूतं त्रिगुरदैस्थम् सैन्यसंख्याविशेषः । अत्र विरोधः ।

इदानीं प्रभातसन्ध्रेरित्यादौ [प्रभातसन्ध्येनेत्यादौ] सभङ्गस्यार्थालङ्कारप्रकरणे लक्षणस्य [लक्षितस्य] स्वयं चेत्यादौ अभङ्गस्यानुश्लेषविषयताया अयुक्तां पुनर्युक्तन्तरैर्द्रढयति **शब्देति** । वैचित्र्यं लोकोत्तरविच्छित्तिः । यत्र शब्दोऽर्थो वा । प्रतिभा [नवनोन्मेषाशालिनी] नवनवोमधोल्लेखशालिनी बुद्धिः तस्याः संरस्तः [संरंभः] सरभसप्रतीतिवेशः, तस्य गोचरो विषयः, तत्र शब्देऽर्थेवा **भूमिराश्रयः** । एवञ्चाशब्द एव वैचित्यम् इत्यस्य शब्दालङ्कारत्वमेव वैचित्यमेवालङ्कारः । यो हि यदाश्रितः स तदलङ्कार इति प्रत्यक्षाङ्गीकृतादपि न्यायादिति भावः ।

नन्वेवं विधस्य वैचित्यस्यार्यानिनुसंधानादेवोपलंभादस्यालङ्कारत्वमित्याशङ्क्य परिहरति । मुखे प्रेक्षित्वं तत्म [तदनु] संधानगम्यवैचित्ययुक्तत्वं अनुप्रासादीनामर्थमुखप्रेक्षित्वे युक्तिमाह **रसादीति** । न **चैवमलङ्कारे**ष्वेवातिप्रसङ्गः । अपि तर्हि गुणादारपीत्याह]गुणादयोऽपीत्याह] **शब्देति** । शब्दस्य गुणः परोक्ताः श्लेषप्रसादादयः ।

यच्चोक्तमेकप्रयत्नोच्चार्यत्वेऽनुश्लेषो [अर्थश्लेषो] ऽन्यत्र तु शब्दश्लेष इति तत्राह **विधाविति** । शब्दभेदे भवतापि शब्दश्लेषतयाङ्गीकृते । **एवमाद्वीति** । उक्तप्रकारा-

दन्यदपि सभंगाभंगयोर्द्वयोरपि शब्दश्लेषत्वेऽलङ्कारान्तराणां च श्लेषबाध्यते च युक्तिजातम् ।

संप्रति रसानुपकारकमपि करितिस्तेषु [कविभिस्तेषु] प्रसन्तेषु [प्रसक्तेषु] शक्तिप्रदर्शनार्थमुपनिबद्धत्वात् प्राचीनैरेवालङ्कारमध्ये लक्षितं चित्रं निरूपयति **तच्चित्रमिति** अस्य चालङ्कारतायां तथाविधकविनैपुण्यात्रिष्कारवशेन विस्मयावेशां यथाकथंचिद्वीजं, सन्निवेशः सम्यगभिमतनिर्वाहौपयिकतया वचनं न्यस्ता इत्यतः पूर्वं **भूम्यादाविति** शेषः [?] । आकारं सदृशं संस्थानं, उल्लासयन्ति प्रकाशयन्ति, **कष्टं** क्लेशनिर्वाह्यम् । नीरसतया सहृदयानामनावर्ज्जकम् । मारक्षय कामस्यारिः परमेश्वरः, शक्रः इन्द्रः, रामो हलायुधादि, इभमुखो गणेशः एभिः सा सारसदृशवंह-सासारं यथा स्यात्तया नित्मारब्धः स्तवो यस्यास्तेषां स्तुरता [?] मार्ति पीडा ।

नतानां भक्तानां माता श्रियां संपादाम्, संघटुः [संघट्टः] सम्मेलनस्थानं, बाधिता संभसा निरुद्धोद्वेगा, मान्या पूज्या अबलानां नारीणां [?] सीमा परमोत्कर्षः, शं कल्याणं, [आदिमा] आदिजा आदिशक्तिः, अत्रिजेति क्वचित्पाठः ।

अनेन श्लोकद्वयेन खङ्गः प्रस्तार्थते ।

डाडिकान्तरे [?] माशब्दं विन्यस्य तिर्भगधः क्रमेण वाशब्दादि [राशब्दादि हकारान्त] वर्णचतुर्दशकम् । न्यसेदित्येकाधारततः । स्येति [सेति] शिखायां श्लिष्टः । ततस्तिर्यगूर्ध्वं क्रमेण वाशब्दादि [राशब्दादि] यान्तं [मान्तं] वर्णचतुर्दशकम् विन्य-स्यापरां पूर्यादित्येषा पट्टिका । माशब्दस्तु पूर्वं माशब्दप्रविष्टः । एवमपरमपि माशब्द तत्रैव प्रविष्टं कल्पयित्वा तस्य तस्य दक्षिणपार्श्वे तिर्यक्क्रमेणेत्यादि ह इत्यन्तं वर्णसप्तकं न्यस्य वामपार्श्वे तिर्यग्विलोमेन श्रीकरादि एकारान्तं वर्णसप्तकं न्यस्येत् । माशब्दस्तु पूर्ववदित्येका डाडिका ततोऽपरं माकारान्तं कल्पयित्वा त्वरु-मध्ये माशब्दं विन्यस्य तद्दक्षिणे शकारादि गमित्यन्तं [?] वर्णचतुष्टयं वामतो मे दिश्यादिति लिखेत् । माशब्दः पूर्वक एव इति त्सरुः । अन्तिमवर्णाभ्यां गं च न कृमिति खड्गनिष्पत्तिः ।

सवलामद्धो [सरलाबद्धिति] सरं लाति ददातीति रेति [?] प्राक्तान्तशरद्वि-शेषणम् । तब्दलारंभो महारंभः । तरलानां अलिबलानां भ्रमरविदानां [भ्रमरवृ-न्दानां] लाखो यत्र । वारणा [वारला] बहुला हंसी प्रायाकरं लान्तीति कबला [करला] राजा च स्त्रे कवलाऽमन्दा उज्ज्योगिना यत्र । बहुले कृष्णपक्षेऽपि नक्षत्रा-दिति रमणा [?] । अत्र पादचतुष्टयेनाधः क्रमेण पंक्तिचतुष्टये कृते प्रथमद्वितीय-तृतीयानां यथाक्रमं प्रथमद्वितीय तृतीयानां वर्णानां चतुर्थपादस्य चतुर्थपञ्चमयोः,

तृतीय-द्वितीय प्रथमपादानां च षष्ठसप्तमाष्टमानां ग्रहणे प्रथमपादः। द्वितीयात् प्रथमद्वितीयतृतीयौ द्वितीयतृतीयाभ्यां च चतुर्थम्। चतुर्थात् द्वितीयौ तृतीयाच्च प्रथमं गृहीत्वा द्वितीयः पादः। तृतीयादष्टमं प्रथमात् सप्तमषष्ठौ, द्वितीयतृतीयाभ्यां पञ्चमं, चतुर्थात् षष्ठसप्तमौ द्वितीयादष्टमं गृहीत्वा तृतीयः पादः।

चतुर्थतृतीयद्वितीयेभ्यः प्रथमद्वितीयतृतीयादि, प्रथमाच्चतुर्थपञ्चमौ, तृतीय-द्वितीयचतुर्थेभ्यः षष्ठसप्तमाष्टमाद्यक्षराणि गृहीत्वा तुरीयः पादः इति प्रस्तावे [प्रस्तरे] खरजसिद्धिः [मुरजसिद्धिः]।

हे प्रतिभासार वादे रसेनाभतो हतां। अविभा अशोभा यस्यां सा भारितार्था [भावितात्मा] एकाग्रीकृतहृदया, शुभा शोभना, देवाभा देवसदृशी। बत विस्मये। तव सभा भासते।

अत्र कर्णिकायां भाशब्दं विन्यस्य अपराक्षरद्वयं दत्वा दिशा प्रविश्य निर्गम्य च विदिशा प्रविश्य दिशा नि····· मप्रवेशौ। ततो विदिशं निर्गम्य प्रथमदिशा प्रवेशेऽष्टदलपद्मप्रस्तारः।

हे सार रसासार, उत्कृष्टस्याभिलाषस्य वेगवृष्टे, आयताक्ष दीर्घनयन, सा तं मुखं, अयः अवात अचपल अतक्षमतानुकृतिरासीद ददांसीत्यतक्षरतव स्त्वतं-क्षरसारसारसाभूः। अत साऽनुपक्षे पातु अत आयः धनागमो यैः तानस्यति नाशयतीति। क्षतायसा। इह सर्वतोभद्रे प्रतिपादं प्रतिलोमेऽपि स एव पाठः। अधः क्रमेण च पंक्तिचतुष्टये कृतो अबोधः क्रमेण पाठे प्रथमादि प्रथमैरुपर्युपरि परिपाठे, तुर्याद्यमैः प्रथमपादः। एवं द्वितीयसप्तमे द्वितीयतृतीयषष्ठे तृतीयचतुर्थपञ्चमैस्तुर्यः इत्यादि वैचित्र्यम्।

अत्र प्रतिपादं वर्णचतुष्टयतया ध उपरि क्रमेणावृत्ताववर्द्धभमोऽपि अनेके चक्रतुरगगजादिबन्धा न काव्यस्वरूपतां दधाति नीरसत्वादिति भावः।

संप्रति शब्दानुगतत्वेन शब्दान्नालङ्कारयोर्मध्ये [शब्दार्थालङ्कारयोर्मध्ये] पुन-रुक्तवदाना [पुनरुक्तवदाभासं] लक्षयति। एकानुतेव [एकार्थतेव] आपाततः पुरुक्त-वदवभासनात् शब्दानां सार्थकत्वानर्थकत्वे वक्ष्यमाणोदाहरणेषु स्पष्टः। स पुनरुक्त-वदाभासः।

शब्दस्येति। सूत्रम्। अस्यार्थः सभंगाभंगेत्यादि।

अरीति। अविधदा [दग्ध] ईहा चेष्टा यस्य स तथाभूतं शरीरं यस्याः। सहसे-त्यव्ययपदम् त्वरितार्थम्। तेन युक्ता मुखादयो यस्य, सदा सर्वदा, अनत्या अनमनेन,

अगः, अत्र 'देह शरीर' इत्यत्र, सारत्यसूत [सारथिसूत] इत्यत्र च प्रप्रथमयोर-नर्थकत्वं, द्वितीययोः सार्थकत्वं, नार्थत्याग इत्यत्र द्वयोरनर्थकत्वम् । अत्र देहादि-शब्दानां शरीरादिपदयोगे पुनरुक्तवदाभासत्वं स्फुटमेव ।

.एवं सभङ्गे उदाहरति **चकासतीति** । अङ्गनाभिः प्रशस्तनारीभिः आरमन्ति ये कौतुकेन गीतादिविषयाभोगेन आनन्दः सन्तोषः स्वमनसः स्वचेतसः, विबुधाः पण्डिताः रामादिशब्दानां कामिन्याद्यर्थत्वेन पुनरुक्ताभासः ।

न केवलमयं शब्दमात्रालङ्कारः शब्दालङ्कारोऽपीत्यर्थः [अर्थालङ्कारोपीत्यर्थः] **तन्विति** । अत्रापाततः तनुवपुषोः, करिकुञ्जरयोः रुधिररक्तयोः, धाममहमोः, इन्द्रहरिजिष्णूनां पौनरुक्तयाभासः ।

इन्द्रहरिजिष्णूना पौनरुक्तयाभासः द्वतस्त, [?]कृशशरीरयोप्यायमिन्द्रियविक्रम-शालिभ्योऽन्यः कवीनां प्रसस्त इस्तरतां कुञ्जराणां रुधिरेण रक्ताः शोणाः खरा नखरा यस्य तेजसः पराक्रमस्य धाम्ना आश्रयेण महस्सदीभ्या हुगतेजसामिन्द्रः श्रेष्ठ हरिः सिंहः जिष्णुर्नयनशील इत्यर्थः ।

अत्र श्लोके शब्दालंकारस्य पुनरुक्तवदाभासादस्य सद्भावं द्योतयति । अत्रैक स्मिनतनुकरविरक्तादौ अन्यस्मिन् वपुः कुञ्जररुधिरादौ,एवं चास्य शब्दमात्रनिष्ठत्वे यहुदाहरणद्वयं अरिवधेत्यादि चकासतोत्यादि च, अत्र सदा न त्याग इति विबुधा सुमनस इति च दानत्यागयोः सुमनोविबुधयोरपि शब्दयोः परिवृत्तिसहत्वात् प्रकृति-विषयं, उक्तरीत्यातु अरिवधदेहशरीर इत्याद्यारभ्योभयालंकारात्वात् ।

एवमेवास्य **साहित्यदर्पणे**ऽस्यालंकारस्य शब्दनिष्ठत्वमुक्तं—

भुजंगकुण्डलीव्यक्त शशीशुभ्रांशुशीतगुः ।

जगन्त्यपि सदापाय देव्याच्छेतो [?[हरः शिरः ।। इत्यत्र भुजंगकुण्डलीत्यत्र प्रथमस्यैव परिवृत्तिसहत्वं हरः शिरः इति द्वितीयस्य, शशिशुभ्रांभित्यत्र द्वयोरपि अतिसादनत्याग इत्यत्र द्वयोरपीति शुद्धद्वयपरिवृत्तिसहत्वासहत्वाभ्यामस्योभयालं-कारत्वमुक्तम् ।

इति महपात्रश्रीविश्वनाथकविराजकृतौ कव्यप्रकाशदर्पणे शब्दालं-कारनिर्ण-योनाम नवम उल्लासः

अथ दशम उल्लासः

एवं शब्दालङ्कारान्निर्णीय प्रस्तुतमर्थालङ्कारलक्षणमवतारयति वृत्तिकृत् अर्थालङ्कारानिति । आह विशेष इत्यर्थः । प्रथममलङ्कारजीवभूतत्वादुपमां लक्षयति साधर्म्यमिति । समानधर्मयोर्भावः साधर्म्यम् 'चातुर्वर्ण्यादित्वात् स्वार्थे यन् । अत्र संबन्धिनावनुपात्तादमपि [पात्तावपि] साधर्म्यलभ्यादित्याह उपमानोपमेययोरिति । चन्द्र इव मुखं शोभत इत्यादौ प्रकृतस्य मुखादेरुत्कर्षाधायकत्वं चन्द्राद्युपमानं मुखादि चोपमेयं न कार्यकारणादिनुयोरिति [तयोरिति] क्वचित् पितेरपुत्रोवित्वानित्यादौ [पितेव पुत्रः सगुणः स आसीत्] साधर्म्योपनिबन्धे सति तयोरप्युपमानोपमेयाव्यतिरेकादिति भावः ।

मल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुनैर्मही ।

तस्तार शरघाव्याप्तैः सक्षौद्रपटलैरिव ॥

बिम्बप्रतिबिम्बभावे समानाकारत्वमेव साधर्म्यम् । "सकलकल पुरमेतत्" इत्यादौ च शब्ददेत्यत्वं [शब्दवेद्यत्वम्] । भेदेति । अयमर्थः । अनुमे [अनन्वये] यद्यपि तात्विको भेदो नास्ति । तथाप्याहार्य इति ।

तद्भेदानाह पूर्णेति । उपमाप्रतिपादकमिवादि । एकस्येति । एषां वर्णानां [चतुर्णां] मध्य इत्यर्थः ।

नो पश्चलक्षणवशात् [अनुच्चारणवशात्] अनुपादानाद्वा । श्रुतिः शब्दः श्रूयत इति व्युत्पत्या । तेन साक्षान्निवेदिता श्रौती । वैयाकरणरीत्या समासाभावो वाक्यम् । यत्परायत्तः परमुपात्तः [यदन्तरमुपात्ताः] उपमानविशेषणानि उपमानान्तरप्रयुक्तानि तुल्यादिपदसाधारणानि । ऐते यथैवादयः ।

समानं सादृश्यंनक्षत्र [?] मुभयगतमपि श्रुतिमात्रेणैव । पुनस्तुल्यादिशब्दवदन्नानुसंधान [दर्थानुसंधान] मवान्तरव्यापारीकृत्य प्रतिपादयन्ति ।

तद्धिते श्रौतीं दर्शयति तथैवेति । तथा यथा इवादीनामुपादान इत्यर्थः [इवादीनामनुपादान इत्यर्थः] वतेस्तदर्थविहितत्वादिति भावः ।

साम्यं समानधर्मयोगः। तस्य पर्यालोचनया उपमासापेक्षबुद्धचा। अयमाशयः।

तुल्यादिपदानामुपमानोपमेययोर्द्वयोरपि विश्रान्तेः अस्योपमानस्योपमेयत्वमिति बुद्धिः। प्रकृतिपर्यालोचनसापेक्षा एव उपमेयमिति कमलसदृशं मुखं स्वरं [सुरभि] इत्यादौ च कमलमिव मुखमित्यादिवत् झटित्येव द्वयोरपि सौरभ्यान्नुयो [थया] न प्रतीयते। किन्तु कथमिदं तत्सदृशमिति विचारानन्तरमेवेति तदुपादाने आत्मोवतेः [आर्थीवतेः] स्थितावित्यनन्तरं तस्य तुल्यार्थविहितत्वात् तुद्धिते [दद्धिते] आलीति शेषः [आर्थीति शेषः]।

इह सूत्रे [८७] व्यावा इत्यनन्तरं [वाक्य इत्यनन्तरं] अर्थपातुमपि [?] समासं इदं [लक्षणं] व्याख्याय व्याख्यासौकर्येण पश्चादुपातुमपि [पचादनुपात्तमपि] तद्धितद्वयमुपमाद्वयार्थं [तद्धिते तथा उपमा इत्यर्थं] गुणव्यातं [?]।

संप्रति शेषं तद्व्याचष्टे इवेनेति। विभक्तेवलोपो [विभक्तचलोपो] यथा वागन्वाविवित्यादौ [वागर्थाविवेत्यादौ] समासे तु पूर्वपदस्य प्रकृतिस्वरत्वं तु वेद एवोपयुज्यंते इति येषां ते [ये तेषां] इवशब्दयोगे नित्यसमासो नास्ति तेषां तत्रापि औन्यपि [?] न भवन्ति।

क्रमेण सौत्रेण, न तु वृत्योक्तेन। स्वाधींनपतिका नायिका लक्षणप्रस्तावोक्ता। नन्वंचतीति [न मुञ्चतीति] साधारणो धर्मः। अत्र यथाशब्दयोगेन समासाभावात् वाक्यम्। पूर्णा।

तावं [तारं] निर्मलम्। अत एव हारिणी मनोहारिणी कान्तिर्यस्य। अत्रोत्तरार्द्धं प्रकृतोदाहरणम्।

उपायैः सामदानभेददंडैः। अत्र भुजैर्विवेत्यत्र [भुजैरिवेत्यत्र] समासः। गङ्गाभुजवदित्यत्रेवार्थेवतिः। [गङ्गाभुजङ्गवदित्यत्रेवार्थे वतिः]।

निदाघास्वररत्नवादित्यत्र [निदाघाम्बररत्नवदित्यत्र] तुल्यार्थे।

ननु शब्दचित्रं वाच्यचित्रमव्यंग्यंत्स्वरणं [अवरं] स्मृतमित्युक्तदिशा अस्फुटरसादिव्यंग्यमेव चित्रं काव्यं, तस्यैव च धर्मत्वे चितान्तर्गतः सर्वोऽप्यलङ्कारवर्गो निर्देष्टुमुचितः [निर्दिष्टुमुचितः] तेन चित्रकाव्यगता एवालङ्कारा उदाहर्तुमुचिताः। उक्तोदाहरणषूद्भट [उत्कट] वस्तुरूपो व्यङ्ग्यो रसादिरूपश्च दृश्यते। किञ्चान्येषामपि अलङ्काराणां योगात् सङ्करेण [सङ्करेण] व्यपदेशो नोपमयेत्यादि पूर्वोत्तर विरुद्धाभिधानमित्यभिशङ्क्याह स्वाधीनेति। लोकोत्तरचमत्कारभूरनन्यसाधारणानु-

वागप्रकाशनात् भूविषयः [?] वैचित्र्यं काव्योपदेशबीजभूतं [काव्यव्यपदेश-बीजभूतं] भावक [भावुक] मनोविस्तारात्मक चमत्कारानुगुण्यम् । न खल्विति । खलु यस्मात् । व्यंग्यं समनन्तरोक्तरूपः, वाच्यं द्वयोः साम्यं प्रतिपादकं [साम्यप्रति-पादकं], तस्यैव वैचित्र्यं विच्छित्तिः । तत्प्रतिभासादेव उारूपव्यङ्ग्यस्य काव्यार्थ-प्रतिभासका [काव्यप्रतिभासकता] तेन स्फुटप्रतीतिः । अपि तु तत्समनन्तरमेव । यश्चात्र रसादिरूपो व्यङ्ग्योऽलङ्कारान्तरं च दृश्यते, तत्संभेदेऽपि न चित्रता क्षतिः [इति] आह । रसादि अलङ्कारान्तरं च सर्वत्राव्यभिचारीत्यस्यायमाशयः—अल-ङ्कारमध्येऽप्यत्र "प्रधानेन व्यपदेशा भवन्तीति"न्यायात् उपमयैरव्यरव्यप्रदेशा-विद्यत न्याय्य इति [उपमाया अनन्य व्यपदेशोऽन्याय्य इति] । एतद्रसादिरूपं व्यङ्ग्यम लङ्कारान्तरं चागणयित्वा अत्रौदासीन्यावलोकनेमेत्यर्थः [नेत्यर्थः] तद्रहिताान्वेन [तद्रहितत्वेन] रसादिसंभेदाभावेन । साधारणधर्मस्यानुपादाने वाक्य स्यासङ्गति स्यात् ।

चेत इति । संबोधनपदम् । तत्र च वचोऽमृतयोः परिणतिसुकरत्वादेः [परिणति-सुरसत्वादेः] इत्थं पूर्णोपमा षड्विधा । लुप्तोपमां प्रपञ्चयति तद्वतिति । तद्वत् पूर्णा-वत्, आत्म्येव [आर्थ्येव] न तु श्रौती । तथाहि-सौरभमंभोरुहवन्मुखस्येत्यादौ सौरभादेः साधारणधर्मस्यानुपादानम् । आचारक्तत्यं [आक्षेपलभ्यं] ।

स अलेति । सकलकरणपरिश्रामश्रीवितरणं न सरसकाव्यस्य ।

दृश्यतेऽथवा श्रूयते सदृशमंशांशमात्रेण ॥

सकलानां करणानामिन्द्रियाणां, परिश्रामरूपायाः श्रियः वितरणं येनेत्यर्थः । किमपि वस्त्वन्तरमुपमानरूपम् । नूणं [निरूपणं] । इहैवोदाहरणे सरसकन्धस्सेत्यत्र [सरसकव्वस्सेत्यत्र] सरसकथं चेति [सरसकव्वसममिति] पाठे श्रौत्युपमासंभवे प्राचीनरीत्या विधे वेदयुक्तम् [चेदयुक्तम्] ।

क्व च क्यङ नमूतः [क्यच् क्यङ् णमुलः] कलापमतिथित्वायि नम [?] क्यचाक्वम्मूलेति [क्यचा णमुलेति] अत्र चोद्येति विशेषः [?] ।

रुहिरुहिका रभसो तमु काता [रसभोत्कण्ठा, तया आहितः समपित्वत्ते तूर्षा-संचारोऽर्थो प्रणे सत्वरसंचरणं यस्येत्यर्थः ।

विचित्रेण चरित्रेण प्रसिद्धो विचित्रचञ्चुः नलितानि [चरितानि] चेष्टानि ।

पार्थोऽर्जुनः । अत्र यथादितुल्यादिविरहात् श्रौत्या विशेषचिन्ताकृता ।

इह यद्यपि पौरं स्वतित्यत्र [पौरं सुतीयतीत्यत्र] आदौ वस्तुतः स्नेहनिर्भर-सुखविरहास्पदत्वादेः साधारणधर्मस्यैव लोपः तथापि ग्रन्थकारोऽयं प्राचीनानुबोधे लोपमात्रतिमादकस्य [उपमाप्रतिपादकस्य; इवादेर्लोप युक्तवान् [उक्तवान्] तथाहि। रतिकल्पे वादिवदत्र [वत्कल्पपादिवत्] क्वचक्वङ्दमुलानामित्यैर्थेविहितत्वम् [क्यच्क्यङ्णमुलानामिवार्थे विहितत्वम् । नर्भेषां [सर्वेषां] प्रत्ययत्वेनौपम्यस्य द्योतकत्वम्, न तु वाचकत्वमिति चेन्न।

इह हि समुदितं पदं वाचकत्वं [वाचकं] इमनमनाद्य [इति मतमनूद्य] प्रकृति-प्रत्ययौ सुखानुबोधकादिति [सुखानुबोधकाविति] मतस्यैवाङ्गीकारेण व्यवहारः प्राच्यात्यं [प्रत्याय्यः] अन्यथा वत्कल्पबिवादेः प्रसङ्गः स्यात् न च वाद्यादय [क्यचादयः] इवाद्यर्थेऽनुशिष्यन्ते । क्यचादयस्त्वाचारार्थे तथाहि, एते नाचार-मात्रार्थाः किन्तु सदृशाचारार्थाः । निधुवतीत्यादौ केषाचिन्मते [विधवतीत्यादौ] प्रचुरप्रसिद्धयालिन्यादि क्विद्वोपापयहः [?]।

दुहुलंतेति।

अनवंतचक्रमभानो मरिष्यसि कुंटककलितानि ।

मालती कुसुमसदृशं भ्रमर भ्रमण प्राप्यसि ।।

[ढुंढुंकृत्वा मरिष्यसि कण्टककलितानि केसरकुसुमानि ।

मालतीकुसुमसदृशं भ्रमर भ्रमन्नप्राप्यसि ।।]

अत्र कुसुमसर्तिसमित्यत्र [कुसुमसदृशमित्यत्र] कुसुमश्च गुणो इति पाठे [कुसुमेण समम्] श्रौत्यपि संभवति । इह व्यतिरेकार्थमुपमा । एवं पूर्वोदाकृते [पूर्वोदाहृते] सअनकरणपरिरीशामित्यादौ [सअलकरणपरखीसाम] निवसि अनुपादात इत्यर्थः । सहसायुधीत्यत्र]सहस्रायुधीत्यत्र] सहस्रायुधमिवात्मानमाचरतीति वाक्ये उपमेयस्यानुलोपः । एतदेवाह अत्रात्मा उपमेय इति । अत्राचरतीत्यादि विशेषण-द्वयेन साधारणधर्मोपादानं, न चेहौपम्यवाचकलोपः उक्तादेवान्यायात् [उक्तादेवन्यायात्] स च यथा—गर्दभति श्रुतिपुरुषं व्यक्तं निनदमहात्मनां पुरत इत्यादौ । चण्डिदासपण्डित आहुः—सहस्रेणायुधैः सह बर्तत इति सहस्रायुधः, स इवाचरतीति वाक्यात् सहस्रायुधीति पादसिद्धौ विशेष्यपदस्यानुपात्तत्वादि । लोपमेव लोप [?] इति—तन्न विचारसहम्, कर्तरि कृतोऽनुशासादविरुद्धत्वात् । किञ्चात्र क्यच्प्रत्यय-स्यौवाचकत्वात् उपक्रमे उपमापर्यवसाने च संभावनोत्थापनाद्वत् [वत्] उत्प्रेक्षा । ततश्चोपमोत्प्रेक्षा । यथा श्लो० ।

कस्तूरीतिलकं ति भालफलके [ललाटफलके] देव्यामुखाम्भोरुहे
से भ्रमर मुन्ति तमाल वा नमुलो तुं संति मौंति प्रति ।
याः कर्णे विकचोत्पलंति कुचयोरंगे च कालागुरु
स्थाचच्चीसंति प्रथमं तुलास्त्रावशिवं श्रीकंठकंठद्विषः इत्यादौ ॥

विनन्वः [वितीर्णः] तदधीनीकृतः, विसवः [बिसरः] समूहः । मृगनयने इत्यत्र मृगस्य नयने इव चञ्चले नयने यस्याः इति विग्रहे उपमानौपम्यवाचकसाधारणलोपः । एतत्पदसिद्धौ चानुशाशनविरहाशङ्कां निराचष्टे । सप्तम्युपमाने इत्यादिलक्षणेन समासलोपौ । समासलोपश्च तदा तदैव मृगनयने [इव] नयनेत्यादिपदसिद्धिरित्यर्थः ।

संप्रति आयः शूलिक इत्यत्र त्रिलोपे लुप्तोपमाशंकां निरस्यति—क्रूरस्येनि । विषयनिगरणेन विषयिणोऽभेदप्रतिपत्तिवध्यवसानं [रध्यवसानं] तस्य चात्र विरुद्ध-त्वादतिशयोक्तिरित्यर्थः । उपमा [तु] सादृश्यमात्रे प्रत्यायनविश्रान्ता । एवमुक्त-प्रकारेण । एकलोपे त्रयोदश, द्विलोपे पञ्च, त्रिलोपे द्वे । कैवं इति [एवमिति] तस्मिन् साधारणे धर्मे एकस्य उपमेयस्य तथोत्तरमुत्तरोत्तरक्रमेण पूर्ववत् मालोपमावत् तरङ्गिताः, सम्पदोत्तरमानिताः प्रभावो माहार्थ्यप्रकर्षः [माहात्म्यप्रकर्षः] ।

एवंविधेति अयमाशयः । यदिदं किञ्चिदपि विच्छित्याभासने शमादय [उपमादयः] विशेषतो लक्षयितव्यंग्यस्य तथाविधस्य सहस्रधा संभवात् ग्रन्थगौरवं विना न किञ्चित् फलमिति । तथाविधस्यापि लक्षयितव्ये वा, उक्तप्रकारवैलक्षण्ये तदा लक्षयितव्यं न च तथेत्याह **उक्तेति** ।

* * *

अनन्वयः । एकवाक्यंग इत्यनेन लोपमेयोपमा [उपमेयोपमा] व्यवच्छेदः । नाम निरुक्तिमाह **उपमानेति** । अनर्थयो [अनन्वयो] अत्रास्तोति अर्श आदित्वात् मन्व····· [मत्वर्थीया] अच् प्रत्ययः ।

नितान्तं कान्तिकमनीयता यस्याः, विलासायुधः कामः, अत्रैकस्य विरुद्धधर्म-संसर्गो द्वितीयसंबन्धं चाभिनिवृत्यर्थः । एतदनन्तरं सहैकरूपेणेति विशेषः ।

उन्मेषमिति । अत्र पद्मलक्ष्म्याः [**पक्ष्मलाक्ष्या**] स्वाभाविकं पाद लग्नत्वं हर्षहेतुकत्वेनोत्प्रेक्षितं व्यापनादि प्रकृतम् ।

* * *

सन्देहालङ्कारः ससंदेह इति । सन्देहेन सह वर्तत इति व्युत्पत्या ससन्देहार्थ······ लंकार इति केचित्, सोऽलंकार संदेहाख्य इति केचित् । तस्य लक्षणं संशय इति ।

द्भेदस्योक्तिः। संदिह्यमाने वैधर्म्यस्य कथनं क्वचित्तस्याकथनमिति द्विधेत्यर्थः। तिवः [चिरं] समालोकनं भयवशात्। अत्र च निश्चयगर्भे संशये मार्तण्डप्रभाव-निश्चयः, राजनिश्चये द्वितीयसंशयोत्थानासम्भवात्।

किन्त्वत्रेति। निश्चयस्य प्रतीयमानत्वाभावे वैचित्र्याभावादिति भावः। भट्टोद्भटेन न तु सर्वैः। पुराणो मुनिर्वेधाः।

* * *

रुपकालङ्कारः। रूपक इत्यत्राप्रतिभासमानो भेदो यत्रालङ्कारः इति विग्रहः। अस्य भेदानाह **समस्तेति**। अविवक्षितं सूत्रे लिङ्गसंख्याकालश्चातन्त्राणीति न्यायात्। तेन द्वयोरप्यारोप्ययोः शवृत्वेपि [आवृत्वेऽपि]सवस्तु[समस्तवस्तु] विषयाख्यं रूपकं यथा- "दन्तांशकेशवानीतिस्तस्यातिमुखाम्बुजम्" इत्यादौ। छरणं व्यापनं, व्यसनं कौतुकम्, मुद्राकपाले पाषण्डग्राह्यकपालविशेषे, तेषां हि, दीक्षागृहीतोपकरणेषु मुद्रोपपदनाम्ना व्यपदेशः, परिमलं क्षोदं।

इह च पादत्रये उपमारूपकसंदेहसंकरालङ्कारं निराकरोति **अत्रे**ति। आरोपित धर्मः अचेतनायां रात्रावसंभवात् कापालिक्यां च संभक्रपकसाधकत्येत्यर्थः [?] विवर्त-नात् शाब्दतया विशेषेण वृत्तेरिति भावः।

जस्सेति। यस्य रणान्तः पुरि करे कुर्वतो मण्डलाग्रलताम्।

रससंमुख्यपि सहसा पराङ्मुखी भवति विप्रसेना [रिपुसेना]॥

रसतत्साहो रागश्च। इह च मण्डलाग्रस्य लतात्वे रूपितेऽपि नायिकात्वरूपणमेव चारुत्वावहमिति वाच्यरूपणोऽस्थानोक्तिः, अर्थसामर्थ्यादिति अन्यथा रणान्तः युद्धस्य [पुरस्य] अनवस्थितप्रायत्वादिति भावः।

नन्वत्र रूपणानां परस्परापेक्षितया कथं न परम्परितरूपकं। तत्र विरुद्धन्मान-सहंसे [विद्वन्मानसहंसे] त्यादौ तत्रेण [शब्देन] भेदेन वा रूपताद्वयस्य शाब्दत्वं, इह तु लतयेति चेत् तथासति समस्तवस्तुविषय परम्परित भेदस्य त्वरूपादत्वात् अवा-न्तरवैधर्म्य मात्रेण च भेदांगीकारे परम्परितविशेषस्येव उपपत्तेः। **अत्रोच्यते**-परम्प-रिते तु विद्वन्मानसहंसेत्यादौ चिन्तादीनां सरस्त्वादिरूपणं बिना राजादेर्हंसत्वादि-रूपणमसमञ्जसं [स्यात्] सर्वथा सादृश्याभावात्, इह तु रणस्यान्तःपुरेण तत्काले मुखसञ्जावतया समस्तवस्तुविषये च भावादीनामस्थिप्रभूतिर्द्धारस्यादिना [?] सादृश्यं स्फुटमिति स्वत एव रूपणस्य संभवादिति परस्परं भेदः।

साङ्गमिति। अङ्गयुक्तस्याङ्गिनो रूपणात् । प्रश्नयति प्रश्नविषयीकरोति, कार्मणं मन्त्रौषधादिभिर्वशीकारः, नर्मरहसां क्रीडारहस्यानां, विद्या शिक्षाशाखं [स्त्वं]

नियतं मुख्यम् । नियतस्य मुख्यस्य आरोपणे वस्त्वन्तरतादात्म्यरोपणे, उपायः कारणम्, परस्यामुख्यस्यारोपः तत्परम्परितम्, तच्च श्लिष्टे एकरूपे भेदभाजि भिन्न-रूपे वा वाचकशब्दे न तु भिधायकेः [?] पूर्वोक्तयुक्त्या व्यञ्जकत्वात् । एवञ्च विधाय परम्परितं रूपकमिति कारिकार्थः। वैरिञ्चिं धातृसंबन्धि एवमारोपो निमित्तं यस्येति विग्रहः ।

शब्दार्थालङ्कारा इति । मानसादिपदानां परिवृत्यसहत्वात् हंसादिपदानाञ्च परिवृत्तिसहत्वात् । अत्रालङ्कारमध्ये एकदेशवर्तीति भावसादेः [मानसादेः] सरोरू-पाद्यर्थस्यार्थत्वात्, अन्यैश्च प्राक्तनैः युज्यते निर्वहति ।

सद्वंशो महाकुलत्वात् उत्कृष्टवेणुश्च, स्थितं स्थितिः, वैचित्र्ये द्यतः ? पूर्वमधि-केति शेषः ।

*　　　*　　　*

अपह्नुतिः। अन्यत् साध्यत इत्यस्य उपमानं सत्यतया ख्याप्यत इति विवरणम् ।

अवाप्त इत्यादि । निशान्तवर्णनं, अत्रोपमेयापह्नवः शाब्दः । बत सखीत्यादौ, अमुष्मिन् लावण्येत्यादौ चार्थः । भङ्ग्यन्तरैरित्यनेन—

अङ्कं केऽपि शशांकिरे जलनिधेः पङ्कं परे मेनिरे
सारंगं कतिचिच्च सञ्जगदिरे भूच्छायमैच्छन् परे ।
इन्दोर्यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते
मन्येऽहं करिपीतमन्धतमसं कुक्षिस्थमालक्ष्यते ।।

इत्येवमादिप्रकारैरित्यर्थः ।

*　　　*　　　*

अथ श्लेषः । संप्रत्यर्थालङ्कारप्रस्तावादर्थश्लेषं लक्षयति **श्लेष इति** । एकस्मिन् वाक्ये मिलितानामेव पदानां तथाविधार्थद्वयावबोधनसामर्थ्यं न तु कस्यचित्पदस्य विशिष्टा शक्तिः सर्वेषां पदानां परिवृत्तिसहत्वादित्यर्थः । एकानु [र्थ] प्रतिपात्र [द] कानामित्यनेन येन ध्वस्तमनोभवेनेत्यादिव्यवच्छेदः । अनेकोऽर्थः प्रकरणादिसा-चिव्याभावादनिर्द्धारितरूपः ।

उदयं प्राच्यां प्रथमदर्शनं उपचयं च दिशां मालिन्यमन्धकारमयत्वं द्वाराचार-योगश्च निद्रया स्वप्नादिनाऽज्ञानेन च, मुद्रां निमंत्रणं क्रियाः सन्ध्योपासनाद्याः इष्टा-पूर्ताद्यश्च स्वैराचाराणा पाशुनादीनां [?] परद्रव्यापहारकादीनाञ्च प्रवर्तनं प्रसरणं स्वैराचारेषु प्रवर्तनं प्रवृत्तिश्च ।तत् कृन्तनं विनाशनं, तेजः प्रकाशः प्रभावश्च, विभाकरः सूर्यः, विभां प्रभां करोति व्यनक्तीति व्युत्पत्या राजानु [र्थ] विभायाः कान्तेः अकरत्वादाश्रयात् ।

परस्याप्रकृतस्य उक्ताविति व्यञ्जनं, भेदकैर्गुणक्रियादिरूपविशेषणैर्न तु विशेष्ये-नापि एवञ्च ध्वनिश्लेषव्यवच्छेदः । एतदेव विवृणोति, **प्रकृतेति** । अभिधानं अभिव्य-ञ्जनम् । न हि हिणोति [लहि ऊक्ष]

नववातरवाहुस्पर्शं यस्याः स कोऽप्युल्लासः ।

जयलक्ष्मीस्तव विरहे भवतु सा दुर्बला ननु सा ॥

अत्र प्रकृतस्य राज्ञो नायकत्वं, जयलक्ष्म्याश्च नायिकात्वं विशेषणपदमात्रसामर्थ्यादव-सेयम् ।

* * *

निदर्शनालङ्कार :–निदर्शना वस्तुनोः सम्बन्धः, विशेणविशेष्यभावादिः । क्व सूर्येत्यादौ वाक्यानुगता निदर्शना । उदयतीत्यादौ पदानुगता । द्वितीयनिदर्शना न केवलमियं वस्तुसंवन्धस्यासंभवे उपमापरिकल्पनात्मिका निदर्शना तस्य संभवे चान्यापीत्याह । **स्वस्वहेत्विति** । स्वस्य क्रियाया एव स्वरूपस्य [?] लाघवेसति तनुपपदप्राप्तिप[द ?]स्य च सम्वन्धः । अवापेति पाठे तु सरलैव योजना । अत्रेति ।

अयमाशयः । अत्र दृशत्कणगतस्य पतनरूपस्य तत्कारणस्य लाघवे सति उद्धत-पदप्राप्तिरूपस्य च संवन्धः संभवत्येव दृशत्करणस्य शैलशेखरगतत्वेन पतनक्रिया-निर्देशात् । स च संबन्धः संतरणदृषत्करणस्य शैलशेखरगत्वेन संतरण दृषत्कणस्य लघुनां [?] चोपमा विनुप्रविस्वभावं कल्पय न द्वितीयनिदर्शनाबीजम् ।

* * *

अप्रस्तुतप्रशंसालङ्कार :–अप्रस्तुतप्रशंसा । प्रशंसा वाच्यतया वर्णनम् । सैवा-प्रस्तुतप्रशंसाख्य लै ।?) एवालङ्कार इत्यर्थः । प्रस्तुताश्रया प्रस्तुतपर्यवासायिनी । आक्षेप इत्यनेन ध्वनिशङ्कानिवासः [ध्वनिशङ्कानिरासः] तद्भेदानाह **सार्चेत** । **कार्य इति** । कार्ये प्रस्तुते कारणस्य, कारणे प्रस्तुते कार्यस्य । सामान्ये प्रस्तुते

विशेषस्य, विशेषे प्रस्तुते सामान्यस्य सामान्ये प्रस्तुते सामान्यस्य, तुल्ये प्रस्तुते तुल्यस्येति पञ्चधेत्यर्थः ।

निपतदेव पीतं संगृहीतं अध्रुवेनेति [अश्रुणेति] विग्रहः । **कार्यं पृष्टे इति ।** अस्मादेशोक्तन्तरद्वंदीते [?] एतेदिति [एतदिति] तस्य मुखात् श्रुतमेतत् कियत् कियन्मात्रं स्वल्पमात्रमेवेत्यर्थः । मम मत्सम्बन्धीयं । मुक्तामणिः कुत्रोड्डीय गत इत्यर्थः । ममत्वमात्मीयत्वम् ।

* * *

श्लेषालङ्कार :–श्लेष इति । श्लेषमाणो विशेष्यस्यापि साम्यात् । न तु श्लेष एव । प्रकृता [प्रकृते] अस्य गम्यत्वात् । एवं समासोक्तिः समासोक्त्याभासो विशेषणमात्रसाम्यात् न तु सैव, उक्तादेव न्यायात् पुंस्त्वात्परिचलनममृताहरणकाले स्त्रीस्वरूपधारित्वात् अधोगमनं वराहकमतरूपेण [वराहकमठरूपेण] नृधारणात् [?] प्रणयनं सृष्टिः । तद्धेतोर्महान् महत्वरूपः । पुरुषोत्तमेन वासुदेवेन, प्रच्छरप्रसिद्धया [पुराणप्रसिद्धया पुरुषोत्तमशब्देन प्रथमं तस्यैव बुद्ध्यारोहात् । अत्र प्रकृतार्थपक्षे पुंस्त्वात्पुरुषाकारात् अधोगमनं नीचताप्रतीतिः । प्रणयने प्रीतिविषयेन महान् उत्तमोऽपि यदि न स्यात् । पुरुषोत्तमेन पुरुषश्रेष्ठेन । अत्र पुरुषोत्तमशब्दस्य द्व्यर्थत्वात् श्लेषाभासः । **येनासीत्यत्र च** विशेष्यस्य चन्द्रपदस्य एकार्थत्वेन समासोक्त्याभासः । पादो रश्मिश्चरणश्च [चरणश्च] । पोतो वहित्रं [पोतोपायाः सांयात्रिकाः] कल्पः समर्थः । अत्र प्रतीयमानप्रकृतार्थनिरपेक्षेण समुद्रस्वरूपवर्णनयापि वाक्यार्थविश्रान्तेः ।

अध्यारोपेण प्रकृतस्येत्यर्थः । **कस्त्वमित्यादौ** शाखोटकेन सह प्रश्नोत्तरानुपपत्तेः रामेन [वामेन] वामपार्श्वेन प्रतिकूलेन च मा ···· रथं [मार्गस्थितस्य] सदाचारश्च । गजानां ब्रह्मर्षिशाया [ब्रह्मर्षिशापा] जिह्वापरिवृत्तिः प्रसिद्धा । प्रकृतपक्षे वसनाविपर्ययः [रसनाविपर्ययः] । ·· ···भाषणं, कर्णचापनं [कर्णचापलं] खलवचनश्रवणं च ।मदो गर्वः, शून्यकरत्वं कृपणत्वंञ्च ।

* * *

अतिशयोक्त्यलङ्कारः-अतिशयोक्तिः । निगीर्येत्यादिकारिकागतस्य परपदार्थस्यार्थ उपमानेति [उपमानेनेति] । प्रस्तुतपदस्यार्थः उपमेयस्येति स च प्रस्तुततादात्म्यप्रतिभाससामग्रीव्यावर्त्यस्थगितस्वरूप इत्यर्थः । अध्ववसानद्रढीयसी [अध्यवसानं द्रढीयसी] बुद्धिः । सा च उपमेयस्योपमानतयेत्यर्थः ।

अन्यत्वेन वस्त्वन्तरगतत्वेन । अन्यनिति [अण्णमिति] अन्यं दटलत्वं [अण्णं लडहत्तकअं अन्यत् लटभत्वम्] अन्यैव कापि वर्तनच्छाया निर्माणशोभा । [रेह] लेखा निर्माणस्य लेशः । यदि शब्देनोक्तौ यथा—

यदि स्यान्मण्डले शक्तिमिन्दोरिन्दीवरद्वयम् ।
तदोपमीयेतैतस्या वदनं लोकलोचनम् [लोललोचनम्] ।।

कार्यस्य पूर्वंयुक्तिकारणसमकालत्वेऽपि [पूर्वोक्तसमकालत्वेऽपि] भवति । यथा
अविरलविलोलजलदः कुरजार्ज्जननीयस्वरभिवलवातः ।
अयमायातः कालो हन्त इताः पथिकगेहिन्यः ।।

* * *

प्रतिवस्तूपमालङ्कारः । प्रतिवस्तूपमा नाम । निरुक्तिमाह वस्तुन इति । देवीभावमित्यादेः "कथं भजतु" नखल्लित्ययोः [नखलु] इत्यनयोः

कथंचित् सामानानुतयां प्रतिवस्तूपमोदाहरण सक्रतिप्राच्याः [प्रतिवस्तूपमोदाहरणमिति प्राञ्च्याः] स्फुटमुदाहरणम्—

गङ्गवंशनृपालवरणतनुविचक्षणाः ।
कापिञ्जना एव परं कवितापाककोविदाः ।।

अत्र विचक्षणत्वे कोविदद्वयोरेकानुतैव [र्थंतैव] ।

* * *

दृष्टान्तालङ्कारः । दृष्टान्तः प्रतिबिम्बनं बिम्बप्रतिविस्वभावेन [बिम्बप्रतिबिम्बभावेन] निर्देशरे, न तु प्रतिवस्तूपमावत् साधारणधर्मस्यैकरूपता दृष्टो ज्ञातः सदृशवस्तुप्रकाशनेन प्रकृतार्थस्यासंदिशता साहसकर्मणा शर्म मुखं यस्येति विग्रहः । विशवावतां [विशरारुणां] व्यूहभंगेन विक्षिप्तताम् ।

* * *

दीपकालङ्कारः—दीपकः [दीपकम्] वृत्ति स्थितिः सैव सकृद्वृत्तिरेव । इति एवं त्रिधं दीपकमिति भावः । क्रियादिरित्यादिपदेन गुणोपग्रहः । दीपनात् अलङ्करणात् ।

क्रिरणाति कृपणानां धनं नागानां फलमयः केशंवाणि सिंहानां ।
कुलपालिकानां च स्तनाः कुतः स्यूशंतेऽमृतानां ।।
[कृपणानां धनं नागांनां फणमणिः केसराः सिंहानाम् ।
कुलबालिकानां स्तनाः कुतः स्पृश्यन्तेऽमृतानाम् ।।]

कुलपालिकाः सत्यः । अत्रछिप्पन्तीति क्रिया बहुवाक्यव्यापिनी सकृत्वपांआ [सकृदुपात्ता] । अत्र कुलपालिकावृत्तान्तः प्रकृतः । गुणस्य सकृत्वपादाने[सकृदुपादाने] हृद्यमुदाहरणं [इदमुदाहरणम्] ।

द्रुणति सवितर्कं वक्ष्यते [??] नैन्दति [वेल्लति] विपरिवर्तते निमिषति, अलितप्रायं च क्षः [?] किंचिदिवस्तारयति ।

मान्येति [मालेति] । उपकार्योपकारकतया परस्परसंश्लेषेण मानाभावमापन्नानां दीपकं दीपकभावम् । अत्रैकस्य वहुवाक्यदीपनात् ।

सकृद्धर्म इत्यनन्तरं यत्रोपादीयत इति शेषः । **पाण्डुक्षामांमित्यादि** । पूर्वमेव व्याख्यातम् ।···· **[कुमुदेत्यादौ]** कुमुदादीनामप्रकृतानांम् । **केत्ति** । किमाद्योधेन [केन पदार्धेन] तु सन्त्वरूपेणौकेन [सान्त्वरूपेणैकेन] धर्मेणाभिसंवन्धः । पदस्थाने [पदे स्थाने] ।

*　　　　*　　　　*

व्यतिरेकालङ्कारः । **स एव** । व्यतिरेकाख्य एवालङ्कारः । इह केनचिदुपमानानुपमानानुपमेयसाधिक्ये [उपमानादुपमेयस्याधिक्ये] विपर्यये वा व्यतिरेक इति लक्षणा युक्ता [लक्षणा उक्ता] मेयस्य [उपमेयस्य] न्यूनगुणत्वे यहुदाकृतं [यदुदाहृतं] तद्वत् उत्कृष्टगुणत्वेऽप्यनुभावयितुं शक्यमित्याह **क्षीण इति** । व्यतिरेक अस्थैर्यस्य अस्थैर्यरूपगुणस्येत्यर्थः । अनुक्तीनां त्रये, हेतुद्वयस्यानुक्ते स्त्रिधा व्यवस्थिता रित्यर्थः [त्रिधा व्यवस्थितिरित्यर्थः] । साम्योनिवेदित [साम्ये निवेदिते] इत्यस्योत्तरार्धेन संवन्धः । स्मयो गर्वः ।

एवमिति । पाठविपर्यासे भेदचतुष्टयोदाकृतियोभ्यत्वं [भेदचतुष्टयोदाहृतियोग्यत्वम्]

गुणाः गाम्भीर्यादयः तन्तवश्च मण्डलराजत्वात् अशक्यम्, विभुश्च [विधुश्च] कला विज्ञानानिमागाश्च [?] । प्रतापः प्रभाव प्रकृष्टतापश्च ।

विषमा अनुस्थिरा दृष्टिर्यस्य ।विषमारितश्रो दृष्टयश्चक्षूँषि यस्येति च [?] तृषो [वृषो] दैत्यभेदो धर्मश्च । करोरश्मिर्ग्रलादानं च [करो रश्मिः] ।

*　　　　*　　　　*

आक्षेपालङ्कारः । अनुपसर्जनीकार्यस्य बहुमेव [?] योग्यस्य वक्तव्यताया अशक्यत्वम् अतिदारुणत्वात् [?] ।

ए एहीति । प्रथम एवकारः साद्यनुनानुनये [?] एहि किमाह ? **अस्यापि** कृत्वे [कृते न निष्कृत्यतणानि [?] अविचारितकार्यारंभकारिणीति सा यति (यदि) न भणिष्यामि । अत्र सख्या विरहवेदना वहुमिष्टा[इष्ट] प्यशक्यवक्तव्यतया नोक्ता ।

अन्तर्मानसं चिन्तात्यन्तरे । आ इति साद्यर्थं [अव्यय] मानुनयक्रोधे ।

*　　　　*　　　　*

विभावनालङ्कारः क्रियाया इति । क्रिया कारणव्यापारः । तदेवाह वृत्तिकृत् तत्रूपेति [हेतुरूपेति] ।

* * *

विशेषोक्त्यलंकारः । भलारवः [फलावचः] फलस्याभाव वचनं । निद्रेत्यादौ [निद्रेत्यादौ] अङ्गनाया आलिङ्गनपरित्यागे स्मरसङ्गश्रान्तत्वादि निमित्तमनुक्त-मपि विभावयितुं शक्यम् ।

स एक इत्यादौ तनुहरणेऽपि बलाहरणानि निमित्तं निरूप्यमाणमपि [वलरहणं तनुहरणे निमित्तम्] त्वविज्ञान [?] मित्यचिन्त्यम् ।

कर्पूर इवेत्यादौ दाहेऽपि शक्तिमन्त्वे [शक्तिमत्वे] अवार्यवीयत्वं [अवार्यवीर्यत्वं] निमित्तमुक्तम् ।

* * *

यथासंख्यालंकारः । यथासंख्यम् । क्रमि क्रमिकानां [क्रमिकाणां] क्रमेणोपा-त्तानां समन्वयः सम्बन्धः अर्थात् क्रमोपात्तैः तैः सम्वन्धिरेव [?] ।

* * *

अर्थान्तरन्यासालङ्कारः समश्यते [समर्थ्यते] सोपपत्तिकतया व्यवस्थाप्यते कौमुदीमहसि ज्योत्स्नाप्रकाशे । धुर्यो धुर्वहनसमर्थः ।

* * *

विरोधालंकारः । वस्तुवृत्तेन स्वभावेन विरुद्धयो विभाविधानं [विरुद्धाभिधानं] आपाततो विरोधवोधकमभिधानमित्यर्थः । **गुणास्त्रिभिरिति ।** पूर्वोक्तयोर्जातिगुण-योर्विरोधः । स एव गुणजात्योर्विरोध इत्युत्तरोत्तरं पूर्वपूर्वापेक्षया गुणादीनामन्यान्य-भेदकथने एकैकं……सः [प्रत्येकशः] पूर्वोक्तध्वनिभेदसंख्यानादिति दशप्रकारो विरोधः ।

नलिनीकिसलयमूलानवनयादि [नलिनीकिसलय मृणालवलयादि] शब्दस्य दवदहनशब्दस्य चानेकव्यक्तिवाचकत्वाज्जातिशब्दत्वम् । एवं गिरीमरुद्धमुशब्दानां [गिरिमरुदब्धिशब्दानां] जातिशब्दत्वम् । विश्वम्भराशब्दस्त्वखण्डरूपाया भुव एकत्वानुजातिशब्दः । अनुन्दत्यर्था गंभीरलद्युशब्दास्तु [अनुन्नतियुजगम्भीरलधु-शब्दास्तु] गुणार्था इति परस्परयोगे जातिगुणविरोधः ।

अनुरज्यते प्रेमनिर्भरो भवति । स्नेहं वशीकरणम् । प्राप्नोतीति । आतरेव अचेतनखङ्गजातेरसंतनितया [असंनिहिततया] विरुद्ध इव प्रतिभासते । अनुरज्यत इति पदस्य अनुगतशोणित योगार्थतया, स्नेहशब्दस्य सैव अज्वल्य [औज्ज्वल्य] रूपार्थतया समाधानम् । पांशुपटलैः प्रसाधननिर्वर्तनं रक्तिमा राजजातिविरुद्धा [रागः; जातिविरुद्धा] सृजतीत्यादौ भवादिशब्दानां एकव्यक्तिवाचिकत्वात् । स इत्यस्य च प्राकरणिक लहानुभाववाचकस्य सर्वनामतया जातित्वम् ।

सन्ततेत्यादौ [सततेत्यादौ] काठिन्यसौकुमार्ययोर्गुणयोर्विरोधः । पेशनीत्यादौ [पेशलमपीत्यादौ] पेशलत्वपारुष्यगुणाभ्यां दहनप्रमोदयोर्विरोधः ।

क्रौञ्चाद्रिरित्यादौ क्रौञ्चाद्रिशब्दस्य एकव्यक्तिवाचकत्वात् द्रव्यस्यास्तोजनवत् [?] कोमलत्वस्य च विरोधः ।

परिदेव्यादौ [परिच्छेदेत्यादौ] जडीकरणतापकरणयोर्विरोधः ।

अयमित्यादौ लवणजलधेर्द्रव्यस्य ।

*　　*　　*

स्वभावोक्त्यलंकारः । त्रैकं [त्रिकं] पृष्ठवंशाधारास्थिग्रन्थिः । [पृष्ठवंशाधरे त्रिकम्] इत्यमरः । शरा श्रीरागतो..................मकेसरलापः ।

अत्र क्रियास्वभावोक्तिः । वर्णस्वभावोक्तिर्यथा-प्रथमवरुणच्छायस्तारस्ततो विषदप्रभ' इत्यादि । [एवं संस्थानस्वभावोक्तिरपि ज्ञेया ।

*　　*　　*

व्याजस्तुत्यलङ्कारः । व्याजस्तुतिः **अन्यथा** हृदिर्मुखे [यदि मुखे] निन्दायाः [निन्दा] [तस्याः] स्तुतौ पर्यवसानम् । एवं व्याजरूपेति व्याख्यानम् । द्वितीये पक्षे सङ्गमयति **व्याजेनेति** । प्रथमे । मौनि श्रेष्ठ [मौलिः श्रेष्ठः] मज्जनमभावः [वर्जन-सभावः] वोधिसत्वः बुद्धः । एवं गुणादि ।

*　　*　　*

सहोक्त्यलङ्कारः । यस्यामुभयस्यावगमकं उभयसमृद्धम् । सहेति ।

सह दिवसनिशाभिर्दीर्घाः श्वासदण्डाः
सह मणिवलयैर्वाष्पधारा गलन्ति ।
तव सुभग वियोगे तस्या उद्विग्नायाः
सह च तनुलतया दुर्बला जीविताशा ॥

*　　*　　*

विनोक्त्यलङ्कारः । सन्वेत्यस्य. [अन्यः सन्न इत्यस्य] व्याख्यानं अशोभन इति, नेतर इत्यस्य शोभन इति । स्वरुचिः [अरुचिः] कान्तिरहितम् । महत्तमः, तद्बहुलत्वात्तत्वोपचारः । प्रतिभा प्रतिज्ञाविशेषः [प्रज्ञाविशेषः] तस्याः प्रभा प्रकाशः, तथा प्रगतः [संगतः] प्रगल्भः ।

*　　*　　*

परिवृत्यलंकारः । **समासमैरिति** । क्वचित्समैः क्वचिदसमैरिति द्विधा ।

असमत्वं न्यूनतयोत्कृष्टतयोरिति द्विधेत्यर्थः। विप्रलम्भो वियोगः।

* * *

भाविकालङ्कारः। प्रत्यक्षा इति। असंभूता अपि भूता भाविन चाम्ना [?] वर्णनामाहात्म्येन मत्साक्षादिव प्रीयन्ते [क्रियन्ते] तदलङ्करणं भाविकमित्यर्थः। नाम निरुक्तिमाह **भाव इति।** भूतस्या जनस्य भाविनो दूषणसंभावनस्यादर्शन-मित्यतः [र्थः] पूर्वं साक्षादिति शेषः।

* * *

काव्यलिङ्गालङ्कारः काव्येति। हेतोः क्वचिद्वाक्यार्थत्वं, क्वचिद्वाक्यावयवरूपा नेकपदार्थत्वं, क्वचिदेकपदार्थत्वमिति त्रिधा काव्यलिङ्गमित्यर्थः। हेतुत्वस्य वैचित्र्याभावात्वालङ्कारा [न्नालङ्कारता]। **पुरेति।** जन्मनीत्यस्य विशेषणम्। अनभिमानयुक्तस्य कायराहित्यात् तद्व्यापाररूपेन नमनेन रहितः।

युष्मत्सपर्यासुखेत्यादेः समासत्वादेकपदत्वम्। अत्र यद्यपि अपरजन्मन्यन-मनेकपदैकपदार्थरूपः।

* * *

पर्यायोक्तालङ्कारः। पर्यायोक्तमिति। लक्षणोभयार्थम्। एवंचार्थात् शब्दस्यावाच्यवाचकत्वेन विना व्यञ्जनव्यापारेण वेद्यं वस्तु पर्यायेण भङ्ग्यन्त-रेणोक्तः तत् पर्यायोक्ताख्यमलङ्करणमित्यर्थ.। व्यंगमपि [व्यङ्ग्यमपि] यंप्रेक्षा-न्युदाहरणे [यं प्रेक्ष्येत्युदाहरणे] पातुपदसंवन्धत्वेन [प्रीतिपदसंबन्धत्वेन] असङ्केतिततयाऽवाच्यमपि शब्देनोपात्तं वाच्यते [उच्यते बोध्यते। एवमपि न ध्वनित्वमित्याह **तेनेति** तेन शब्देन यदेव मदमानयोर्निवासप्रतीतिपरित्यागरूपं वस्तु उच्यतेऽभिधीयते तदेव तत्सजातीयमेव स्फुटभावव्यंग्यं मदमानयुक्तत्वं एवं द्वयोरैक-जात्येऽपि वाच्यव्यङ्ग्याभेद इत्याह **यथेति।** यथा लेवनप्रकारेण [येन प्रकारेण] समयनिरपेक्ष त्वादिना व्यङ्ग्यं व्यञ्जनावृत्तिबोध्यं भवति तथा तेन प्रकारेण नोच्यते नाभिधीयते। अभिधायाः समयसापेक्षनैयत्यात्। एवं च स्फुटत्वेनैकजात्येऽपि बोधक व्यापारभेदाद्भेदक इत्यर्थः। ननूभयोरप्यर्थयोः समाने च शब्दसंलग्नतारूपे ज्ञाननिदाने कतस्मो [कुतोऽस्त्यज्ञान] ज्ञान जनकव्यापारभेद इत्यर्थः।

ननूभयोरप्यर्थयोः समाने शब्दरूपे भेदः कुतः? पुनरन्यत्र ज्ञापके तत् संलग्नत्वे वा विशिष्टे ज्ञानावान्तरवैजात्यं दृष्टमस्ति, येनात्र तद्वैजात्यात् व्यापारवैजात्यं कल्पनीयमित्यत आह **यथा गवीति।** दृष्टे निर्विकिल्पकज्ञानविषयीकृते, विकल्पः विकल्पकज्ञानम्।

अयमाशयः—यथा निर्विकल्पकसविकल्पकयोः प्रत्यक्षतया समानयोः सम्यगिन्तियलक्षणे. [सम्यगिन्द्रियलक्षणे] ज्ञापकेऽर्थस्य तत्संलग्नत्वे च यथा सामग्री भेदादवान्तरवैजात्यं तथा शब्दयोरपि [शब्दार्थयोरपि]। वाच्यव्यङ्ग्यप्रतीत्योश्ततुपमत्वमेव [तदुपलक्षणमेव] न च तत्र यथायोगं संयुक्तसमवायादिव्यापारादस्त इत् [इह] प्रकृते प्रसज्जनीयं। एतदेव विशदयति **यदेवमिति**। दृष्टं निर्विकल्पकेन विषयीकृतं विकल्पयति सविकल्पकेन विषयीकरोति तत्. कथं निर्विकल्पयतीत्याह **अभिन्नेति**। अभिन्नत्वेन द्रव्यत्वगुणत्वकर्मत्वसम्बन्धाख्यवैजात्यापुरस्कारेण असंसृष्टेन संसर्गासंसर्गौदासीन्येन रूपत एव दृष्टं निर्विकल्पितं भेदेन द्रव्यत्वादिवैधर्म्यपुरस्कारेण संसर्गेण पुरस्कृतावच्छेद्यावच्छेदकभावेन। एवं यथा गौर्विशूकर [शुक्ल] इत्यादौ। निर्विकल्पकविषयीकृतस्यैव सविकल्पकविषयभेद्यभेदेऽपि भेदे तथायं प्रत्यक्षेत्यादावभिधाव्यञ्जनविषयोरपीति **पिण्डार्थः**।

* * *

उदात्तालङ्कारः। संपदन्वात् [संपदर्थात्] अलौकिकीं। उदितरस्य वैचित्र्यानावहत्वात् विसूत्रः छिन्नः।

उपलक्षणीये। वर्णबाहुसहाय इत्यनेन सहायराहित्यंसूचितम्। वीरो रसः इत्यनन्तरं प्रधानमिति शेषः।

इह रामगतस्नेहातिशयस्य प्राधान्यभावादनुभूयमानविच्छित्तिविशेष्यो ध्वनिविशेष्यो ध्वनिविषयप्रस्तुतेति भावः।

अत्र केचिदाहुः,। न चेह रसवदलङ्कारः, द्वितीयोदात्तस्यापरादत्वेन [त्तस्यापरांगत्वेन] तद्बाधकत्वादिति।

तनु अस्य [तन्वस्य] नासि प्ररूढाम्बुरुहासनेन
संस्थूयमानः प्रथमेन धात्रा।
अयं युगान्तोचितयोगनिद्रः
संभक्ष्य लोकान् पुरुषोऽधिशेते॥

इत्यादि विविक्तविषत्वात् तेन परस्परपरिहारेण स्थितयोर्द्वितीयोदात्तरसवदलङ्कारयोः प्रकृतोदाहरणे संकर एव ज्यायान् सन्तिष्ठति।

* * *

समुच्चयालंकारः। कृतान्तो यमः, इति विरहासत्वात्ता [?] बलाकांक्षितस्य मरणस्याविधानार्थं परोक्षोक्तिः।

शशीत्यादौ खलस्यासत्वं, अन्येषां सत्वम् ।

अन्यः समुच्चयः। विदानितेत्यादौ [विदलितेत्यादौ] विमलत्वमलिनत्व गुणौ । अयमित्यादावुपनत इति भवितव्यमिति च क्रिये ।

कलुषमित्यादौ 'कलुषत्वं गुणः । पतितमिति क्रियादेशे आश्रये एकाधिकरणे स्वभावोक्तेर्विषयत्वादिति बहिर्नेयं । [ज्ञेयं] भवति स्वयमेव क्रियते परेनेत्यर्थः । "श्रोणीबन्ध" इत्यादौ एकैव तनुतापूर्वं श्रोणींबन्धे भूत्वा मध्यभागेऽद्भुततरणगतयश्च । प्रथमं पादयोर्भूत्वा नो च योयभूत् [?]

अत्र तरणगतीनां प्रतिसम्बन्धभेदेऽपि जात्यभेदादेकत्वं अद्वितीयस्य च । पूर्वं वयमि सद्भावोऽनुक्तोऽपि सामर्थ्यादवसीयते ।

* * *

पर्यायालङ्कारः आश्रयस्थिति आश्रयव्यवस्था । उत्तरोत्तरं विशिष्टं स्थानं यस्यामाश्रयस्थितौ सा तथा ।

रागः एकत्र लौहित्यं अन्यत्र स्नेहः, एकत्वमविरुद्धमिति अतिशयौक्ति गर्भाकारतद्विरहाभ्यां प्रतिभेदं द्वैविध्याच्चतुर्विधोऽयं समुच्चयप्रकार इत्यर्थः । किञ्चात्र प्रकरणेऽतिशयोक्तेः प्रायिकत्वं रक्ष्यति । एवमेकस्यानेकत्र प्रपञ्चार्थं पर्यायस्य उदाहरणत्रयं दत्वा करणाख्ये भेदे उदाहरति तं ताणेति ।

तत्तेषां श्रीसहोदररत्नाभरणे सहृदयमेकरसं ।

बिम्बाधरे प्रियाणां निवेशितं कुसमबाणेन ।।

तेषां पातालवासिनामत्वराणां [?] अन्यः पर्यायाख्योऽलङ्कारः । मधुरिमित्यादौ । अमृतव्यक्तिरंतर्गतविषयकथनंचैकस्मिन् खलवचनस्य भूतान्तादित्यादेश्च काललक्षणप्रयोजननिर्देशात् क्रियत इति द्वितीयपक्षौदातिकत्वं [?] । इह च द्वितीयोदाहरणे कस्यचिद्रूपस्य परिहारपूर्वकं रूपान्तरापत्तेः । परिवृत्तिविषयत्वं नाशंकनीयमित्याह अत्रेति । एकस्यैव कर्तुः हीनं स्त्री यस्य वस्तुनः परत्र समर्पणमुपादनं परकीग्रहणं अविवक्षितत्वादिति तथा विवक्षायां पुनः लतानामित्यादाविस्यैवोपनिबन्धप्रसंग इति भावः ।

* * *

अनुमानालङ्कारः । हैतोस्त्रैविध्यं दर्शयति पक्षेति । पक्षधर्मेति भावपरो निर्देशः । पक्षधर्मस्यानुपव्यतिरेकवत्वेनेवि [पक्षपर्धाभ्यामुभयव्यतिरेकत्वेनेति] वा सङ्गतिः । पक्षधर्मः प्रकृतधर्मिणि सत्वमन्वयः, सपक्षत्वं व्यतिरेको विपक्षव्या-

वृत्तिः । एवं च पक्षसत्त्वविपक्षव्यावृत्तत्वेन त्रिरूपो हेतुः । एतच्चानुमेयं व्यतिरेकानसामग्र्यं केवलव्यतिरेकितत्त्वत्रयाभावः, केवलान्वयिनि व्यतिरेकाभावः धर्मिणि प्रकृते व्यापकस्योद्देश्यस्य । एवञ्चोपलभ्यानव्याप्यधर्मवत्यपलभ्यमान व्यापकधर्मवर्णनमनुमानालङ्कृतिरिति रहस्यार्थः । पक्षधर्मतान्वयव्यतिरेकत्वमिति पाठे अनुज [अन्वयव्यतिरेकौ] इत्येते सत्येतदर्श आदित्वादचि कृते पक्षधर्मश्चायमन्वयव्यतिरेकश्चेति कश्येति [?] कर्मधारयानन्तरं त्वप्रत्ययः ।

यत्रेत्यादौ साधनस्य स्मरमार्गणपतनस्य मिथ्यात्वादि नाशङ्कनीयम् काव्यसंप्रदायसिद्धत्वात् । किंच कविप्रौढोक्त्यादिविच्छित्तिप्रयुक्तस्य पर्वतोऽयं वह्निमान् धूमादित्याद्यनुमानस्य नालङ्कारता वक्रोक्तेरलङ्कारत्वात् । तदुक्तमस्मत्साहित्यदर्पणे अनुमानं तु विच्छित्या ज्ञान साध्यसाधनेदिति साधनस्य प्रथमनिर्देशः ।

इहैवोदाहरणे । साधनस्य तु अत्रैव द्वितीयार्द्धस्य प्रथमपाठे ।

* * *

परिकरालंकारः विशेषणैरिति । बहुवचनस्य नैकेन त्वाभ्यां विशेषणाभ्यामिदं वैचित्र्यं । किञ्च स्पष्टार्थ एवेति भावः ।

साकूतैः साभिप्रायैः । महौजस इत्यनेन ओजो हि नानामिवाकिञ्चित्करत्वम् नेतरथेत्यर्थः । ओजसद्भावेऽपि निरभिमानिनां च नायनादौ [नायकादौ] लज्जाभाव इत्यत आह मानधनाः । एवमापाटानुत्पाद्भितसौहृदानां [परकार्ये शैथिल्यमित्युक्तम् धनार्चिताः इति । एवं गुणविशिष्टानामपि शस्त्रश्रीविद्यायां तथानभ्यासे नित्यतलतेत्यतोऽभिहितं धनुर्भृतः इति । एवंविधानामपि सङ्ग्राम नैपुण्ये विफलत्वमित्याह संयति लब्धकीर्तयः इति । तथापि सर्वेषामेकीभावे कथञ्चिदेकस्मिन् विमलसि [विमनसि] सर्वेऽपि विमनसः स्युरित्यताह न संहताः इति । एवं भू अपि ति हुशक्या [एवं भूत्वापि जेतुं शक्या] इत्यत आह न भेदवृत्तयः इति । अस्वभिः [असुभिः] प्राणव्ययेनापीत्यर्थः । समीहितुं चेष्टितुम् प्रति ।

* * *

व्याजोक्त्यलंकारः भिन्नं स्फुटीकृतम् । स्वाभ्यस्येत्यनन्तरं [साम्यस्येत्यनन्तरं] विवक्षाया इति शेषः । अपह्नुतौ द्वयोः सादृश्यद्रढीकरणाय प्रकृतं प्रतिषिद्ध [सत्] अप्रकृतं स्थाप्यते इह तु व्रीडादिनिवसनात्यर्थं प्रतिपाद्यमानोपादीयमाना । उपगूढ आश्लेषः । विषंस्थुल [विसंष्ठुलं] आकुलीभूत इति यावत् ।

* * *

परिसंख्यालंकारः तदन्यथा अप्रश्नपूर्वकं त्युसरितः । [त्र्युसरितः] सविसं, न तु राजसदनादि । कौस्तुभभृतश्चरणयुगलं न तु कान्तादिपुण्यं न तु भोगादिकरुणना-

तु भुवनदायादि [?]। एवं कौटिल्यमित्युदाहरणेऽप्ययं व्यपोहो न्नय [उन्नेयः] युवतिकामास्त्ने।

* * *

कारणमालालंकारः उत्तरोत्तरं । यथाशब्दस्यात्न वीप्सार्थत्वादिति भावः। अत्र कार्यकारणभावमूलालङ्कृतिलक्षणप्रस्थावे।

अभेदतः सामानाधिकरण्येन **भूषणतामलङ्कारतां,** कव्यरूपतामिति रूपं विद्यते अस्येत्यर्था, [अर्श] आदित्वादति [चि] कृते पश्चान्तप्रत्ययः [?] एवं च काव्यस्वरूप-वत्वमित्यर्थः समाम्नास्वसिसु [समाम्नासिषु] रित्यनन्तरं **प्राच्या** इति, शेषः [हेतुः] इत्यनन्तरं अस्मन्मत इति शेषः।

हेतुः हेत्वलङ्कारनामा हेतुशब्दः लिङ्गशब्दार्थत्वात्, लिङ्गस्य हेतुशब्दापरपर्याय-त्वादिति भावः।

* * *

अन्योन्यालङ्कारः वस्तुनोरिति सूत्रपदव्याख्या अन्वयोरिति [अर्थयोरिति] परस्परं कारणत्वे परस्परस्य वैशिष्ट्यहेतुत्वे इत्यर्थः।

हंसानां सरोभिः श्रीः सार्यते अथ सरसा हंसैः।
अन्योन्यमेवेति आत्मानं केवलं गुरुकयन्ति॥
हंसानां सरोभिः श्रीः सार्यते, अथ सरसां हंसैः।
[अन्योन्यमेवते एते, आत्मानं केवलं गरयन्ति॥]

सार्यते संगृह्यते। परस्परजनकता परस्परवैशिष्ट्यहेतुता,

अनुयनं [उन्नयनं] ज्ञानम्। तत्र वा "सतीत्यत्र" उत्तरार्द्धेन संबन्धः। तत्र प्रश्ने असंभाव्यं जनकारि [?] पूर्ववाक्यम्। वाणीय इति [वाणिअअ इति]।

बालक हस्तिदन्ताः कुतोऽस्माकं······ घ्रकृत्तयश्च।
यावन्ननितानकमुखी गृहे परि······तेषु षा॥
[वाणिजक हस्तिदन्ता कुतोऽस्माकं व्याघ्रकृत्तयश्च।
यावल्लुलितालकमुखी गृहे परिष्वक्कते स्नुषा॥]

वलिगिसबुद्धिः परिषु [?] ववते परिभ्रमतीत्यर्थः। क्रेतृवचनम् प्रश्नवाक्यम् उत्तरवाक्येन अनेनैवाणीय [अनेनैव वाक्येन] इत्यादिना।

ननूत्तरवाक्यस्य प्रश्नवाक्यहेतुतया काव्यलिङ्गत्वमेवास्तु। न च हेतुमतो वाक्य-स्याशब्दतया न तथेति वक्तुं युक्तं, तथा सत्यपि काव्यलिङ्गस्यावान्तरप्रकारतोपप-त्तेरित्याह **न चेति**। ताद्रूप्यस्य प्रश्नं प्रति हेतुत्वस्यानुपपत्तेः, कुत इत्याह **नहीति**। हि यस्मात् न जनकोऽपि तर्हि ज्ञापकः, जनकस्यैव हि हेतोः काव्लिङ्गाकारप्रयोजकत्व-मिति भावः। तथा हि-वपुः प्रादुर्भावादित्यादौ काव्यलिङ्गाकारे पूर्वापरजन्मनोऽनमन-मपराधद्वयस्य जनकम्। ननु एवं यदि वाणी इह [वाणिअअ] इत्यादेः प्रश्नं प्रति ज्ञापकहेतुता तदनुमानालङ्कारोऽत्रास्त्वित्यत आह **नापीति**। साध्यसाधनयोरनिर्दे-शात् साध्यसाधनहाकारेण [रूपाकारेण] शब्देनाप्रतिवचनत्वात्। एवमेव हि सूत्रे मात्रतो न तु व्याकार्यादीति शेषः। [ ] ···त्यनुसंधानेन प्रश्नस्योन्नयनमित्यु-क्तम्। उत्तरमुत्तराख्यमलङ्कारमित्यतः पूर्वं काव्यलिङ्गानुमानयोरिति शेषः।

द्वितीयमुत्तरं व्याचष्टे **प्रश्नानन्तरमिति**। प्रश्नादित्यनन्तरं पूर्वमुपात्तादिति शेषः। **केति**।

का विषमा दैवगतिः किं लभ्यं यज्जनो गुणग्राही।
किं सौख्यं सुकलत्रं, दुर्ग्राह्यं खलो लोकः॥

विषमा दुर्विज्ञाना लभ्यं लाभः, यज्जनो गुणं, गृह्णाति स एव लाभ इत्यर्थः। अन्यव्यपोह एव न तु वाक्ये किमपि तात्पर्यमित्यर्थः।

केनचिद्धर्मेण लोकोत्तरेण विज्ञानेनाकारात् स्वेदरोमाञ्चादेः, इङ्गिताच्चक्षुरा-दिव्यापारात् विटलक्षणं [विलक्षणं]। यथा—

संभोगक्षीणसंपत्तिः धूर्तसहचरो विटः। सहता [हसता] विकासता नेत्रेण, अर्पितं प्रकाशं [प्रकाशितम्] आकूतं रहस्यं येनेति विटविशेषणं, लीलया वैदग्ध्यव्य-ञ्जकचेष्टया, **प्रतिपादितः** बोधितः, **जस्सेति**।

यस्यैव [जनः] तस्यैव वेदना भवति तज्जनकोऽनीकम्।
दन्तक्षतं कपोले वध्वा वेदना सतीनामलीकमनृतम्॥

धाराधिरोहिततया क्रमानुक्रमिकया भिन्नदेशतयेत्यस्यैवोपस्कारकम्। अत्यन्तं मिति युगपदिति स्वरूपानुवादमात्रम्, न तु लक्षणोपयोगि धूमादि।

अनुक्तमपीत्यतः पूर्वं विशिष्टस्येति शेषः। एवं च स्वरूपविरोधिनोः तदात्म्य-निबन्धः सहावस्थान [सहानवस्था] विरोधिनोर्वा सामानाधिकरण्यनिबन्धनो विरो-धालङ्कृतेः शरीरम्। असङ्गतेस्तु तत्रावस्थितिनियतयोर्वैयधिकरण्यनिबन्धनं इति

नानयोरेकरूप्यम्। नचैवमस्माभिरेवोक्तमित्याह **तथाचेति**। एवं निर्दशितं प्राच्यैरपीत्यर्थः कारणान्तरं कर्तुरनुष्ठितादन्यत् समाधीयते सम्यगाधीयते संपाद्यत इत्यर्थः। इह च काकतालीयन्यायेन कारणान्तरयोगः। समुच्चये तु खलेकपोतिकान्यायेन समकक्षतयेति भेदः।

* * *

समालङ्कारः संभावितः सम्मानितः सम्यक् साधित इति यावत् इदङ्गतं [?] योग्यतया। परस्परानुरूप्येण सम्वन्धस्य योगस्य नियतविषयं नियतं वर्णनीयद्वयं विषयीकृत्य यदध्य वसादानम्। **अयमर्थः**। वर्णनीयद्वयं विषयीकृत्य अनयोरि श्लाध्यमिति ज्ञनं चेज्जायते तदा समाख्यमलङ्कारणमिति।

विषमालङ्कारः। एवं उष्कृष्टयोगे उदाहृत्य नीचयोगे उदाहरति एवमिति। स्फीतिः वृद्धिः, क्रियया ·· वम्व [क्तृ] व्यापारस्य। अप्रार्थितमपि मनसा अनासिदितसपिनो कवित्यमानेतयोः [?] कार्यकारणतयाविरुद्धतां व्रिजातीयतां कुकूलस्तुषाधूलिः,, सिहिक्रासुतः केशविकिशोरो· [?] वाहुश्च। **एवमिति**। विषमालङ्काराणामेव सूत्रोक्तप्रकाराणां उपलक्षणतया सम्वन्धिनो वनरूपतायां [विषमरूपतायां] लक्षणानुसारिण्यन्येऽपि प्रकारा उदाहर्तव्या इत्यर्थः। तत्र दिद्यात्रमुदाकृत्य [दिङ् मात्रमुदाहृत्य] दर्शयति विप्रलेनेति [विपुलेनेति] असकलया असमग्रपातिन्या। **यथायोगमिति**। अत्रावयविवैषम्यं क्वचित्तु सजातीययोः असितमेकस्वरासितमप्यभूत्व [?] पुनरेषां पुन [अपरं] विषमम्।

[अपि निपीय स्वरे जतिक्षयं स्वयमुदेति पुनर्णवमार्णवं,] अत्र व्यतिरेकयोगेऽपि द्वयोः सङ्करो न तु विषमालङ्काराभावः।

तनुत्वेऽपि महीयांसो धत [?] स्यातामिति संबन्धः। तत्पुनरधिकं न तु विषमम्। आश्रयाश्रयिविलक्षणाश्रयतया तदवाद [तदपवाद] रूपत्वादिति भावः। प्रस्तुतस्य वर्णनीयस्य।

असहेन [अशक्तेन] असमर्थेन, नाम निरुक्तिः **अनीकेति**। **अनीकं सैन्यं**, अनीकेत्यादि स्वोक्तमेव विवृणोति **यथेति**। तत्प्रतिनिधीभूतं, तदीयता ग्रद्धदेव विषयीकृतं विग्रहो वैरं।

तदीयता विषयीकृतं, विग्रहो वैरं, **कृतीत्युपहासयुक्तं** वचनम्।

वस्तुस्थित्या स्वभावेन न त्वर्थभूतिवत् क्वचित्प्रतिभाविजृम्भतवर्णता माहाध्यमात्रेण।

वर्णानां वक्रता वैदग्ध्यव्यञ्जकत्वात्, **स्वत स्वभावतः न तु मादो**

ये नायातः [निवसन्ति] सरतप्रमाणम् । सानर्थ्यादवसितहिमाद्रिकन्दरानिवासोंपादानाज्ञानस्यसूत्रस्थां समलक्ष्मतामुदाहरणे [?] प्रयोजयन्नाह **समानतेति** । न केवलं हिमाद्रिकन्दरा निवास इति शास्त्रार्थः ।

ख्याप्यते विधीयते, अपोह्वपे निषिध्यते ।

*　　*　　*

स्मरणालङ्कारः । यथानुतरमनुष्यस्मृतिरिति [यथानुभवमर्थस्य स्मृतिरिति] योजना । यथानु भवमिति च स्मृतिस्वरूपानुवादमात्रं, न तु लक्षणोपयोगि । **समानः** स्मृतिबोधः, **धायिनीति** । स्मर्यतेऽनेनेति स्मृतिः । प्राचीनानुभवजनितसंस्कारः । **तथैवेति** । यदाकारविशिष्टोऽनुभवः तदाकार एव स्मर्यत इत्यर्थः । **कुहरितैः** शब्दविशेषैः करोति ।

करमुपगृहीतयशोदास्तनमुखविनिवेशिताधिमुखस्य ।
संस्मृतं पचजलस्य नमन क्र·····················स्य रोमाञ्चं ।।

*　　*　　*

भ्रान्तिमदलङ्कारः । **अन्यसंवितिः**, अन्यरूपतया ज्ञानम् । निर्दिश्यते प्रतिपाद्यते । भेदेऽप्यभेदरूपावर्णनो भ्रमस्याभावादिति तत्र साम्यातिशयप्रतिपत्त्यर्थमाह सारोपरूपत्वादित्यर्थः । वर्णन इति पाठे नो [?, वर्णनीयस्य विषयतया सम्बन्धी यो भ्रम स्वारसिकस्तस्या- भावादिति व्याख्या प्रोतावधः प्रतिहानु [?] ।

*　　*　　*

आक्षेपालंकारः उपमेयतेत्यस्योत्तरार्धेन सम्बन्धः । तिरस्कारनिबन्धनम् उपमानस्यैवेत्यर्थः । **उपमेयं** प्रकृतम् । **कैमर्थेन** निरर्थकत्वाभिमानेन । **तस्यैव** चन्द्रादेः, अर्थादुपमेयस्य मुखादेः, उपमानत्वेन विवक्षया, उपमानात् यदन्तरं वैशिष्ट्यं, तस्य विवक्षया वक्तुमिण्टया । **एएहीति** ।

एह्येहि तावत् सुन्दरि कर्णं दत्वा श्रुणु वचनीयम् ।
तव मुखेन कृशोदरि चन्द्र उपमीयते जनेन ।।

ए इति । स्याद्यतु न संबुद्धौ वचनसंबुद्धौ वचनीयं वाच्यम् । अत्र वादवद् इति यावत् । स्वल्पतरगुणत्वमुपमेयत्वं उपमानत्वकल्पनायां न विद्यते ।

*　　*　　*

सामान्यालङ्कारः । सामान्यं समानता यस्य गुणस्य सः सामान्यः । **न केवलं** किञ्चित् विकृष्टमुपमेयभावमित्यपि शब्दार्थः ।

अतादृश्यमपि वस्तुगत्या किञ्चित् निकृष्टगुणमपि **अपित्यक्तनिक्तनिजगुथ [अपरित्यक्तनिजगुणं]** इत्यनेन तद्गुणव्यवच्छेदः।

दन्तपत्रं कविदन्तनिर्मितं [करिदन्तनिर्मितं] कर्णाभरणविशेषः। अत्राविता व्यंग्यता इत्यनेन एकीभावः प्रत्याय्यते।

अत एवैकीभावप्रतीतेरेव मलयजेत्युदाहरणे नापि गतार्थत्वे [ऐंकाक्षयेत्यादि]।

एत्रत्वचेत्यादि [वेत्रत्वचेत्यादि] पुनरुदाहरणस्य प्रयोजनमाह **[अत्रेति]** निमित्तान्तरं भङ्गपतनोऽपि **[भृङ्गपयनोऽपि]** न तावधानविशेषजनितवैधर्म्यं ग्रहणरूपं अभेदं गण्डचम्पकयोरित्यर्थः। **अयमाशयः**—भृङ्गपतनामेव हि गण्डचम्पकयोरित्यर्थः। [Transcript omits five lines blank]

भेदग्रहः तत्प्रथमतः तत्तादात्म्यमिति प्रत्यायनादत्रायं सामान्यालङ्कारः। इति मिलिते उत्कृष्टगुणे निकृष्टगुणस्य विरोधालङ्कारः। इह भूतयोरल्पगुणतया भेदाग्रह इति विवेकः।

* * *

विशेषालंकारः कार्या [एकात्मा] एकरूपिणी, न तु एकस्त्रिधा वससीत्यादिवत् प्रत्याश्रय विलक्षणेत्यर्थः। तथैव तेनैव प्रकारेण। एतदेव वक्ष्यति वृत्तिकृत् **तेनैव यत्नेनेति**। एवञ्च "धुनोति चासिं तनुते च कीर्तिमित्यादौ खङ्गचम्पककीर्तिविस्तराणयोः एकप्रयत्ननिर्वाच्यत्वप्रतीतिविरहान्नायमलङ्कारः। दिवसप्युपजातानामित्यादौ [दिवमप्युपजातानामित्यादौ] नैयायिकादिनी ह्यागिरा [?] गगनाव धात्वं तथापि लोके कवयं एव आधारत्वेन कथं विभावनायाः कारणाभावे कार्योत्पत्तिः किं विशेषोक्तौ कारणसामाग्र्ये सत्यपि कार्यानुत्पत्तिः। अत एव वक्रोक्त्यलङ्कारसामान्यलक्षणं कथमिव कथं पुनः **[सारस इतिरभसेनेति]** सा वसति तव हृदये **सैवाक्ष्णोः** सारदले। अस्मादृशानां सुन्दरि अवकाशः कुत्र पापानाम्॥ **रभसेनेति** अशक्यवस्तुनिष्पत्तेरविलंवस्त्राणां [स्फुरदद्भुत] मित्यादौ अशक्यवस्त्वन्तः कारणं साक्षात्। **गृहिणी पतिवह [गृहिणी सचिवः]** इत्यादौ तु किं न मे हृतमपि किं न मे हृतम् तर्हि सर्वं हृतमिति व्यतिरेकमुखेनेति विषयव्याप्तये पुनरुदाहरणम्।

ननु [सर्वं] त्राधारद्वारेण कथमाधेयव्यवस्थितिः, कथं वा एकस्यैकदा हने [?] नेकव वृत्तः। एवञ्च रीत्योक्तालङ्कारोदाहरणान्यपि सङ्गतानीत्याह **एवंविधेत्यनेन**। क्वचिदुपमादावतिशयो विरहसूचनम्।

अतिशयोक्तिर्भेदेऽभेदादिरूपा । अत्र प्राचीनसम्मतिमाह **अत एवोक्तमिति** । वक्रोक्तिरतिशयोक्तिः । सैव विभाव्यते लोकोत्तररूपविशिष्ट्या विभाव्यते, अलङ्कारा-श्रयत्वव्यपदेशभाजनं क्रियते ।

* * *

तद्गुणालङ्कारः । **तद्गुणतां** ततः समानधर्मतां । **वर्णः** प्रगुणया उत्कृष्टतया, रथ्याः रथाश्रयाः, करीव प्रौढवंशालङ्कारः ? । अत्रोदाहरणे तद्गुणस्य तद्व्यवस्थिति-रित्याह **अत्रेति** । **अयमाशयः** । अत्र रविरथ्याश्रयानां गारुडकान्तिपरिग्रह इत्येक-स्तद्गुणः । अश्वनिष्ठानां गारुडग्राहजगुणानां हरिन्मणिगुणग्रह इति द्वितीयः । **धवलोऽसीति** । धवलोऽसि यद्यपि सुन्दर तथापि त्वया मम वंचितं हृदयम् । रागकृ-तेऽपि हृदये सुभगः निक्षिप्तो नक्तोसि ॥

धवलो निर्मलत्वेन आत्मनैव द्वयाभिमत इति सल्लोकः [?] वचन, प्रक्षे श्वेतः रञ्जितं स्नेहनिर्भरीकृतं शोभनीकृतञ्च । अत्र गाथायां द्वितीयार्द्धमेव प्रकृतोदाहरणमित्याह **अत्रेति** । इह च सहृदयस्य सानुरागतानिवेदनमेव विवक्षित-मिति संबोध्यस्याप्रकृतेति । सूत्रस्थित**स्यास्येत्य**स्याप्रस्तुतस्येत्यर्थ तत्क्रयेत्यर्थ तदाशे [?] प्रकृतार्थतेति पर्यवसानम् । **किञ्चास्येति** इदमप्रकृतं तत्क्रये हि [?] तदप्रकृतं च क्वचित्परामृश्यते, तेनाप्रकृतस्य प्रकृतरूपाननुहार एवेत्यन्योऽतद्गुणः । प्रकृतस्याप्रकृतरूपाननुहारो द्वितीय इति द्विविधोऽतद्गुणः । तत्र प्रथमपक्षे धवलोऽ-सीत्याद्युदाहृत्य गांगमित्यादिद्वितीयपक्षमुदाहरन्नाह **किञ्चेति** । नानुविधीयते अनुहरणनिमित्तेसत्यपीति भावः । गांगमित्यादावप्रस्तुतप्रशंसायां यद्यपि राजहंस-स्याप्यप्रकृतत्वम् तथापि गांगयमुनापेक्षया प्रस्तुतवर्णनीय राजप्रत्यासनुत्वात् [?] प्रकृतत्वं विधीयते ।

* * *

व्याघातालङ्कारः । अन्या विधीयते इति संबन्धः । तथैव तेनैव प्रकारेण अयमेवार्थो वृत्तौ । **तदुपायकमेवेति** । स एवोपायो यत्र तत्तदुपायकं नाम । निरुक्तिः **साधितत्वस्विति** । साधितस्य वर्णनो व्याहृतिमूलं यस्यालङ्कारस्य स तथा तस्य भावत्वम् ।

संकरसंसृष्टी

इत्थं प्रत्येकं शब्दार्थालङ्कारान्निरूप्य तेषां परस्परमिश्रणे संकराख्यौ भेदौ निरूपयति । यथाहि लौकिकालङ्काराणां हरेमुन्निकादिरूपाणां [?] अन्योन्य मिश्रणेन स्वर्गं.....................दि रूपताप्राप्त्या पृथगिह कश्चिद्विशेषः समुल्लसति, अनयोरपि तथाभावेन पृथगलङ्कारत्वात् तत्र प्रथममुकुटभेदतया मिश्रणे संसृष्टि-

माह **सेष्टाइति**। उक्तस्वरूपाणां समनन्तरं लक्षितस्वभावानां शब्दालङ्काराणा-मित्यर्थः। यथासंभवं लक्ष्यप्रसिद्धचनुसारेण भेदेनेति कारिकापदार्थः। **अन्योन्य-निरपेक्षतयेति**। **भेदश्चास्थितिः**। भेदश्चाश्रयतः स्वरूपतश्च। तेन यथाक्रम-मेकाश्रयानुप्रवेशस्य अङ्गाङ्गिभावस्य च सङ्करस्य व्यवच्छेदः। शब्दभागे काव्यस्य शब्दरूपे भागेंशे उभयत्र द्वयोरपि शब्दार्थभागयोरवस्थानमवस्थितिः। एवञ्च संदेहसंकरव्युदासः। **एकार्थसमवायस्वरूपेति**। एकस्मिन्नेव विशिष्टात्मनि काव्ये समाश्रितभावात्मिकेत्यर्थः।

कुसुमसौरभेत्यादावनुप्रासः। कनकलोकललेल [कलकलोलकलोल] इत्यत्र यमकम्। तेन द्वयोरत्र भेदेनावस्थितिः। इह च कनकलोलकलोल [कलकलोल-कलोल] इति कलोलकलो चेति यमकरूपकस्य एकाश्रयानुप्रवेशः सङ्करः। सो थेति [सोणथीति]।

स नास्त्यत्र ग्रामे य एतां महमहल्लावण्याम्।
तरुणानां हृदयलुण्टानं परिष्वज्यमानानां निवारयति॥

लावण्यस्य महमहत्वं प्रसभं प्रसरणं, हृदयलुण्ठनस्वरूपं परियुज्यमानानां परितो भ्रमन्ती। सोणत्थि एत्थुत्थेत्ययमनुप्रासः। हि अ अलूंडि [हि अ अनूंडि] इत्यत्र च रूपकम्।

च्छन्दो गाथारूपम्। अनयैव दिशा शब्दोभयालङ्कारयोरर्थोभयालङ्कारयो-श्च संसृष्टावुदाहरणमनुसर्तव्यम्।

एवमुद्भटभेदत्वे संसृष्टिं निरूप्य [प्रकटभेदत्वे संसृष्टिं निरूप्य] अनुद्भट-भेदत्वे [अप्रकटभेदत्वे] एवंविधं सङ्करं निरूपयति **अविश्रान्तीति** आत्मन्यविश्रन्ति-रूपमित्यस्य विवृतिः **एत एवेत्यादि**। अङ्गाङ्गित्वमित्यस्यार्थं अर्थग्राह्यानुग्राहकता मिति पदं लक्षणभागार्थं अङ्गाङ्गिभावमित्यस्यार्थः अङ्गाङ्गिभावाख्यः सङ्करविशेष इति लक्षणार्थं चेति काकाक्षिन्यायेन पूर्वपरयोरुभयोरपि संबुध्यते। आत्मला-नासादितस्वभावत्वं चाङ्गस्य चारुत्वोत्कर्षानुभङ्गभङ्गचपेक्षणादङ्गिनश्च स्वानु-लाभार्थं तदपेक्षणात् परस्परमनुग्राह्यानुग्राहकतां दधतीत्यर्थः। अङ्गनिष्पादनद्वारा अङ्गिनमनु, अङ्गीच चारुत्वप्रकर्षणद्वाराऽक्रमिभावः [अक्रमाभावः] संकीर्यमाणत्वं परस्परमनुपयुज्यमानत्वम्।

लुप्तायां च्छिन्नायाम्, तुलाकोटिर्नूपुरः इत्वरीणां गमनशीलानां। भाभिरिति शेषणे [करणे] तृतीया। करः किरणः हस्तश्च। वैरस्यं शोभणनारिगमः [?]

निर्वेदश्च विषादः। श्वेतवर्णः निर्मलाशयश्च। भस्मवदापाण्डुः भस्मला आपाण्डुश्च। पितृवने श्मशाने। अत्र जटाभाभिरित्यत्र, भस्म पाण्डुरित्यत्र च उपमा, कलङ्काक्षवलय इत्यत्र परिकरं, कपालेति च रूपकम्, वियोगिव्यापत्तेरिवेत्युत्प्रेक्षा। पितृवन इवेत्यत्राप्युत्प्रेक्षेति। केनचित् करधृतेत्यत्र वैराग्यं विषाद इत्यत्र त्र श्लेषः। एवमत्र चत्वारोऽलङ्काराः कण्ठोक्ताः। शशिनि तिरयति व्यवहारासमारोपात् सर्वेषाममीषां चारुत्वोत्कर्षहेतुरङ्गीभूता पंच समासोक्तिः अङ्गाङ्गिभावतया प्रतीयन्त इति। तथाहि **उत्प्रेक्षा वैराग्यविषाद इति**। श्लेषो उत्पत्तिहेतुस्तदनुसंधानादेवार्थान्तरप्रतीतेः श्लेषस्वरूपकोपमेयोत्पत्तेर्निमित्तं निर्वेदप्रतीतिरेव निज शयघनयधावणप्रतीतिः [?]

कलङ्काक्षवलय [कलङ्क एवाक्षवलय] मित्यत्र रूपकोपमासन्देहसङ्कराशङ्कां निरस्यति **लिङ्ग एवेति** [कलङ्क एवेति] करधृतत्वस्य कपकंसाधकत्वे [रूपकसाधकत्वे] हेतुमाह स्यकीति [अस्य हीति]। **तिरोहितमधः** कृतम्, **मुख्यतयावगम्यते** अक्षरनये [अक्षवलये] कलङ्कतादात्म्यारोपात्। कलङ्कस्योत्कटतया प्रतीतौ दोषमाह **तस्यैवेति**। तस्याक्षवलयस्य। नन्वेवं कलङ्कस्य करधृतत्वाभावे कथं काव्यानुसङ्गतिरित्याह **श्लेषेति**। असदेव रश्मितिरुद्धनस्यासंभवात् [?] प्रत्यासत्या चन्द्रमूर्तेरित्यर्थः उपयुज्यते, न तु अक्षवलय इव तद्वतः मूर्तेव [?] न तु रश्मिभिः उत्कटतया मुख्यतया प्रतिपत्तिः। ततः किमित्याह **न चेति**। अस्य कलङ्कस्य मुख्येभ्युपचार एव शरणं स्यात् **अयमाशयः** यत्र विशेष्यस्य विशेषणस्य मुख्य गौणाद्यामन्त्राभ्यां [?] व्यावृत्तिः। तत्र मुख्ये उपचारवृत्तिर्नोपपद्यते। किन्तु तदितरत्र। एवञ्च कलङ्काक्षवलय इत्यत्र उपमाकल्पनायां कलङ्कस्य मुख्यत्वे कथं तत्र विशेषणमुपचरितार्थम्। उपमानेन चाभिधेयार्थं वर्ततामित्यर्थः। एवंरूपोऽङ्गाङ्गिभावः।

राजतीति। इयं तटी राजति, अभिहतास्ताडिता ये दानवास्तेषां वासः [रासः] सरभसगर्जितं, तदतिपातिस्तदधिकाः सारावाऽसध्वलयो [?] नदा यस्यां सा। यजभा [गजता] गजसमूहश्च। यूथं अतिपाति अतिशयेन रक्षति अविरतमविश्रान्तं सद्दानं मदस्तेन रवशःश्रेष्ठाः, सारा उत्कृष्ठा। वलनदा दानवा नित्यति [निद्यति] संण्डयतीत्यर्थः।

अनुलोमप्रतिलोमौ यत्रात्मनो न पठितापरसंततिः। प्रतिलोमपाठेऽपि तादृगेव पादद्वयं। द्वितीयपादः चतुर्थपादश्च परस्परापेक्षे। इह हि यमकानिर्वाहप्रवृत्तस्य करेरपृभथग्यत्न निवृत्तावानुलोमस्योत्पत्तौ यमकापेक्षिता। यमकं चात्र तदाश्रयेणैव दुष्कररीतिवासना वासितानां मनसि कमप्याप्रासिकं [? ? ?] परिमितोऽयमाधत्तो

एवञ्च ग्रन्थकारेण प्राचीनानुरोधेनैव लिखितं, वस्तुतस्त्वत्र न यमकस्य चित्रनिर्वाहकता, चित्रस्य वा यमकनिर्वाहकता। यदाहु :—यथा न शब्दयोः परस्परोपकारित्वं तथा शब्दा [र्था] लङ्कारयोरपीति। किञ्चानुलोमप्रतिलोमस्य पृथग्यत्न निर्वर्त्यत्वमनुभवसिद्धमेव। तेनात्रैकाश्रयानुप्रवेशाख्यः सङ्कर एव ज्यायान्।

अङ्गाङ्गिभावसन्देहसङ्करयोः पुनरर्थानुसन्धानेऽप्यलङ्कारमात्रं विषयः **समावेशे**ऽवस्थाने एव इतव [?] निश्चयाभावेनेति भावः। **विरोधात्** एकविषये एकाकारीनागीस्थितिसाहित्यहेतुकात् **यत्रेत्य**नंतरं निश्चितत्वेनेति शेषः। कुतो निश्चयभाव इत्याह न **चेति**। साधकमुपपादकं बाधकं निरोधकं येन हेतुना परिगृह्यते निश्चिततयाङ्गीक्रियते। समुच्चयेन कारिकागतचकारार्थेन। सङ्करस्य प्रक्रान्तस्य। **जहेति**।

यथा गंभीरः यथा निर्भरः यथा च निर्मलच्छायः।
तत्किं विधिना सस्वरसपानीयो जलधिर्न कृतः॥

सुरसवाणीऽ इति [सरसवाणीओ] पदस्य पक्षे स्वरसवाणी को [?] मधुरावाणी का [?] मधुराणीति यावत्। प्रस्तुते वर्णनीयत्वादप्रस्तुतोऽर्थः कश्चित्पुरुषविशेषः संदेहः प्रसरणात्य [त्व] ज्ञानादिति भावः।

एवं द्वयोः सन्देहे उदाहृत्यानुकुलामुदाहरति [?] **यथाचेति** [यथावेति] विनिवद्धा [वनिरुद्धा] स्थगित सकलदिकं खण्डितामिमासञ्च, तमोऽन्धकारः मोहो वा। अत्र समासोक्तिपक्षे **एतदिति** द्वन्द्व विशेषणं न तु प्रकृतिनिर्देशनपरम्। एतच्च विविच्योक्तं गौणी लक्षणा, सरेतक्रयं [तद्वक्वं] द्वन्द्वरूपं, तत्क्रपतणादिति पाठे [तद्रूपवंशात्] तद्रूपेण वशादित्यर्थः। समुच्चयः। इदं वक्त्रमिन्दुमण्डलं चेत्येवमावगरः [?] दीपकं, मुखेन्द्रोः प्रकृताप्रकृतयोः प्रसीदतीत्येकक्रियत्वात् तुल्ययोगिता, मुखचन्द्रयोरपि वर्णनीयत्वेन प्रकृतत्वात् प्रदोषे वर्णनीय इत्यर्थः तत्र हि चन्द्रवर्णनाप्रकृतामुखनैर्मल्येत्यनन्तरं वर्णनीया इति शेषः।

एकस्यालङ्कारस्य साधकत्वमपि किमनुकुलेनेनेति। एवं बाधकप्रतिकूलतेति हासद्युतेर्मुख्यतयाऽवगम्यमानत्वं उपमेयतयोपनिबद्धत्वात् शशिनि तु न तथा प्रतिकूलता तस्यासंभवोऽपि तत्प्रतिनिधीभूतयोस्तयोः संभवात् अपत्व [?] मिन्दोरनुगुणं रक्तरूपमेकस्मिन्निन्दौ सति किमपरेणेन्दुनेति भासात्। न तु वक्त्रस्य प्रतिकूलमिति इन्दुसमानगुणे तदुक्ते सति किमयमपर इन्दुरुत्पद्यत इत्यपि प्रतिभासेऽत्यन्तासदित्यभावात् असंभवादनुपपत्तेः रूपकस्य बाधकमिति। **अयमाशयः** यत्र स्वल्पारोप्यमाणमुपमेयमवच्छादितस्वरूपं निजरूपेण व्यवहारयति तद्रूपकं। अत एवोपमानस्योत्कटत्वमित्याह **तस्या अबाधकतेति** :

यत्रोपमेयमुपमानावच्छादितरूपतया स्वतन्त्रमेव प्रतीयते तत्रोपमा । अत एवात्रोपमेयस्योत्कटत्वम् । एवञ्चात्राम्बुजस्य साञ्जरसिंजिताधारतस्य [मञ्जीर-शिञ्जिताधारस्य] अभावात् अम्बुजस्य नोत्कटतेति, न तु तर्हि पादस्य तत्सम्भ-वादुत्कटत्वमित्युपमायाः साधकत्वमपि कथन्नोच्यत इत्याह—**नन्विति** । साधकत्वा-भिमाने हेतुमाह विधीति विधीयतेऽनेनेति विधिः । साधकं तदुपमर्दनस्ततो वनोयसः [गरीयसः] पादस्य खलु मञ्जीरशिञ्जितस्वभावमात्रेण नोपमा निश्चेतुं शक्यते । यथा मुखचन्द्रःशोभत इत्यादौ, मुखे शोभाया संभवेऽपि न रूपकबाधकता । किन्तु तत्र शोभायाः चन्द्रेऽपि संभवा दुपमारूपकन्देहसंकरः । यदि तु बाधकस्य प्रतीतिः तदैवान्यतमस्य निवास इत्येवमन्यत्रापि साधकबाधकत्वे बोद्धव्ये

स्फुटं व्यवस्थितंमिति सम्बन्धः । एकत्र विषय इत्यस्य निवृत्तिः । अभिन्ने च पाद इति । पद इत्युपलक्षणम् । तेनापादेऽनेकपदेऽप्ययं सङ्करो बोद्धव्यः । **शब्दार्था-लङ्कारावित** । शब्दार्थालङ्कारवन्नालङ्कारौ, शब्दार्थालङ्कारौ वा तत्र प्रथमे "कनक-लोलदृशाऽन्यथा' इत्यत्र कनकलोलकलोल इति कलोलकललेति यमकद्वयम् । कलो-कलो इत्यत्रैकाश्रेऽनुप्रविष्टम् यथा वा—

कटाक्षेणापीय क्षणमपि निरीक्षेत यदि सा
तदानन्दः सान्द्रः स्फुरति पिहिताशेषविषयः ।
सरोमाञ्चोदञ्चत्कुचकलशनिर्भिन्नवसनः
परीरंभारम्भः क इव भविताम्भोरुहदृशः ।।

अत्र क्षणयोः साम्यात् छंदकानुप्रासः [छेकानुप्रासः] । निरीक्षेतेत्यद्रक्षकार-मादाह [?] वृत्यनुप्रासः । क्षणे क्षणेत्यत्राद्वितीये ।

अहिण अस ॐ अ अरसि एअ अपहि असामा ।
इएसु दिअदेसुं महइपसारिअणी आणणअंचो वविन्दानं ।।

अत्र पथिकानां श्यामायतेत्युपमा । पथिकजाकाजिकोस्विति [?] च रूपकम् । सामांइ····· त्येकपदेऽनुप्रविष्टे ।

तृतीयमुदाहरति **स्पष्टेति** । रुद्धा निरुद्धा, संचुकोच संक्षिप्तमासीद्विनिमी-लितञ्च । एकस्मिन् पदे आश्रये समस्तत्वाद्वारकूलामपि [?] पदानामेकपदत्वं एवमाकारेण चालङ्काराणां संसर्गभिन्नानंलङ्कारत्वेऽपि विभिन्नवर्णा इत्यादीनां तद्गुणोदाहरणत्वं न युक्तमिति न वाच्यम् । तथाचाहुःअलङ्काराणां संपर्कस्यैव

पृथगलङ्कारता । संपर्किणां तु प्रातिस्विकस्वभावापरित्याग एव संसृष्ट्याङ्गाङ्गि समुनन प्रमुल्लार्यचारुत्व प्रकर्षमनालम्ब्य प्रतीते विश्रामविरहः । अत एवोक्तं— अविश्रान्तिद्विषा [जुषा] मात्मनीति ।

किं चैवमलङ्काराणां परस्परसंसर्गाभावस्य प्रायिकत्वेऽप्येकैकस्य बुद्ध्यारोहेऽपि तत्कृतचमत्कारहानेरसंभवात् एकेनापि व्यवहारः । यथा तु [यदा तु] समुदायमवलम्ब्य तत्कृतचमत्कारस्य बुद्ध्यारोहः तदा संसृष्ट्यादिव्यवहारः । एवञ्चैवंविधेषु स्थलेषु अस्यैव ग्रन्थकारस्य ध्वनिगुणीभूतव्यंग्यप्रस्तावोक्तो यद्यपि नास्ति कश्चिद्विषयो यत्र ध्वनिगुणीभूतव्यंग्ययोः स्वप्रभेदादिभिः संकरः संसृष्टिर्वा नास्ति तथापि प्रधाने [प्रधान्येन] व्यपदेशा भवन्तीति क्वचित् केनचिद्व्यवहार इति रीतिरनुसर्तव्या । उपसंहरति तेनेति । प्रकारान्तरेण भेदप्रभेदसंख्यानेन, आनन्त्यात् संकीर्यमाणानामलंकाराणां प्रकारानन्त्यप्रयोजितत्वादिति भावः ।

पूर्वं श्लेषप्रसङ्गे उक्तमपि द्रढीकर्तुं पुनः स्मारयति यथेति । शब्दार्थोभयगतत्वेनेत्यत्र यथासंभवमिति बोद्धव्यम् । दोषगुणयोरुभयगतत्वविरहात् अभावात् अनुपपन्नत्वात् परम्परितरूपकं श्लिष्टशब्दनिबन्धनम् । तथाहि—यत्र विद्वन्मानसहंसेत्यादौ मानसस्य परिवृत्त्यसहत्वं हंसशब्देन । तथा त्वंशब्दहेतुकाः श्लिष्टशब्दनिबन्धनाः प्रभूतिशब्देन व्यतिरेकादि विशेषसंग्रहः । वस्तुस्थितसिद्धान्तव्यवस्था । अनुजव्यतिरेकावस्थ [अन्वयव्यतिरेकावस्य] मारोपितव्यौ । तौ विना शब्दार्थस्याश्रितद्वयस्याप्यभावादित्यर्थः । अत्र हेतुमाह तदाश्रयं, अन्वयव्यतिरेकाश्रयं, विशिष्टस्य नियतस्य व्यतिरेको भेदः ।

संप्रत्यलङ्कारपरिज्ञानानन्तरं तद्गतदोषणां संज्ञानता [जिज्ञासता] भवतीति दोषनिरूपणप्रस्तावमुल्लङ्घ्य उक्तदोषेषु तदन्तर्भावं दर्शयति । एषामिति । एषां शब्दार्थालङ्काराणां यथायोगं उक्तेष्वन्तः पतन्तीव्यत्वयः [उक्तेष्वन्तर्भवन्तीव्यन्वयः] । उक्तेषु दोषेषु अन्तर्भावप्रकारमेव दर्शयति वृत्तिकृत्, तथाहीति प्रसिद्ध्यभावः प्रसिद्धानुता [?] विरहः । वैफल्यमास्वादोत्कर्षकताहानिः वृत्तेरर्थप्रास भेदस्य [अनुप्रास भेदस्य] विरोधः । प्रधानीभूतास्वाद-विरोधित्वम् । अनर्थाः अनर्थकारणानि दोषा इत्यर्थः । नातिक्रामन्ति नातिवर्तन्ते, तत्स्वावत्वात् तद्विशेषत्वात्, तेषां स्वभावः प्रतिनियतो भावो लक्षणं विविच्यते एभिरिति विग्रहात् । चक्री इन्द्रः, हरीनश्वान्, कर्तृकर्मप्रतिनियमेनेति । विशिष्टादीनां विशेष्यावकारयन्मादेः [?] प्रशंसा । भणति यदि [भण तरुणि] रमणमन्दिरं गच्छसीति तु तत् त्वदीयं त्वत्सम्बन्धि मे मम किं किमपि प्रयोजनं नास्तीत्यर्थः ।

अरुणचरणेति संबुद्धिः। करुणरणकसुकंठां अदभ्चेति [.?] **अस्यार्थं प्रति**कूलदोषवर्णन प्रस्तावे व्याख्यातः। परुषवर्णाडम्बरः परुषवर्णनिष्पाद्यः, **चित्तक्षोभः**, यमनं निबन्धनमप्रयुक्तत्वं कविपरम्पराप्रयोगविरहात्। **सदंता सदम्भा इत्यत्र** प्रथमेऽन्तः शब्देन रत्नप्रभा [?] द्वितीये जनं दुरंतरं दुर्वं तलं [?] **अनवस्थानेऽ**नर्थावहत्वमित्यर्थः। **निर्णयतो** निश्चयज्ञानतः, ससंभाः सदम्भाः एकपटाः [सकपटा] प्रमाणं तादृशि तथाविधे धर्मः साधारणः, तदाश्रये न्यूनाधिकत्वे धर्मस्य न्यूनत्वे चेत्यर्थः न व्यभिचरतः। नातिवर्तेते। **अयमित्यादौ** ब्रह्मणः प्रतिसङ्ग ब्रह्मणे भेदविधक्षया [विवक्षया] जातिशब्दत्वम्। यातः [यतः] प्रचार उपमेयस्य दृष्टस्य [?] ग्रहणं शब्देनोपादानं प्रतीयमानेनोपात्तादन्येन।

चिन्तारत्नमिवेत्यादौ त्रैलोक्यसारभूतत्वादिना क्वचित् संभविनेत्यर्थः। नानात्वेऽपि भिन्नरूपत्वे अस्य सामान्याभिधायिपदस्य अधगमक्षस्वभाववत्वात् [?] उभयसंबन्धयोग्यस्वभावा परिसुरशालः [?] **गुणैरित्यादौ** गुणरत्नयोर्भिन्नलिङ्गत्वेऽनर्घ्यैरिति तद्विशेषणं नान्यथाभावमापन्नम्। **तद्वेग** इत्यादौ वेगस्यैकत्वेन असदृश इत्यादि विशेषणान्यथाभावः। असदृश इति स्वप्रत्ययान्तत्वेन वेगस्य [वेषस्य] क्विप्रत्ययान्तत्वे परिभ्रमणांमधुरताभूत इति कप्रत्ययान्तत्वे भ्रिभ्रणां [स्त्रीणां] विशेषणं दधत इति क्रियायां, वेषपक्षे दधधारणे, विभ्रमपक्षे च डुधाञ् धातुः। संबोध्यमाना वासवदत्ता, परभागः शोभा, असंबोध्यमानमासा हि विभ्राजते न तु विभ्राजसे, **एवंजातीयकस्य विध्यादि** सदृशस्याशीमन्त्रणादेरित्यर्थः।

अर्धारममादित्यन्तः पूर्वपक्षग्रन्थः। तच्चरितं प्रतीयमानं धर्मन्तिरमिति संबन्धः। समानमुच्चरितंमुपात्तवाचकं, प्रतीयमानं व्यज्यमानं, उपादाय। आर्थीत्यं प्रथमकमलमिव स्वरति [सुरभि] तस्या वदनं पश्मामि। अ [उ] **च्चरितं स्वरभिन्नं** सामान्यधर्ममाश्रित्य उपमाया विश्रान्तौ उपमेयस्य मुखस्य सकृत् **दर्शनक्रिया** सम्बन्धः। द्वितीयेऽत्रैव सुरभिपदाप्रयोगे।

यत्रापीति अपिः पूर्वोक्तसमुच्चये। **अयमाशयः**। न **केवलं कमलमिव सुरभि**मुखं पश्यामीत्यादिवत् दर्शनादिक्रियाया उपमेयमात्रगामित्वे कालादि भेदो नास्ति। अत्र यत्र युधिष्ठिर इवायं सत्यं वदतीत्यादौ सत्यवदनक्रियारुपेण **उपमेनैव** साधारण धर्मेणोपमा गम्यते तत्रापि कालादिभेददोषो नास्तीत्यर्थः।

कथमत्र न दोष इत्याह-**अत्रेति**। प्रतिपश्यामहे **अयमर्थः** इह यद्यपि सत्यं वदतीति क्रियाया **उभयगामित्वं** तथापि सत्यवादिनि प्रतीयमानं **साधारणधर्ममाश्रित्य** उपमाया विश्रान्तिरिति न कालभेददोष इति। एवं च न **पुनरुक्तिरित्याह—सत्येति**।

वैश्रायगिति वैषोयं धनव्ययमोक्षणे **नदुर्थं काव्यं** ? नैव यथा कथंचित् **पुट्टभानि** ? युधिष्ठिर सत्यवदनेन युधिष्ठिरवदाजन्मस्वभावसिद्धेन न तु लाभ पूजा क्षति काम्यप्रयुक्तेन सत्यं वदतीति **संप्रतिपत्यर्थः सिद्धान्तमाह**-सत्यमेवैतदिति । स्थितेष्व-र्थालंकारेषु कुतो नालित्रज्यमित्याह-**अप्रस्तुतेति** । अप्रस्तुतेति प्रस्तुतं काव्ये **मुख्य**-भूतं वस्तु रसादि चेत् सहृदयः प्रमाणं साक्षिणः असादृश्यं उपमानोपमेयोरसाधर्म्यं ग्रन्थामित्यादौ न केवलं ग्रथनादेरेत्र चन्द्राद्यसंभवित्वेन सादृश्यं कित्वानंददायित्वा-देरपि प्रसिद्ध-विरहात् । क्रोवोवदादय ? इत्यादि शब्देन मन्ये शंके न्यूनमित्यादि शब्दसंग्रहः केवलस्य दर्शितोदाहरणादन्यत्र प्रयुक्तस्य तस्य साधर्म्यमात्रस्य तस्या-मुत्प्रेक्षितं संभावनाविषयं निरुपारव्यमनीकं शशविषाणादि प्ररव्यं तस्य संभावना **विकस्य** वस्तुनः सत्य**समनुन्नय** उपपत्तिसंपादनाय संभावनयैव **निराकृतायेत्यर्थः** । उपमानविशेषं सदृशवस्तुविशेषणं प्रकृतगततया तद्व्यवहारं समारोपंय अत्र पतित-ग्रंथोऽघः ।

पत्रे लिखितं **उपसंहारं** पूर्वं ग्रंथसमाप्तिर्दर्शयति वृत्तिकृत्तदेत इति **अन्येपीति** एवं जातीया एवंदर्शितप्रकारापेक्षत्वं जात्याक्रांता यथा उत्प्रेक्षाया वर्णनीय निकर्षप्रतिपत्तिः । व्याजस्तुतौ चात्यंतासत्येनार्थेन व्याजेन स्तुतावनुचितार्थत्वं क्रमेण यथा दृश्यते मुखचन्द्रे ते नेत्रे नीलोत्पले द्विषी । द्विधा भूता कलंकस्य रेखा वाहुदनेनर्कि ? ।। अत्र वर्णकांतामुखस्य सकलंकचन्द्रत्वप्रतीतिरित्यनुचितार्थेनापि महीन हाबश्च माता जायाधुनाधुना वर्षशते च पूर्णेस्थषभविस्तीर्ण परे धारित्री । युक्तं किमेतदुदसत् प्रभूनां । अत्र पृथिव्याश्च **वत्वंत** कुलधर्ममिति स्तुते व्यंग्यत्वेपि वाच्यस्यातीवगर्भास्पदत्वमनुभवसिद्धिमिति अनुचितार्थत्वं समासोक्तौ लिंगासंगति रसमर्थत्वं एवमादयो लक्षतः **सात्रनश्च** [शास्त्रतश्च] विज्ञेया इत्यर्थः ।

संपूर्णं अशेषविवक्षितार्थयुक्ततया पूर्णं समाप्तं । कारिकारूपसूत्रावलिस्वरूपं अस्माकं तद्व्याख्यानाभिव्यक्तं काव्यस्यार्थात् सांगोपांगस्य लक्षणंलक्ष्यतेऽस्मिन्निति । व्युत्पत्या वाक्यजा····· पं लक्ष्मीर्वक्षोर्मुरारेस्विति कवयगतेर्भोगमालांगमौने-

मौनि सिंधुः स्वराणामधिवसति विधेर्भाविता यावदस्य ।

तावत् काव्यप्रकाशाखि ··न्ववधिगमान्वारभासार्ककोटि-

व्यख्यां विख्यातिमेषा कविमुकुटमणेर्विश्वनाथस्य यावत् [यायात्]

।। इति श्रीमन्नारायणचरणारविंदमधुकरालंकारिकचक्रवर्तिध्वनिप्रस्थान-परमाचार्याष्टादशभाषानिवासिनीभुजंगसंगीतविद्याविद्याधरकलाविद्यामालतीम-धकरविविधविद्यार्णवकर्णधारसान्धिविग्रहिकमहापात्रश्रीविश्वानाथकविराजकृतौ **काव्यप्रकाशदर्पणे** अर्थालंकारनिर्णयो नाम दशमोल्लासः ।। **शुभं भवतु कल्याणं** ।।

संवत् १७३० रामकृष्णचरणे मम भक्तिरस्तु ।।

मुद्रक : एकेडमी प्रेस, दारागंज, इलाहाबाद. फोन-2500970